




Trade Mark
SCALE
Non Com



206

शब्दकल्पद्रुम



शब्दकल्पद्रुम
५०६

२८५५ तं०

१२


दू

पत्राणि



२०८

शब्दकल्पद्रुम



२८५३

ॐश्रीगणेशायनमः


शब्दकल्पद्रुमः अर्था
त् एतद्देशस्थ समस्त कोषशा
स्त्रशास्त्र सङ्कलिताकारादिवर्ण
क्रमविन्यस्त शब्दलिङ्गनानार्थ पर्याय प्रमा
ण प्रयोग धातु तदन्त तद्धितान्ताभिधेय स
हित तत्तच्छब्द प्रसक्तोप्पित वेदवेदाङ्ग पुराणेतिहास ज्योति
स्तन्त्राख्यानकाव्यालङ्कार छन्दः प्रभृति नाम लक्षणोदा
हरण व्याकरण रोगनिदानौषध स्मृत्युक्त
व्यवस्थादि संयुक्त सर्वदर्शन म
तानुसारि संस्कृता
भिधानग्रन्थः।

तत्र
चतुर्थकां
डः राज श्रीरा
धाकान्त बहादुरेण
विरचितः ७९· शकाब्दीय
समटशाशन शकाब्दे क
लिकाताख्य नगरे
श्रीप्राणकृष्णना
गेन मुद्रा
ङ्कितः।



भ भकारः स च व्यञ्जन वर्णविंशतितमः पवर्गीय चतुर्थो वर्णः अस्योच्चारण स्थानं ओष्ठः इति व्याकरणं तस्य स्वरूपादि यथा भकारं शृणु चार्वङ्गि स्वयं परम कुण्डली महामोक्ष प्रदं वर्णं तरुणादित्यसं प्रभं पञ्च प्राण मयं वर्णं पंचदेव मयं सदा इति कामधेनु तंत्रं तस्य लिखन क्रमो यथा। ऊर्द्ध्वादिः क्रमतो रेखा वामे वक्रा तु कुण्डली ॥ पुनश्चाधो गता सैव अत ऊर्द्ध्वं गता पुनः ब्रह्मा शम्भुश्च विष्णुश्च क्रमतस्तासु तिष्ठति इति वर्णोद्धारतंत्रं ॥ भं क्ली नक्षत्रं ॥ इत्यमरः ॥ ग्रहः इतिशब्दरत्नावली ॥ राशिः यथा राशिनामानिच क्षेत्रं भं गृहं ऋक्षं नाम च इतिज्योतिस्तत्त्वं ॥ भः पुं शुक्राचार्य्यः ॥ इतिमेदिनी भ्रमरः इत्येकाक्षरकोषः ॥ भ्रां-तिः इति शब्दरत्नावली ॥ ॥ भक्तं क्ली अन्नं ॥ इत्यमरः अथ भक्तस्य नामानि साधनं गुणाश्च भक्तमन्नं तथान्यञ्च कथितं कूरंव कीर्तितं ओदनो द्वयोस्त्रियां भिस्सा दीदिविः पुंसि भाषितः ॥ सधौतां स्तण्डुलान स्फीतां स्तोये

पंचगुणे पचेत तद्भक्तं प्रस्रुतं चोष्णं विशदं गुणवन्मतं भक्तं वाह्निकरं पथ्यं तर्पणं रोचनं लघु अधौतमस्रुतं शीतं गुर्व्वरुच्यं कफप्रदं इति भाव प्रकाशः हरयेनिवेदितान्नस्य नित्यं भक्षणे फलं यथा ये विप्रा हरये दत्त्वा नित्य मन्नञ्च भुञ्जते उच्छिष्ट भोजनात्तेषां हरे र्दास्यं लभेन्नरः ॥ हरये अदत्त्वा तद्भक्षणे दोषो यथा अदत्त्वा हरये भक्त्या भुञ्जते चेद्भ्रमादपि पुरीष सदृशं वस्तु जलं मूत्र समं भवेत् शूद्रस्य हरिभक्तस्य नैवेद्य भोजनेनोत् स्लाकः ॥ ग्रामान्नं हरये दत्त्वा पाकं कृत्वा च खादति ॥ अन्नदानफलं यथा अन्नञ्च सर्वनीविभ्यः पुण्यार्थं दातुमर्हति दत्त्वा विशिष्टेभ्यो विप्रेभ्यो विशिष्टं फल माप्नुयात् अतो दत्त्वा मानुषेभ्यो लभेत द्विगुणं फलं ततो विशिष्ट शूद्रेभ्यो दत्त्वा तद्विगुणं फलं दत्त्वान्नं वैश्यजातिभ्य स्ततश्चाष्ट गुणं फलं दत्त्वान्नं क्षत्रियेभ्यो विवैश्यानांद्विगुणं भवेत ॥ क्षत्रियाणां शतगुणं विप्रेभ्यो ऽन्नंप्रदाय च विप्राणांच शतगुणं सा



सते वाप्नोति फलं ॥ शालग्रामे
शालग्रामं भक्तं विप्रे लभेद्ध्रुवं ॥
सचान्नं हरये दत्त्वा भुंक्ते भक्त्या च
सादरं ॥ विप्रवे भक्तं विप्राय दत्त्वा
दातुश्च यत् फलं तत्फलं लभते
ध्रुवं भक्तं ब्राह्मणभोजने ॥ भक्तेन
हि हरिस्तुष्टो हरौ तुष्टे च देवताः
भवन्ति सिद्धाः शास्त्रेषु यथास्त्र
ञनिषेधनात् इतिब्रह्मवैवर्त्ते श्रीकृ
ष्णजन्मखण्डे ८१ अध्यायः ॥ तस्य
एकादश्यां पापाश्रयत्वं भक्तेऽदो
षश्च यथा एकादश्यामागतायां पा
पानि यानि जगत्त्रये स्थानञ्च अन्नमा
श्रित्य भवन्ता पापपूरुष ॥ अन्नमा
श्रित्य तिष्ठन्ते भवन्तं पापपूरुषं ॥
न हनिष्यति मन्मूर्त्ति रियमेकादशी
तिथिः तस्मादन्नं न भोक्तव्यं क
दाचिदपि सत्तमैः आत्मनो हित
मिच्छद्भिः संप्राप्ते हरिवासरे ॥ सं
सारे यानि पापानि तान्येवैकादशी
दिने ॥ अन्नमाश्रित्य तिष्ठन्ति पु
ण्डरीकेक्षणाज्ञया ॥ कृत्स्नं सर्व्वं
पापानि नरकान्निष्कृति भवेत् न
निष्कृति र्भवेत्तूर्णं भुञ्जतां हरिवास
रे यस्मां भक्तानि यावन्ति भुञ्जते ह
रिवासरे ॥ प्रतिभक्तं ब्रह्महत्या
कोटिजं पातकं लभेत् ॥ सर्व्वपा
पाश्रयं भक्तं त्यक्तव्यं हरिवासरे ॥
मोहाद्ये भुञ्जते वापि ते ज्ञेयाः पा
पिनो नराः ॥ इतिपाद्मे क्रियायो
गसारे २१ अध्यायः ॥ ॥ वर्ज्ज
नीयान्नं यथा ॥ ज्ञानात् शूद्रस्य वि
प्रोऽन्नं मोहाद्वा यदि वान्यतः ॥
स शूद्रयोनिं व्रजति यस्तु भुंक्ते ह्यना
पदि ॥ षण्मासान् यो द्विजो भुंक्ते शू
द्रस्यान्नं विगर्हितं जीवन्नेव भवेत्
शूद्रो मृतः श्वाचाभिजायते ब्राह्म
ण क्षत्रिय विशां शूद्रस्य च मुनीश्व
राः यस्यान्नेनोदरस्थेन मृतस्तद्यो
नि माप्नुयात् राजान्नं नर्त्तकान्नं च
तक्षणोऽन्नं कर्म्मकारिणः गणान्नं
गणिकान्नं च षण्डान्नञ्चैव वर्ज्जयेत्।
चक्रोपजीवि रजक तस्कर ध्वजिनां
तथा गान्धर्व्वलोहकारान्नं सूतका
न्नं विवर्ज्जयेत् कुलाल चित्रकर्म्मान्नं
वार्द्धुषेः पतितस्य च पौनर्भव छा
त्रिकयोः अभिशस्तस्य चैव हि स्वर्ण
कार शैलूष व्याधबन्धातुरस्य च
चिकित्सकस्य चैवान्नं पुंश्चल्यादा।
ण्डिकस्य च स्तेन नास्तिकयोरन्नं
देवतानिन्दकस्य च सोमविक्रयिण
श्चान्नं श्वपाकस्य विशेषतः ॥ भा
र्य्याजितस्य चैवान्नं यस्य चोपपतिः
गृहे उत्सृष्टस्य कदर्य्यस्य तथै।


वोच्छिष्टभोजिनः ॥ अपांक्त्यान्नञ्च सं
घान्नं शस्त्राजीवस्य चैव हि क्ली
वस्यान्नं संन्यासिनश्चान्नं मत्तोन्मत्तस्य चै
वहि भीतस्य रुदितस्यान्नं अव
क्रुष्टं परिक्षुतं ॥ ब्रह्मद्विषः पापरु
चेः श्राद्धान्नं सूतकस्य च ॥ वृथा।
पा[illegible]कस्य चैवान्नं शावान्नं श्वशुरस्य
च अप्रजानान्तु नारीणां कृतघ्नस्य
तथैव हि कन्यकान्नं विशेषेण शस्त्र
विक्रयिणस्तथा शौण्डान्नं नालिका
नञ्च भिषजा मन्त्रमेव च विद्धप्रजन
नस्यान्नं परिविन्नान्नमेव च ॥ पुन
र्भवो विशेषेण तथैव दिधिषूपतेः
अवज्ञातं चावधूतं सरोषं विस्मया
न्वितं गुरावपि न भोक्तव्यं स
न्नं संस्कारवर्ज्जितं दुष्कृतं हि म
नुष्यस्य सर्व्वमन्नेषु तिष्ठति । योयस्या
न्नमश्नाति स तस्याश्नाति किल्बि
षं ॥ आभीरः कुलमित्रं च गोपा
लोदास नापितो यतेः शूद्रेषु भो
ज्यान्ना यश्चात्मानं निवेदयेत् ॥
कुशीलवः कुम्भकारः क्षेत्रकर्म्मक ए
व च एते शूद्रेषु भोज्यान्ना दत्त्वा
स्वल्पं पणं बुधैः इति कौर्म्मे उप
विभागे १९ अध्यायः ॥ ॥ ॥
भक्तः त्रि तयः ॥ इति हेमचन्द्रः
अथ श्रीभगवद्भक्त लक्षणानि ।
लिङ्गपुराणे ब्रतकर्म्मगणे ज्ञानभो
ग तन्मादि मत स्वपि शैवेस्वपि च
कुलस्य भक्ताः संति तथा तथा।
श्रीभागवते एकादश स्कन्धे उत्त
मभक्ता यथा ॥ ज्ञात्वाज्ञात्वाथ ये
वैमां यावान् यश्चास्मि यादृशः ॥
भजंत्यनन्यभावेन ते मे भक्ततमा
मताः मध्यम भक्तोयथा ॥ ईश्वरे
तदधीने वा बालिशेषु द्विषत्सु च
प्रेम मैत्री कृपोपेक्षा यः करो
ति समध्यमः ॥ प्राकृत भक्तो यथा
अर्च्चायामेव हरये पूजां यः श्र
द्धयेहते न तद्भक्तेषु चान्येषु सा
भक्तः प्राकृतः स्मृतः इति श्रीहरि
भक्तिविलासः ॥ ॥ अपि च भा
क्तानां लक्षणं ब्रूहि भक्तानुग्रहका
तर येषां स्पर्शन सन्दर्शनात् सद्यः
पूतो नराधमः हरिभक्तिविहीना
श्च महाहंकार संयुताः स्वप्रशंसा
रता धूर्त्ताः शठाश्च साधुनिन्दकाः
पुनंति सर्व्वतीर्थानि येषां स्नाना
वगाहनात् ॥ येषां च पादरजसा
पूता पादोदकान्मही ॥ येषां सं
दर्शनं स्पर्शं देवा वाञ्छंति भारते
सर्व्वेषां परमो लाभो वैष्णवानां
समागमः नत्वन्मयानि तीर्थानि न
देवामृच्छिलामयाः तेपुनंत्युरुकाः

तेनविस्मभक्तः तत्पादद्रेहो ॥ सौति
रुवाच महालक्ष्मीवचः श्रुत्वा लक्ष्मी
कांतस्य सस्मितः निगूढ तत्त्वकथि
तमृषि श्रेष्ठोपचक्रमे श्रीनाराय
ण उवाच भक्तानां लक्षणं लक्ष्मि
गूढं श्रुतिपुराणयोः ॥ पुण्यस्वरूपं
पापघ्नं सुखदं भक्ति मुक्तिदं ॥ सा
रभूतं गोपनीयं नवक्तव्यं खले
षु च गुरुवक्त्राद्विस्मभक्तो यस्य कर्णे
प्रविश्यति ॥ वेदान्त वेद वेदाङ्गा
स्तंपवित्रं वदंति हि ॥ पूरुषाणां
शतं पूर्वं पूतं तज्जन्म मात्रतः ॥
स्वर्गस्थं नरकस्थं वा मुक्तिमाप्नोति
तत्क्षणात् येः केश्चिद्यत्र वा जन्म
लब्धं येषुच जंतुषु जीवन्मुक्तास्ते
च पूतायांतिकाले हरेः पदं ॥ मद्भ
क्तियुक्तोमत् स्तुज्जातियुक्तो मद्गुणावि
नः मद्गुणश्लाघनीयश्च सततं विष्टश्च
सन्ततं मग द्रुरः साक्ष नेत्रः श्यामवि
श्रुतप्रवच नवांछंति सख मुक्ति
सालोक्यादि चतुष्टयं ॥ ब्रह्मत्वममर
त्वं वा तद्वाञ्छा ममसेवने इंद्रत्वंचम
नुत्वंच देवत्वंच सुदुर्लभं स्वर्गरा
ज्यादि भोगंच स्वप्नेव नहि वांछति
ब्रह्माण्डानि विनश्यंति देवाद्यस्या
दय स्तथा कल्पाणि भक्ति युक्तश्च म
द्भक्तो नप्रणश्यति ॥ भ्रमन्ति भार

ते भक्ता लब्ध्वा जन्म सुदुर्लभं तेपि
यान्ति मही पूत्वा नवं तीर्थं मम
लयं ॥ इतिब्रह्मवैवर्ते प्रकृतिखण्डे
५ अध्यायः ॥ अपिच ॥ रतिकृत्सा
कर्षणांच यस्याश्रुपुलकोद्गमः म
नोनिमग्नं यस्यैव सभक्तः कथितो
बुधैः पुत्रदारादिकं सर्वं जानाति
श्रीहरेरपि आत्मना मनसा वाचा
सभक्तः कथितोबुधैः यदास्ति स
र्वभूतेषु सर्वं कृष्णमयं जगत् । यो
जानाति महात्मानी सभक्तो वैष्ण
वोत्तमः इतिब्रह्मवैवर्ते श्रीकृष्ण
जन्मखण्डे १ अध्यायः ॥ भगव
दुक्ता यथा मद्भक्तास्सैव निःशङ्का
कर्मनिर्मूलकारकाः । नाहं शक्तश्च
भक्तानां संहारे नित्य देहिनां ॥
भक्ता ममानुगानित्यं ममाराधनत
त्पराः अहं भक्तान्तिके नित्यं ॥
तेषां रक्षण हेतवे सर्वे नश्यन्ति ।
ब्रह्माण्डे प्रभवंति पुनः पुनः नमे
भक्ताः प्रणश्यंति निःशङ्काश्च निरा
पदः इतितत्रैव ७ अध्यायः ॥
हरिभक्तमाहात्म्यं यथा हिन्तानो । ।
। येषां पादाब्ज रजसा सद्यः पूता व
हरिभक्तानां प्रभावो दुर्लभः श्रुतौ २
वसुन्धरा ॥ तेषांच पादविक्षेयत्ती
र्थं तत्परिकीर्तितं ॥ तेषांच स्पर्श

मात्रेण तीर्थपापं प्रणश्यति आ
लिंगनात् सदालापात्तेषा मुच्छिष्ट
भोजनात् दर्शनात् स्पर्शनाच्चैव
सर्वपापात् प्रमुच्यते ॥ ब्रह्माण्ड स
र्वतीर्थानां यत्पुण्यं स्नानतो भवेत् ।
हरिदासस्य विप्रस्य तत् पुण्यं दर्श
नाल्लभेत् इतितत्रैव २१ अध्यायः
॥ त्रिविधभक्त लक्षणं यथा ॥
भक्तानां त्रिविधानांच लक्षणं श्रु
यतामिति तृणाशय्यारतो भक्तो
मन्नाम गुणकीर्तिषु ॥ मनोनिवेश
ये यस्य भक्ता संसार सुखकारणं ॥ दा
स्यं विना नहीच्छंति सालोक्यादिच
तुष्टयं ॥ नैव निर्वाण मुक्तिंच स
या पानमभीप्सितं ध्यायते मत्पदा
ब्जंच पूजयेद्भक्ति भावतः श्रीहेतु
की तस्यदेवाः संकल्परहितस्य च
सर्वसिद्धिं नवांछंति नेऽणिमादिक
मीप्सितं ॥ ब्रह्मत्व ममरत्वंवासारत्वं
सुखकारणं वांछंति निर्मलाभक्ति
मदीया मतलामपि स्त्री पु विभे
दो नास्त्येवं सर्वजीवेषु भिन्नता
तेषां सिद्धेश्वराणांच प्रवराणां तु
तेश्वर ॥ स्तन पिपासादिकं निद्रां
लोभ मोहादिकं रिपुं ॥ त्यक्त्वा
दिवानिशं मांचध्यायते चरितम्
रः समद्भक्तोत्तमो नद श्रूयतो म

ध्यमादिकं ॥ नासक्तः कर्मसु श्रद्धी
पूर्वं प्राक्तनतः शुचिः करोतिसततं
मैव पूर्वकर्म निकृन्तने नकरोति
परं यत्नात् संकल्प रहितस्य च ।
सर्वकृष्णस्य यत्किञ्चिन्नाहं कर्त्ताच
कर्मणाः कर्मणा मनसावाचा सतत
तं चिन्तयेदिति न्यूनभक्तस्य तत्प्र
नः सच प्राकृतिकः श्रुतौ ॥ यम
वाथम हंतेवा स्वप्नेन च न पश्यति ।
पुरुषाणां सहस्रंच पूर्वं भक्तः समु
द्धरेत् पुंसांशतंमध्यमश्च तत्त्वना
पंचप्राकृतः भक्तश्च त्रिविध स्तान
कथितस्य नवाक्षया इति तत्रैव ।
८४ अध्यायः ॥ कृष्णभक्त शरीरे ।
तीर्थानि पुण्यान्यपि च सांप्रतं सर्व
तीर्थानीति यथा पृथिव्यां यानि
द्भक्तानां शरीरेषु सन्निपूतेषु सन्ततं
मद्भक्तपादरजसा सद्यः पूता ।
वसुन्धरा सद्यः पूतानि तीर्थानि ।
सद्यः पूतं जगत्तथा मन्मंत्रो पास
का विप्रा ये मदुच्छिष्टभोजिनः ।
मामेव नित्यं ध्यायंते मम प्रा
णाधिकाः प्रियाः ॥ तदुपस्पर्शमात्रे
णपूतो वायुश्च पावकः कलौ दश
सहस्राणि मद्भक्ताः सन्ति भूतले ॥
एकवर्णा भविष्यन्ति मद्भक्तेषु गते
पुच तद्भक्त शून्या पृथिवी कलिग्रस्ता



भविष्यति ॥ इतिब्रह्मवैवर्त्तेश्रीकृष्ण
जन्मखण्डे १२८ अध्यायः ॥ भ
गवद्भक्तमाहात्म्यं यथा । संस्मृतः
कीर्त्तितो वापि दृष्टः स्पृष्टोऽपिवा
पिये पुनाति भगवद्भक्तः श्वपचो
लोऽपि यदृच्छया ॥ इतिवाराहे
उपरिभागे प्रबोधिनीमाहात्म्यं ॥
॥ हरिभक्तकर्त्तव्यानि यथा
हरे र्यशसि नीताय सर्व्वलोकेषु
कीर्त्तनं वैष्णवेषु च कालेषुभक्तः
कुर्य्यादहर्निशं ॥ दासी दासांश्च
यत् किंचित् स्वकीयं वस्तुचात्मनः
कृष्णभक्तस्य गार्हस्थ्य सर्व्वं कृष्णेनि
वेदनं भक्तस्य लक्षणान्तरं यथा
प्रेम्णा संजातया भक्त्या तनुभृत् पु
लकाञ्चितः विमर्श्यलौकिकं भक्तो
वदेद्धसति नृत्यति परमानन्द यु
क्ताऽसौ कृविज्ञायति न्वति ॥ क
न्वच्युत भावेन गद्गदेन पुनः पुनः
अनुशीलयति भजेत गोविन्द म
नुमोदते । नरोदेवं विष्णुमायां
उत्तरां मुनि मोहिनीं सर्व्वेश्वर
ज बुद्ध्या यो भजेदीशं सनातनं ॥ स
तत्ववादी भक्तश्च सर्व्वभूत सहस्रभः
॥ इति पाद्मोत्तरखण्डे १०८ अ
ध्यायः ॥ भक्तत्यागे दोषो यथा।
ब्रह्महत्या गुरौ द्वेषो गोवधः स्त्री

वध स्तथा ॥ तत्समेभिर्महापापं ।
भक्तत्यागाद्वदाहृतं ॥ भजंते भक्ता
मत्याज्य मद्गृहे त्यजतः सदा ॥
नेहृतामुत्र पश्यामि तस्मात् शक्र
दिवंव्रज ॥ इतिमार्कण्डेय पुराणे ।
हरिश्चन्द्रोपाख्यानं ॥ ॥
भक्तकरः पुं कृत्रिमधूपः ॥ यथा
द्रवकधूपे भक्तकरो गिरिः स्यात्
समगन्धकः इति शब्द चन्द्रिका ॥
भक्तकारकेवि ॥ ॥ ॥
भक्तकारः त्रि पाचकः भक्तमन्नं
करोति पचतियः तत्र पर्य्यायः
सूदः १ औदनिकः २ गुणः ३ भक्ष्य
कारः ४ सूपकारः ५ सूपः ६ आ
रालिकः ७ वल्लवः ८ इति हेम
चन्द्रः ॥ ॥ ॥
भक्तता स्त्री भक्तत्वं भक्तस्य भाव
इत्यर्थे तप्रत्ययेन निष्पन्ना ॥ ॥
भक्ततूर्य्यं क्ली भोजनकालेवाद्यमा
नतूर्य्यं तत्र पर्य्यायः नृपमानं २ ।
इति त्रिकाण्डशेषः ॥ ॥ ।
भक्तदासः पुं पंचदशदासान्तर्गत ।
दासविशेषः । यथा । भक्तदासश्च
विज्ञेय स्तथैव वडवाकृतः सभि
तेऽपिभक्तेनाङ्गीकृत दास्यः ॥
इतिदायक्रमसंग्रहः ॥ ॥
भक्तमण्डः पुं क्ली अन्नाग्ररसः ।

भातेरमाड इति भाषा ॥ तत्प
र्य्यायः मासरः १ आचामः २ निः
स्रावः ३ इत्यमरः ॥ ॥
भक्तिः स्त्री विभागः ॥ सेवा इति
मेदिनी ॥ गौणवृत्तिः भङ्गी ॥ श्र
द्धा इति हेमचंद्रः ॥ भजइत्येष
एव धातुः सेवायां परिकीर्त्तितः ।
तस्मात् सेवाबुधैः प्रोक्ताभक्तिः ।
साधन भूयसी इति गारुडे २३१ ।
अध्यायः ॥ अथ श्रीमद्भक्ति
लक्षणं तृतीये श्रीकापिलेये ।
देवानां गुणलिङ्गाना मानुश्रविक
कर्म्मनां । सत्व एवैकमनसो हृत्तिः
स्वाभाविकी तथा अनिमित्ता भा
गवती भक्तिःसिद्धे र्गरीयसी ॥
अथविशेष लक्षणानि श्रीगौतमी
मीयतंत्रे देवतायांच मंत्रेच त
था मंत्रप्रदे गुरौ भक्ति रष्ट वि
धा यस्य तस्य कृष्णः प्रसीदति ॥ त
द्भक्तजन वात्सल्यं पूजायांचा नु
मोदनं समनाअर्चयेन्नित्यं तद
र्थे दम्भवर्जनं ॥ तत्कथाश्रवणे
राग स्तदर्थे चाग विक्रिया तदनु
रू स्मरणं नित्यं यस्तन्नाम्नोपजीवति ॥
भक्तिरष्ट विधा ह्येषा यस्मिन् म्लेच्छे
पिवर्त्तते । समुनिः सत्यवादी चकी
र्त्तिमान् स भवेन्नरः ॥ समममस्कंधेश्री
॥ । ॥ । ॥ । ॥

प्रह्लादोक्तौ श्रवणं कीर्त्तनं विष्णोः
स्मरणं पादसेवनं । अर्चनं वन्दनं
दास्यं सख्य मात्म निवेदनं ॥ इति
पुंसार्पिता विष्णौ भक्तिश्च नवल
क्षणा क्रियेत भगवत्यद्धा तन्मन्ये
ऽधीतमुत्तमं ॥ तत्रैव श्रीनारद।
युधिष्ठिरसम्वादे । श्रवणं कीर्त्तनंचास्य
स्मरणं महतो गतेः । सेवेज्यावन
तिर्दास्यं सख्यमात्म निवेदनं ॥
पाद्मे कार्त्तिकमाहात्म्ये श्रीयमधूम्र
केशसंवादे श्रवणं कीर्त्तनं पूजा
सर्व्वकर्म्मार्पणं स्तुतिः । परिचर्य्यानम
स्कारः प्रेमस्यात्मार्पणं हरौ ॥ ॥
तत्रैवोत्तरखण्डे शिव पार्व्वती स ।
म्वादे आयत्त वैष्णवं प्रोक्तं शंख
चक्रांकणं हरेः धारणंचोर्द्ध्व पुण्ड्राणां तन्मंत्रा
णांपरिग्रहः ॥ अर्चनंच ।
जपो ध्यानं तन्नाम स्मरणं तथा
कीर्त्तनं श्रवणंचैव वन्दनं पादसेव ।
नं तत्पादोदक सेवा च तन्निवे ॥
दित भोजनं ॥ तदीयानांच संसे
वाद्वादशी व्रत निष्ठता तुलसी रो
पणं विष्णो र्देव देवस्य शांगिणः ।
भक्तिः षोडशधाप्रोक्ता भववन्ध ।
विमुक्तये इतिच ॥ किंचादर्शनं
भगवन्मूर्त्तेः स्पर्शनं तेचसेवनं ।
आघ्राणं धूपशेषादे र्निर्म्माल्यस्य च
॥ । ॥ । ॥ । ॥

रणं ॥ तच्च भगवदंश्चेव तथावी
णादिवादनं । कृष्णलीलाद्यभिनयःश्री
भागवत सेवनं पद्मात्ममालादि ।
चतिरेकादश्यादि जागरः प्रासा
दरचनाद्यन्यच्चतेयं शास्त्रानुसार
तः । लिखिता भगवद्धर्म्मा भक्तानां
लक्षणानि च तानि ज्ञेयानि सर्व्वाणि
भक्तेर्वैलक्षणानिह ॥ तेषु ज्ञेयानि
गौणानि मुख्यानि च विवेकिभिः
वहिरंगान्तरंगाणि प्रेमसिद्धौच ता
नियत् भेदास्तु विविधा भक्ते भक्त
भावादि भेदतः । मुक्ताफलादि ग्र
न्थेभ्यो ज्ञेया लिखितैरलं प्रे
मभक्तौ च सिद्धायां सर्व्वेऽर्थाः से
वकाः स्वयं भगवान् ख्यातिवश्यः
स्यादिति ख्यातेऽस्याः सुलक्षणं ॥
अथ प्रेमभक्तिलक्षणं ॥ नारदप
ञ्चरात्रे अनन्यममता विष्णौ मम
ता प्रेमसंगता भक्तिरित्युच्यते ।
भीष्मप्रह्लादोद्धवनारदैः ॥ प्रेम
भक्तेः माहात्म्यं भक्तेर्माहात्म्य ॥
तः परं । सिद्धमेव यतो भक्तेः फ
लं प्रेमैव निश्चितं ॥ विकृतानि प्रे
मसम्पन्ने दीलायाथाभ्यन्तराणि च कि
यन्तु लिखितानि तस्या महिमैव वि
लिख्यते ॥ अथ प्रेमसम्पत्ति ।
विकृतानि सप्तमस्कंधे श्रीप्रह्लादस्य ।
॥ । ॥ । ॥ । ॥

वालानुशासने निशाम्य कार्म्माणि ग
णानतस्मान् वीर्य्याणि लीलातनुभिः
कृतानि यदातिहर्षोत् पुलकाश्रु
गद्गदं प्रोत्कण्ठ उद्गायति नृत्यते
च । यदा ग्रहग्रस्त इव क्वचिद्धसत्या
क्रन्दति ध्यायति वन्दते जनं । मुहुः
श्वसन् वक्ति हरे जगत्पतेनारायणे
त्यात्ममति गतत्रपः ॥ तदापुमान्
मुक्तसमस्तबन्धनस्तद्भावभावा
नुकृताशयाकृतिः निर्द्दग्धबीजानुश
यो महीयसा भक्तिप्रयोगेण समेत्य
धोक्षजं ॥ एकादशेच श्रीकवि
योगेश्वरोक्तेः शृण्वन् सुभद्राणि र
थाङ्गपाणेर्जन्मानि कर्म्माणि च या
नि लोके । गीतानि नामानि तदर्था
कानि गायन् विलज्जो विचरेदसङ्गः
एवं व्रतः स्वप्रिय नामकीर्त्त्या जात
नुरागो द्रुतचित्त उच्चैः । हसत्यथो
रोदिति रौति गायत्युन्मादवन्नृत्य
ति लोकबाह्यः ॥ तत्रैव श्रीप्रबु
द्धयोगेश्वरोक्तेः स्मरन्तः स्मारयन्त
श्च मिथोऽघौघहरं हरिं भक्त्या सं
जातया भक्त्या विभ्रत्युत्पुलकां त
नुं क्वचिद्रुदन्त्यच्युतचिन्तया क्वचि
द्धसन्ति नन्दन्ति वदन्त्यलौकिकाः
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति
तूष्णीं परमेत्य निर्वृताः ॥ श्री
॥ । ॥ । ॥ । ॥

भगवद्गुणश्रवणे सम्भाषे च कथंचिन्नाशे
महर्षे द्रवता चेतसा विना विनान
न्दाश्रुकलया शुध्येद्भक्त्या विनाशयः
वाग्गद्गदा द्रवते यस्य चित्तं रोदित्य
भीक्ष्णं हसति क्वचिच्च विलज्ज उद्गा
यति नृत्यते च मद्भक्तियुक्तो भुवनं
पुनाति यथोक्त भक्त्यशक्तौ तु
भगवच्चरणाम्बुजे शरणागतभावे
न हृतस्य भीतिश्च माम्ययेत् इति हरि
भक्तिविलासे ॥ विलासः ॥ ।
अपिच उत्तमा भक्तेर्लक्षणं यथा
अन्याभिलाषिता शून्यं ज्ञानकर्म्मा
द्यनावृतं आनुकूल्येन कृष्णानुशी
लनं भक्तिरुत्तमा । तथा नारदपंच
रात्रे सर्व्वोपाधिविनिर्म्मुक्तं तत्
परत्वेन निर्म्मलं हृषीकेण हृषीके
शसेवनं भक्तिरुच्यते श्रीभागव
तस्य तृतीयस्कंधेच अहैतुक्यव्य
वहिता या भक्तिः पुरुषोत्तमे सालो
क्य सार्ष्टि सामीप्य सारूप्यैकत्वम
प्युत दीयमानं न गृह्णन्ति विना मत्
सेवनं जनाः स एव भक्तियोगाख्य
आत्यन्तिक उदाहृत इति ॥ सा
उत्तमा भक्तिः षड्विधा यथा क्लेशघ्नी
शुभदा मोक्षलघुताकृत् सुदुर्ल
भा सान्द्रानन्दविशेषात्मा श्रीकृष्णाक
र्षिणी च सा ॥ तत्रास्याः क्लेशघ्नत्वं क्ले

शास्तु पापं तद्वीजमविद्या चेति
ते त्रिधा शुभदत्वं यथा । शुभानि
प्रीणनं सर्व्वजगतामनुरक्तता सद्गु
णाः सुखमित्यादीन्याख्यातानि मनीषि
भिः ॥ मोक्षलघुताकृद्यथा ॥ मना
गेव प्ररूढायां हृदये भगवद्रतौ पु
रुषार्थास्तु चत्वारस्तृणायन्ते सम
न्ततः ॥ सुदुर्लभा यथा साधनौ
घैरनासङ्गैरलभ्या सुचिरादपि ।
हरिणा चाश्वदेयेति द्विधा सा स्यात
सुदुर्लभा सान्द्रानन्दविशेषात्मा ।
यथा ब्रह्मानन्दो भवेदेष चेत्
परार्द्धगुणीकृतः नैति भक्तिसुखा
म्भोधेः परमाणुतुलामपि ॥
श्रीकृष्णाकर्षिणी यथा कृत्वा हरिं प्रे
मभाजं प्रियवर्गसमन्वितं भक्तिर्व
शीकरोतीति श्रीकृष्णाकर्षिणी च सा
॥ सा उत्तमा भक्तिस्त्रिधा यथा
सा भक्तिः साधनं भावः प्रेमा चेति
त्रिधोदिता साधन भक्तिर्यथा ।
कृतिसाध्या भवेत्साध्य भावा सा
साधनाभिधा नित्य सिद्धस्य भाव
स्य प्राकट्यं हृदि साध्यता ॥
भावभक्तिर्यथा शुद्धसत्त्व विशेषा
त्मा प्रेमसूर्य्यांशुसाम्यभाक् । रुचि
भिश्चित्तमासृण्यकृदसौ भाव उच्य
ते ॥ प्रेमभक्तिर्यथा ॥ समस्य ।

सूतीन स्वान्तो ममत्वातिशयांकि
तः भावः सएव सान्द्रात्माबुधैः प्रे
मानिगद्यते इति भक्तिरसामृ ।
तसिन्धौ पूर्वविभागः ॥ ।
भक्तिमान् त्रि भक्तियुक्तः यथा
गुणवान् पुत्रवान्श्रीमान्कीर्त्तिमा
न्भक्तिमान्भवेत् ऐहिके परमे।
स्वर्य्ये मन्त्रेनाद्यपदे व्रजेत् ॥ इति
शाम्भवीतन्त्रान्तर्गत महाकालभैर
वस्तोत्रे अपिच अन्यपिये ।
मे विकेस्या मूढाया नीच नातयः
भक्तिमन्तः प्रमुच्यते कालेनमपि
संमताः इतिकौर्म्मे ४ अध्यायः
भक्तियोगः पुं परमेश्वरभजन सा
स्वन्यः यथा भक्तियोगप्रकाशाया
लोकस्यानुग्रहाय च सन्न्यासमा
माश्रित्य कृसवे तन्य नामष्टक
इति चैतन्यभागवतं ॥ अपिच
वासुदेवे भगवति भक्तियोगः प्र
योजितः जनयत्याशु वैराग्यं।
ज्ञानंच यद हैतुकं इतिश्रीभा
भागवते १ स्कंधे १ अध्यायः।
भक्तिरसः पुं भक्तिरेवरसः यथा
विभावै रनुभावैश्च सात्विकै र्व्य
भिचारिभिः स्वाद्यत्वं हृदि भक्ता
नामानीता श्रवणादिभिः एषाकृ
ष्णरतिः स्थायीभावा भक्तिरसो भ

वेत इतिभक्तिरसामृतसिन्धुः ॥
भक्तिलः पुं साधुघोटकः। यथा
प्रभुभक्ताभक्तिलाश्च कुलीनेषु कु
लोतकटाः। इति शब्दचंद्रिका ॥
भक्तिरानतिरिति ॥ ॥
भगं क्ली स्त्रीचिन्हं तत्पर्य्यायः।
योनिः २ इत्यमरः ॥ वरांगं ॥
उपस्थः ४ स्मरमन्दिरं ५ इतिरा
जनिर्घण्टः रतिगृहं ६ जन्मवा
त्मप्रथं ७ अधावाच्यदेशः ९ प्रकृ
ति १० अपथं ११ मारकूपः १२ अप
देशः १३ प्रकृतिः १४ पृथ्वी १५ सं
सारमार्गः १७ गुह्यं १८ स्मरागारं १९
स्मरध्वजं २० रत्यंग २१ रभि
कूहरं २२ कलत्रं २३ अधः २४
इतिशब्दरत्नावली तस्यलक्षणं।
यथा विस्तीर्णंच गंभीरंच द्विविधं
भगलक्षणं तद्गुणा यथा कूर्म्मपृष्ठ
गजस्कंधं पद्मगंधं सकोमलं य
कोमलं सुविस्तीर्णं पंचैतेच भ
गोत्तमाः तद्दोषा यथा। शीत
लं निम्न मत्युलं गोजिह्वा सदृशं
परं इत्युक्तं कामशास्त्रे भग
दोष चतुष्टयं ॥ विस्तीर्णेसबले
योज्यं गंभीरे वंशवीजकं इति
रतिमंजरी ॥ श्रीः वीर्य्यं।
इच्छा ज्ञानं वैराग्यं ॥ कीर्त्तिः

माहात्म्यं ऐश्वर्य्यं यत्नः। धर्म्मः
मोक्षः इतिमेदिनी ॥ पुंसो
गद गुह्य मध्यभागः इतिराजनि
र्घण्टः स्त्री यशः ॥ सौभाग्यं।
कांतिः सूर्य्यः शम्भविशेषः ॥
चंद्रः इत्यनेकार्थध्वनिमंजरी ॥
पूर्वफल्गुणीनक्षत्रं यथा अक्षता
माघ शुक्लाश्च भगे सर्पिस्तडुत्तरे
। इतिज्योतिस्तत्वं ॥ ॥
भगः पुं रविः। इतिमेदिनी
क्लीवेऽव्ययं यथा ज्ञान वैराग्य
यो यौनौ भग मस्त्री तभास्करे।
इतिरुद्रः ॥ ॥
भगणः पुं नक्षत्रसमूहः शी
घ्रगामिणां ग्रहाणां मल्पेन कालेन
मन्दगामिनां ग्रहाणां महताकाले
न पूर्वगत्या पातानां पश्चिमगत्या
परिवर्त्तनेनाश्विन्यादि रेवत्यंतन
क्षत्रभोगकालः। षष्टिविकला
भिः कला षष्टिकलाभिर्भाग।
स्त्रिंशद्भागैराशिर्द्वादश राशिभिर्भग
णः यथा शीघ्रगस्तान्यथाल्पेनका
लेन महतात्पगः तेषांतुपरिवर्त्तेन
पौस्तांते भगणः स्मृतः विकलानां
कलाषष्ट्यातत् षष्ट्याभागउच्यते।
तत्रिंशता भवेद्राशि भगणो द्वाद
शैवते युगे सूर्य्यज्ञ शुक्राणां।

खचतुष्करदार्णवाः ४३२ .... कुजा
र्कि गुरु शीघ्राणां भगणाः पूर्वया
यिनां इंद्रो रसाग्नि त्रित्रीषु सप्त
भूधर मार्गणाः ५७७५३३३६ दस्र
त्र्यष्टरसांकाक्षि लोचनानि कुजस्य
तु २२९६८३२ बुधशीघ्रस्यशून्यर्त्तुखा
द्रित्र्यंक नगेन्दवः ७९३७०६० । बृह
स्पतेः ख दस्राक्षिवेद षड्वन्हयस्त
था ३६४२२० ॥ सितशीघ्रस्यषट्सप्त
त्रि यमाश्विख भूधराः ७०२२३७६ श
नेर्भुजंग षट् पंच रस वेदनिशा
कराः १४६५६८ चंद्रोच्चस्याग्नि शू
न्याश्वि वसु सर्पार्णवा ४८८२०३ यु
ग्मे पातस्यसर्पाग्नि यमाश्विशि
खिदस्रकाः २३२२३८ इति सूर्य्यसि
द्धांतः। अपिच ग्रहाणां मंद्रो
च्चानांचलोच्चानांग्रहपातानांचभ
गणान्श्लोक षट्केनाह धर्कश्चक
बुध पर्य्ययाविधे रह्निकोटि गुणिता
रदाब्धयः ४३२ .... एत एवशनि
जीव भूभुवां कीर्त्तिताश्च गणकैश्च
लोचनाः ९ खाब्ध खाब्धगगणा
मेरन्द्रिय स्वाथराद्रि विषया ५०७५२
२ ...... हिमद्युतेः युग्म युग्म शर
नागलोचन व्याल षत्सवयमाश्वि
नोसजः २२९६८२८५२२।२। सिंधु
सिंधुर नवाष्ट गोक षट्मेक सम


शाशिनो ३९२३९९९८९८४ न शीघ्रा
नाः पंच पंच युग षड्लोचन द्या
वि षट् गुण मिता ३६४२२६४५५ ग
रो मिताः ॥२ ॥ हि नन्द वेदांक
गजाग्नि लोचन हिमकर शैलाः३२
२३८९४९२ सित शीघ्र पर्य्ययाः शु
जंगनंद हि नगांग बाण षट्कृते
न्दवः सूर्य्यसुतस्य पर्य्ययाः१४६५९
७२९८।४। विधाद्यपयो ४८० द्यात
गजेषु दिग्वियद्धिपाद्ययो ४८०९ ५
८५८ द्यंक यमा २९२ रदाग्नयःश्श
२ शारेषिभा ८५५ स्मृत रसाः६५२
कृसागगाः ४। स्युः पूर्वगत्या नराणे
श्रृहूचजाः ५ गजाष्टि भगौत्रिरदा
श्विनः २३२३॥।६८ कुभूद्रसाश्विनः
२६७ कुद्विशायाः ५२८ कमनैवः ६२
त्रिनन्द नागा ८९२ युगकुंजरेषवो
५८४ निशाकराद्यास्तग पातपर्य्य
याः॥६ ॥ इतिसिद्धान्तशिरोमणिः
॥ ग्रहाणां पूर्वगमनेन कल्प
पते पर्य्यायः तथा मन्दोच्चानांच।
प्रागत्या एतावंतः पातानां प
श्चिमगत्या एतावंतो भवंति अ
त्रोपपत्तिः सातु तज्ञावकुशाले ।
नतन्न लेखसंस्थानेन कृतसे।
लेनैव यातु शक्यते नान्येन।
ग्रह मन्द शीघ्र पाताः स्वस्वमार्गेण
गच्छंत एतावतः पर्य्ययान् कल्पेकु
र्वंतीत्यत्रागम एव प्रमाणं । इति
नत्वीका ॥ ॥

भगदत्तः पुं नरकराजस्यज्येष्ठपुत्रः
सतुप्राग्ज्योतिषपुराधिपः । यथा
कृतमत्योतनायायां कालेन न
रकः क्रमात् भगदत्तं महाशीर्षं
मदवंतं सुमालिनं चतुरो जन
यामास पुत्रांस्तांश्च तिने सुतः
श्रीभगवानुवाच भारावतरणे।
देवि नरकस्य वधः पुरा त्वयैव
प्रार्थितो यस्मात्तेनासौ निहतो
मया पालयिष्येऽस्य संतानं ।
देवि त्वद्वचनादहं प्राग्ज्योतिषे ।
ऽभिषेक्ष्यामि नमारं भगदत्तकं
पृथिव्यां नारदेनैव सहितः
केशवस्तदा भगदत्तं भौमसुतं
प्राग्ज्योतिष पुरेऽभ्यषेचयत् ॥ अभि
षिच्य नरा भूपं पुरमभ्यन्यवेश
यत् इति कालिकापुराणे ३९
अध्यायः ॥ ॥

गभदैवतं क्ली पूर्वफल्गुनीनक्ष
त्रं तत्र हि तस्याने जन्मनक्षत्रे य
था विशालाननतोयानिवेश्य
गदैवतं पुष्या पोष्णाघमः सा
र्थी जन्म भान्यकैतः क्रमादुदि
न्योतिस्तत्वे ॥ ॥

भगंदरः पुं अपानदेशे व्रणरोग
विशेषः तस्यरूपमाह ॥ गुदस्य
श्वयथुली त्वेत्रे पार्श्वतः पिडकार्त्ति
कृत् भिन्नो भगंदरोज्ञेयः सच
पंचविधो भवेत् अर्त्ति कृत् पी
डाकृत् पंचविधः वातिक पैत्ति
कश्लैष्मिक सान्निपातिक शल्यज
भेदैः ॥ भगंदर शब्दस्य नि।
रुक्तिमाहभोजः भगं परितम
न्ताद्य गुद वस्ती तथैवच भग
वद्दारयेयस्मात्तस्मादेष भगंदरः
भज्यतेऽनेनेति भगं मेहनं । भ
जंत्यस्मिन्निति भगं योनिः अत्र
भगशब्देन द्वयमपि कथ्यते भ
गवत् योनिवत् ॥ कटीक ।
पालनिस्तोद दाह कण्डूरुजादयः
भवन्तिपूर्वरूपाणि भविष्यतिभ।
गन्दरे कटीकपोलमत्र कटीफलकं
॥ वातिकं शतपोनक संज्ञं।
भगन्दरमाह कषाय रूक्षैरति
कोपितोऽनिलस्त्वपानदेशे पि
डकां करोति यां उपे त्यणान्
पाकमुपैतिदारुणं रुजांच भिन्ना
रुणफेना वाहिनी तत्रागमामूत्र
पुरीष रेतसां व्रणैः रनेकैः शत
पोनकं वदेत् दारुणं अतिदारु
णान् व्रणै रनेकैः सूक्ष्ममुखैः श
तपोनकं चालनी तद्वत्से ॥ ॥
पैत्तिक उष्ट्रग्रीवसंज्ञमाह प्रको
पणैः पित्तमति प्रकोपितं करो।
तिरक्तां पिडकां गुदे गतां त
दाशुपाकाहिम पूतिवाहिनी भा
गन्दरोष्ट्रशिरोधरं वदेत् ॥ आशु
पाकाहिम पूतिवाहिनी शीघ्रपा
का उष्ण दुर्गन्धवाहिनीच तदात
भगन्दरं उष्ट्रशिरोधर उष्ट्रग्रीवसं
ज्ञं वदेत् उष्ट्रग्रीव संज्ञत्वा पि
डका कीलीन वक्रतयोष्ट्रग्रीवाकार
त्वेन ॥ श्लैष्मिक परिस्रावि सं
ज्ञमाह कण्डूयनो घनस्रावीका
ठिनो मंदवेदनः श्वेतावभासः कफज
परिस्रावी भगंदरः कठिनः पिड
कावस्थायां परिस्रावी निरंतरं स्र
वणशीलः ॥ सान्निपातिक शम्बू
कावर्त्त संज्ञ माह बहुवर्णा रुजा
स्रावाः पिडका गोस्तनोपमाः श
म्बूकावर्त्त वत्राडी शम्बूकावर्त्तकोप
तः बहुवर्णा रुजा स्रावाः बहुशब्दाव
र्णादिभिः प्रत्येकं सम्बध्यते नाडी
व्रणमार्गः ॥ शल्यजमुन्मार्ग संज्ञ।
माह क्षताकृतिः पायुगताहिवर्द्धे।
तेषुपेक्षणात् स्वं कृमयो विदार्य
ते प्रकुर्वते मार्ग मनेकथा सावै
र्व्रणे रुन्मार्गं भगन्दरं वदेत् ॥

स्रो



ताडनात् कण्टककारिणा नखेनकण्डूय
नादिना वाऽभिघातात् गतिःस्रावः
उन्मार्गे भगन्दरं । एतस्यकृमि कृत
मार्गैः पुरीषादि निर्गमाडुन्मार्ग सं
ज्ञा ॥ कष्टसाध्यमसाध्यंचाह ।
घोराः साधयितुं दुःखाः सर्व एव
भगन्दराः तेष्वसाध्य स्त्रिदोषो ।
त्थः क्षतजश्च विशेषतः वात मूत्र
पुरीषाणि शुक्रंच कृमयस्तथा भग
न्दरात् स्रवंतस्तु नाशयंति तमातुरं
॥ अथ भगन्दरस्य चिकित्सा
अथास्य पिडका मेव तथा यत्नाडु
पाचरेत् शुद्धस्त्र क्षति सेकाद्यैः ।
र्यथा पाकं नगच्छति ॥ पुनर्नवा
मूला शुण्ठी पिष्टिवा वदरैः कृतः
लेपाय पिडकावस्थ कल्यःशस्तो भ
भगन्दर पयःपिष्ट स्तिलादिष्ट म
धुकैः शीतलैः कृतः लोपो भग
न्दरे शस्तः पैत्तिके वेदना वति ।
अरिष्टा निम्बः ॥ तस्य नायाश्च ।
पत्राणि गुडूची विश्वभेषजं सैन्धवं
भक्तसंपिष्टं लेपाडुंति भगन्दरं ॥
स्नुमाला मार्ति स्नस्याः पत्रं ॥ पिड
कानां मपक्वानां मपतर्पणा पूर्वकं
कर्म्म कुर्य्याद्विरेकान्तं भिन्नानां व्रण
वत्क्रिया त्रिवार्ककीर स्त्रिंधन्या ।
शुभाश्वहननच्छदैः सिद्धमभंजने ।

तैलं भगन्दर हरं परं ॥ अशो ।
गुग्गुलः । अश्वहननच्छदाःकरवी
पत्राणि । निशादितैलं ॥ त्रिफ
ला पुर कृस्नानां त्रिपंचांशेकयो ।
जिता गुटिका शोथ गुल्मार्शो भ
गन्दरवतां हिता ॥ नवकार्षिको
गुग्गुलः ॥ शस्त्रक्रियापि कथिता
शस्त्रसाध्य भगन्दर स्ताच तेनैव
कर्तव्या शस्त्रशास्त्रमवेतियः । व्या
यामं मैथुनं युद्धं पृष्ठयानं गुरूणि
च । वृषव्रणोपियत्नेन वर्जयेद्वत्सरं
नरः इति भावप्रकाशे भगन्दरा ।
धिकारः ॥ अपिच लंघनं म ।
र्दनं लेप विस्रापन विरेचनैः । र
क्तमोक्षादिभिः पीडं गुदजां पि
डकां जयेत् तथा यत्नं भिषक
कुर्य्याद्यथा पाकं नियच्छति अप
क्वं वाथ पक्वं वा जलौकापातनं हि
तं तदभाव तुम्बिकाभ्यां मिदं र ।
क्तस्य मोक्षणं वटपत्रा ष्टका ।
शुण्ठी गुडूच्यः सपुनर्नवाः पिष्टा व
पिडकारम्भे लेपः शस्तो भगन्दरे ।
॥ आमावस्था क्रिया प्रोक्ता पक्वाव
स्था क्रियोच्यते ॥ सुषणा पाट ।
लात्वार वह्निदाहादिकं क्रमं । वि
धायव्रणवत् कार्य्यं यथा दोषयथा
वलं स्व [illegible] दार्वीभि र्वर्त्तिं ।

कृत्वा भगन्दरे दद्यात्सर्वशरीर
स्यानाडीर्हन्यात् प्रयोगराट् ॥
तिलाभया लोध्र मरिष्टपत्रं निशा
वचा कुष्ठ मगारधूमः भगन्दरेभ्य
उपदंशयोश्च दुष्टव्रणे शोधनरो
पणोऽयं ॥ श्वेनोऽस्थि दुष्टं
त्रिफला रसेन विडालकास्थिवर्त्य
वाविलेपनात् विरसभूतं व्रणयोग
दुष्टं भगन्दरं नाशमुपैति नूनं ॥
जम्बूकमांसंभुञ्जीत प्रकारै र्व्यञ्जना
दिभिः शृगालमांसव्यञ्जनं त्वाघं
अथवाशम्बूक मांसव्यञ्जनंत्वाघं
॥ त्रिकुटु त्रिफला मस्तं विडंगा
मृत चित्रकं शस्वेला पिप्पलीमू
ले हवुषा सुरदारुच तुम्बुरु पु
ष्करंचव्यं विशाला रजनी द्वयं ।
विडं सौवर्चलक्षारौसैन्धवं गजपिप्पली
यावन्त्येतानि चूर्णानि तावद्विगुण
गुग्गुलः कोलप्रमाणां गुटिकां
खादयेन्मधुना सह भगन्दरं श्वास
कासं क्षयं जीर्णज्वरोदरं । नाडी
दुष्टव्रणानाह कुष्ठोन्मादाश्मरीक
मीन् मेहान्त्रवृद्धि हृद्रोगशूलंप्ली
परोगमेवच सप्तविंशतिकोहंतिगग्गु
लः सर्वरोगहा हृद्रोगशूलमिश्र
त्रे हृत पार्श्व शूलमिष्यपिपादः स
प्तविंशति गुग्गुलः चित्रकाकौ ।

त्रिवृत् पाठा मलपू हयमारकौ ।
स्नुथावर्कौ लांगलिको हरिद्राले
स्वर्जिका ज्योतिष्मतीच्च संहृत्य
तैलं वैद्यो विपाचयेत् । एतद्धि
स्यन्दनं नाम तैल मुक्तं भगन्दरे
। शोधनं रोपणञ्चैव सवर्णीकर
णं स्मृतं विस्यन्दनतैलं ॥ सूत
स्य द्विगुणेन शुद्ध वलिनाकृत्वाथ
योभिस्त्वहं पिष्टा ताम्रमयं सम
स्तं वलितं पात्रं विपाच्योपरि स्व
घं यामयुगं सभस्म पिठरे जम्बूज
लैः समथा सार्द्धं ततः पुटयेत् भ
गन्दर हरो हरो गन्धोऽग्निनाश्यादि
जम्बूजले स्त्रियत्र निम्बुजलैरिति
चपादः भगन्दरहरो रसः ॥ ।
शुद्धसूतं समं गन्धं मृतनागं मत
स्यकं जीरकं सैन्धवं तत्सं त्रिक्षा
कोषातकीद्रवैः पिष्टा तलेपनाच्च
हन्ति भक्षणाच्च भगन्दरं रसःका
सायिहृद्रोऽयं गुञ्जकं मृत्युजिद्वा ।
वेत् कालाग्नि रुद्रो रसः ॥ इति
सारदीपिकायां भगन्दर चिकित्
साध्यायः ॥ अपिच गुग्गुलं ।
त्रिफला युक्तं पीत्वा नश्यत् भगन्द
रः इति गारुडे १८८ अध्यायः ॥
भगाभक्षकः पुं कुट्टाणी कोटना
इति भाषा इति महाभारते ।

दानधर्म्मः तस्मान्न महत्तानिषेयो ।
यथा यो वान्धवैः परित्यक्तः सा
श्रुभि र्ब्राह्मणैरपि । ऊच्छोषीय
स्तनस्यान्नं भुक्त्वा चान्द्रायणञ्चरेत
इति मार्कण्डेयपुराणे महावारा
ध्यायः ॥ ॥
भगवती स्त्री गौरी दुर्गा इति
मेदिनी सरस्वती यथा मामो ।
पातु सरस्वती भगवती निःशेष
जाड्यापहा इति पौराणिकाः गंगा
यथा भगवति भवलीलामौलि
माले तवाम्भः कणमणुपरिमाणं
प्राणिनो ये स्पृशन्ति इति शंक
राचार्य्यकृत गंगास्तोत्रे ॥ त
स्याः स्वरूपं यथा । यथा निसौरि
भगवान् नित्या भगवती तथा स
मायया नित्यभूता तत्रैव प्राकृ
तेलये आब्रह्म स्तम्बपर्य्यन्तं सर्वे
मिथ्यैव कृत्रिमं दुर्गानत्यस्वरूपा
सा प्रकृति र्भवान् यथा । क्षित्ये
स्वर्ग्यादिकं सर्वे यस्या मत्सियुगे
युगे सिद्ध्यादिकं भगा तेषस्तेनमा ।
भगवती स्मृता इति ब्रह्मवैवर्त्त
पुराणे प्रकृतिखण्डे ५४ अध्यायः
॥ अपिच सेव्यते या सुरैः
सर्वैः तां चैव भजते यतः यात
भजेति सेवायां भगवत्येव सा

स्मृता इति देवीपुराणे ४५ अ
ध्यायः तस्याः प्रतिमाविशे ।
षस्य पूजने फलविशेषो यथा
ब्रह्मोवाच शृणु तस्याः सराध्यत्त
आराधनविधिं परं यथा सातो
षिता पूर्वं शंकराद्यैः फलस्वभिः
। कर्म्म यत्नेन देवेश तथान्य मपि
पूजय शम्भुः पूजयते देवीं मंत्र
शक्तिमयीं शुभां अक्षमालाकरो ।
नित्यं तेनासौ विभुधाम्बरः अहं
शैलमयीं देवीं यजामि सरस्तम
। तेन ब्रह्मत्व मेवेदं मया प्राप्तं
सुदुर्लभं । इंद्रनीलमयीं देवीं वि
ष्णुरर्च्चयते तदा विष्णुत्वं प्राप्तवां
स्तेन अद्भुतैकं सनातनं । देवीं
हेममयीं कान्तां धनदोऽर्च्चयते स
दा तेनासौ धनदो देवो यत्ने
शात्व मवाप्तवान् विश्वदेवा महा
त्मानो रौप्यां देवीं मनोहरां ॥
यजन्ति विधिवद्भक्त्यातेनविश्वत्वा
मास्थुः पूजयते भक्त्या देवीं
पित्तल सम्भवां वायुत्वं तेन तस्
प्राप्तं मनोपम्यं गुणावहं वसवः
कांसिकां देवीं पूजयंते विधानतः
॥ प्राप्तवंतो महात्मानो वसुत्वं स
महोदयं अश्विनौ पार्थिवां दे
वीं पूजयंतौ विधानतः तेन ताव

श्विनौ देवौ दिव्य देहे गतावुभौ ।
स्फाटिकां शोभनां देवीं वरुणो
ऽर्च्चयते सदा वरुणत्वं हि संप्राप्तं
तेन ऋद्ध्या समन्वितं । देवीं मन्त्र
मयीं पुण्यां मग्नि र्यजति भावितः
अग्नित्वं प्राप्तवां स्तेन तेजोरूप ।
समन्वितं ताम्रां देवीं सदा का
ले भक्त्या देवो दिवाकरः अर्च्चते
तत्र सम्प्राप्तं तेन सूर्य्यत्वं मुत्तमं
मुक्ताशैलमयीं देवीं सोमः पूज
यते सदा तेन सोमो ऽपि स
म्प्राप्तः सोमत्वं सततोज्ज्वलं प्र
वालकमयीं देवीं यजंते पन्नगो
त्तमाः तेन नागास्तु भोगाढ्याः
व प्रयान्त्येव परं पदं कांस्यायसम
यीं देवीं पूजयन्त्यसुरोत्तमाः रा
क्षसाश्च महात्मान स्तेन तेऽमित
विक्रमाः त्रपुसीसमयीं देवीं पि
शाचाः पूजयंति तां तेनऋद्धि
वलोपेताः प्रयांति परमं पदं
त्रैलोहिकां सदा देवीं यजंतेय
क्षकादयः तेन भोगवलोपेताः
प्रयान्तीश्वर मन्दिरं ॥ वज्रलोह
मयीं देवीं यजंते मातरः सदा
मातृत्वं प्राप्य ताः सर्वाः प्रयांति
परमं पदं ॥ एवं देवाः सगन्ध
र्वाः पिशाचोरग राक्षसाः । पूज

यंते सदाकालं चर्च्चिकां सुरनायि
कां तथात्वमपि देवेन्द्र यदीच्छ
सि परांगतिं ॥ शिवां मणिमयीं
पूज्य लभसे मनसेप्सितान् । का
माने स्वरवागाभ्यस्त कामिकैः पू
जितैः सदा ददाति सर्वलोका
नां चिंतामणि र्यथा शिवा इत्याद्य
देव्यवतार प्रभवविधि पूजामाहात्म्य
रे अध्यायः ॥ तस्यै गृहदान
स्य फलं यथा ईश्वर उवाच देव्या
गृहं त्वयः शुक्र कारयति शोभनं
सर्वोपकरणै र्युक्तं सकपाटार्गला
न्वितं तस्मिन् चामरा ध्वजच्छत्रे वि
तानं दर्पणानि च दत्वा सुरजवंश्या
दि नित्यं संगीतकानि च । देवी
शास्त्रार्थवेत्तारं पूजनं भवने शुभं
पर्वं प्रवर्त्तते यस्तस्य पुण्यफलं
शृणु दश वर्षापरार्द्धं स्तातत्राम
नन्तैक विंशति उद्धृत्य च कुलं
पापाद्ब्रह्मलोके महीयते । गच्छंते
भगवती यत्र यत्र परम पूजिता
तत्र कल्पाद्वरं यावद्भुक्त्वा भोगान्
मनोरमान् । पुनः कालादिहायाते
नः पृथिव्या मेकराजत्वेन सम्भूत्वा
हृतोपेतः श्रीमतः प्रपतिश्वरः
पुनर्देव्या हि भावानां तदक्तानां
प्रियो भवेत् कन्या सम्पूजकः ।

नित्यं देवी शास्त्रार्थपारगः ल
भेत परसद्भावं तदन्ते शिवतां
व्रजेत् देव्या गृहं तु यः शुक्लसम्मा
र्जयति नित्यशः स भवेद्बलवान्
सौख्यं सर्वं सम्प्राप्तिसंयुतः ततो
गच्छेच्छिवलोकं सर्वकामफ।
लप्रदं देव्या गृहं तु यः शुक्लगोम
येनानुलेपयेत् स्त्रियो वा यदि
वा पुंसः षण्मासेन निरन्तरं स
लभेदीप्सितान् कामान् देव्यालो
कं च गच्छति इत्याद्ये देव्यवता
दे ४२ अध्यायः ॥ ॥

भगवान् पुं बुद्धः इत्यमरः ।
श्रीकृष्णः यथा भगवानपि ता
रात्रीः शारदोत्फुल्लमल्लिकाः
वीक्ष्य रन्तुं मनश्चक्रे योगमायामु
पाश्रितः इति श्रीभागवते १०
स्कन्धे २९ अध्यायः पूज्ये त्रि ।
इति मेदिनी भगवत्स्वरू
पं यथा मनुरप्याह वेदार्थस्मृत्वा
यन्मुनि सत्तम तदेतत् श्रूयतामत्र
सम्यग्गदतोमम हेवलाणी वे
दितव्यपाठरूपं परंच यत् शाह
ब्रह्माणि निष्णातः परं ब्रह्माधिगच्छ
ति द्वे विद्ये वेदितव्ये वै इति
चाथर्वणी श्रुतिः परया त्वक्षरप्रा
प्ति ऋग्वेदादिमयी ऽपरा यद्वद्

व्यक्तमजरमचिन्त्यमजमव्ययं अ
निर्देश्यमरूपंच पाणिपादाद्य सं
युक्तं विभुसर्वगतं नित्यं भूत
योनि मकारणं व्याप्यव्याप्य ।
यतः सर्वं तद्वै पश्यन्ति सूरयः
तद्ब्रह्म तत् परंधाम तद्ध्येयं मो
क्षकाङ्क्षिणां श्रुतिवाक्योदितं सू
क्ष्मं तद्विष्णोः परमं पदं तदेव भ
गवद्वाच्यं स्वरूपं परमात्मनः वा
चको भगवच्छब्दस्तस्याद्यस्याक्ष
यात्मनः एवंनिगदितार्थस्य सतत्त्वं
तस्य तत्त्वतः ज्ञायते येन तज्ज
ज्ञानं परमन्यत्त्रयीमयं अशब्द
गोचरस्यापि तस्यैव ब्रह्मणो द्विज
पूजायां भगवच्छब्दः क्रियते ह्यौ
पचारिकः शुद्धे महाविभूत्याख्ये
परे ब्रह्मणि वर्त्तते मैत्रेय भग
वच्छब्दः सर्वकारणकारणे संभ
र्त्तेति तथा भर्त्ता भकारोऽर्थद्वया
न्वितः नेता गमयिता स्रष्टा गका
रार्थस्तथा मुने ऐश्वर्यस्य समग्रस्य
वीर्यस्य यशसः श्रियः ज्ञानवैराग्य
योश्चैव षण्णां भग इतीङ्गना वसं
ति यत्र भूतानि भूतात्मन्यखिला
त्मनि सच भूतेष्वशेषेषु वकारार्थ
स्ततोऽव्ययः एवमेव महाशब्दो भग
वानिति सत्तम परमब्रह्मभूतस्य

वासुदेवस्य नान्यगः तत्र पूज्य
पदार्थोक्ति परिभाषा समन्वितः
शब्दोऽयं नोपचारेण अन्यत्र ह्यु
पचारतः उत्पत्तिं प्रलयंचैव ।
भूतानामागतिं गतिं वेत्ति विद्या
मविद्यांच सवाच्यो भगवानिति ॥
ज्ञानशक्ति बलैश्वर्य वीर्यतेजां
स्यशेषतः भगवच्छब्द वाच्यानि वि
ना हेयैर्गुणादिभिः इति विष्णु
पुराणे ६ अंशे ५ अध्यायः ॥
अपिच परमात्मा च भगवान्विष्व
क्सेनो जनार्दनः तद्भक्तिमान् भा
गवतो नाल्पपुण्ये हि जायते भ
गवच्छासनालम्बी भगवच्छासन
भगवद्भक्ति मास्थाय त्वन्तु भागवत।
तोभव भगवान् भूतभव्येशो भू
तादि प्रभवोऽव्ययः भावेन तं भ
जस्वेशं भव भक्तकरं हरिं भज
स्वभावेन विभुं भगवन्तं मेवश्वरं
ततो भागवतो भूत्वा भववन्धात्
प्रमोक्ष्यसि इत्याद्ये वह्निपुराणे
वैष्णवक्रियायोगे यमानुशासनो ना
माध्यायः ॥ अन्यच्च महतो ब्र
ह्मणस्त्वं सर्वेषां जीविनां सदा
स्रष्टा पाता च शास्ताच भगवान्कृ
हणानिधिः इति ब्रह्मवैवर्त्ते श्रीकृ
ष्णजन्मखण्डे १५ अध्यायः ॥

भगालं क्ली नृकरोटिः यथा भगा
लंनरमस्तकं इति कश्चित् नटा
धरः भगस्य महादेवस्य अलं ।
भूषणमितिव्युत्पत्तिः । ॥
भगाली पुं शिवः इति त्रिकाण्ड
शेषः ॥ ॥ ॥
भगिनी स्त्री सहोदरा तत्पर्य्यायः
स्वसा २ इत्यमरः । भगं यत्नं
पित्रादितो द्रव्यदानेविद्यतेऽस्याः ।
इति इनि भगिनी इति तट्टीका
यां भरतः स्त्रीमात्रं यथा । प
रिशुद्धा च वामाङ्गी भगिनीशक्ति
नेरी इतिशाङ्कचन्द्रिका ॥ ॥
भगिनीपतिः पुं स्वसृभर्त्ता तत्
पर्य्यायः आवुत्तः २ भामः ३ यथा
भगिनीपति रावुत्तो भावो वि
द्धानथावुकः इति नाट्योक्तावम
रः श्यालो भगिन्यङ्घ्रो भाम मया
वां वत पाप्मना । पुरुषाद इवा
यन्वं सहसो हिंसिताः सताः ।
इति श्रीभागवे १० स्कन्धे ४ अ
ध्यायः ॥ ॥ ॥
भगीरथः पुं दिलीपराजपुत्रः
येन गंगा आनीता यथा अस्म
न्वंशस्य तनयो सं अंशुमानाम विश्रु
तः तस्य पुत्रो दिलीपस्तु दिलीपात्तु
भगीरथः । येन भागीरथी गंगा

नपः कृत्वावतारिता । भगीरथस्य ।
तनयो नभाग इति विश्रुतः ॥
इति मात्स्ये १२ अध्यायः ॥
भगो पुं (हे भगवन् । इति मुग्ध
भगो अ (बोधव्याकरणं संक्षिप्त
सारश्च ॥ ॥
भगोलः पुं भपञ्जरं नक्षत्रचक्रं
यथा इदानीं भगोलमाह । या
म्योत्तर क्षितिजवत् स्वदृढं विद
ध्यादाधार वृत्त युगलं ध्रुवयष्टिब
द्धे षष्टांक मत्र सम मण्डलवत्तृ
तीयं नाड्याहृयञ्च विषुवद्वलयेन
देव यथा खगोले क्षितिजं या
म्योत्तरञ्च तदाकार मपर माधार
वृत्तद्वयं ध्रुवयष्टिस्थं कृत्वा तदुपरि
यन्यत्तृतीयं सम मण्डलाकारं घटी
षष्ठ्याङ्कितं कार्य्यं तन्नाडीवृत्तं ।
विषुवद्वृत्त संज्ञं ॥ इदानीं ।
क्रांति वृत्त माह क्रांतिवृत्तं प्रदा
क्कू विधेयं भ्रमत्यत्र भानुस्य भा
द्वे कृभा भानुतः क्रांतिपातः प्र
तीपं तथा प्रस्फुटा क्षेपपातस्य ।
तत्र स्थान कान्यक्रयेन अथान्य
त्तत्र प्रमाण मेव वृत्तं कृत्वा तत्र
मेषादीन् प्रकल्प्य द्वादश राशयो
ऽङ्क्याः तत्र क्रांति वृत्त संज्ञं
तस्मिन् वृत्तेरवि भ्रमति तथा रवे

भौद्वीन्तरे भूभा च तथा तत्र क्रान्ति
पातो मेषादे विलोमं भ्रमति ।
तथा ग्रहाणां विक्षेपपाताः प्र
स्फुटाविलोमं भ्रमन्ति अतः क्रान्ति
पातादीनि स्थानानि तद्योक्तानि ।
॥ इदानीं क्रान्तिवृत्त निवेश माह
क्रान्तिपातेवपाताद् षट् कान्तरे ।
नाडिका वृत्त लग्नं विदध्यादिदं ।
पाततः प्राक्त्रिभे सिद्ध भागैरुद ।
ग्दक्षिणे तस्य भागे त्रिभागेपरे ।
। क्रांति पात चिह्नात् षड्भेऽन्तरे
ऽन्यचिह्नं कार्य्यं तच्चिह्ने नाडी ।
वृत्तेन संसक्तं कृत्वा पात चिह्नाद
ग्रतः त्रिभे ऽन्तरे नाडीवृत्ताद्भाग-
चतुर्विंशत्या उत्तरतो यथा भवति
। अपर भागे त्रिभे ऽन्तरे दक्षिण
तस्मात्ते मौर्गे यथा भवति तथा व
ध्नीयात् इदानीं विमण्डलमाह ।
। नाडिका मण्डले क्रांतिवृत्तं य
था क्रांतिवृत्ते तथा क्षेपवृत्तं स्वसा
त् क्षेप वृत्तस्य राश्यङ्कितं तत्र च ते
षु पातेषु विज्ञाति कृत्वोक्तवत् ।
क्रान्तिवृत्तस्य विक्षेपवृत्तस्य च ते ।
यपाते स षड्भेच कृत्वा युतिं क्षेप
पाताग्रतः पृष्ठतस्त्रिभे क्षेप ।
भागैः स्फुटैः सौम्ययाम्ये न्यसेत् ।
शीघ्रकर्णेन भक्ताः स्ति भज्याशराः स :

पातेक्षेप भागा ग्रहाणां स्फुटाः ।
क्षेपवृत्तानि षण्णां विदध्यात्तथा
कक्ष्यवृत्ते भ्रमन्तीनु पूर्व्वां ग्रहाः
अस्य श्लोकस्य समग्रस्य व्याख्याने
यथा क्रान्तिवृत्तं पृथक्कृतं एवं विम
ण्डल मपि राश्यङ्कं पृथक्पृथक्
कृत्वा तत्र मेषादेर्भ्यस्तं स्फुटक्षेपपाते
दत्वाग्रे चिह्नं कार्य्यं अथ क्रान्ति
वृत्तस्य विमण्डलस्य च क्षेपपातचि
ह्नयोः सम्पातं कृत्वा तस्मात् षड्भे
ऽन्तरे अन्यस्य सम्पातं कृत्वा क्षेप
पाताग्रत त्रिभे ऽन्तरे क्रान्ति वृत्ता
दुत्तरतः स्फुटैः क्षेपभागैः पृष्ठत
स्त्रिभे ऽन्तरे तैरेव भागै र्दक्षि
णतः स्थिरं कृत्वा विमण्डलं निवे
शनीयं अथ पठिता ये विक्षेप भा
गास्ते त्रिज्यागुणाः शीघ्रकर्णेन भा
ज्याः स्फुटा स्तेषाः ॥ अथानुपातः
यदि कर्णाग्रे तावदन्तरं तर्हि त्रि
ज्याग्रे कियदिति यतो भगोले
त्रिज्येव व्यासार्द्धं । एवं चन्द्रादी
नां षट् विमण्डलानि कार्य्याणि स
र्व्व विमण्डले ग्रहाः यान्ति । इदा
नीं क्रान्तिं विक्षेपं चाह नाडिका
मण्डलात् तिर्य्यगयमः क्रान्तिवृत्ता
वधिः क्रान्तिवृत्ताच्चरः क्षेप वृत्ता
वधि स्तिर्य्यगेव स्फुटो नाडिकावृत्त


खेटान्तराले ऽपमः क्रांति वृत्ते
स्फुट ग्रह स्थानं तस्य नाडीवृत्ता
यतिर्य्यगन्तरं सा क्रान्तिः अथ विम
ण्डले च यत्र ग्रह स्थानं तस्य क्रांति
वृत्तात् यत्तिर्य्यगन्तरं स विक्षेपः
अथ विमण्डलस्थ ग्रहस्य नाडीवृत्ता
यतिर्य्यगन्तरं सा स्फुटा क्रान्तिः ॥
इदानीं क्रान्तिपात माह विषुवत् ।
क्रान्तिवलययोः संपाते क्रान्ति ।
पातः स्यात् । तद्भगणाः सौराः ।
व्यस्ता अयुतत्रयं कल्पे अयनचल
नं यदुक्तं मञ्जालाद्यैः सएवायं ।
तत् एते तद्भगणाः कल्पे गोऽङ्क ।
र्त्ते नन्दगो चन्द्राः १९९६६९ तत् ।
संज्ञाते पाते त्रिभा खेटे ऽपमः ।
साध्यः क्रान्तिवशात् चर मुदयाश्चा ।
दल लग्नापमे ततः क्षेप्याः ॥ क्रा
न्त्यर्थपातः क्रान्तिपातः । पातो
नाम सम्पातः कयोः विषुवत् क्रा
न्तिवलययोः नहि तयो र्मेषादावे
व सम्पातः किन्तु तस्मादचलनम
स्ति ये अयन चलन भागाः प्रसिद्धा
स्त एव विलोमगस्य क्रांति पातस्य ।
भागाः मेषादेः पृष्ठतस्तावद्भागान्त
रे क्रांतिवृत्ते विषुवद्वृत्तं लग्नं भित्य
र्थः नहि क्रांति पातोऽस्तीति वक्तुं
तथाकालो अन्यक्षेपात्तस्या पलब्धा ।

त्वात् उपलब्धि प्रकार मप्ये वक्ष्या
ति सत् कथं ब्रह्मगुप्तादिभि नि
पुणै रपि नोक्त इति चेत् तदा
स्वल्पत्वान्न नोपलब्धः इदानीं बहु
त्वात् साम्प्रते ह्युपलब्धः अत एव
तस्य गति रस्तीत्यवगतं यद्येव।
मप्यनुपलब्धोपि सौरसिद्धान्तो।
क्तत्वादागम प्रामाण्येन भगणपरि
ध्यादिषत् कथं ते नोक्ताः सत्यं
अत्र गणितस्कंधे उपपत्तिमानेवा।
गमः प्रमाणं नहि मन्दोच्च पात
भगणा आगम प्रामाण्येनैव कथं
ते रक्ता इति नवक्तव्यं। यतो प्र
ह्राणां मन्दफलाभावस्थानानिप्रत्य
हैतेनोपलभ्यंते तान्येव मन्दोच्च।
स्थानानि यान्येव विक्षेपाभाव स्था
नानि तान्येव पातस्थानानि किंतु
तेषां गतिरस्ति नास्ति वेति संदि
ग्धं तत्र मन्दोच्च पातानां गति र
स्ति चन्द्र मन्दोच्च पातवदित्यनुमा
नेन सिद्धा साच कियतीतदुच्यते
वै भगणै रुपलब्धि स्थानानि तानि
गणितेनागच्छंति तद्गणा सम्भवा
वार्षिकी दैनन्दिनी वा गति र्ज्ञेया
नैवं यद्यन्यैरपि भगणै स्तान्येव
स्थानानि आगच्छंति तदाकतरस्य
गतेः प्रामाण्यं सत्यं नहि सा

म्यत्नोपलब्ध्यनुसारिणी कापि गति
रङ्गीकर्तव्या यदा पुनर्महता काले
न महदन्तरं भविष्यति तदा महा
मतिमंतो ब्रह्मगुप्तादीनां समान य
त्निता एव उत एत स्थाने तदुपल।
ब्ध्यनुसारिणीं गतिं मरीचिकृत्स्ना
स्थापि व्याकरिष्यंति अतएवायंग
णित स्कंधो महामतिमद्भि र्देहः।
सत अनाद्यनंते कालेपि विलंब न
याति अतो ऽस्य क्रांति पातस्य
भगणाः कल्पे ऽयुत त्रयं तावत् सू
र्यसिद्धांतोक्ताः तथा भग्नागोयर्थ
दयनचलन मुक्तं सएव क्रांतिपातः
ते गोक्तं द्वैतर गोचन्द्रा उत्तपद्यं
ते अयंच तेन येन भगणा भवं
ति यदायं यथा निपुणै रुपलभ्यंते
तदा सएव क्रांतिपात इत्यर्थः।
ते विलोमगं क्रांतिपातं ग्रहे प्र
तिप्यक्रांतिः साध्याः ॥ इदा
नीं विक्षेपपातानाह एवं क्रांति
विमण्डल संपातात्क्षेपपाताः स्युः
चन्द्रादीनां व्यस्ताः क्षेपातयने त
ते योज्याः मन्द स्फुटो ह्राक प्र
तिमण्डले स्वगृहो भ्रमत्यत्र च तस्मा
पातः पातेन युक्ता गणितागतेन
मन्दस्फुटात् खेचरतः पातोऽस्मात्
पाते ऽपवाशीघ्रफले विलोमे।

कृत्वास्फुटोनेन युता ब्बरोऽतः चेद्
स्फुटत्वावलयेह्रिपातः स्फुटाह्रिपो।
मेध्यम पात युक्तात् तथाक्रांतिवृ
त्तं विमण्डलयोः सम्पातः क्षेपपातः
तं ग्रहे प्रक्षिप्य क्षेपः साध्याः।
एतदुक्तं भवति क्रांतिपातःप्रसिद्धः
यथा तं ग्रहे प्रक्षिप्य क्रांति सा
ध्यते एव क्षेपपातं ग्रहे प्रक्षिप्य
क्षेपः साध्य इत्यर्थः अथविक्षेपपा
पातो मन्दस्फुटे एव प्रक्षिप्यते।
तत कारण माह मन्दस्फुटोह्राक
प्रतिमण्डल इत्यादि यतः शीघ्र।
प्रतिमण्डले मण्डल स्फुटगत्या ग्रहो
भ्रमतितत्र च हेत्र पातः अतोग।
णितागतपातं मन्दस्फुटे प्रक्षिप्य
क्षेपः साध्यते। शेषं स्पष्टार्थं।
॥ इदानीं त्त भृक्तयोर्विशेष।
माह येवात्रपातभगणाः कथि
ता त्त भृग्वो स्त शीघ्रकेन्द्रभगणैः।
राधिकायतः स्युः स्वल्पाःस्वखोर्थस
दिता स्वलकेन्द्रयुक्तोपातोतयोः।
पाठितवक्र भवो विधेयो बलाढि
शाध्यः किलकेन्द्र सिद्धैकेन्द्र स
पाते फचरन्त योज्यः अत स्व
लात् पात युतात् त्त भृग्वोःस्वधी
भिरोधैः शार सिद्धि रुक्ता। स्फु
टेन शीघ्रोच युतो स्फुटो तयोः

पातो भगोले स्फुट एवपातः न
तु त्त भृक्तयो। शीघ्रोच्च पात युति
केन्द्रं कृत्वा यो विक्षेप आनीतः स
शीघ्रोच्च स्थान एव भविष्यमर्हति न
ग्रह स्थाने यतो ग्रहोऽन्यत्र वर्त्ते
ते अत इद मनुपपन्नमिव प्रति
भाति तथा ब्रह्मसिद्धांत भाष्ये।
त्त भृक्तयोः शीघ्रोच्च स्थाने यावान्
विक्षेप स्तावानेव यत्र तत्रस्थस्यापि
ग्रहस्य भवत्यत्रोपलब्धिरेव वासना
नान्यत् कारणं वक्तुं शक्यत इति
चतुर्वेद नाथ्यनध्यवसायोऽत्रकृतः
अत्रोच्यते ये ऽत्र त्त भृक्तयोः।
पात भगणाः पठिता स्तेशीघ्रकेन्द्र।
भगणै युताः सन्त स्तद्भगणाभवंति
तथाच माधवीये सिद्धांतचूडामणौ
पठिताः अतोऽस्यभगणाभवः पातः
स्वशीघ्रकेन्द्रेणयुतः कार्यः शीघ्रो
चाद्रहे शोधिते शीघ्रकेन्द्रं तस्मि
न् सपाते क्षेपकेन्द्रकरणार्थं ग्रहः
क्षेप्यः अतस्तत्प्रत्याख्यक्षेपक।
यो नीशो कृतेशीघ्रोच्च पात योग
एवावशिष्यत इत्युपपन्नं। किंच
मन्दस्फुटोनं शीघ्रोच्चं प्रतिमण्ड
लेचलकेन्द्रं तत पातेतम युज्य
ते एवं कृते सति क्षेप केन्द्रं।
मन्दफलेनोनगतिस्यात् तद्द्धि।




त्वात् उपलब्धि प्रकार मग्रे वक्ष्या
ति सत् कथं ब्रह्मगुप्तादिभि र्नि
पुणै रपि नोक्त इति चेत् तदा
स्वल्पत्वात्तै र्नोपलब्धः इदानीं बहु
त्वात् साम्प्रतं उपलब्धः अत एव
तस्य गति रस्तीत्यवगतं यथैव।
मप्यनुपलब्धोपि सौरसिद्धान्तो।
क्त्वादागम प्रामाण्येन भगणपरि
ध्यादिषत् कथं तै र्नोक्तः सत्यं
अत्र गणितस्कंधे उपपत्तिमानेवा।
गमः प्रमाणं नहि मन्दोच्च पात
भगणा आगम प्रामाण्येनैव कथं
ते रुक्ता इति नवक्तव्यं। यतो ग्र
हाणां मन्दफलाभावस्थानानि शीघ्र
हैतेनोपलभ्यंते तान्येव मन्दोच्च।
स्थानानि यान्येव विक्षेपाभाव स्था
नानि तान्येव पातस्थानानि किंत्व
नेषां गतिरस्ति नास्ति वेति सन्दि
ग्धं तत्र मन्दोच्च पातानां गति र
स्ति चन्द्र मन्दोच्च पातवदित्यनुमा
नेन सिद्धा साच कियतीतद्ध्याने
वै भगणै रुपलब्धि स्थानानि तानि
गणितेनागच्छंति तद्भगण सम्भवा
वार्षिकी दैनन्दिनी वा गति सैषा
नैवं यद्यन्यैरपि भगणै स्तान्येव
स्थानानि आगच्छंति तदा कतरस्य
गतेः प्रामाण्यं सत्यं नहि सा

म्यतोपलब्ध्यनुसारिणी कापिगति
रङ्गीकर्तव्या यदा पुनर्महता काले
न महदन्तरं भविष्यति तदा महा
मतिमन्तो ब्रह्मगुप्तादीनां समानय
क्तिका एव उत् पत स्यंते तदुपल
ब्ध्यनुसारिणीं गति मरीकृत्य शा
स्त्राणि व्याकरिष्यंति अत एवायंग
णित स्कंधो महामतिमद्भि र्दृष्टः।
सन् अनाद्यनंते कालेपि विलंबे न
याति यतो ऽस्य क्रांति पातस्य
भगणाः कल्पे ऽयुत त्रयं तावत् सू
र्यसिद्धान्तोक्ताः तथा मुञ्जालाद्यैर्य
दयन चलन मुक्तं सएव क्रांतिपातः
ते गोहु तैनर गोचन्द्रा उत्पद्यं
ते अयच तेवा येवा भगणा भवे
त यदायं यथा निपुणै रुपलभ्यंते
तदा सएव क्रांतिपात इत्यर्थः।
ते विलोमगं क्रांतिपातं ग्रहे प्र
क्षिप्यक्रांतिः साध्याः ॥ इदा
नीं विक्षेपपातानाह एवं क्रांति
विमण्डल संपाताक्षेपपाताः स्युः
चन्द्रादीनां व्यस्ताः क्षेपानयने त
ते योज्याः मन्द स्फुटो ज्ञोक प्रा
तिमण्डले स्वग्रहो भ्रमत्यत्र च तस्मा
त्पातः पातेन युक्तो गणितागतेन
मन्दस्फुटात् खेचरतः शरोऽस्मात्
पाते ऽथवा शीघ्रफले विलोमे।

कृत्वा स्फुटोनेन युता च्चलोऽतः चंद्र
स्यकृत्वावलयेऽह्निपातः स्फुटो ह्निपो।
मध्यम पात युक्तात् तथा क्रांतिवृ
त्तं विमण्डलयोः सम्पातः क्षेपपातः
तं ग्रहे प्रक्षिप्य क्षेपः साध्याः।
एतदुक्तं भवति क्रांतिपातः प्रसिद्धः
यथा तं ग्रहे प्रक्षिप्य क्रांति सा
ध्यते एव क्षेपपातं ग्रहे प्रक्षिप्य
क्षेपः साध्य इत्यर्थः अथ विक्षेपा
पातो मन्दस्फुटे यत् प्रक्षिप्यते।
तत् कारण माह मन्दस्फुटाद्द्राक्
प्रतिमण्डल इत्यादि यतः शीघ्र।
प्रतिमण्डले मण्डल स्फुटगत्या ग्रहो
भ्रमति तत्र च क्षेप पातः अतो ग।
णितागतपातं मन्दस्फुटे प्रक्षिप्य
क्षेपः साध्यते। शेषं स्पष्टार्थं।
॥ इदानीं ज्ञ शुक्रयोर्विशेष।
माह येचात्रपातभगणाः कथि
ता ज्ञ भृग्वो स्ते शीघ्रकेन्द्रभगणैः।
राधिकायतः स्युः स्वल्पाःसत्वोपेम
दिता ञ्चलकेन्द्रयुक्तौपातौतयोः।
पाठितचक्र भवौ विधेयो चलाद्वि
शोध्यः किलकेन्द्र सिद्धैकेन्द्र स
पाते फचरन्ते योज्यः अत स्व
लात् पात युतात् ज्ञ भृग्वोः स्वधी
भिराद्यैः शर सिद्धि रुक्ता। स्फु
टोन शीघ्रोच्च युतो स्फुटो तयोः

पातो भगोले स्फुट एवपातः त
त्र ज्ञ शुक्रयोः शीघ्रोच्च पात युति
केन्द्रं कृत्वा यो विक्षेप आनीतः स
शीघ्रोच्च स्थान एव भविष्यमर्हति न
ग्रह स्थाने यतो ग्रहोऽयत्र वर्त्त
ते अत इद मनुपपन्नमिव प्रति
भाति तथा ब्रह्मसिद्धांत भाष्ये।
ज्ञ शुक्रयोः शीघ्रोच्च स्थाने यावान्
विक्षेप स्तावानेव यत्र तत्रस्थस्यापि
ग्रहस्य भवत्यत्रोपलब्धिरेव वासना
नान्यत् कारणं वक्तुं शक्यत इति
चतुर्वेदे नाथ्यनध्यवसायोऽत्र कृतः
अत्रोच्यते ये ऽत्र ज्ञ शुक्रयोः।
पात भगणाः पठिता स्ते शीघ्रकेन्द्र।
भगणै र्युताः सन्त स्तद्भगणाभवंति
तथाच माधवीये सिद्धांतचूडामणौ
पठिताः अतोऽत्र भगणाभवः पातः
स्वशीघ्रकेन्द्रेणायुतः कार्यः शीघ्रो
च्चाद्ग्रहे शोधिते शीघ्रकेन्द्रं तस्मि
न् सपाते क्षेपकेन्द्रकरणार्थं ग्रहः
क्षेप्यः अतस्तस्यशोध्यक्षेपक।
यो तौशौ कृतेशीघ्रोच्च पात योग
एवावशिष्यत इत्युपपन्नं। किंच
मन्दस्फुटोनं शीघ्रोच्चं प्रतिमण्ड
लेचलकेन्द्रं तत पातेतमं युज्य
ते एवं कृते सति क्षेप केन्द्रं।
मन्दफलेनोनतिनस्यात् तदद्दी।



कृतं इतरकेन्द्रस्थानयपनेः । यतो मन्दफलं पाते व्यस्तं देयं । यतो अत्र पात सिद्धं चलकेन्द्र मध्योनं शीघ्रोच्च भवति यत्र भगोले क्रान्तिवृत्तं तत कक्षा वृत्तं तत्र यद्विमण्डलं तत्र स्फुटग्रहः तत स्फुट पात योगो द्विविक्षेप केन्द्रं अतः स्फुट पातस्थाने सम्पातं कृत्वा तत त्रिभे ऽन्तरे स्फुटाकृतेः परम क्षेपांशैः प्राग्वद्भ्रमणेर दक्षिणे वा विन्यस्य तथा न्यस्त विमण्डलस्फुट ग्रहस्थाने विक्षेपः स्फुट विक्षेपेण गणितागतेन तुल्यो दृश्यते नान्यथेत्यर्थः ॥ इदानीं ग्रहगोले । विशेष माह ग्रहस्य गोले कथितापमण्डलं प्रकल्प्य कक्षावलयो यथोदितं निवध्य शीघ्र प्रतिवृत्तमस्मिन् विमण्डलं तत पटितैः शीघ्रांशैः मध्याऽत्र पातो घस्त्रं त भूम्याः स्वशीघ्र केन्द्रेण युतो तथोन्याः भगोल एव तावद्ग्रह गोलः कल्प्यः तत्र स्फुट एव पातः अयमयदि तस्तु ग्रहगोलोऽन्यानिवध्यानेतदा तत्र यथोक्त विषुवद्वृत्तं क्रान्तिवृत्तंच वद्ध्वा कक्षामण्डलं प्रकल्प्य तत्रच्छेद्यकोक्त विधिना शीघ्रप्रतिमण्डलं वद्ध्वा तत्र प्रतिमण्डले गणितागतपातं मेषादे विलोमं गणयित्वा तत्र चिह्नं कार्य्यं अथ त्रिज्या व्यासार्द्धमेवान्यद्वृत्तं राशयंकं विमण्डलाख्यं कृत्वा तत्रापि मेषादेश्चिह्नं पातस्य चिह्नं कृत्वा प्रतिमण्डलविमण्डलयोः सम्पात चिह्नप्रथमं सम्पातं ततो भार्द्धान्तरे द्वितीयं यं कृत्वा पातादग्रतः एष्टतश्च त्रिभेऽन्तरे परमविक्षेपांशैः पदि । तैः प्रतिवृत्ताद्भ्रमणेर दक्षिणोत्तर विमण्डलं न्यस्यं तत्र मन्द स्फुटगत्या । पारमार्थिको ग्रहो भ्रमति अतो मेषादेरनुलोम मन्दस्फुटो विमण्डले देयः स तत्रस्थः प्रतिमण्डलात् यावतान्तरेण विक्षिप्त स्तावान् तत प्रदेशे विक्षेपः यतो वृत्त सम्पा । तस्थ ग्रहे विक्षेपाभावः त्रिभेऽन्तरे । परमो विक्षेपो मध्येऽनुपातेन । अतो वृत्तसम्पातग्रहयोरन्तरं ज्ये । यं तदन्तरं पातग्रहयोगे कृते भवति पातस्य विलोमगत्वात् संयोगः शराग्रं केन्द्रं यदि त्रिज्या तुल्यया केन्द्र ज्यया परमशरस्तदा भीष्टया तथा कइति फलं प्रतिमण्डलविमण्डलयो स्तिर्य्यगन्तरं स्यात् । विमण्डलस्थ ग्रहाद्भूमध्यगे सूत्रे न भूमध्य ग्रहान्तरं सच शीघ्र कर्णः

यदि भूमध्यात् कर्णाग्रे पतावान् विक्षेप स्तदा त्रिज्याग्रे कियानिति द्वितीय त्रैराशिकं स्याद्ये त्रिज्याहृतो द्वितीयगुणः तयो नीशो कृते केन्द्र ज्यायाः परम शर गुणायाः कर्णो हरः फलं कक्षावृत्तस्तत्र स्तिर्य्यगन्तरं स्फुटशरः । इदानीमहोरात्र वृत्तमाह ईप्सितक्रान्ति तुल्ये ऽन्तरे सर्वतो नाडिकाख्यादहोरात्र वृत्ताद्वयं तत्र वद्ध्वा घटीताच षष्ट्यांकयेदस्य विष्कम्भार्द्ध । जीवामता नाडीवृत्ताद्भ्रमणतो दक्षिणतो वा सर्वत्रेष्ट क्रान्तितुल्यान्तरे यद्वृत्तं निवध्यते तदहोरात्रवृत्तं तेन वृत्तेन तस्मिन् दिने रविर्भ्रमतीत्यर्थः वृत्तस्य व्यासा । र्द्धं द्युज्या इदानीं मन्यदाह । अथकस्मा मेषाद्या स्त्वनुलोमं क्रान्तिपाताद्धातन् पृषा मेषादीनां क्र । रात्र वृत्तानि वध्नीयात् नाडीवृत्तोभयतस्त्रीणि त्रीणि क्रमात् क्रमात्तानि क्रान्तिपातादारभ्य त्रिंशत् त्रिंशद्विर्भागैरस्मान् मेषादींश्च कल्प्य । तदग्रशुक्रवदहोरात्र वृत्तानि वध्नीयात् तानिच नाडीवृत्तोभयतस्त्रीणि त्रीणि भवंति तान्येव क्रमात् क्रमतः स्वायनांशात् कर्क्यादिशराणी तान्य इदानीमस्योपसंहारः ॥ एष भगोलः कथितः खेचरगोलो । ऽप्यमेव विज्ञेयः इति सिद्धान्त । शिरोमणिः ॥ ॥

भग्नं त्रि पराजितं इति हेमचन्द्रः त्रुटितं चूर्णितं ॥ भाङ्गा इतिभाषा यथा चिरकाल्लो षितं । जीर्णं कीट निकृषितं घनुः । किं चित्रं यदि रामेण भग्नं क्षत्रियका । न्तिके इति भट्टिः ॥ ॥


भग्नं क्ली रोगविशेषः अथ भग्नाधिकारः तत्र भग्नस्य भेदमाह । भग्नं समासाद्द्विविधं हुताशकाण्डे च सन्ध्यावपितत्र सन्धौ उत्पिष्ट । विश्लिष्ट विवर्त्तितानि तिर्य्यग्गतं क्षिप्तमधश्च षड्धा भग्नमत्र भावार्थः । क्तप्रत्यय स्तेन भग्नं भङ्गः सचात्र । विश्लेषो ऽभिप्रेतः तेन भग्नम । स्थिविश्लेष लक्षणं ॥ समासात् संक्षेपात् हुताश हे यथिवेश । यतस्मरके ऽग्निवेशस्य हुताशो । तिनामान्तर मुक्तं काण्डे सन्धिप । र्यन्ते एकदेशे अस्थिसन्धौ द्वयोरस्थ्योः सन्धान स्थाने तत्र सन्धौ । ऽत्पिष्टादि भेदैः षट्प्रकारं भग्नं । भवति स्वस्य वक्रत्वेन सन्धिभग्नस्यावैविवर्णी उत्पिष्टेत्यादि । ॥

अथः अथोभग्नं ॥ सन्धिभग्नस्य
सामान्यं लिङ्गमाह प्रसारणाकुंच।
कुञ्च सामान्यतः सन्धिगतस्य लिङ्ग
मुत्पिष्टसन्धेः श्वयथुः समन्तात् वि
शेषतो रात्रि भवा रुजश्च विश्लिष्ट
केनैव रुजा च नित्यं वर्त्तनं प
रिवर्त्तनं ॥ उत्पिष्टस्य लिङ्गमाह
उत्पिष्टसन्धेः उत्पिष्टः द्वाभ्या
मस्थिभ्यां पिष्टः सन्धि र्यस्य तस्य
समन्तात् उभय भागद्वयोः विश्लि
माहविश्लिष्ट इत्यादि तो उभयतः
शोथो रुजा च नित्यं सदा रुजा
धिका भानीसत पिष्टाद्भेदः ॥
विवर्त्तिततिर्य्यग्गतात्तिमयोगताना
ह विवर्त्तितपार्श्वरुजश्च तीव्रास्ति
र्य्यग्गतेतीव्ररुजा भवति तिमेऽति
शूलं विषमंच सक्थ्नोः तिमे तयो
रुक विघटश्च सन्धेः विवर्त्तिते स
न्धावमुके अस्थिद्वयोपरिवर्त्तिते।
पार्श्वरुजः सन्धिस्थितास्थिद्वयपा
र्श्वयो रुजः तिर्य्यग्गते सन्धिगते।
एकस्मिन्नस्थि सन्धिस्थानं त्यक्त्वा ति
र्य्यग्गते तिमे सक्थ्नोः ऊरुसन्ध्योः
एकस्मिन्नस्थि पार्श्वास्य उपरिगते
सक्थ्नोः अतिशूलं तत्र विषमं
कदाचिच्चिकं कदाचिन्नं अथः
॥ ॥ ॥ ॥

तिमे सन्धिगते एकस्मिन्नस्थिन्यधो
गते रुक्सन्धे विघटः विघटनञ्चे
वङ्गधा प्रयाति विशेषतो नामति
रेव तल्लं भग्नं काण्डे काण्डविवा
येवङ्गधा वङ्गभिः प्रकारैः प्रयाति
अत्र वङ्गविधत्वं द्वादश विधत्वं बो
द्धव्यं वङ्गविधस्य काण्डभग्नस्य द्वा
दश लक्षणं नोक्तं किंत काण्ड
नामभि रेव तत्सत्वं कर्कटकादि
नामाद्रूप मेव लक्षणं किंतनाम
भिरेव बोद्धव्यं तान् प्रकारा।
नाह काण्डे त्वतः कर्कटकाश्वक
विचूर्णितं पिचित मस्थिच्छल्लितं
काण्डेषु भग्नं स्तिपातितंच त
ज्जागतं विस्फुटितंच वक्रं छिन्नं
द्विधा द्वादशधाच काण्डे त्वतःसा
न्धिमध्यानन्तरं काण्डेकाण्डभेदेन
दाह कर्कटकः अस्थिविश्लेष पूर्वको
मध्ये पोन्नतः पार्श्वयो रद्धनतः क
र्कटवत्सरूपत्वात् कर्कटः अश्वक
र्णः अश्वकर्णवद्बहिरुन्नतास्थि निर्गमा
दश्वकर्णः विचूर्णितं चूर्णितमस्थिवत
शाद्रूपशाभ्यां बोद्धव्यं पिचितमस्थि
नि यंत्रितं वङ्गशोथं च्छल्लितंविश्लि
ष्टं सम्यक्त्वं काण्डेषु भग्नकाण्ड
भग्नं यद्यपि कर्कटकादि सर्व्वमेव
॥ ॥ ॥ ॥

काण्डभग्नं तथापि इयं काण्डभग्नं सं
ज्ञाविशिष्टा अत्र भग्नं मज्जः त्रुटिः
तेन सर्व्वथा त्रुटितं दृश्यभूतंवंवि
श्लिष्टं यत्र काण्डे तत् काण्डभग्नं
अतिपातितं अशेषेण छित्वा पा
तित मस्थि मज्जागतं अस्थ्यवय।
वो ऽस्थिमध्ये प्रविश्य मज्जानं
गतं विस्फुटितं स्तोकविदीर्णं व
क्रं स्थानं त्यक्त्वा ह्वजीभूतं छिन्नं
द्विधा एकं विदीर्णं सतलग्नं अपर
विदीर्ण्णं द्विधाभूतं। द्वादशधा च
काण्डे काण्डेच भग्नं द्वादशध्येय
त्वयः तत्रोक्तमेव कर्कटकादि।
काण्डभग्नस्य सामान्यं लक्षणमाह
स्रस्तांगता शोथ रुजातिवृद्धिः से
पीड्यमाने भवतीह शब्दः स्पर्शा
सहे स्पन्दन तोद शूलंसर्वास्वव
स्थास न शर्म्मलाभः भग्नस्यका
ण्डेवल्ल चिह्न मेतत स्पर्शासहा।
मिति काण्डभग्नस्य विशेषणं स्प
न्दनेनाडीनां स्फुरणं शूलं शूलने
वव्यथा रुजा सामान्या पीडा स
र्वास्ववस्थास शयनासनादिषु।
कष्टसाध्यमाह अल्पाशिनो ऽना
त्मवतो जन्तो र्वातात्मकस्यच।
उपद्रवै र्वा जुष्टस्य भग्नं कृच्छ्रेण सि
ध्यति यतात्मवतो रोगप्रतीका।

रेयत्नरहितस्य वातात्मकस्य च
वातप्रकृतेः उपद्रवैः ज्वराध्मान।
मोह पुरीष संगादिभिः ॥ ॥
असाध्यमाह भिन्नं कपालं क
ट्यांतु सन्धिमुक्तं तथाच्युतं जघने
प्रतिपिष्टञ्च वर्जयेत्तंचिकित्स सकः
कपालं ज्ञानु नितम्बांस गण्ड ताल
शङ्ख वंक्षण शिरोऽस्थीनि कपाला
तथाच्युतं तथा तिमे। प्रतिपिष्टं
उत्पिष्टं ॥ पुनरसाध्यमाह ॥
असंश्लिष्टकपालञ्च ललाटे चूर्णित
ञ्चयत् भग्नं गुदे स्तने पृष्ठे शङ्खे।
मूर्द्धनि वर्ज्जयेत् असं श्लिष्टकपा।
लमिति भग्नविशेषणं स्तनेस्तनयो
रन्तरे उरसि मूर्द्धनि चूडास्थाने।
अपर मप्यसाध्य माह ॥
सम्यक्संहितमप्यस्थि दुर्न्यासाद्दुष्ट
बन्धनात् संक्षोभाद्वापि यद्गच्छेद्वि
क्रियां तच्च वर्जयेत् सम्यक्संहि।
तमपि सम्यग्योजितमपि अस्थि दु
र्न्यासात् दुःस्थापनात् संन्यस्तमपि
दुष्टबन्धनात् सबद्धमपि संक्षोभात्
अभिघातादिना सञ्चलनात् यदि
क्रियां गच्छेत् विकृतं भवति तद्वर्ज्ज
येत् ॥ अस्थिविशेषेण भग्न
विशेषमाह तरुणास्थीनि नम्यन्ते
भिद्यन्ते नलकानि तु कपालानि




विभज्यन्ते स्फुटन्ति रुचकानिव त
रुणास्थीनि घ्राण कर्णाशिरोरुप्र
लास्थीनि नम्यन्ते वक्रीभवन्ति तेना
पवक्रत्वालक्षणं भग्नं नलकानिव
नासीनि नाडीवत् सरन्ध्राण्यस्थिप
र्वाणि भिद्यन्ते अस्थ्यन्तरानुप्रवेशात्
द्विदीर्य्यन्ते कपालानि जानुनितम्बां
स गण्डतालुशंखशिरो ऽस्थीनि ।
विभज्यन्ते स्फुटन्ति रुचकानि दंतास्तु
टंति त्रुटंति अस्थीनि तरुणानला
ककपालरुचकवलयभेदात् पंचवि
धानि तरुणरुचकानि चेति चकाराद्वलया
न्यपि त्रुटंतीति बोद्धव्यं पाण्योः
पार्श्वयुगे पृष्ठे वक्ष जठरयोस्तु
पादयोरपि चास्थीनि वलयानि वभा
षिरे अथ भग्नस्य चिकित्सा
भग्ने लेपाय मञ्जिष्ठा मधुकं चाम्ल
पेषितं शतधौतहविर्मिश्रं ।
शालिपिष्टञ्च लेपनं लेपात् पि
च्छिल त्वचो रत्नीका फलरसाभ्यां
वास्थयष्टयः प्रशाम्यन्ति सहनेवां
वा सद्योभिघातजनिता रागरु ।
संहारलेला गोधूम मर्जनं ।
सन्धि भग्ने ऽस्थिसम्भग्ने पिबेत् क्षी
रेण वा पुनः हरेन पिबेत् क्षी
रेण वेल्याधैः अस्थिसंहारः हड
सिंहार इति लोके रसोना ।

मधुलाक्षाम्यसिना कल्कसममश्नतः
छिन्नभिन्नच्युतास्थ्नाञ्च सन्धानम
विराद्भवेत् लाक्षास्थिसंहृत ।
ककुभाश्वगन्धा चूर्णीकृता नागव
ला पुरश्च संभग्नमुक्तास्थि रुजानि
हन्यादङ्गानि कुर्य्यात् कुलिशोप ।
मानि अस्थि संहृत हारसिंहार ।
लाक्षादिगुग्गुलः ॥ मांसं ।
मांसरसः क्षीरं सर्पिर्यूषः कला ।
यज्ञः बृंहणञ्चात्र पानञ्चरेयं भ
ग्नाय जानता लवणं कटुकं क्षारं ।
मद्यं मैथुन मातपं रूक्षानन्नं ।
श्रमञ्चापि भग्नः सेवेत नकाचित्
इति भावप्रकाशे भग्नाधिकारः ।
भग्नपादर्क्षं क्ली पुष्कराख्येन तत्रप
टके यथा पुनर्वसूत्तराषाढाकृत्ति
कोत्तरफल्गुनी पूर्वभाद्र विशाखा
व षडेते पुष्कराः स्मृताः भग्न
पादर्क्ष संयोगात् द्वितीया द्वा
दशी यदि सप्तमी चार्कमन्दारे ।
तिस्तत्वे ॥
जायते जातकोप्यरं इतिज्यो ।
भग्नपृष्ठः पुं सन्तुखः इति त्रिकाण्ड
शेषः त्रुटितमेरुदण्डः यथा ।
भग्नपृष्ठकटिग्रीवं सव्याहृषित
धोमुखं कष्टेन लिखितं पुस्तं यत्नेन
परिपालयेत इति प्राचीनवाक्यं ।

भग्नसन्धिः पुं शरीरस्य सन्धिस्थान
भङ्गरोगविशेषः तस्यौषधं य
था अभयात्रिफला व्योषः सर्वैं
रेभिः समीकृतः तत्सा गुग्गुल
ना योज्यो भग्नसन्धि प्रसारकः
इति गारुडे १७५ अध्यायः ॥
भग्नसन्धिकं क्ली घोलं इतिशब्द
चन्द्रिका ॥ ॥
भग्नात्मा पुं चन्द्रः इति शब्दचंद्रि
का भग्नाशः त्रि हताशः दीर्घतरसा
भङ्गयुक्तः यथा अतिथिर्यस्य भग्ना
शो गृहात् प्रति निवर्त्तते स त
स्मै दुष्कृतं दत्वा पुण्यमादाय ग
च्छति इत्याह्निकतत्वे ॥
भग्नी स्त्री भगिनी इति द्विरूप ।
कोषः ॥ ॥
भङ्कारी स्त्री दंशः इति त्रिकाण्ड
शेषः ॥ ॥
भङ्क्ता त्रि भङ्गकर्त्ता भन्जधातोः
कर्त्तरि तृन्प्रत्ययेन निष्पन्नः ॥
भङ्गः पुं तरङ्गः इत्यमरः परा
जयः भेदः रोगविशेषः ॥
इति मेदिनी कौटिल्य ॥ भयं
विच्छित्तिः इति हेमचन्द्रः ॥
रोगमात्रं इति राजनिर्घण्टः ॥
गमनं जलनिर्गमः इत्यजय
पालः ॥ ॥

भङ्गवासा स्त्री हरिद्रा इतिशब्द
रत्नावली ॥ ॥
भङ्गसार्थः त्रि कुटिलः इति हारा
वली ॥ ॥ ॥
भङ्गी स्त्री वृत्तः विशेषः तत्पर्य्या
यः मातुलानी २ इत्यमरः । हे
भङ्गायां भङ्गाकाश्मीरेषु स्वनाम ।
ख्याता इति सुखन्त्यादयः इति
भरतः एतस्याः फले फलाय प
रिमाणमिति सर्वस्वं इति सारस ।
न्दरी शाणाख्यशस्य यथा भङ्गा
शस्ये शणाङ्कये इति मुकुटधृत
रुद्रः त्रिहला तेउडी इति ।
भाषा यथा त्रिभण्डीरेचनी भङ्गा
कलिङ्गा परिपाकिनी इति शब्द ।
चन्द्रिका ॥ ओषधविशेषः भाङ्ग
इति सिद्धि इति च भाषा यथा
त्रैलोक्यविजया भङ्गा विजयेन्द्रा
शनं जया इति च शब्दचंद्रिका
अस्या गुणाः विजया शब्दे द्रष्टव्याः
भङ्गानः पुं मत्स्यविशेषः भाङ्गन
इति भाषा तत्पर्य्यायः दीर्घज ।
ङ्गलः २ इति शब्दमाला ॥ ।
भङ्कारी स्त्री दंशः इति त्रिकाण्ड
शेषः ॥ ॥
भङ्गिः स्त्री विच्छेदः कौटिल्यभेद :
इत्यमरभरतौ विन्यासः इति ।




कलिङ्गः कङ्कालः इत्यरुणदत्तः ।
भङ्गः इत्यन्ये ॥ व्याजः । छ
लनिभः इतिरभसः ॥
भङ्गिमा पुं भङ्गिः यथा अथरे
कज्जलं चारु दृशा लाम्बूलरक्ति
मा प्राणनाथ किमनेन वेशविन्या
सभङ्गिमा इतिकाव्यचन्द्रिका ।
भङ्गी स्त्री भङ्गिः यथा जानामि
मान मलसाङ्गि वचो विभङ्गीं भ
ङ्गीशतं नयनयोरपि चातुरीञ्च
आभीर नन्दन मुधा सङ्गशंसी
वंशीरवो यदि न मामवशीकरो
ति ॥ इत्युद्भटः ॥
भङ्गुरः त्रि कुटिलः इतिजटाध
रः भङ्गुरः पुं नद्यावक्रः नदीर ।
वांक इतिभाषा इतिशब्दमाला ॥
भङ्गुरा स्त्री अतिविषा प्रियङ्गुः
इतिराजनिर्घण्टः ॥ ॥
भङ्ग्यं क्ली भङ्गाक्षेत्रं तत्पर्य्यायः
भाङ्गीनं २ इत्यमरभरतौ ॥
भचक्रं क्ली राशिचक्रं यथा अ
मावर्त्तौ भचक्रेऽस्मिन्ध्रुवोनाभौव्यव
स्थितः अराचक्रे चन्द्रभौमौ बुध
जीव शनैश्चराः राहुः केतुरा
दयश्च नक्षत्राण्यथ राशयः सर्वा
स्तत्र अहोरात्रमेरौ भूगोलकोऽङ्कवा
चापाभवेद्दला यदि स्पाञ्च न

हिरहाहिनं सूर्य्येन्दोरुपरागस्य ।
गोलकच्छायया भवेत् । अन्योन्य
यो स्तयो रेव च्छाययोरेव कार ।
णात् ग्रासमोतो न जायते न
ज्ञातः पूर्वपश्चिमौ । तत्रपुण्यफ
लाङ्गागः कृतो राहोस्तु विस्तृता ।
इत्याद्ये वह्निपुराणे गणभेद ना
माध्यायः ॥ अथ भचक्र भ्रम
ण व्यवस्था माह निरक्षदेशे क्षि
ति मण्डलोपगौ ध्रुवौ नरः पश्य
ति दक्षिणोत्तरौ तदाश्रितं खे ज
लयन्त्रवत् सदा भ्रमद्भचक्रं निजा ।
मस्तकोपरि उदग्दिशं याति यथा
यथा नरस्तथा तथा खोन्नत मृक्ष
मण्डलं उदग्ध्रुवं पश्यति चोन्नतं
क्षितेस्तदन्तरे योजनजाः पलां
शकाः योजन संख्या भांशै २९० ।
गुणिता कुपरिधिहृता ४९६७ भव
न्त्यंशाः भूमौ कक्षायां वा भागे
भ्यो योजनानि च व्यस्तं इति सि
द्धान्तशिरोमणौ गोलाध्यायः ॥
भज न ङ भागसेवयोः इति
कविकल्पद्रुमः ॥ न विभजति ।
विभजते यनं भ्राता ङे अभाक्षी
त् कृत्स्नं साधुः इति दुर्गादासः
भज क पाके इति कविकल्पद्रुम :
कभाजयति विश्राणने इति वोप :

विश्राणनं दानं इतिदुर्गादासः ॥
भज इ क प्रसि इति कविकल्प
द्रुमः इक भञ्जयति भासि दी
प्तौ इतिदुर्गादासः ॥ ॥
भजन त्रि भागकर्त्ता सेवाकर्त्ता
इति भजधातोः कर्त्तरि शानप्रत्य
येन निष्पन्नं ॥ ॥
भजनं क्ली भागः सेवा इति
भजधातो भावे अनट्प्रत्ययेन
निष्पन्नं ॥ दारासुतये भजनसहाया
पुत्रा स्ते ये तद्धनकायाः धनम
पि तद्धरि भजनार्थं नोचेदनन्त
संध्वं व्यर्थं इति मोहमुद्गर ।
भजमानः त्रि न्याय्यं न्यायागतं
द्रव्यादि इत्यमरः भागकर्त्ता
सेवाकर्त्ता इति भजधातोः क
र्त्तरि शान प्रत्ययेन निष्पन्नं ॥
भंजकः त्रि भंजनकर्त्ता भनक्ति
यः इत्यर्थे भञ्जधातोः कर्त्तरि
ण्यकेन निष्पन्नः ॥
भञ्जन त्रि वर्त्तमानभञ्जनाश्रयः
भञ्जधातोः कर्त्तरि शानप्रत्ययेन
निष्पन्नं ॥ ॥
भञ्जनं क्ली मोटनं इतिभंजधातो
र्भावे अनट् प्रत्ययेन निष्पन्नं ॥
भञ्जनकः पुं मुखरोगविशेषः
तस्य निदानादियथा वक्त्रं वक्त्रं

भवेद्यस्य दन्तभङ्गश्च जायते । क
फ वात कृतो व्याधिः स भंजन
कसंज्ञितः ॥ इतिमाधवकरः
भंजकः पुं देवकुलोद्भूततरुः ॥
तत्पर्य्यायः काचिनः २ इति
त्रिकाण्डशेषः ॥ ॥
भंजा स्त्री अन्नपूर्णा यथा भीतिं
हाभयहन्त्री च भावनावशवर्त्तिनी
भीमांगवासिनी भंजा भित्तिसंवि ।
त्ति वर्द्धिनी इति रुद्रयामले सम
विद्यारहस्यं ॥ ॥
भट १ भृतौ इतिकविकल्पद्रुमः
भृतिरिह पोषणं कर्म्मस्य मि
ति गोविन्दभट्टः भटति भृत्यं
स्वामी इतिदुर्गादासः ॥ ॥
भट म भाषणे इतिकविकल्पद्रुमः
म भटयति भाषणं कथनं इति
दुर्गादासः ॥ ॥
भटः पुं योद्धा इत्यमरः ॥ म्लेच्छ
भेदः इति हेमचन्द्रः ॥ वीरः
पामरविशेषः इति मेदिनी ।
रजनीचरः इति शब्दरत्नावली ।
वर्णसंकरविशेषः यथा वर्द्धका
राद्भटो जातो नटिक्यां वरवाह
कः इति पाराशरपद्धतिः ॥
भटा स्त्री इन्द्रवारुणी रक्तलशु
सा इति भाषा इतिरत्नमाला ॥



भटित्रं क्ली शूलपक्वमांसादि कावाव इति पारस्यभाषा । इत्यमरः ॥ ॥

भट्टः पुं जातिविशेषः भाट इति भाषा तस्योत्पत्तिर्यथा वैश्यायां शूद्रवीर्य्येण पुमानेको बभूव ह स भट्टो वावदूकश्च सर्व्वेषां स्तुतिपाठकः इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः अपि च क्षत्रियाद्विप्रकन्यायां भट्टो जातोऽनुवाचकः इति युधिष्ठिरपरशुराम संवादे जातिसङ्कर । लक्षणां शिबिरान्तिके ज्ञात । स्य वासो देयः यथा ब्राह्मणां क्षत्रियं वैश्यं सच्छूद्रं गणकं । शुभं भट्टं वैद्यं पुष्पकारं स्थापयेत् शिबिरान्तिके ॥ इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०१ अध्यायः ॥ ॥

भट्टाचार्य्यः पुं तत्रातभट्टमतं मीमांसाशास्त्रं उदयनाचार्य्यमतं न्यायशास्त्रं एतदुभय शास्त्रवेत्ता एतदुभयमतं जानाति यः इत्यर्थे ढक्वेकादिति कारकात कर्त्तरि श्र णिनाच्च प्रत्ययेन निष्पन्नं ॥

भट्टारः त्रि पूज्यः इति त्रिकाण्डशेषः ॥

भट्टारकः पुं नाट्योक्तौ राजा । इत्यमरः देवः तपोधनः । इतिमेदिनी पूज्ये त्रि इति जटाधरः ॥ ॥

भट्टारकः पुं रविवारः यथा सर्व्वे स्नाय निर्म्मित पापा स्तदथ भट्टारकवारे कथमेतान् दन्तैः स्पृशामि इति हितोपदेशे १ परिच्छेदेकाकंप्रतिजम्बुकवाक्यं

भट्टिः पुं स्वनामख्यातग्रामकथाख्य महाकाव्यं तत्तु वलभीवास्तव्य श्रीस्वामिसूनु भट्टमहाब्राह्मण महावैयाकरणेन कृतं इतिजयमंगलकृता तट्टीका एतत्काव्यं भर्त्तहरिणा कृत मिति भरतमल्लिकेनलिखितं ॥

भट्टिनी स्त्री नाट्योक्तौ अकृताभिषेकाराजपत्नी इत्यमरः ब्राह्मणभार्य्या इति मेदिनी ॥

भड इ ङ वाचि इतिकविकल्पद्रुमः परिभाषणा इति गोविन्दभट्टः परिहास इति चतुर्भुजः ॥ इ भण्डते ङ भण्डने विड़ी लोकः इतिदुर्गादासः ॥ ॥

भड इ क शिवे इति कल्पद्रुमः शिवं कल्याणक्रिया वेदेष्वव । प्रत्तारत्ते प्रसिद्धोऽयं इक भाण्डयति प्रत्नारको मुख्यं यतरानोगी कारेण इति दुर्गादासः ॥

भडः पुं वर्णसंकरजातिविशेषः सवल्लटात् तीवर कन्यायां जातः यथा लेट तीवर कन्यायां तत यामास षस्मरान् माले मल्लमा तरच्च भडं कोलच्च कन्दरं इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः

भडिलः पुं सेवकः शूरः इत्युणादिकोषः ॥ ॥

भण श्ब्द शब्दे इतिकविकल्पद्रुमः श्ब अबीभणत् अबभाणत् व्यञ्जनाद्यः श्रीजयदेवकृत हरिमेवं भणति परमरमणीये इति दुर्गादासः ॥ ॥

भणितं त्रि शब्दितं कथितं । यथा श्रीजयदेव भणितमिदमद्भुत केशवकेलि रहस्यं इतिगीत । गोविन्दः ॥ ॥

भणितिः स्त्री वाक्यं इति भूरिप्रयोगः त्रिकाण्डशेषश्च ॥ ॥

भण्टाकी स्त्री वार्त्ताकी इत्यमरः हेट्टनी इतिरत्नमाला ॥ ॥

भण्डकः पुं श्योनाकवृत्तः इति रत्नमाला क्वचित् भण्डकोपि । पाठः ॥ ॥

भण्डः पुं अश्लीलभाषी भांड इति भाषा इति संक्षिप्तसारोणादि । वृत्तिः तत्पर्य्यायः चाटुपटुः २ । इतिभूरिप्रयोगः ॥ ॥

भण्डकः खञ्जनपक्षी इति जटाधरः ॥ ॥

भण्डनं क्ली कवचं युद्धं खलीकारः ॥ इतिमेदिनी ॥ ॥

भण्डहासिनी स्त्री गणिका इति शब्दरत्नावली ॥ ॥

भण्डिः स्त्री वीचिः इतिहारावली

भण्डिका स्त्री मंजिष्ठा इति शब्दरत्नावली ॥ ॥

भण्डिरः पुं शिरीषवृक्षः । यथा भण्डिलोभण्डिरो नेमीति भरतधृतवाचस्पतिः ॥ ॥


भण्डिलः पुं शिरीषवृक्षः इत्यमरः ॥ ॥

भण्डिलः त्रि शुभः दूतः इत्युणादिकोषः शिल्पी इति संक्षिप्तसारोणादिवृत्तिः ॥ ॥

भण्डी स्त्री मंजिष्ठा इत्यमरः शिरीषवृक्षः इतिराजनिर्घण्टः ॥

भण्डीनकी स्त्री मंजिष्ठा इतिभावप्रकाशः ॥ ॥

भण्डीरः पुं सनष्ठिलत्तुपः तण्डुलीयशाकः शिरीषवृक्षः । इति राजनिर्घण्टः ॥ ॥




भण्डीरलतिका स्त्री मंजिष्ठा इति
राजनिर्घण्टः ॥ ॥
भण्डीरी स्त्री मंजिष्ठा इत्यमरः ।
भण्डीलः पुं मंजिष्ठा ॥ इतिशब्द
रत्नावली ॥ ॥
भण्डुकः पुं मत्स्यविशेषः भाङुर
इतिभाषा अस्यगुणाः मधुरत्वं ।
शीतत्वं हृद्यत्वं श्लेष्मकरत्वं ।
गुरुत्वं विष्टम्भित्वं रक्तपित्तहर ।
त्वंच इतिभावप्रकाशः ॥
भण्डूकः पुं श्योनाकवृक्षः इति
रत्नमाला ॥ ॥
भद इ ङ हर्षे प्रीतौ शुभे ।
इति कविकल्पद्रुमः ई भन्दते ।
ङ भन्दते पण्डितः सदा इति
दुर्गादासः ॥ ॥
भद इ क शुभे इतिकविकल्पद्रुमः
इकभन्दयति शुभं कल्याणंक्रि ।
या इति दुर्गादासः ॥
भदन्तः पुं सौगतादिवृद्धः इति
हेमचन्द्रः मायादेवी सुतः । स
र्वज्ञः सुजिते त्रि इत्युणादि ।
कोषः ॥
भदाकः पुं क्ली मंगलं इत्युणा
दि कोषः ॥
भद्रं क्ली मंगलं मुस्तं कांचनं
इति मेदिनी ॥

भद्रं क्ली स्त्री करणविशेषः इति
मेदिनी अस्त्रविष्टिभद्रात्वेन प्र
सिद्धं अशुभदं इतिज्योतिषं ।
भद्रः पुं शिवः खंजरीटः । वृष
भः कदम्बकः करिजातिविशे ।
षः इतिमेदिनी नवशुक्लबला ।
त्मगत बलदेवः रामचरः ॥ सु
मेरुः इति हेमचन्द्रः । स्नुही ।
इतिराजनिर्घण्टः साध्यमौलि ।
कानां पद्धतिविशेषः यथा वि
स्तु नागः खिल पिल गृत इंद्रो
गुप्तः पालो भद्रः इत्यादि कुला
चार्य्यकारिका ॥ ॥
भद्रः त्रि श्रेष्ठः साधुः इति मे
दिनी ॥ ॥
भद्रकं क्ली भद्रमुस्तकं इति ।
शब्दमाला मनोज्ञे त्रि इतित्रिका
ण्डशेषः ॥ ॥
भद्रकः पुं देवदारु इति शब्द
रत्नावली ॥ ॥
भद्रकण्टः पुं गोक्षुरः इतिराज
निर्घण्टः ॥
भद्रकाली स्त्री गन्धोली कात्या
यनी इति मेदिनी तस्या उत्
पत्ति यथा श्री शैवे उवाच सू
त तंत्रपराह्ले भद्रकालीयथाप
रा प्रादुर्भूता महाभागा महिषेण ।

सैदेवत महिषासुर एवासौनिद्रा
यां निशि पर्वते स्वप्ने परद्दष्टो
वीरो दारुण घोरदर्शने महामा
याभद्रकाली छिन्ना खड्गेनकशिरे
पपौतस्य च रक्तानिव्यादितास्या ।
निर्भीषणा ततः प्रातर्भयपुतःस
दैत्यो महिषासुरः तामेव पूज
यामास सुचिरं सानुग तदाध्यारा
धिता तदा देवी महिषाणामोरणार्थ
प्रादुर्भूता भद्रकाली भुजैः षो
डशभिर्युता ततः प्रणम्य महिषो ।
महामायां जगन्मयी उवाचेदं व
चोनम्रमूर्त्तिः भक्तियुतो ऽसुरः म
हिषउवाच देवि खड्गेन संछिद्य
शोणितानि शिरोमम त्वयाभुक्ता
निदृष्टानि मया स्वप्ने सुनिश्चितं
अवश्यं तु त्वया कार्य्यं मया ज्ञातं
प्रमाणतः एतदुपरि यानं मेतच्चे ।
कंदेहि मेवरं वध्यस्तवाहं ना
त्रास्तिसंशयः परमेश्वरि ममापि
तत्रतोऽन्तःत्वं नियतिः केनलंघ्यते
किंतवैव सहितः शम्भुराराधि
तः पुरामम पित्रा मदर्थेन ज्ञातः
पश्चाद्दहं ततः मयाप्याराधितः
शम्भुः प्रामा श्रेष्ठ तपावराम्ब
त्सरत्रयं पर्वदासुर राज्य मुत्तमं
अकण्टकं मया भुक्तं मतत्तापो न

विद्यते कात्यायनेन मुनिना शप्तो
ऽहं शिष्यकरणात् सीमंतिनी वि
नाशं ते करिष्यति नसंशयः पुरा
सनिं तपस्यन्तं रौद्राख्यं नामचोत्तमं
मुनेः कात्यायनाख्यस्य शिष्यं ॥
हिमवदन्तिके दिव्य स्त्रीरूप मतुलं
कृत्वाहं कौतुकान्तरा मयासंमो ।
हितो विप्रोऽत्यन्तक्रुद्ध स्तदा तपः
नहृतात संस्थितेनाहं मुनिना का
त्यस्तुना ज्ञात्वा मायां तदा शप्तः
शिष्यार्थे क्रोधयुक्तेन यस्मात्त्वया
मे शिष्योऽयं मोहितः सपस्स्य ।
तः कृतस्त्वया स्त्रीरूपेण तत त्वां
स्त्री हनिष्यति इतिमां शप्तवान् ।
पूर्वं मुनिः कात्यायनः पुरा तस्य
शापस्य कालोऽयमागत्य समुप
स्थितः देवेन्द्रत्वं मया प्राप्तं भुक्तं
त्रिभुवनं समं किंचित्त्रशोच्यं न
मास्ति वाञ्छनीयं हियन्मया तस्मा
त्वां वे प्रपन्नोऽहं पाद्येशेषं हियत्म
या प्रेरहिदेविदुर्गेत्वं भूयस्तम्यं ॥
नमोनमः श्रीदेव्युवाच प्रार्थनीयो
वरो य स्ते तं वृणु त्वं महासुर ।
दास्यामि तेवरं प्रार्थ्यं संशयो ।
नात्र विद्यते महिषउवाच यज्ञ
भागमहं भोक्तुमिच्छामितत्प्रसा
दतः यथा यज्ञेषु सर्वेषु पूज्यो



ऽहं स्थानतया कुरु त्वत् पादसेवा ।
तत्पदे यावत् सूर्य्यः प्रवर्त्तते एवं
वरद्वयं देहि यदि देयो वरो मम
श्रीदेव उवाच यज्ञभागाः सदेभ्यश्च
कल्पिता वै पृथक्पृथक् भागेन
विघ्नेतव्यो यद्दास्यामि तवाधु
ना ॥ किन्तु त्वयि मया युद्धे निहते
महिषासुर नैव त्यक्ष्यसि मत्पादं ।
सततं नात्र संशयः मम प्रवर्त्तते ।
पूज्या यत्र यत्र च तत्रैव पूज्यस्थित
स्य नैव काया ऽयं दानव ॥
नव इति श्रुत्वा वच स्तस्याः प्रहृष्टे महि
षासुरः वरं प्राप्य हृष्टमुदितः प्रसन्न
वदनस्तदा उग्रचण्डे भद्रकालि दुर्गे
देवि नमो ऽस्तु ते प्रभूता मूर्त्तयो
देवि भवत्याः सकलात्मिकाः का
भि स्त मूर्त्तिभिः पूज्या यत्ते ऽहं
परमेश्वरि तत्तमाव त्वयदिमे भ
वत्सेद कृपा कृता श्रीदेव उवाच
मायानिर्नामि बोधकानिवयेद महि
षासुर तासमूर्त्तिषु संस्पृष्टः पूज्या
लोके भविष्यति उग्रचण्डेति या
मूर्त्तिर्भद्रकाली त्वहं पुनः स्मों
त्वां हनिष्ये सा दुर्गेति प्रकीर्त्ति
ता एतासमूर्त्तिषु सदा पादलेघ्रा
नृणां सदा पूज्यो भविष्यसि वै वेदे ।
वाना मपि रक्षसां यादिस्तथा ।

उग्रचण्डा मूर्त्तौ त्वं निहतः पुरा
द्वितीय सृष्टौ तं भवान् भद्रकाल्या
मया हतः दुर्गारूपेणाधुना त्वां
हनिष्यामि सहानुगं किन्तु पूर्वं
नगृहीतस्त्वं मया पादयो स्तले ।
अधुना प्रार्थित वरो गृहीतः पूर्वं
काययोः गृहीतव्यस्य पश्चात्त्वं ।
यज्ञभागापभङ्क्त्ये ॥ इतिकालि
कापुराणे ६१ अध्यायः ॥ गंगा
याः पश्चिमतीरे ग्रामविशेषस्य ॥
भद्रकाली स्त्री भद्रमुस्ता इतिराज
निर्घण्टः ॥ ॥
भद्रकुम्भः पुं पूर्णकुम्भः इत्यमरः
भद्रगन्धिका स्त्री मुस्तकं इतिरत्न
माला ॥ ॥
भद्रंकरः त्रि मंगलकारकः तत्
पर्य्यायः क्षेमंकरः २ क्षेमकारः ।
३ भद्रंकरः ४ शुभंकरः ५ श्रीष्ठ
तातिः ६ शिवतातिः ७ शंकरः ८
इति भूरिप्रयोगः ॥ ॥
भद्रचूडः पुं लंकास्थायी लेकासिं
इति भाषा इतिशब्दचन्द्रिका ॥
भद्रजः पुं इन्द्रयवः इतिराजनि
र्घण्टः ॥ ॥
भद्रतरुणी स्त्री कुब्जकपुष्पः इति
राजनिर्घण्टः ॥
भद्रदारु क्ली जम्बुद्वीपस्यनववर्षा

न्तर्वर्षविशेषः यथा मास्यवत्त
लयि मध्यवर्त्ति यत्तत् भद्रदारुगंज
वैयाः इति सिद्धान्तशिरोमणौ ।
गोलाध्यायः ॥
भद्रदन्तिका स्त्री दन्तीवृक्षभेदः
भद्रदन्ती इति ख्याता तत्पर्य्यायः
केशरुहा १ भिषग्भद्रा २ जयाव
त्तावर्त्तकी ४ चयांगी ५ जयाङ्का
७ अस्या गुणाः कटुत्वं उष्णत्वं ।
रेचनत्वं कृमि शूल कुष्ठाम्र दोष
त्वन्नामय नाशित्वं च इतिराज
निर्घण्टः ॥
भद्रदारु क्ली पुं देवदारु इत्य
मर भरतौ सारुकाष्ठं इति
रत्नमाला ॥ ॥
भद्रदार्व्वादिकः पुं औषधगणवि
शेषः यथा भद्रदारु कुष्ठ हरिद्रा ।
वरुणो मेषशृंगी बलानिबला जग
रा मलकी कुबेराक्षी वीरतरु स
हचरा ग्निमन्थ वत्सादन्य राढा
श्मभेदकालकर्कशतावरी पुन
र्नवावसकवशिर कांचनकभार्गी
कार्पासी वृश्चिकाली पद्मा वद
र यवकोल कुलत्थ प्रभृतीनि इति
सश्रुत सूत्रस्थानस्य संशोधन संश
मनीयाध्यायः अपिच देवदारुह
रिद्रे द्वे वरुणः कुष्ठ मेवच मे


हानिम्बं नागवला एरण्ड मलागरेवो
ऽपरः पाटला वात्सगुप्ताचस्थादी
पाषाणभेदिका शतवरी चार्क
मूलं गुडूची गणिकारिका पुन
र्नवाच वासक स्वर्णावर्द्धक का
नतं गोक्षुरं शरमूलंच कुशमूलं
समांसिकं कनचत्वारिंश दूच्ये ॥
भद्रदार्व्वादिको गणाः इतिशब्द
चन्द्रिका एतन्मध्ये चन्द्ररूपा ।
द्रव्याणितप्रमाणानि । ॥
भद्रनामा पुं काष्ठकुट्टपक्षीका
ठठोकरा इतिभाषा इतित्रिकाण्ड
शेषः ॥ ॥
भद्रनामिका स्त्री त्रायन्तीवृक्षः व
हला इतिभाषा इतिरत्नमाला ।
भद्रनिधिः पुं महादानविशेषः
यथा इन्द्र उवाच विधानं ब्रूहि मे
ब्रह्मन्दानस्यास्य महानिधेः यथा
देव विशेषेण विस्तारान्तकथा
रकं ब्रह्मोवाच पुण्यां तिथिं ।
प्राप्य तु पौर्णमास्यां तथा परा ।
गेषाशि सूर्ययोर्वा चन्द्रसूर्यग्रहेऽपि वा ।
यनद्वये वा प्रबोधने प्रस्वपनेऽथ
विस्तोः कुर्य्याद्योर्दुम्बर मेव
कुम्भं हिरण्यमानेन यथात्म श
क्त्या तथापिधानेच सराजतं स्या
द्धिरण्यगर्भेण तु शुद्धेन नरर्षे

तो ऽर्द्धेन तदर्द्धेन वा स्वशक्तितः
स्वर्णपलैः शतेन तदर्द्ध मध्येन त
त्रिशता पलत्रयार्द्धेन मध्येन कृ
र्यात तत्ताम्र भाण्डे कनकं नि
धेयं सवज्र नीलोत्तम पद्मरागं
समकं वैदूर्य्य सविद्रुमं च तत्ताज
ने पात्र मध्ये सकलं स्यात प्रवर्त्तने
भद्रनिधिं सविज्ञान हस्तासने ।
प्रावरणोपयुक्ते कुशाजिने स्वर्णार्च
मर्घ्यं सपाद्यकोपानह छत्रयु
क्तं तं तौमवस्त्रोत्तम युग्मयुक्तं स
म्पूजयेन्मंत्र वरै रथैनं आदौ ।
त पंचामृत माध्य विष्णुं संस्नाप्य
संसार तरं समर्च्य तथेश्वरं पा
वकमेव हुत्वा आमंत्रयेद्भद्रनिधिं
ततस्तं श्रीखण्ड कर्पूर सकुंकुम
नैवेद्याद्य नाम श्रियः प्रतिष्ठे
नम स्तेषोंकार युतं च पात्रे तद्भा
जने ऽप्येव मथार्चयेत्तां त्वया ।
समस्तान्तर स्थित यत्त विश्वारेऽद्धा
रण किन्नरेन्द्रैः गन्धर्वविद्याधरदान
वेन्द्रैर्युत हृतं विश्वमिदं नमस्ते
समस्त संसारकरी त्वमेव विष्णोः
महानन्दमयी च माया समस्त क
ल्याण निधिः समाधि हरिप्रिये भद्र
निधे नमस्ते एवं सम्पूज्य विधिना त
तो विप्रमथार्च्चयेत किरीटांगद नि

ष्काग्र कुण्डलाङ्गुलि भूषणैः सुलं
कृत्य हरिं यद्वत पीताम्बर यं ततः
पूजयेदच्युतं ध्यात्वा मन्त्रेणानेन भ
क्तिमान भूदेवो ऽसि विभो नित्यं
नित्यानन्द मयो हरे हरसे दुष्कृ
हृत्कृपाकर नमो ऽस्तुते । भू
देवभगवान भर्गभव भंगकेश्वर
भावभूतिकरो जिष्णो प्रभविष्णोन
मो स्तु ते एवं सम्पूज्य हरिं ध्यात्वा
तं द्विजं ब्रह्मरूपिणं ततो भद्र
निधिं दद्यान्मंत्रेणानेन वासव स
गोत्रोच्चारणानादौ विप्रनाम तथा
त्मनः यवदर्भतिलैः सार्द्ध मुदकं
संयतित्मजेनत पितृ सन्तारणार्थी
यनित्यानन्द विहृद्ये सर्वोचोव
विच्चानाय विष्णो दीनं मया कृतं
तरत्नेन सरत्नेन धातुत्रय युतेन च
सत्तोमाम्बर युक्तेन सादर्श पाड
केनच सासनेन सच्छत्रेण चाम
रोपानहेन च , सदानन्द निधा
नेन प्रीयतां विष्णुरीश्वरः एवम
चर्य्यं तं दद्याद्विजाय हरिरूपिणे
गोप्यपनविधिना दद्याद्धेम संख्यां
न कीर्त्तयेत प्रकीर्त्तिते कोटि गु
णापुन्ने फलं प्रयापिते कल्पगाणे ।
र्ने संस्तयः इतीय मत्ता तत्कीर्त्ति
येन स्वयी निधान मध्ये निहितं च

यद्वस एवं कृते स्वान्मवजकृता
त्मा तपेमच स्वामरणं कदाचित
प्रयाति विष्णोः पद मव्ययं तत्त
शिवात्मकानन्दमयं सदाप्यं इ
त्याघ वह्नि पुराणे भद्रनिधिदान
नामाध्यायः ॥ ॥
भद्रपदा स्त्री भाद्रपदा पूर्व्वभाद्र
पदोत्तरभाद्रपदानक्षत्रं । इत्य
मरटीकायां रायमुकुटः ॥
भद्रपर्णी स्त्री कटम्भराहृक्षः इ
ति शब्दमाला ॥ ॥
भद्रवती स्त्री गाम्भारी इत्यमर
प्रसारिणी इति जटाधरः ॥
भद्रबलनः पुं बलरामः इति श
ब्दमाला ॥
भद्रमल्लिका स्त्री गवाक्षी इति
शब्दमाला ॥ ॥
भद्रमुंजः पुं मुंजभेदः रामशर
इति शरपत इति च भाषा तत्
पर्य्यायः शरः २ वाणः ३ तेजनः
इक्षुवेष्टनः ५ अथ मुंजस्य पर्य्या
यः मुंजः १ मुंजानकः २ वाणः
३ स्थूलदर्भः ४ सुमेधसः ५ प
तयोर्गुणाः मुंजद्वयंतु मधुरं तुवरं ।
शिशिरं तथा दाह तृष्णा विसर्प
स्रावत्र वस्ति रोग विनाशनं दोषपव
हां ब्रह्ममेखला सुप्रयुज्यते इति

भावप्रकाशः ॥
भद्रमुस्तकः पुं नागरमुस्तकः इ
त्यमरः ॥ ॥
भद्रमुस्ता स्त्री भद्रमुस्तकः तत्त
पर्य्यायः वराही २ गुन्द्रा ३ ग्रन्थिः
भद्रकाशी ५ कशेरुः कोडेष्टा ७
करुविन्दाख्या ८ सुगन्धिः ९ ग्रन्थि
ला १० हिमा ११ वला १२ राजकशेरु
१३ कच्छोत्था १४ मुस्ता १५ अम्भोद
१६ वारिदः १७ अम्भोदः १८ मेघः
१९ जीमूतः २० अब्दः २१ नीरदः
अभ्रं २३ घनः २४ गांगेयः २५
अस्या गुणाः कषायत्वं तिक्तत्वं ।
शीतत्वं पाचनत्वं पित्तज्वर क
फनाशित्वं संग्राहित्वं च इति ।
राजनिर्घण्टः अपि च मुस्तके त
स्त्रियां मुस्तं त्रिषु वारिदनामकः
कुरुविन्दश्च संख्यातो ऽपरः ।
कोडकशेरुकः भद्रमुस्तश्च गुन्द्रा
च तथा नागरमुस्तकः मुस्तं कटु
हिमं ग्राहि तिक्तं दीपन पाचनं
कषायं कफ पित्तास्र तृट ज्वरा
रुचि जंतुहृत अनूपदेशे यज्जा
तं मुस्तकं तत्प्रशस्यते तत्रापि
मुनिभिः प्रोक्तं वरं नागरमुस्तकं
इति भावप्रकाशः ॥
भद्रयवं क्ली इन्द्रयवं इत्यमरः ।




भद्ररेणुः पुं ऐरावतहस्ती इति
त्रिकाण्डशेषः ॥ ॥
भद्रवत् क्ली देवदारु इतिराज
निर्घण्टः ॥ ॥
भद्रवती स्त्री भद्रपर्णी इतिजटा
धरः ॥ ॥
भद्रवर्म्मा पुं नवमल्लिका इति।
शब्दचन्द्रिका ॥ ॥
भद्रवला स्त्री लताविशेषः गन्ध
भादालिया इतिभाषा तत्पर्य्यायः
सारणी २ प्रसारणी ३ कटम्भरा ४
राजवला ५ इत्यमरः । अस्याः
पर्य्यायान्तरं गुणाश्च प्रसारिणी
शब्दे द्रष्टव्याः ॥ वला इति
राजनिर्घण्टः ॥
भद्रवल्लिका स्त्री गोपवल्ली अन
न्तमूल इतिभाषा इतिरत्नमाला।
भद्रवल्ली स्त्री मल्लिका माधवी
लता इतिराजनिर्घण्टः लताविशे
षः मदनमाली इति हापरमाली
इतिच भाषा तत्पर्य्यायः । धा
तमीरुः २ भूमिमण्डा ३ अस्फारि
का ४ इतिरत्नमाला ॥ ॥
भद्रश्रयं क्ली चन्दनं इतिरत्नमाला
भद्रश्रीः पुं चन्दनवृक्षः इत्यमरः
भद्रसोमा स्त्री गंगा इति शब्द
माला ॥ ॥

भद्रा स्त्री रास्ना कृष्णा व्यामनदी
तिथिभेदः सा तु द्वितीया स।
प्तमी द्वादशी च प्रसारिणी कट्
फलं अनन्ता इति मेदिनी ।
जीवन्ती अपराजिता । नीली
वला शमी वचा दन्ती ह
रिद्रा श्वेतदूर्वा । काश्मीरी ।
सारिवाविशेषः गौः इतिरा।
जनिर्घण्टः काकोडुम्बरिका इ
ति रत्नमाला गंगाख्या स्त्रि श्रो
तो ऽन्तर्गत श्रोतो विशेषः तत्त
ङ्नत्रे कुरुवर्षो यथांगा इतिशब्दर
त्नं शब्दमाला च बुद्धशक्तिविशे
षः तत्पर्य्यायः तारा २ महा
श्रीः ३ ओङ्कारा ४ स्वाहा ५ श्री
मनोरमा ७ तारिणी ८ जया ९।
अनन्ता १० शिवा ११ लोकेश्वरात्मजा
१२ खदिरवासिनी १३ वेश्या १४
नीलसरस्वती १५ शंखिनी १६ म
हातारा १७ वसुधारा १८ धनन्दरा।
त्रिलोचना २० लोचना २१ इति
त्रिकाण्डशेषः छायागर्भजाता।
सूर्य्यकन्या यथा यमलौ तु तत
स्तस्यां जनयामास भास्करः शनै
श्चरंच भद्रांच छायाया मिलितधु
तिः तयाच्च तेजसा विश्वा तस्या
मकुञ्चयंजयत तदूत्पतिरन्ते पुंदे

दानकान्त विकीर्षया तद्दगिनी सु
खेनो भद्रा निपुत्रैवं विगर्हिता ॥
इति वह्निपुराणेवैवस्वतानुकीर्त्तनं।
॥ सुभद्रा यथा आषाढस्य ॥
सिते पक्षे द्वितीया पुष्य संयुता।
तस्यां रथे समारोप्य रामं मां
भद्रया सह इतिस्कान्दे भगवद्वा।
क्यं ॥ विष्टिभद्रा यथा पक्षा।
दशणं चतुर्थ्यान्त शेषार्द्धे भवत्या
त्के अष्टमी पौर्णमास्योश्च पू
र्वार्द्धे विष्टिसम्भवः कृष्णपक्षे तृ
तीयाया दशम्याश्च परार्द्धतः स
प्तम्याश्च चतुर्द्दश्याः पूर्वार्द्धे विष्टि
रीरिता विहाय विष रोद्राणि वि
ष्टिं सर्वत्र वर्जयेत् विष्टिशेषे त्रि।
दशेहि पुच्छे कार्य्यं जयावहं ॥
कर्म्मप्रकाशे तस्या अंग विशेषो ।
यथा नाड्यस्त पंचवदने गलकस्त
थैका वक्षो दशैक सहिता निय
ते चतस्रः नाभिः कटिः षट्त्रय पु।
च्छलताच तिस्रो विष्टेर्भवंतिगदि
तोऽङ्ग विभागवृषः अंगविशेष ।
कार्य्यध्वंसादि फलेयथा ॥ मुखे
कार्य्यध्वंसो भवतिमरणंचाथ गल
के धनग्लानि र्वक्षस्यथ कलितेट
बुद्धिविलयः कलितीभीदेशोविजय
मथ पुच्छेच जगङ्गः शरीरे भद्रायाः

सृष्यागिति फलं सर्वमनयाः मनु
वसु मुनि तिथि युग दश शिव यु
संख्यास तिथिषु पूर्वापास्य ॥
आयाति विष्टि रेषा इष्टा शुभदा।
परस्तुशुभा चतुर्द्दशयादिषु पूर्वा
ग्रादि सर्वं भवतीत्यर्थः इति।
ज्योतिस्तत्त्वं ॥ ॥
भद्राकरणं क्ली मुण्डनं इतिहेम
चंद्रः ॥ ॥
भद्रात्मजः पुं खड्गः इति त्रिकाण्ड
शेषः ॥ ॥
भद्राकरः पुं अष्टादशक्षुद्रद्वीपान्त
र्गतद्वीपविशेषः इतिशब्दमाला।
भद्रालपत्रिका स्त्री गन्धाली इति।
शब्दमाला ॥ ॥
भद्राली स्त्री गन्धाली इति शब्द।
माला ॥ ॥
भद्रावती स्त्री कट्फलवृक्षः इति
राजनिर्घण्टः । ॥
भद्राश्वं क्ली मेरोनववर्षान्तर्गतव
र्षविशेषः इति त्रिकाण्डशेषः ॥
तद्विवरणं यथा माल्यवतः पूर्वपा
र्श्वे पूर्वगण्डिका एकस्तंभाद्याजन
सहस्राणि मानन्तश्च भद्राश्वा ना
मजनपदाः भद्रशालवनंच तत्रा
वस्थितं कालाभ्रहस्ताः पुरुषाः श्वे
ताः पद्मवर्णिनः स्त्रियः कुमुदवर्णा




दशवर्षसहस्राणि च तेषामायुस्तत्र च
पंचकुलपर्वता नद्यश्च शैलवर्णाः ।
माल्यवान्केतु वराहः त्रिपर्णो नील
श्वेति नद्यो निर्गता स्तदम्भः शिवा
नां देशानां नान्येव नामानि तेच
देशाः यतः नदीः पिबन्ति नद्यश्च
सीता सवाहिनी हंसवती कावेरी
सरसा शाखावती इंद्रनदी अंगार
वाहिनी हरितोया सोमावर्ता श
तद्रुदा वनमाला वसुमती हंसाप
पंचगंगा धनुष्मती मणिवप्रा सुव
र्णभागा विलासिनी कुलतोया पु
ण्यदा नागवती शिवा शैवालिनी
मणितटा क्षीरोदा वरुणावती वि
ष्णुपदी महानदी हिरण्यस्कंधवा ।
हा सरावती वामोदा एताकास्तत्र ।
ता महानद्यः एताश्च गंगासमाः ।
कीर्तिताः आजन्मांते पापं विनाश
यंति तद्दर्शनस्य कोटिशः ताश्च
नदी ये पिबंति ते दशवर्षसहस्रा
युषः हृष्टा मानवा इति इति वा
राहे भुवनकोषे रुद्रगीता ॥
अपिच अश्ववेलाहृत मपरेण ।
पूर्वेण च माल्यवद्धेमादनावानी
लनिषधायतौ हिमद्वंत पर्यन्तः
केतुमाल भद्राश्वयोः सीमानं विद
धाते मंदरो मेरुमंदरः सुपार्श्वः ॥

कुमुद इत्ययुत योजन विस्ताराद्वा ।
हा मेरो श्चतुरो श्चतुर्दिश मवष्टम्भगिरि
य उपकृप्ताः चतुर्षु एतेषु चूत जम्बू
कदम्ब न्यग्रोधा श्चत्वारः पादप प्रव
राः पर्वतकेतव इवाधिसहस्र यो
जनोन्नाहा स्तावद्विटप विततः श
तयोजन परिणाहाः ह्रदा श्चत्वा ।
रः पयो मध्विक्षुरस मृष्टजलाः यदु
पस्पर्शिन उपदेवगणा योगैश्वर्याणि
स्वाभाविकानि भरतर्षभ धारयन्ति ।
देवोद्यानानि च भवन्ति चत्वारि न
न्दनं चैत्ररथं वैभ्राजकं सर्वतो ।
भद्रमिति येष्वमर परिवृढाः सहस
र ललना ललाम यूथपतय उपदेव
गणैरुपगीयमानमहिमानः किलवि
हरन्ति मन्दरोत्संग एकादशशत ।
योजनोत्तुंग देवचूतशिरसो गिरि ।
शिखरस्थूलानि फलान्यमृतकल्पा
नि निपतंति तेषां विशीर्यमाणाना
मतिमधुर सुरभि सुगंधि बहुलारु
णरसोदेनारुणोदा नाम नदी मंदर
गिरिशिखरान्निपतन्ती पूर्वेणला वृ
त मुपप्लावयति यदुपजोषणाद्भ
वान्या अनुचरीणां पुण्यजनवधूना
मवयवस्पर्श सुगन्धिवातो दशयो
जनं समंतादनुवासयति एवं जम्बूफला
नामत्युच्च निपात विशीर्णानामनस्थि

प्रायाणा मिभकायनिभानां रसेन
जम्बूनदी नाम नदी मेरु मंदरशि
खरादयुत योजनादवनितले निप
तंती दक्षिणेनात्मानं यावदिलावृत
मुपस्यंदति तावदुभयो रपिरो ।
धसो र्या मृत्तिका तद्रसेनानुविध्य
मानावाय्वर्क संयोग विपाकेन सदा
मरलोकाभरणं जाम्बूनदं नाम सु
वर्णं भवति यदुहवाव विबुधाद
यस ह युवतिभि र्मुकुट कटककटि
सूत्राद्याभरण रूपेण खलु धारयंति
यस्तु महाकदम्बः सुपार्श्व निरूढस्त
स्य कोटरेभ्यो विनिःसृता पंचाया
मपरिणाहाः पंच मधुधारा सुपार्श्व
शिखरात् पतंत्यो अपरेणात्मानं ।
मिलावृत मनुमोदयंतियो ह्युपयुं
जानानां मुख निर्वासितो वायुःसम
न्तात् शतयोजन मनुवासयति एवं
कुमुद निरूढो यः शतवल्शो नामव
टस्तस्य स्कंधेभ्यो नीचीनाः पयोद ।
धि मधुघृत गुडान्नाद्यम्बर शय्यासना
भरणादयः सर्वएव कामदुघानदाः ।
कुमुदाग्रात् पतंत स्तमुत्तरेणेलावृत
मुपयोजयंति यानुपजुषाणानां नक
दाचिदपि प्रजानां वलीपलित क्लम
स्वेद दौर्गन्ध्य जरामयाप मृत्यु शी
तोष्ण वैवर्ण्योप सर्गादयस्तापवि

शेषा भवंति यावज्जीवं सुख निर ।
तिशय मेव कुरंग कुरर कुसुम्भ ।
वैकंक त्रिकूट शिशिर पतंग रु
चक निषध शिनिवास कपिल शंख
वैडूर्य जारुधि हंसऋषभ नाग का ।
लंजर नारदादयो गिरयो मेरोः ।
कर्णिकाया इव केशर भूता मूलदे
शे परित उपक्लृप्ताः जठर देव ।
कूटौ मेरुं पूर्वेणाष्टादशयोजन ।
सहस्र मुदगायतौ द्विसहस्र पृथुतुं
गौ भवतः एव मपरेण पवन पा
रियात्रौ दक्षिणेन कैलास करवी ।
रौ प्रागायतौ एवमुत्तर न त्रि श्रृं
ग मकरौ अष्टाभि रेतैः परिवृ ।
तो ग्निरिव परितश्चकास्ति कां
चन गिरिः मेरो र्मूर्द्धनि भगवत ।
आत्मयोने र्मध्यत उपक्लृप्तां पु
रीमयुत योजन साहस्रीं सम चतु
रस्त्रां शातकौम्भीं वदंति ताम ।
नुपरितो लोकपालानामष्टानां ।
यथा दिशं यथा रूपं तुरीयमाने
न पुरो ष्टावुपक्लृप्ताः इति श्री
भागवते ५ स्कंधे भुवनकोषवर्ण
ने १६ अध्यायः
भद्राश्वयः पुं चंदनं इति शब्द ।
चंद्रिका ॥
भद्रासनं स्त्री नृपासनं इत्यमरः ।




भद्रेश्वरः पुं कल्पग्रामस्थशिवः यथा
उन्निहृकांत गत्वाथः कल्पग्रामं स
शोभनं तथासाहं जगामाथ क
ल्पग्रामं वसंधरे भद्रेश्वर निमित्तं ।
हि दृष्टंच कथितं शुभं । नित्यं
च भुंजते यत्र पात्रद्रव्यं समर्पितं ।
दृष्ट्वा भद्रेश्वरं देवं चक्रतीर्थफलं
लभेत कल्पग्रामाच्च तेन गत्वा चक्र
तीर्थं वसुंधरे इति वाराहे
मथुरामाहात्म्ये चक्रतीर्थप्रभावो
नामाध्यायः शिवप्रास्पर्थे ॥
दुर्गाराधित हिमालयस्य पार्थिव
शिवलिंगं यथा तवाथीय ग्रहि
ष्यामि महर्षीन हिमवद्गृहे य
स्मिन् हृष्ट मीहृत्वा मृन्मय श्रेष्ठ
शंकृतः शूलो भद्रेश्वरेत्येवं ख्या
तो लोके भविष्यति देवदानव ।
गंधर्वा यक्ष किंपुरुषोरगाः पू
जयिष्यंति सततं मानवाश्च शुभे
श्रवः इतिवामनपुराणे ५९ अ
ध्याये उमां प्रति शिववाक्यं ॥
गंगायाः पश्चिमेतीरे गारिद्याख्य
ग्रामस्यांतरे पाषाणमयशिवलिं
गविशेषो ग्रामविशेषश्च ॥
भद्रेला स्त्री स्थूलेला इतिराज ।
निर्घंटः ॥
भद्रोदनी स्त्री बला नागबला ।

इतिराजनिर्घंटः ॥ ॥
भंदिलं क्ली शुभं इत्युणादि ॥
कोषः कंपः दूतः इतिसं ।
क्षिप्तसारोणादिवृत्तिः ॥
भंभ्रः पुं भारतवर्षांतर्गतदेश ।
विशेषः यथा सत्ता स्थवार प
वापि ग्रामाणां भंभ्रके स्मृताः ।
इति स्कांदे कुमारिकाखंडे वक्रे
श्वरमाहात्म्य नामाध्यायः ॥
भयंकरं क्ली नक्षत्रचक्रं । इति
सिद्धांतशिरोमणिः ॥
भपतिः पुं चंद्रः इतिहेमचंद्रः ॥
भम्भः पुं धूमः इतित्रिकाण्डशेषः
मक्षिका इति शब्दरत्नावली ॥
भम्भरालिका स्त्री भंकारी डांश
इतिभाषा इतित्रिकांडशेषः ॥
भम्भराली स्त्री मक्षिका इतित्रि
काण्डशेषः ॥
भम्भासारः पुं मगधराजविशेषः ॥
तत्पर्यायः श्रेणिकः २ इति
हेमचंद्रः ॥ ॥
भयं क्ली बिभेत्यस्मात् । इति
भरतः तस्य लक्षणं यथा रौ
द्रशक्त्या तु जनितं चित्तवैक्लव्यदं ।
भयं इति साहित्यदर्पणे ३ प
रिच्छेदः अपिच राग विषयस्य
विनाशके समयस्थिते तन्निवारणा

सामर्थ्य मात्मनो मन्यमानस्यारे
त्यात्मक चित्त वृत्तिविशेषोभयं ।
इतिभगवद्गीतायां २ अध्यायम
सूदन सरस्वती अन्यत्त परतः स्वा
निष्ट सम्भावनाभयं यथाव्याघ्रा
द्बिभेति व्याघ्राधीनत्वेन स्वीयमरणं
सम्भावयति इति २ अस्मितिवादे
गधाधर भट्टाचार्यः तत्पर्यायः
दरः २ त्रासः ३ भीतिः ४ भीः ५
साध्वसं ६ इत्यमरः रुत्रासः ७
साध्वसंभवः ८ प्रतिभयं ९ इति
शब्दरत्नावली आतंकः १० आ
शंका ११ भिया १२ इति हेम
चंद्रः आगते भये अभी
तवत् स्थातव्यं यथा तावद्भयस्य
भेतव्यं यावद्भयमनागतं उत्
पन्ने तु भये तीव्रे स्थातव्यं वै
रभीतवत् इतिगारुडे नीति
सारे ११५ अध्यायः कुत्रक ।
पुंसं घोरेत्रि इतिमेदिनी ।
रोगपुं इतिराजनिर्घंटः ॥
भयंकरः त्रि भयजनके तत्पर्या ।
यः भैरवं १ दारुणं ३ भीषणं ४
भीष्मं ५ घोरं ६ भीमं ७ भया
नकं ८ प्रतिभयं ९ इत्यमरः ।
भयावहं १० इतिहेमचंद्रः ।
दुण्डुलपक्षी इतिराजनिर्घंटः ॥

भयडिण्डिमः पुं संग्रामपटहः ।
इतिपुराणं ॥ ॥
भयद्रुतः त्रि भीत्यापलायितः ।
तत्पर्यायः कांदिशीकः २ इ
त्यमरः ॥ ॥
भयनाशिनी स्त्री त्रायमाणालता
इतिराजनिर्घंटः भयनाशकर्त्रीच
भयभीतः त्रि त्रासेनातंकितः ।
यथा एकतो भयभीतस्य शांति
नः प्राणरक्षणं नान्यो गुरुतरो धर्मे
कश्चिदन्योऽस्ति खेचर इतिवह्नि
पुराणेशिविराज्ञाख्यानं ॥ ॥
भयभ्रष्टः त्रि भयद्रुतः इति जटा
धरः ॥
भयानकः पुं व्याघ्रः राहुः रस
विशेषः इतिमेदिनी सत्वशृं ॥
गाराद्यष्टरसांतरगत षष्टरसः त
स्य लक्षणं यथा भयानको भय
स्थायिभावः कालाधि देवतः ।
स्त्रीनीचप्रकृतिः कृष्णोमतस्तत्त्व
विशारदैः यस्मादुत्पद्यते भीति
स्तदत्रालम्बनं मतं चेष्टा घोरत
रास्तस्य भवेदुद्दीपनं पुनः अ
नुभावोऽत्रवैवर्ण्यं गद्गदस्वर भा
षणं प्रलय स्वेद रोमांच कम्प
दिक् प्रेक्षणादयः जुगुप्सा वेग
संमोह संत्रास ग्लानि दीनताः




शंकापस्मार संध्यांति सूत्याघा।
व्यभिचारिणः उदाहरणं यथा
नष्टं वर्षवरै र्मनुष्यगणनाभावात्
पास्यत्रपामंतः कंचुकि कंचुकस्य
विशांति शासादयं वामन इत्यादि
इति साहित्यदर्पणे ३ परिच्छेद।
भयानकः त्रि भयंकरः इत्यमरः
भयापहः पुं राजा इति त्रिकाण्ड
शेषः ॥
भयावहः त्रि भयंकरः इति हेम
चंद्रः ॥
भरः पुं अतिशयः इत्यमरः ॥
भरणकर्त्तरि त्रि ॥
भरटः पुं कुम्भकारः इत्युणादि
कोषः ॥
भरणं क्ली वेतनं भृतिः इति
मेदिनी पोषणं यथा भरणं।
पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनं
नरकं पीडने चास्य तस्माद्यत्नेन
तं भरेत् इति दायभागः ॥
भरणः पुं भरणीनक्षत्रे इति
शब्दरत्नावली ॥
भरणी स्त्री घोषकलता इति मे
दिनी अश्विन्यादि सप्तविंशतिन
क्षत्रांतर्गत द्वितीयनक्षत्रं तत्
पर्य्यायः यमदेवता २ इति
हेमचंद्रः ॥ सा ताराचयमित

त्रिकोणाकृतिः तस्या अधिष्ठात्री
देवता यमः यथा ताराचय
मिते त्रिकोणके मध्यगे द्विविध
दधतो यमे पंकजाति गणिताः
ऊलीरतः सायकाति भुज संख्य
काः कलाः दं २।४५ इति
कालिदासकृत रात्रिलग्नमाने।
साच उग्रगणांतर्गता अधोमुखे।
गणांतर्गताच विद्यार्थे भूमिखन
ने प्रशस्ता इति ज्योतिस्तत्वं।
तत्र जात फलं सदापकीर्त्तिर्दि
महापवादो नाना विनोदैश्च वि
नीतकालः जले विलासी चपलः
खलः स्यात् यास्ति प्राणी नाम भर
णीप्रजातः इति कोष्ठीप्रदीपः।
भरणीभूः पुं राहुग्रहः इति हेम
चंद्रः ॥ ॥
भरणीयः त्रि भरणयोग्यः पोष्यः
भृत्यानां कर्म्माणि अनीय प्रत्यये
निष्पन्नः ॥
भरण्डः पुं स्वामी भूपालः वृषः
इत्युणादिकोषः भूः कृमिः।
इति संक्षिप्तसारोणादिवृत्तिः।
भरण्यं मूल्यं वेतनं ॥ इत्य
मरः ॥ ॥
भरण्यभुक कर्म्मकरः मूल्यं
गृहीत्वा कर्म्मकारकः इत्यमरः

भरण्या स्त्री वेतनं इत्यमरटीका।
यांस्वामी ॥ ॥
भरण्याह्वा स्त्री पर्वपुष्पी रामदूती
तिक्तला इति शब्दचंद्रिका ॥
भरण्युः पुं शरण्युः मित्रं इति
शब्दमाला अग्निः चंद्रमाः ॥
ईश्वरः इति संक्षिप्तसारोणादि ॥
वृत्तिः ॥ ॥
भरतः पुं नाट्यशास्त्र मुनिविशेषः
सत् अलंकारादि शास्त्रस्य सूत्र।
कर्त्ता नटः रामानुजः दौष्मंतिः
इति मेदिनी शबरः तन्तुवायः।
इति विश्वः क्षेत्रे भरता।
त्मजः इति हेमचंद्रः ॥ दुष्मंत
राजपुत्र भरतस्य पर्य्यायः शाकु
न्तलेयः १ दौष्मंतिः २ सर्वदमनः ३
इति त्रिकाण्डशेषः यस्य यष्टिं ॥
शक्तेन मष्टमेवं कृतवान् पंचा
शद्गजसूयं एवमन्यान् नानाविधा
न् यज्ञानकरोत् सप्तविंशति सह
स्रवत्सरानेकच्छत्रं राज्यं कृतवा
न् तस्योत्पत्त्यादि यथा दुष्मं।
तो मृगवां यातः कण्वाश्रमपदं
गतः तत्रासीनां स्वप्रभया मण्ड।
यंतीं रमामिव विलोक्य सयो।
मुमुहे देवमाया मिवस्त्रियं तथा
सेनां च तारोहां भटैः कति।

पये हैतः तद्दर्शन प्रमुदितः सं।
निवृत्त परिश्रमः पप्रच्छ काम सन्त
प्तः प्रहसन् सूनृतया गिरा कालेक
मलपत्राक्षि कस्यासि हृदयंगमे।
किंस्विच्चिकीर्षितं तत्र भवत्या नि
र्जने वने व्यक्तं राजन्यतनयां।
वेद्म्यहं त्वां समध्यमे नहि चेतः
पौरवाणां मनमन्ये रमते क्वचित्
श्रीशकुंतलोवाच विश्वामित्रात्मजै
वाहं त्यक्ता मेनकया वने वेदै
तद्भगवान् कण्वो वीर किंकरवाम
णे आस्यतां ह्यरविंदाक्ष गृह्य।
तामर्हणांचनः भुज्यतां सन्तिनीवा
रा उष्यतां यदि रोचते श्रीदुष्मं।
तउवाच उपपन्नमिदं सुभ्रू जाता
याः कुशिकान्वये स्वयं हि वृणते
राज्ञां कन्यकाः सदृशं वरं ओमित्यु
क्ते यथा धर्म्मं उपयेमे शकुंतलां
गांधर्व विधिना राजा देशकालवि
धानवित् अमोघवीर्यो राजर्षि र्म
हिष्यां वीर्य्यमादधे श्वो भूते स्व
पुरे यातः कालेनासूत सा सुतं।
कण्वः कुमारस्य वने चक्रे समु
चिताः क्रियाः बद्ध्वा मृगेंद्रं तरसा क्री
डति स्म सबालकः तं दुरत्ययविक्रां
तमादाय प्रमदोत्तमा हरेरंशां।
शसम्भूतं भर्त्तुरंतिकमागमत् यदा



न नगरे राजा भार्य्या पुत्त्रावनिंरि
न्तो भूगवन्तो सर्व्वभूतानां च वा
गाह्याशरीरिणी माता भस्त्रा पितुः
पुत्त्रो येन जातः स एव सः भरस्व ।
पुत्त्रं दुष्मन्त मावमंस्थाः शकुन्तलां ।
रेतोधाः पुत्त्रो नयति नरदेव यम
क्षयात् त्वं चास्य धाता गर्भस्य ।
सत्यमाह शकुन्तला पितरं परेत
सोऽपि चक्रवर्त्ती महायशाः म
हिमा गीयते तस्य हरेरंशभवो ।
भुवि चक्रं दक्षिणहस्तेऽस्य पद्म ।
कोषोऽस्य पादयोः ईजे महा ।
भिषेकेण सोऽभिषिक्तोऽधिरा ।
ड्विभुः पंचपंचाशता मेध्यै गंगा
या मनुवाजिभिः मामतेय पुरो
धाय यमुना मनुच प्रभुः अष्टस
प्रतिमेध्याश्वान् ववंध पददहस
भरतस्याद्यदौष्मन्तेरग्निः साचीगुणे
चितः सहस्रं वद्वशो यस्मिन्ब्राह्म
णागाविभेजिरे ऽयस्तिंशाद्वनं तस्या
वद्धा विस्मापयन्नृपान् दौष्मन्तिर
त्यगान्मायां देवानां गुरुमाययौ ।
मृगान्शुक्लदतः कृष्णान्हिरण्येन
परीहृतान् अदात् कर्म्मणि मष्णारे
नियुतानि चतुर्दश भरतस्य महत
कर्म न पूर्व्वे नापरे नृपाः नैवा पू
नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा

स्य

किरातहूनान् यवनान् पौण्ड्रान् के
कान् खशांश्छकान् अब्रह्मण्य नृपान्
श्चाहन् म्लेच्छान् दिग्विजये ऽखिला
जित्वा पुरा सरा देवान् ये रसा ।
कांसि भेजिरे देवस्त्रियो रसां ।
नीताः प्राणिभिः पुनराहरेत् सर्व्वान्
कामान् दुदुहतुः प्रजानां तस्य रोद
सी समा स्त्रि नव साहस्रीर्दिक्षुचक्र
मवर्त्तयत् स सम्राट् लोकपालाख्य
मैश्वर्य्य मधिराट् श्रियं वर्त्त्वा ।
स्खलितं प्राणान्मृषेत्युपरराम ह न
त्यासन्नृपवैदर्भ्यः पत्न्यस्तिस्रः सस
मताः जघ्नु स्त्यागभयात् पुत्रान्
नुरूपा इतीरिते इति श्रीभागव ।
ते ९ स्कंधे २० अध्यायः ऋषभ
देवात इंद्रदत्त जयंत्यां कन्यायां ।
जातः शतपुत्त्राणां ज्येष्ठपुत्रः ।
यथा अथह भगवान् ऋषभदेवः
स्ववर्षं कर्म्मक्षेत्र मनुमन्यमानः प्र
र्शित गुरुकुल वासो लब्धवरै गुरु
भिरनुज्ञातो गृहमेधिनां धर्मानन
शिक्षमाणो जयंत्या मिंद्रदत्तायामु
भयविधं कर्म समाम्नाय मभियुंज
न्नात्मजाना मात्मसमानानां शतंज
नयामास येषां खलु महायोगीभ
रतो ज्येष्ठः श्रेष्ठगुण आसीत् ये
नेदं वर्षं भारतमिति व्यपदिशंति ।

इति श्रीभागवते ५ स्कंधे ४ अध्या
यः ॥ पावकपुत्त्रः यथा पा
वनो लौकिकोह्यग्निः प्रथमो ब्रह्म
णः स्मृतः ब्रह्मौदनाग्निस्तत् पुत्त्रो भ
रतो नामविश्रुतः इति मत्स्ये ।
अग्निवंशोनाम ४८ अध्यायः ॥
रामानुज भरतस्य जन्मयथा भरतो
नाम कैकेय्यां जज्ञे सत्यपराक्रमः ।
साक्षाद्विष्णो श्चतुर्भागः सर्व्वैः स
मुदितो गुणैः तस्यानुजातः शा
त्रुघ्नः यथा भरतस्यापि शत्रुघ्नो
लक्ष्मणावरजो हि सः प्राणैः प्रिय
तरो नित्यं तस्य चासीत्तथा प्रियः
स कुशध्वज कन्यां माण्डवी प
रिणीतवान् यथा भ्राता यवीयान्
धर्म्मज्ञ एषराजा कुशध्वजः अस्य
धर्म्मात्मवान् राजन् रूपेणाप्रतिमं
भुवि सुताद्वयं नरश्रेष्ठ पत्न्यर्थं
रयामहे तेमेव मुक्का जनको भरतं
चाभ्यभाषत गृहाण पाणिं मा
ण्डव्याः पाणिना रघुनंदन सतं
दिग्रामे राज्यं कृतवान् यथा
स वल्कं जटाधारी मुनिवेशधरो
भुः नन्दिग्रामे ऽवसद्वीरः ससै ।
न्यो भरत स्तदा सवाल्यजनं ।
छत्रं धारयामास स स्वयं भरतः
स्वमसनं सर्वं पादुकाभ्यां निवेदय

ल … वि

न् ततस्तु भरतः श्रीमानभिषिच्या ।
र्य्यं पादुके तदधीनस्तदाराज्यं ॥
कारयामास सर्व्वदा ॥ इति रामा ।
यणे बालकाण्डे १८ । २२ । ७३ अ
ध्यायः अयोध्याकाण्डे २४ अध्या
यश्च तस्य द्वौपुत्रौ यथा ॥
भरतस्यात्मजौ वीरौ तक्षः पुष्कल ।
एवच मातुलेन सगुप्तौ तु धर्मेण ।
सुसमाहितौ भरतं चाग्रतः कृत्वा ।
कुमारौ सबलानुगौ निहत्य गं ।
धर्व्वस्थान द्वेपुरे विभजिष्यतः ॥
इति रामायणे उत्तरकाण्डे १०१ ।
अध्यायः ॥ ॥
भरतखण्डं क्ली भारतवर्षान्तर्गतकु
मारिकाखण्डं यथा कुमारिकेति ।
विख्याता यस्या नांना प्रकथ्यते ।
इदं कुमारिकाखंडं चतुर्वर्ग फल ।
प्रदं यथा कृतावनीयंचनानाश्रा ॥
मादि कल्पना इदं भरतखंडंच ॥
यया सम्यक् प्रकल्पितं इति स्कांदे
कुमारिकाखंडे भूसंस्थितिर्ना ॥
माध्यायः
भरतपुत्त्रकः पुं नटः इति हेम ।
चंद्रः ॥
भरतप्रसूः स्त्री कैकयी इति शब्द ।
रत्नावली ॥
भरताग्रजः पुं श्रीरामचंद्रः यथा ।

शेते स चित्रशयने मम मीन कूर्म
कोलो ऽभवन्नृहरि वामन जामद
ग्न्यः योऽभूद्रघुभव भरताग्रज हल
भृत् बुद्धः कल्की सतांच भविता प्रहरि
ध्यातेऽरीन् इति वोपदेवः ॥
भरथः पुं लोकपालः इत्युणादि ।
कोषः ॥ ॥
भरद्वाजः पुं मुनिविशेषः स च
उतथ्य पत्न्यां ममतायां बृहस्प ।
तिवीर्य्याज्जातः तस्य जन्मविवर ।
णं यथा तेनोऽस्य वितथे पुत्र ।
जन्मनि पुत्रार्थिने मरुत् सोमाय ।
जिने दीर्घतमसा पार्ष्णिना स्ता बृ
हस्पति वीर्य्याडुतथ्य पत्नी ममता
समुत्पन्नो भरद्वाजाख्यो नाम पु
त्रो मरुद्भिर्दत्तः अस्यापि नाम ।
निर्वचन श्लोकः पठ्यते मूढे भ
रद्वाज मिमं भरद्वाजं बृहस्पते ।
यातौ यदुक्त्वा पितरौ भरद्वाज स्त
तस्त्वय मिति ॥ भरद्वाजस्ततस्य
वितथे पुत्रजन्मनि मरुद्भि र्दत्तो ।
वितथ संज्ञा मवाप ॥ अस्य
टीका वितथे व्यर्थेसति अत्रैव ।
मितिहासः बृहस्पते रग्रजस्यो ।
तथ्यस्य ममताख्या पत्नी गर्भिण्य
सीत् तस्यां बृहस्पतिः कामाभि ।
भूतो वीर्य्यं व्यसृजत् तच गर्भ
प्रविष्टगर्भस्थेन स्थान संकोचं म
यात् पार्ष्णि प्रहारेणापास्तं बहिः
पतित मपि अमोघ वीर्य्यतया बृ
हस्पते र्भरद्वाज नाम पुत्रोऽभूत्
गर्भस्थश्च बृहस्पतिना तस्मादेवा
पराधाद्दीर्घो भवेति शप्तो दीर्घतमा
नामाभवत् तत्र भरद्वाजनाम नि
रुक्ति पर स्त्रय पित्रो विवादकरो
ऽयं श्लोको देवैः पठितः हे मूढे
ममते द्वाजं द्वाभ्यां मावाभ्यां जा
तमिमं पुत्रं त्वं भर रक्ष एवं बृ
हस्पतिनोक्तेन ममता तमाह हे
बृहस्पते द्वाजं द्वाभ्यां जात मिम
मेकाकिनी किमित्यहं भरिष्यामि
त्वमिमं भरेति परस्पर मुक्त्वा तं
पुत्रं त्यक्त्वा यस्मात् पितरौ ममता
बृहस्पती ततो यातौ ततो भर
द्वाजाख्यो ऽयं यातौ तौ एवं
विवदमानौ यद्दुःखात् यन्निमित्ता
दुःखात् पितरौ याता वित्यर्थः
ततेवं ताभ्यां त्यक्तो मरुद्भि र्भ ।
तः मरुत्सोमाख्येन च यागेना ।
राधिते मरुद्भि स्तस्य वितथे पुत्र
जन्मनि सति दत्तत्वाद्वितथ सं
ज्ञांचावाप इति विष्णुपुराणे ४ अं
शे १९ अध्यायः पक्षिविशेषः भा
रुइ इति भाषा तत्पर्य्यायः ॥

व्याघ्राटः २ इत्यमरः भरद्वाज ।
कः ३ इति शब्दरत्नावली ॥
भरद्वाजकः पुं व्याघ्राटपक्षी इति
शब्दरत्नावली ॥
भरिणी स्त्री हरिद्रार्णाः इत्युणा ।
दिकोषः ॥
भरितः त्रि हरिद्वर्णाः इत्युणादि
कोषः पुष्टः भारयुक्तः भरो
ऽस्य जात इत्यर्थे इत प्रत्ययेन
निष्पन्नः ॥
भरिमा पुं भरणं इत्युणादिकोषः
भरुः पुं विष्णुः इति सिद्धांतकौ ।
मुद्यामुणादिवृत्तिः समुद्रः स्वामी
इति संक्षिप्तसारोणादिवृत्तिः ॥
स्वर्णं शिवः इति मेदिनी ॥
भरुजः पुं लघुशृगालः इति हेम
चंद्रः ॥ ॥
भरुटकं क्ली भृष्टामिषं इति हे ।
मचंद्रः ॥ ॥
भर्गः पुं शिवः इत्यमरः ज्यो
तिः इति सिद्धांतकौमुद्यामुणादि
वृत्तिः आदित्यांतर्गततेजः यथा
आदित्यांतर्गतं वर्चो भर्गाख्यं ।
तन्मुमुक्षुभिः जन्ममृत्युविनाशा
य दुःखस्य त्रितयस्य च ध्यानेन पु
रुषो यश्च दृश्यः सूर्य्यमंडले ।
इत्याह्निकतत्वं भर्जनं इति
भृज्यन्ते भावे अनट् प्रत्ययेन ।
निष्पन्नं ॥
भर्ग्यः पुं भर्गः इत्यमरटीकायां ।
भरतरायमुकुटौ ॥
भर्जनं क्ली भृष्टिः भाजा इति भाषा
इति शब्दमाला ॥
भर्त्तव्यं त्रि भरणीयं पोषणीयं ।
यथा वृद्धौ च माता पितरौ सा
ध्वीभार्य्यासुतः शिशुः अप्यकार्य्य
शतं कृत्वा भर्त्तव्या मनु रब्रवीत् ।
इति दायभागटीकाधृतवचनं ॥
भर्त्ता पुं अधिपतिः तत्पर्य्यायः ।
अधिपः २ ईशः ३ नेता ४ परि ।
वृढः ५ अधिभूः ६ पतिः ७ इन्द्रः ८
स्वामी ९ नाथः १० आर्य्यः ११ प्रभुः
१२ ईश्वरः १३ विभुः १४ ईशिता १५
इनः १६ नायकः १७ ॥ इति ।
हेमचंद्रः धातरि पोष्टरि च त्रि
इति मेदिनी ॥
भर्तृघ्नी स्त्री पतिघातिनी इति
महाभारते ॥ ॥
भर्तृदारकः पुं नाट्योक्तौ युव ॥
राजः इत्यमरः ॥
भर्तृदारिका स्त्री नाट्योक्तौ राज ।
सुता इत्यमरः ॥
भर्तृहरिः पुं स्वनामख्यातः काव्य
कर्त्ता राजविशेषः इति जटाधरः ।

सवविक्रमादित्यराजभ्राता ॥
भर्त्स क ङ. ञ भर्त्सने इतिकवि
कल्पद्रुमः रेफयुक्तः दंत्यवर्गा
धोपधः भर्त्सी भर्त्सनं भर्त्सन
न्वपकारगी रित्यमरः क ङ. भर्त्स
यते खलं राजा न भर्त्स यति
भर्त्सयते अयमात्मानेपदीत्यन्ये
कदाचित् परस्मै परार्था ञ का
रः इतिदुर्गादासः ॥
भर्त्सने स्त्री अपकारगीः इत्य
मरः वैरोऽसि त्वां वातपिष्या ।
मि इत्याद्यपकारार्थं वचनं इति
भरतः तत्पर्य्यायः कुत्सा २
निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्ह
णं ६ निन्दनं ७ कुत्सनं ८ परिवादः
९ परीवादः १० जुगुप्सनं ११ आक्षे
पः १२ अवर्णः १३ निर्वादः १४ अप
क्रोशः १५ इतिशब्दरत्नावली ।
भर्त्सपत्रिका स्त्री महानीली इति
राजनिर्घण्टः ॥ ॥
भर्म्म स्त्री स्वर्णं भृतिः नाभिः
इतिद्विरूपकोषः ॥
भर्म्म न स्त्री वेतनं इतिहेमचंद्रः
स्वर्णं धुस्तूरं इत्यमरः नाभिः
इतिविश्वः ॥
भर्म्मण्या स्त्री वेतनं इतिहेम ।
चंद्रः ॥ ॥

भर्म्म हिंसे इतिकविकल्पद्रुमः
रेफोपधः भर्म्मति इति दुर्गा ।
दासः ॥
भर्व हिंसे इतिकविकल्पद्रुमः
भर्वति अंत्यस्थवोतोऽयं इति ।
दुर्गादासः ॥
भल ङ. दानवधनिरूपणेषु इति
कविकल्पद्रुमः ङ. भलते इति ।
दुर्गादासः ॥
भल क ङ. निरूपणे इतिकवि
कल्पद्रुमः क ङ. भालयते इति
दुर्गादासः ॥ ॥
भलना स्त्री राजवला इति शब्द
रत्नावली ॥
भलन्दनः पुं कान्यकुब्जदेशीयनृ
पविशेषः यथा कलावतीकान्य
कुब्जे बभूवायोनि सम्भवा नाति
स्मरा महासाध्वी सुन्दरी कमला
कला कान्यकुब्जे नृपश्रेष्ठोभलन्द
नङरुक्रमः सतां संप्राप योगा ।
न्ते यज्ञकुंड समुत्थितां इति ।
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखंडे १७
अध्यायः
भल ङ. दान वधनिरूपणेषु इति
कविकल्पद्रुमः ल द्वयोन्तः । ङ.
भलते इतिदुर्गादासः ॥
भलः पुं भल्लुकः इत्यमरः ॥


भल्लः पुं स्त्री शस्त्रभेदः भाला
इतिभाषा इतिमेदिनी शब्द
मालाच ॥
भल्लकः पुं भल्लकः इति द्विरूप
कोषः ॥
भल्लपुच्छी स्त्री गवेधुका गोरक्त
तंडुला इति ख्याता इति शब्द

वेद्रिका

भल्लाटं क्ली शशिध्वजराजपुरं य।
था सेनागणैः परिवृतःकल्किनौ
रायणः प्रभुः भल्लाट नगरं प्राया।
त्वदृष्टक संनिवाहनः इतिकल्कि
पुराणे २२ अध्यायः ॥
भल्लातः पुं भल्लातकवृक्षः इति
रत्नमाला ॥
भल्लातकः पुं वृक्षविशेषः भेला
इतिभाषा तत्पर्य्यायः अरुष्करः
२ भल्लातः ३ शोथहृत् ४ वह्नि
नामा ५ वीरतरुः ६ व्रणकृत् ७।
भूतनाशनः ८ इतिरत्नमाला भल्ला
तकी ९ अग्निमुखी १० वीरवृक्षः ११
इत्यमरः निर्दहनः १२ तपनः ॥
१३ अनलः १४ कृमिघ्नः १५ शैलबी
बीजः १६ वातारिः १७ स्फोटबीज
कः १८ पृथग्बीजः १९ पत्रदहनः १९
बीजपादपः २० वह्निः २१ अस्य गुणाः
कटुत्वं तिक्तत्वं कषायत्वं ॥
॥ । ॥ । ॥

उष्णत्वं कृमि कफ वातोदरानाह
मेह दुर्नाम नाशित्वंच तत्फल ।
गुणाः कषायत्वं मधुरत्वं कोष्ण ।
त्वं कफार्त्तिश्रमश्वासानाह विबंध
शूल जठराध्मान कृमि नाशित्वंच
तन्मज्जगुणाः विशेष दाह शमन ।
त्वं पित्तापहत्वं तर्पणत्वं ॥ वा
पित्त नाशित्वंच इतिराजनिर्घण्टः
॥ अपिच भल्लातकं त्रिषु
प्रोक्तं अरुष्करो ऽरुष्करो ऽग्निकः ।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शो
फहृत् भल्लातक फलं पक्वं स्वादु
पाक रसं लघु कषायं पाचनं ।
स्निग्धं तीक्ष्णोष्णं छेदि भेदनं ।
मेध्यं वह्निकरं हन्ति कफ वात ।
व्रणोदरं कुष्ठार्शो ग्रहणी गुल्म ।
शोफानाह ज्वर क्रिमीन् तन्मज्जा ।
मधुरा वृष्या बृंहणा वातपित्तहा ।
वृन्तमाहस्करं स्वादु पित्तघ्नं केश्य ।
मग्निकृत भल्लातकः कषायोष्णः ।
शुक्लो मधुरो लघुः वातश्लेष्मो
दरानाह कुष्ठार्शो ग्रहणी गदान
हंति गुल्म ज्वरं चित्र वह्निमांद्य कृ
मिव्रणान् इतिभावप्रकाशः ॥
अन्यच भल्लातकफलं स्निग्धं कृ
मिदुर्नाम नाशनं दन्तस्थैर्य्यकरं ।
॥ ॥ ॥ ॥

तीरवृक्ष इति दीप्तिनकवे




ग्राहि कषायं मधुरंच तत भ
ल्लातकस्थं मधुरं कषायं वात को
पनं इतिराजवल्लभः ॥
भल्लातकी स्त्री भल्लातकवृक्षः इ
त्यमरः ॥ ॥
भल्लिका स्त्री भल्लातकः इतिश
ब्दचंद्रिका ॥ ॥
भल्ली त्रि भल्लातकः इति शब्द
रत्नावली ॥
भलूकः पुं भाल्लूकः इत्यमरः
भल्लूकः पुं जंतुविशेषः भाल्लूक
इतिभाषा तत्पर्यायः ऋक्षः २
भल्लः ३ सपात्सः ४ दुर्भीषः ५ भल्ल
कः ६ दृष्टदंष्ट्रः ७ द्राविडः ८ दीर्घ
केशः ९ चिरायुः १० कृष्णः ११
दीर्घदर्शी १२ इति राजनिर्घण्टः ॥
भालुकः १३ भाल्लूकः १४ ऋक्षः १५
भाल्लूकः १६ भौल्लूकः १७ इति श
ब्दरत्नावली ॥ श्योनाक प्रभे
दः कुक्कुरः इति राजनिर्घण्टः
भवं क्ली भव्य चालता इति
भाषा इतिराजनिर्घण्टः ॥
भवः पुं जन्म शिवः इत्यमरः।
सच जलमूर्त्तिः यथा भवायजल
मूर्त्तयेनमः इतिपार्थिव शिवलिं
गपूजाप्रयोगः क्षेमः संसारः।
सत्ता प्राप्तिः इतिमेदिनी ॥

भवकः पुं आशीर्वाचकः इति
संक्षिप्तसारः ॥
भवघस्मरः पुं दावानलः इति।
शब्दमाला ॥ ॥
भवत् त्रि युष्मदर्थे वर्त्तमानार्थे
इतिमेदिनी अत्र आद्यर्थभा ।
धातो र्डवतु प्रत्ययेन निष्पन्ने त
स्यलिंगत्रयेरूपं भवान् भवती।
भवत् द्वितीयार्थे भूधातोः शतृ
प्रत्ययेन निष्पन्ने तस्य लिंगत्रि
येरूपं भवन् भवंती भवत्‌वाण
भेदे स्त्री इति च मेदिनी।
भवती स्त्री वाणभेदः सतविषा।
कः इतिशब्दरत्नावली दीप्तिमती
यथा स्वर्गारोहण वैजयंति भव
ती भागीरथी प्रार्थये इतिवा।
ल्मीकिकृत गंगास्तोत्रं ॥
भवदारु क्ली देवदारुवृक्षः इति
राजनिर्घण्टः ॥
भवदीयं त्रि भवत इदं युष्मत्सं।
बंधि यथा क्षमाविहरेभवदीय
कार्त्ति कर्त्ते च नष्टो नचवत्स
धीमं हयो विवादं परिहर्त्तुं मिच्छ
न् समागतो ऽहं नव दर्शनाय
इत्युद्भटः ॥
भवनं क्ली गृहं भावः इति।
मेदिनी ॥

भवनाशिनी स्त्री सरयूनदी इति
पुराणं ॥ ॥
भवनीयं त्रि भवितव्यं भव्यं
इत्यंत्यर्हे इति मुग्धबोधव्या ॥
करणं
भवंतः पुं कालभेदः सतवर्त्तमा
नः इत्युणादिकोषः भवच्छब्दस्य
प्रथमा बहुवचनारूपे ऽप्ययं ॥
भवंतिः पुं वर्त्तमानकालः इत्यु
णादिकोषः संक्षिप्तसारोणादि
वृत्तिश्च ॥
भवभूतिः पुं कविविशेषः सच
भोजराजस्य पंडितः मालती।
माधवादिनाटककर्त्ताच तत्पर्या
यः श्रीकण्ठः २ इतिजटाधरः ॥
महादेवस्य ऐश्वर्यंच ॥ ॥
भवरुत स्त्री प्रेतपटहः इति
त्रिकाण्डशेषः ॥
भवात्मजा स्त्री मनसादेवी इति
शब्दमाला ॥
भवादृक् त्रि युष्मत्सदृशः भवा
भवादृशः निवदृशातेय इत्यिमनप
न्याभवादृक्षः पंम्या भवच्छब्द पूर्वक दृश
धातो कर्म्मणि क्रमेण क्विप्टकौ
सक् प्रत्ययेन निष्पन्नः इति
व्याकरणं
भवानी स्त्री भवस्य भार्या दुर्गा

इत्यमरः एतन्नाम कारणं यथामै
रुद्रो भवः समाख्यातो भवः सं
सारसागरः भवः काम स्तथा।
सृष्टिर्भवानी परिकीर्त्तिता इति
देवीपुराणे ४५ अध्यायः ॥।
भवानीगुरुः पुं हिमालयपर्वतः
इतिहेमचंद्रः ॥ ॥
भवाभीष्टः पुं गुग्गुलुः इतिराज।
निर्घण्टः ॥
भवाब्धिः पुं संसाररूपसमुद्रः
यथाध्येये सदापरिभवघ्नमभीष्ट
दोहं तीर्थास्पदं शिवविरिंच ॥
नुतं शरण्यं भृत्यार्त्तिहं प्रणत।
पाल भवाब्धिपोतं वन्दे महा।
पुरुषतेचरणारविन्दं इतिश्री।
भागवते ११ स्कंधे ५ अध्यायः ॥
भवायना स्त्री गंगा इतिशब्दरत्ना
वली ॥
भविकं क्ली मंगलं तद्वतित्रि ॥
इत्यमरः ॥
भवितः त्रि अतीतोत्पत्तिकः ॥
भूतः इतिजटाधरः ॥ ॥
भवितव्यं त्रि भवनीयं भव्यं ॥
इतिभविष्यत् काले कर्मणिभावे
शक्यार्हे प्रेष्यानुज्ञा प्राप्तकालार्थे
च भूधातो स्तव्य प्रत्ययेन निष्पन्नं
इतिव्याकरणं यथा न भवस्था।




महं शोच्यो नायं राजापराध्य ॥
ति भवितव्य मेनैनैव येनाहं
निपनं गतः इतिवह्निपुराणं ॥
भवितव्यता स्त्री भाग्यं इतिजटा
धरः ॥ ॥
भविता त्रि भवनशीलः इतिभरतः
साधु भवनशीलः इतिमुकुटैः
तत्पर्य्यायः भूष्णुः २ भविष्णुः ३
इत्यमरः ॥
भविनः पुं काव्यकर्त्ता इति त्रि
काण्डशेषः ॥
भविलः पुं षिड्गः इतित्रिकाण्ड
शेषः भव्यः इतिसिद्धांतकौ।
मुद्याम्रुणादिपादः ॥
भविष्णुः त्रि भाविता इत्यमरः
भविष्यः त्रि भविष्यत्कालःइति
हेमचंद्रः पुराणविशेषे क्ली
यथा चतुर्दश भविष्यंस्यात्तथा
पंचशतानिच इति श्रीभागवते।
१२ स्कंधे १२ अध्यायः ॥
भविष्यत् त्रि कालविशेषः तस्य
लक्षणं वर्त्तमान प्रागभाव प्रति
योगित्वं इति सारमंजरी वर्त्त
मानकालोत्तरकालीनोत्पत्तिक
त्वे इति शिरोमणिकृतपदार्थ
कारवंडनं तत्पर्य्यायः अनाग।
ते २ श्वस्तनं ३ प्रगेतनं ४ वर्त्स्यत्

५ वर्त्तिष्यमाणं ६ आगामि ७ भावि
८ इति राजनिर्घण्टः अथ तेते।
भव्यो ञी दूरभव्यो इतिसाम्य ॥
दायिकः । यथा सोमविता वर्षी
तेरे भविष्यति इतिदुर्गादासः ॥
भव्यं क्ली फलविशेषः वालता
इतिभाषा तत्पर्य्यायः भव्यं २
भविष्यं ३ भावनं ४ वक्त्रशोधनं ५
लोमफलं ६ पिच्छिलबीजं ७।
अस्य गुणाः अम्लत्वं कटुत्वं उ
ष्णत्वंच वालस्यतस्य तस्य गुणाः वा
तकफाहत्वं। पक्वस्य तस्य गुणाः
मधुराम्लत्वं रुविकारित्वं श्रम
शूलहारत्वंच इतिराजनिर्घण्टः
अपिच भव्यं स्वादुकषायाम्लं हृद्य
मास्यविशोधनं तदेव पक्वं।
दोषघ्नं गुरु ग्राहि विषापहं ॥
इति राजवल्लभः अस्थि ॥
इतिमेदिनी ॥
भव्यं त्रि शुभं सत्यं योग्यं ॥
भावि इतिमेदिनी शब्दरत्नावलीच
भव्यः पुं कर्म्मरंगवृक्षः इति मेदि
नी रसभेदे पुं क्ली इति शब्द।
रत्नावली ॥
भव्या स्त्री उमा गजपिप्पली इति
मेदिनी ॥
भष ७ बुक्के पिशुनोक्तौ इति

कविकल्पद्रुमः बुक्कः कुक्कुरादि
कर्त्तृकशब्दः भषति श्वा भषत्यन्य
दोषं खलः सूचयतीत्यर्थः भर्त्स
ने इति पोंचः भषति श्वा पोष्यं
शब्देन निर्भर्त्सयतीत्यर्थः इति
रमानाथः इतिदुर्गादासः ॥
भषः पुं कुक्कुरः इतिरत्नमाला ॥
भषकः पुं स्त्री कुक्कुरः इत्यमरः
भषणं क्ली बुक्कने कुक्कुरशब्दे इ
तिहेमचंद्रः ॥ ॥
भषा स्त्री स्वर्णक्षीरी इतिरत्नमा
ला भषी स्त्री शुनी इतिशब्दरत्ना
वली भस २ लि युनौ भत्से इति
कविकल्पद्रुमः २ वैदिकः लि
वभस्ति इतिदुर्गादासः ॥
भसत् स्त्री काष्ठं अस्थिमांसं ।
त्वचनं इति सिद्धांतकौमुद्याम्।
णादिवृत्तिः ॥
भसत् स्त्री भास्करः योनिः इति
मेदिनी मांसं कारण्डवपक्षी ॥
सारः इत्युणादिकोषः कालः
इतित्रिकाण्डशेषः ॥
भसनः पुं भ्रमरः इतिभूरि।
प्रयोगः ॥
भसेतः पुं कालः त्रिकांड ॥
शेषः
भसितं क्ली भस्म इतिहेमचंद्रः।

भस्त्रकः पुं दैवज्ञः इतिशब्द ॥
रत्नावली ॥ ॥
भस्त्रका स्त्री चर्म्मप्रसेविका इति
शब्दरत्नावली ॥
भस्त्रा स्त्री अग्निदीपकचर्म्मनिर्म्मि
तयंत्रविशेषः भाथी इतिभाषा इति
वभाषा तत्पर्य्यायः चर्म्मप्रसेवि ॥
का २ इत्यमरः चर्म्मप्रसेवकः ३
इतिभरतः भस्त्राका ४ भस्त्रका
५ भस्त्री ६ इति शब्दरत्नावली ॥
भस्त्रिका ७ इतिव्याकरणं ॥
भस्त्राका स्त्री भस्त्रा इतिशब्द ॥
रत्नावली ॥
भस्त्री स्त्री भस्त्रा इतिशब्दरत्नावली
भस्म क्ली शिवांगभूषणं छाइइति
भाषा यथा अस्यांग भूषणं भस्म
विभूतिर्भूतिरस्य त इति शब्द।
रत्नावली तद्रूस्य कामदेव शरी
रजे यथा प्रसीद सर्वभूतेश।
भक्त्या त्वत्र शरणा वयं इतिस्म
वदतो तेषा ममराणं तदानलः
ललाट चक्षुः संभूतो भस्माका
र्षीन्मनोभवं दग्ध्वा कामं नरा
वह्नि ज्वालामालाति दीपितः।
संस्तम्भितो ऽथविधिनाह्वारं गते
शशाकनामहादेवो ऽप्य तद्रूस्य
मनोभव शरीरजं आदाय सर्व।



गात्रेषु भूतिलेपं न दाकरोत् ।
लेपशेषाणि भस्मानि समादाय
तदाहरः सगणो ऽन्तर्दधे काली
विहाय विधि संमते इति कालि
कापुराणे ४८ अध्यायः भस्म
मृक्षणं सप्तविधस्नानान्तर्गताग्नेय
स्नानं यथा आग्नेयं भस्मना स्नानं
वायव्यं गोरजः स्मृतं इति याज्ञव
ल्क्यः शिवपूजायां ललाटे ।
तस्यधारणमावश्यकं यथा वि
ना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमा
लया पूजितो ऽपि महादेवो न
स्यात्तस्य फलप्रदः इत्याह्निक
तत्त्वं तेनकांस्यशुद्धि यथा
अम्भसा हेमरूप्यायः कांस्यं शु
ध्यति भस्मना अम्लैस्ताम्रञ्च रै
त्यञ्च पुनः पाकेन मृण्मयं इति
शुद्धितत्त्वं । अश्मरीविकारः ।
यथा शर्करा सिकता मेहो भ
स्माख्यो ऽश्मरी वैकृतं अश्म
र्याः शर्करा ज्ञेया तस्यव्यंजनवे
दना इति सुश्रुते निदानस्थाने
अश्मरीनिदाने ॥
भस्मकं क्ली रोगभेदः भस्मकीट
इतिख्यातः विडंगः कलधौ ।
तं इतिमेदिनी भस्मकस्य नि
दान संप्राप्ति पूर्वकं लक्षणमाह
कट्वादि रूक्षान्न भुजां नराणां
क्षीणे कफे मारुत पित्त वृद्धौ
अतिप्रवृद्धः पवनान्वितो ऽग्नि
र्भुक्तं क्षणाद्भस्म करोति यस्मात्
तस्मादसौ भस्मक संज्ञको ऽभूत् ।
पेक्षितो ऽयं पचते च धातून् ।
भस्मकस्य सोपद्रव मरिष्ट माह ।
तृट् स्वेददाह मूर्च्छादीन् कृत्वावाम
मिसम्भवान् पक्वान्न माशु धाता
हीन् स त्रिप्रं नाशयेद्ध्रुवं इति ।
भावप्रकाशः ॥
भस्मकारः पुं रजकः इति शब्द
माला ॥
भस्मगंधा स्त्री रेणुका इति भाव
प्रकाशः ॥
भस्मगंधिका स्त्री रेणुकाख्यगंध
इति जटाधरः
भस्मगंधिनी स्त्री रेणुकाख्यगंध
द्रव्यं इत्यमरः ॥
भस्मगर्भः पुं तिनिशवृक्षः इति
राजनिर्घण्टः ॥
भस्मगर्भा स्त्री कपिलशिंशपा इ
त्यमरः रेणुकानाम गंधद्रव्यं इति
जटाधरः ॥
भस्मतूलं क्ली ग्रामकूटः पांशु
वर्षणं हिमं इति मेदिनी ॥
भस्मरोहा स्त्री दग्धारुहः इति ।

राजनिर्घण्टः ॥
भस्मरेचकः पुं कर्पूरः इति शब्द
रत्नावली ॥
भस्माह्वयः पुं कर्पूरः इति त्रिका
ण्डशेषः ॥
भक्ष अ भक्षणे इति कविकल्प
द्रुमः अ भक्षति भक्षते इति
दुर्गादासः ॥
भक्ष क भक्ष्ये इति कविकल्पद्रुमः
क भक्षयति इति दुर्गादासः ॥
भक्षकः त्रि खादकः भक्षणपरः
तत्पर्य्यायः घस्मरः २ अद्मरः ३
इत्यमरः ॥
भक्षटकः पुं क्षुद्रगोक्षुरकः इति
राजनिर्घण्टः ॥
भक्षणं क्ली द्रवेतरद्रव्यगलाधः
तत्पर्य्यायः न्यादः २ स्वदनं ३
खादनं ४ अशनं ५ विघसः ६ व
ल्भनं ७ अभ्यवहारः ८ जग्धिः ९ ज
क्षणं १० लेहः ११ प्रत्यवसानं १२ घ
स्सि १३ आहारः १४ प्सानं १५ अव
घाणं १६ विघाणं १७ भोजनं १८
जेमनं १९ अदनं २० इतिहेमा
चन्द्रः द्रव्यविशेषस्य भक्षण नि
षेधो यथा शणशाकं वृथामांसं
करेण मथितं दधि तर्जन्या दंत
धावश्च सद्यो गोमांस भक्षणं ।
इति कर्मलोचनं ॥
भक्षणीयं त्रि भक्ष्यद्रव्यं भक्षण
योग्यः इति भक्षधातोः कर्मण्यन
नीयप्रत्ययेन निष्पन्नं इति व्याक
रणं ॥
भक्षपत्रा स्त्री नागवल्ली इति राज
निर्घण्टः ॥
भक्षितं त्रि कृतभक्षणवस्तु तत्
पर्य्यायः चर्वितं २ लिप्तं ३ प्रत्य
वसितं ४ गिलितं ५ खादितं ६
प्सातं ७ अभ्यवहृतं ८ अन्नं ९
जग्धं १० ग्रस्तं ११ ग्लस्तं १२ अशितं
१३ भुक्तं १४ इत्यमरः ॥ जक्षितं
१५ इति शब्दरत्नावली ॥
भक्ष्यं त्रि भक्षितव्यं भक्षणीयं ।
यथा प्रतिपदि कुष्माण्डं न भक्ष्यं
दशम्यां कलम्बी न भक्ष्या इति ।
स्मृतिसर्वस्वं अपिच मासमेकं ।
नरो याति द्वौ मासौ मृगशूकरौ
अहिरेकदिनं याति अथ भक्ष्या
पञ्चनखाः इति हितोपदेशः ॥
भक्ष्यकारः त्रि पिष्टकविक्रयजी ।
वी पिष्टशिल्पी इति भरतः तत्
पर्य्यायः आपूपिकः २ कांदविकः
३ इत्यमरः पूपिकः ४ पूपवि ।
क्रयी ५ मोदकादिविक्रयी ६ इति
शब्दरत्नावली ॥ ॥



भक्ष्याभक्ष्यं क्ली खाद्याखाद्यद्रव्यं।
यथा भक्ष्याभक्ष्याण्यनेकानि।
ब्राह्मणस्य विशेषतः अत्र शिष्टा
यथाश्रुतस्तथा कार्य्यविनिर्णयः
इत्येकादशीतत्त्वे धृतं वचनं ॥
नारद उवाच भक्ष्यं किं वाप्य भ
क्ष्यंच द्विजानां गृहिणां प्रभो
नां यतीनां वैष्णवाँच विधवा ब्रह्म
चारिणां किं कर्त्तव्य मकर्त्तव्यम
भोग्यं भोग्यमेवच सर्वं कथय
सर्वज्ञ सर्वेश सर्वकारण श्रीमहे
श्वर उवाच कश्चित्तपस्वी विप्रश्च।
निराहारी चिरं मुनिः कश्चित्
समीरणाहारी फलाहारी वकश्चन
अन्नाहारी यथा लोके गृहीव गृ
हिणीयुतः येषां भिक्षाचयात्र।
ब्रह्मचीनां विधियागतिः हविष्या
न्नं ब्राह्मणानां प्रशस्तं गृहिणामदा
नारायणोच्छिष्ट मिष्ट मनिवेद्य म
भक्ष्यकं । अन्नं विष्ठा जलं मूत्रं।
यद्विष्णो रनिवेदनं विश्रुतं सर्वं
पापोक्तं मन्नंच हरिवासरे ॥
ब्राह्मणः कामतो ऽन्नंच योभुंक्ते
हरिवासरे त्रैलोक्य जनितं।
पापं सो ऽपिभुंक्ते न संशयः।
न भोक्तव्यं न भोक्तव्यं न भो
क्तव्यंच नारद गृहिभिः ब्राह्मणै

रन्नं संग्रामे हरिवासरे ॥ गृही।
शैवश्च शाक्तश्च ब्राह्मणो ज्ञानदुर्ब
लः प्रयाति कालसूत्रंच भुक्त्वा च
हरिवासरे कृमिभिः शाल्यमाने ॥
स्म भक्तिनस्तत्रतिष्ठति विण्मूत्र भ
क्षणं कृत्वा यावदिन्द्राश्चतुर्दश ज
न्माष्टमीदिने रामनवमी दिवसे ह
रेः शिवरात्रे च योभुंक्ते सोपिद्वि
गुणं पातकी उपवासासमर्थश्च
न फलमूलजलंपिबेत ॥ नैष्ठ
शरीरे स भवेदन्यथावान्धवानकः
सकृद्भुंक्ते हविष्यान्नं विभ्नेर्नैव।
द्यमेवच न भवेत् प्रत्यवायी स
वोपवासफलं लभेत् पकारणा।
मनाहारी गृही विशश्च भारत।
तेच तिष्ठंति वैकुण्ठे यावद्वै ब्रह्म
णोवयः गृहिणां शैव शाक्तानाम्
दशुक्तंच नारद विशेषतो वैष्णवानां
यतीनां ब्रह्मचारिणां नित्यंनैवेद्य
भोजी च परिहससश्च वैष्णवः।
नित्यशुद्धोपवासानां जीवन्मुक्तो।
लभेत् फलं वांछति तस्य संस्प
र्शं तीर्थानि सर्वं देवताः ब्राह्म
णं दर्शनंचैव सर्वपाप प्रणाशनं।
हिलिममन्नं सपुर्कं पक्वं देशवि
शेषके नान्येन शस्तं विप्राणां।
भक्षणे च निवेदने अभक्ष्यंच।

यतीनांच विधवाब्रह्मचारिणां ता
म्बूलंच यथा ब्रह्मन् तथैव वस्त्र।
नीक्षवं ताम्बूलं विधवास्त्रीणां य
नीनां ब्रह्मचारिणां तपस्विनांच विप्रेन्द्र
गोमांस सदृशं स्मृतं ॥ सर्वेषां
ब्राह्मणानांच अभक्ष्यं शृणु नारद
यदुक्तं सामवेदेच हरिणाचाह्निक
क्रमे ताम्रपात्रे पयः पानं उच्छि
ष्टे घृतभोजनं दुग्धंलवणसार्द्धंच
सद्योगोमांस भक्षणं नारिके।
लोदकं कांस्ये ताम्रपात्रे स्थितं।
मधु पेहवं ताम्रपात्रस्थं सगव्य
त्वं न संशयः उत्थाय वामहस्ते
नयत्तोयं पिवति द्विजः सुरापीनी
सविज्ञेयः सर्वधर्म वहिष्कृतः अ
निवेद्यं हरे रन्नं भक्ष्यशेषंच ति
त्यक्ताः पीतशेषं जलंचैव गोमां।
स सदृशं मुने वार्त्तिगनफलंचैव
गोमांसं कार्त्तिकेस्मृतं माघेच।
मूलकंचैव कलम्बी शयनेतथा
श्वेतवर्णांच नालंच मसरं मत्स्य
मेवच सर्वेषां ब्राह्मणानांचस्पाक्षं
चसर्वदेशतः मत्स्यांश्च कामतो
भुक्त्वा चोपवासं त्र्यहं वसेत् प्रा
यश्चित्तं ततः कृत्वा शुद्धिमाप्नोति
ब्राह्मणः प्रतिपत्स्च कूष्माण्ड म
भक्ष्यमर्थनाशनं द्वितीयायांच ह

ह्यतीभोजको न स्मरेद्धरिं अभ।
क्ष्यंच पटोलंच शत्रुवृद्धि करं परं
तृतीयायां ज्वत्तर्षीच मूलकं धन
नाशकं कलंक कारणंचैव पंच
म्यां विल्व भक्षणं निर्ध्यस्याति ॥
शापयेत्त षष्ठ्यांच निम्बभक्षणं ॥
रोगवृद्धि करंचैव सप्तम्यां ताल।
भक्षणं नारिकेल फलं भक्ष्यमष्ट।
म्यां बुद्धिनाशनं तेंची नवम्यां।
गोमांसं दशम्यांच कलंविका।
एकादश्यां तथा शिम्बी द्वादश्यां
पूतिका तथा त्रयोदश्यांतु वार्त्ता
कीभक्षणं पुत्रनाशनं चतुर्दश्यां।
माषभक्षं महापापकरं परं ॥
पंचदश्यां तथामांस मभक्ष्य गृ
हिणां मुने गृहिणां योषितां।
मांसं भक्ष्य मन्य दिने दिने।
मांसंच रक्तशाकंच कांस्यपात्रेच
भोजनं निषिद्धं शयनेचैव कूर्म्म
मांसंच योषितां रात्रौ च दधि।
भक्तंच शयनं संध्ययोर्दिने रज
स्वला ऽ वीरानंच पुंश्चलीना मभ
क्ष्यकं शूद्राणां याजकानांच शूद्र
श्राद्धान्नमेवच अभक्ष्यानांच विशेषे
यदन्नं वृषलीपते ब्राह्मन् वार्द्धु।
षिकान्नंच गणकानामभक्ष्यकं अग्र
दानी विज्ञानांच चिकित्साकारक।

ष्यच हत्वा विप्रा हरौनैव यथा
ल्पंचापि भक्ष्यकं मूले मृगे भाद्र
पदे मांसं गोमांसं तुल्यकं ॥
इति ब्रह्मवैवर्त्ते ब्रह्मखंडे २१ अ
ध्यायः । पाद्मे स्वर्गखंडे ३१ अध्याय ।
स्य नंदउवाच वर्णानांच वर्णानां
च भक्ष्याभक्ष्यंच साम्प्रतं विधा
कं कर्मणांचैव सर्वेषां प्राणिनाम
पि कथयस्व महाभाग कारणानां
च कारणं त्वत्तो ऽन्यं कंच पृच्छामि
नितांतं सर्वमीश्वर श्रीभगवानुवा
च भक्ष्याभक्ष्यं चतुर्णांच वर्णानां
च यथोचितं वेदोक्तं कथयामि तात
सावधानं निशामय अयःपात्रे
पयःपानं गव्यं सिद्धान्नमेवच ॥
मध्वादिकं मधु गुडं नारिकेलोद
कं तथा फलं मूलंच यत्किंचिद
भक्ष्यं मनुरब्रवीत् दग्धान्नं तक्र
सौवीरं मभक्ष्यं ब्राह्मणो मतं ।
नारिकेलोदकं कांस्ये ताम्रपात्रे
स्थितं मधु गव्यंच ताम्रपात्रस्थं
सर्वमपेयं घृतं विना ॥ ताम्रपात्रे
पयःपानं मुच्छिष्टे घृतभोजनं ।
दुग्धं सलवणंचैव सद्यो गोमांस
भक्षणं अभक्ष्यं मधुमिश्रंच घृतं
तैलं गुडं तथा आर्द्रकं गुडसं
युक्तं मभक्ष्यं श्रुतिसम्मतं पीत

शेषं जलंचैव माघेव मूलकं तथा
हिर्भोजनंच दिवसे संध्ययो र्भो
जनं तथा भक्ष्यंच रात्रिशेषेच ।
ध्रुवं प्राज्ञः परित्यजेत पानीयं
पायसं चूर्णं घृतं लवणमेवच स्व
स्तिकं लवणंचैव क्षीरं तक्रं तथा
मधु हस्तादुत्तं गृहीतंच सद्यो गो
मांस भक्षणं कर्पूरं रौप्यपा ॥
त्रस्थ मभक्ष्यं श्रुति संमतं परि
वेशन कारी वेदज्ञः स्पृशेत ।
यदि अभक्ष्यंच तदन्नंच सर्वेषा
मेव संमतं नकुलानां गण्डकानां
महिषाणांच पक्षिणां सर्पाणांञ्च
काणांच गर्दभानां विशेषतः ।
मार्जाराणां श्रृगालानां कुक्कुरा
णां व्रजेश्वर व्याघ्राणामपि सिंहा
णां त्याज्यं मांसं नृणां सदा न लोक
यांच तक्राणां गोधिकानां तथैव
च मंडुकानां कर्कटीनां तुंबका
नांच निश्चितं गवांच चमरीणांच
कलौ मांसं मभक्ष्यकं हस्तिनां घोर
कानांच नृणामेवच रक्षसां दंश
स्य मशकस्यैव मक्षिका च पिपी
का अन्येषांच निषिद्धानां लोके
वेदे व्रजेश्वर वानराणां भल्लका
नां शारभानां तथैवच निषिद्धं
मृगनाभीनां गर्दभानांच मांसकं

अभक्ष्यं महिषाणांच दग्धं दधिघृतं
तथा स्वस्तिकंच तथा तक्रं विप्रा
णां नवनीतकं मांसमश्वैः अवसकं
तस्य दुग्धादिकं तथा वर्णानांच च
तुर्णांवाप्यभक्ष्यंच श्रुतौ श्रुतं अ
भक्ष्यमार्द्रकंचैव सर्वेषांच रवेर्हि ।
ते पर्युषितं जलंचान्नं विप्राणां
दुग्धमेवच वर्णानांच चतुर्णांचापी
राज्ञस्यच भक्षणं तदन्नंच सुरात्
ल्यं गोमांसाधिक मेवच ॥ अवी
रान्नंच यो भुंक्ते ब्राह्मणो ज्ञान दुर्बलः
॥ पितृदेवार्चनं तस्य निष्फलं मनुर
ब्रवीत् ब्राह्मणानां वैष्णवानां मभ
क्ष्यं मत्स्यमेवच ॥ इतरेषामभ
क्ष्यंच पंचपर्वसु निश्चितं ॥ पितृ
देवावशेषेच भक्ष्यं मांसं न दू
षितं पंचपर्वसु त्याज्यंच सर्वेषां ॥
मनुरब्रवीत् असंस्कृतं चलवणं तै
लेवाभक्ष्यमेवच भक्ष्यं पवित्रं ॥
सर्वेषां व्यंजने वह्नि संस्कृतं ।
एकहस्ते धृतं तोय मभक्ष्यं सर्व
संमतं आविलं कृमियुक्तं वा परि
शुद्धं तन्निर्मलं अभक्ष्यं ब्राह्मणानां
च वैष्णवानां विशेषतः ॥ अनिवे
द्यं हरे रेव यतीनां ब्रह्मचारिणां
पिपीलिका मिश्रितंच मधु गव्यं ।
गुडं तथा यत्किंचिद्वस्त्वा तात न ।

भक्ष्यंच श्रुतौ श्रुतं । पतिभक्ष्यं ॥
कीटभक्ष्यं शुद्धं पक्वफलं तथा ॥
काकभक्ष्यमभक्ष्यंच सर्वेषां द्रव्य ।
मेवच घृतपक्वं तैलपक्वं मिष्टा ।
न्नं शूद्र संस्कृतं अभक्ष्यं ब्राह्म ॥
णानांच शूद्रसृष्टं विपीरकं । स
र्वेषां मश्ववीनांच जलमन्नं परित्य
जेत अशौचान्तात् परदिने शुद्ध ॥
मेव तथांशयः विपाकः कर्मणां ।
मेव दुष्कारश्रुति सम्मतं ॥ भक्ष्या
भक्ष्यंच कथितं यथा ज्ञानं व्रजे
श्वर इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म ।
खंडे ८५ अध्यायः ॥ भक्ष्या ॥
भक्ष्यंच नैषिध्य वेदितव्यं तदे
तत् करीरस्य वयःशक्तः फलान्यौ ।
दुम्बरस्यच सद्यो मती भवेन्नेन ।
अभक्ष्या पूतिवासिका न भक्षणी ।
यं वाराहं मांसं मत्स्यस्य सर्व ॥
शः अभक्ष्या ब्राह्मणे दीने नदी ।
तीने हिंसंशयः ॥ इति वारा ।
हे ब्राह्मणादीतास्त्र नामाध्यायः
भक्ष्यालावुः स्त्री राजलावु इति
राजनिर्घण्टः ॥


भा ल च दीप्तौ इति कविकल्पद्रुमः
ल भाति शुभा इति दुर्गादासः ॥
भा स्त्री प्रभा दीप्तिः इत्यमरः ॥
भाः स पुं सूर्यः इति त्रिकाण्डशेषः ॥

भाकूटः पुं मत्स्यविशेषः भे।
कटी इति भाषा अस्य गुणाः
मधुरत्वं शीतत्वं दृष्यत्वं श्ले
ष्मकारित्वं गुरुत्वंच इति राज
वल्लभः ॥
भाकूटः पुं पर्वतभेदः ॥ मत्स्य।
भेदः इतिमेदिनी ॥
भाकोषः पुं सूर्य्यः इतित्रिकांड
शेषः ॥
भाक्तं त्रि पारिभाषिकं गौणं।
लाक्षणिकं औपचारिकं यथा
तत्स्वेव परत्र सप्तमे मासि क्रिय
माणस्य कथं षाण्मासिकत्वं इति
वेद्भाक्तं इतितिथ्यादितत्वं ॥
भक्तसंबंधिनिच ॥
भाक्तिकः त्रि अन्नेनपोष्यः भक्त
मस्मै दीयते ॥ इतिसिद्धांतकौ
मुद्यामुणादिवृत्तिः ॥
भागः पुं अंशः ॥ इत्यमरः
रूपार्द्धकः ॥ भाग्यं एकदेशः
इति शब्दरत्नावली राशेस्त्रिं श
भागेकभागः यथा त्रिंशांशाक।
लया राशे र्भाग इत्यभिधीयते
इतितिथ्यादितत्वं धृतविसष्ठमतो।
त्तरवचनं ॥
भागधेयं क्ली भाग्यं इत्यमरः॥
भागधेयः पुं राजकरः इत्यमरः

दायादः ॥ इत्यजयपालः
भागवतं क्ली अष्टादशपुराणांत।
र्गतमहापुराणविशेषः सच वेदव्या
सकृत द्वादशस्कंध द्वात्रिंशत् त्रि
शताध्याय समन्विताष्टादश सहस्र
श्लोक संख्याक भगवन्माहात्म्य व
र्णन प्रधानको ग्रंथः यथोक्तं मत्
स्यपुराणे पुराणैदान प्रस्तावे।
यत्राधिकृत्य गायत्री वर्ण्यते धर्म
विस्तरः वृत्रासुर वधोपेतं त
द्भागवत मिष्यते लिखित्वा तञ्च
यो दद्याद्धेम सिंह समन्वितं ॥
प्रौष्ठ पद्यां पौर्णमास्यां स या
ति परमं पदं अष्टादश सह
स्राणि पुराणं तत्प्रकीर्तितं पु
राणांतरेच ग्रंथोष्टादश साहस्रो।
द्वादशस्कंध संमितः हयग्रीवब्रह्म
विद्या यत्र वृत्रवध स्तथा गायत्र्या
च समारम्भ स्तद्वै भागवतं विदुः
रिति पद्मपुराणे च अम्बरीषं
प्रति गौतम वचनं अम्बरीष शुक
प्रोक्तं नित्यंभागवतं शृणु। प
ठस्व स्वमुखेनापि यदीच्छसि भवत
यमिति इति श्रीभागवतटीकायां
श्रीधरस्वामी तत्र प्रथमस्कंधे प
रीक्षिन्नारदयो रुपाख्यानं ॥ वि
प्रशापात् परीक्षितस्य प्रायोप

वेशः शुक परीक्षित संवादश्च।
१।१। द्वितीयस्कंधे योगधारणया
कृष्टतुष्टिः नारदाजयोः संवादः अ
वतारानुगीतं महदादिक्रमेण सृ
ष्टिश्च २ तृतीयस्कंधे। विदुरोद्ध।
वसंवादः तत्र मैत्रेययोः संवादः
पुराण संहिता प्रश्नः महापुरुष
संस्थितिः प्राकृतिकः सर्गः वैकृ
तिकाःसप्तसर्गाः ब्रह्मांडसंभूति
विराट् पुरुषोत्त पत्तिः। कालस्य
स्थूलसूक्ष्मस्यगतिः पाद्म समुद्भवः
अम्भोधे र्भुव उद्धारणा हिरण्याक्ष
वधः ऊर्द्धतिर्य्यगवाक्सर्गः रुद्रस
र्गः अर्द्धनारीनरस्य सर्गः यतः स्वा
यम्भुवमनुः स्त्रीणां आद्याप्रकृतिः श
तरूपाच कर्दम प्रजापते धर्मपत्
नीना संतानः भगवत् कपिलाव
तारः कपिलेनदेवहूतिसंवादश्च
३ चतुर्थस्कंधे नव ब्रह्म समुत्प
त्तिः दक्षयज्ञविनाशनं ध्रुवचरितं
पृथोः प्राचीनबर्हिषश्च चरितं
नारदस्य संवादश्च ४ पंचमस्कंधे
प्रियव्रतचरितं द्वीप समुद्रादिवा।
र्ष नद्युपवर्णनं ज्योतिश्चक्रस्य सं
स्थानं पातालनरक स्थितिश्च ५
षष्ठस्कंधे दक्षजन्म तत्पुत्रीणां।
संततिः यतः देवासुरनरतिर्य्यगग

खगादयः त्वाष्ट्रस्य जन्मच ६ सप्तम
स्कंधे दितेः पुत्रयो र्निधनं प्रह्ला।
दचरितंच ७ अष्टमस्कंधे मन्वंतरा
नुचरितं गजेंद्र विमोक्षणं मन्वंत
रावताराः हयशीर्षादयो ऽव
ताराः जगत्पते कौर्ममात्स्य ॥
नारसिंहवामन रूपाणि तीरोद ॥
मथनं देवासुर युद्धंच ८ नवम।
स्कंधे राजवंशानुकीर्त्तनं इक्ष्वाकु।
जन्म तद्वंशः सुद्युम्न वंशः इला।
पाख्यानं ताराेपाख्यानं ॥ सूर्य्य।
वंशाकथनं शशाद नृग सौकन्य।
स्वर्जाति ककुत्स्थ खट्वांग मांधातृ
सौभरिरामाणांचरितं निमि रंग।
परित्यागः जनकानां सम्भवः ॥ प
रशुराममजन्म भृगोश्चितेः तेजोकारणं।
ययातिनहुषस्य भरत शांतनु तत्सुत।
यदूनां वंशानुकीर्त्तनंच ९ दशम
स्कंधे श्रीकृष्णस्य वसुदेवगृहे जन्म
गोकुले तस्य वृद्धिः तस्यपूतना।
पयःपानं शकटोच्चाटनं तृणाव
र्त्तवधः बकवत्सयो र्वधः अघासुर
वधः धात्रा वत्सपालावगूहनं ॥
भ्रात्रासह धेनुकस्यवधः प्रलंबवधः
गोपालानां दावाग्नेः परित्राणं ॥
कालीयदमनं महाहेर्नंदमोक्ष ॥
णं कन्यानां व्रतचर्य्या यज्ञपत्नी।



यः

ण्यः प्रमादः विप्राणामनुपालनं। गोवर्द्धनोद्धारणं शक्र सुरभि कर्तृक कृष्णस्य यज्ञाभिषेकः रा त्रिषु स्त्रीभिः क्रीडा शंखचूडस्यवं, केशिवधः अक्रूरागमनं। राम कृष्णयोर्मथुरा प्रस्थानं व्रजस्त्रीणां विलापः मथुरालोकनं गज मु ष्टिकचाणूरकंसादीनां वधः सांदी पेन मृत पुत्रानयनं उद्धव रामा भ्यां सह हरिणा यदुचक्रस्य प्रिय करणं जरासंधसमानीत बहुसैन्य वधः यवनेंद्रस्य घातनं कुशस्थ स्यानिवेशनं पारिजात हरणं ॥ रुक्मिणीहरणं बाणेन सह युद्धं प्राग्ज्योतिषपतिं हत्वाकन्यानां ह रणं चैद्य पौण्ड्रक शाल्व दंतवक्र शम्बर द्विविद पीठ मुर पंचजनानां माहात्म्यं वधश्च वाराणस्या दाहः पौण्ड्रकान् निमित्तीकृत्य भूमे भा रावतरणंच ९ एकादशस्कंधे। विप्रशापापदेशेन स्वकुल संहारः उद्धवसम्वादः उद्धवाय आत्मविद्या कर्म विनिर्णय कथनं आत्मयोगा त्मभावतो मर्त्यं परित्यागश्च ११ द्वादशस्कंधे युग लक्षण हृतिः क लौ नृणामुपप्लवः वर्णितश्च प्रलयः त्रिविधोवर्णितः परीक्षित देह।

त्यागः व्यासकर्तृकशाखा प्रणय। नं मार्कंडेयस्य सत्कथा सर्वस्य विन्यासश्च १२ इतिश्रीभागवते। १२ स्कंधे अनुक्रमणिकाध्यायः॥ भागवतः वि-भगवद्भक्तः तस्य। लक्षणं यथा सर्वदेवान्परित्यज्य नित्यं भगवदाश्रयः॥ रतस्तदी यसेवायां स भागवत उच्यते॥ इतिपाद्मोत्तरखंडे ९९ अध्यायः॥ सच यमदूते स्वाज्यः यथा ये त भागवता लोके तच्चित्ता। स्तत्परायणाः पूजयंति सदा वि ष्णुं ते च त्याज्याः सुदूरतः इति। वह्निपुराणे दूतान् प्रति यमवचनं। स्कांदे श्रीमार्कंडेय भगीरथ स म्वादे दशमीशेष संयुक्तं दिनं वैष्णव वल्लभं नोपासते महो पातकेनैव भागवता नराः॥ पा तालखंडे न वाञ्छंति दिनं पाप्यहरो। नराः कुर्वंति नामानि गौरी सदा भागवता हिते उपोष्य हार। शी शुद्धां गौरी नारायणस्य वितां। शुक्लां तस्यायये घस्य सवै भागव। तोत्तमः भक्तिर्नैविहिता येषां॥ व्रतानि व्रतानिच सप्रियः श्री। पतिर्येषां तेस्तु भागवता नराः सदाचाररताः शिष्टाः सर्वभूत।

दयं पकाः अचय स्पृहा रागा वै। सदा भागवता हिते॥ एकादश स्कंधे सर्वभूतेषु यः पश्येद्भगव द्भाव मात्मनः भूतानि भगवत्या त्मन्येष भागवतोत्तमः न यस्य स्वपरइति वित्तेष्वात्मनि वा भिदा सर्वभूत समः शांतः सवै भाग वतोत्तमः हरिधाम्नि गम्भीरोत्तरे॥ गृहीत्वापीन्द्रिये रर्थान् योनद्वेष्टि नकांक्षति विष्णोर्मायामिदंपश्य न्सवै भागवतोत्तमः बृहन्नारदीये शिवेच परमेशाने विष्णौच पर मात्मनि समबुद्ध्या प्रवर्तंते तेवै भागवतोत्तमाः स्कांदे येषां। भागवतं शास्त्रं सदा तिष्ठति सन्नि धौ पूजयंति च ये नित्यं तेस्तु भा गवतानराः येषां भागवतं शा स्त्रं जीवितादधिकंभवेत् महाभा भगवताः श्रेष्ठा विष्णुनाकथितान राः लैंगे भोजनाच्छादनं सर्वं यथा शक्त्यादरात्रियः विष्णुभक्तस्य स ततं स वै भागवतः स्मृतः गारु डे येन सर्वात्मना विष्णुः भक्त्याभा वो निवेशितः वैष्णवेषु कृतात्म त्वात्महाभागवतो हि सः बृहन्ना रदीय तुलसीकाननं दृष्ट्वा येनम स्कुर्वंतेनराः। तत्काष्ठांकितकर्णा


येनैवभागवतोत्तमाः॥ तुलसी। गंधमाघ्राय संतोषं कुर्वते तथा तन्मूल मृत्तिका येषां तेवै भागव तोत्तमाः सत्कथा श्रवणे येषां। वर्तते सात्विकी मतिः तद्भक्ति॥ सभक्ताश्च तेवै भागवतोत्तमाः॥ स्कांदे मत्कथां कुर्वते यस्तु मत्क थांच शृणोति च हृष्यते मत्क थायांच सवै भागवतोत्तमः। बृ हन्नारदीये मन्मानसाश्च मद्भक्ता मद्भक्तजन लोलुपाः मन्नाम श्रव णासक्ता स्तेवै भागवतोत्तमाः॥ येऽभिनन्दन्ति नामानि हरेः शृण्वंति हर्षिताः रोमांचित शरीराश्च ते। वै भागवतोत्तमाः पद्मेषा मु॥ द्यं दृष्ट्वा येऽभिनंदंति मानवाः हरिनाम परा ये च तेवै भागव तोत्तमाः स्कांदे येऽर्चयंति॥ सदा विष्णुं यज्ञेशं वरदं हरिं॥ देहिनः पुण्यकर्माणः सदा भागवता हिते लैंगे विष्णुतेजे शुभा। न्येव करोति स्नेह संयुतः प्रति। मांच हरेर्नित्यं पूजयेत प्रयता॥ त्मवान् विष्णुः भक्तः स विज्ञेयः क र्मणा मनसा गिरा नारायणपरो नित्यंभूपभागवतोहिसः॥ पा द्मोत्तरखंडे तापादिपंच संस्का।

री तवेज्या कर्म्मकारकः श्रेष्ठएव
विहितो महाभागवतो हि सः
एकान्तेन सदा विष्णौ यस्माद्देवे प
रायणाः तस्मादेकान्तिनः प्रोक्ता
स्तद्भागवत चेतसः एकादशस्कन्धे
ज्ञात्वा ज्ञात्वाथ ये वै मां यावान्।
यश्चास्मि यादृशः भजन्त्यनन्यभा
वेन तेवै भागवता मताः नकाम
कर्म्मबीजानां यस्य चेतसि सम्भवः
वासुदेवैकनिलयः सवै भागवतो
त्तमः स्कन्दे यस्य कृष्णगतस्या
पि केशवे रमते मनः नविष्णुना
च भक्तिर्वै सवै भागवतो नरः
आपद्गतस्य यस्येह भक्तिरव्यभि
चारिणी नान्यत्र रमते चित्तं सवै
भागवतो नरः हरियोगेश्वर ।
विसृजति हृदयं नयस्य साक्षाद्ध
रिरवशाभिहितोप्यघौघनाशः प्र
णय रसनया धृताङ्घ्रिपद्मः सभव
ति भागवत प्रधान उक्तः मध्यमा
माहतेनैव ईश्वरे तदधीनेषु बा
लिशेषु द्विषत्सु च प्रेम मैत्री कृपोपे
क्षायः करोति स मध्यमः कनिष्ट
माह अर्च्चायामेव हरये पूजां यः
श्रद्धये हते न तद्भक्तेषु चान्येषु
स भक्तः प्राकृतः स्मृतः इतिश्री
हरिभक्तिविलासे ९ विलासः ॥

भागिकं त्रि सहस्रिकमुद्धारि सरी
टाका इत्यादि भाषा यथा भागो
हृद्यादि रस्मिन् भागं भागिकं
शतं भाग्या भागिका विंशतिः
इतिसिद्धान्तकौमुदी ॥ ॥
भागिनेयः पुं भगिनीपुत्रः तत्
पर्य्यायः स्वस्रीयः २ इत्यमरः ॥
स्वस्रियः ३ इतिशब्दरत्नावली
सच मुख्यप्रतिनिधिः यथा ऋ
त्विक्पुत्रो गुरुर्भ्राता भागिनेयो।
ऽथविट्पतिः एभिरेव हुतं य
त्तद्धुतं स्वयमेव हि इति ति
थ्यादितत्वं ॥ तस्यावश्यपोष्य ॥
त्वं यथा पितृव्य गुरु दौहि
त्रान् भर्त्तुः स्वस्रीयमातुलान् पू
जयेत् कव्यहव्याभ्यां वृद्धानाथाति
थीन् स्त्रियः इत्यपुत्रधनाधिकारे
दायभागः भागिनेय दत्तकर
णं शूद्रस्यैवनतु द्विजातीनां यथा
दौहित्रो भागिनेयश्च शूद्रैस्तु।
क्रियते सुतः ब्राह्मणादि त्रयेना।
स्ति भागिनेयः सुतः क्वचित् इति
दत्तकचन्द्रिकायां शौनक वचनं
॥ तत्कारणं मातुलस्य पतित्व
शौचे यथा पतितो योनिसंबं।
येनां यत्र तत्पेत्र योनिसंबं।
पेनात् स्वस्रीय पितृस्वस्रीय भागि।

नेयेषु ॥ मातुलस्यापि भागिनेय
स्यापि पतित्वशौच इतिशुद्धि।
तत्त्वं ॥ ॥
भागिनेयी स्त्री भगिन्याः स्यापत्यं
भाग्नी इति भाषा भगिनीशब्दात्
स्त्र्यपत्यार्थे स्त्रेय पित्रादीय प्र
त्यय निष्पन्ना इति व्याकरणं ।
भागीरथी स्त्री गंगा इत्यमरः ।
पृथिव्यां तस्यावतरणं यथा सत
उवाच ततो भगीरथो राजा त
पः परम दुस्तरं नीत्वा संतोषया।
मास उमाकान्तं महेश्वरं धारणा
यानमस्या ते जगाम ब्रह्मणोऽ
न्तिके ततो भगीरथः प्राह गंगाब्रह्म
विसृज्यतां स तच्छ्रुत्वा वचस्तस्य
संमान्य विष्णुपदीं गंगां प्रस्था
पयामास सा पतन्तीरूपेणाऽन्ति
कात् वायुना प्रेर्य्यमाणापि आ
काश पथगा नदी विख्याता का
प गंगेति तत्र संसेविता गजैः
विलोः पदं समायाता तस्माद्विष्णु
पदीतिसा पूज्यमाना सोः सि
द्धैर्मुनिविद्याधरोरगैः ॥ स्वरा
लयमनुप्राप्ता तस्माद्देवनदीत्यपि
तस्मात् प्रपतितागंगा शंभोः
शिरसि संस्थिता धृते केनैव।
तेनापि शंभुनायोगमायया दि

व्ये वर्षशते साग्रं पुनरारधितेन
वै मुक्ता भगीरथेनैव मलहन्त्री।
विनिर्गमं जटा कूटात् प्रपातोर्द्धं।
मेरो कस्मात्ततोऽगमत् देवैः
परिवृता गंगा हेमकूटंच पर्वतं
मंदरंचैव कैलासं हिमवंतंच प
र्वतं नामायातां तरोधाय स
लीनो नाम दानवः पार्वते रूप
मास्थाय वर्षाणां तु शतैर्हिज्ञाः त
तो भगीरथो राजा गमयामास ।
कौशिकं स तदृष्टः प्रददौ मार्गं।
वाहनेनं भगीरथः तमारुह्यगा।
मन्तत्र यत्र रुद्धा भगीरथी तेन।
नागेन ते दैत्ये सेविरायेन स
गतः शानयातां समायाय मूर्द्धि।
नैरावणो गजः महीतले समा
येरे स्यावत्रागमात्कर्यं तस्माद्या।
वरनाद्विपा प्रथमागम्वरं वां सा
वयंतीमहीं गंगा जह्नोराश्रम म
भ्यगात् तां दृष्ट्वा पपौ सो
ऽपि प्रसन्या कुपितो मुनिः जह्नो
नाशितां दृष्ट्वा गंगा त्रिपथगां त
दी सशोक स्तोषयामास जह्नुं।
भगीरथो मुनिं मुमोच कर्णरन्ध्रे
ण गंगां सदक्षिणेनतां यतस्मा
ज्जाह्नवी ख्यातास्तनास्यमुनेस्तथा
ततःसावितिधान देशान्सर्वतां ॥




स्य तथाश्रमात् संप्लाव्य वारिणा
भूयो जगाम पूर्वसागरं यत्र त
त्तोदकं तस्या तस्याः पुण्यमभूद्धि
ताः स्वतीर्थं सर्वमर्त्यानां तारणं
पाप नाशनं ततः संपूरयामास
समुद्रं सर्वतो दिशं यत्र साग
रैः सर्वे ततः पातालमाविशत् ।
सागराणां ततो स्वस्मात्संप्लाव्य
वारिणा ततः देवैः संपूज्यमा ।
नापि जगाम ब्रह्मणोऽन्तिकं ज
ग्मु सागराः स्वर्गं ब्रह्मणोपहृतास्त
ये एतका स्ते विनिर्दिष्टा गंगाया
ब्रह्मणास्वयं भवद्भिः रतिशं नृगां
कर्तव्यं विघ्न नाशने सूतउवाच ॥
एतद्वः कथितं सर्वं यथावतरणं
दिवः गंगायाश्चैव माहात्म्यं श्रु
यतां गदतो मम इत्याद्ये व
न्हिपुराणे गंगावतरणं नामाध्यायः
॥ तस्याः मुख्य नामानि यथा
वराहउवाच धर्मस्तद्रवरूपेण ब्रह्म
णा निर्मितः पुरा यो हि गंगेति विख्या
ताः स्तुतलोके बसेयरे कीर्तनीय
सहस्रैस्तु सख्या मुखैः सुविस्तरैः
यानि नामानि मुख्यानि तानि वक्ष्या
म्यनुक्रमात् गंगा भागीरथी पुण्या
जाह्नवी सुरनिम्नगा विष्णुपादाब्जसं
भूता शंभोः शिरसि संस्थिता ।

सुमेरुशृंगसंभूता हिमाचलकृता
श्रया शांभवं कुंदेंदु धवला महापा
तकनाशिनी नदीश्वरी त्रिपथगा
वैष्णवी सागरप्रिया धर्मद्रवी भोग
वती विंध्यपाषाणदारिणी तमा
शांतिः प्रजाशांतिः पुण्यदा शुभ
काशिवा महानदी शतमुखी शुक्ला
मकर वाहिनी ब्रह्महस्तात्विनिःसृता
सौम्यरूपाभिशोभना मुनिभिः
पूजिता सर्वैः सर्वैः देवैर्नमस्कृता
महायज्ञमयी देवी मर्त्यानां सुख
कारिणी सर्वत्र दुर्लभा गंगा त्रिभिः
स्थानैर्विशेषतः गंगाद्वारे प्रया
गेच गंगासागरसंगमे इदं स्तो
त्रं मयाख्यातं पूर्वमुक्तं स्वयंभुवा
यः पठेत् प्रातरुत्थाय तस्य नश्य
न्ति दुर्गतिः यत्पापं यौवने बाल्ये ।
कौमारे वार्द्धके च यत् तत्सर्वं ।
विलयं याति तोयस्थलवणं यथा
कीर्तिं प्रीतिं महालक्ष्मीमायुरारो
ग्य संततिं ददाति जाह्नवी तस्मै
सर्वभावेन माधवि इति वाराहे ।
सर्वपापप्रशमनं गंगास्तवः ॥
अपिच ब्रह्मोवाच श्रोतुमिच्छामि
देवेश लक्ष्मीकांत जगत्प्रभो वि
ष्णो विष्णुपदी स्तोत्र पापघ्नं पुण्य
कारणं श्रीनारायणउवाच शिव

संगीत संभूय श्रीकृष्णांगद्रवोद्भ
वा राधांगद्रवसंयुक्ता तां गंगां ।
प्रणमाम्यहं या जन्म सृष्टेरादौच
गोलोके रासमण्डले सन्निधाने
शंकरस्य तां गंगां प्रणमाम्यहं ॥
गोपैर्गोपीभिराकीर्णे शुभे
राधा महोत्सवे । कार्तिकीपूर्णि
मा जाता तां गंगां प्रणमाम्यहं ॥
कोटि योजन विस्तीर्णा दैर्घ्ये सप्त
गुणा ततः समावृता या गोलोकं
तां गंगां प्रणमाम्यहं षष्टि लक्ष ।
योजना या ततो दैर्घ्ये चतुर्गुणा
समावृता या वैकुण्ठं तां गंगां प्र
णमाम्यहं त्रिंशल्लक्ष योजना या
ततो दैर्घ्ये चतुर्गुणा आवृता ब्रह्म
लोकं यातां गंगां प्रणमाम्यहं ।
त्रिंशल्लक्षयोजना या दैर्घ्ये पंचगु
णा ततः आवृता शिवलोकं या तां
गंगां प्रणमाम्यहं लक्षयोजन ।
विस्तीर्णा दैर्घ्ये सप्तगुणा ततः आ
वृता ध्रुवलोकं यातां गंगां प्रणमा
म्यहं लक्षयोजनविस्तीर्णा दैर्घ्ये
शतगुणा ततः आवृता चंद्रलोकं
यातां गंगां प्रणमाम्यहं षष्टि ।
सहस्रयोजना या दैर्घ्ये दशगुणा त
तः आवृता सूर्यलोकं या तां
गंगां प्रणमाम्यहं लक्ष योजन

विस्तीर्णा दैर्घ्ये च षड्गुणा ततः
आवृता सत्यलोकं यातां गंगां ।
प्रणमाम्यहं दशलक्ष योजना ।
या दैर्घ्ये पंचगुणा ततः आवृता या
तपोलोकं तां गंगां प्रणमाम्यहं ।
सहस्रयोजनायामा दैर्घ्ये द
शगुणा ततः आवृता जनलोकं या
तां गंगां प्रणमाम्यहं । सहस्र
योजनायामा दैर्घ्ये सप्तगुणा ततः
आवृता या च कैलासं तां गंगां
प्रणमाम्यहं शतयोजन विस्तीर्णा
दैर्घ्ये दशगुणा ततः मन्दाकिनी ।
येन्द्रलोके तां गंगां प्रणमाम्यहं
पाताले या भोगवती वि ॥
स्तीर्णा दशयोजना ततो दशगुणा
दैर्घ्ये तां गंगां प्रणमाम्यहं ॥
क्रोशैकमात्र विस्तीर्णा ततः क्षीणा च
क्वचित् तितौ चालकनन्दा या
तां गंगां प्रणमाम्यहं सत्ये या क्षी
रवर्णा च त्रेतायां मिन्दुसन्निभा
द्वापरे चंदनाभा वा तां गंगां प्र
णमाम्यहं जलप्रभा कलौ या च ।
नान्यत्र पृथिवीतले स्वर्गे च नित्य ।
क्षीराभा तां गंगां प्रणमाम्यहं ।
यस्याः प्रभाव मतुलं पुराणे च
श्रुतौ श्रुते या पुण्यदा पापहर्त्री ।
तां गंगां प्रणमाम्यहं यत्तोय ।




कणिकास्पर्शः पापिनां वपिनामह
ब्रह्महत्यादिकं पापं कोटि ज
न्मार्जितं दहेत इत्येवं कथितं।
स्तवन गंगायपैकविंशतिः स्तो
त्रंएव परमं पापघ्नं पुण्यकारं।
कं नित्यं योहि पठेद्भक्त्या ॥
संपूज्य च सुरेश्वरीं अश्वमेध।
फलं नित्यं लभते नात्र संशयः
अपुत्रो लभतेपुत्रं भार्याहीनो।
नोलभेत्प्रियां रोगात् प्रमु
च्यते रोगी बद्धोमुच्येत बंधनात्
अस्पष्टकीर्त्तिः सुयशा मूर्खो भव
ति पंडितः यःपठेत्प्रातरुत्थाय ।
य गंगा स्तोत्र मिदं शुभं शुभं
भवेत्तस्य सम्यक् गंगास्नान फलंल
भेत इति गंगास्तोत्रं नारायणा।
उवाच भगीरथो ऽनेन स्तोत्रेण
स्तुत्वा गंगांच नारद जगाम तां
गृहीत्वा च यत्र नष्टाश्च सागराः
वैकुण्ठं ते ययुः स्तूर्णं गंगायाः
स्पर्शवायुना भगीरथेन सानीता।
तेनभागीरथी स्मृता इत्येवं कथितं
सर्वं गंगोपाख्यान मुत्तमं पुण्य
दं मोक्षदं सारं किंभूयः श्रोतु
मिच्छसि इति ब्रह्मवैवर्त्ते प्रकृति
खण्डे गंगोपाख्यान ८ अध्यायः
भागीरः पुं स्नतियाकरणकत्वे

मुनिविशेषः तत्पर्य्यायः शातल
प्यकः२ इतिजटाधरः ॥
भाग्यं क्ली प्राक्तनशुभाशुभक
र्मतत्पर्य्यायः दैवं२ दिष्टं ३ भा
गधेयं ४ नियतिः ५ विधिः ६ इ
त्यमरः प्राक्तनकर्म ७ भागः ८
भवितव्यता ९ इतिजटाधरः ॥
अदृष्टं १० इति शब्दरत्नावली ॥
फलान्मुखीभूत पूर्वदेहिक शु
भाशुभं कर्म इतिमलमासतत्वं
भागिकेत्रि इति सिद्धान्तकौ ॥
मुदी भागयोग्यंच ॥
भांगीनं त्रि भंगाक्षेत्रं तत् प
र्य्यायः भांग्यं२ इत्यमर हेम
चंद्रौ ॥
भाज त क पृथक्कृत्यां इति
कविकल्पद्रुमः अवभाजत्यन्नं भा
त्वरंगः इतिदुर्गादासः ॥
भाजनं क्ली पात्रं इत्यमरः ॥
योग्यं इति मेदिनी यः संवाद
यते नित्यं यो ऽभिवासं सि
तितति यस्य तमोनतपति दंडं
सोऽर्थस्यभाजनं इतिमत्स्य ॥
पुराणं आढक परिमाणं इति
वैद्यकपरिभाषा ॥
भाजितं त्रि पृथकृतं विभक्तं
॥ इति भाजधातोः कर्मणिक्तप्र

त्ययेननिष्पन्नं भागेक्ली ॥
भाजी स्त्री व्यंजनविशेषः अस्यत्र
भाजा इतिस्वीस्य टीकायां दुर्गा
दासः ॥
भाज्यं त्रि भागार्हं भाजनीयं
इति भाजधातोः कर्मणिण्यप्रत्य
येननिष्पन्नं ॥ ॥
भाटकः पुं क्ली व्यवहारार्थेदेन
शाकटादिलभ्यधनं भाडाइतिभा।
षा इतिहलायुधः अथगृहादि
भाटकं परभूमौ गृहं कृत्वा भा
टयित्वा वसेत्रयः स तद्गृहीत्वा
निर्गच्छेत्तृण काष्ठेष्टकादिक स्तो।
मं क्रित्वा वसित्वा त पर भूमावनि
च्छतः निर्गच्छेत्तृणकाष्ठानि नगृह्णी
यात्कथंचन कात्यायनः गृहवाप्या
पणादीनि गृहीत्वाभाटकेनयः।
स्वामिनो नार्पयेद्यावत्तावद्दाप्यः स
भाटकं वापीपरकृता प्रतिष्ठि
तेति विवत्तितं हस्त्यश्व गो ख
रोष्ट्रादीन् गृहीत्वा भाटकेन यः
स्वामिनो नार्पयेद्यावत्तावद्दाप्य :
सभाटकं हट्टमनुः यो भाट
यित्वा शाकटं नीत्वा नान्यत्राव्रजति
भाटं नदद्याद्दाप्यो ऽसौ वत्यूढ
स्यापि भाटकं शकटं दृष्टनौका
दे र्प्युपलक्षणं अवृढस्या वाहि

तस्यापि शकटादेः इति विवाद
चिंतामणिः ॥ ॥
भाणः पुं नाटकादिदशरूपकांतर्ग
तरूपकविशेषः इति हेमचंद्रः ॥
तस्यलक्षणादि यथा भाणः स्यात्
धूर्त्तचरितो नानावस्थान्तरात्मकः
एकांकएकएवात्र निपुणः पंडितो
विटः रंगे प्रकाशयेत स्वेनानु
भूत मितरेण वा संबोधनोक्ति।
प्रत्युक्ती कुर्य्यादाकाश भाषितैः
सचयेद्वीर शृंगारौ शौर्य्य सौभा
ग्यवर्णनैः तत्रेति वृत्त मुत्त पा
यं हतिः प्रायेण भारती॥ मुख।
निर्वहणे संधी लास्यांगानि दशा
पिच अत्राकाश भाषित रूपं।
परवचन मपि स्वयमेवानुवदन्नुत्त
रं प्रवृत्तेरे कुर्य्यात् शृंगार वीर
सौच सौभाग्य शौर्य्य वर्णनया।
सूचयेत प्राय ग्रहणात् कौशिक्या
पिवृत्ति र्भवति उदाहरणं लीला
मधुकरः इति साहित्यदर्पणे ६
परिच्छेदः ॥ ॥
भाण्डं क्ली पात्रं वणिङ्मूलधनं।
भूषा अश्वभूषा इतिमेदिनी।
नदीकूलद्वयमध्यं इति हेमचंद्रः
भेंडाबुद्धिः भोंडामि इतिभाषा
इत्यजयपालः ॥ अवाजदे ॥



विकं नष्टं भांडं दापयन्तु वाहकः ।
प्रस्थान विघ्नकृच्चैव दाप्यो द्विगुणां भृतिं भांडं व्यसन मागच्छेत यदि वाहक दोषतः दाप्यो यत्तत्र नश्येत्तु दैवराजकृताद्दृते इति मिताक्षरायां नारदः ॥
भांडः पुं गर्दभांडवृक्षः इति शब्दचंद्रिका ॥
भांडपुटः पुं नापितः इति जटाधरः ॥
भांडपुष्पः पुं सर्पविशेषः तत्पर्य्यायः कौक्कुटिकंदलः २ इति त्रिकांडशेषः ॥
भांडागारः पुं गृहविशेषः भांडार इति भाषा तत्पर्य्यायः मल्लरः २ इति शब्दमाला ॥
भांडारीन पुं भांडागाराध्यक्षः भांडारी इति भाषा यथा त्यजेत्तु स्त्रियः कामी विद्यार्थी दृषिका । रक्षः भांडारी च प्रवासी वस समसमाद्व्यवोधयेत् इति व्यवहारप्रदीपः ॥ ॥
भांडि पुं नापितस्यशस्त्राधारः भांडि इति भाषा इति भांडि वाह शब्द दर्शनात् ॥ ॥
भांडिवाहः पुं नापितः इति शब्दमाला ॥ ॥
भाण्डिलः पुं नापितः इति शब्दमाला ॥ ॥
भांडीरः पुं वटवृक्षः इति जटाधरः ब्रजमंडलांतरे षोडश वटवनमध्ये द्वितीय वटवने यथा संकेत वट मादौ तु भांडीराख्यं वटं द्वयं इति नारायणभट्टकृत ब्रजभक्तिविलासः ॥ ।
भात क्ली प्रभाते इति शब्दमाला दीप्ते क्ली तद्वति त्रि ॥
भातिः स्त्री शोभा इति राजनिर्घंटः ॥
भालः पुं सूर्य्यः इति त्रिकांडशेषः दीप्तः इति संक्षिप्तसारोणादिवृत्तिः ॥
भाद्रः पुं वैशाखादिद्वादशमासांतर्गत पंचममासः भाद्रपद नक्षत्र युक्ता पौर्णमासी यस्मिन् मासे सः तत्पर्य्यायः नभस्यः २ प्रौष्ठपदः ३ भाद्रपदः ४ इत्यमरः ॥ स च द्विविधः सिंहस्थ रविकालः सौरः १ सिंहस्थ रव्यारब्ध शुक्लप्रतिपदादि दर्शांतो मुख्यचांद्रः कृष्णप्रतिपदादि पौर्णमास्यंतो गौणचांद्रः २ इति मलमासतत्वं ॥ ॥ तत्र जातफलं नभस्यमासे खलु जन्मयस्य धीरो मनोज्ञः सुवरांग


नानां रिपु प्रमाथी कुटिलोऽति मर्म्मा प्रपन्न भर्ता समभवेत्महासः इति कोष्ठीप्रदीपः तत्र गोः । प्रसवे नारदः भानोः सिंहगते चैव यस्य गोः संप्रसूयते मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः तत्र शांतिं प्रवक्ष्यामि येन सम्पद्यते शुभं प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥ ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः आहुतीनां घृताक्तानां मधुनेनैव जुहुयात्ततः व्याहृतिभिश्चायं होमः सोपवासः प्रयत्नेन दद्यात् द्विजाय दक्षिणामिति तथा सिंहराशौ गते सूर्ये गोः प्रसूतिर्यदा भवेत् पौषे च महिषी सूते दिवै वाश्वतरी तथा तदानिष्टं भवेत् किंचित् तच्छांत्यै शांतिकं चरेत् प्रस्यवामेति सूक्तेन तद्विष्णोरिति मंत्रतः जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकं सूक्तंजपविधानेन जुहुयाच्च तथाहुते । पीसूक्तेन ततः स्नायात् शांतिसूक्तं वापुनः मध्यरात्रौ निशीथे वा यदा गोः कंदते तदा ग्रामे वास्य गृहे वापि शांतिकं पूर्ववद्विशेत् । संक्रमणोत्तरषोडश दंडात्मकपुण्य कालाभ्यंतरे गोः प्रसवे विप्रसम्प्रदानक गोप्रदान पूर्वक शांतिः कार्य्या इति विशेषः तदतिरिक्त सिंहस्थ रवौ गोः प्रसवे शांति मात्रं कर्त्तव्यं न गोः प्रदानं निर्णयसिंधुस्थ वृत्तसागरग्रंथीय वचनात्तमीमांसा तु सारादिति अथ भाद्रकृत्यं तत्र जन्माष्टमी व्रत प्रमाणं तिथितत्वेऽनुसंधेयं श्रावणपौर्णमास्यनंतरित भाद्रकृष्णाष्टम्यां रात्रिमध्ये मुहूर्त्ताष्टमी रोहिणीयोगरूप जयंती लाभे तत्रैवोपवासः उभयदिने चेत्तदा परदिने ॥ जयंत्यलाभे तु रोहिणी युक्ताष्टम्यां उभयदिने रोहिणी युताष्टमी लाभे परदिने रोहिण्यलाभे तु निशीथ संबंधिन्यामष्टम्यां उभयदिने निशीथ संबंधे तदसंबंधे वा परदिने इति तत्र प्रयोगः पूर्वदिने संयमं विधाय तद्दिने कृत प्रातःस्नानादि शौचांतः ॐ सूर्य्यः सोम इति पठित्वा ॐ तद्विष्णोः परमं पद मित्यादि मंत्रेण नारायणं संस्मृत्य ॐ तत्सत् इत्युच्चार्य्य उदङ्मुखो दर्भहस्तः ताम्रपात्रे कुशतिलजलान्यादाय ॐ अद्य भाद्रे मासि कृष्णे पक्षे अष्टम्यां तिथौ

अमुकगोत्रः श्रीअमुकदेवशर्म्मा
विष्णुलोकप्राप्तिकामः श्रीविष्णुप्री
तिकामो वा श्रीकृष्णजन्माष्टमीव्रतमहं
करिष्ये इति संकल्पयेत् यद्युप
वासदिने प्रातः सप्तमी तदाष्टम्यां
तिथ्यादिपत्र सप्तम्यां तिथ्यावारभ्य
इति वक्तव्यं ततः सामगस्तु ॐ
देवो वो द्रविणोदा पूर्णां विवष्ट्या
सिचं उद्वा सिंचद्ध्वमुपवा पृणद्ध्वमा
दिद्वो देव ओहते इति पठेत्
ॐ धर्माय धर्मेश्वराय धर्मपतये ध
र्मसंभवाय गोविंदाय नमो नमः
इत्युच्चार्य ॐ वासुदेवं समुद्दिश्य
सर्वपाप प्रशांतये उपवासं क
रिष्यामि कृष्णाष्टम्यां नभस्यहं ॥
अद्यकृष्णाष्टमीं देवीं नभश्चंद्र स
रोहिणीं अर्चयित्वोपवासेन भो
क्ष्ये ऽहमपरे ऽहनि एनसो मो
क्तुकामो ऽस्मि यद्गोविंदत्रियोनि
जं तन्मे मुंचतमां त्राहि पतितं ।
शोकसागरे आजन्म मरणं याव
द्यन्मया दुष्कृतं कृतं तत्प्रणाशय
गोविंद प्रसीद पुरुषोत्तम इति
पठेत् तत आह्निकं समाप्याहे
दिवे तदनु प्रतिमासु पटादिष्वा
आवाहन विसर्जन सहितं शाल
ग्रामे सुरादिष्वजले वा आवाहनं

विसर्जन रहितं पूजयेत् ततो
ध्यानं मां वापि बालकं सूर्मं प
र्यंके स्तनपायिनं श्रीवत्सवक्षः
पूर्णांगं नीलोत्पलदलच्छवि इति
ध्यात्वा श्रीकृष्णस्वागतं इति श्लोकेन
इदमासनं ॐ कृष्णायनमः इत्या
सनं दत्वा पठत् पाद्यं ॐ श्रीकृष्णा
यनमः ॐ यज्ञाय यज्ञेश्वराय यज्ञ
पतये यज्ञ संभवाय गोविंदायन
मोनमः इत्युच्चार्य इदमर्घ्यं ॐ कृष्णा
यनमः इदमाचमनीयं ॐ श्रीकृष्णा
यनमः ततो दधि मधु घृतात्मकं
मधुपर्कमानीय एष मधुपर्कः ॐ श्री
कृष्णायनमः इदमाचमनीयं ॐ श्रीकृ
ष्णायनमः लौकिक वैदिक शतप
थतोनुक परिमितमभ्यंजन जलमानीय
ॐ योगाय योगेश्वराय योगपत
ये योगसंभवाय गोविंदायनमो
नमः इदं स्नानीय जलं ॐ श्रीकृ
ष्णायनमः इदंवस्त्रं इदमाभरणं ।
एष गंधः इदं पुष्पं एष धूपः एष
दीपः इदं नैवेद्यं ॐ विश्वाय वि
श्वेश्वराय विश्वपतये विश्वसंभवा
य गोविंदायनमोनमः इत्यनेन नै
वेद्यं दद्यात् स्नापयेत ततो नमो
देवेभ्यो येनमः इति मंत्रेण श्रियं ।
पूजयेत ततः स्वगृह्योक्त विधिनाग्निं

संस्थाप्य हुत तिलाभ्यां ॐ धर्माय
धर्मेश्वराय धर्मपतये धर्मसंभवाय
गोविंदायनमोनमः स्वाहा । इत्य
नेनाष्टोत्तरशत मष्टाविंशति मष्टौ
वा जुहुयात् ततो गुडघृतेन वसो
र्धारां भित्तौ दद्यात् ततो नाडी
च्छेदं भावयेत् ॐ षष्ठ्यै नमः इति
षष्ठीं पूजयेत ततोभगवतः श्री
कृष्णस्य नामकरणान्नप्राशनचूडा
करणोपनयनोद्वाह संस्काराभाव
येत् ततः प्रणवादि नमोऽन्तेन ।
तन्नामभिः पूजयेत् ॐ देवक्यै ।
नमः एवं वसुदेवाय यशोदायै न
न्दाय रोहिण्यै चंडिकायै बलदे
वाय दक्षाय गर्गाय ब्रह्मणे इत्य
नेनयथाशक्ति पंचोपचारैः पूज
येत् ततः शंखेन कुशपुष्पचंदन
लाजान्यादाय भूमौ जानुनी स्थाप
यित्वा ॐ क्षीरोदार्णव संभूत अत्रिने
त्र समुद्भव गृहाणार्घ्यं शशांकेदं रो
हिण्या सहितो मम ॐ सोमाय ।
सोमेश्वराय सोमपतये सोम सं
भवाय गोविंदाय नमोनमः इत्य
र्घ्यं दद्यात् ततः प्रणाममंत्रो ॐ
ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां
पतये नमः नमस्ते रोहिणी ।
कांत सुधावास नमो ऽस्तुते नमो ।

मंडलदीपाय शिरोरत्नाय धूर्जटेः
कलाभिर्वर्द्धमानाय नमश्चंद्राय चार
वे ततश्च अनंतं वामनं शौरिं ।
वैकुंठं पुरुषोत्तमं वासुदेवं हृ
षीकेशं माधवं मधुसूदनं वराहं
पुंडरीकाक्षं नृसिंहं दैत्यसूदनं ॥
दामोदरं पद्मनाभं केशवं गरुड ।
ध्वजं गोविंदमच्युतं देवमनंत म
पराजितं अधोक्षजं जगद्बीजं ॥
सर्गस्थित्यंतकारिणं अनादि निध
नं विष्णुं त्रिलोकेशं त्रिविक्रमं ना
रायणं चतुर्बाहुं शंखचक्रगदाधरं
पीतांबरधरं नित्यं वनमाला वि
भूषितं श्रीवत्सांकं जगत्सेतुं ॥
श्रीकृष्णं श्रीधरं हरिं प्रपद्येऽहं ॥
सदादेवं सर्वकाम प्रसिद्धये इति
स्तुः ततः प्रणमेत् प्रणमामि स
दादेवं वासुदेवं जगत्पतिं त्राहि
मां सर्वदेवेश हरे संसार सागरा ॥
त् ततः प्रार्थयेत् ॐ त्राहि मां ।
सर्वपापघ्न दुःख शोकार्णवाद्धरे
सर्वलोकेश्वर त्राहि पतितं मां
भवार्णवे देवकीतनय श्रीश हरे
संसारसागरात् त्राहि मां सर्वदुःखः ॥ मार
खरोगशोकार्णवाद्धरे दुर्गतं ॥
त्रायसे विष्णो येस्मरंति सकृत् सकृत
सोऽहं देवातिदुःखेन त्राहि मां ॥



दुःखसागरात् पुष्कराक्ष निमग्नो ऽ
हं मायाविताने सागरे ऽहिमां
देवदेवेश त्वत्तो नान्यो ऽस्तिरक्षि
ता इति प्रार्थयेत् यद्बाल्ये यच्च
कौमारे वार्द्धके यच्च यौवने तत्
पुण्यं वृद्धिमायातु पापं हर ह
लायुध इति वदेत् ततो नृत्यगीत
वादित्रस्तवैः कालं नयेत् प्रादि
ने प्रातः स्नानादिकं कृत्वा भगवंतं
श्रीकृष्णं यथाविधि संपूज्य उग्रोया
स्य महोत्सवः कार्यः ततो ब्रा
ह्मणान् भोजयेत् तेभ्यो दक्षिणां ।
दद्यात् सुवर्णादि यत्किंचिदिष्टं त
मं श्रीकृष्णो मे प्रीयतामिति ॐ
यं देवं देवकी देवी वसुदेवादजी
जनत् भौमस्य ब्रह्मणो गुप्त्यै तस्मै
ब्रह्मात्मने नमः सुब्रह्मवासुदेवाय
गो ब्राह्मण हिताय च शांतिरस्तु
शिवं चास्तु इत्युच्चार्य विसर्जयेत्
ततोवोपवास पारदिने तिथिनक्ष
त्रयोरवसाने पारणं यदा तु महा
निशायाः पूर्वमेकतरस्यावसानं म
न्यतरस्य महानिशायां तदनंतरं वा
तदेकतरावसाने पारणं यदा तु
महानिशाया मुभयस्थितिः तदोत्स
वांते पारणं कुर्यात् तत्र मंत्रः ।
ॐ सर्वाय सर्वेश्वराय सर्वपतये सर्व

संभवाय गोविंदाय नमो नमः ॥
पारणानंतरं च समापन मंत्रः ॐ
भूताय भूतेश्वराय भूतपतये भूत
संभवाय गोविंदाय नमो नमः ॥
इत्यनेन व्रतं समापयेत् ॥
भाद्रशुक्ल पंचमीमधिकृत्य भविष्यो
त्तरे तथा भाद्रपदे मासि पंच ।
म्यां श्रद्धयान्वितः यस्त्वालिख्य नरो
भक्त्या कृष्णवर्णादि वर्णकैः पूजयेद्गं ध
धपुष्पैश्च सर्पिर्गुग्गुल पायसैः तस्य
तुष्टिं समायांति पन्नगास्तक्षकादयः
आसप्तमात् कुलात्तस्य न भयं स
र्पतो भवेत् तस्मात्सर्वं प्रयत्नेन ॥
नागान् संपूजयेन्नरः इयमेवाल ॥
ख्या नागपंचमीति वाचस्पति मिश्राः
आलेख्या नागाः कर्कोटकादयः ॥
पूर्वलिखिताः पूज्याव श्रावणपंचमी
विहितेतिबोध्यं ॥ अथ हरेः
पार्श्वपरिवर्तनं तत्र द्वादश्यां सं
धि समये नक्षत्राणामसंभवे श्रा
भाकाभिजितस्तेषु शयनावर्तनादिक
मिति ब्रह्मपुराणात् भाद्रशुक्लद्वाद
श्यां श्रवणमध्ययुक्तायां संध्यासम
ये द्वादश्या शुक्लाभावे एकादश्या
दिषु पादयोगं तदभावेपि द्वाद ॥
श्यां केवलायां वाकृताञ्जलिः सा
यं संध्यायां देवं संपूज्य ॐ वासु ॥

देव जगन्नाथ प्रायेयं द्वादशी तव
पार्श्वेन परिवर्तस्व सुखं स्वपिहि माध
व इति प्रांजलिः पठेत् त्वयि
(स्वमे) सुमे जगन्नाथजगत् भवेदिति ॥
प्रबुद्धे त्वयि बुध्येत जगत्सर्वं च
राचरं इत्यनेन पूजयेत् ॥
अथ सिंहार्के चतुर्थ्यां चंद्रदर्शन
प्रायश्चित्तं सिंहार्के मधिकृत्य
ब्रह्मपुराणे नारायणोऽभिशापस्तु
निशाकर मरीचिषु स्थितस्य चतुर्थीम
प्यपि मनुष्या नापनेष्यसः । अत
श्चतुर्थ्यां चंद्रेण प्रमादाद्दीक्षमानवः
पठेद्वात्रेयिका वाक्यं प्रांमुखो ।
वासुदेवमुखः अभिशापो मिथ्या
परीवाद विषयीभूतः सोऽभिशा
पः अद्यापि मनुष्यान पतेत्तु ।
ततश्च प्रांमुख उदङ्मुखो वा कुश
तिल जलान्यादाय ॐ अद्येत्यादि
सिंहार्क चतुर्थी चंद्र दर्शनजन्यपा
पक्षय कामो यात्रेयी वाक्यमहं
पठिष्ये इति संकल्प ॐ सिंहः
प्रसेन मवधीत् सिंहो जांबवता ह
तः सुकुमारक मारोदीस्तव ह्येष
स्यमंतकः इति विष्णुपुराणोक्तं धा
त्रेयीवाक्यं पठेत् ॥ अथानंत
व्रतं तच्च यदिने पूर्वाह्नलाभस्तदि
ने व्रतं उभयदिने चेत् परदिने ।

युग्मात् व्रतानुष्ठान विधिस्तपद्धतौ
ज्ञेयः अथागस्त्यार्घ्य दानं ॥
प्रमाणं तिथितत्त्वेऽनुसंधेयं ॥
सिंहस्य रवि कर्तव्यमेव सौर मा
सादरः कन्यार्क संक्रांति पूर्वदिन
त्रयाभ्यंतरे कृत स्नानादि कृताह्नि
कस्तिल कुश जलान्यादाय ॐ तत्स
दित्युच्चार्य ॐ अद्येत्यादि सर्वाभिल
षित सिद्धिकामोऽगस्त्य पूजनमहं
करिष्ये इति संकल्प शालग्रामे
जले वा दक्षिणामुखः पतन्पाद्यं ।
ॐ अगस्त्याय नमः सित पुष्पाक्षत
युक्तं जलं शंखेन गृहीत्वा इदमर्घ्यं ।
ॐ काश पुष्प प्रतीकाश अग्निमारुत
संभव मित्रावरुणयोः पुत्र कुंभ ।
योनेनमोऽस्तुते ॐ अगस्त्याय
नमः एव माचमनीय स्नानीय गंध
पुष्प धूप दीप नैवेद्यादिकं दद्यात् ।
ॐ आतापि र्भक्षितो येन वाता ॥
पीच महासुरः समुद्रः शोषितो ॥
येन स मेऽगस्त्यः प्रसीदतु इति
प्रार्थयेत् इतिकृत्यतत्त्वे ॥
भाद्रपदः पुं भाद्रमासः इत्यमरः
भाद्रपदा स्त्री पूर्वभाद्रपदानक्षत्रं ।
उत्तरभाद्रपदानक्षत्रं तत्पर्यायः ॥
प्रोष्ठपदा २ इत्यमरः ॥
भाद्रमातुरः पं सतीतनयः सत्या



स्तनये सोमान्तर वज्राङ्गमात्तरः
इतिहेमचंद्रः ॥
भानुः पुं सूर्य्यः किरणः अर्क
वृक्षः इत्यमरः प्रभुः ॥ राजा
इतिधरणिः हुत्वाहत पितृविशे
षः इति हेमचंद्रः ॥
भानुः स्त्री भानुमती इतिशब्दरत्ना
वली ॥ ॥
भानुफला स्त्री कदली इतिजटा
धरः ॥
भानुमती स्त्री विक्रमादित्यराज
पत्नी यथा वेदगुरोः प्रसादेनजि
ह्वाग्रे मे सरस्वती तेनाहं नृप
जानामि भानुमत्या स्तिलं यथा
इतिवररुचिः ॥
भानुमान् पुं सूर्य्यः इतिशब्द
रत्नावली दीप्तियुक्तेत्रि ॥
भानुवारः पुं रविवारः यथा।
अमावास्या द्वादशीच संक्रांतिश्च
विशेषतः एताः प्रशस्तास्तिथयो
भानुवार स्तथैवच अत्रस्नानं ज
पो होमो देवतानांच पूजनं।
उपवास स्तथा दान मेकैकं पा
वनंस्मृतं इतितिथितत्वेसर्व संवर्त्त
वचनं ॥
भानेमिः पुं सूर्य्यः इतित्रिकांड
शेषः ॥

भाम ङ क्रोधे इतिकविकल्पद्रुमः
ङ भामते इतिदुर्गादासः ॥
भामः पुं क्रोधः सूर्य्यः दीप्तिः
इतिमेदिनी भगिनीपतिः ॥
इतिशब्दरत्नावली ॥
भामकः पुं भगिनीपतिः इति
शब्दरत्नावली ॥
भामा स्त्री कोपनास्त्री इतिशब्द
रत्नावली
भामिनी स्त्री कोपनास्त्री इतिमरः
स्त्रीमात्रं इतिराजनिर्घंटः ॥
भामिनीविलासः पुं जगन्नाथमिश्र
पंडितराजकृत काव्यग्रंथविशेषः
तस्याद्यश्लोकोयं दिगंतेश्रूय ॥
ते मद मलिन गंडाः करटिनः करि
ण्यः कारुण्यास्पद मसमशीलाःख
लुमृगाः इदानीं लोके ऽस्मिन्नतु
लम शिखानां पुनरयं नखानां।
पांडित्यं प्रकटयतु कस्मिन्मृगप
तिः तस्यपुष्पिका इतिश्रीमत्
पंडितराज जगन्नाथ विरचिते।
भामिनीविलासे प्रास्ताविकः प्रथ
मोविलासः शृंगार वर्णनं द्विती
योविलासः श्रीकृष्ण गुणानुवर्ण
नं तृतीयो विलासश्च ॥
भामी त्रि क्रोधी इतिभामशब्दा
दस्त्यर्थे इन् प्रत्ययेननिष्पन्नं ॥

भारः पुं विंशतितुलापरिमाणं।
तत्र अष्टसहस्र तोलकात्मकमिति
यावत् इत्यमरः वीवधः विष्णुः
इति मेदिनी ॥ अविश्रामं
वहेद्भारं शीतोष्णंच न विंदति।
स संतोष स्तथानित्यं त्रीणि शि
क्षेत गर्दभात् इति चाणक्यं।
॥ गुरुत्वेच ॥
भारंडः पुं उत्तरकुरुदेशजशकुन
पक्षी इति पुराणं ॥
भारतं क्ली ग्रंथभेदः इति मे
दिनी तत्रव्यास प्रणीत लक्षश्लो
कात्मक महाभारत संज्ञकेति।
हासः तस्य श्रवणादि फलंयथा
भारतं शृणुयान्नित्यं भारतं प
रिकीर्त्तयेत् भारतं भवने यस्य
तस्य हस्तगतोजयः योगोशतं।
कनक शृंगमयं ददाति विप्रायवे
दविदुषे सबहुश्रुताय पुण्यांचभा
रतकथां शृणुयाच्चनित्यंतुल्यंफलं
भवति तस्यचतस्यचैव नवनीतं।
यथा दध्नो द्विपदां ब्राह्मणोयथा
ह्रदाना मुदधिः श्रेष्ठा गौर्वरिष्ट
चतुष्पदां यथैतानीतिहासानां।
तथा भारतमुच्यते यश्चैनं श्रा
वयेत् श्राद्धे ब्राह्मणान् पादयंततः
अक्षयमन्नपानं वैपितॄं स्तस्या।

पतिष्ठते इतिहास पुराणाभ्यां ॥
वेदं समुपबृंहयेत् विभेत्यल्प ॥
श्रुताद्वेदो मामयं प्रहरिष्यति ॥
कार्ष्णं वेद मिमं विद्वान् श्रावयि
र्थं मश्नुते भ्रूणहत्या कृतंचापिपा।
पं जह्यादसंशयं इतिमहाभा ॥
रतं ॥ तद्वृत्तांतो यथा ॥ ब्रह्मो
वाच भारतं संप्रवक्ष्यामि भारा॥
वतरणं भुवः चक्रे हंसो ऽयुध्यमा
नः पांडवादिनिमित्ततः विष्णुना।
अब्जजो ब्रह्मा ब्रह्मपुत्रोऽत्रिरत्रितः
सोम स्ततो बुधस्तस्मादुर्वश्यांतु पु
रूरवाः अस्मादायुस्तस्यपुत्रो ऽभू
द्ययातिर्भरतः कुरुः शांतनुस्तस्य।
वंशे ऽभूद्गंगायां शांतनोः सुतः
भीष्मः सर्वगुणैर्युक्तो ब्रह्मवैवर्त्तपा
रगः शांतनोः सत्यवत्यां च । द्वौ
पुत्रौ संबभूवतुः चित्रांगदस्त्व ग
धर्वैः पुत्रे चित्ररथो ऽवधीत् अ
न्यो विचित्रवीर्य्यो ऽभूत् काशिरा ॥
ज सुतापतिः विचित्रवीर्य्ये स्वर्या
ते व्यासाज्जात्तिवत्तो ऽभवत् ॥ धृ
तराष्ट्रो ऽम्बिकापुत्रः पांडुरम्बालि।
कासुतः भुजिष्यायोत्विदुरो गां
धार्य्यां धृतराष्ट्रतः दुर्योधन प्रमुखा
नामस्ति शतसंख्या महाबलाः पां
डोः कुंत्यांच माद्र्यांच पंचपुत्राः

प्रयाते युधिष्ठिरो भीमसेनो
ऽर्जुनो नकुलस्तथा ॥ सहदेवश्च
पांडवयो वैरं दैवयोगादभूत् वह
दुर्योधनेन वीरेण पांडवाः समप
द्रुताः दग्ध्वा जतुगृहे वीरास्ते मुक्ताः
स्वधियामलाः ततस्तपकवक्रायां ।
ब्राह्मणास्य निवेशने विप्रवेशा म
हात्मानो निहत्य बकासुरं ततः
पांचाल विषये द्रौपद्यास्ते स्वयंवरे
विज्ञाय वीर्य्य शुल्कां तां पांडवा
ऽप्युपेयिरे द्रोणभीष्मावमत्या च
धृतराष्ट्रः समानयत् अर्द्धं राज्यं ।
ततः प्रापा इंद्रप्रस्थं पुरोत्तमं ।
राजसूयं ततश्चक्रुः सभां कृत्वा यत
व्रताः अर्जुनो द्वारवत्यां तु सुभद्रां ।
प्राप्तवान् प्रियो वासुदेवस्य भ
गिनीं मित्रं देवकिनंदनं गांडी
वं नाम नहिर्य त्रिषुलोकेषु वि
श्रुतं अलभत् सायकांश्चैव तथा
भेद्यं च दंशनं सतेन धनुषा वीरः
पांडवो जातवेदसं तृप्तिमनीय ।
बीभत्सुः सर्वपार्थिववीर्य्यवान् रूपा
न् दिग्विजये जित्वा रत्नान्यादाय वे
ददौ युधिष्ठिराय महते भ्रात्रे नी
तिविदे मुदा युधिष्ठिरोऽपि धर्म्मा
त्मा भ्रातृभिः परिवारितः जिष्णो
॥ ॥ ॥ ॥

दुर्योधनेनैव मायाद्यूतेन पापिना
कर्ण दुःशासन मते स्थितेन शकु
न्युर्मस्तपः स धौम्या द्रौपदी स
त्या मुनिवृंदाभिसंवृताः यथु वि
राट नगरं गुप्तरूपेण संस्थिताः
वर्षमेकं महाप्राज्ञा गोग्रहादि स
पालयन् ततो ज्ञाताः स्वकं राष्ट्रं ।
प्रार्थयामास राद्वताः पंचग्रामा
नर्द्धराज्यं वीरा दुर्योधनं नृपं ना
लब्धं तः कुरुक्षेत्रे युद्धं चक्रुर्वैलान्वि
ताः सप्ताक्षौहिणीभि र्दिव्याभिः स
मभिः परिवारिताः एकादशभि
र्युक्ता स्तेऽपि दुर्योधनादयः
आसी युद्धं स्वर्गमार्गदेवासुरवलो
पमं भीष्मः सेनापति रभवद्दौ ।
र्योधने बले पांडवानां शि
खंडीच तयो युद्धं बभूव दशाहा
न्यै महाघोरं दशरात्रे शराशा
निः शिखंडार्जुन वाणैश्च भीष्मः
शरशयिनस्थितः उत्तरायण मीप्सा ।
यात्मा देवं गदाधरं उक्ताय
स्मीन् बहून् धर्मान् सर्पषिता पित्
न्बहून् ध्यानं देवपदे लीनो विमले
शुक्ल किल्विषे ततो द्रोणो यथो
योद्धुं धृष्टद्युम्नेन वीर्यवान् स्थितानि
पंच तद्युद्धमासीत् परम दारुणं ।
॥ ॥ ॥ ॥

य एते पृथिवीपालास्ततः पार्थास्वि
सागरे शोकमासाद्य पुत्रेण द्रो
णोऽपि स्वर्गमासपात् ततः कर्णो
यथा योद्धुमर्जुनेन महात्मना दिन
द्वयं महद्युद्धं कृत्वा पार्थास्वसाग
रे निमग्नः सूर्य्यलोकं ततः प्रा
प स वीर्य्यवान् ततः शल्यो यथो
योद्धुं धर्मराजेन धीमता दिना
र्द्धेन हतः शल्यो वाणै र्ज्वलनसन्नि
भैः दुर्योधनोऽथ वेगेन गदा
मादाय वीर्य्यवान् अभ्यधावत वै
भीमं कालांतक यमोपमं अथ
भीमेन वीरेण गदया विनिपाति।
तः अश्वत्थामा ततो द्रौणिः सर्वं सै
न्यं ततो निशि जघान वाहुवीर्य्य
पितृवध मनुस्मरन् धृष्टद्युम्नं जघा
नाथ द्रौपदेयांश्च वीर्य्यवान् द्रौ
पद्यां रोदमानायां अश्वत्थामः शि
रोमणिं ऐषीकास्त्रेण तं जित्वा
जग्राहार्जुन उत्तमं युधिष्ठिरस्त्वथा
ध्यास्य स्त्रीजने शोकसंकुले स्ना
त्वा संतर्प्य देवांश्च पितृनथ पिता
महात् आश्वासितोऽथ भीष्मेण
राज्यं चैवाकरोन्महत् विस्मीजे।
ऽश्वमेधेन विधिवद्दक्षिणावता रा
ज्यपरिक्षितं स्थाप्य यादवानां वि
नाशनं श्रुत्वा तम्सौ स्थलराजा ज

मा नाम सहस्रकं विलोः स्वर्ग म
गामाद्य भीमाद्यै श्चान्यैश्च युत ।
इति गारुडे १५ अध्यायः ॥
वर्षभेदः इतिमदिनी नत्र ज
म्बुद्वीपस्य नववर्षान्तर्गत नवमवर्षे
नहिवर्णं यथा उत्तर यत् समु
द्रस्य हिमाद्रे श्चैव दक्षिणं वर्षं ।
तद्भारतं नाम भारती यत्र संततिः
नवयोजन साहस्रो विस्तारोऽस्य ।
महामुने कर्मभूमि रियं स्वर्ग मप
वर्गंच गच्छतां महेंद्रो मलयः
सह्यः शुक्तिमानृक्षपर्वतः विंध्य
श्च पारिपात्रश्च सप्तात्र कुलपर्व ।
ताः अतः संप्राप्यते स्वर्गो मु
क्तिमस्मात् प्रयांति वै तिर्य्यक्त्वं ।
नरकंचापि यांत्यतः पुरुषामुने ॥
इतः स्वर्गश्च मोक्षश्च मध्यंचांतश्च
गम्यते नखल्वन्यत्र मर्त्यानां कर्म
भूमौ विधीयते भारतस्यास्य ॥
वर्षस्य नव भेदास्त्रिशाम्य इंद्रद्वी
पः कशेरुश्च ताम्रपर्णो गभस्तिमान्
नागद्वीप स्तथा सौम्यो गांधर्व ।
स्त्वथ वारुणः अयंतु नवम स्तेषां ।
द्वीपः सागर संवृतः योजनानां ॥
सहस्रंतु द्वीपोऽयंदक्षिणोत्तरात्
पूर्वे किराता यस्यांते पश्चिमे य
वनाः स्थिताः ब्राह्मणाः क्षत्रिया

वैश्या मध्ये शूद्राश्च भागशः इज्या
युद्ध वणिज्याद्यै वर्त्तयंतो व्यवस्थि
ताः शतद्रु चन्द्रभागाद्या हिम
वत्पादनिः सृताः वेदस्मृतिमुखा
स्सान्याः पारियात्रोद्भवा मुने ।
नर्मदा सुरसाद्याश्च नद्योविंध्य वि
निःसृताः तापीपयोष्णी निर्विंध्या
प्रमुखा ऋक्ष संभवा गोदावरी ॥
भीमरथी कृष्णवेण्यादिकास्तथास
ह्यपादोद्भवानद्यः स्मृताः पाप भ
यापहाः कृतमाला ताम्रपर्णी प्र
मुखा मलयोद्भवाः त्रिसामाऋषि
कुल्याद्या महेन्द्रप्रभवाः स्मृताः
ऋषिकुल्या कुमार्य्याद्याः शुक्तिम
त्पाद संभवाः आसां नद्युपनद्यश्च
संत्यन्याश्च सहस्रशः तास्विमे कुरु
पांचाल मध्यदेशादयोजनाः पूर्व
देशादिकाश्चैव कामरूप निवासि
नः ओड्राः कलिंगा मगधा दक्षिणा
त्याश्च कृत्स्नशः तथाऽपरांता
सौराष्ट्राः शूद्राभीरा स्तथा र्बुदाः
मारुका मालवा श्चैव पारिपात्र ।
निवासिनः सौवीराः सैंधवा हूणा
शाल्वा शाकलवासिनः मद्रारामा
स्तथाम्बष्टाः पारसीकादयस्तथा आ
सां पिबंति सलिलं वसंति सरितां
सदा समीपतो महाभाग हृष्ट ॥

पुष्ट जनाकुलाः चत्वारि भारतेवर्षे
युगान्यत्र महामुने कृतं त्रेता द्वा
परंच कलिश्चान्यत्र नक्कचित् तप
स्तप्यंति यतयो जुह्वते चात्र यज्विन
दानानि चात्र दीयंते परलोकार्थ
मादरात् पुरुषै र्यज्ञपुरुषो ज
म्बुद्वीपे सदेज्यते यज्ञैर्यज्ञ प
तिर्विष्णुरन्यद्वीपेषु चान्यथा तत्रा
पि भारतं श्रेष्ठं जम्बुद्वीपे महामु
ने यतो हि कर्मभूरेषा ततोन्या ।
भोगभूमयः अत्र जन्म सहस्राणां
सहस्रैरपि सत्तम कदाचिल्लभते ।
जंतुर्मानुष्यं पुण्यसंचयात् गायं
ति देवाः किल गीतकानि धन्यास्तु ये
भारतभूमि भागे स्वर्गापवर्गास्पदमा
र्गभूते भवंति भूयः पुरुषाः सुरत्वा
त्कर्माण्य संकल्पित तत्फलानि सं ॥
न्यस्य विष्णौ परमात्मरूपे । अवा
प्यतां कर्म महीमनंते तस्मिल्लयं
ये त्वमलाः प्रयांति जानीम नैतत्
क्व वयं विलीने स्वर्गप्रदे कर्मणि दे
हबंधं प्राप्स्याम धन्याः खलु ते म
नुष्याये भारते नेंद्रिय विप्रहीनाः
नववर्षं तु मैत्रेय जम्बुद्वीपमिदंमया
लक्षयोजन विस्तारं संक्षेपात् ।
कथितं तव जम्बुद्वीपं समावृत्य ।
लक्षयोजन विस्तारः मैत्रेय वलया

कारः स्थितः क्षारोदधि र्बहिः इति
श्रीविष्णुपुराणे २ अंशे ३ अध्यायः
॥ अस्मिन् वर्षे जन्मकारणं तत्रै
जन्मेदं भारते लभेत् करोति ।
सफलं जन्म कृत्वा हरिकथामृतं
अर्चनं वंदनं मंत्र जपः सेवन मे
व च स्मरणं कीर्त्तनं शश्वद्गुणं श्र
वणमीप्सितं निवेदनं स्वस्य दास्यं ।
नवधा भक्ति लक्षणं करोति सफ
लं जन्म कृत्वैनानि च भारते ॥
अस्य पुण्यस्थलत्वं कर्मभूमित्वं परि
माणंच यथा कर्मणां फलभोगश्च
सर्वेषां सरस्वति नैव स्वर्गे न
पाताले नान्यद्वीपे कृतो कृतं ।
कृत्वा शुभाशुभं कर्म पुण्यक्षेत्रेच ।
भारते अन्यत्र तत्फलं भुंक्ते क
र्मी कर्मनिबंधनात् हिमालयादा
समुद्रं पुण्यक्षेत्रंच भारतं श्रेष्ठं ।
सर्वस्थलानांच मुनीनांच तपःस्थ
लं लब्ध्वा तत्र जन्म [illegible]जीवी वांछि
तो विष्णुमायया शश्वत्करोति वि
षयं विहाय सेवनं हरेः कृत्वा तत्र
महत्पुण्यं स्वर्गं गच्छति पुण्यवान्
गृहीत्वा स्वर्गकन्याश्च चिरं स्वर्गे प्र
मोदते स्वर्गमागच्छति नरो वि
हाय मानवी तनुं इति ब्रह्मवैवर्त्ते
॥ ॥ ॥ ॥


पुराणे श्रीकृष्ण जन्मखंडे ११५
अध्यायः ॥ भारतः पुं नटः इतिजटाधरः ।
अपि इति त्रिकांडशेषः ॥ भार
तस्यापत्यंच ॥ ॥
भारतवर्षं क्ली जम्बुद्वीपस्य नववर्षा
तर्गत वर्षविशेषः यथा हिमाह्वं ।
दक्षिणं वर्षं भरताय ददौ पिता ॥
तस्माच्च भारतं वर्षं तस्य नाम्ना म
हात्मनः अस्य नवभागा यथा ।
भारतस्यास्य वर्षस्य नवभेदान्नि ॥
बोधमे समुद्रांतरिता स्तेयो स्त्व ॥
गम्याः परस्परं इंद्रद्वीपः क ॥
सेरुश्च ताम्रवर्णो गभस्तिमान् ना
गद्वीपस्तथा सौम्यो गंधर्वो वारु ।
णस्तथा अयं तु नवमस्तेषां द्वीपः
सागर संवृतः योजनानां सहस्रं
वै द्वीपोऽयं दक्षिणोत्तरात् ॥
पूर्वे किराता यस्यांते पश्चिमे ॥
यवनाः स्थिताः ब्राह्मणाः क्षत्रिया
वैश्याः शूद्राश्चांतः स्थिता द्विज ।
इज्या युद्ध वणिज्याद्यैः कर्मभिः
कृतपावनाः तेषां सं व्यवहा ॥
रश्च एभिः कर्मभि रिष्यते । स्व
र्गापवर्ग प्राप्तिश्च पुण्यं पापंच वै
तथा महेंद्रो मलयः सह्यः शु
क्तिमानृक्ष पर्वतः विंध्यश्च पारि
॥ ॥ ॥ ॥ ॥

पात्रश्च समैवात्र कुलाचलाः ते।
षां सहस्रश स्यान्ये भूधराये समी।
पगाः विस्तारोच्छ्रायणो रम्या वि।
पुला श्चित्रसानवः कोलाहलः स।
वैभ्राजो मंदरो दर्दुराचलः वा।
तंधमो वैद्युतश्च मैनाकः सुरसस्त
था तुंगप्रस्थ नामगिरि गोधनः।
पांडुराचलः पुष्पगिरिश्च जयंतो च
रैवतो ऽर्बुद एवच ऋष्यमूकः स
गोमंतः कूटशैलः कृतः स्मरः
श्रीपर्वतश्चकोरश्च शतशोऽन्येऽन्या
पर्वताः तैर्विमिश्रा जनपदा म्लेच्छा
श्चार्याश्च भागशः तैः पीयंते।
सरिच्छ्रेष्ठा यास्ताः सम्यन्निबोध मे
गंगा सरस्वती सिंधु श्चंद्रभागा त
थापगा यमनाच शतद्रुश्च वितस्ते
रावती कुहूः गोमती धूतपापाच।
बाहुदाच दृषद्वती विपाशा देवि
का वंक्षु विशाला गंडकी तथा कौ
शिकी चापरा विश हिमवत् पाद
निःसृताः देव स्मृति वेत्रसिनी रा
त्रिन्नी सिंधु रेवच वेणाच स्पंदना
चैव सदानीरा महीनद्या पारा
चर्मन्वती लूपी विदिशा वेत्रवत्यपि
शिप्रा ह्यवंती वतथा पारिपात्राश्च।
पाश्रुताः शोणो महानद श्चैव।
नर्मदा सुरसा क्रिया मंदाकिनी द

शार्णा च चित्रकूटा तथापगा चि
त्रोत्पला तमसा करतोयापि
शाविका तथान्या पिप्पला श्रो
णी पिपाशा वंजुला नदी सुमेरु
जाशुक्तिमती मंगली त्रिदिवाकृ
तः ऋक्षपाद प्रसूताये तथास्याचे
गवाहिनी शिप्रापयोष्णी निर्विंध्या
तापीच निषधावती वेणावैतरणी
चैव शिनीवाली कुमुद्वती तोया
चैव महागौरी दुर्गाचांतः शिवान
धा विंध्यपाद प्रसूतास्ताः नद्यः पुण्य
जलाः शुभाः गोदावरी भीमरथी
कृष्णवर्णा तथापगा तुंगभद्रासुप
योगा वाह्या कावेर्यथापगा सह्य
पाद विनिष्क्रांता इमास्ताः सरिदुत्त
माः कृतमाला ताम्रपर्णी पुष्पजा
त्युत्पलावती मलयाद्रि समुद्भूता
नद्यः शीतजलास्त्विमाः पितृसो ॥
मर्षिकुल्याच इक्षला त्रिदिवालया
लांगलिनी वंशकरा महेंद्र प्रभवाः
स्मृताः ऋषिकाच कुमारीच मंदगा
मंदवासिनी कृपा पलाशिनी चैव
शुक्तिमत् प्रभवाः स्मृताः सर्वाः
पुण्याः सरस्वत्यः सर्वाः गंगाः समुद्रं
विश्वस्य मातरः सर्वाः सर्वाः पाप
हराः स्मृताः अन्याः सहस्रश श्चा
ल्पाः ह्यस्तनयो द्विजोत्तम प्रावृट्।

कालवहाः संति सर्वकालवहाश्च।
याः मत्स्याः कुशलाः कल्याश्चकुंत
लाः काशि कोशलाः अर्बुदाश्चकलिं
गाश्च समकाश्चवृकैः सह मध्य
देशे जनपदाः प्रायशोऽमी प्रकी
र्तिताः ॥ सह्यस्योत्तरेणैव यत्र
गोदावरी नदी पृथिव्यामपि कृत्स्ना
यां सप्रदेशो मनोरमः गोव।
र्द्धनपुरं रम्यं भार्गवस्य महात्मनः
बाह्लीका वाटधानाश्च आभीराः
कालतोयकाः अपरांताश्च शू
द्राश्च पह्लवा श्चर्मखंडिकाः गां।
धारा यवनाश्चैव सिंधु सौवीरमद्र
काः शतद्रुहा ललित्याश्च पारदा
हारमूषिकाः माठरा रत्नहनकाः
कैकया दशमानिकाः क्षत्रियो।
पनिवेशाश्च वैश्यशूद्रकुलानिच
काम्बोजा दरदाश्चैव बर्वरांगलौ
किकाः नीचाश्चैव तुषाराश्च प
ह्लवा वास्तनोदराः आत्रेयाः स
भरद्वाजः प्रस्थलाश्च दशेरकाः
लंपकाः स्तनकाराश्च चूलिका जा
ङ्गलैः सह अपथाश्चालिमद्राश्च कि
रातानांच जातयः तामसा हंस
मार्गाश्च काश्मीरास्तंगणास्तथा चू
लिका हूहुकाश्चैव ऊर्णादार्वास्तथै
वच एते देशास्तदीच्यास्तु प्रा

च्यान देशान्निबोधमे अंध्रवाका ॥
मुद्गरका अंतर्गिरिवहिर्गिराः तथा
प्लवंगा वंगेया मलदा मलवर्त्तिकाः
ब्रह्मोत्तराः प्रविजया भार्गवांगेय।
मर्दकाः प्राग्ज्योतिषाश्च मद्राश्च ॥
विदेहा स्ताम्रलिप्तकाः मल्ला मगध
गोमंदाः प्राच्या जनपदाः स्मृताः
अथापरे जनपदा दक्षिणा पथ
वासिनः पांड्याश्च केरला श्चैव।
चोलाः कुल्या स्तथैवच सेतुका मू
षिकाश्चैव कुमारा वानवासिकाः।
महाराष्ट्रा माहिषिकाः कलिंगाश्चै।
व सर्वशः आभीराः सहचैषीका।
आटव्याः शबराश्चैव पुलिंदा विं
ध्यमालेया वैदर्भा दंडकैः सह।
पौरिका मौलिका श्चैव अश्मका
भोगवर्द्धनाः नैलिकाः कुंतला।
आंध्रा उद्भिदा नालकारकाः ॥
दाक्षिणात्यास्त्विमे देशा अपरांता।
न्निबोध मे सौपारकाः कालतदा।
दुर्गालालीयकैः सह कारकरा लो
हजंघा वानेया राजभद्रका तास
लाः कोशलाश्चैव त्रैपुरा विदिशा।
स्तथा तुषारा स्तुंबराश्चैव पारदा
नैषधैः सह पुलिंदाश्च सुशी।
लाश्च रूपमां लोमसैः सह तथा
कुरुमिनश्चैव सर्वेचैव करस्कराः



नासिक्याश्च ये चान्ये येचै ॥
वांतर नर्मदा भारुकच्छाः समा हे
याः सर्वे सारस्वतैः सहकच्छीयाश्च
सुराष्ट्राश्च आवंत्या श्चार्बुदैः सह
इत्येते अपरांताश्च शृणु विंध्य नि
वासिनः मलजाश्च करूषाश्च मे
कला श्चोत्कलैः सह उत्तमर्णा ॥
दशार्णाश्च भोजाः किष्किंधकैः स
ह अनूपा स्तुंडिकेयाश्च वीरहोत्रा।
अवंतयः एते जनपदाः सर्वे विंध्य
पृष्ठ निवासिनः अतोदेशान् प्रव
क्ष्यामि पर्वताश्रयिणश्च ये। नि
हारा हंसमार्गाश्च कुपथा स्तंगणाः
खसाः कुन्ताः प्रावरणाश्चैव ऊर्णा
दर्वाः सहहूकाः त्रिगर्ता मालवा।
श्चैव किराता स्तामसैः सह कृत
त्रेतादिक श्चात्र चतुर्युग कृतो वि
धिः एतत्तु भारतं वर्षं चतुः संस्था
नसंस्थितं दक्षिणापरतो ह्यस्या
पूर्वेण च महोदधिः हिमवानुत्तरे
णास्य कार्मुकस्य यथा गुणः तदे
तद्भारतं वर्षं सर्वबीजं द्विजोत्तमा।
देवत्व ममरेशत्वं देवत्वं मर्त्या।
तांतथा मृग पश्वप्सरचरा योनी।
स्तद्वत् सरीसृपाः स्थावराणां च स
र्वेषामतो ब्रह्मन् शुभाशुभैः प्र
यांति कर्मभूर्ब्रह्मन्नान्य लोकेषु वि
द्यते देवानामपि विप्रर्षे सदै।
वैष मनोरथः अपिमानुष मा
स्यामो देवत्वात् प्रच्युताः क्षितौ।
मनुष्यः कुरुते तत्तु यन्न शक्यं सुरा।
सुरैः स्वकर्म निगड ग्रस्तैः स्वकर्म
तत्पणोत् सुकैः नकिंचित् क्रियते
कर्म सुखलेशोपबृंहितैः इति।
श्रीमार्कंडेय पुराणे भारतवर्षवर्ण
ननामाध्यायः अपिच। भारते
ऽप्यस्मिन् वर्षे सरिच्छैलाः संति।
बहवः मलयो मंगलप्रस्थो मैनाक
स्त्रिकूट ऋषभः कूटकैः कोल्लस
ह्योदेवगिरि ऋष्यमूकः श्रीशैलो वें
कटो महेंद्रो वारिधारो विंध्यः शु
क्तिमान् ऋक्ष गिरिः पारियात्रो द्रोण।
श्चित्रकूटो गोवर्द्धनो रैवतकः क
कुभो नीलो गोकामुख इंद्रकीलः
कामगिरि रितिचान्ये शतसहस्रशः
शैला स्तेषां नितंब प्रभवा नदान
द्यश्च संत्यसंख्याताः एतासा म
पो भारत्यः प्रजानामभिरेव पुनं
ती नामात्मना चोपस्पृशंति चंद्रव
शा ताम्रपर्णी अवटोदा कृतमाला
वैहायसी कावेरी वेणा पयस्विनी
शर्करावर्त्ता तुंगभद्रा कृष्णवेण्णा भी
मरथी गोदावरी निर्विंध्या पयोष्णी
तापी रेवा सुरसा नर्मदा चर्मण्वती

अंधः शोणाश्च नदौ महानदी वेद
स्मृति ऋषिकुल्या त्रिसामा कौशि
की मंदाकिनी यमुना सरस्वती दृष
द्वती गोमती सरयू रोधवती सप्तव
ती सुषोमा शतद्रु श्चंद्र
भागा मरुद्वृधा वितस्ता असिक्नी
विश्वेति महानद्यः अस्मिन्नेव वर्षे
पुरुषै र्लब्ध जन्मभिः शुक्ल लोहि
त कृष्णवर्णेन स्वारब्धेन कर्मणा दिव्य।
मानुष नारक गतयो बह्व्य आत्मन
आनुपूर्व्येण सर्वाह्येव सर्वेषां विधी
यंते यथा वर्णविधान मपवर्गश्चा।
पि भवति योऽसौ भगवति सर्वभूता
त्मनि अनात्म्येऽनिरुक्तेऽनिलयने।
परमात्मनि वासुदेवेऽनन्य निमित्त
भक्ति योग लक्षणो नानागतिनि
मित्ता विद्याग्रंथि रंधन द्वारेण यदा
हि महापुरुष पुरुष प्रसंगः एत
देव हि देवा गायंति अहो वतैषां।
किमकारि शोभनं प्रसन्न एषां स्वि।
दुत स्वयं हरिः ये र्जन्मलब्धं नृषु।
भारताजिरे मुकुंद सेवौप यिकं
स्पृहा हि नः किं दुष्करै र्मखैः क्रतु
भिस्तपोव्रतैर्दानादिभि र्वा द्युजये।
न फल्गुना यत्र नारायण पादपंक
ज स्मृतिः प्रमुष्टातिशयेंद्रियोत् स
वात् कल्पायुषां स्थान जयात् पुन
र्भवात् क्षणायुषां भारत भूजयो वरः
क्षणेन मर्त्येन कृतं मनस्विनः सं
न्यस्य संयांत्यभयं पदं हरेः ॥
न यत्र वैकुंठकथा सुधापगा न सा
धवो भागवतास्तदाश्रयाः न यत्र यज्ञे
शमखा महोत्सवाः सुरेश लोको
पि न वै स सेव्यतां प्राप्तानृजाति ॥
स्त्विह ये च जंतवो ज्ञानक्रिया द्रव्य
कलाप संभृतां नवै यतेरन्न पुन।
र्भवाय ते भूयो वनौका इव यांति
बंधनं यैः श्रद्धया बर्हिषि भागशो
हविर्निरुप्तमिष्टं विधि मंत्र वस्तुतः
एकः पृथङ्नामभिराहुतो मुदा गृ
ह्णाति पूर्णः स्वयमाशिषां प्रभुः स
त्यं दिशत्यर्थित मर्थितो नृणां नै
वार्थदो यत् पुनरर्थिता यतः स्वयं
विधत्ते भजता मनिच्छता मिच्छापि
धानं निज पाद पल्लवं यद्यत्र नः
स्वर्ग सुखावशेषितं स्विष्टस्य सूक्त
स्य कृतस्य शोभनं तेनाजनाभे स्मृ
ति मज्जन्मनः स्याद्वर्षे हरि र्यद्भज
तां शं तनोति श्रीशुक उवाच।
जंबुद्वीपस्य च राजन्नु पद्वीपानष्टौ है।
क उपदिशंति सगरात्मजै रश्वान्वे
षणेइमां महीं परितो निखनद्भि।
रुपकल्पितान् तद्यथा स्वर्णप्रस्थ।
श्चंद्र शुक्ल आवर्त्तनो रमणको मंद

हरिणः पांचजन्यः सिंहलोलंके।
ति एवं भव भारतोत्तम जम्बुद्वी
प वर्षविभागोयथोपदेश मुपव।
र्णितः इतिश्रीभागवतेमहापुरा
णे ५ स्कंधेद्वीपवर्ष वर्णनंनाम॥
ध्यायः ॥
भारती स्त्री वचनं सरस्वती ॥
पक्षिभेदः वृत्तिभेदः इति
मेदिनी ब्राह्मी। इति राज।
निर्घंटः शृंगारे कौशिकी
वीरे सात्वत्यारभटी पुनः रसे
रौद्रेच बीभत्स सेवृत्तिः सर्वत्र भा
रती भारतीवृत्तिंतु संस्कृत प्रा
यो वाग्व्यापारो नराश्रयः इति।
साहित्यदर्पणस्य ६ परिच्छेदः।
भारद्वाजं क्ली अस्थि इति हेम
चंद्रः ॥ ॥
भारद्वाजः पुं द्रोणाचार्य्यः ऋषि
भेदः इतिमेदिनी ॥ अगस्त्य
मुनिः इतिशब्दरत्नावली मंगल
ग्रहः इतिग्रहयज्ञतत्वं ॥ व्याघ्रा
टपक्षी बृहस्पतिपुत्रः इति
हेमचंद्रः ॥
भारद्वाजी स्त्री वनकार्पासी इति
शब्दरत्नावली ॥
भारयः पुं भारद्वाजपक्षी भारद्व
इतिभाषा इतिशब्दचंद्रिका ॥

भारयष्टिः स्त्री भारवहनदंडः कांक
इतिभाषा तत्पर्य्यायः ॥ विहं
गिका २ इत्यमरः ॥ ।
भारवं क्ली धनुर्गुणः इतित्रिकांड
शेषः ॥
भारवाहः पुं भारिकः इत्यमरः।
भारवाही स्त्री नीली इतिराज।
निर्घंटः
भारविः पुं कविविशेषः सच
किरातार्ज्जुनीयनामग्रंथकर्त्ता ॥
तत्पर्य्यायः शालपुष्पः २ इति
त्रिकांडशेषः॥ अस्यग्रंथस्य प्रथ
म श्लोको ऽयं श्रियः कुरूणाम
धिपस्य पालनीं प्रजासुवृत्तिं य
मयुंक्त वेदितुं सवर्णि लिंगी वि
दितः समाययौ युधिष्ठिरं द्वैतवने
वनेचरः ॥
भारहस्तः पुं कातीनामकगंधद्र
व्यं इति शब्दचंद्रिका ॥
भारहरः पुं भारवाहकः इति
भारहारः शब्दरत्नावली ॥
भारिकः पुं भारवाहकः ॥ भारि
इतिख्यातः तत्पर्य्यायः। भार॥
वाहः २ इत्यमरः भारहरः ३
भारहारः ४ इतिशब्दरत्नावली ॥
भारिः पुं सिंहः इति हेम
चंद्रः ॥ ॥

भारिटः पुं पक्षिविशेषः तत्
पर्य्यायः श्यामचटकः शैशिरः ।
२ कणमत्तकः ४ इतिराजनिर्घंटः
भारी पुं भारवाहकः इत्यरटी।
कायां रमानाथः भारयुक्ते त्रि
भारोही स्त्री भारवाहिका इति
मुग्धबोधव्याकरणं ॥
भार्गवः पुं परशुरामः शुक्रा।
चार्य्यः धन्वी गजः इतिमेदिनी
भारतवर्षमध्ये प्राच्यदेशां ॥
तर्गत देशविशेषः यथा वत्सा।
न्नराः प्रविजया भार्गवा स्तेयमर्द
काः इत्यादि मार्कंडेयपुराणं ।
भार्गवप्रियः पुं हीरकः शुक्राधि
ष्ठातृदेवताकत्वात् ॥
भार्गवी स्त्री पार्वती लक्ष्मी।
दूर्वा इतिमेदिनी नीलदूर्वा।
इतिशब्दरत्नावली श्वेतदूर्वा -।
इतिराजनिर्घंटः ॥
भार्गी स्त्री वृक्षविशेषः बामन
हाटि इतिभाषा तत्पर्य्यायः ।
गर्द्दभशाखी २ फंजी ३ अंगारव
ल्ली ४ ब्राह्मी ५ ब्राह्मणयष्टिः ६
बालमारि ७ भृंगजा ८ पद्मा ९ यष्टि
१० भारंगी ११ वातारि १२ काम
जित् १३ सुरूपा १४ भ्रमरेष्टा १५
शाकमाता १६ अस्यागुणाः क

टुत्वं तिक्त उष्णत्वं कास ।
श्वास शोफ व्रण क्रिमि दाह ज्वर
नाशित्वंच इति राजनिर्घंटः अ
न्यत्ब्राह्मणयष्टिका शब्दे द्रष्टव्यं।
भार्द्वाजी स्त्री भारद्वाजी वनकार्पा
सी इतिशब्दरत्नावली ॥
भार्य्या स्त्री वेदविधानेनोढा विधि
पूर्वक विवाहिता तत्पर्य्यायः ॥
पत्नी २ पाणिगृहीती ३ द्वितीया ४
सहधर्मिणी ५ जाया ६ दाराः ७
सधर्मिणी ८ धर्मचारिणी ९ दाराः
कलत्रं ११ कलत्रकं १२ इति
शब्दरत्नावली अस्याः प्रशंसा।
यथा सा भार्य्याया प्रियं ब्रूयात्
स पुत्रो यस्तु जीवति सजीवति
गुणोयस्य धर्मो यस्य सजीवति ॥
गुण धर्म विहीनो यो निष्फलंतस्य
जीवनं साभार्य्यायागृहे दक्षा
साभार्य्याया प्रियम्वदा साभार्य्या।
या पतिप्राणा सा भार्य्याया पति
व्रता नित्यस्नाता सुगंधा च नित्य
च प्रियवादिनी अल्पभुक् स्वल्पभा
षी च सततं मंगलैर्युता सततं।
धर्मबहुला सततंच पतिप्रिया।
सततं प्रियवक्त्री च सततं ऋतु।
कामिनी पितृदेवक्रियायुक्ता सर्व
सौभाग्य वर्द्धिनी यस्येदृशी भ



केऽप्यार्य्या देवेन्द्रो नसमानयः ॥
यस्यादोषा यथा यस्य भार्य्या वि
रूपाक्षी कश्मला कलहप्रिया उत्त
रोत्तरवादा स्यात् सा जरा न जरा
जरा यस्य भार्य्याश्रिता त्वन्यं पर
वेश्माभिकाङ्क्षिणी कुक्रिया त्यक्त
लज्जा च सा जरा न जरा जरा यस्य
भार्य्या गुणज्ञा च भर्त्तारमनुगामिनी
अल्पाल्पेन तु सन्तुष्टा सा प्रिया न
प्रिया प्रिया दुष्टा भार्य्या शठं मित्रं
भृत्याश्चोत्तरदायकाः ससर्पे च
गृहे वासो मृत्युरेव न संशयः ।
आपत्सु मित्रं जानीयात् युद्धे शूरं ।
धने शुचिं भार्य्याञ्च विभवे क्षीणे
दुर्भिक्षे च प्रियातिथिं इति गारु
डे नीतिसारे १०८ । १०९ अध्यायः
॥ बृहस्पतिरुवाच यस्य नास्ति
सती भार्य्या गृहेषु प्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा
गृहं सुशीला सुन्दरी शान्ता गता
यस्य गृहोदरात् अरण्यं तेन गन्त
व्यं यथारण्यं तथा गृहं भावानुर
क्ता वनिता हृता यस्य च शत्रुणा अर
ण्यं तेन गन्तव्यं यथारण्यं तथा गृहं
दैवेनापहृता यस्य पतिसाध्वी ॥
पतिव्रता अरण्यं तेन गन्तव्यं यथा
रण्यं तथा गृहं यस्य माता गृहे ।

नास्ति भार्य्या च प्रियवादिनी अर
ण्यं तेन गन्तव्यं यथारण्यं तथा गृहं
प्रिया शून्यं गृहं यस्य पुत्री स्त्री धन
बन्धुभिः अरण्यं तेन गन्तव्यं यथा
रण्यं तथा गृहं भार्य्या शून्याश्च वन
समाः सभार्य्याश्च गृहा गृहाः गृहि
णीञ्च गृहं प्रोक्तं न गृहं गृहमुच्य
ते बुधैः स्त्रीविहीनस्य दैवपै
त्रे च कर्म्मणि यदह्ना कुरुते कर्म्म न
तस्य फलभाग्भवेत् दाहिका शक्ति
हीनश्च यथा मन्दो हुताशनः प्रभा
हीनो यथा सूर्य्यः शोभाहीनो यथा
शशी शक्तिहीनो यथा जीवो यथा
त्मा च तनुं विना विनाधारं यथा पे
यो यथेशः प्रकृतिं विना न च शक्तो
यथा फलदो दक्षिणां विना ॥
कर्म्मिणो च फलं दातुं सामग्रीं मू
लमेव च विना स्वर्णं स्वर्णकारो यथा
ऽशक्तः स्वकर्म्मणि यथाऽशक्तः कुला
लश्च मृत्तिकाञ्च विना द्विजाः तथा
गृही न शक्तश्च सततं सर्व्वकर्म्मणि
भार्य्यामूलाश्च पुत्राश्च भार्य्यामूला
गृहास्तथा भार्य्यामूलं सर्व्वं शश्वत्
गृहस्थानां गृहे सदा भार्य्यामूलं ।
सदा हर्षं भार्य्यामूलञ्च मङ्गलं ।
भार्य्यामूलश्च संसारो भार्य्यामूल
च सौरतं यथा रथश्च रथिनां ॥

गृहिणाञ्च तथा गृहं सारथिस्तथ
यातेषां गृहस्थानां तथा प्रिया ।
सर्व्वरत्नप्रधानाच स्त्रीरत्नं दुष्कुला
दपि सा गृहीता गृहस्थेनैवेत्याह
कमलोद्भवः यथा जलं विना पद्मं
पद्मं शोभां विना यथा तथैव च
गृहं शश्वद् गृहिणी गृहिणीं विना
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५९
अध्यायः तस्यास्तस्याज्यात्वं ।
यथा अनपत्याञ्च युवतीं कुलजां
पतिव्रतां त्यक्त्वा भवेद्यः सन्न्यासी
ब्रह्मचारी यतीति वा वाणिज्ये वा
प्रवासे वा चिरं दूरं प्रयाति यः
तीर्थे वा तपसे वापि मोक्षार्थं ।
जन्मखण्डितं न मोक्षस्तस्य भव
ति धर्म्मस्य स्खलनं ध्रुवं अभिशापे
न भार्य्यायानारकञ्च परत्र च इहैव च
यशोपहानाशं इत्याह कमलोद्भ
वः इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खण्डे ११२ अध्यायः बहुभार्य्यस्यै
कस्या भजने दोषादि यथा गर
तो यत् तं शृणु नारद पित
मुखे दत्तम धर्म्मशास्त्रार्थं तत्
शृणुष्व निशापते बहुदाराः पुमान्
यस्तु रागादेकां भजेत् स्त्रियं स
पापभाक् स्त्रीजितश्च तस्य शौच
सनातनं यदुःखं जायते स्त्रीणां ।


स्वाम्य सम्भोगजं यथा न तस्य स
हस्रांशः खं किञ्चिदन्यद्धि विद्यते ।
सती ऋतुमती जाया यो न तोषयेत् पु
रुषाधमः ऋतञ्च स्वेष्टदेवकृता
हानस्य जायते भार्य्या स्वाधाव ।
शोत्रेयी तावत् कालं विरोधकं ।
तस्यास्तु संगमे किञ्चित् विहितं चा
पि नाचरेत् बहुभार्य्यस्य भार्य्या
णां मृत मेषन्तु नाशने नकिञ्चिद्वि
धेन कर्म शास्त्राणापि यदीरितं ।
तोषयेत् सततं भार्य्या विधिवत्
पाणि पीडिताः तासां दुष्टा त
कस्मात्तु मकस्मात्तु मतो ऽन्यथा
सन्तुष्टो भार्य्यया भर्त्ता भर्त्ता भार्य्या
तथैव च यस्मिन्नेव तत् कुले नित्यं
कल्याणं तत्र वै ध्रुवं यथा विरुद्धा ।
ते स्वामी सौभाग्यमदहृमया स
पत्नी संगतं कुर्यात् सा स्याद् द्वेष्या भ
वान्तरे इहापि लोके ऽवाच्यत्व ।
मधर्म्मञ्चापि विन्दति न च पितृकुले ।
स्वामिकुले तस्याः प्रमोदते वि
दहमाने पत्यौ यत् सपत्न्या वा प्र
वर्त्तते अतीव दुष्ट्वं भवति नरक
स्थानं हन्तयोः इति कालिकापु ।
राणे २० अध्यायः ॥ रजस्वला
भार्य्या अत्याज्या यथा न पिबेती
हया दारान् रजसा कलुषीकृतः

प्रेत पैत्र्याहने क्रुंडे रेतस्यांव।
पिवत्यसौ योजहाति रजः ह्रुत्वा
पित्र्यं स्वं तेजसानरः सोश्नाति।
फलमप्येवं योन दयाहर्त पुनः
योविभर्ति समत्रोवे बहूनां रज
सिस्थितः रेतः पिवति तन्मन्त्रो
पितृभ्यो ये ऽप्यपिंडदः यो
जहातिर्हि निर्द्दोषां भार्य्यांचैव र
जस्वलां श्रुद्धिमान् संवृतः ह्रुत्वाग
र्भस्यहरितं वसेत् इति वन्हि पु
राणं अस्या काल विशेष
गमन निषेधो यथा न दिवापि
स्त्रियं गच्छेत् कदाचिदिक्षयापिच
नपर्वस्सु न संध्यासु नायर्द्धं चत्वरावि
षु नोदक्यां न दिवागच्छेत् न सग
र्भां न व्रतस्थितां अभिगच्छेद वि
द्वान् य स्वरायुस्तय मेवच वंध्याष्ट
मे परित्याज्या नवमे च मृतप्रजा।
एकादशे स्त्रीजननी सद्यस्त्वप्रिय
वादिनी न वक्त्रे ऽभिगमं कुर्य्यात्
पाणिग्राही तु योषितः कुर्य्यात्तेत
पितर स्तस्य पतंति रेतसो भुजः
भार्य्याधीनं सर्वं पुंसां भार्य्याधी
नो यमागमः भार्य्या धीनामतो
त्यंति भार्य्या धीनः सखोस्य यः य
द्भार्य्या गृहं तत्र भार्य्या धीनं गृहे
वसेत् न गृहेण गृहस्थः स्यात् भा

र्य्याकथ्यते गृही इतिपराशर ॥
स्मृतिः ॥ ॥
भार्य्याटः पुं अन्यार्थे स्वस्त्रीदाता।
इतित्रिकांडशेषः ॥
भार्य्याजिकः पुं स्त्रीजितः हरिण
विशेषः इति मेदिनी ॥
भार्य्यापती पुं पतिपत्न्यौ नित्य
द्विवचनांतो ऽयंशब्दः तत्पर्य्या
यः दम्पती २ जम्पती ३ जायाप
ती ४ इत्यमरः ॥
भार्य्यारुः पुं शैलभेदः मृग
भेदः क्रीडया परभार्य्यायां पु
त्रोत् पादकः इतिमेदिनी ॥
भार्य्यावृत्तः पुं पतंगवृत्तः इति।
राजनिर्घंटः ॥
भालं क्ली दुर्वोर्द्ध्वभागः कपा
ल इतिभाषा तत्पर्य्यायः ललाट
१ अलिकं २ गोधि ४ इति राज
निर्घंटः तेजः इति मेदिनी ।
भालदर्शनं क्ली सिंदूरं इतिशब्द
चंद्रिका ॥
भालदृक् पुं शिवः इति हेम
चंद्रः ॥
भालांकः पुं करपत्रं शाकभेदः
रोहितमत्स्यः महालक्षण ॥
सम्पन्नपुरुषः कच्छपः हरः
इति मेदिनी ललाटचिह्नंच ॥

भाललोचनः पुं शिवः इति भा
लदृक्शब्ददर्शनात् ॥
भालूकः पुं भल्लूकः यथा भालु
भालूकः को भालुको भल्लोऽच्छभ
ल्लोऽच्छोऽपिभल्लूकः इति भर
तष्टतकोषांतरः ॥
भालूकः पुं भल्लूकः इत्यमरटी
भाल्लूकः कायांभरतः ॥
भावः पुं नाट्याक्तौविद्वान् सा
त्त्वविकारः सत्ता स्वभावः ॥
अभिप्रायः चेष्टा आत्मा ॥
जन्म इत्यमरः क्रिया लीला
पदार्थः विभूति बुधः जंतुः
इत्यादिः इति मेदिनी गो।
रवितः अभिनयोंतरः इति
त्रिकांडशेषः धात्वर्थे योनिः
उपदेशः इतिधरणिः सं।
सारः इत्यनेकार्थकोषः ॥
नवग्रहाणां शयनादि द्वादशचेष्टा
यथा शयनंचोपवेशञ्च नेत्र
पाणिः प्रकाशन गमनं गमनेच्छा
चसभायां वसति स्त्वया आग
मनं भोजनंच नृत्य लिप्साच कौ।
तकं निद्रा ग्रहाणां भावाश्च द्वा
दशैते प्रकीर्त्तिताः ॥ भा
वानयन क्रमो यथा यद्राशौवि।
घने खेट स्तेन नं परि पूरयेत ।

पुनरंशेन संपूर्य्य स्वर्त्तनत्र नियो।
जयेत् जातदंडं तथालग्न मेकी।
कृत्यसदा बुधैः रविणा भागहारे।
णशेषं कार्य्यं नियोजयेत् ॥ अं
शेन नवसंख्यया स्वर्त्तं ग्रहाणां ज
न्मनत्तत्र तयथा विषाख्या नल
तोयानि वैश्वं भगदेवतं पुष्या
पौष्णो यमः सर्पो जन्म भात्परंततः
क्रमात् कृत्तो राशिः यदा मेषे।
ग्रह स्तदा १ एकपूरित ग्रह संख्या
कः यदा वृषे ग्रह स्तदा २ द्विपूरि
तो ग्रह संख्यांकः कार्य्यः ॥
जाया सत मृत्यु लग्न सगृह त्रिको
स्थानस्थित पाप ग्रहाणां निद्राप्रा
यन भावयोः फलं निद्रायांचयदा
पापो जाया स्थाने शुभं वदेत ॥
यदि पापः शुभैः दृष्टो नाशुभेश्च ॥
कदाचन यदिवा शत्रुगेही स्याच्छय
नेयदि वेक्षितः तदा नारी समं
तस्य नाशो भवति निश्चितं शु
भाशुभे यदा दृष्टः शुभग्रह सम
न्वितः नारीच म्रियते तस्य प्रथमां
विशेषतः सत स्थाने स्थितः पा
पो निद्रायां शयने स्थिता। तदा
शुभं भवेत्तस्य नाच कार्य्याविचारा।
णा लग्नस्थाने स्वगृहे वा त्रिकोणगा
यदाभवेत् अपत्यस्यतदानाशो ॥




जायते नात्र संशयः शुभग्रहो
यदा तत्र क्रूरो वा यदि वेत्तिनः
तदा प्रथमापत्यस्य नाशोभवति
निश्चितं मृत्युस्थाने स्थितः पा
पो निद्रायां शयने पिता तदात्म
तो ऽपमृत्युः स्यात्तजतोऽपरतो।
ऽपिवा शुभ ग्रहो यदा तत्रमृत्यु
स्थाने ऽपिसंस्थितः तदाच मरणं
तस्य मृत्युस्थानेविशेषतः पाप
ग्रहैर्यदा दृष्टः शुभो वाशत्रुवीक्षि
तः तदा तस्य शिरश्छेदो शनिना
परिकीर्तितः एवं क्रमेण बोद्ध
व्यं ग्रहभावे सुबुद्धिना बलाबल
विचारेण जायते व शुभाशुभं।
ज्योतिर्विन्सु च सर्वेषु परिहारः
कृतोमया शयनादिक भावेषुत्ता
तव्यंचोपदेशतः एकादशे वा
वा दशमालये वा धनालये यदिवा
विलग्ने यायेन शुक्रो न शुभग्रहः
चेन्नथापि सिद्धिं महती वदंति
॥ फलं यथा मुंदाभिःपित्तशू
लीच जायते शयनेनरः १ उपवे
शे भवेच्छिल्पी धर्मावर्ताल्पधानरः
नेत्र पाणी भवेद्धीरो जलदो।
षो भवेन्नरः २ गुणवान् धार्मिक
श्चैव धनवांश्च प्रकाशने ४ ग
मनेच रवेर्जातः कृपणो धनसंयुतः

बहुभाषी लामी क्रोधी लब्धवित्त :
सदा भवेत् ५ अल्पभोक्ताशीघ्र
गामी दीर्घायु नृपवल्लभः शूरः
श्रीमान्कुलीनश्च गमनेच्छा भवेन्नरः
॥६ सभायांच रवेर्जातः खलो।
दातालामी भवेत् दयालुःपंडितो
धीमान् गुणवान् पंडितप्रियः ७
आगमने भवेन्मूर्खः कृतघ्नोधन
वान्भवेत् ८ भोजने भक्तको मो
सलुब्धो महावपु बली ९ नृत्या।
लिप्सा सुन्दरो वाग्मी पंडितस्यश
हाप्रियः १० उत्साही च महा
भोगी कौतुकी च दिवाकरे ॥
दाताभोक्ताप्रियः पुत्रकलत्राणांन
संशयः लिंगेदेहे करेचैव गुदे॥
रोगीनप्यैवच निद्रायांच भवेन्ना।
नोः क्रोधनो रक्तनेत्रकः १२ ॥
इति रवेः तंगात्कंग वला ॥
बलेवा बोध्यं शयने च विधौ
क्रोधी दरिद्रो बहुलंपटः १ ऽ
पवेश महारोगी धनवांश्च भवे
न्नरः २ नेत्र पाणौ नेत्ररोगी ॥
स्त्रीपरी बहुभाषकः क्रूरःखलोति
स्थूरश्च जायतेच विधौ तदा ३
प्रकाशनेविपानाशधनवांश्चभवे
न्नरः दत्तो बुद्धिमान्दाता च प
रार्थु लम्पटः ४ अरोगी वित्त


हाचैवक्रूरकर्मा धनान्वितः शिरो
रोगीहृतशूली जायते गमने विधौ
॥ ५ नानामति महाक्रोधी सम्भ्री
च भवेन्नरः गमनेच्छ विधौजातो
धनहीनो भवेन्नदा ६ दानाच धा
र्मिकश्चैव राजपात्रो भवेत् सदा
सभायांच विधौनित्यं जायते पुरु
षोत्तमः ७ नित्यक्रोधी महा
दुःखी भवेदागमने विधौ ८ भो
जनेच भवेल्लज्जा भक्तकश्च महास्वरः
९ योजातो नृत्यलिप्सायां गु
णवान् धार्मिकोभवेत् बहुपात्रो
धनीदाता जायते नात्रसंशयः १०
कौतुकेच भवेद्रोगी नानाविद्या।
स्ततत्परः उत्साहीच महाक्रो धी
जायतेच सुनिश्चितं ॥ ११ ॥ नि
द्रायां दद्रुरोगीस्यात् क्लेश पाप
हृतान्वितः पुत्रशो क महादुःखी
नित्यं भ्रमति मेदिनी १२ ॥ इति
चंद्रस्य शयने च कुजे जातो ॥
लक्ष्मी बहु कुरंगकः लामक्रोधीम
हाबलः कृपणो जायते नरः १
उपवेषो यदा भौमे जायतेच नरा
धमः धनवान क्रूरकर्मा चनिष्ठुरो
जाति वर्जितः २ नेत्रपाणौ च
योजातो ऽक्षिरोगी भवेन्नरः ॥
पुत्रदार धनेयुक्तोदारिद्र्येव द

स्यते ३ प्रकाशने कुजे जातो।
धनवान् पंडितः सुधीः नारी च प्रि
येत तस्य प्रथमा च विशेषतः ४ ॥
गमने च यदा जातः प्रवासी नित्य
दुःखितः शरीरे च भवेद्रोगः कं
डादि कुष्टदद्रुकः ५ प्रवासी ग
मनेच्छायां शत्रुरोगी भवेन्नरः धन।
हीनः कुकर्मा च जायते तितिजस्य
च ६ सभायांच यदा जातो धा
र्मिको बहुसम्पदः गुणवांश्च महा।
दाता शिरोरोगी भवेद्ध्रुवं ७ ॥
कुजस्यागमनेनित्यं लंग्नो भवति
नामधा कर्णरोगी पित्तशूली जा
यतेच नराधमः ८ भोजने भू
मिजस्यापि योजातो मांसलुब्धक :
हृत्कायो महाक्रोधी नित्योत ॥
साही धनान्वितः ९ कुजस्य नृत्य ॥
लिप्सायां योजातोधनवान् भवेत्।
दाता भोक्ता सदा मानी राजपा।
त्रो भवेन्नरः १० ॥ कौतुके क्षि
तिजस्यापि जातो भवति पंडितः
नाना धनेन संयुक्तो बहुपुत्रोहि।
भार्यकः ११ निद्रायां भूमि पुत्र
स्यधो जातो मूर्ख एवसः कलहो
वांधवैः सार्द्धं शोक क्लेशरुजान्वि
तः १२ इति मंगलस्य ॥ बु
धस्य शयने जातो धनवान्पंडितः



सदा संगक्लेशो भवेद्धापि खंजो।
भवतिनान्यथा १ ॥ उपवेशे च
योजातः प्रवासी जायते ध्रुवं क
विना गुणाढ्यी युक्तोगौरवर्णो महा
शयः २ नेत्रपाणौ च यो जातः
स्त्रीपरादि रुजान्वितः वस्तुरोगी
विशेषः स्यात् पुत्रनाशी भवेद्ध्रुवं।
॥ ३ ॥ प्रकाशने भवेज्जातो राज
पात्रो धनान्वितः नानाधनेन सं
युक्तोजायते देवपारगः ॥ ४ ॥
गमनेयो नरोजातः प्रवासी नित्य
दुःखितः शरीरे क्षतमाप्नोति नि
त्यमृणी भवेन्नरः ५ योजातो
गमनेच्छायां लम्पटो दुष्टचित्तकः
स्त्रीवशो दुष्टभार्यश्च कामुकोवहु
भाषकः ६ सभायांच बुधे जा
तो मूर्खो भवति पंडितः धनवान्
धार्मिकश्चैव चिररोगी भवेन्नरः
॥ ७ ॥ क्रूरः खलो हतमूर्खोऽथाप
शीलो भवेन्नरः बुधस्यागमने नि
त्यं जायतेच नराधमः ८ भो
जने च भवेत् सौख्यं धनहीनो भ
वेन्नरः परद्वेषी प्रवासीच शोष
गात्र बाधान्वितः ९ यो जातो
नृत्यलिप्सायां धनवान् पंडितःकविः
उत्साहीचमहाहृष्टो भुनक्ति सुख
मद्भुतं ॥ १० ॥ कौतुकेचयदा जा
तो भवेत् सर्व जनप्रियः सर्वशो
रोगी दृढयुक्तो धनवानल्पसस्यकः
॥ ११ निद्रायांच यदा जातः सर्व
दुःखैक पात्रतां नाना क्लेश मवा
प्नोति रोगशोकभयमलयं १२ ॥
इति बुधस्य धनवान् लम्पटः
शृपामः स्थूलो व्रणरुजान्वितः जी
वस्य शयने जातो मानवो नात्रसं
शयः १ उपवेशे गुरो जातो।
मंजुभाषी च रोगवान् धनुवानीम
हाशि त्यी स्त्रीपरो रोग संयुतः २
नेत्र पाणौ गुरोर्जातः काणरोगी।
धनीभवेत् स्तनादिस्फुरणे नित्यं ॥
जायते नात्र संशयः ॥ ३ ॥ गुरोः
प्रकाशे धनवान् लिंग गुह्ये रुजा
न्वितः रस्तोलम्पट पापीच श्यामा
वर्णो रुजान्वितः ४ सर्पभीतो।
गूढकर्मा साहसी गमनोन्मुखे पर
चित्तेन धनवान् पुमान् भवतिवाक्
पतौ ॥ ५ ॥ गुरोश्च गमनेच्छायां
जातो भवति मानवः शूलीधनी प्र
वासीचसेवा कर्मणि तत्परः ॥ ६ ॥
वक्तादाताच धनवान्राज सेवान्वि
तोनरः शूलरोगी भवेन्नित्यं स
भायां वाक्पतौ स्थिते ॥ ७ ॥ धा
र्मिक स्त्रीर्थविन्मानी धनीचागमने
गुरोः परदारेषु संलग्नो जायते।

नात्रसंशयः ॥ ८॥ भोजने वहु
सौख्यश्च मांसलब्धो महास्वरः
कामुकः प्रियवाक्यश्च जायतेना
त्रसंशयः ९ नृत्यलिप्से शशोवा
गमी धनवान् सात्विकस्तथा महु
दैश्वर्यसंयुक्तो जीवत्यच भवेन्नरः१०
कौतुके च गुरोर्जातो धनवान् धा
र्मिकः सदा नृत्यात् साही महत्
संगो भुनक्ति सुखमद्भुतं ११ ॥
निद्रायांचैव यो जात स्वस्तरोगी
भवेन्नरः कृपणो वहुभाषीवहुःखि
तोभ्रमते मही १२ ॥ इतिगुरोः
॥ शुक्रस्यशयने जातो लंपटो
वहुभाषकः दंतरोगी महाक्रोधी
नीचो भवति नित्यशः १ ॥ उप
वेशे तथा जातोवलवान्दांभिकः
सदा नित्यप्रवासीरोगीच जाय
तेनीच संस्थिते २ नेत्रपाणौ
भृगो ईर्ष्ती रोगशोकसमन्वितः
धनहीनो महारोगीमानवःस्यान्न
संशयः ३ भृगोःप्रकाशनेजा
तो विद्या धन समन्वितः दाताच
धार्मिकश्चैव कीर्तिमाञ्जायतेनरः
४ शुक्रस्य गमनेजातःपादमूले
रुजान्वितः नित्योत्साहीमहाशि
त्यी भवेन्नीचो गतो?:तः ५ गम
नेच्छोयदाजातो भ्रान्तापो भवे
द्ध्रुवं माता व म्रियते तस्य शै
शेव व्याधि संयुतः ६ सभायां
च भृगो जातो राजपात्रो महाध
नी कुल शीलो महादक्षःकेवलं
शूलरोगवान् ७ भृगोरागमने
जातो दुःखितो वहुलम्पटः रह
रोगी पुत्रशोकी जायतेच नराध
मः ८ शुक्रस्य भोजने जातो।
वलवान् दांभिकः सदा महाध
नीभवेन्नित्यं वाणिज्येनविशेषतः
९ योजातो नृत्यलिप्सायां सवा
ही जायतेध्रुवं पांडित्यं कवि
ता चैववर्द्धतेच दिनेदिने परि
चैव भवेन्नीचे मूर्खो भवतिनिश्च
यं तुंगस्थाने विशेषेण राजपा
त्रो महाधनी कामुको वहुकां
तश्च परयोषित् प्रियःसदाश्यामं
वर्णोस्तथा मानी यात्रिकोवहुभा छराः
॥ १० शुक्रस्य कौतुके जातोधन
वान्सात्विकः सदा महाहृष्टोमहा।
वंधुः कौतुकीच भवेत् सदा वहु
पुत्र कलत्रश्च नानासुखसमन्वि
तः नीचे तद्विपरीतःस्याद्दुःखशो
कसमन्वितः ११ निद्रायांच भृगो
र्जातो भवेद्रागी सुनिश्चितं नि
त्यक्लेशी महाकुःखीजायतेनात्रसं
शयः जायायांच स्तनस्थानेयदिनिग्र




मृगो भवेत नरा सर्वविनाशः
स्याद्दिसुना परिकीर्तितः ९ ॥
इति शुक्रस्य शयनेवशानेर्जा
तो लम्पटो वहुभाषकः गुह्यस्था
ने भवेद्रोगी कोषहद्दिरसजाय
ते लम्पात् समाप्तमेवेव शयन।
स्यः शनैश्वरः नरा नित्यप्रवासीस्या
व्कष्टुतयी भवेवसः १ उपवेशे य
दाजातः श्लीपदी ददुसंयुतःयन
हीनो भवेत्तस्यपीडा भवतिनित्य
शः २ नेत्रपाणौयदाजातो मू
र्खो भवति पंडितः यनवान्धा
र्मिकश्चैव द्दिभार्य्यावहुभाषकः
३ प्रकाशनेच योजातोराजपात्रो
भवेच सः नाना गुणेनगुणवान्।
धार्मिकः पंडितःशुचिः मतांतरे।
जायास्याने व लग्नेव प्रकाशनेयदा
शनिः नरा सर्व विनाशः स्याज्जा
ति ध्वंसो भवेद्ध्रुवं ४ गमनेच
यदा जातः पादमूले रुजान्वितः
तीर्थेच गतिमान्नित्यं पुत्र दारे।
विवर्जितः ५ यो जातो गमने
च्छायां श्लीपदी रोग संयुतःदंता
चाली महाक्रोधी कृपणःपरनिंद
कः ६ सभायांच शनौ जातः
पुत्रदार धनैर्युतः सर्वत्र लभते
वित्तं नाना रत्न समन्वितं ७

आगमने यदा जातो महाक्रोधी
रुजान्वितः सर्पारिभिश्च संदष्टो।
भ्रात्नाशी भवेद्ध्रुवं ८ भोज
नेचैव यो जातो मन्दाग्निश्च महा
नपि अर्शोरोगीतथाशूली बहु
रोगी भवेच सः ९ योजातो ॥
नृत्यलिप्सायां नर्त्तको वहुभाषकः
जीवनो दुःखितश्चैव प्रवासी पा
सेवकः १० कौतुकेवशाने जा
तो राजपुत्रो महाशयः दाता।
भोक्ता महादत्तो धार्मिकःपंडि
तः शुचिः ११ निद्रायांचशने
र्जातो धनवान् पंडितः शुचि त्व
त्तरोगी पित्तशूली द्दिभार्य्यावहु
पुत्रकः विशेषतश्च धर्मार्थ क
र्मास्य व कदाचन यदि दैवाद्भवे ॥
निद्रा नाशो भवति निश्चितं क
र्मनाशो धर्मनाशः तथार्तो दुःखि
तः सदा नित्य प्रवासी रोगीच ॥
कार्य्यनाशः पदेपदे स्वमित्र गे
हे हट्टे वा कंदेवा स्वगृहे पुनः
तदा सर्वे विचार्य्यंच वैपरीत्येन।
चिंतनं जायायांच स्वतस्याने यदि
निद्रा भवेत् पुनः तदासर्वशुभं
विद्याद्दिसुना परिकीर्तितं १२ ॥
इति शनेः ॥ धायने व यदा
राहोर्जन्म यस्यभवेत् पुनः तस्य

क्लेशो महादुःखं जायतेच नसं
शयः १ उपवेशेच योजातः
श्लीपदी रोग संयुतः वहुहानि
र्नरेद्रस्य पीडा भवति नित्यशः
॥ २ ॥ नेत्रपाणौ यदाजातस्वस्य
रोगी भवेद्ध्रुवं सर्पाद्यातो म
हाभीति द्दिभार्य्यो वहुभाषकः ३
प्रकाशने चयो जातो धनवान् धा
र्मिकः पुनः नित्यप्रवासी चोत
साही सात्विको धार्मिकःशुचिः ४
गमने चैव योजातो नाना रोगै।
र्धनत्यः दंतघातो महाक्रोधी
पिशुनः परनिंदकः ५ यो जा
तो गमनेच्छायां वहुपुत्रोमहाधनः
पंडितो गुणवान् दाताजायते च
नरोत्तमः ६ सभायांच यदा जा
तः कृपणो धन संयुतः नानागु
णेनगुणवानधर्मिकः पंडितःशुचिः
७ आगमनेच योजातोलंपटो वहु
भाषकः सहद्दंधु विनाशःस्यात्।
नाक्लेशश्च जायते ८ भोजनेच।
महादुष्टो मंदाग्निश्च रुजान्वितः
कृपणं कलहाद्यश्च दुःखितोनि।
त्यसेवकः ९ योजातोनृत्यलिप्सा
यांखंजो भवति नान्यथा पुत्रना
शो भवेत्तस्य जाया नाशो भवे
द्ध्रुवं १० कौतुकेवयदा जातो।

गुणैः सर्वैः समन्वितः नाना धनेन।
धनवान् राजसेवासतत्परः यदि।
दैवाद्भवे द्रोगी स्वगृही वा कदाचन
तदा सर्वे वैपरीत्यं जायतेच नसं
शयः ११ यो जातो राहुनिद्रायां।
दुःखितः सर्वत्र लघ्वानानास्थाने।
गतो वापि धन पुत्र विवर्जितः
जायायांच स्वतस्याने यदिनिद्राविं
धुंतुदः तदा सर्वे वैपरीत्यं शान
ज्जाया समन्वितः १२ नानाशास्त्रं
समालोक्य क्रियते ग्रंथ संग्रहः
वलावलं विचारेण शुक्रासंचिंतयेत्।
द्बुधः इति ग्रहाणां शयनादिद्दादश
भाव विवेकः समाप्तः इतिज्ञानरत्ना
कोद्दीप्रदीपश्च ॥ अथान्वादि ॥
द्दादश भावाः तेच नराणां जन्म।
लग्नावधिक द्दादश स्थानानियथा
सामर्थ्यं तत्कल्पते समुदये चित्रं
कुटुम्बं ततो विक्रांतिं सहृत्ततीय
भवने योयंच संचिंतयेत् वंधुवाद्य
स्वखालयानपि ततो धीमंत्र पुत्रो
त्तनः सह्देऽथ ततविद्दिषोमदगृहे
कामं स्त्रियं वर्मच रंध्रायुर्मृतयो
धर्मे गुरुतपो भाग्यानि चिंतन
तोमानात्तास्पदकर्मणां दशमे
कुर्य्यात्तत श्चिंतनं प्राप्त्यायावद्।
चिंतयेद्भव गृहे व्ययेतत्र्यं वियो स्त्री




सोम्यस्वामियुतीक्षणे रूपचय स्ते
मंततिस्त्वन्यथा इतिद्वादशभाव ।
विवेकः ॥ अरातिव्ययोः षष्ठे
चाष्टमे मृत्युरंध्रयोः व्ययस्य द्वादश
स्थाने वैपरीत्येन चिंतनं ॥ अरा
त्यादि भावापवादः ॥ अथ त
न्वादि द्वादश भावस्य ग्रहफलं ल
ग्नेसूर्ये ऽतिरोगी शशिनि कलयुतो
रूपवान् वित्तयुक्तो भौमेव्यंगः स
वाग्मी शशधर तनये सर्वशास्त्रा
र्थवेत्ता जीवे दाता पवित्रः सकविर
घगते भार्गवे मंडलेशः शौरी कं
दूति गात्रस्तमसिच नियतं वंचितो
धर्महीनः १ वित्तेर्केचैव रोगी
सतत गदयुतो रात्रिनाथे धनाढ्यो
भौमे नित्यं प्रवासी कृषिरत धन
वान्सोमपुत्रे प्रधानः जीवे लक्ष्मी ।
प्रमोदी विलसति भृगुजे दर्पितः
स्त्रीनिकेतः सौरौ दीनो ऽतिनि ।
त्यं तमसिच नियतं चौरिका वित्त ।
जीवी ॥ २ ॥ भ्रातर्यर्के सधर्मः स
भवति नियतं भ्रातृहा रात्रिनाथे
हिंस्रो भौमे ऽनुजानां सपदि व
धकरो भूमिका हस्तिजीवी सौम्ये
सत्यस्य हंता भवति सुरगुरौ काम
देवस्वरूपः शुक्रे राज्याधिकारी र
विज दनुजयो र्भ्रातृहंता धनाढ्यः

अर्के वंधौ सदुःखी स्वजनपरिहृ
तः शीतगौ जातुरोगी भौमे कुग्राम
वासी, शशिसुते भ्रातृपुत्रा ॥
न्वितो भवति ऽपि जीवे रत्नोपभोगी ।
त्रिदशरिपुगुरौ सर्वसौख्याधिका
री सौरे गेहे निवासी भवति श
शिरिपौ मन्दकर्मा कुचेलः ४ ॥
पुत्रस्थे ऽर्के नरो ऽसौ प्रथम सुत
हतः सिंहराशौ सुपुत्रः सोमे ॥
सर्वाधिकारी भवति धरणिजे पुत्र
शोकाकुलो ऽसौ सौम्ये सुस्थः
सदेहः प्रचुरधनयुतो देवपूज्ये सु
पुत्रः कन्यायुक्तो हि शुक्रे रविज
दनुजयोः पुत्र पौत्रै विहीनः
५ ॥ षष्ठे ऽर्के शत्रुहंता रिपुगणर
हितः तीव्रचंद्रे गतायुः पूर्णशत्रुश्च
हन्याद्भवति धरणिजे हीन देहो ।
ऽतिदीनः सौम्ये शास्त्रार्थ युक्तः
स्त्रिदशपतिगुरौ राज्यसौख्योप ॥
भोगी दैत्याचार्ये ऽतिरोगी र ॥
विज दनुजयोः पाप भंनिम्नदुःखी
॥६ ॥ पत्न्यामर्के वनायापरिरति
विमुखी धीनरश्मौ सुपुत्रः सस्यो
भूयात्रौ ऽसौ भवति धरणिजे हीन
भार्यश्च रूनं सौम्ये सुस्थः सदेहः
स्त्रिदश पति गुरौ शास्त्रवेत्ता शना
शुः शुक्रे पुत्रप्रमोदी रविजदनुजयो

हीन भार्यश्च रूनं ७ मृत्यो ।
वार्के सम्दृष्ट भवति नियतं शीत न
रश्मौ गतायु भूमिः पुत्रे सरोगी
शशधरतनये स्थूलरोगी विकर्मा
जीवतीर्थेच मृत्युर्भवति भृगुसुते
धार्मिकस्तीर्थगो ऽसौ सौरे स्थूली
गतायु भवति विधुरिपौ याययुक्तो
गतायुः ८ धर्मे वार्के नरो ।
ऽसौ विविध धनयुतः शीतगौ पु
ण्यकर्मा लक्ष्मी पुण्यप्रेता भवति
धरणिजे देवविनापहारी सौम्ये ।
धर्म्यः सुशील स्त्रिदशपतिगुरौ रा
जवस्यः सुकर्मा शुक्रे तीर्थयात्राभि
रविजदनुजयोः पापशीलः सदुःखी
९ कर्मण्यर्के प्रतापी प्रचुरधनयु
नः स्त्रीपदीकोपदृष्टिः सोमे सौम्या
न्वितो ऽसौ विविध धनयुतो भूमि
जेवंधुहीनः नित्योत्साही च सौ
म्ये प्रचुर धनयुतो देवपूज्ये ऽभि ।
मानी दिव्यस्त्रीशोऽपि शुक्रे नृपति ।
धनधनः सौरि देन्यसुखीच १० ॥
आये वार्के नरो ऽसौ पितृधन ।
सहितः शीतगौ चारुशीली भो
मे नित्यं सरोगी शशधरतनये स
र्वदा क्रोधयुक्तः जीवे श्रीमान् प्र
दाता कीर्तिमयतिर्भार्गवे शास्त्र
वित्तस्त्री रत्नादियुक्तो रविजदनुज

योः क्रूरकर्मा कुचेलः ११ अर्के
संस्थे व्यये ऽसौ पुर धन रहितः
सर्वरोगी सदुःखी सोमे खेदान्वि
तो ऽसौ भवति धरणिजे धूतरक्तो
विबुद्धिः सौम्य धर्माधिकारी दिन
कर रहिते देवपूज्ये ऽभिमानी
शुक्रे शास्त्रानुरागी रविजदनुजयोः
क्रूरकर्मा कुचेलः १२ इति ज्या
तिस्तत्वे स्त्रीणां यौवनकाले ।
स्वभावजाष्टाविंशत्यलंकारांतर्गता
ऊज प्रथमालंकारः यथा यौवने
सत्त्वजा स्तासा मष्टाविंशतिसंख्य
कः अलंकारा स्तत्र भावहाव हे
ला स्त्रया अंगजाः तत्रभावः नि
र्विकारात्मके चित्ते भावः प्रथम वि
क्रिया जन्मतः प्रभृति निर्विकारे
मनसि उद्बुद्ध मात्रो विकारो भावः
यथा सएव सुरभिः काल सएव
मलयानिलः सैवेय मवला किंतु
मनो ऽन्यदिव दृश्यते इति सा
हित्यदर्पणे तृतीय परिच्छेदः ॥
भावस्य लक्षणांतरं यथाशरीरे
न्द्रिय वर्गस्य विकाराणां विधायकाः
भावा विभाव जनिताश्चित्तवृत्तय
ईरिताः पुराणानाट्यशास्त्रे च हृ
योस्त्वमति भावयोः समानार्थता ।
याचात्र हृदय मेकेनलक्ष्यते ॥



भगवद्भावो यथा शुद्धसत्त्वविशेषा
त्मा प्रेम सूर्य्यांशुसाम्यभाक् रुचि
भिश्चित्त मासृण्यकृदसौ भाव उच्य
ते इति भक्तिरसामृतसिन्धुः ॥
पूर्वोक्तमानसविकार रूपभावस्य
विवरणं यथा रजः सत्त्वतमोम
याश्चित्तविकारो भावः चित्तवृत्ति
विशेषो भाव इत्यन्ये अतएव मा
नोविकारो इत्यादि भाव उक्तः
भावइति करोति रसान् भावः अन्ना
तथाच भरतः नानाभिनयसंवन्धा
न्भावयंति रसानिमान् यस्मात्तस्मा
दमी भावा विज्ञेया नाटकोक्तिषु
भावाश्च त्रिविधाः स्थायिनो व्यभि
चारिणः सात्त्विकाश्च तत्र स्थायिनो
यथा रतिर्हासश्च शोकश्च क्रोधो
त्साहौ भयं तथा जुगुप्सा विस्मय
श्चेति स्थायिभावाः प्रकीर्त्तिताः व्य
भिचारिणो यथा निर्वेद ग्लानि
शंकाख्या स्तथासूया मद श्रमाः आ
लस्यंचैव दैन्यंच चिन्ता मोहो धृतिः
स्मृतिः व्रीडा चपलता हर्ष आवे
गो जड़ता तथा गर्वोविषाद औत्
सुक्यं निद्रापस्मार एवच सुप्तो वि
वोधो मर्षश्चाप्यवहित्था मथोग्र
ता मति र्व्याधि स्तथोन्माद स्तथाम
रणमेवच त्रासश्चैव वितर्कश्च विज्ञेया
व्यभिचारिणः त्रयस्त्रिंशदमी भा
वाः प्रयांति रससंस्थितिं सात्त्वि
का यथा स्वेदः स्तंभोऽथ रोमां
चः स्वरभंगोऽथवेपथुः वैवर्ण्य
मश्रु प्रलय इत्यष्टौ सात्त्विकाम
ता इति रत्यादयः स्थायिनोऽष्टौ
निर्वेदाद्या व्यभिचारिण स्त्रयस्त्रिं
शत् स्वेदादयः सात्त्विका अष्टौचेति
एतर्यंवाशाङ्गावाः पंचाशद्भावा इ
त्यन्ये इत्यमरटीकायां भरतः ॥
भावकः पुं भावः मानसोविकारः
इतिहलायुधः सप्तमाश्रये त्रि
इतिसंक्षिप्तसारः ॥
भावतः त्रि भवदीयः शाक्तंतभवत्
शब्दाद्दण्प्रत्यय निष्पन्नः इतिसि
द्धांतकौमुदी
भावत्कः त्रि भवदीयः भवत्
शब्दात् ठक प्रत्यय निष्पन्नः इति
सिद्धांतकौमुदी यथा भावत्कं
हृष्टवत् स्तेन रक्षास्वपि सुजीवितं
इतिभट्टिपंचमसर्गः ॥
भावनं क्ली भव्य वासना इति
भाषा इतिराजनिर्घण्टः भावना ॥
इतिमेदिनी ॥
भावना स्त्री क्ली ध्यानं पर्य्यालो
चनं अधिवासनं इतिमेदिनी
॥ त्रिविधा भावना यथा त्रि

विधा भावना विप्र विश्वमेतन्निवो
धमे ब्रह्माख्या कर्मसंज्ञाच तथा
चैवोभयात्मिका ब्रह्म भावात्मि
का ह्येका कर्म भावात्मिका परा
उभयात्मिका तथैवान्या त्रिविधा
भाव भावना सनन्दनादयो ब्रह्म
भाव भावनया युताः कर्मभावन
याचान्ये देवाद्याः स्थावरा श्चरा
हिरण्यगर्भादिषु च ब्रह्मकर्मात्मि
का द्विधा वोधाधिकारयुक्तेषु वि
द्यते भाव भावना इति विष्
णुपुराणे ६ अंशे ७ अध्याया ॥ ।
त्रिविध भावनाश्रय जीवात्मक
त्वात् तद्रूपवारण त्रिविधाभावनेत्यु
च्यतेहि हरेः स्थूलंरूपं ॥ अतः
परंरूप माश्रुपायत्वात् तत्र प्र
थमं मनः संस्थाप्य मितिभावः ।
भावना नाम ज्ञानविशेषजा वास
नातो त्रिविधा सैव संज्ञा मा
दिशति ब्रह्मावेति तामेव वि
षयत्रैविध्येन विविनक्ति ब्रह्मभा
वनात्मिकेति भाव भावना भा
वो वस्तु तद्विषया भावनात्रिविधा
तत्रवयं ब्रह्मैव भावयामः वयं
कर्मैव कुर्मः वयंत मिदमनुसं
दध्म इत्येवं त्रिविधा भावना ।
भावना युक्तान् जीवान् दर्शयति स
नंदनादय इति द्वाभ्यां इति त
ट्टीका ॥
भावहृन्नः पुं ब्रह्मा भावः सृष्टिः
तत्रहृन्नः प्रहृन्नः इतिसंख्या व्या
ख्यायास्मृतिः ॥
भावबोधकः पुं अनुभावः इत्य
मरः भावस्य रत्यादे र्वोधकः ॥
सूचको गुणक्रियादि रनुभावः
अनुभाव्यते प्रतीति योग्यतां ॥
नीयते रत्यादि रनेनेति अनुभा ॥
वः यत्र तत्ररते रनुभावाः लो
चनचातुर्य्यं भ्रूक्षेपादयः हासस्य च
कपोलाकुंचना नासान् फुल्लनाद
यो ऽनुभावा एवमन्यत्रानुमंतव्य
कि म्वा भावाननुभावयतीति अनुय
नुभावो मुखरागादिः इतिनट्टीका
यां भरतः ॥
भावाटः पुं भावकः साधुः ॥
निवेशः कामुकः नटः इति
मेदिनी ॥ ॥
भावानुगा स्त्री छाया इतिराज
भावालीना निर्घण्टः ॥
भाविनः त्रि वासितः प्राप्तः
इति मेदिनी शुद्धः चिंतन :
मिश्रितः भूक्तशुद्धि चिंतयोर्मिश्र
णे च इत्यस्मात् अंतोतक्तप्रत्यय
निष्पन्नोऽयं ॥



भावित्रं क्ली त्रैलोक्यं स्वर्गमर्त्यपातालं इत्युणादिकोषः ॥

भाविनी स्त्री स्त्रीविशेषः इत्यमरः ॥ भावः शृंगारचेष्टाविशेषो विद्यतेऽस्याः भाविनी इति तट्टीकायां भरतः स्त्रीमात्रं इति राजनिर्घंटः वर्तमानप्रागभावप्रतियोगिनीच ॥

भावीन त्रि भविष्यत्कालः वर्तमानप्रागभावप्रतियोगुत्पत्तिकः ॥ यथावीरप्रतिपदानामनव भावी महोत्सवः इतिकार्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रतिभगवद्वाक्यं इति तिथ्यादितत्त्वं ॥

भावुकं क्ली मंगलं तद्वति त्रि इत्यमरः ॥

भावुकः पुं नाट्योक्तौ भगिनीपतिः इतिहेमचंद्रः रसविशेषभावनाचतुरः इतिश्रीधरस्वामी। यथा निगम कल्पतरो र्गलितंफलं शुकमुखादमृतद्रवसंयुतं ॥ पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः इति श्रीभागवते १ स्कंधे ३ श्लोकः

भावुकः त्रि भवनाश्रवः भवतियः इतिकर्त्तरि भूधातो रुक प्रत्येन निष्पन्नं तत्प्रपलितविपरीतस्थूल शुभगाश्च शाहोपपदभूधातोर भूतनद्भावार्थे कर्तृविवाक्षे। खुक न प्रत्ययेन लग्नभावुकइत्यादि निष्पन्नंच ॥ ॥

भाव्यं क्ली अवश्यभवितव्यं इति भूधातोरवश्यंभावार्थे भावेध्यण प्रत्ययेन निष्पन्नं यथा विशेषश्रुविना भाव्यं इति मुग्धबोधव्याकरणं प्रयोगदर्शनात कर्त्तरिच तत्रत्रि यथा हृतस्यकरणे नास्ति दैवायिष्ट्रिनकर्मणः भावी स्ववशो यद्भाव्यं तत्रत्र्लाघ्य वा यकः इतिकालिकापुराणे ३८ अध्यायः ॥

भाष ऋ ङ वाचि इतिकविकल्पद्रुमः ङ भाषते ऋ अवीभषत् अवभाषत् इति तट्टीकायां दुर्गादासः ॥

भाषणं क्ली कथनं यथासंलापो भाषणं मिथः इत्यमरः ॥

भाषा स्त्री रागिणीविशेषः इति हलायुधः वाक्यं वाग्देवता ॥ तत्पर्यायः ब्राह्मी १ भारती २ गी ४ वाक् ५ वाणी ६ सरस्वती व्याहारः ८ उक्तिः ९ लपितं १० भाषितं ११ वचनं १२ वचः १३ इत्यमरः त्रयोदश वचने पुर्वा।

समकं वागपि हलायां देवतायांच ॥ इतितट्टीकायां भरतः शास्त्री। याष्टादशभाषायथा संस्कृता १ प्राकृता २ उदीची ३ महाराष्ट्री ४ मागधी ५ मिश्रार्द्धमागधी ६ शकाभीरी ७ अवंती ८ द्राविडी ९ ओड्रीया १० पाश्चात्या ११ प्राच्या १२ वाह्लिका १३ रंतिका १४ दाक्षिणात्या १५ पैशाची १६ आवंती १७ शौरसेनी १८ एतासां लक्षणोदाहरणानि प्राकृतलंकेश्वर व्याकरणे द्रष्टव्यानि ॥

अथभाषाविभागः पुरुषाणा मनीचानां संस्कृतं स्यात् कृतात्मनां। शौरसेनी प्रयोक्तव्या तादृशीनांच योषितां आसा मेवतुगाथासु ॥ महाराष्ट्री प्रयोजयेत् अत्रोक्ता। मागधी भाषा राज्ञांतःपुरचारिणां चेटानां राजपुत्राणां श्रेष्ठिनांचा। अर्द्धमागधी प्राच्याविदूषकादीनां धूर्त्तानां स्यादवंतिका योधनागरि। कादीनां दाक्षिणात्याहि दीव्यतां। शकाराणां शकादीनां शाकारीं संप्रयोजयेत् वाह्लीकभाषा दिव्यानां द्राविडी द्रविडादिषु आभीरेषु। तथाभीरी चांडाली पुक्कसादिषु आभीरी शावरी चापि काष्ठपत्रोपजीविषु तथैवांगारकारादौ पैशाची स्यात् पिशाचवाक् चेटीनामप्यनीचानामपि स्यात् शौरसेनिका बालानां षण्ढकानांच नीचग्रहविचारिणां उन्मत्तानामातुराणां सैवस्यात् संस्कृतं क्वचित् ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपद्रुतस्यच भिक्षुवल्कधरादीनां प्राकृतं संप्रयोजयेत् संस्कृतं संप्रयोक्तव्यं ॥ लिंगिनीषूत्तमासुच देवी मंत्रिसुतावेश्यास्वपि केश्चित्तथोदितं ॥ यद्देशं नीच पात्रंतु तद्देशं तस्य भाषितं कार्यंतु श्चोत्तमादीनां ॥ कार्यो भाषा विपर्य्ययः योषित् सखी बाल वेश्या कितवाप्सरसां तथा वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चांतरांतरा एषा मुदाहरणान्याकरेषु बोद्धव्यानि भाषालक्षणानि भाषार्णवे इतिसाहित्यदर्पणे ६ परिच्छेदः ॥ अथभाषापादः ॥

तत्र भाषा स्वरूप माहतः कात्यायन बृहस्पती प्रतिज्ञा दोष निर्मुक्तं साध्यं सत्कारणान्वितं निश्चितं लोक सिद्धंच पक्षं पक्षविदो विदुः स्वल्पाक्षरः प्रभूतार्थो निःसंदिग्धो निराकुलः विरोधि कारणै र्मुक्तो विरोधि प्रतिरोधकः यदा त्वेवं विधः पक्षः कथितः



पूर्ववादिना दर्शयाज्ञात् पक्ष समर्थं
प्रतिवादी तदोत्तरं । प्रतिज्ञा
साध्याभिधायिका वाक् तस्यादो
षैः परस्पर विरुद्धार्थ पदादिभि
रुपक्तं साध्यं साधनार्हाभिमतं प
क्षविद्धः अन्यथा प्रतिज्ञा दोषेण
साधदोषः स्यात् अनयथो क्तं
वचनस्य प्रतिज्ञात्वं तदर्थस्य च
पक्षता असंकरेण वक्तव्ये व्यवहा
रेषु वादिभिः वक्तव्ये पक्ष प्रति
ज्ञे पूर्वोक्ते नारदेनापि सारस्तु ।
व्यवहाराणां प्रतिज्ञा समुदाहृता ।
तद्धानौ हीयते वादीतरं स्तामुत्ता
रो भवेत् उत्तरो विजयी यद्य
प्यत्र साध्यं तद्विशिष्ट धर्माधर्मी
पक्ष इति भेदः तथाप्यत्र वाक्
प्रत्यार्थ्यणोहि धर्मविशेष विशिष्ट
तया धर्मिणोऽप्यर्थाणां पदे रेवसा
ध्य त्वात् साध्यपक्षयो रभेदाभिधा
उभयोरेव एवं विषयः पक्ष इति
मिताक्षरायान् भाषा प्रतिज्ञा
पक्ष इति नार्थान्तरमित्युक्तं भाषा
र्थे सुक्ता भाषा स्वरूप प्रपंच ।
माह स्वल्पाक्षर इति निराकुलः पौ
र्वापर्य विपर्यासादिशून्यः तत्रायु
ते च व्यवहारे च प्रश्ने पत्रक
मीति यानि पर्यन्त दर्शनात्कर्मे

तानि न पश्यति इति शूल्य संग्रहः ।
वचनादुदासीनेभ्यो ताभ्यां शोध
येत् तच्छोधनमाह हृहस्प
तिः न्यूनादिकं पूर्वपक्षंतावद्वादी
विशोधयेत् न दद्यादुत्तरं यावत् ॥
प्रत्यर्थी सभ्य सन्निधौ ॥ तलि
खेन प्रकार माह व्यासः पांडुले
खेन फलके भूमौ वा प्रथमं लि
खेत् न्यूनाधिकन्तु संशोध्य पश्चात्
पत्रे निवेशयेत् फलकं काष्ठादि ।
पटकः कात्यायनः पूर्वपक्षं स्व
भावोक्तं प्राड्विवाकोऽथ लेखयेत् ।
पांडुलेखेन फलके ततः पत्रे ।
ऽभिलेखयेत् शोधयेत् पूर्व प
क्षंतु यावन्नोत्तर दर्शनं उत्तरेणा
वरुद्धस्य निवृत्तं शोधनं भवेत् ॥
अन्यदुक्तं लिखेद्योऽन्यदर्थि प्रत्य
र्थिनां वचः चौरवच्छासयेत्तंतु धा
र्मिकः पृथिवीपतिः स्वभावोक्त
मज्ञेमं पत्रं सार विशेषादिना
सज्ञेपं अत एव याज्ञवल्क्यः लेखं
निरस्य भूतेन व्यवहारान्नयेन्नृपः
भूतमप्यनुपन्यस्तं हीयते व्यवहार
तः भूतं तत्त्वार्थ समंधं नारदः
भूतं तत्त्वार्थ समंथं प्रमादाभिहि
तं छलं किंतु राज्ञा विशेषेणा ।
स्वधर्म मभिरक्षता मत्प्र विनेथे ।

विद्यात् परीक्षा साध्वसाधु वा
सर्वेष्वर्थ विवादेषु वाक्छलेनाव ।
सीदति पंडस्त्री भूम्यादाने श्रा
ध्योऽप्यर्थात्र हीयते सर्वेष्वर्थ ।
विवादेषु प्रमादाभिधाने ऽपि ना
वसीदति अस्योदाहरणं पंडस्त्री
त्यादि अर्थ विवाद ग्रहणान्मन्यु ।
कृत विवादेषु प्रमादाभिधाने प्र
कृतार्थादप्यर्थाद्धीयत इति गम्य
ते यथाहमनेन शिरसि पादेन
ताडितः इत्यभिधाय केवलं हृ
स्तेन ताडितः इति वदन केवलं
दण्डः पराजीयते च ततस्त्वं
मत्यमृणं धारयसि मन्न दृष्टाहेन
गृहीत तावद्दत्तवानिति भाषाश
रीरं पतत्त्व संस्कृत देशभाषा ।
न्यतरेण यथावोधं वक्तव्यं लेख्यं ।
वा मूर्खानामपि वादि प्रतिवा ।
दिना दर्शनात् अतएवाध्यापने ।
ऽपि तथोक्तं विल धर्मोत्तरे ।
संस्कृतैः प्राकृतैर्वाक्यैर्यः शिष्य ।
मनुरूपतः देशभाषाद्युपायैश्च ।
वोधयेत् स गुरुः स्मृतः इतिव्यव
हारतत्त्वं ॥
भाषापरिच्छेदः पुं विश्वनाथन्याय
पंचाननकृत न्यायपरिभाषा ग्रंथः ।
अस्यायमाद्य श्लोकः नूतनजलधर

रुचये गोपवधूटी दुकूलचौराय ॥
तस्मैनमः कृष्णाय संसार महीरु
हस्य बीजाय तस्यायमंत्य श्लोकः ।
सोऽयंक इति बुद्धिस्तु साजात्य ॥
मवलम्बते तदेवोपनय मित्यादौ ।
सजातीये ऽपि दर्शनात् अस्य ।
टीका सिद्धांतमुक्तावली ॥
भाषापादः पुं चतुष्पाद्व्यवहारांत
र्गत प्रथमपादः तस्यलक्षणं यथा
अर्थ वद्धर्म संयुक्तं परिपूर्णं मना
कुलं साध्यवद्वाचक पदं प्रकृता
र्थानुवंधि च प्रसिद्ध मविरुद्धंचा
निश्चितं साधन क्षमं संक्षिप्तं ।
निखिलार्थंच देश कालाविरोधिव
र्षर्तु मास पक्षाहो वेला देश
प्रदेशवत् स्थानावसथ साध्या
ख्या जात्याकार वयोयुतं साध्य
प्रमाण संख्या वदात्म प्रत्यर्थिनाम
च परात्म पूर्वजाते राज्ञ नाम
भिरंकितं क्षमा लिंगात्म पी
डावत् कथिता दत्तेदायकं यदा
वेदयते राज्ञे तद्भाषेत्यभिधी ॥
यते इति मिताक्षरायां व्यव ।
हाराध्यायः अस्य विवरणं भाषा ।
शब्दे द्रष्टव्यं ॥
भाषितं वचनं इत्यमरः ॥
कथिते त्रि ॥




भाष्यं क्ली चूर्णिः इतिस्वामी।
सूत्र विवरणग्रंथः तस्यलक्षणं सू
त्रार्थो वर्ण्यते यत्रपदैः सूत्रानुसारि
भिः स्वपदानिच वर्ण्यते भाष्यं
भाष्यविदो विदुः इति लिंगादि
संग्रह टीकायां भरतः सूत्रो
क्तार्थप्रपंचकं इतिहेमचंद्रः ।
गृहविशेषः इतिमाधवीति मथु।
रेशाः कथनीये त्रि ॥
भाष्यकारः पुं महाभाष्यकर्त्ता मु
निः तत्पर्य्यायः गोनर्दीयः २ पतं
जलिः ३ चूर्णिकृत् ४ इतित्रिकां
डशेषः अहंच भाष्यकारश्च कु
शाग्रीय धिया भुवि नैवशब्दाम्बु
धेः पारं किमन्ये जडबुद्धयः ॥
इतिदुर्गसिंहः ॥
भास ऋ ङ भासि दीप्तौ इति।
कविकल्पद्रुमः ऋ अबीभसत् अब
भासत् ङ भासते इति दुर्गा
दासः ॥
भास स्त्री प्रभा अस्यशब्दस्यप्रथ
मांतरूपं भाः इत्यमरः मयू
खः इति मेदिनी इच्छा इति
धरणिः ॥
भासः पुं दीप्तिः गोष्ठं कुक्कुटः
भूपः इति विश्वः स्वनाख्यात।
पक्षिविशेषः तत्पर्य्यायः श

कुंतः २ इति हेमचंद्रः ॥
भासः क्ली दीप्तिः इतिद्विरूपकोष ः
भासंतः पुं सूर्य्यः चंद्रः इत्यु।
णादिकोषः भासपक्षी ॥ इति।
मेदिनी नक्षत्रं इतिहेमचंद्रः ।
भासंतः त्रि सुंदराकारः इति
मेदिनी ॥
भासती स्त्री नक्षत्रं इत्युणादिको
षः भासुः पुं सूर्य्यः इतित्रि।
कांडशेषः ॥
भासुरं क्ली कुष्ठौषधं इतिजटा
धरः ॥
भासुरः पुं स्फटिकः इतित्रिकांड
शेषः वीरः इति धरणिः क
र्त्तरि घुर प्रत्यय निष्पन्नत्वेन दीप्ति
युक्तेत्रि ॥ ॥
भासुरपुष्पा स्त्री वृश्चिकाली इ
तिराजनिर्घंटः ॥
भास्करं क्ली सुवर्णं इतिराजनिर्घंट ः
भास्करः पुं सूर्य्यः अग्निः इति
मेदिनी वीरः इति धरणि। ॥
अर्कवृक्षः इतिराजनिर्घंटः भा
स्कराचार्य्यः सच सिद्धांतशिरोमण्या
दिज्योतिर्ग्रंथकर्त्ता ॥
भास्करप्रियः पुं पद्मरागमणिः
रुबि इतिभाषा इति केचित् ॥
भास्करेष्टा स्त्री आदित्यभक्ता इति


राजनिर्घंटः ॥
भास्वरं क्ली कुष्ठौषधं इतिशब्द
चंद्रिका ॥
भास्वरः पुं दिनं इतिराजनिर्घंटः
सूर्य्यः इति केचित् ॥ दीप्ति
युक्तेत्रि इतिमुग्धबोधव्याकरणं।
भास्वान् पुं सूर्य्यः अर्कवृक्षः इत्य
मरः दीप्तिः इतिहेमचंद्रः ॥
वीरः इति मेदिनी दीप्ति वि
शिष्टेत्रि ॥ ॥
भिंडः पुं भिंडा क्षुपः इति।
भिंडकः राजनिर्घंटः ॥
भिंडा स्त्री क्षुपविशेषः भिंडी
इति ख्याता तत्पर्य्यायः भिं
डीतकः २ भिंडः ३ भिंडकः ४
क्षेत्रसंभवः ५ चतुष्पदः ६ चतुःप
त्रः ७ सुशाकः ८ अम्लपत्रकः ९ कर
पर्णः वृत्तबीजः ११ अस्यगुणाः।
अम्लरसत्वं उष्णत्वं ग्राहित्वं।
रुचिकारत्वंच इतिराजनिर्घंटः।
भिंडीतकः पुं भिंडा वृक्षः इति।
राजनिर्घंटः ॥
भित्तं क्ली खंडं इत्यमरः।
भित्तिः स्त्री गृहादेर्मृदिष्टकादिम
यावृतिः कांथ इति देयाल इति
भित इतिचख्याता ॥ तत्पर्य्यायः
कुड्यं २ इत्यमरः भित्तिका।

३ कुड्यं ४ कुड्यकं ५ इतिशब्द
रत्नावली प्रभेदः संविभागः
अवकाशः इतिविश्वः ॥ प्रदे
शः इतिशब्दरत्नावली ॥
भित्तिका स्त्री कुड्यं इति शब्द
रत्नावली इतिहेमचंद्रः ॥
भित्तिचोरः पुं चोरविशेषः ॥
सिंदालचोर इतिभाषा तत्प
र्य्यायः खानिकः २ कुड्यच्छित्
इतिशब्दरत्नावली ॥
भित्तिपातनः पुं महामूषकः इ
तिराजनिर्घंटः ॥
भित् स्त्री प्रभेदः इतिजटाधरः
भेदकर्त्तरि त्रि ॥
भिद इ ञ औ ञ प भिदि इति
कविकल्पद्रुमः भिक्तियदवयव
विदारणे ञ प भिनत्ति भिन्ते कु
लेनदी औ भेत्ता इव अभिदत्
अभैत्सीत इतिदुर्गादासः ॥
भिदकं क्ली वज्रं खङ्गे पुं इत्यु
णादिकोषः ॥
भिदा स्त्री वस्त्रादेर्विदारणं चेरा
इतिभाषा तत्पर्य्यायः विदरः
२ स्फुटनं ३ इत्यमरः पंथाकं।
इतिशब्दचंद्रिका भेदः यथा
प्रायश्चित्तस्य पूर्वोक्त कृतं वा स्य
भिदानया इतिप्रायश्चित्ततत्त्वे।



भिदिः पुं वज्रं इतिद्विरू-
पकोषः ॥
भिदिरं क्ली वज्रं इत्यमरटीका-
यांभरतः त्रिकाण्डशेषश्च ॥
भिदुः पुं वज्रं इतित्रिकाण्डशेषः
भिदुरं क्ली वज्रं इत्यमरः प्लक्ष-
वृक्षे पुं इतिराजनिर्घण्टः ॥
भिद्यः पुं नदः इति हेमचन्द्रः
मुग्धबोधव्याकरणञ्च ॥
भिद्रः पुं क्ली वज्रं इतित्रिकाण्ड-
शेषः उणादिकोषश्च ॥
भिन्दिपालः पुं हस्तप्रमाणकाण्डः नालिकास्त्र भिन्दिपालं इति
भरतः हस्तक्षेप्यलगुडः इति
स्वामी तत्पर्य्यायः सृगः २
इत्यमरः ॥
भिन्नः त्रि भेदविशिष्टः भंगा इति
भाषा तत्पर्य्यायः दारितः २
भेदितः ३ इत्यमरः विदारितः
४ इतिशब्दरत्नावली सङ्गतः
अन्यः फल इतिमेदिनी ॥
क्षतरोगविशेषः तल्लक्षणं यथा
शक्तिकुन्तेषुखड्गाग्रविषाणादिभिराश-
योहतः यत्किञ्चित्प्रस्रवेत्तद्धि
भिन्नं भिन्नमिधीयते आशयः
कोष्ठः तस्यौषधं यथा भिन्ने।
भिन्ने तथा विहृतेनवासृगाति
स्रवेत् रक्तयात्रसमः करोति
पवनो भृशं स्नेहपानपरीषेक ।
लेपां स्तत्रोपनाहनं कुर्वीत ॥
स्नेह वस्तिञ्च मारुतघ्नौषधैर्भिषक्
खड्गादिच्छिन्नगात्रस्य तत्काले पू-
रितो व्रणः गांगेरुकी मूलरसैः
सद्यः स्याद्रूढ वेदनः कषायमधु-
राः शीताः क्रियाः सर्वाः प्रयोज-
येत् सद्योव्रणानां सप्ताहात् प-
श्चात् पूर्व्वोक्तमाचरेत् आमा-
शयस्थे रुधिरे विदध्याद्वमनं नरः
तस्मिन् पक्वाशयस्थे तु हृत्स्थीयात्
सविरेचनं क्वाथो वंशत्वगेरण्ड श्व-
दंष्ट्राश्मभिदाकृतः हिङ्गुसैन्धव
संयुक्तः कोष्ठस्थं स्रावयेदसृक् यव
कोल कुलत्थानां निःस्नेहेन रसे
न च भुञ्जीतान्नं यवागूं वा पिबेत्
सैन्धव संयुतां जाती निम्ब प-
टोल पत्रकटुका दार्वी निशा।
शारिवा मञ्जिष्ठाभयसिक्थतुत्थ
नक्ताह्व बीजैः समैः सर्पिःसिद्ध
मनेन सूक्ष्मवदना मर्म्माश्रिताः स्रा-
विणो गम्भीराः सरुजो व्रणाः स-
गतिकाः शुध्यन्ति रोहन्ति च हृद्यं वै
घोषपदेशेनपारम्पर्य्योपदेशतः ॥
।जाती घृते तु संसिद्धे लेपकं ॥
सिक्थ पकं बुधैः जात्यादि घृतं ॥

इतिभावप्रकाशः ॥
भिन्नकः पुं बौद्धः यथा भिन्नकः
क्षपणोऽर्हीको बौद्धो वैनायिकः
स्मृतः इतित्रिकाण्डशेषः ॥
भिन्नगात्रिका स्त्री कर्कटी इति
शब्दचन्द्रिका ॥
भिन्नभिन्नात्मा पुं चणकः इतिशब्द-
चन्द्रिका
भिन्नयोजनी स्त्री पाषाणभेदक
वृक्षः इतिभावप्रकाशः ॥
भिन्नार्थकः त्रि अन्यः इत्यमरः
भियास्त्री भयं इतिहेमचन्द्रः ॥
भिरिण्टिका स्त्री श्वेतगुञ्जा इति
राजनिर्घण्टः ॥
भिल्लः पुं म्लेच्छजातिविशेषः भील
इतिभाषा यथा माला भिल्लाः
किराताश्च सर्वेऽपि म्लेच्छजातयः
इतिहेमचन्द्रः अपिच रजक।
चर्म्मकारश्च नटो वरुड एव च
कैवर्त्त मेद भिल्लाश्च सप्तैते अ-
न्त्यजाः स्मृताः इतिप्रायश्चित्तत-
त्त्वं स च ब्राह्मणकन्यायां तीव-
राज्जातः यथा पुलिन्द मेद।
भिल्लाश्च पुलो मल्लश्च पावकः
कुम्भकारो डोवलो वा मतपा ।
हलिपल्लथा यनेवै तीवरा ।
जाताः कन्यायां ब्राह्मणस्य च ॥
इतिपराशरपद्धतिः ॥
भिल्लगवी स्त्री गवयी इतिराज-
निर्घण्टः ॥
भिल्लतरुः पुं लोध्रः इतिराज-
निर्घण्टः ॥
भिल्ली स्त्री लोध्रः इतिराजनिर्घण्टः
भिष रुग्जये सौत्रधातुरयं इति
कविकल्पद्रुमः भिषक् भेषजं
इतिदुर्गादासः ॥
भिषक् पुं वैद्यः इत्यमरः हृ-
तीयभिषग्यथा अज्ञानौषधिमे
वञ्च यस्य व्याधे रुतत्त्ववित् रो-
गिभ्योऽर्थं समादत्ते स दण्ड्यः
घोरवद्भिषक् इति ज्योतिस्त-
त्त्वे तस्याज्ञस्याभोज्यान्नत्वं यथा ॥
शूद्रान्नं ब्राह्मणो भुक्त्वा तथा रङ्गा-
वतारिणः चिकित्सकस्य क्रूरस्य
तथा स्त्रीमृगजीविनां षण्डि।
काञ्चः सूतिकान्नं भुक्त्वामासं व्रती
भवेत् व्रती यावकेन तत्र येन-
द्वयं इतिप्रायश्चित्तविवेकः ॥
अपिच पूयं चिकित्सकस्यान्नं पुं-
श्चल्यास्त्वन्नमिन्द्रियं विष्ठा वार्द्धु-
षिकस्यान्नं शस्त्रविक्रयिणो मलं
इतिमानवे ४ अध्यायः ॥
भिषक्प्रिया स्त्री गुडूची इतिरा-
जनिर्घण्टः ॥




भिषग्जितं क्ली औषधं इतित्रिका
ण्डशेषः ॥ ॥
भिषग्भद्रा स्त्री भद्रदन्तिका इति
राजनिर्घण्टः ॥
भिषङ्माता स्त्री वासकः इतिरा
जनिर्घण्टः ॥
भिस्सटा स्त्री दग्धान्नं इत्यमरः
अस्यत्रूपान्तरं भिस्सिटा भिक्षि
टा भिष्मिट्टा भिष्मिका इति
तट्टीका सारसुन्दरी ।
भिस्सा स्त्री अन्नं इत्यमरः ।
भिस्सटा स्त्री दग्धान्नं इत्यमरटीका
सारसुन्दरी ॥
भिक्ष उः लाभार्थेलोभोक्तिः क्तिरि
इतिकविकल्पद्रुमः अ याचनं
लोभाद्युक्ति लोभोक्तिः उ. भि।
क्षते भूमिं नृपात् पण्डितः ल
भत इत्यर्थः भिक्षते दाता रं
धनं भिक्षुः याचत इत्यर्थः भि
क्षतेदातारं दीनः लोभाद्ददाती
त्यर्थः भिक्षतेजनः क्षिप्रमनीप्स
र्थः इति दुर्गादासः ॥।
भिक्षा स्त्री लाभयाचनं वा ऊया
इतिम्भाषा इति च भाषा तत्प
र्य्यायः याञ्चा २ अर्थना ३ अर्द
ना ४ इत्यमरः प्रार्थना ५ याचना ६
इतिशब्दरत्नावली सेवा भृतिः

इति नानार्थे अमरः भिक्षितं
वस्तु इति मेदिनी अपनी
तस्य भिक्षाविधिर्यथा भिक्षामा
हृत्यशिष्टानां गृहेभ्यः प्रयतोऽन्व
हं निवेद्य गुरवेऽश्नीयाद्वाग्यत
स्तदनुज्ञया भवत्पूर्वं चरेद्भैक्ष्य
मुपवीतो द्विजोत्तमः भवन्मध्यं तु
राजन्यो वैश्यस्तु भवदुत्तरं मा
तरं वा स्वसारं वा मातुर्वा भगिनीं
निजां भिक्षेत भिक्षां प्रथमं।
याचेन्नावमानयेत् सजातीय
गृहेष्वेव सार्ववर्णिकमेव वा भै
क्षस्याचरणं प्रोक्तं पतितादि वि
वर्जितं वेदयज्ञैरहीनानां प्रश
स्तानां स्वकर्मसु ब्रह्मचार्याहरेद्भै
क्षं गृहेभ्यः प्रयतोऽन्वहं गुरोः
कुले न भिक्षेत न ज्ञाति कुलबन्धुषु
अलाभे त्वन्यगेहानां पूर्वं पूर्वं
विवर्जयेत् सर्वं वापि चरेद्ग्रामं।
पूर्वोक्तानामसम्भवे नियम्य प्रय
तो वाचं दिशस्त्वनवलोकयन् स
माहृत्य तु तद्भैक्षं यावदर्थममाय
या भुञ्जीत प्रयतो नित्यं वाग्यतो
ऽनन्यमानसः भैक्षेण वर्त्तयेन्नि
त्यं नैकान्नादी भवेद्व्रती भैक्षेण
व्रतिनो वृत्तिरुपवाससमा स्मृता
इतिकूर्मपुराणे उपरिभागे १२


अध्यायः सायं प्रातः भि
क्षाटनाभावो यथा कारयित्वा स्व
कर्माणि कारुं पश्चान्नवर्चयेत् सा
यं प्रातः गृह द्वारात् भिक्षार्थे।
नावचक्ष्येत इति तत्रैव १५।
अध्यायः ॥ सात्त्विकी यथा
हन्तकार मथाग्रं वा भिक्षां वा
शक्तितो द्विजः दद्यादतिथये ।
नित्यं बुद्ध्येत परमेश्वरं भि ॥
क्षा माहुः ग्रास मात्रं मग्रंतस्मा
च्चतुर्गुणं पुष्कलं हन्तकारंतत्च
तुर्गुणं मुच्यते गोदोहमात्रं का
लं वै प्रतीक्ष्य ह्यतिथिः स्वयं अ
भ्यागतान् यथाशक्ति पूजयेदति
थिं यथा भिक्षां वै भिक्षवे।
दद्याद्विधिवद्ब्रह्मचारिणे दद्याद
न्नं यथा शक्ति ह्यर्थिभ्यो लोभव
र्जितः सर्वेषामप्यलाभे त्वन्नं।
गोभ्यो निवेदयेत् इतितत्रैव ।
१८ अध्यायः ॥
भिक्षाकः पुं भिक्षुकः इतिसि
द्धान्तकौमुदी ॥
भिक्षाकी स्त्री भिक्षुकी इतिमुग्ध
बोधव्याकरणं ॥
भिक्षाचरः पुं स्त्री भिक्षुकः इति
सिद्धान्तकौमुदी ॥
भिक्षाटनं क्ली भिक्षार्थगमनं यथा

अद्रेर्दानववैरिणा गिरिजयाप्य ॥
र्द्धं हरस्याहृतं देवेत्थं जगती ॥
तले स्मरहराभावः समुन्मीलति ॥
गंगा वारिधि मंबरं शशिकला ना
गाधिपः क्ष्मातले सर्वज्ञत्वमधीश्व
रत्वमगमत्त्वां मां च भिक्षाटनं ॥
इत्युद्भटः ॥ ॥
भिक्षाशितं क्ली पैशुन्यं इति ॥
हारावली ॥
भिक्षाशी त्रि भिक्षुकः इत्युणादि
कोषः यथा भिक्षाशी विचरे ॥
द्ग्रामं वन्यैर्यदि न जीवति इति
प्रायश्चित्तविवेकः ॥
भिक्षुः पुं ब्रह्मचार्य्याद्याश्रमचतुष्ट
यान्तर्गतचतुर्थाश्रमी आश्रं शोद्रो।
ऽयं धर्मिपरो धर्मपरश्च ॥ इति
भरतः तत्पर्य्यायः परिव्राट् ॥
२ कर्मन्दी ३ पाराशरी ४ संभ्यी ५
इत्यमरः परिव्राजकः ६ पर ॥
शारी ७ व्रजकः ८ इतिशब्दरत्नाव
ली तस्य धर्मो यथा ॥ भिक्षो।
र्धर्मं प्रवक्ष्यामि तन्निबोधत सत्त
माः वनाद्गृहाद्वा कृत्वेष्टिं सर्व
वेदसदक्षिणां प्राजापत्यां त
दन्ते तु अग्नीनारोप्य वात्मनि सर्व।
भूतहितः शान्त स्त्रिदण्डी सकमण्ड
लुः सर्वारामं परित्यज्य भिक्षार्थी



ग्राम मात्राश्रयेत् अपमत्तश्चरेदिह ॥
स्वं सायाह्ने नाति लक्षितः ॥
रहिते भिक्षुके ग्रामे यात्रा मात्र
मलोलुपः भवेत् परमहंसो वा
एकदण्डी यमादिकृत् सिद्धयोग
स्त्यजन् देह ममतत्वमिहाश्रयात्
योगमभ्यस्यन् मितभुक् परां सिद्धि
मवाप्नुयात् दानातिथिप्रियो ॥
ज्ञानी गृही श्राद्धेऽपि मुच्यते ।
इति गारुडे ९२ अध्यायः ॥
अपिच चतुर्थ आश्रमो भिक्षोः
प्रोच्यते योमनीषिभिः तस्य स्व
रूपं गदतो मम श्रोतुं नृपार्हसि ।
पुत्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराः।
धिप चतुर्थ माश्रम स्थानं गच्छेनि
र्धूतमत्सरः त्रैवर्णिकां स्त्यजेत् ।
सर्वानारम्भानवनीपते मित्रादिषु ।
समोमैत्रः समस्तेष्वेव जन्तुषु नरा
पुजोऽण्डजादीनां वाङ्मनःकर्मभिः ।
क्वचित् युक्तः कुर्वीत न द्रोहं सर्व।
सङ्गांश्च वर्जयेत् एकरात्रस्थिति।
र्ग्रामे पंचरात्र स्थितिः पुरे तथा
तिष्ठेद्यथा प्रीति र्द्वेषो वा नास्य।
जायते यात्रा यात्र निमित्तं व्य
ङ्गारे भुक्तवज्जने काले प्रशस्त
वर्णानां भिक्षार्थं पर्य्यटेद्गृहान्
कामः क्रोधस्तथा दर्पमोहलोभा
दयश्चये तांस्तु दोषान् परित्य
ज्य परिव्राण्निर्ममोभवेत् अभयं।
सर्वं सत्वेभ्यो दत्वाय श्चरते मुनिः
न तस्य सर्वभूतेभ्यो भय मुत्प।
घते क्वचित् कृत्वाग्निहोत्रं स्वश
रीर संस्थं शारीर मग्निंच मुखे जु
होति विप्रस्तु भैक्षोपगतै र्ह
विर्भि श्चिताग्निना स व्रजति स्म लो
कान् मोक्षाश्रमं यश्चरते य
थोक्तं शुचिः सुसंकल्पित बुद्धि
युक्तिः अनिन्धनं ज्योतिरिव प्रशा
न्तं स ब्रह्मलोकं श्रयति द्विजातिः
॥ इति विष्णुपुराणे ३ अंशे ९
अध्यायः वृद्धभेदः ॥ इति
जटाधरः श्रावणीद्वयः इति
राजनिर्घण्टः कोकिलाक्षः इति
भावप्रकाशः ॥
भिक्षुकः पुं स्त्री भिक्षोपजीवी
तत्पर्य्यायः मार्गणः २ याचनकः ३
वनीयकः ४ याचकः ५ इतिज
टाधरः अर्थी ६ इत्यमरः ॥
भिक्षुसंघाटी स्त्री चीवरं इति
हेमचन्द्रः ॥
भी ञि लि भीत्यां इतिकवि।
कल्पद्रुमः ञि भीतो ऽस्ति लि
बिभेति इतिदुर्गादासः ॥
भी गति भूत्यांच इतिकविकल्प

द्रुमः गभीनाति गिभिनाति।
भीतः भीतिः गिनेव आदित्व
सिद्धो न अहणं धादित्वविकल्पा
र्थत्वकारात् भीत्यांच इतिदु।
र्गादासः ॥
भीः स्त्री भयमित्यमरः ॥
भीतं क्ली भयं भययुक्ते त्रि
इतिमेदिनी ।
भीतिः स्त्रीभयं इत्यमरः कंपः
इतिविश्वः ॥
भीमं त्रि भयहेतुः तत्पर्य्यायः
भैरवं २ दारुणं ३ भीषणं ४
भीष्मं ५ घोरं ६ भयानकं ७ भयंक
रं ८ प्रतिभयं ९ इत्यमरः ।
भीमः पुं भयानकरसः यथा भ
यानको भयस्थायिभावः काला
धिदैवतः स्त्रीनीच प्रकृतिः कृ
ष्णोमतस्तत्व विशारदैः इत्यमरटी
कायां भरतः शिवः मध्य
मपाण्डवः अम्लवेतसः इतिमे
दिनी महादेवस्याष्टमूर्त्यन्तर्गता
काशमूर्त्तिः यथा भीमायआका
शमूर्त्तयेनमः इतितिथ्यादितत्वे
शिवपूजाप्रयोगः ॥
भीमनादः पुं सिंहः इतिशब्द
चन्द्रिका ॥
भीमरथः पुं नामसमनुवंशजाता
सरविशेषः सच कर्मेन्द्रविणा ह
रिणाहतः यथा हरिणाकर्मेन्द्र
येण हतो भीमरथो सुरः
इतिगारुडे गयामाहात्म्ये ८६
अध्यायः ॥
भीमरथी स्त्री जनानामवस्थावि
शेषः यथा सप्तसप्ततिके वर्षे सप्तमे
मासि सप्तमी रात्रि भीमरथी
नाम नराणां दुरतिक्रमा इति
शब्दमाला अपिच सप्त सप्तति
वर्षाणां सप्तमे मासि सप्तमी रा
त्रि भीमरथीनाम नराणामतिदु
स्तरा तामतीत्यनरो योऽसौ
दिनानि यानि जीवति क्रतुभि
स्तानि तस्यानिसर्वाणिशनदत्ति
णैः गतिः प्रदत्तिणां विसर्जन्त
नेमंत्रभाषणं ध्यानं निद्रासथा
चाग्रं भीमरथ्याः फलश्रुतिः इति
वैद्यकं नदीभेदः यथा
मलापहा भीमरथी च वेत्रवती प
यष्णा च कृष्णा जलसाम्यगागतोः
इतिराजनिर्घण्टः ॥
भीमविक्रान्तः पुं सिंहः इति
त्रिकाण्डशेषः भयानकविक्रम
वि शिष्टे त्रि ॥
भीमशासनः पुं यमः इतिशब्द
रत्नावली ॥




भीमसेनः पुं मध्यमपांडवः स त
कुंतीगर्भे पवनाज्जातः तत् प
र्य्यायः भीमः वेरयेत्तः २ वृको
दरः ४ वकजित् ५ कीचकजित् ६
किर्मीरजित् ७ जरासंधजित् ८
हिडिम्बजित् ९ कटव्रणः १० नाग
वलः ११ गुराकरः इतिशब्दरत्ना
वली तस्य जन्म विवरणं यथा।
धार्मिकस्तं सुतं लब्धा पांडुस्ता
पुनरब्रवीत् प्राहुः क्षात्रं वलं
ज्येष्ठं वलज्येष्ठं सुतं वृण ततः
स्तथोक्ता भर्त्तात्वायुमेवाजुहाव
सा तस्माज्जज्ञे महावाहु भीमो
भीमपराक्रमः तमप्यति वलं
ज्जातं वायुर्वागाशरीरिणी सर्वे
षां वलिनां श्रेष्ठो जातोऽय मि
ति भारत इदमत्यद्भुतं चासी
ज्जातमात्रे वृकोदरे यदंकात्।
पतितो मातुः शिलांगात्रैरचूर्णं
यत् कुंती व्याघ्र भयोद्विग्ना सह
सोत्पतिता किल नाववुध्यत तं
स्वमुत्संगे सुवृकोदरं वज्र
संहननः सोऽथकुमारो न्यपतत्।
गिरौ पतता तेन शतधाशिला
गात्रैर्विचूर्णिता महाभारते।
आदिपर्वणि पांडवोत्पत्ति
नामाध्यायः कर्पूरभेदः ॥

यथा पोतासो भीमसेन स्तदनु ॥
शिलकरः शंकरावाससंज्ञः पां
शुः पिंजो * ज्ञसारस्तदनु हिमयुता
वालुका जूटिकाच पश्चादस्मा त्त
षार स्तदुपरि सुहिमः शीतलः प
त्रिकाख्या कर्पूरस्येति भेदा गुणा
इस महसा वैसदृशेष्वु दृश्या :
इतिराजनिर्घंटः ॥
भीमहासं क्ली ईडवलं कुडिसक्ता
इतिभाषा इतिशब्दरत्नावली ॥
ग्रीष्महासमपि पाटः ५
भीमा स्त्री दुर्गा इतिशब्दरत्नाव
लीरोचनाख्य गंधद्रव्यं इतिशब्द
चंद्रिका कशा इतिशब्दमाला
भीमादेवी स्त्री दुर्गा यथा पुनस्त्वा
हं यदाभीमं रूपंकृत्वा हिमाचले
रक्षांसि क्षयिष्यामि मुनीनां त्राण
कारणात् तदा मां मुनयः सर्वे
स्तोष्यंत्या नम्रमूर्त्तयः भीमादेवी
निविख्यातं तन्मेनाम भविष्यति
॥ इति मार्कंडेय पुराणे देवी
माहात्म्यं ॥
भीमैकादशी स्त्री भैमीसावमा
घ शुक्लैकादशी भीमद्वादशीत्येन
ख्याताच यथा मत्स्यउवाच पुरा
रथंतरकल्पे परिपृष्टो महात्मना
मंदरस्थो महादेवः पिनाकीब्रह्मणा

स्वयं ब्रह्मोवाच कथ मारोग्य।
मैश्वर्य्यं मनंत ममरेश्वर स्वल्पेन त
पसादेव भवेन्मोक्षो ऽथवानृणां ।
किमन्तानमयादेवत्वत् प्रसादा।
त्पयोत्तज स्वल्पकेनापि तपसाम
हत्फल मिहोच्यते मत्स्य उ
वाच इति पृष्टः स विश्वात्मा ब्रह्मणा
लोकभावनः उमापतिरुवाचेदं ।
मनसः प्रीतिकारकं ईश्वरउवाच
अस्माद्रथंतरात् कल्पात् त्रयोविं
शतिमो यदा वाराहो भविताक
ल्पस्तस्य मन्वंतरे शुभे वैवस्वता
ख्ये संजातेसप्तमे सप्तलोकधृक्
पराख्ये युगं तस्मिन् सप्तविंशति
मेतद्वा तस्यांते सम्रदानीलो ।
वासुदेवो जनार्दनः भारावतर।
णार्थाय त्रिधा विस्तर्भविष्यति द्वै
पायनो मुनि स्तद्वद्रौहिणेयोऽथ
केशवः कंसादि दर्पमथनः केश
वः शोकनाशनः पुरी द्वारवती।
मा नांसाम्प्रतं या कुशस्थली दिव्या
नुभावसंयुक्ता मध्यिवासाय शां।
गिणः त्वष्टा ममाज्ञया ब्रह्मकरि
जगत्पतेः तस्यांकदासीनः ।
सभाया ममितद्युतिः भार्य्याभि
र्वृष्णिभिः सार्द्धं भूभृद्भिर्भूरिदक्षि
णैः कुरुभि र्देवगंधर्वै रभितः

कैटभार्द्दनः प्रश्नास्तु पुराणेषु ।
धर्मसंबंधिनीश्च कथास्तु भीमसे।
नेन परिपृष्टः प्रतापवान् तया
पृष्टस्य धर्मस्य रहस्यस्यास्य भेदा।
कृत भविता स तदा ब्रह्मन कर्त्ता
चैव वृकोदरः प्रवर्त्तकाऽस्यधर्म।
स्य पांडुसूनु र्महावलः यस्य ती
क्ष्णो वृकोनाम जठरे हव्यवाहनः
मया दत्तः धर्मात्मा तेन चासौ।
वृकोदरः उपनीवात्यादशीलस्थना
गायुतवलोमहान् भविष्यत्यजरः
साक्षात् कंदर्पइव बुद्धिमान् धा
र्मिकस्याप्यशक्तस्यतीव्राग्नित्वादुपो
षणे इमं व्रत मशेषाणां व्रताना
मधिकं यतः कथयिष्यति विश्वा
त्मा वासुदेवो जगद्गुरुः अशेषय
ज्ञ फलदमशेषाघ विनाशनं अ
शेष दुष्ट शमन मशेष सुरपूजनं
पवित्राणां पवित्रंच मंगलानांचम
गलं भविष्यंच भविष्याणां पुरा।
णानां पुरातनं वासुदेवउवाच ॥
यद्यष्टमी चतुर्दश्यो द्वादशीषु यथा
रत अन्येष्वपि दिनर्क्षेषु नशक्त
स्त्व मपोषितुं ततः पुण्यामिमां
भीमतिथिं पाप प्रणाशिनीं उ
पोष्य विधिनानेन गच्छेद्विलोः प
रं पदं [illegible]मासस्यदशमी यदा



शुक्लाभवेत्सदा स्नेनाभ्यंजनं कृत्वा
तिलैः स्नानं समाचरेत् तथैव
विष्णुमभ्यर्च्य नमोनारायणायच कृ
ष्णायपादौसंपूज्य शिरः सर्वात्म
नेति च वैकुंठायेति वैकंठ सरः
श्रीवत्सधारिणे शंखिने चक्रिणे
तद्गदिने वरदाय वै सर्वे नारा
यणास्यैवं संपूज्या बाहवः क्रमात्
दामोदरायेत्युदरं मेढ्रं पंचशरा
यवै ऊरूसौभाग्यनाथाय जानुनी
भूतधारिणे नमोनीलायवैजंघे
पादौ विश्वसृजे पुनः नमोदेव्यै
नमः शांत्यै नमोलक्ष्म्यै नमः श्रियै
नमः पुष्ट्यै नमस्तुष्ट्यै हृष्ट्यै
तथा श्रियै नमो विहंगनाथाय
वायुवेगाय पक्षिणे विषप्रमाथि
नेनित्यं गरुडंचाभिपूजयेत् एवं
संपूज्य गोविंद मुमापति विनाय
कौ गंधै र्माल्यैस्तथा धूपै र्भक्ष्ये
नैना विधैस्तथा गव्येन पयसा
सिद्धां कृशरां मधु वायसः सर्पि
षासह भुक्त्वा च गत्वा शतपदं तु
यः न्यग्रोधं दंतधवनमथवाखादिर
ंतथः गृहीत्वा धावयेद्दंता नाचांतः
प्रागुदंमुखैः उपास्या यंतंनीकृत्वा
संध्यामस्तमितेसवौ नमोनारायणाये
तिवामदृशरणंगतः एकादश्यां

निराहारः समभ्यर्च्य केशवं । रा
त्रिं च सकलां स्थित्वा स्नानं च पयसा
पिच सर्पिषा विष्णुदहने हुत्वा ब्रा
ह्मण पुंगवैः सहैव पुंडरीकाक्ष
द्वादश्यां क्षीरभोजनं करिष्या
मि यतात्माहं निर्विघ्नेनास्तु तन्मे
एवमुक्त्वास्वपेद्भूमावितिहासकथां
पुनः । कल्यप्रभाते संजाते ।
नदी गत्वा विशांपते स्नानं कृत्वा
मृदा तद्वत् पाषंडानभिवर्जयेत्
उपास्य संध्यां विधिवत् कृत्वा च
पितृतर्पणं प्रणम्यच हृषीकेश
ममलंचाप्यनीयरं गृहस्य पुर
तोभक्त्या मंडपं कारयेद्बुधः द
शहस्तं मथाष्टौ वा करान्कुर्याद्वि
शांपते चतुर्हस्तां शुभां कुर्या
द्वेदीं मरिनिसूदन चतुर्हस्तप्रमा
णं च विन्यसेत्तत्र तोरणं आरोप्य
कलशं तत्र दिक्पालान्पूजयेत्ततः
मास मात्रेण संपूर्णमयः कलशाजि
नेष्विनः तस्याधार्च शिरसा
धारयेत् सकलां निशां धाराभि
र्भूरिभि र्भूरिफलं वेदविदो विदुः
यस्मात्तस्मात् कुरुश्रेष्ठ धाराध्याख्याः
स्वशक्तिनः तथैव विमोः शिरसि
क्षीरधाराः प्रपातयेत् आरात्रिमा
त्रेकुंडं च कृत्वा तत्र त्रिमेखलं ॥

योनिवक्त्रं च तं कृत्वा ब्राह्मणोर्थव
सर्पिसी तिलांश्च विश्वदेवत्ये ।
मैत्रे रेकाग्नि वन्नरा कृत्वा च वै
स्वं सम्यक् चरुं गोक्षीरसं युतं
निष्पाद्याहं प्रमाणं वैधर्ममाज्ञ्या
प्रपातयेत् तलं कुंभवान् महावी
रस्थापयित्वा त्रयोदश भक्त्या नाना
विधे भुक्त्वान् सितवस्त्रं रलंकृतान्
युक्तानोदुम्बरैः पात्रै पंचरत्न स
मन्वितान् चतुर्भिर्वह्वृचैर्होमस्तत्र
कार्य्य उदङ्मुखैः रुद्रजाप सूक्ता
भिश्चयजुर्वेद परायणैः वेसवा ।
नि च सामानि चत्वारः सामवेदिनः
चरितं वर्दसंहितान्यभितः परि
पाठयेत् एवं द्वादशतान्विप्रान् ।
वस्त्र माल्यानुलेपनैः पूजयेदंगु
लीयैश्च कटकै हेम सूत्रकैः वा
सोभिः शयनीयैश्चविचित्रैः वि
वर्जितः एवं तथानिवाह्या वै ।
गीतमंगलनिस्वनैः उपाध्यायस्य
च पुनर्द्विगुणं सर्वमेवतु ततः
प्रभाते विमले समुत्पन्ने त्रयोदश ।
गावै दधात कुरुश्रेष्ठ सौवर्णा
मुखसंयुताः पयस्विनी शीलवत्य
कांस्यदोहन संयुताः रौप्यखु ।
राः सवत्सा चंदनेनाभिषेचिता :
तांस्तुनेषांततो भक्त्या मत्स्य ।

मोज्येन तर्पितान् कृत्वाथ ब्राह्म
णान् सर्वांनत्रै नाना विधैस्तथा
भक्त्या चात्तार लवणमाल्यानाचवि
सर्जयेत् अनुगम्य पदान्यष्टौ पुत्र
भार्य्या समन्वितः प्रीयतामत्र दे
वेशः केशवः क्लेशनाशनः शिव ।
स्य हृदये विष्णु विष्णोश्च हृदये शिवः
यथांतरं नपश्यामि तथा मस्तु स्व
स्ति चायुषः एव मुक्त्वायतान्कुंभान्
गाश्चैव शयनानि च वासांसि चै
व सर्वेषां गृहाणि प्रापयेद्बुधः अ
भावे बहुशय्यानामेकामपि सुसं ।
स्कृतां शय्यां दद्यात्कुरो भीम
सर्वोपस्कर संयुतां इतिहास ।
पुराणानि वाचयित्वा तिवाहयेत् ।
तद्दिनं नरशार्दूल य इच्छेद्विपुलां
श्रियं तस्मात्वं सत्वमालंब्य भीम
सेन विमत्सरः कुरुव्रतमिदं स
म्यक् स्नेहाद्गुह्यं मयेरितं त्वया
कृतमिदं वीरत्वन्नाम्नाख्यं भविष्यति
साभीमद्वादशी लोके सर्वपाप
हरा शुभा या कल्याणिनी नाम
पुरा कल्पेषु पठ्यते । त्वमादि
कर्त्ता भवसौकरे ः स्मिन्कल्पे महा
वीरवर प्रधान यस्याः स्मरणकीर्तन
मप्यशेषविमष्टपापपरिंदर्शायिषः ।
स्यात् हहाचया मेस्सरसा मपीशा



वेश्या कृता मम भवान्तेषु भ्रा
मीरकस्येति कुतूहलेन सैवोर्वशी
संप्रतिनाकपृष्ठे जातापि सा वै
ऽप्यजितेंद्रियः शौर्य्य वीर्य्य गु
णोपेतो धर्माध्यक्षो विधीयते ॥
पितृ पैतामहो दक्षः शास्त्रज्ञः
सत्यवाचकः शौचयुक्तः सदाकारी
सूपकारः स उच्यते आयुर्वेद।
कृताभ्यासः सर्वज्ञः प्रियदर्शनः
आर्य्यशील गुणोपेतो वैद्य एष
विधीयते वेद वेदांग तत्वज्ञो
जपहोम परायणः आशीर्वाद
परो नित्यमेष राजपुरोहितः ॥
इतिगारुडे ११२ अध्यायः ॥
भृत्या स्त्री वेतनं इत्यमरः ॥
भृमिः पुं वायुविशेषः घूरणावा
तास इतिभाषा जलादिभ्रमणं।
इत्युणादिकोषः ॥
भृश इर य उ अधःपतने इति ॥
कविकल्पद्रुमः इर अभृशत अभ




प्रीन पुष्पादिव्यान्नित्यं उ० इत्य
न्ये य भृष्यति भृष्यन्ति यत्ता
किनीति हलायुधः अभर्ष्टिका
भृष्टा इतिदुर्गादासः ॥
भृशं क्ली अतिशयः तद्वतित्रि
इत्यमरः ।
भृशाम् व्य प्रकर्षार्थः मुद्गरथः
शोभनं इतिशब्दरत्नावली ।
भृषन् पुं पाषाणः इतिशब्द
रत्नावली ॥ ॥
भृष्टः त्रि जलोपसेकविनापक्कः
भाजा इतिभाषा इतिहेमचंद्रः
भृष्टतंडुलः पुं भर्जनविशिष्टधान्य
निकरः चालभाजा इति भाषा।
अस्यगुणाः सुगंधिः कफहारकः
पित्तलो भृष्टतंडुलः इति राज
वल्लभः ।
भृष्टयवः पुं भर्जनविशिष्टयवः य
व भाजा इतिभाषा तत्पर्यायः
धानाः २ इत्यमरः चाट्टकं ३ ।
इतिशब्दचंद्रिका अस्यगुणाधा
ना शब्दे द्रष्टव्याः ॥
भृष्टान्नं क्ली भृष्टतंडुलःमुडिइति
भाषा तत्पर्यायः कुदुरं २
स्पाकं ३ इतिशब्दचंद्रिका ॥
भृष्टिः स्त्री भर्जनं शून्यवाटि।
का इतिमेदिनी ।

भृ गि भृतौ भृजि भर्त्से इति
कविकल्पद्रुमः गि भृणाति भृणीतः
भृणंति भृजि भर्जने इतिदुर्गादासः
भेकः पुं जंतुविशेषः व्याङ् इति
भाषा तत्पर्यायः मंडूकः २।
वर्षाभूः ३ शालूरः ४ लवः ५ दर्दुरः ६
इत्यमरः हरिभूः ७ सालूरः ८
इति तट्टीका प्लवंगमः ९।
व्यंगः १० प्लवगः ११ शालः नद
नः १३ गूढवर्चाः १४ अजिह्वः १५
जिह्वमोहनः १६ इति शब्दरत्ना
वली नन्दकः १७ कृतालयः १८
रेकः १९ इतित्रिकांडशेषः ॥
मंडुः २० हरिः २१ लुब्धकः २२ क
वित पुस्तके लूल कोपिपाठः शालू
कः २३ कटरवः २४ अस्यमांसगुणाः
मधोवलकारत्वं अम तद्देदाह प्र
मेहत्वयकृत्स्वव्व दिनाशित्वंच इति
राजनिर्घंटः भेदः इतिमेदिनी
भेकुटः पुं मत्स्य भेदः यथा।
तस्या भेकट वेकटौ इतिहिर
लकोषः
भेकनिः पुं मत्स्य विशेषः भांगन
इति भाषा अस्यगुणाः मधुरःत्व
प्रीतत्वं हृद्यत्वं श्लेष्मकरत्वं ॥
गुरुत्वंच इतिराजवल्लभः भे
कलिइतिच पाठः ॥

भेकपर्णी स्त्री मंडूकपर्णी इति
केचित्
भेकभुक पुं सर्पः इतित्रिकांड
शेषः ॥
भेकी स्त्री भेकप्रिया तत्पर्यायः
शिली २ गडुपदी ३ वर्षाभ्वी ४
इत्यमरः अन्यपीवंत भेकप ।
र्य्याया एतद्वाचकाः मंडूकपर्णी
हृत्तः इतिरत्नमाला ।
भेडः पुं मेषः अस्यभाषा भेडा
इतिहेमचंद्रः ।
भेडी स्त्री भेडभार्या अवीः अस्या
दुग्धगुणाः चाविकं लवणं स्वादु
स्निग्धोसंचाश्मरी प्रणुत् अहृद्यं
तर्पणं केष्यं शुक्रपित्तकफ प्रदं
गुरुकासेऽनिलोद्भूते केवले
चानिलेवरं इतिभावप्रकाशः ।
भेत्ता त्रि भेदकर्त्ता यथा कुद्दाल
पाणिर्विज्ञेयः सेतुभेत्ता समीप
तः इतिव्यवहारतत्त्वं ।
भेदः पुं शत्रुवशीकरणोपायश्च।
तद्दृयांतर्गत तृतीयोपायः तत्प
र्य्यायः उपजापः २ इत्यमरः ।
परतो विश्लेष्य आत्मसात्करणं ।
भेदः इतिभरतः तद्विशेषो ।
यथा मत्स्यउवाच परस्परंतु
ये द्दृष्टाः क्रुद्धा भीतावमानिताः

तेषां भेदं प्रयुंजीतभेदसाध्या
हिते मताः ये तु येनैव दो
षेण परस्माद्वापराध्यति ते तु
तद्दोषपातेन भेदनीया भृशंत
तः आत्मीयं दर्शयेद्दोषं पर
स्मादर्शयद्भयं पवंहि दर्शयेत्कि
त्रं यथावद्दशमानयेत् संहताहि
विनाभेदं शक्रेणापि सुदुःस
हाः भेदमेव प्रशंसंतितस्मात्ना
य विशारदाः स्वमुखे नाशयेद्भे
दं भेदं परमुखेणच परीक्ष्यसाधु
मन्येनभेदं परमुखात् कृतं भेयाः
स्वकार्य्यमुद्दिश्य कुशलैर्येहिभे
दिताः भेदितास्ते विनिर्द्दिष्टानैव
राजार्थवादिभिः अंतःकोपा
वहिःकोपौ यत्र स्यातां महीक्षि
तां अंतःकोपोमहांस्तत्रनाशकः
पृथिवीक्षितां सामंतकोपो वा
ह्यस्तु कोपः प्रोक्तो मनीषिभिः
महिषी युवराजाभ्यां तथासेना
पति द्विजः अमात्या मंत्रिणश्चैव
राजपुत्रास्तथैवच अंतःकोपो
विनिर्द्दिष्टो दारुणः पृथिवीक्षितां
वाह्यकोपे समुत्पन्ने सुमहत्यां
पि पार्थिवः शुद्धांतस्तु महाभाग
शीघ्रमेव जयीभवेत् अपिशक्र
समो राजा अंतःकोपेननश्यति




अन्तः कोपे समुत्पन्ने तस्माद्देवे
महीक्षितां परतः कोप उत्
पाद्य भेदेन विजिगीषुणा सा
मन्तानां भेदनं कार्यं परेषां वि
जिगीषुणा रक्षश्चैव प्रयत्नेन ज्ञा
तिभेदस्तथात्मनः ज्ञातयः परि
तप्यन्ते सततं परितापयं त
थापि तेषां कर्त्तव्यं सुगम्भीरेण
चेतसा ग्रहणं दानमानाभ्यां ॥
भेदस्तेभ्यो भयंकरः न ज्ञाति
रनुगृह्णाति न ज्ञातिर्दग्धमिच्छ
ति ज्ञातिभिर्भेदनीयास्तु रिपवः।
तेन पार्थिवैः भिन्ना हि शक्या।
रिपवः प्रभूताः स्वल्पेन सैन्येन
निहन्तुं मात्रो सुसंहतानां हि
ततस्तु भेदकार्य्यं रिपूणां नय
शास्त्रविद्भिः इति मात्स्ये राजधर्मे।
१० अध्यायः द्वैधः विशेषः।
विदारणं इति मेदिनी विरेकः
यथाकाशे धूमस्तम्भो वलव ८
ति महतो भेदिभेदोपवासा वके
भेदे च पित्तं सपित्तमतिशा
वारिपानं कफामौ इति हा
रीतोक्तनाटकं ॥
भेदकः त्रि विदारकः विरेचको
षधादिः इष्टकारकः यथा
भेदयति अत्र पदार्थं इष्टककरो

तीति भेदकं नाम्नाशिवः गोत्रेण
गार्ग्यः इति कारकटीकायां दुर्गा
दासः अपि च भेद्यभेदकयोः ॥
श्लिष्टं संबंधो ऽन्योन्य मिष्यते।
द्विष्टो यद्यपि सम्बन्धः षष्ठ्युत्पत्ति
स्तु भेदकात् इति कलापटीकाधृत
भर्तृहरिकारिका ॥ ॥
भेदनं क्ली हिङ्गु इति राजनिर्घण्ट :
विदारणं इति भिदधातो ॥
र्भावे ऽनट् प्रत्ययेन निष्पन्नं ॥
भेदनः पुं अम्लवेतसः शूकरः
इति राजनिर्घण्टः ॥
भेदितः त्रि भिन्नः दारितः इत्य
मरः ॥
भेदी पुं अम्लवेतसः इति राज।
निर्घण्टः भेदकर्त्तरि तद्विशिष्टे च।
त्रि ॥
भेदुरं क्ली भिदुरं वज्रं इति।
त्रिकाण्डशेषः ॥
भेरः पुं पटहः भेरी दुन्दुभिः
इति संक्षिप्तसारोणादिवृत्तिः ॥
भेरिः स्त्री बृहड्ढक्का तत्पर्य्यायः
आनकः २ दुन्दुभिः ३ इत्यमरः
भेरी ४ आनकदुन्दुभिः ५ आनक
दुन्दुभी ६ इति तट्टीकायां भ
रतः ॥
भेरी स्त्री भेरिः इत्यमरटीकायां

भरतः वराह उवाच भेरी।
शब्दं मत्कृत्वा तु यस्तु मां प्रतिबो
धयेत् वधिरो जायते भूमे जन्मै
कञ्च संशयः तस्य वक्ष्यामि सु
श्रोणि प्रायश्चित्तं मम प्रियं
किल्विषाद्येन मुच्येत भेरीताडन
मोहितः यस्य कस्यचिन्मासस्य
शुक्लपक्षे द्वादश्यां आकाश।
शयनं कृत्वा शीघ्रं मुच्येत किल्वि
षात् एतेनैव विधानेन वसुधेक
स्कारयेत् अपराधं न गच्छेत मम
लोकाय गच्छति इति वराहपुराणे
भेरीताडनापराध प्रायश्चित्तं।
भेरुण्डं क्ली गर्भधारणं भयान
के त्रि इति शब्दरत्नावली ॥
भेरुण्डा स्त्री देवताविशेषः य
क्षिणीभेदः इति मेदिनी सा।
देवता काली यथा त्रिकोण
निलया नित्या परमामृतरञ्जि।
ता महाविद्येश्वरी श्वेता भेरुण्डा।
कुलसुन्दरी इति कालीकुलसर्व
स्वे श्रीशिवपरशुराम संवादेऽध्या
यः सहस्रनामस्तोत्रं ॥
भेलं त्रि भीरुः मूर्खः इति।
मेदिनी चंचलः इति शब्दरत्ना
वली ।
भेलः पुं प्लवः मुनिविशेषः इति

मेदिनी भेलकं इति संक्षि।
प्तसारोणादिवृत्तिः ।
भेलकः पुं क्ली नद्यादितरणा।
साधनवस्तु भेला इति भाषा त
त्पर्य्यायः प्लवः २ कोलः ३ उडुपं
४ उडुपं ५ तरणः ६ तारणः ७ ता
रकः ८ इति शब्दरत्नावली त
रीषः ९ इति जटाधरः ॥
भेष ऋ न भये इति कविकल्प
द्रुमः ऋ अवि भेषत् भ भेषति
भेषते बिभेष इति दुर्गादासः।
भेषजं क्ली औषधं इत्यमरः।
अथ भेषज भक्षणसमयाः भेष
ज्यमभ्यवहरेत् प्रभाते प्रायशो।
बुधः कषायांस्तु विशेषेण तत्र
भेदस्तु दर्शितः ज्ञेयः पंचविधः
कालो भैषज्य ग्रहणे नृणां किं
चित् सूर्योदये जाते तथा दिवस
भोजने सायंतने भोजने च मुहु
श्चापि तथा निशि तत्र प्रथमः
कालः प्रायः पित्तकफोद्रेके ॥
विरेक वमनार्थयोः लेखनार्थे च
भैषज्यं प्रभाते नात्र माहरेत्।
अथ द्वितीयः कालः भै।
षज्यं विगुणे ऽपाणे भोजनाग्रे।
प्रशस्यते अरुचौ चित्रभोज्यैश्च।
मिश्रं रुचिरमाहरेत् समान ॥




वाते विगुणे मंदेऽग्नौ वह्निदी
पने दद्याद्भोजन मध्ये च भे
षज्यं कुशलो भिषक् व्यानको
पेतु भैषज्यं भोजनांते समाह
रेत् हिक्का क्षेपक कंपेषु पूर्व
मंते च भोजनात् ॥ अथ तृ
तीयः कालः उदाने कुपिते वा
ते स्वरभंगादि कारिणि ग्रासग्रा
सांतरे देयं भैषज्यं साध्य भो
जने प्राणे प्रदुष्टे साध्यस्य भक्त
स्यांते प्रदीयते औषधं प्रायशो
धीरैः कालोऽयंस्यात् तृतीयकः
अथ चतुर्थः कालः मुहुर्मुहु
श्च तृट् छर्दि हिक्का श्वास गरेषु
वसान्नंच भेषजं दद्यादिति कालश्च
तुर्थकः अथ पंचमः कालः
ऊर्द्ध्वजत्रु विकारेषु लेखने बृंहणे
तथा पाचने शमने देयं मनन्नं
भेषजं निशि इति पंचमः कालः
निरन्नस्य भेषजस्य गुणा माहा
वीर्य्यादिकं भवति भेषजमन्नेन
न हन्यात् आमय मसंशयमाशुवैव
तद्बाल वृद्ध युवती मृदुभिश्च पी
तंग्लानिं परां नयति चाशु बलक्षयं
च सान्नस्य भेषजस्य गुणमाह
वीर्यं विपाकमुपयांति बलं नहिं
स्यादन्नावृतं नच मुहुर्वदनान्निरेति

पतद्धितं स्थविरबालकृशांगनाम्य :
प्राग्भोजनाद्यदशितं किलतच्च त
द्धत् नद्धत् अन्नावृतवत् भेषज
मिति शेषः औषध शेषे भक्तं
भोजन शेषे यदौषधं पीतं न
करोति गदोपशम प्रकोपयत्य
न्यरोगांश्च पीमित्सप लता।
तं लीढादि च अनुलोमोऽनि
लः स्वास्थ्यं तनुत्वाशमनः कृतः
लघुत्व मिंद्रियोद्गारशुद्धिर्जीर्णौ
षधाकृतिः क्लमो दाहोऽङ्गसद
नं भ्रम मूर्च्छा शिरोरुजाः अरतिर्ब
लहानिश्च सावशेषौषधाकृतिः
अथ भेषज मूल्तण विधिमाहचर
कः देवान् गुरून् तथा विप्रान् पूज
यित्वाश्रणम्य च आशिषश्च समारा
ध्य श्रद्धया भेषजं भजेत् रसायन
मिवर्षीणां देवानाममिवामृतं स
धेवोत्तम नागानां भैषज्य मिदम
स्तते ब्रह्मदक्षाश्वि रुद्रेंद्र भू चं
द्रार्कानिलानलाः ऋषयः सौष
धि ग्रामा भूतसंघाश्च पांतु वः इ
त्याशिषः औषधं हेम रजतमृद्गा
जन पात्रस्थितं पिबेदात्मजनस्या
ग्रे अत्र न केनेत्यतः प्रशांतस्तु
पविश्याथ पीत्वा पात्र मधोमुखं नि :
धायपश्च सलिलं ताम्बूलाद्युप।

योजयेत् अथ भेषजानां ॥
विधानानि स्वरसस्तथा कल्कः
क्वाथश्च हिमफांटकौ ज्ञेयाः क
षायाः पंचैते लघवः स्युर्यथोत्तरं
आदौ स्वरस विधिः आहतात्तत्
क्षणात्कृष्टात् द्रव्यात्तस्मात्समुद्भ
वे वस्त्रनिष्पीडितो यश्च स्वरसो र
स उच्यते ॥ अथ कल्कविधिः
द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा
सजलं भवेत् प्रतिप्यापलयेद्ध
स्तेतन्मानं कर्षसंमितं कल्के म।
ध्वृतं तैलं देयं द्विगुणमात्रया सि
तां गुडं समं दद्याद्द्रवा देया श्चतु
र्गुणाः अथ क्वाथ विधिः पानीयं
षोडशगुणं क्षुण्णद्रव्यपले क्षिप
त् मृत्पात्रे क्वाथयेद्ग्राह्यमष्ट
मांशावशेषितं कर्षादौ तत्पले
पावद्दद्यात् षोडशिकं जलं षोड
शिकं षोडशगुणं अथ हिम
विधिः क्षुण्णं द्रव्यपलं सम्यक्ष
ड्भिर्नीरपलैः सृतं निशोषितं हि
मः सस्यात्तथा शीतकषायकः
अथ फांट विधिः क्षुण्णद्रव्यपले
सम्यक्जलमुष्णं विनिक्षिपेत् मृ
त्पात्रे कुडवोन्मानं ततस्तु स्राव
येत्पटात् सस्यात् चूर्णद्रवः फांट
स्तन्मानं द्विपलोन्मितं लोहं सि

ता गुडादीस्तु कर्षमात्रान्विनिःक्षि
पेत् ॥ अथ तंडुलजल विधिः
कंडितं तंडुलपलं जलेऽष्टगु
णे क्षिपेत् भावयित्वा जलं ग्रा
ह्यं देयं सर्वत्र कर्मसु ॥ अथ
मंथ विधिः जले चतुष्पले शीतेक्षु
ण्ण द्रव्य पलं क्षिपेत् मृत्पात्रे।
मंथयेत् सम्यक्तस्माच्च द्विपलं
पिबेत् अथ चूर्ण विधिः अत्यंत
शुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालि
तं तत् स्याच्चूर्णं रजः क्षोदस्तन्मा
त्राकर्ष सम्मिता चूर्णे गुडः समो दे
यः शर्करा द्विगुणा मता चूर्णेषु भा
र्जितं हिंगु देयं नात् क्लेदकृद्भवेत्
अथ भावना विधिः द्रवेण यावता
सम्यक् चूर्णं सर्वं स्नुतं भवेत् भा
वनायाः प्रमाणं तु चूर्णे प्रोक्तं भि
षग्वरैः अथ पुटपाक विधिः
पुटपक्वस्य कल्कस्य स्वरसो गृह्य
ते यतः अतस्तु पुटपाकानां युक्ति
र्वोच्यते मया पुटपाकस्य पाको
यं लेपस्यांगार वर्णता लेपं च।
द्व्यंगुलं स्थूलं कुर्य्याद्वांगुष्ठमात्रकं
काश्मरी वट जम्बादि पत्रैर्वेष्टन मु
त्तमं पलमात्रो रसो ग्राह्यः कर्ष
मात्रं मधु क्षिपेत् कल्क चूर्ण द्रवाद्या
स्तु देयाः कोलमिता बुधैः ॥




अथोसोदक विधिः अष्टमेनांश।
शेषेण चतुर्थेनार्द्धकेनवा अथ
वा क्वाथेनैव सिद्धमुसोदकं व
देत अथक्षीरपाक विधिः।
क्षीरमष्टगुणंद्रव्यात् क्षीरात्रीरं च
तर्गुणं क्षीरावशेषं तत्पीतंमूल
सामोद्भवं नयेत् अथावले।
ह विधिः क्वाथादेर्यत पुनःपाका
त घनत्वं सारस क्रियासोवलेहस्य
लेहस्य तन्मात्रास्यात् पलोन्मिता
॥ अथ वटिकाविधिःवटिका
अथकथ्यंतेनत्रामवटिकावटी मो
दको गुटिका पिंडी गुडो वर्तिस्त
थोच्यते लेहवत् साध्यते वह्नौ।
गुडोवाशर्करावा गुग्गुल्वी ति
पेत्तत्रचूर्णं तन्निर्मिता वटी ॥
अथसंधानविधिः द्रवेषुचिरकाल।
स्थं द्रव्यंयत् संधितंभवेत् आ
सवारिष्ट भेदेस्तत् प्रोच्यते भे
षजोचितं अथ धातुनां शो
धनमारणविधिः तत्रशोधन वि
धिः पत्रलीकृत्य पत्राणि हेम्नो
वह्नौ प्रतापयेत् निषिंचेत्तप्त।
तप्तानि तैले तक्रेच कांजिके।
गोमूत्रे च कुलत्थानां कषाये त
त्रिधा त्रिधा एवं हेम्नाः परेषांच।
धातुनांशोधनं भवेत अथ

स्वर्णस्यमारणविधिः स्वर्णस्यद्विगु
णं सूतमम्लेन सह मर्द्दयेत् तद्गोल
कसमंगंधंनिदध्यादधरोत्तरं गो।
लकंच ततो रुद्ध्वासरावदृढ सं
पुटो त्रिंशद्वनोपले र्दयात् पुटा
न्येवं चतुर्दश निरुत्थं जायते॥
भस्म गंधो देयः पुनः पुनः॥
अथस्नेहपानविधिः स्नेहस्यतवि
धःप्रोक्तो हुतं तैलं वसा तथा
मज्जाच त पिवेन्मर्त्यः किंचिद
भ्युदितेरवौ अथपंचकर्मा ॥
णि प्रथमंवमनं पश्चाद्विरेकस्था
नुवासनं एतानिपंचकर्माणि नि
रूहोत्तरं तथा अथफल।
वर्तिविधिः हस्ताम्पक्रगुदे तिम्वा
मस्तणांगुष्टसन्निभामलप्रवर्ति
नीवर्तिःफलवर्तिश्चसास्मृता॥
अथ नस्यग्रहण विधिःनसंतत
कथ्यते धीरैर्नासाग्राह्यंयदौषधं।
लावनेनस्तकर्मेतिनस्यनाम द्वयं
मतं अथधूमपान विधिः
धूमस्तुषड्विधः प्रोक्तः शामनोहेहण
स्तथा रेचनः कासहावैववामनो
व्रणधूपनः अथगंडूष कवल।
प्रतिसारणविधिः तत्र गंडूषः॥
स्नेहक्षीर कषायादि द्रवैः संपूर्ण
माननं अपूर्यास्थीयते तावद्धि

गंडूष धारणे अथ कवलः
वातपित्तकफघ्नस्य द्रव्यस्यकव
लंसवे अर्द्धनिःक्षिप्यसंचर्व्य नि
ष्ठीवेत् कवलेविधिः अथप्रति
सारणं दन्त जिह्वा मुखानां य
च्चूर्णकल्कवलेहकैः शनैर्घर्षण
मंगुल्यातदुक्तं प्रतिसारणं अथस्वे
दविधिः स्वेद स्तुर्विधः प्रोक्तः।
स्तापोस्म स्वेद संज्ञितः उपनाहो
द्रवः स्वेदः सर्वे वातार्तिहारिणः
अथकर्णपूरण विधिः स्वेद
येत्कर्ण देशं तु किंचित्पार्श्वशा
यिनः मूत्रैः स्नेहैरसैरुष्णैः को
ष्णैः श्रोत्रं प्रपूरयेत् कर्णंच पू
रितं रक्षेच्छतं पंचशतानिवा स
हस्रंवापि मात्राणां श्रोत्रकंठशि
रोगदेः रसाद्यैः पूरणं कर्णे
भोजनात् प्राक्प्रशस्यते तैला
द्यैः पूरणंकर्णेभास्करेऽस्तमु
पागते अथालेप विधिः अ
थालेपस्य नामानिलेपश्लेपनलि
प्तयः दोषघ्नो विषहा वर्ण्यःस्त्र
लेपस्त्रिधा मतः नराणां लेपनं
कुर्वीत शुष्यमाणंनधारयेत्।
अथश्चोनितस्त्रावणविधिः शो
णितं स्त्रावयेज्जंतो रामयंप्रसमी
क्षच प्रस्थं प्रस्थार्द्धमथवाप्रस्था

र्द्धार्द्धमथापिवा शरत्काले स्व
भावेन शोणितं स्त्रावयेन्नरः त
दोष ग्रंथिशोथाद्यानस्त्रुतिपिरण
तनात् अथाश्च्योतन विधिः
क्वाथक्षौद्रासव स्नेह विंदूनां पत्न
पातनं द्वंगुलोन्मीलिते नेत्रे॥
प्रोक्त माश्च्योतनं द्दितं ॥
अथ बिडालकविधिः बिडालको
बहि र्लेपानेत्रे पक्ष्म विवर्जिते॥
तस्यमात्रा परिज्ञेया मुखालेप।
विधानवत् अथतर्पणविधिः।
वातातप रजोहीने वेश्मन्युत्तान
शायिनः आधारौमाषचूर्णेनक्लि
न्नेन परिमंडितौ समौ दृढावस
म्बाधौ कर्तव्यौनेत्र कोषयोः पू
रयेद्घृतन मंडेन विलीनेनसा।
खोदके अथांजनविधिः अथ
सम्यगदोषस्य प्राप्त मंजन माच
रेत् अंजनंक्रियतेनेत्रे तद्द्रव्यं।
वांजनं मतं अथ प्रत्यंजन।
विधिः गतदोषमपेताक्ष प्रथ।
इपत्सम्यगंभवा प्रत्यास्याति ॥
यथा दोषं कार्यं प्रत्यंजनं ततः
इतिभावप्रकाशः ॥ अथ
भेषज करण मल्लादिने तत्रति
थयः विहितभिन्नाः शोभना वाराः
रवि सोम बुध बृहस्पति शुक्राणां



नक्षत्राणि पूर्वफल्गुनी पूर्वाषाढा
पूर्वभाद्रपन्मघाभरण्यश्लेषा विशा
खार्द्राभिन्नानि जन्मर्क्षं च निषिद्धं।
लग्नानि मिथुनकन्याधनुर्मीन सं
ज्ञकानि तत्र गुरुबुधचन्द्रशुक्रे शु
भस्थप्रशस्तानि इति ज्योतिष ।
तत्त्वे ॥
भैषज्यांगं क्ली औषधपानं इति शब्द
चंद्रिका ॥
भैमी स्त्री भीमैकादशी यथा
अथ भैमीविस्तरमीडरे मार्ग
शीर्षे शशधरे माघे मासि प्रजापते ।
ते एकादश्यां सितेपक्षे सो
पवासो जितेंद्रियः द्वादश्यां ।
षट्तिलाचारं कृत्वापापात्प्रमुच्य
ते तिलस्नायी तिलोद्वर्ती तिल
होमी तिलोदकी तिलस्य दाता
भोक्ता च षट्तिलीनावसीदति
मत्स्यपुराणे यद्यद्दृष्टं चतुर्द
श्यां द्वादश्यामथभारत मुन्य
पि दिनं सेव्यं तु शक्रत्वं यथापि
ततः पुण्यामिमां भीम तिथिं
पापप्रणाशिनीं उपोष्य विधि
नानेन गच्छ विष्णोः परं पदं भी
मतिथिं भैमीत्येव ख्याता एकाद
शी इत्येकादशीतत्त्वं ॥
अपि च पितामहस्तवाव माघमा

सेष्युकृपते सप्त्यर्थे तेन पुत्रा पुरा
एकादशी तथा वैषा भीमेन सनृपो ।
षिता आश्चर्य्यं तद्व्रतं कृत्वा पितॄ
णामनृणो भवेत् भीमद्वादशीति
विख्याता पापानां प्रणाशिनी न
तत्रेण विनाश्येषा ब्रह्महत्यादि ना ।
शयेत् विनिहंति महापापं कृत्स्नो
विषयं यथा कृष्णवस्त्रकृतं यद्वत्
कुभार्य्या च पतिं यथा अधर्मं च यथा
धर्मं कुमंत्री च यथा नृपं अज्ञानेन
यथा ज्ञानं शौचं चाशौचनाय यथा
अश्रद्धयाय यथा श्रद्धं सत्यं चैवानृते
यथा हिमं यथोष्णमादित्यादना
ये चार्थसंचयः यथा प्रकीर्त्तनाद्दाने
तपो वै विस्मयाय यथा अशिक्षया
यथा पुत्रो गावो दूरगाने यथा
क्रोधेन च यथा धान्यं यथा विनमा
वर्द्धनात् यथा समीहनात्सत्तानं
फलानां च यतव्रताः तथैव पाप
नाशाय प्रोक्तेयं द्वादशी शुभा
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गना
गमः दुरापहृष्य नानाविनहि हंति
विप्रकरं नचापि नैमिषक्षेत्रं ॥
कुरुक्षेत्रं प्रभासकं कालिंदी ।
यमुना गंगा न रेवा न सरस्वती न ।
चैव सर्वतीर्थानि एकादश्याः समा
नि च नदानं न जपो होमो न चान्यसुकृ
तं ने

कथितं एकतः पृथिवीदानमेक
तो हरिवासरः ततोऽप्यधिका महा
पुण्या इयमेकादशी परा अस्मिन्
वराहवपुषः कृत्वा देहं तु हाटकं
घटोपरि नवे पात्रे कृत्वा वै ताम्र
भाजने सर्वबीजं तु तेषिपाः सित
वस्त्रावगुण्ठिते सहिरण्ये सदीप
ये: कृत्वा पूजां प्रयत्नतः वराहाय
नमः पादौ क्रोडाकृतये नमः कटिं
नाभिं गंभीरघोषाय उरः श्री
वत्सधारिणे बाहुं सहस्रशिर
से ग्रीवां सर्वेश्वराय च मुखं सर्वा
त्मने तु पूज्य ललाटं प्रभवाय च ।
केशाः शतमयूखाय पूज्या देवस्य
चक्रिणः विधिना पूजयित्वा तं कृ
त्वा जागरणं निशि कृत्वा पुराणं दे
वस्य माहात्म्य प्रतिपादकं प्रात
र्विप्राय दत्त्वा तं वाचकाय प्र
भाय च कनक क्रोड सहितं सत्रि
वेदपरिच्छदं पश्चात्तु पारणं कुर्य्या
त्वाति नमः सहहूतः एवं कृत्वा
नरो विप्रान भूयः स्वतपो भवेत्
उपोष्यैकादशी पुण्यां मुच्यते ।
वै ऋणत्रयात् मनोभिलषिता
वाप्तिः कृत्वा सर्वव्रतादिकं इति
गारुडे एकादशी माहात्म्ये १२३
अध्यायः ॥

भैरवं त्रि भयानकं इत्यमरः ॥
अस्य पर्य्यायः भयंकर शब्दे द्र
ष्टव्याः । ॥
भैरवः पुं शंकरः इति मेदिनी ।
भयानकरसः इत्यमर टीकायां
भरतः नटविशेषः इति शब्द
रत्नावली रागभेदः इति हेम
चंद्रः अष्टभैरवा नामान्येति ॥
यथा दैत्याधिपः समुत्पत्य हृ
दोरसि गदां क्षिपन् संस्थितस्तु
महायोगी सर्वाधारः प्रजापतिः
गदापातक्षताङ्कूरि चतुर्धा मृगया
पतन् पूर्वधारा समुद्भूतो भैर
वोऽग्निसमप्रभः विद्याराजेति ।
विख्यातः पद्ममालाविभूषितः त
त्पादतीर्थाधारायाः भैरवः प्रेत ।
मालिनः कामराजेति विख्यातः
कृष्णांजन समप्रभः नागराजेति
विख्यातस्त्वक्माला विभूषितः स्व
तजा दुधिराज्जातो भैरवः शूलभू
षितः स्वच्छंदराजेति विख्यातस्त्वि
न्द्रायुध समप्रभः भूधिरा द्रुधिरा
ज्जातो भैरवः फलभूषितः ख्या
तो लक्षि तराजेति सोऽञ्जनस
मप्रभः ततो भूद्देवराजेति भै ॥
रवः तत्रजादथ उग्रराजो वपुर्वाद्य
तत्तनाडैरवो उपरः एवं हि

समरूपोऽसौकथ्यतेभैरवो स
ने विघ्नराजोऽष्टमः प्रोक्तोभै ॥
रवाष्टकमुच्यते इतिवामन पुरा
णेऽष्टांपकवरप्रदाने भैरव प्रादुर्भा
वे ९७ अध्यायः॥ शार्दूलगो
त्रायंप्रष्टो पूज्यभैरवा यथा
आदौमहाभैरवंच संहारभैरवं
तथा असितांगभैरवंच रुरुंभै
रवमेवच ततःकालंभैरवंचा
क्रोधभैरवमेवच ताम्रचूडं चंद्रचू
डं अंतेभैरवाष्टकं ॥ एतान् सं
पूज्य मध्येच नवपात्रीमपूजये
त् इतिब्रह्मवैवर्त्ते प्रकृतिखंडेउ
गौपाख्याने ६१ अध्यायः ताम्रचू
डचंद्रचूडयोःस्थानेकपालभैरव
रुद्रभैरवौ ज्ञेयौ इतितंत्रेवगणा
पतिखंडे ४१ अध्यायः अपिच।
असितांगोरुरुश्चंडःक्रोधउन्मत्त
संज्ञकः कपालीभीषणश्चैव सं
हारश्चाष्टमः स्मृतः इतितंत्रसारः
शिवगणाधिप भैरवो यथा
नंदी भृंगीमहाकालो वेतालो।
भैरवस्तथा अंगीभूतामहेशस्य (?)
कीर्त्तिता स्तपोधना यैर्मानुष
शरीरेणापिरेतपसा बलात्।
गणानामाधिपत्यंच तेजानेनिरू
पितं इतिकालिकापुराणे ४४ अ

ध्यायः करवीरपुरराजः चंद्र ॥
शेखरपत्नी तारावतीगर्भेमहादे।
वाज्जातपुत्रः सचपुराभृंगी बभू
व पार्वतीशापात्वानरमुखो भूत्वा
भैरव इतिनामनाख्यातः यथा
प्रविवेश ततोदेवी स्वयं तारव
तीतनौ महादेवोऽपितस्यांतु।
कामार्थं समुपस्थितः कामात्सा
तेनस्यातस्मिन्योजातस्तद्वयं अभ
वन्नृपशार्दूलतथा शाखामृगाननौ
ततस्तयोर्नामचक्रेनारदोवचना।
त्रूपज्येष्ठोभैरवनामाभूत् भीरोः
पुत्रोभयंकरः वेतालसदृशः के (?)
स्तावेतालोऽभूत्वाऽपरः (?) इति।
कालिकापुराणे ४९ अध्यायः।
अपिच योऽसौभृंगीहरसुतो म
हाकालोपिभर्गजः तावेव गोरी।
शापेन संभूयनरयोनिजौ वे
तालभैरवौ ज्ञातौ पृथिव्यां नृप
वेश्मनि यथा भृंगिमहाकालद्भुत
पत्नो, भक्तु तथाम्रुगास्यो ऽसौ ॥ (?)
महाभैरवाख्यःसकायःशारभोद्भ ॥
रः भैरवः अथगेवायं गणाध्यक्षो
हराज्ञजः इतिकालिकापुराणे।
५५ अध्यायः हर्जीयाख्य गि
रिस्थभैरवोयथा तन्मध्येभैरवो
देवोभर्गसंगम संभवः हर्जीया

ख्येवरागिरौ स्वर्गसोपम भूमिगः।
योऽसौशरभ रूपस्य मध्य खंडा।
दिभैरवः सएवभैरवाख्यो ऽयं
पंचवक्त्रस्य मंत्रकैः संपूज्यतत्र॥
मतिमासयाति शिव लोकतां ॥
इतिकालिकापुराणे ८१ अध्यायः
भैरवस्यमंत्रो यथा ॥ वेक
लः सपरो हादि षष्ठस्वरसमन्वितः
चंद्रबिंदुसमायुक्तं हयग्रीवस्य बी
जकं भैरवं पांडुनाथस्तुवनमालि।
सरूपिणं वाराहेन तु बीजेन पू
जयेत्तु विधानतः सपरो हावनु
स्वार विसर्गाभ्यां समन्वितो महा
भैरव मंत्रोऽयंभैरवं तेन पूज
येत् इतिकालिकापुराणे ९२ अ
ध्यायः अस्यध्यानं यथा
भैरवः पांडुनाथस्य रक्त गौरस्त्वा
ष्टभुजः गदांपद्मंचशक्तिंच वक्र
चापिकोरणंच बिभ्रद्देवाः पुरो।
भागे पूज्योऽयं विरूपाष्टक ॥
इतितत्रैव ९० अध्यायः ॥ अ
स्यगायत्री यथा महाभैरव विद्म
हे केलिरूपाय धीमहि तन्नःका
मो भैरवस्तदेवीनित्यं प्रचोद।
यात् यथा भैरव रूपस्य गायत्री
मेपतिष्ठिता यथेष्टमांस मद्यादि
भोजनाय मया श्रुतः महाभैरव।


रूपोऽयंतथास्त्री रति संगमे ॥
अयंत वास्य भावेन पूज्यो मया
दिभिःसदा इतिकालिकापुराणे।
११ अध्यायः अथमहाविद्या ॥
दीनां भैरव निरूपणं यथा शिव
उवाच शृणुचार्वंगिसुभगे कालि
कायाश्चभैरवं महाकालं दक्षि
णायाश्चभागे प्रपूजयेत् महा
कालेन वै सार्द्धं दक्षिणारमते स
दा तारायादक्षिणे भागे अक्षो।
भ्यंपरिपूजयेत् समुद्रमथने दे
विकालकूटे समुत्थिते सर्वेदेवाः
सदाराश्च महाक्षोभमवाप्नुः ॥
क्षोभादिरहितं यस्मात्पीतं हा।
लाहलं विषं अतएव महेशानि ॥
अक्षोभ्यः परिकीर्त्तितः तेन सो
हं महामाया तारिणीरमते सदा
महात्रिपुरसुंदर्यादक्षिणे पूजयेत्
शिवं पंचवक्त्रं त्रिनेत्रंच प्रतिव ॥
क्षेत्रेश्वरि तेनसाहंमहादेवी ॥
सदाकामकुतूहला अतएव महे
शानिपंचमीति प्रकीर्त्तिता श्रीम
द्भुवनसुंदर्यादक्षिणेत्र्यम्बकं यजेत्
स्वर्गेमर्त्येच पाताले या चाद्या।
भुवनेश्वरी एतया रमतेतेन अ
म्बक स्तेन कथ्यते सप्तशतिस स (?)
मांख्यातःसर्वतंत्रेषुपूजितः ॥ भै

तथा दक्षिणे भागे दक्षिणामूर्त्ति
संज्ञकं पूजयेत् प्रयत्नेन पंचा
वक्त्रं तमेव हि छिन्नमस्तादक्षिणे
पूर्वे कबंधे पूजयेत्शिवं कबंध
पूजनाद्देवि सर्वसिद्धीश्वरो भवेत्
धूमावती महाविद्याविधवारूपधा
रिणी बगलाया दक्षभागे एकव
क्त्रं प्रपूजयेत् महारुद्र इति विख्या
तं जगत् संहारकारकं मातंगी।
दक्षिणांशे च मतंगं पूजयेत्शिवं।
तमेव दक्षिणामूर्त्तिं जगदानंदका
रकं कमलायादक्षिणांशे विष्णु
रूपं सदाशिवं पूजयेत परमे।
शानि ससिद्धो नात्र संशयः पूज
येदन्नपूर्णायादक्षिणांशे च ब्रह्मरूप।
कं महामोक्षप्रदं वेदं दशवक्त्रं महे
श्वरं दुर्गायादक्षिणे देवि नारद।
परिपूजयेत् नकारः स्फटिकश्चैव
हकारः पालकः सदा रेफः संहा
ररूपस्थाकारः परिकीर्त्तितः अ
न्यासु सर्वविद्यासु ऋषिर्यः परिकी
र्त्तितः सप्तवक्त्रस्याभर्त्ता च दक्षभागे
प्रपूजयेत इति तोडलतंत्रे अथ
प्रथम पटलः अथ भैरव राग
स्य विवरणं हनूमन्मते षड्रागम
ध्ये प्रथमरागः महादेव मुखान्नि
र्गतः अस्य जातिः औडवः अर्थात्

धैवत निषाद षड्ज गांधार मध्यम
मि पंचस्वर मिलितः अस्य ग्रहं।
धैवतस्वरः शरदृतौ प्रातःकाले
अस्य गानसमयः रागमालाया अ
स्याकारः महादेवाकारवत् अर्थात्
संदरसंन्यासी भस्मचर्चितवदनः
जटामस्तकः जटापतत्गंगाजलः
कंकणभूषितहस्तः ललाटचंद्रः
त्रिनेत्रः सर्पवेष्टितस्कंधबाहुः॥
भालतिलकः स्कंधस्य हस्तिचर्म
अथवा द्वीपिचर्मोपविष्टः गलमुंड
मालः त्रिशूलहस्तः अथवास्यपुर
पोषित त्रिशूलः पार्श्वस्य वृषभः।
अस्य रागिन्यः पंच यथा भैरवी
वैराटी मधुमाधवी सिंधवी गंगा
लीच अस्याष्टौ पुत्राः यथा हर्षः ति
लकः पुरीयः माधवः सूहः बंगलेन्द्रः
मधुः पंचमश्च कलानाथमते त
भैरवश्चकर्परागः अस्य रागिण्यः
षट् यथा भैरवी गुर्जरी भाषा
विलावली कर्णाटी रगतंसा वट
हंसी निर्वकैवित् पतन्मते पूर्ववत्
अष्टौ पुत्राः किंतु तिलक पुरीय।
पंचमसूहस्थानेषु देवशाखललि
मालकोश विलावला लितिताः
सोमेश्वरमतेऽपि रागिण्यः षट्
यथा भैरवी गुर्जरी रामकली॥

बंगाली बहुली च तन्मते रागि
ण्यास्सहास्यगानसमयो ग्रीष्मर्त्तुः॥
भरतमते तु अस्यरागिण्यः पंच।
यथा मधुमाधवी ललिता बरारीवा
ह्यकलीभैरवी च तन्मतेपि॥
अस्याष्टौ पुत्राः यथा देवशाखः।
ललितः हर्षः विलावलः माधवः बं
गालः विभासः पंचमश्च यथा
मष्टौभार्य्या यथा सूहा विलावली
सोरठी कुंभारी अंदोही बहुल
गुर्जरी पटमंजरी भैरवी च इति
संगीतशास्त्रे मतांतरे भैरव।
रागस्यभार्य्या यथा बंगाली भै
रवी बरारी मध्यमा मधुमाधवी सिं
धवी च तत्सुता यथा कोशकः
अजयपालः धामः खंभनाथः म
हूः छोलश्च तत्पुत्रवधो यथा
आहेरीवा बहुला सोहिनी रम्भे
ली सहा च अत्रशोभा इति साधु।
पाठः इति नादपुराणं॥
भैरवी स्त्री चामुंडा यथा चामुंडा
चर्चिकाचर्ममुंडामार्जारकर्णिकाक
र्णमोटी महागंधा भैरवी च कपा।
लिनी इति हेमचंद्रः भैरवी।
विशेषा यथा त्रिपुरभैरवी १ स
म्पत्प्रदाभैरवी २ कौलेशभैरवी ३
सकलसिद्धिदाभैरवी ४ भय

विध्वंसिनी भैरवी ५ चैतन्यभैरवी॥
६ कामेश्वरीभैरवी ७ षट्कूटाभैरवी ८
नित्याभैरवी ९ रुद्रभैरवी १०॥
भुवनेश्वरीभैरवी ११ त्रिपुरबाला।
भैरवी १२ नवकूटाभैरवी १३ अन्न
पूर्णाभैरवी १४ आसांमंत्रा यथा
अथ त्रिपुरभैरवीवियद्भृगुजलाश॥
स्या मौक्तिकोविंदुशेखरः वियत्र।
दारिकेंद्राग्निस्थितं वामाक्षि वि
न्दुमत् आकाश भृगुवह्निस्था म
नुः सर्गेन्दुखंडवान्॥ पंचकूटात्मि
काविद्या वेद्या त्रिपुरभैरवी॥१॥
अथ सम्पत्प्रदाभैरवी यथा सो
त्रिपुरावाला तथा त्रिपुरभैरवी॥
संपत्प्रदानामतस्याः स्मरण निर्मल
मानसे शिवचंद्रौ वह्नि संस्थौवा।
रभवे तदनंतरं कामराजं तथा दे
वि शिवचंद्रावितं ततः पृथ्वी।
जां तं वह्न्याढ्यं तार्त्तीयं स्मरवल्लभे
शक्तिबीजमहेशानि शिववह्नी नि
योजयेत् कुमार्य्याः परमेशानि॥
हित्वा सर्गंत्वैवन्त्वं त्रिपुराभैरवी
देवी महासंपत्प्रदाप्रिये॥२॥
अथ कौलेशभैरवी संपत्प्रदा॥
भैरवीवद्विहि कौलेशभैरवी॥
हसाद्यासैवदेवेशि त्रिषु बीजेषु।
र्व्वति रूपेण सहराद्या स्यात्॥



पूजाध्यानादिकं तथा २ अथ स
कलसिद्धिदा भैरवी एतस्या एव
विद्याया आद्यंत रेफ वर्जिते त
देयं परमेशानि नाम्नासकलसिद्धि
दा संपत्प्रदाभैरवीवत् ध्यान पू
जादिकं तथा ४ अथभयविध्वंसि
नीभैरवी संपत्प्रदाभैरवी आ
द्यंते रेफरहिता चेत्तदा भयविध्वं
सिनीभैरवी भवति इतिणा पूर्वो
क्तयादर्शनात् पूजादिकंतु संपत्
प्रदावत् ५ अथचैतन्य भैरवी ।
वाग्भवं बीजमुच्चार्य्य जीवप्राणस
मन्वितं सकलाभुवनेशानीद्वितीयं
बीजमुद्धृतं जीवं प्राणंवह्निसंस्पश
ऋस्वर समन्वितं विसर्गाढ्यंमहेशानि
विद्यात्रैलोक्यमातृका ऋष्या दि
न्यासः शिरसि इतिणामूर्तयेऋष
येनमः मुखे पंक्तिछंदसे नमः
हृदिचैतन्यभैरव्यैदेवतायै नमः
मस्वरीच रुद्राणीपूर्वसिंहासनेस्थि
ता एतस्या एव विद्याया बीजद्वय
मुद्धृतं नदंते परमेशानि नित्य
क्लिन्ने मदद्रवे एतस्याश्चतानीयं
रुद्राणी परमेश्वरि ७ अथ षट्
कूटाभैरवी डाकिनीराकिनी वी
जे लाकिनी काकिनी पुनः
साकिनी ॥


हाकिनी बीजस्याद्यस्य सारसुंदरि
आद्य मैकार संयुक्तं मन्मथीकार
मंडितं शक्र स्वरान्वितं देवि ता
र्तीयं बीजमालिखेत् बिंदु नाद
कलाक्रांतं त्रितयंपीठसम्भवे ८।
अथनित्याभैरवी एतस्या एव वि
द्यायाः षड्वर्णान् क्रमशः स्थितानि
परीतान् वदपोढ विद्येयं भोग
मोक्षदा न्यास पूजादिकं सर्वं म
स्याः पूर्ववदाचरेत् ९ अथ रुद्र
भैरवी शिवचंद्रौमादनान्तं फांतं
वह्निसमन्वितं शाक्तिं भिन्नं बिंदु
नादकलाढ्यं वाग्भवप्रिये संपत्
प्रदाया भैरव्याः कामराजे नदेव
हि सदाशिवस्यबीजंच महा सिद्धा
सनस्य च एषा विद्या महेशानि
वर्णितानैव शाक्ते १० अथ भु
वनेश्वरीभैरवी हसाद्यं वाग्भवं
वाद्यंहसकांतेसौरेश्वरि भुवीजं
शिवचंद्रौ महेशानि भुवनेशी च
भैरवी ॥ अथत्रिपुरबालाभैरवी ॥
प्रथमो बिंदु नामाद्यं त्रैलोक्यस्य
शापी पुनः द्वितीय भृगुसर्गाढ्यो
मनुस्तार्तीय मीरितं एषा बाले
तिख्याता त्रैलोक्य वशकारि। वि
णी १२ अथ नवकूटाबाला
बालावी ॥

८ म त्रयं देवि कूट त्रयंनवाक्षरी
विद्यत् कूटत्रयंदेवि भैरव्या नव
कूटकं १३ अथान्नपूर्णा भैरवी।
प्रणवं भुवनेशानी श्रीबीजंकाम
बीजकं हृदन्तेभगवत्यंत माहे
श्वरि पदं ततः अन्नपूर्णेद्वयुगलं
विद्ययं विद्यादक्षरी १४ इति
तंत्रसारभैरवीमंत्र परिच्छेदः॥
भैरवी स्त्री रागिणीविशेषःसाच
भैरवरागस्य पत्नी यथा भैर वी
कौशिकीचैव भाषावेलावली त
था वंगालीचेतिरागिण्यो भैर
वस्यैववल्लभाः मतांतरे मालव
रागस्यपत्नी यथा धानसी माल
सीचैवरामकीरी चसिंधुडा आ
शावरी भैरवी च मालवस्यप्रिया
इमाः अस्याध्यानं यथा सरो
वरस्था स्फटिकस्यमंदिरे सरोरु
हैः शंकर मर्चयंतीतालप्रयोगा
प्रतिबद्ध गीति गौरीतनु नीरद
भैरवीयं अस्या गानसमयः सू
र्योदयकालः यथाविभाषा ललि
ताचैव कामोदा पटमंजरी रा
मकीरी रामकेली वेलावारी च
गुर्जरी देशकारीच सुभगा पं
चमी च गरागरीभैरवी शाख
कौमारी रागिण्यो दश पंच च

एताः पूर्वाह्ण काले तु गीयंते
गायनोत्तमैः इतिसंगीतदा ॥
मोदरः हनुमन्मते एषा
संपूर्णजातिः अस्याः सप्तस्वर वि
न्यासक्रमः मध्यमपंचमधैवत नि
षाद षड्जऋषभ गांधारांतः अ
स्याग्रहं मध्यम स्वरः शारदीतोऽभा
ते अस्यागानसमयः रागमाला।
यां अस्याः स्वरूपं अल्पवयस्कास
रूपा स्तनेत्रा विस्तारवदना ॥
पिंगलकेशा कोमलांगी रक्तव
र्णा श्वेतवस्त्रा गलशोभित च
म्पकमाला प्रफुल्लपद्मयुक्त पर्वत
गुहायांशिवपूजापरायणा नेत्र
मंजीरवादका गायंति च ॥ क
लनाथसोमेश्वर भरतमते छेदं ॥
भैषजं क्ली लावकपक्षी इतिजटा
धरः भेषजंच ॥
भैषज्यं क्ली औषधं इत्यमरः
भैक्षं क्ली भिक्षासमूहः इत्यमरः
अपिच भिक्षाशनमनुद्योगात्
प्रान्तेनाप्यनिमंत्रितं अयाचितं
तेनैतत् भोक्तव्यं मनुरब्रवीत्।
इतिप्रायश्चित्ततत्वधृत उशनसो
वचनं ॥ ॥
भैक्षजीविका स्त्री भिक्षयाजीवेना
पायः तत्पर्यायः पैंडिन्य २॥


इति त्रिकाण्ड शेषः
भैक्षभुक् त्रि भैक्षाशीभिक्षाशी
भैक्षं भुक्तक्रियः इति कर्त्तरि
क्विप्प्रत्ययेननिष्पन्नः ॥
भो व्य संबोधनं तत्पर्य्यायः
प्याट् २ पाट् ३ अंग ४ हे ५ है ६
इत्यमरः हंसो ७ हे ८ हो ९
अरे १० अये ११ अयि १२ इति
भरतः प्रश्नः विवादः इति
शब्दरत्नावली ॥
भोक्तव्यं त्रि भोजनीयं भोग्यं
यथा यत्नेन भगिनीहस्ताद्भोक्त
व्यं पुष्टिवर्द्धनं इति तिथ्यादित
त्वे यमलाहव्रतेलोकाराधानोक्ती
कुण्डवर्त्तिकापाशोते ऽपिन भो
क्तव्या कुण्डवर्ती कलत्त्विका इ
तिकर्म्मलोचनेच ।
भोक्ता त्रि भोजनकर्त्ता यथा
यत्नेऽपरो हव्यसमस्तकव्य भो
क्ता व्यायात्माहरिरीश्वरोऽव्य इति
श्राद्धप्रयोगतत्वं सुखादिभोग
कर्त्ता यथा कर्त्ताचदेहीभोक्ता
चआत्मा भोजयितासदाभोगो
विभव भेदस्यनिष्कृतिर्क्रियेव
च इतिब्रह्मवैवर्त्ते प्रकृतिखं
डे २७ अध्यायः ॥
भोक्ता पुं विटः यथाभाविम्
भोजनं भोक्ता सहितसर्वगदादि
जः इति महाभारते तस्यसहस्र
नामस्तोत्रे भर्त्ता इति हेम
चंद्रः । ॥
भोगः पुं सुखं स्त्र्यादिभृतिः
पण्यस्त्रीणां भृति भाटिः अहि
ना हस्तप्राप्ति कर्म्मकराणांवभृ
तिः सर्पस्यफटा सर्पशरीरं ॥
इत्यमर भरतौ धनं पालनं ॥
अभ्यवहारः इति मेदिनी ।
सर्पः देहः मानं इति शब्द
रत्नावली पुण्य पाप जनन
योग्यकालः यथाप्रतीता नाग
तो भोगानाद्यः पेचदशास्तृतः
इतितिथ्यादितत्वेसंक्रांति प्रक
रणे भूम्यादीनां ॥ भोगो ॥
यथा त्रिपुरुष भोगमाहव्यासः
प्रतिलामदेन यद्युक्तं तत्त पुत्रेण
विनाचनं नोविनायस्यपित्राव
तस्य भोग त्रिपोरुषः पिता
पितामहो यस्यजीवेचप्रपिता ।
महः त्रयाणां जीवतां भोगो ।
विज्ञेय स्त्वेक पूरुषः नारदः
तथारुढ विवादस्यप्रेतस्य व्यव
हारिणः पुत्रेणसोऽर्थः संशो
ध्यो न तं भोगो विवर्ज्जयेत् ॥
इतिव्यवहारतत्वं ॥

विभवभेदः यथा कर्त्ताच देही
भोक्ताच आत्मा भोजयिता सदा
भोगो विभवभेदस्य निष्कृति र्क्रि
क्रियेवच इतिब्रह्मवैवर्त्ते प्रकृ
तिखंडे २३ अध्यायः ॥
भोगगृहं क्ली वासगृहं यथा वा
सागारं भोगगृहं कन्यापन्याट
निष्कुटाः इतिहेमचंद्रः ॥
भोगदेहः पुं स्वर्ग नरकभोगा
र्थं सूक्ष्मशरीरं यथा हतेसपिंडी
करणेनरः संवत्सरात् परं प्र
तदेहं परित्यज्य भोगदेहं प्र
पद्यते इतिश्राद्धतत्वं अपि
च भूतदेहविवरणं कथयामि य
थागमं पृथिवी वायुराकाशस्ते
जस्तोयमितिस्फुटं देहिनां देह
बीजंच स्रष्टुः सृष्टिविधौपरं पृथि
व्यादिपंचभूतै यो देहो निर्मि
तोभवेत् सकृत्रिमो नश्वरः भ
स्मसात्च भवेदिह वृद्धांगुष्ठप्र
माणंच योजीव पुरुषः कृतः विभ
र्त्ति सूक्ष्मदेहंतं तद्रूपं भोग हेत
वे सदेहो न भवेद्भस्मज्वलदग्नौ
यमालये जले न नष्टोदेहीवा
प्रहारे सचिरे कृते न शस्त्रे च
न वासे चन तीक्ष्णकंटके न
था तप्तद्रवे तप्तलोहेतप्तपाषाणएव
च प्रतप्त प्रतिमाश्लेषेऽप्यत्युच्चे ।
पतनेऽपिच नदग्धो न भग्नस्य
भुंक्ते संतापमेवच कथितं देह
वृत्तांत कारणंच यथा गमं इति
ब्रह्मवैवर्त्ते प्रकृतिखंडे २९ अध्या ।
यः भोगपालः पुं अश्वरक्षकः इति
शब्दमाला भोगरक्षके त्रि ॥
भोगपिशाचिका स्त्री क्षुधा इति
हारावली ॥
भोगभूमिः स्त्री सुखस्थानं भारत
वर्षातिरिक्तवर्षं यथा तत्रापि
भारतंश्रेष्ठं जम्बुद्वीपे महामुने
यतोहिकर्मभूरेषा ततो ऽन्या
भोगभूमयः इतिविष्णुपुराणे २
अंशे ३ अध्यायः ॥
भोगवती स्त्री पातालगंगानाग
पुरी इति मेदिनी ॥
भोगवान् पुं सर्पः इतिमेदिनी
नाट्यं गानं इति त्रिकाण्ड ।
शेषः भोगविशिष्टे त्रि ॥
भोगसद्म क्ली वासगृहं यथागर्भा
गारं वासगृहं भोगसद्मापि वाच
कं इति शब्दरत्नावली ॥
भोगार्हं क्ली धान्यं इति राज
निर्घंटः ॥
भोगावली स्त्री स्तुतिपाठकस्य
स्तुति इतिजटाधरः नागपुरी इति



हेमचन्द्रः ।
भोगावासः पुं वासगृहं इति
हारावली ।
भोगिकः पुं अश्वरक्षकः इति
शब्दमाला ।
भोगिकान्तः पुं वायुः इति त्रिका
ण्डशेषः ॥
भोगिनी स्त्री महिषीभिन्ननृपप
त्नी इत्यमरः ॥
भोगिवल्लभं क्ली चन्दनं इति रा
जनिर्घण्टः ।
भोगी पुं सर्पः इत्यमरः ग्राम
णीः नृपः इति मेदिनी ।
नापितः इति विश्वः वैयाह
त्रिकरः इति हेमचन्द्रः ।
भोगीन्द्रः पुं अनन्तदेवः इति
भोगीशः शब्दरत्नावली ।
भोग्यं क्ली धनं धान्यं इति
राजनिर्घण्टः भोगार्हे त्रि आ
धिभेदः यथाह नारदः विश्रम्भ
हेतवश्चैव प्रतिभूराधिरेव च
आधिक्रियत इत्याधिः सविज्ञेयो
द्विलक्षणः कृतकालोपनेयश्च
यावद्देयोद्यतस्तथा सपुनः द्वि
विधः प्रोक्तो गोप्यो भोग्यस्त
थैव च गोप्याधिस्तृतीयः भो
ग्यसाधिः फलभोग्यपदे द्रष्टव्यः
तद्यथा कालेकालकृतो नश्येत्
फलभोग्यो न नश्यति फलं
भोग्यं यस्य सौफलभोग्यः तं
श्रामदिः सन कदाचिदपि न
श्यति इति मिताक्षरायां व्यव
हाराध्यायः ।
भोग्या स्त्री वेश्या इति राज
निर्घण्टः भोग्या भूः इति ॥
बोपदेवः ॥
भोजः पुं स्वनामख्यातदेशः भो
जपुर इति भाषा तत्पर्यायः
भोजकटः २ इति शब्दरत्नावली ।
धारानगरस्य राजविशेषः त
स्य वृत्तान्तो यथा धारानाम नग
र्यां सिन्धुलसंज्ञो राजा आसीत
तस्य राज्ञी सावित्री तया वृद्धा
वस्थायां भोजनामपुत्रो जातः स
यदा पंचवर्षवयस्कस्तदा तत्पिता
आत्म मरणकालं विदित्वा भ्रात्रे
मुंजाय राज्यं ददौ तदुत्संगे ॥
भोजं च मुमोच ततो राजि प
श्लोकं प्राप्ते कियत्कालानन्तरं ।
सभायां कश्चिद्दरम्भविज्ञाति ।
हिरागत्य मुंजं प्राह राजन् भोज
स्य भाग्योदयं वक्तुं विरिंचि र
पिन समर्थः कोऽहं वराकउदरम्भ
रिर्ब्राह्मणः तथापि वदामि भो

ज मितः प्रेषय ततो राजाज्ञया
भोजे ऽध्ययनशालां प्राप्ते आह
यथा पंचाशत्पंचवर्षाणि सप्त
मासा दिनत्रयं भोजराजेन भोक्तव्यं
सगौड़ं दक्षिणापथं इति श्रुत्वा
मुंजराजोऽचिन्तयत् यदि राजलक्ष्मी
भोजं गमिष्यति ततोऽहं जीव
न्नपि मृतः ततो राजा मंत्रयित्वा
वंगालाधीश्वरं महाबलं वत्सराज
माहूय निर्जने तं प्राह वत्सराज
त्वया भोजं त्रिभुवनेश्वरी वि
पिने हन्तव्यः वत्सराजः भोजकुमा
रोपाध्याय माहूय प्राह विप्र भो
जमानय ततो विदितवृत्तान्त भोजं
कुमारं वहिरानेतुं तवका शक्तिः
ततो वामचरणपादुकामादाय भो
जेन भालदेशे हतो वत्सराजः
प्राह भोजकुमार वयं राजादे
शकारिणः इत्युक्त्वा यथार्थं व
लात् वत्सराजेन निशायां विपिने
भोजे नीते वत्सराजस्य भ्राता भो
जस्य वधोद्यमसमये एकमेव सुहृ
द्धर्मो निधनेऽप्यनुयाति यः शरी
रेण समं नाशं सर्वमन्यद्धि ग
च्छति इत्युक्तं निशम्य वत्सराजो
वैराग्यमापन्नो भोजं तमस्वसद्म
प्रच्छन्नं रथे निवेश्य गृहमागत्य
भूमि गृहान्तरे भोजं रक्षित्वा कृत्रि
मं भोज मस्तकं कारयित्वा राजान
मागत्य नत्वा प्राह श्रीमता यदादिष्टं
तन्मया कृतं राजपुत्र वधं श्रुत्वा
राजा तं प्राह वत्सराज पुत्रेण खड्ग
प्रहारावसरे किमपि उक्तं वत्स
राजः प्राह देव किमपिपत्रं प्रे
षित मस्ति तदिति गृहाण शिरश्च
दर्शयति ततो भोजमस्तकं दृष्ट्वा
राजा हस्ते मांधाता च महीप ।
तिः कृतयुगे ऽलंकार भूतो गतः [सेतुर्येन महोदधौ विरचितः क्वासौ]
दशास्यान्तकः अन्ये चापि युधिष्ठिर
प्रभृतयो यावद्भवान् भूपते नैके ।
नापि समं गता वसुमती मन्ये त्वया
यास्यति इति भोजकृत श्लोकं
पठित्वा पपात च ततो राजपंडि
तमानीय मया पुत्रो हतः प्रायश्चि
त्तमुच्यतां मित्युवाच ततस्ते ऊचुः
राजन् सवासा वह्निमाविश ततो
राज्ञो वह्निप्रवेशे निश्चिते सति
तद्वार्त्तां श्रुत्वा नृपद्वारमागत्य वत्स
राजो बुद्धिसागरं प्राह तातं म
या भोजो न मारितः बुद्धिसागरश्च
तस्य कर्णे किमपि कथयति ततो
वत्सराजो निष्क्रान्तः ततस्तन्मुहूर्त्तेन




साक्षान्महेश्वर इवैकः कापालिक आगतः तं वीक्ष्य बुद्धिसागरः प्राह योगिन् कुत आगम्यते कापालिके त्वयि जगच्चमत्कारी कलाविशेष औषधिविशेषो वा अस्ति ततो राजप्याहमपासह साते पुत्रे रते कापालिकः प्राह राजन् माभैषीः पुत्रस्ते नाथ प्रसादेन न मरिष्यति शानस्त्वशृहं स्वयमेव समेष्यति परं श्मशानभूमौ बुद्धिसागरमंत्रिणा सह होमद्रव्यं प्रेषय कापालिकेन यदुक्तं तत्सर्वं राज्ञा सम्पाद्य बुद्धिसागरः प्रेषितः ततस्य राज्ञोगृहत। यावत्स राजगृहाद्भोजस्तत्रवदी पुलिनं नीतः योगिना भोजकुमारो जीवित इति किंवदन्ती सर्वत्राप्य जायत ततः योगाभ्यासैः परिहृतो भोजो राजभवनमागतः ततस्तमालिंग्य रुदन् मुंजे निवार्य भोजः स्थाने ततो राजा लज्जावनत ग्रीवः स्वकीयसिंहासने भोजमुपवेश्य राज्यं दत्वा वनं गतः ततो मुंजे वनं प्राप्ते बुद्धिसागरे स्वात्यमात्यं विधाय भोजः स्वयं राज्यं सार्वं बुभुजे ततो राजसभायां सहस्रशो बुधवरा द्विजाः समाजग्मुः

ततो राजा अमात्यमाह लत्तो महाकवेर्देयं तदर्द्धं विप्रस्य च देयं ग्राम्यकवेर्वत्स तस्या प्या। दै तथावह मिति ततः क्रमेण वररुचि सुबंधु बाणामरराममदे वहरिवंश शंकर कलिंगकर्पूर विनायकमदन विद्याविनोदको किल तारेन्द्र प्रमुखाः सर्वशास्त्र विचक्षणाः सर्वज्ञा इव राजसभा महर्निशं मलंकुर्वन्ति कियत्कालानन्तरं कालिदासकवौ समागतेन तेन सार्द्धं राजः परमा प्रीतिरजायत अन्ये विद्वांसः कालिदासं वेश्यालम्पटं विदित्वा सर्वे भावेन वैरं चक्रुः न किंचित्सा। भायां स्पृशन्ति न कोपि वदति किंतु भोजनृपतिस्तेन सार्द्धं परमप्रीतो बभूव अन्येषां यदि तानामागमनं तेषां यद्यपि समस्यापूरणानि तथापि बहूलत्त्व हादिनाति वर्णनं च ग्रन्थशेष पर्यन्तमस्ति तद्ग्रन्थ विस्तरभयान्न। लिखितं इति भोजप्रबन्धः पुस्तकात संकलितं पैन्द्रजालिक विद्या। भोजविद्या वदेत्ति ॥

भोजकटः पुं भोजदेशः इति शब्दरत्नावली ॥

भोजनं क्ली कठिनद्रव्यस्य गला। धःकरणं तत्पर्यायः जग्धिः २ जेमनं ३ लेपः ४ आहारः ५ निघसः ६ न्यादः ७ इत्यमरः जमनं ८ विघसः ९ इति तट्टीका अभ्यवहारः १० प्रत्यवसानं ११ अशनं १२ स्वदनं १३ निगरः १४ इति राजनिर्घण्टः अथ भोजन गुण विधानादि भोजनाग्रे सदा पथ्यं जिह्वा कंठ विशोधनं अग्निसं। दीपनं हृद्यं लवणाईक भक्षणं आयुहीनेगुरेरोगा मृत्सुलौ नो विदाहिषु आरोग्यकटुतिक्तेषु। वलं मांसे पयःस्वच आनारद्व। गुणाधिकं पिष्टादष्टगुणं पयः पयसोऽष्टगुणं मांसं मांसादष्ट गुणं घृतं घृतादष्टगुणं तैलं मर्दनात्तच भक्षणात् आहारः प्रीणनः सद्यो बलकृद्देहधारणः आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुखः कुक्षे द्वे अन्नेन भागौ द्वावेकं पानेन पूरयेत् वायोः संचारणार्था। चचतुर्थमवशेषयेत् इत्येषा वगतं वामं शौचेनेवाहरेज्जलैः कुर्यात्तर्निर्गतं ताहि सुखस्या।

निष्ठगंपतो भुक्त्वा पाणितलं दृष्ट्वा चक्षुषो र्यदि दीयते अचिरेणैव तद्वारि तिमिराणि व्यपोहति भुक्त्वा चम्पकं वामंदत्वाकृतो ततः पठेत् भुक्तं मद्दृष्टं हस्तेन वैश्वानर मुखेन च गरुडस्य च कण्ठेन समुद्रस्य च वह्निना वातापिर्भक्षितो येन पीतो येन महोदधिः यन्मया खादितं पीतं तदगस्त्यो जरयिष्यति पठित्वा ततस्तथासीनः तूर्णं निष्ठदनाकुलः भुक्त्वा पादशतं गत्वा वामपार्श्वेन संविशेत् एवं स्वयोगतं चात्रं। सुखं तिष्ठति जीर्यति भुक्तोप। शिवनस्त्वदं शयानस्य वपुर्भवेत् आयुश्चक्रमणस्य मृत्युर्धावति धावतः इति राजवल्लभः ५ अपिच ततो भोजनवेलायां कुर्यान्मंगलदर्शनं तस्य प्रदक्षिणं नित्यमायुर्धर्म विवर्द्धनं लोकेऽस्मिन् मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः पादुकारो ॥ हणं कुर्यात् पूर्वं भोजनतः पर पादरोग हरं वृष्यं चक्षुष्यं वा युष हितं शरीरे जायतेनित्यं। वोद्धव्यानां वहुविधा वुभुक्ता॥



च पिपासा च सप्तमासरतस्य।
हा भोजनेच्छाविघातात् स्यादंगम
र्दोऽरुचिः श्रमः तंद्रा लोचनदौर्ब
ल्यं धातुदाहो बलक्षयः विधा
तेन पिपासायाः शोषः कंठास्य यो
र्भवेत् श्रवणस्यावरोधश्च रक्तशो
षो हृदि व्यथा निद्राविघातेन तो
जृम्भा शिरोलोचनगौरवं अंग
मर्द स्तथा तन्द्रास्यादपाक एव
च अभुक्तितानयोः स्याति तस्मा
द्दारेन्धनक्षयात् मंदीभवति का
याग्निर्यथा वाग्निर्निरिन्धनः आहारं
पचति शिखी दोषानाहारः पच
ति दोषक्षये च धातून्पचति धा
तुक्षये प्राणान् आहारः प्री
णनः सद्यो बलकृद्देह धारणः
स्मृत्यायुः शक्ति वर्णौजः सत्वशोभा
विवर्द्धनः यथोक्तगुणसम्पन्नमुप
सेवेत भोजनं विचार्य दोष
कालादीन् कालयोरुभयो रपि
उभयोः कालयोः प्रातः सायं च
तथा च सायं प्रातर्मनुष्याणामशा
नं श्रुति चोदितं नान्तरा भोजनं।
कुर्यादग्निहोत्रसमो विधिः प्रातः
प्रथम यामादुपरि द्वितीययामार्द्ध
र्वाक् तथा च याममध्ये न भोक्त
व्यं यामयुग्मं न लंघयेत् यामम

ध्येरसोत्पत्ति र्यामयुग्माद्बलक्ष
यः अमपक्वत्वसम्भवति पक्वेषु
रसदोषमलेषु च कालेवाप्यरिवा
काले सोऽन्नकाल उदाहृतः ॥
रसादीनां पाकं लक्षणमाह उद्गा
र शुद्धिरुत्साहो वेगोत्सर्गो य।
थोचितः लघुता क्षुत्पिपासा च
यदाकालः स भोजने स्यात
माह आहारं विजने कुर्यान्निर्हो
रमपि सर्वदा उभाभ्यां लक्ष्मये
नः स्यात् प्रकाशे हीयते श्रिया
निर्हारो मलमूत्रोत्सर्गः अन्यच्च।
आहार निर्हार विहार योगाः स
दैव सद्भिर्विजने विधेया इति
भोजने येषां दृष्टिर्निवारणीया ता
नाह हीनदीन क्षुधार्त्तानां पाप
पैशुन्य रोगिणां कुक्कुटादिश्वानां
दृष्टि भोजने नैव शोभना ॥
येषां दृष्टिः शुभदा तानाह पितृ
मातृ सुहृद्वैद्य पापपक्षहंस बर्हिणां
सारसस्य चकोरस्य भोजने दृष्टि
रुत्तमा कथंचित्तु दुष्ट दृष्टिपा
ते तद्दोषशान्तये ब्रह्मादीन्स्मरेत्।
तद्यथा अन्नं ब्रह्मरसो विष्णु र्भो
क्ता देवो महेश्वरः इति संचिन्त्य
भुंजानो दृष्टिदोषो न बाधते ॥
अंजनागर्भ संभूत कुमारब्रह्मचा

रिणं दृष्टिदोष विनाशाय हनुमंतं
स्मराम्यहं ॥ भोजन माह
दोषहृद्दृष्टिदं पथ्यं हैमं भोजन
भाजनं रौप्यं भवति चक्षुष्यं
पित्तहृत् कफवातकृत् कांस्यं
बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनं
पैत्तलं वात कृद्रूक्षमुष्णं कृमिकफ
प्रणुत् आयसे कान्तपात्रे च भो
जनं सिद्धिकारकं शोथ पांडु
हरं बल्य कामलापह मुत्तमं
शैलजे मृन्मये पात्रे भोजनं श्री
निवारणं दारुजे विशेषेण रु
चिदं श्लेष्मकारि च पात्रे पत्रम
यं रुच्यं दीपनं विष पाप हृत्।
जलपात्रन्तु ताम्रस्य तदभावे मृदो
हितं पवित्रं शीतलं पात्रे च
हितं स्फटिकेन यत् काचेनरचितं
तद्वत्तथा वैदूर्यसम्भवं भो
जनाग्रे सदा पथ्यं लवणार्द्रकभक्ष
णं अग्नि संदीपनं रुच्यं जिह्वा
कंठ विशोधनं लवणं सैन्धवं
ज्ञेयं आर्द्रकन्तु कटुकमपि पित्त
विरोधि मधुरपाकित्वात् ।
अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं र
सं मध्येऽम्ललवणौ पश्चात्कटु
तिक्तकषायकान् फलान्यादौ सम
श्नीयात् दाडिमादीनि बुद्धिमान् वि


नामोचाफलं तद्वत्वर्ज्जयित्वा च कर्क।
टी मृणाल बिस शालूक कंदेक्षु
प्रभृतीनपि पूर्वमेव हि भोज्यानि
न तु भुक्ता कदाचन गुरुपिष्टमयं
द्रव्यं तंडुलान् पृथुकानपि न जातु
भुक्तवान् खादेन्मात्रां खादेद्बुभुक्षि
तः दृष्टपूर्वं समश्नीयात् कठिनं
प्राक् ततो मृदु अंते पुनर्द्रवाशीत
बलारोग्येण न मुंचति अयमर्थः
प्राक् हृत पूर्वं कठिनं समश्नीयात
यथाकाश्यपाद्विवासिनः प्रथम संभ
जनां हृत पूर्वं रोटिका भुंज
ते ततो मृदु सपूपादिक मोदनं।
भुंजते अंते पुन द्रवाशी भोज
नांते दधि तक्र दुग्धादि भुंजते
यद्यत् स्वादुतरं तहि विदध्यादुत्त
रोत्तरं भुक्ता यत्प्रार्थ्यते भूय
स्तदुक्तं स्वादु भोजनं स्वादन्नस्य।
गुणमाह सौमनस्यं बलं पुष्टिमुत्
साहं रसनासुखं स्वाद संजनय।
त्यन्न मस्वादु च विपर्ययं अत्यु
ष्णन्नं बलं हंति शीतं शुष्कं च दुर्जरं
अतिक्लिन्नं ग्लानिकरं युक्तियुक्तं हि
भोजनं अतिद्रुताशिना हानो ॥
गुणान् दोषान् विंदति भोज्यं ॥
शीतमद्यं च स्यादिलम्बितमश्नतः
गुरुत्रि विधं तन्निवारयन्नाह ॥

मंदानलो नरोद्रव्यं मात्रा गुरु
विवर्जयेत् स्वभावतश्च गुरुय
त्तथा संस्कारतो गुरु मात्रा गु
रुत्वमुद्गादिर्मांसादिः प्रकृतेर्गुरुः
संस्कार गुरु पिष्टान्नं प्रोक्त मिन्दु
पलतणं आहारं षड्विधं।
चूष्यं पेयं लेह्यं तथैवच भो
ज्यं भक्ष्यं तथा चर्व्यं गुरु वि
द्यात् यथोत्तरं चूष्यं इक्षु दाडि
मादि पेयं पानक शर्करो दका
दि लेह्यं रसाला कथिनादि क
थिता कढीइति लोके भोज्यं
भक्त सूपादि भक्ष्यं लड्डुक मंड
कादि चर्व्यं चिपिटचणकादि॥
स्वभाव गुरु संस्कार गुरुत्वोः स्वभा
वलघुनश्च भक्ष्यस्य भोजन परि
मानमाह गुरुणामर्द्ध सौहित्यं
लघुनां नाति तृप्तते अयमर्थः
माष पिष्टकादिभि रर्द्ध सौहित्य
कर्त्तव्यं मुद्गादिभिः स्वाभाविकामा
त्रया तृप्तिः कर्त्तव्येत्यर्थः द्रवोत्तरो
त्तरश्चापि नमात्रागुरु रिष्यते॥
द्रवः पेयादि द्रवोत्तरः तक्राद्य।
धिक ओदनादि मात्रातोऽधिकोऽपि
मात्रागुरु र्न मंतव्यः पेयस्य स
र्वतो लघुत्वात् उक्तंच सुश्रुतेन
पेयलेह्याद्यभक्ष्याणां गुरु विद्या।

द्यथोत्तरमिति पेयं पयआदि॥
लेह्यं रसालादि अद्यं ओदन सू
पादि भक्ष्यं मोदकादि द्रवाढ्य।
मपि शुष्कंत सम्यगेवोपपद्यते॥
विशुष्कमन्नमभ्यस्तं नपाकं साधु ग
च्छति अयमर्थः शुष्कमपि शो
तोद्रव्यक्रममपि द्रवाढ्यं सम्यक्।
पाकं याति केवलंशुष्कस्यान्न।
स्य दोषमाह विशुष्कमन्नमित्या दि
अपक्वं नहि भवती त्यपि।
तत्रया माह पिंडीकृतमसंक्लिन्नं
विदाहं मुपगच्छति पिंडीकृतं अ
शीलावद्रूतं असंक्लिन्नं असम्यगा
र्द्रं विदाहं मुपगच्छतिविदग्धं भ
वतीत्यर्थः शुष्कादीनां वैगुण्य॥
माह शुष्कं विरुद्धं विष्टंभि वह्नि
व्यापत्समावहेत् शुष्कं चिपिटादि
विरुद्धं क्षीर मत्स्यादि विष्टं।
भि चणक मसूरादि वह्निमांद्यं कु
र्यात् न भुक्त्वा न रदैश्छित्वा नति
शायं नवा वहून न जलांतरितान्न
हिः शाकृतघानकेवलान् पुनर्दीनां।
पृथक् पानं सामिषंपयसा निशि
दध्युक्तेन मुक्तंच समशाकृष्ट वर्ज
येत् विषमाशनस्य लक्षण माह।
बहु स्तोकमकाले वा ज्ञेयं तद्वि
षमाशनं बहुलास्यस्य भक्ति तस्य।

दोषमाह आलस्यगौरवा टोप
शब्दांश्चकुरुतेऽधिकं हीनमात्रं
ततोः कार्श्यं करोतिचवल त्रयं
अधिकं अत्रं अकाले भुक्त
स्य दोषमाह अप्राप्तकालो भुं
जानोऽसमर्थतनु र्नरः तांस्तान्
व्याधीनवाप्नोति मरणंचाधिगच्छ
ति अप्राप्तकालः कालादति शाकंभ
जानोऽसमर्थ शरीरो भवति त
था सति तां स्तानव्याधीन् शिरो
व्यथा विसूचिकाऽलसक विलंवि
कादीन् प्राप्नोति तेषामाधिक्ये
मरणमपि प्राप्नोतीत्यर्थः काले
ऽतीतेऽश्नतो जंतोर्वायुनापहते ।
ऽनले कृच्छ्राद्विपच्यते भुक्तं न
स्याद्भोक्तुं पुनः स्पृहा उक्ते
भागद्वयं भोज्यै स्तृतीयंवारि पू
रयेत् वायोः संचरणार्थाय चतु
र्थमवशेषयेत् रसेनान्नस्य रसना
प्रथमेनोपतर्पिता न तथास्वाद
माप्नोति ततः सेव्याम्बुनोतरा।
अत्यम्बुपानान्न विपच्यतेऽन्नमनं।
बुपानाच्च सएव दोषः तस्मान्नरो
वह्नि विवर्द्धनाय मुहुर्मुहुर्वारिपि
वेद्भूरि भुक्तस्यादौ जलंपीतं
कार्श्यं मंदाग्नि दोषकृत् मध्येऽग्नि
दीपनं श्रेष्ठमंते स्थौल्यकफप्रदं।

अन्यच्च सम स्थूलकृशा भुक्तम
ध्यांत प्रथमाम्बुपाः इति वाग्भटः
भुक्ते भोजनं तृषितस्तु नचाश्नी
यात् क्षुधितो नपिवेज्जलं तृषि
तस्तु भवेद्गुल्मी क्षुधितस्तु जलोदरी
तत्र शिष्टा भोजनांते द्रुग्धं।
पिवेतितत् कथमुचितं यतस्त्रिधा
विभक्तस्य भोजनकालस्य प्रथमो
भागो वातस्य द्वितीयः पित्तस्य तृ
तीयः कफस्य अतत्र वाह अश्नी
यात्तन्मना भूत्वा पूर्वन्तुमधुरं रसं
मध्येऽम्ललवणौ पश्चात्कटुतिक्त
कषायकान् अस्यायमभिप्रायः
भोजने पूर्वं भुक्तो मधुरो रसो।
वुभुक्षितस्य वातपित्तयोः शामको
भवति भोजनमध्ये भुक्तावम्ल
लवणौ पित्ताशये च वह्निवर्द्धिकृ
तः भोजनांत्य समये भुक्ताः क
टुतिक्तकषाया रसाः कफंशामयं
ति अतो भोजनावसानसमया
स्य कफकालत्वात्तत्कथं सेव्यज
नैकं दुग्धंपातुमुचितं भवति यतउ
क्तं दुग्धं स्वादुरसं स्निग्धमोजस्यं धा
तुवर्द्धनं वातपित्तहरं वृष्यं श्ले
ष्मलं गुरु शीतल मिति उच्यते।
विदाहीन्यन्नपानानि यानि भुंक्ते हि
मानवः तद्विदाहप्रशान्त्यर्थं भोज



नान्ते पयः पिबेत् अत एव ब्रह्म
पुराणे कुर्य्यात् क्षीरान्त माहारं
दध्यन्तं न कदाचनेति लवणाम्ल
कटूष्णानि विदाहीन्यपि ते च न
दोषं हरन्ते माहारं मधुरेण समा
पयेत् भोजनावसानसमये कृष्या
दिमधुर भोजनेनैव वर्द्धितकफा
लवणाम्लकटुभोजनजनितो पि
त्तस्य वृद्धिं नाशयति पित्तवृद्धिनाश
नेन कफस्यापि वृद्धिरुपक्षीणा
भवति क्षीणकफवृद्धिरग्निमांद्या
दीन्व्याधीन् उत्पादयितुं न शक्नो
ति एवं भुक्त्वा समाचामेत् तृत्वा
ग्रहण पूर्वकं भोजने दन्तलग्ना
ति निर्हृत्याचमनं चरेत् दन्तलग्नम
निर्हार्य्यं लेपं मन्येत दन्तवत् नत
त्रबहुशः कुर्य्याद्यत्नं निर्हरणे प्रति
आचम्य जलपूर्णाभ्यां पाणिभ्यां
चक्षुषी स्पृशेत् भुक्त्वा पाणितले
घृष्ट्वा चक्षुषो र्यदि दीयते अचिरे
णैव तदाऽपि तिमिराण्यपहरति
भुक्त्वा च संस्मरेन्नित्यमगस्त्यादीन्
सुखावहान् विस्तरात्मा तथैवान्नं
परिणामश्च वै यथा सत्येन तेन
यद्भुक्तं जीर्य्यत्वन्नमिदं तथा अ
गस्तिरग्निर्वडवानलश्च भुक्तमन्नं
जरयत्वशेषं सुखं च मे तत्परि।

णाम संभवं यच्छत्वरोगं मम चा
स्तु देहे अंगारक मगस्तिं च पावकं
सूर्य्य मश्विनौ पंचैतान् संस्मरे
न्नित्यं भुक्तं तस्याशु जीर्य्यति इ
त्युच्चार्य्य स्वहस्तेन परिमार्ज्जयेदु
दरं अनायास प्रदायीनि कुर्य्यात्
कर्म्माण्यतन्द्रितः अतन्द्रितः जाग्र
तिष्ठेन्न सप्यात् भुक्तमात्रस्य त
स्यामाशयस्याग्निः कुपितः कफ इति व
चनात् जीर्णेऽन्ने वर्द्धते वायु र्वि
दग्धे पित्तमेधते भुक्तमात्रे कफ
स्यापि क्रमोऽयं भोजनोपरि ॥
विदग्धे किंचित् पक्वे पित्तमेधते
किंचिदपक्वे कफः भुक्तमात्रे।
संजातकफस्य प्रतीकारमाह धूमा
तापोऽस्य हर्य्येर्वा कषायकटुतिक्त
कैः पूग कर्पूर कस्तूरीलवंगसुम
नःफलैः फलैः कटुकषाये र्वा
मुखवैशद्य कारिभिः ताम्बूलपत्र
सहितैः सुगंधैर्वा विचक्षणः धू
मेन अपुर्वादि धूमेन अपोह्य क
फं हरीतक्या कषायकटुतिक्तकैः
फलैः कर्पूरकस्तूरीलवंगादिभिः
पूगैः क्रमुकैः सुमनःफलैः जाती
फलैः फलैः एलाहरीतक्यादिफले
रेतैस्तांबूलैस्तु भुक्ते वाते।
च संगे सभायां विदुषां राज्ञां

कुर्य्यात्ताम्बूलभक्षणं भुक्त्वा श
तपदं गच्छेच्छनैः स्तेन तु जायते।
अन्नसंघात शैथिल्यं ग्रीवा जानु
कटीसुखं भुक्त्वोपविशतस्तन्द
शयानस्य तु पुष्टता आयुश्चंक्रम
मानस्य मृत्युर्धावति धावतः च
क्रमानस्य [illegible] शीतं शनैर्गच्छ
तः आसनेषीस्थितमानस्तान् हिः
पार्श्वेतु दक्षिणे नतस्तद्धिशयान
वामे पश्चात् सव्याद्यथासुखं वा
महिष्यायामनलो नाभेरुर्द्धेऽस्ति।
जंतूनां तस्माद्वामपार्श्वे शयीत
भुक्तप्रपाकार्थं त्रिदोषशामनी।
त्वेद्वा तुलीवातकफापहास्तूषशा
र्ह्हरणी तृषाकाष्टपद्ही तवातला
इति भावप्रकाशः ॥ अन्यच्च
स्नानोपथा वक्षन्वाच देवर्षिपित्
तर्पणं प्रशस्तरत्नपाणिस्तु भुंजी
प्रयतोगृही हुतेजप्ये हुते वा
कौशुद्धवस्त्रधरो नृप दत्वाऽति
थिभ्योविप्रेभ्यो गुरुभ्यः संश्रि।
तायच पुण्यगंधधरः शस्तमा
ल्यधारी नरेश्वर नैकवस्त्रधरोऽथा
र्द्रपाणिपादो नरेश्वर विशुद्धवद
नः प्रीतो भुंजीत नविदिङ्मुखः प्राङ्
मुखोदङ्मुखो वापि नचैवान्यमना
नरः अन्नं प्रशस्तं पथ्यं च।


प्रोक्षितं प्रोक्षणोदकैः नकुत्सि
सितादृतं चैव जुगुप्सावदसंस्कृतं
दत्वा तु भक्तं शिष्येभ्यः क्षुधितेभ्य
भ्यस्तथा गृही प्रशस्तशुद्धपात्रेषु
भुंजीताकुपितो नृप नासंदी ॥
संस्थिते पात्रे नादेशे च नरेश्वर।
नाकाले नातिसंकीर्णे दत्वाग्रं च न
रोऽग्नये आसंदीदारुमय त्रि
पदी मंत्राभिमंत्रितं शस्तं न च
पर्य्युषितं नृप अन्यत्र फलमां
सेभ्यः शुष्कशाकादिकात्तथा त
द्वद्धरितकेभ्यश्च गुडपक्वेभ्य एव च
भुंजीतोद्धृतसाराणि न कदाचिन्न
रेश्वर हरितकेभ्यः अपक्कलेत्या।
दिभ्यः नाशेषं पुरुषोऽश्नीया ॥
दन्यत्र जगतीपते मध्वम्बुदधिसर्पि
भ्यः शक्तुभ्यश्च विवेकवान् अश्नी
यात्तन्मयो भूत्वा पूर्वन्तु मधुरं रसं।
लवणाम्लौ तथा मध्ये कटुतिक्तादि
कांस्ततः प्राक्द्रवं पुरुषोऽश्नी।
यान्मध्ये च कठिनाशनं अन्ते पुन
र्द्रवाशी तु बलारोग्यं न मुंचति ॥
अनिंद्यं भक्षयेदित्थं वाग्यतोऽन्न
मकुत्सयन् पंचग्रासं महामौनं।
प्राणाद्याप्यायनादित भुक्त्वा
सम्यगथाचम्य प्राङ्मुखोदङ्मुखोपि
वा यथा वक्षनराचम्य पाणी

प्रक्षाल्यमूलतः स्वस्थः प्रशांत चि
त्तस्तु कृतासन परिग्रहः अभीष्टदे
वतानांच कुर्वीत स्मरणंनरः अ
ग्निराप्याययत्वन्नं पार्थिवं पवनेरि
तः दत्तावकाशं नभसा जरयत्व
स्तमेसुखं अन्नंबलायमेभूमेरपा
मग्न्यनिलस्य च भवत्वेतत्परिणतौ
ममास्त्वव्याहतं सुखं प्राणापान
समानानामुदानव्यानयोस्तथा अ
न्नं पुष्टिकरंचास्तुममास्त्वव्याहतं
सुखं अगस्तिरग्निर्वडवानलश्च भु
क्तं मयान्नं जरयत्वशेषं सुखंच मे
तत्परिणाम संभवं यच्छत्वरोगं म
मचास्तुदेहे विष्णुःसमस्तेन्द्रियदेह
देहि प्रधानभूतो भगवान् यथैकः
सत्येनतेनान्न मशेष मे तदारो
ग्यदं मे परिणाममेतु विष्णु रत्ता
तथैवान्नं परिणामश्च वै तथा स
त्येनतेनमे भुक्तं जीर्यत्वन्नमिदं
तथा इत्युच्चार्य्यस्वहस्तेनपरिमृज्य
तथोदरं अनायासप्रदायीनि कु
र्यात् कर्माण्यतन्द्रितः सच्छास्त्रा
दिविनोदेन सन्मार्गादविरोधिना
दिनं नयेत्ततः संध्यामुपतिष्ठेत्समा
हितः इतिविष्णुपुराणे ३ अंशे
११ अध्यायः अपरंच भुंजीत
प्रयतो नित्यं वाग्यतो ऽनन्य

मानसः मैत्रेण वर्जयेन्नित्यं नै
कान्नादी भवेद्व्रती मैत्रेण हवि
तो हविरुपवास समास्मृता पूज
येदशनं नित्यमद्याच्चैन मकुत्सय
न् दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिन
न्देच्च सर्वशः अनारोग्यमनायुष्य
मस्वर्ग्यंचातिभोजनं अपुण्यं लो
कविद्विष्टं तस्मात्तत् परिवर्जयेत्
प्राङ्मुखोऽन्नानि भुंजीतसूर्य्याभिमु
खएववा नाद्यादुदङ्मुखो नित्यं
विधिरेष सनातनः प्रक्षाल्यपाणी
पादौ च भुंजानो द्विरुपस्पृशेत्
शुचौ देशे समासीनो भुक्त्वा च
द्विरुपस्पृशेत् नाश्नीयाद्भार्य्यया
सार्द्धं नैनामीक्षेत मेहंती न
भक्षयेदभक्ष्याणि नापेयं वा पिबे
द्विजः अभक्ष्यान्नन्तु भक्ष्यं दुष्ट
ञ्च भुंजीत बंधुभिः सार्द्धं
वाग्यतोऽन्नमकुत्सयन् अहत्वा तु
द्विजः पंच महायज्ञान् द्विजोत्तम
भुंजीत चेत्सु मूढात्मा तिर्य्यग्योनिं
सगच्छति वेदाभ्यासोऽन्वहंशक्त्या
महायज्ञ क्रियाक्षया नाशयत्याशु
पापानि देवानामर्चनंतथा यो
मोहादथवालस्यादकृत्वा देवतार्च
नं भुंक्ते स याति नरकान् शूकरेषु
भिजायते तस्मा त्सर्व प्रयत्नेन।

कृत्वा कर्माणि वै द्विजः भुंजीत स्वज
नैः सार्द्धं सयाति परमां गतिं ।
इति कौर्मे उपरिभागे ९ अध्यायः
व्यास उवाच प्राङ्मुखो ऽन्नानि ॥
भुंजीत सूर्य्याभिमुखएव वा आसीन
स्त्वासने शुद्धे भूम्यां पादौ निधाय
तु आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं
दक्षिणामुखः श्रियं प्रत्यङ्मुखो भुं
क्ते ऋतं भुंक्ते उदङ्मुखः पंचार्द्रो ।
भोजनं कुर्य्याद्भूमौ पात्रं निधाय
तु उपवासेन तत्तुल्यं मनुराह प्र
जापतिः उपलिप्ते शुचौ देशे ।
पादौ प्रक्षाल्य वै करौ आचम्या
र्द्राननोऽक्रोधः पंचार्द्रो भोजनं
चरेत् महाव्याहृतिभिस्त्वन्नं प
रिधायोदकेन तु अमृतोपस्तरण
मसीत्यापोशान क्रियां चरेत् ॥
स्वाहाप्रणवसंयुक्तां प्राणायान्ना
हुतिं ततः अपानाय ततः हुत्वा व्या
नाय तदनन्तरं उदानाय ततः कु
र्य्यात् समानायेति पंचमीं विज्ञा
य तत्त्वमेतेषां जुहुयादात्मनि द्विजः
शेषमन्नं यथाकामं भुंजीत व्यं।
१ जनै युतं ध्यात्वा तन्मनसा देव
३ पिधानमसीत्युपरिष्टादपः पिबेत्
२ मात्मानं वै प्रजापतिं अमृता।
आचान्तः पुनराचामेदायं गौरी

ति मंत्रतः द्रुपदां वा त्रिरावर्त्य ।
सर्वपाप प्रणाशिनीं प्राणानां ग्रंथि
रसीत्यालभेद्धृदयं ततः आचम्य।
अंगुष्ठमात्रेति पादांगुष्ठेऽथ दक्षिणे
निःस्रावयेद्धस्तजलं ऊर्द्ध्वहस्तः स
माहितः कृतानुमंत्रणं कुर्य्यात् सं
ध्यायामिति मंत्रतः अथाक्षरेण
स्वात्मानं योजयेद्ब्रह्मणेति हि ।
सर्वेषामेव योगानामात्मयोगः
परः स्मृतः योऽनेनविधिनाकुर्य्या
त्सयाति ब्रह्मणः लयं यज्ञोप
वीती भुंजीत स्रग्गंधालंकृतो नरः
सायं प्रातर्नान्तरा वै संध्यायां तु
विशेषतः नाद्यात् सूर्य्यग्रहात्
पूर्वमह्नि सायं शशिग्रहात् ग्रह
काले च नाश्नीयात् स्नात्वाश्नी।
त मुक्तयोः मुक्ते शशिनि भुंजीत
यदि न स्यान्महानिशा अमुक्तयो
रस्तं गतयोः स्नात्वा दृष्ट्वापरेऽह
नि नाश्नीयात् प्रेक्षमाणानामप्र
दायैव दुर्मतिः नायज्ञशिष्टमद्या
न्न क्रुद्धो नान्यमानसः आत्मार्थं
भोजनं यस्य रत्यर्थं यस्यमैथुनं
वृत्त्यर्थं यस्य चाधीतं निष्फलं त
स्य जीवितं यद्भुंक्ते वेष्टितशिरा य
द्भुंक्ते उदङ्मुखः सोपानत्कश्च य
द्भुंक्ते सर्वं विद्यात्तदासुरं नाद्यं।



रात्रे न मध्याह्ने नाजीर्णे नार्द्रव
स्त्रधृक् नच भिन्नासनगतो न शया
नः स्थितोऽपि वा न भिन्नभाजने चै
व न भूम्यां नच पाणिषु नोच्छिष्टो
घृत मादद्यान्न मूर्द्धानं स्पृशेदपि
न ब्रह्म कीर्तयेद्वापि निःशेषं न
भार्यया नान्धकारे न चाकाशे न
देवालयादिषु नैकवस्त्रस्तु भुञ्जी
त नच यानस्थितोऽपि वा न पादुका
निर्गतो वा न हसन् विलपन्नपि भु
क्त्वैवं सुखमास्थाय तदन्नं परिणा
मयेत् इति कूर्मे उपरि भाग १९
अध्यायः अपरंच दक्षाच ।
हुत्वाग्निं देवताभ्योऽभ्यूत्वातिथी
न् भृत्यजनावशिष्टं हृष्टः शुचिः
क्षुधानोन्नि योऽन्नं तस्यामृतं स्या
त् सघृतान् भुनक्ति सायंप्रातर्म
नुष्याणां मशनं देव निर्मितं वैदि
के लौकिकेऽग्नौ तत्प्रत्यन्तेनाद्दरे
तथा उपलिप्ते समे देशे शुचिः
श्रद्धासमन्वितः पात्रेषु पर्णोत्तरेषु
पुत्रशिष्यादिभिर्हतः ससंस्कृतं
हितं स्निग्धं भुञ्जीतान्नमकुत्सय
न् यवगोधूमशाल्याख्यमांसशा
कादिभिर्युतं कदम्बलवणैस्ति
क्तैर्व्यञ्जनैर्भक्ष्यसंयोगिभिः भक्ष्यपक्वा
न्नविविधानकंदमूलफलानि च


पात्रं भूमौ प्रतिष्ठाप्य यो भुङ्क्ते
वाग्यतः शुचिः भोजने भोजने
चैव त्रिरात्र फल मश्नुते यत्नेन
धारयेद्विप्रः पवित्रं दक्षिणे करे
भुंजानस्तु विशेषेण अन्नदोषैर्न
लिप्यते यातुधानाः पिशा ॥
चाश्च असुरा राक्षसास्तथा घ्न
न्ति केवलमन्नस्य मंडलस्य विवर्जना
दादित्या वसवो रुद्रा ब्रह्मा चैव
पितामहः मंडलान्युपजीवंति त
स्मात् कुर्वीत मंडलं चतुष्कोणं
द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु
द्विकोणाकृति वैश्यस्य शूद्रस्या
वर्तुलं स्मृता नलोहेमृन्मयपात्रे
भिन्नेऽश्नीयात् कदाऽपरे आपः
पुनंतिति मंत्रेण भुक्त्वाशीयोऽसमा
सनं कृत्वायोदिगुपविश्य पात्रे ।
प्रक्षाल्य मूर्द्धानं दिवोऽवनिमि
ति पात्रमभिमंत्र्य भूम्यां हृत्वा
यनेति भूमौ पात्रं प्रतिष्ठापयेत्
आर्द्रवासाः शुक्लवासावापवि
त्राभ्यां सोनाभ्यां प्राङ्मुखआसीनः
पाणीप्रक्षाल्य दर्भहोमारविंग्यपति
ध्यायेदव्यक्तं पुरुषं ततओजोसी।
त्यन्नाद्यमाक्रियमाणंप्रतिगृह्यन्नयेत्।
ओंजोसीत्यादिना प्रतिगृह्य ब्रह्म
स्याग्निर्श्नीन्मभ्य मभिमंत्रयेत्

उद्धृत्येति मावसाग्निमंतरस्थंप्र
बोधयेत् भूतपतयेनमः भुवनप
तयेनमः भूतानां पतयेनमः इति
नमस्कारान्ते बलित्रयं भूमौ दद्या
त् अथात्मैवात्मानं चिंतयेत् प्राण
स्य हृदयं स्थानमपानस्य गुदं स्मृतं
समानो नाभिदेशे तु उदानः क
ण्ठमाश्रितः पंचमः सर्वविज्ञेयो ।
व्यानः सर्वांगसंधिषु राजीवसदृ
शः प्राणो हृदये नित्य संस्थितः
गर्भसंभूतं विद्युत् पुंज समप्रभं
कुमारं शक्तिहस्तंच लोहितांगं
नमाम्यहं इतिव्यासोक्त नवग्रह
स्तोत्रांतर्गते ऋणपरिशोधना
र्थस्तोत्रे यथा मंगलो भूमिपु
त्रश्च ऋणहंता धनप्रदः स्थिरा
सनो महाकायः सर्वकर्मविरोध
कः रोहितो लोहितांगश्च सामगा
नां कृपाकरः धरात्मजः कुजोभौ
मो भूमिजो भूमिनंदनः अंगारको
यमश्चैवसर्वरोगापहारकः वृष्टि
कर्त्तापहर्त्ताच सर्वकामफलप्रदः
एतानि कुजनामानि यानहन्याय
यः पठेत् ऋणं न जायते तस्य
धनंप्राप्नोतिपुष्कलं रक्तपुष्पैश्च
गंधैश्च धूपदीपादिभिस्तथा मं
गलं पूजयेद्भक्त्या मंगलेऽहनि।
सर्वेषां ऋणरेखाः प्रकर्त्तव्या अं
गारेणसदा बुधैः प्रोंछयेद्वामपादे
न ऋणं तस्यविनश्यति मंगला
धनलभ्यं नमस्तऋणहारिणेपुत्र

पौत्रप्रदात्रे च मंगलायनमो न
मः ऋणार्थेत्वत् प्रपन्नोऽहं मत्कृ
तं कुरु मे विभो धनत् कृत्वा न
संदेहो ऋणं हत्वा धनीभवेत्।
इतिस्कंदपुराणे मंगलवारे।
जातस्यफलंयथा उग्रः प्रतापी
क्षितिपालमंत्री रणप्रियोवक्र
वचाः सरोषः सत्वान्वितः स्व
रगणप्रणेता कुजस्यवारे प्रभवो
मनुष्यः इतिकोष्ठीप्रदीपः ।
मंगलचंडिका स्त्री मंगलचंडी य
थाकालिकापुराणे येसा ललित
कांताख्या देवी मंगलचंडिका।
वरदाभयहस्ताच द्विभुजागौर दे
हिका रक्तपद्मासनस्थाचरत्न कुं
डलमंडिता रक्तकौषेय वस्त्रा च
स्मितवक्त्राशुभानना नवयौवन
संपन्ना चार्वंगी ललितप्रभा उ
मया भाषितं मंत्रं यत्पूर्वं त्वेक
मक्षरं मेत्रमस्यास्तु तद्बीजं ते
नदेवीप्रपूजयेत् एकमक्षरं।
शक्तिवीजस्वरूपं अक्षरस्यांच नव
म्याच पूजा कार्या दिवाहये प
टेषु प्रतिमायां वा घटे मंगलचं
डिकां यः पूजयेद्भौमदिने शु
भेह्वीतल्लेनः शुभं सततं सा
धकः सोपि काममिष्टमवाप्नुयात्

मंगलवारे कृष्णाष्टमे चतु
र्दश्योर्चेत् पुण्यतराभवति यथा
ध्यानेश्वरस्यवारेण वारेणांगार ।
कस्यच कृष्णाष्टमी चतुर्दश्यौ पु
ण्यात् पुण्यतरेस्मृते ॥ मंगल
वारेशुक्लाचतुर्थी चेत्तदाभवति
यथा सोमवारेत्वमावास्या आ
दित्याह्ने च सप्तमी चतुर्थ्यंगारके
वारे त्वष्टमी च बृहस्पतौ अत्रयत्
क्रियते पापमथवा धर्म संचयः
षष्टिवर्ष सहस्राणि प्रतिजन्मतदक्ष
यं इतितिथ्यानितत्वं ॥
मंगलचंडी स्त्री दुर्गा यथा तत्रा
यणउवाच कथितं षड्वारव्यानं।
ब्रह्मपुत्र यथागमं देवी मंगलचं
डी यास्तदाख्यानं निशामय ते
स्याः पूजादिकं सर्वं धर्म वक्त्रेण
यत् श्रुतं श्रुति सम्मतमेवहि।
सर्वेषां विदुषामपि दुर्ज्ञेयाः ।
दक्षे च चंडी कल्याणेषु च मंगलं।
मंगलेषु च यादक्षा साचमंगलचं
डिका पूज्यायांवर्त्तते चंडी मं
गलेऽपिमहीसुतः मंगलाभीष्ट
देवीया सावा मंगलचंडिका मं
गलमधुरशास्त्र समुद्दीप धरा पा
तिः तस्यपूज्याभीष्टदेवी तेनमंग
लचंडिका मूर्त्तिभेदेन सा।

दुर्गा मूलप्रकृतिरीश्वरी कृपा
रूपाऽतिप्रत्यक्षा योषितामिष्टदे
वता प्रथमे पूजिता सा च शं
करेण पुरः पुरा त्रिपुरस्य वधे
घोरे विष्णुना प्रेरितेन च ब्रह्मण
उपदेशेन दुर्गस्थेन संकटे
आकाशात् पतिते याने दैत्येन।
पातिते रुषा ब्रह्मविष्णूपदिष्टश्च
दुर्गां तुष्टाव शंकरः सा च मंगल
चंडी च बभूव रूपभेदतः उवाच
पुरतः शंभो भयं नास्तीति ते वि
भो भगवान् वृषरूपश्च सर्वेश
श्च बभूव ह युद्धशक्तिस्वरूपाहं भ
विष्यामि तदा त्वया मयाऽऽत्मनाथ
हरिणा सहायेन वृषध्वज जहि दै
त्यं च शत्रुं च सुराणां पदघातकं
इत्युक्त्वान्तर्हिता देवी शंभोः शक्तिः
र्बभूव सा विष्णुदत्तेनास्त्रेण ज
घान तमुमापतिः मुनीन्द्र पतिते
दैत्ये सर्वे देवा महर्षयः तुष्टुवुः
शंकरं देवं भक्तिनम्रात्मकंधराः
सद्यः शिरसि शंभोश्च पुष्पवृष्टिर्बे
भूव च ब्रह्मा विष्णुश्च संतुष्टो ददौ
तस्मै शुभाशिषं ब्रह्मविष्णूपदिष्टश्च
सुस्नातः शंकरः शुचिः पूजयामा
स तां शक्तिं देवीं मंगलचंडिकां।
पाद्यार्घ्याचमनीयैश्च वलिभि विवि

धै रपि पुष्पं चंदन नैवेद्यैः।
भक्ष्यान्नाना विधैर्मेधैश्छागैर्मे
षैश्च महिषैर्गंडैर्मायातिभिस्तथा
वस्त्रालंकार माल्यैश्च पायसैः
पिष्टकै रपि मधुभिश्च सुधाभि
श्च पक्वैर्नानाविधैः फलैः संगीतै
र्नृत्यैर्वाद्यैरुत्सवैः कृष्ण कीर्त
नैः ध्यानाम ध्यंदिनोक्तेन ध्याने
न भक्ति पूर्वकं ददौ द्रव्याणि मू
लेन मंत्रेणैव च नारद ॐ ह्रीं श्रीं
क्लीं सर्वपूज्ये देवि मंगलचंडिके
हूं हूं फट् स्वाहेत्येवंचाप्येकवि
शाक्षरो मनुः पूज्यः कल्पतरुश्चैव
भक्तानां सर्वकामदः दशलक्ष
जपेनैव मंत्रसिद्धिर्भवेन्नृणां मंत्र
सिद्धिर्भवेद्यस्य स विष्णुः सर्वकाम
दः ध्यानं च श्रूयतां ब्रह्मन् वेदोक्तं
सर्वसम्मतं देवीं षोडशवर्षीयां
शश्वत् सुस्थिर यौवनां सर्वरूप
गुणाढ्यां च कोमलांगीं मनोहरां
श्वेतचंपकवर्णाभां चंद्रकोटिस
मप्रभां वह्निशुद्धांशुकाधानां रत्न
भूषणभूषितां बिभ्रतीं कवरी भा
रं मल्लिकामाल्य भूषितं बिंबो
ष्ठीं सुदतीं शुद्धां शरत्पद्मनि
भाननां ईषद्धास्यप्रसन्नास्यां सुनी
लोत्पललोचनां जगद्धात्रीं च ॥

दात्रीं च सर्वेभ्यः सर्वसंपदां
संसारसागरे घोरे पोतरूपां।
वरां भजे देव्याश्च ध्यानमित्ये
वं स्तवनं श्रूयतां मुने प्रयतां
संकटग्रस्तो येन तुष्टाव शंकरः
श्रीशंकर उवाच रक्ष रक्ष जगन्मा
तर्देवि मंगलचंडिके हारिके।
विपदां राशि हर्ष मंगलदायिके
हर्ष मंगल दक्षे च हर्ष मंगलचं
डिके शुभे मंगल दक्षे च शुभ
मंगलचंडिके मंगले मंगलार्हे
सर्वमंगल मंगले सतां मंग
लदे देवि सर्वेषां मंगलालये।
पूज्ये मंगलवारे च मंगलाभीष्ट
देवते पूज्ये मंगलभूपस्य मनु
वंशस्य संततं मंगलाधिष्ठात्रि दे
वि मंगलानां च मंगले संसारमं
गलाधारे मोक्ष मंगलदायिनि।
सारे च मंगलाधारे पारे च सर्व
कर्मणां प्रतिमंगलवारे च पूज्ये
च मंगलप्रदे स्तोत्रेणानेन शं
भुश्च स्तुत्वा मंगलचंडिकां प्रति
मंगलवारे च पूजां कृत्वा गतः शिवः
देव्याश्च मंगलस्तोत्रं यः शृणो
ति समाहितः तन्मंगलं भवेत्
शश्वन्न भवेत्तदमंगलं प्रथमे पू
जिता देवी शिवेन सर्वमंगला द्वि

तीये पूजिता देवी मंगलेन ग्रहे
ण च तृतीये पूजिता भद्रा मंगलेन
नृपेण च चतुर्थे मंगले वारे सुंद
रीभिश्च पूजिता मंगले मंगला
कांक्षैर्नरैर्मंगलचंडिका पूजि
ता प्रतिविश्वेषु विश्वेश पूजिता
सदा ततः सर्वत्र संपूज्या सा ब
भूव सुरेश्वरी देवादिभिश्च मुनि
भिर्मनुभिर्मानवैर्मुने वद्धते।
तत्र पुत्रपौत्रौ मंगलं च दिने
दिने इति ब्रह्मवैवर्ते महापुरा
णे प्रकृतिखंडे नारायण नार
दीय मंगलचंडिकोपाख्याने तत्
स्तोत्रकथनं नाम ४४ अध्यायः ॥

मंगलच्छायः पुं सप्तच्छदः इति
राजनिर्घंटः ॥

मंगलपाठकः पुं वंदी इति हेम
चंद्रः ॥

मंगलप्रदा स्त्री हरिद्रा इति के
चित् मंगलदातरि त्रि ॥

मंगला स्त्री पार्वती शुक्लदूर्वा
पतिव्रता इति शब्दरत्नावली ॥
करंजभेदः इति शब्दचंद्रिका ॥
हम्मार्हम्मान्नविशेषः इति हेम
चंद्रः हरिद्रा नीलदूर्वा इति
राजनिर्घंटः


मंगलागुरु क्लीं अगुरुवल्कपर्यायांतर

गुरुविशेषः यथा मंगल्या मल्लि
कागंधा मंगलागुरु वाचकाः म
गल्यागुरुशिशिरा गंधाढ्या यो
गवाहिका इतिराजनिर्घंटः ।
मंगल्यं क्ली दधि इति मेदिनी
चंदनं मंगल्यागुरु स्वर्णं ॥
सिंदूरं इतिराजनिर्घंटः ।
मंगल्य त्रि शिवकरं इतिमेदिनी
रुचिरं इतिहेमचंद्रः माधः
इतिधरणिः ॥
मंगल्यः पुं त्रायमाणा अश्वत्थः
बिल्वः मसूरकः इतिमेदिनी।
जीवकः नारिकेलः कपित्थः
रीठाकरंजः इतिराजनिर्घंटः
मंगल्यकः पुं मसूरः इत्यमरः
मंगल्यकुसुमा स्त्री शंखपुष्पी इ
तिभावप्रकाशः ॥
मंगल्यनामधेया स्त्री जीवंती इति
जटाधरः ॥
मंगल्या स्त्री मल्लिकागंधागुरुकाग
रु इत्यमरः शमी अधःपुष्पी।
मिसी शुक्लवचा रोचना इति
मेदिनी प्रियंगुः शंखपुष्पी इति
हेमचंद्रः माषपर्णी जीवंती।
ऋद्धिः वचा हरिद्रा बीजाइति
राजनिर्घंटः दूर्वा इतिरत्न
माला दुर्गायथा शोभना।

निच श्रेष्ठानियादेवी दर्दनेहरे
भक्तानां मार्त्तिहरणी मंगल्यातेन
सा स्मृता इतिदेवीपुराणे ४४
अध्यायः । ॥
मंगिनी स्त्री नौका इतिहेमचं
द्रः मंचनं जंघात्राणं इतिहा
रावली । ॥
मंक्षु अ द्रुतं इत्यमरः भृशार्थे
इतिमेदिनी
मंक्षुणं क्ली जंघात्राणं इतित्रि
कांडशेषः ॥
मच इ ङ. उच्छ्राय प्रत्यर्थीभावःस
इतिकविकल्पद्रुमः इ मंचते ङ.मे
चने उच्छ्राय उवीभावः इति।
दुर्गादासः ॥
मच ङ. च कल्कने दंभे शाठ्ये।
इतिकविकल्पद्रुमः कल्कन मिति
कल्कं करोतीति णो रूपं चूर्णी
करण मित्यर्थः ङ. मचते तंडुलं
शिला चकारात् मचि ङ. इति
दुर्गादासः ॥
मचर्चिका स्त्री प्रशस्तं इत्यमरः
मच्छः पुं मत्स्यः इतिशब्दरत्ना
वली ॥
मज्जकृत् क्ली अस्थि इतिहेमचं
द्रः मज्जनं क्ली स्नानं इतिजटाध
रः मज्जइतिशब्दचंद्रिका ॥

मज्जसमुद्भवं क्ली शुक्रं इतिहे
मचंद्रः ।
मज्जा पुं वृक्षादेरन्तमस्थिरभागः
सार इति ख्यातः इत्यमर भर
तौ फलमज्ज गुणा यथा यस्य
यस्य फलस्येह वीर्य्यं भवति या
दृशं तस्यतस्यैववीर्य्येण मज्जान
मभिनिर्दिशेत् इतिराजवल्लभः
अस्थिमध्यस्थस्नेहविशेषः ।
तत्पर्य्यायः कौशिकः २ शुक्र
करः ३ अस्थिस्नेहः ४ अस्थिसं
भवः ५ इतिहेमचंद्रः अस्थिसारः
तेजः ७ बीजं ८ अस्थिजं ९ जीव
नं १० देहसारः ११ इति राज
निर्घंटः अथ मज्ज स्वरूपमाह
अस्थियत् स्वाग्निनापक्वं तस्यसा
रोद्भवो घनः यः स्वेदवत्पृथग्भू।
तः स मज्जेत्यभिधीयते अथ मज्ज
स्थान माह स्थूलास्थिषु विशेषे
णमज्जाभ्यंतर स्थितः इतिभा
वप्रकाशः अस्यगुणाः बलशुक्र
रस श्लेष्म मेदो मज्ज विवर्द्धनः
मज्जा विशेषतोऽस्थ्नांचबलकृत्
स्नेहनेहितः इतिचरकः मज्जा
शाह स्थावलोपि यथा शाणासी
मूलक शिग्रु सिंहः पियाल मज्जा
महिते स्विति सुश्रुतः हृदयमवाह

त्रिकांडभागुरिः लज्जावद्राज्ञा।
वस्मज्जा मांससारास्थिसारयोरि।
ति इत्यमर टीकायां भरतः ॥
मज्जा स्त्री अस्थिसारः इत्यमरटी
कायांभरतः अस्याःगुणाः वात
नाशित्वं बलपित्तकफ प्रदत्व
मांस त्वग्गंधगुरूपत्वंच कुंभी
रमहिष मज्जा गुणाः मधुरत्वं।
देहत्वं बल्यत्वंच मज्जसत्व
गुणो यथा शीर्ष उसत्वच।
इतिराजवल्लभः ॥
मज्जाम्नः पुं भूमिगुग्गुलः इ
ति राजनिर्घंटः ॥
मज्जारसः पुं शुक्रं इतिराज
निर्घंटः । ॥
मज्जासारं क्ली जातीफलं इति
राजनिर्घंटः । ॥
मञ्जूषा स्त्री मंजूषा इत्यमरटी
कायां रायमुकुटः ॥
मंचः पुं खट्वा इत्यमरः कर्णावंशः
मचा इति भाषा इतिहारा ॥
वली उत्सवमंडपविशेषः यथा
दोलायमानं गोविंदं मंचस्थं।
मधुसूदनं रथस्थवामनं दृष्ट्वापुन
र्जन्म न विद्यते इतिपुराणं मं
चकः पुं खट्वा इति हेमचंद्रः ॥
इद्धकोषः उत्सवमंडपः इति।



त्रिकांडशेषः ॥
मंचकाश्रयः पुं मत्कुणः इति
राजनिर्घंटः ।
मंचमंडपः पुं शस्यरक्षार्थकृ
तं टं इतिभाषा तत्पर्य्यायः कु
डंगः २ इतिहारावली ॥
मंजरं क्ली मुक्ता तिलकवृक्षः
वल्ली इतिशब्दरत्नावली ॥
मंजरिः स्त्री वल्लरि इत्यमरः
वल्लेनहणोति नरुवल्लरिःवल
मिवल्ल उ स्तनौ नाम्नीतिकरिःसं
सुमनोज्ञतमां रातीतिमंजरिः मृ
दैणादिः मनीषादित्वाड्कारस्य अ
कारः पाक्षोणादीति ईपिमंजरी
वल्लरीव वल्लरि मंजरि ह्या रि
तिशाब्दिकः वल्लिमंजि ष्याच्च
मंजरि मंजरी मंजि मंजर त्रिषु
वल्लरी वल्लरं त्रिषु वल्लिश्चवल्ल
रिः पुष्पनालिकेतिहेमचंद्रः ल
ताग्रेऽपि वल्लरिः यतोवाकु
वल्लरीतिप्रयोगइतिमुकुटादयः
वल्लरी मंजर्यो भेदमप्याहुः य
था अभिनव निर्गता आयता स्ता
कुरा सकुसुमा अकुसुमाव मंजरिः
यथा चूतमंजरिः कदलीमंजरिः
वल्लरिः पुन श्चिरभूतापि यथा
तालमंजरिः गुवाकवल्लरि रिति

हयमेव नवे चिरंतनेऽपीतिकुसु
मांजौ इतिभरतः ॥
मंजरी स्त्री मुक्ता तिलकवृक्षः
लता इतिशब्दरत्नावली मंजरिः
इत्यमरटीकायांभरतः तुला
सी इति राजनिर्घंटः ॥
मंजरीनमः पुं वेतसवृक्षः इति
राजनिर्घंटः
मंजा स्त्री छागी इतित्रिकांडशे
षः मंजरी इति हेमचंद्रः ॥
मंजिः पुं मंजरी इतित्रिकांड
शेषः ।
मंजिका स्त्री वेश्या इतिहाराव
ली मंजिफला स्त्री कदली इति
त्रिकांडशेषः ॥
मंजिष्ठा स्त्री स्वनामख्यातरक्तव
र्णलताविशेषः मजीठ इतिहिंदी
तत्पर्य्यायः विकसा २ जिंगी ३
समंगा ४ कालमेषिका ५ मंडूक
पर्णी ६ भंडीरी ७ भंडी ८ योजन
वल्ली ९ इत्यमरः कालमेषी १०
काला ११ जिंगिः १२ भंडिरी १३
भंडिका १४ भंडिः १५ इति शब्द
रत्नावली हरिणी १६ रक्ता १७
गौरी १८ योजनवल्लिका १९ वशा
२० रोहिणी २१ चित्रलता २२ चित्रा
२३ चित्रांगी २४ जननी २५ विजया

२६ मंजूषा २७ रक्तयष्टिका २८
क्षत्रिणी २९ रागाढ्या ३० काल
भांडिका ३१ अरुणा ३२ ज्वरहंत्री ३३
छत्रा ३४ नागकुमारिका ३५ भंडी
रलतिका ३६ रागांगी ३७ वस्त्रभूष
णा ३८ अस्यागुणाः मधुरत्वंकषा
यत्वंउष्णत्वं गुरुत्वं व्रणमेहज्वरश्ले
ष्मविष नेत्रामय नाशित्वंवसावात
विधा चोलः १ योजनी २ कौंती ३
सिंहली च ४ इतिराजनिर्घंटः
कुष्ठस्वरभंग शोथनाशित्वं व
र्णाग्निकारित्वंच इतिराजवल्ल
भः अपिच मंजिष्ठा मधुरातिक्ता
कषाया स्वर्या वर्णकृत्गुरूष्णावि
षश्लेष्मघ्नी शोथ योन्यक्षिकर्णरु
क्रक्तातीसार कुष्ठास्त्र विसर्पव्र
णमेहनुत् इतिभावप्रकाशः
मंजी स्त्री मंजरी इतिहेमचंद्रः
त्रिकांडशेषश्च ।
मंजीरः पुं क्ली नूपुरः इत्यमरः
मंजीरोऽस्त्री स नूपुरः इति
रभसः । ।
मंजीरः पुं मंथानदंडरज्जुबंध
नार्थस्तंभः तत्पर्य्यायः विष्कंभः
१ कुटरः २ इति हेमचंद्रः ।
मंजु त्रि मनोज्ञं इत्यमरः ।
मंजुकेशी पुं श्रीकृष्णः इतिहला


युधः सुंदरकेशविशिष्टे त्रि ।
मंजुगमना स्त्री हंसी इतिराज
निर्घंटः सुंदरगामिनि त्रि ॥
मंजुघोषः पुं बुद्धजिनभेदः इति
त्रिकांडशेषः उपास्यदेवता वि
शेषः अस्य मंत्रादि यथा ।
ताडोच तिमिरध्वंसी संसारार्ण
वतारकः श्रीमंजुघोषो जयतां
साधकानांसुखावहः तत्रागमो
क्तं मातृकादि समुद्धृत्य वह्नि
बीजं समुद्धरेत वामाक्षं कर्मा
क्तं च ततो मेषघा समुद्धरेत ॥
मीनेशं चन्तः कुर्य्यात वामनेत्रे
ऽ संयुतं षडक्षरोमनुः प्रोक्तो
मंजुघोषस्य शंभुना इयंत्रिदीप
नी प्रोक्ता मूलमंत्रस्य कथ्यते ।
अंकुशं शक्तिबीजंच रमाबीजेन
तः प्रिये बीजत्रयात्मको मंत्रो
ज्ञानोत्व धांतनाशनः शक्तिबीजं
रमाबीजंकामबीजं तथाप्रिये
विद्याऽऽकृतिपरी प्रोक्ता यथा वर्ण
त्रयात्मिका हकारो वह्निमारूढा
वामनेत्रेंदुभूषितः प्रोक्ता सा
वेत्तविधेयं एकवर्णात्मिका प्रिये
सिद्धः साध्यः सुसिद्धो वा साधक
स्यारिरुभावा तदा मंत्रो भवेद्ध
ज्ञा अभरो ब्रहिरो भवेत्

मध्याह्ने सलिले चैवभोजने च ।
भाजने तथा गोमये तवहिर्दे
शेमैथुने रमणी कुचेगोष्ठेवनि
शिगोमुंडे यंत्रं कुमकुमसन्निभं ।
विलिख्य मंत्रवर्णांश्च त्रिशकेद्व
अयस्तथा लिखेच्चंदने लेखन्या
प्रयत्नात् साधकोत्तमः उच्चाटने
लिखेद्यंत्रं गोचर्मणि विशेषतः
सलिले विजयी नित्यं भोजनेच
महेश्वरः गोमये वाचहकः स्या
द्गोष्ठे सर्ववशता भवेत् कुचेश्रोणि
पदे नित्यं गोमुंडेचमहकविः
गोमूत्रं वदरी मूलं चंदनंपांशु
मेव च एकीकृत्याष्टधाजस्मानि
लकंधारयेत्सदा नमस्कृत्यवंशे
हमाधंये डक्ति तत्परः वांसाप्य
च तस्माद्वै विहरेत यथासुखं
नाम्पदेवार्चनं स्नानं प्रणवोच्चारणं
नत्र वस्त्राचमेलेन दंतानां शो
धनं लवणेन वा रात्रिवासनमुंचे
तन शुचिस्यावकवाचनपवंकु ।
स्तापयत्वेन ज्ञात्वागुरुमुखात् स
धीः मासैकेन कवीडः स्यात्तद्धिमा
सेनैवईश्वरः त्रिभिर्मासे भवेन्मर्त्यः
सर्वशास्त्रविशारदः शुद्धाधीलभ
तेपुत्रं धाना धीं विपुलंधनं ध्या
नुरोगप कामस्त्वसर्वान्कामान

वाप्नुयात् ततः करांगन्यासौ ॥
ह्रांशांश्रंगुष्ठाभ्यां नमः इत्यादि
एवंहृदयादिषु तथाच तंत्रे स
वर्गेको वकेशश्चद्वौवर्गौकथि
तौप्रिये षड्दीर्घभागभ्यामेना
भ्यांषडंगानिसमाचरेत् संवर्गः ।
ह्वकारः वर्गकः शकारः प्यानं ।
शशधर मिवशुभ्रं खड्गपुस्तांगपा
णिं सुरुचिर मतिशांतं पंचचूडं ।
कुमारं वरसख्य पद्मपत्रायतं ॥
त्वं कुमलिदहनदत्ते मंजुघोषं त
माभि पीठपूजां ततः कुर्याद्दया
राद्यादि शक्तितः मूलमेनादि ।
भिः कुर्यात् पीठासनमनेनतु मा
नदाने नमः पाद्ये वृद्धिकेनतथा
चमं जाड्यनाशाय गेयः स्यादर्घं
स्यायत्तपायवे सर्वसिद्धिप्रदाये
ति पुष्पं दद्याद्विचक्षणः ऊंद ।
पुष्पं समादाय भैरवान् पूजयेत्ततः
असितांगो रुरुश्चंडः क्रोध उ ।
न्मत्त संज्ञकः कपाली भीषणश्चै
वसंहारश्चाष्टमः स्मृतः ततो भूपा
दिकं दत्वा प्रसूनानि विसर्जयेत्
तैः पुष्पैः पूजयेद्देवी यत्निनां ।
स विशेषतः स्वरादिसंदरीचैवम
नोहारिण्यनंतरं कनकावती त
थाकामेश्वरीच रतिकर्म्मप्रिय पद्मिनी

च नटी चैव अनुरागिण्यनंतरं
पूज्या एतास्तु योगिन्यो हल्लेखा
वीज पूर्विका एवं संपूज्य देवे
शं लक्ष घटकं जपेन्मनं हुताङ्क
कंदपुष्पैश्च एकादश शतानिच
जुहुयादेयिते वह्नौ कांतारे पि
तृवेश्मनि एवंसिद्धमनुर्मंत्री म
हायोगीश्वरो भवेत् इति त
न्त्रसारः एकारांतरं ऊकुटादि
तंत्रे द्रष्टव्यं ॥
मंजुपाठकः पुं शुकपक्षी इति
राजनिर्घंटः स्वेदरपाठकंत्रे रिति
मंजुप्राणः पुं ब्रह्मा इतिजटाधरः
मंजुभद्रः पुं जिनविशेषः तत
पर्य्यायः मंजुश्रीः २ ज्ञानदर्पा
णः ३ मंजुघोषः ४ कुमारः ५ अष्टा
रचक्रवान् ६ स्थिरचक्रः ७ वज्रधरः
८ प्रज्ञाकायः ९ वादिराट् १० नीलो
त्पली ११ महाराजः १२ नीलः १३
शार्दूलवाहनः १४ धियाम्पतिः १५
पूर्वजिनः १६ खड्गी १७ दंडी १८ वि
भूषणः १९ बालव्रतः २० पंचचीरः
२१ सिंहकेलिः २२ शिखाधरः २३
वागीश्वरः २४ इतित्रिकांडशेषः
मंजुलं क्ली जलाचलं निकुंजं
इतिमेदिनी शबलः इति विश्वः
मंजुलः पुं जलांकपक्षी इति

मेदिनी सुंदरे त्रि इत्यमरः
मंजुश्रीः पुं मंजुघोषः इति त्रि
कांडशेषः ।
मंजुषा स्त्री मंजूषा पेटरा इति
भाषा यथा मंजुषापिच मंजूषा
पेटा च पेटिकेत्यपि इतिश
ब्दरत्नावली । ।
मंजूषा स्त्री पिटकः इत्यमरः ।
पाषाणः इत्युणादिकोषः मं
जिष्ठा इति राज निर्घंटः ।
मट साटे इतिकविकल्पद्रुमः ।
सौत्रधातुरयं अस्य प्रयोगः ।
मटहः इतिदुर्गादासः ॥
मटची स्त्री पाषाणवृष्टयः रक्तव
र्णोह्लद्रुपक्षीविशेषः इतिगोविंद
भाष्यधृत छांदोग्यः ॥
मटस्फटिः पुं दर्पारंभः इति
जटाधरः ॥
मट्टकं क्ली गृहस्यशिरोभागः म
का इति भाषा इतिकेचित् ।
मठ वासमर्द्दयोः इतिकविकल्प
द्रुमः मठति वासो विनाशः ।
मर्द्दः कैश्चिन्नमन्यते इतिदुर्गा
दासः । ॥
मठ इ उ आध्याने इतिकविक
ल्पद्रुमः इ मंठ्यते आध्यानं स्मर
णोत्कंठे इत्यत्रव्याख्यातं इति ।



दुर्गादासः ।
मठः पुं छात्रादिनिलयः इत्यमरः
मठंति वसंति छात्रादयोऽत्र मठः
मठ्वास मर्दयोः अल् छात्रशीला
विद्यार्थिन छात्राः छत्रेणगुरुसेवा
लक्षणेन गुरुदोषाच्छादनात् छत्रं
तच्छीलत्वात् छात्रः विकारसंवेति
णः आदिना परिव्राजकतपस्विका
दीनां ग्रहः छात्रादीनां निलयो
गृहं छात्रादिनिलयः अर्थकथन
मेतत् नामाप्येतदिति केचित्
छात्रशाला प्रतिश्रयश्चैव इति
भरतः गंजीरत्यः इतिहारावली
अथमठादिप्रतिष्ठा प्रयोगः ।
यदि तद्दिने प्रतिमादिप्रतिष्ठा ।
क्रियते तदा तंत्रेण इष्टिश्राद्धा
दिकं विधाय देवप्रतिष्ठातंत्रोक्त
विधिना देवप्रतिष्ठां विधाय गृहप्रति
ष्ठाकर्तव्या यदि गृह प्रतिष्ठामात्रं
तदा प्रातः कृतनित्यक्रियः प्रक्षालि
तपाणिपादः आचांतः प्राङ्मुखो ।
वाग्यतः कुशासने उपविश्याचा
र्य्यं गंधादिना परितोष्य अस्मि
न् विस्तुवेश्मप्रतिष्ठा कर्मणि ओं
पुण्याहं भवंतोऽधिब्रुवंतु इतित्रिः ।
श्रावयेत् ओं पुण्याहमितित्रिस्तैरुक्ते
अस्मिन् विस्तुवेश्मप्रतिष्ठाकर्मणि ओं
स्वस्ति भवंतोऽधिब्रुवंत्वितित्रिः
श्रावयेत् ओं स्वस्तीतित्रिस्तैरुक्ते
अस्मिन् विस्तुवेश्म प्रतिष्ठाकर्मणि
ओं ऋद्धिं भवंतोऽधिब्रुवंतु इतित्रिः
श्रावयेत् ओं ऋध्यतामिति त्रिवे
देषुः यजुर्वेदिनां ओं स्वस्तिनइंद्रो
वृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः
स्वस्तिन स्तार्क्ष्यो अरिष्टनेमिः स्वस्ति
नो बृहस्पतिर्दधातु इत्यनेनाक्षता
न्क्षिपेत् सामगानांतु ओं स्वस्ति
सोमोऽयं स्तनः पिबंतस्यमरुतः
उतस्वराजो अश्विना स्वस्ति सोमो
अयं स्तनः पिबंतस्यमरुतो हा
इ उतस्वराजो वा हाइनो हाई
इति गीयमानेनाक्षतान् क्षिपेत्
गानाशक्तौ त्रिधा ऋचं वाचयेत्
ततः सूर्यः सोमोयमः कालसंध्ये
भूतान्यहः क्षपापवनोदिक् पति
र्भूमि राकाशंखचरामराः ब्राह्मं
शासनमास्थाय कल्पध्वमिहसन्निधिं
इति पठित्वा तत ओं तद्विष्णोः प
रमं पदं सदा पश्यंति सूरयः
दिवीव चक्षुराततम् इति विष्णुं
स्मृत्वा नारायणं नमस्कृत्य ओं त
त्सवितुर्वाच्य कुशाक्षत जलफलपू
गान्यादाय ओं अद्यामुके मास्यमुक
पक्षेऽमुक तिथावमुक गोत्रः

श्री अमुक देव शर्मा यत्तृण
काष्ठादिमय वेश्म परमाणुसमा
संख्य वर्ष सहस्रावच्छिन्न स्वर्गलो
क महितत्वकामः श्रीविष्णुप्रीतिका
मो विष्णुलोक प्राप्तिकामो वा विस्तुवे
श्म प्रतिष्ठामहं करिष्ये इतिसंकल्प
येत् इष्टकादिमये तु यत् इष्टकादिम
य वेश्म परमाणु समसंख्यवर्ष स
हस्र दशगुण कालावच्छिन्नस्वर्ग।
लोक महितत्वकाम इतिविशेषः
पाषाण वेश्मनितु तद्दशगुणका
लावच्छिन्न स्वर्गलोकेति विशेषः दे
वतांतर गृह प्रतिष्ठायांतु तद्देम
प्रयोगः ततः संकल्पसूक्तं पठेत
सामवेदोक्तं तद्यथा ओं देवो वो
द्रविणोदाः पूर्णां विवष्ट्वासिचं उ
द्वासिंचध्वमुपवा पृणध्वमादिद्वोदेव
ओहते यजुर्वेदोक्तं यथा ओं यज्जा
ग्रतो दूरमुदैति दैवं तदुसुप्तस्य त
थैवेति दूरंगमं ज्योतिषां ज्यो
तिरेकं तन्मेमनः शिवसंकल्पमस्तु
ततः सगणाधिप गौर्यादिषोड
शमातृका पूजा वसोर्धारासंपात
नायुष्यमंत्रजपाभ्युदयिक श्राद्धानि
कर्तव्यानि आयुष्यमंत्रो यथा ओं
आयुर्विश्वायु र्विश्वं विश्वमायुरसि
मद्दिप्रजांत्वष्टारधिनिये त्वस्मपा
तं जीवेम शरदो वयंते ओं आ
युषा मे पवस्व वर्चसा मे पवस्व
विदुः पृथिव्या दिवो जनित्राः शृण्व
न्त्यापादः क्षरंती सोमाह्याद्धाय मम।
युष मम ब्रह्मवर्चसाय यजमानस्याथा
अमुकस्य राज्याय तत्र विस्तु वे
श्म प्रतिष्ठाभ्युदयार्थमितिवाक्य
विशेषः पवमन्य वेश्मनि तत
उत्तराभिमुखं ब्राह्मणमुपवेश्य तत्
समीपे आसन मानीय प्राङ्मुखो
यजमानः प्रांजलि र्वदेत् ओं साधु
भवानास्तां ओं साध्वहमासे इति
प्रतिवचनं दत्वा तदासने उदङ्मुख
उपविशति ततो यजमानः ओं अर्च
यिष्यामो भवंतं इति वदेत् ओं
अर्चयेति प्रतिवचनं ततो गंधपुष्प
ताम्बूलालंकारै रभ्यर्च्यदक्षिणां जा
नुस्पृष्ट्वा ओं अद्येत्यादिअमुकगोत्र
ममुप्रवर ममुकदेवशर्माणं भवं
तं अस्मिन्संकल्पित विस्तुवेश्मप्र
तिष्ठाकर्मांगभूत होमकर्मणि ब्र
ह्मकर्मकरणाय गंधपुष्पताम्बूला
लंकारवस्त्रैरहं वृणे ओं वृतोऽस्मीति
प्रतिवचनं यथाविहितं ब्रह्मकर्म।
कुरु ओं यथाज्ञानं करवाणीति प्र
तिवचनं स्वयं होमासामर्थ्ये होतु
र्वरणमपितथैव कार्य्यं तत्रपार

कृत्वेन आचार्य्यस्थापितश्चैवकार्य्यं
शाङ्केनसदस्यस्यापि गुरो र्वदेत्
त् संकल्पिते ऽस्मिन् विश्वेश्वम प्र
तिष्ठा कर्म्मणीति वक्तव्यं ततो य
जमानः गुरोः पादौ धृत्वा पठेत्
नारायण स्वरूप त्वं संसाराज्जाहि
मां प्रभो त्वत् प्रसादात् गुरो य
त्तं प्राप्नोति यन्मयोदितं त्राहि
नाथप्रपन्नं मां भीतं संसार सा
गरात् देवता स्थापने त्वघ मम
शांतिं कुरु प्रभो ततो गुरुः
ॐ उत्तिष्ठ वत्स भद्रं नेमत्प्रसा दा
त्वयानघा प्राप्तव्यं धर्मकामार्थ्य
श्चायंयत् सुरासुरैः ततो गुरुः
ॐ पावमानीः स्वस्त्ययनीः सुदुघा
हि घृतश्चुतः ऋषिभिः संभृतो रसो
ब्राह्मणेष्वमृतं हितं इतिपावमा
नीसूक्तं प्रसपत्नं पुरस्तान्नः शिवं
दक्षिणतः कृधि अभयं सततं प
श्चात्भद्र मुत्तरतो गृहे इति
शाकुन सूक्तं ॐ रक्षो हणो वल
गहनः प्रोक्षामि वैष्णवान् रक्षो
हणो वलगहनोऽवनयामि वैष्णवा
न् रक्षो हणो वलगहनोऽवस्तृणा
मि वैष्णवान् रक्षो हणौवलगहना
उपदधामि वैष्णवी रक्षोहणो वल
गहनौ पर्य्यूहामि वैष्णवमसि वैष्ण

वाऽस्थः इतिरक्षोघ्नसूक्तं इति प
ठित्वा वेतालाश्च पिशाचाश्च राक्ष
साश्च सरीसृपाः अपसर्पन्तु ते
भूता ये भूता भुवि संस्थिताः वि
नायका विघ्नकरा महोग्रायज्ञहि
षोये पिशिताशनाश्च सिद्धार्थकै
र्वज्रसमान कल्पै मया निरस्ता विदि
शः प्रयांतु इतिश्वेतसर्षपान्विकीर्य
स्वे स्वे मंत्रे पंचगव्यं साधयेत्।
तत् शोधन मंत्रा यथा ॐ तत्
सवितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो योनः प्रचोदयात् इति गो
मूत्रं ॐ गंधद्वारां दुराधर्षां नित्या
पुष्टां करीषिणीं ईश्वरीं सर्वभूता
नां तामिहोपह्वये श्रियं इति
गोमयं ॐ आप्यायस्व समेतु ते
विश्वतः सोम वृष्ण्यं भवावाजस्य सङ्ग
थे इति दुग्धं ॐ दधिक्राव्णो अकारि
षं जिष्णोरश्वस्य वाजिनः सुरभि
नो मुखाकरत् प्रण आयूंषि तारिषत्
इति दधि ॐ तेजोसि शुक्रमस्यमृत
मसि धामनामासि प्रियं देवानामना
धृष्टं देवयजनमसि इति घृतं ॐ देव
स्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां
पूष्णो हस्ताभ्यां हस्तमाददे इति
कुशोदकं ॐ वेद्या वेदिः समाप्य
ते बर्हिषा बर्हिरिन्द्रियं यूपेन।

यूप आप्यते प्रणीतो अग्निरग्निना
इतिमंत्रेणवेदी संशोध्य पंचध्व
जान् घटस्थापनक्रमेण संस्थाप्य।
घटस्थापनमंत्रा यथा सामगानां
ॐ महि त्रीणामवोस्तु द्युक्षं मित्रस्या
र्य्यम्णः दुराधर्षं वरुणस्य इति भू
मेः ॐ धानावंतं करंभिनमपूपवंत
मुक्थिनं इंद्र प्रातर्जुषस्व नः इतिधा
न्यस्य ॐ आविशं कलशं सुतो वि
श्वा अर्षन्नभि श्रिय इंदुरिंद्राय
धीयते इतिकलशस्य ॐ अयमू
र्जावतो वृक्ष ऊर्जीव फलिनीभव।
पर्णं वनस्पते नुत्वा नुत्वा च सूयतां रयि
इतिपल्लवस्य ॐ आनो मित्रावरुणा घृ
तै र्गव्यूति मुक्षतं मध्वा रजांसि सु
क्रतू इतिजलस्य ॐ इंद्रं नरो ने
मधिता हवंते यत्पार्य्या युनजते
धियस्ताः शूरो नृषाता श्रवसश्च
कामआगोमति व्रजे भजात्वंनः इ
तिफलस्य ॐ सिंधोरुच्छ्वासे पतयंत
मुक्षणं हिरण्यपावाः पशुमासु गृ
भ्णते इति सिंदूरस्य ॐ त्वावतः पुरू
वसो वयमिंद्र प्रणेतः स्मसि स्था
तर्हरीणां इति स्थिरीकरणस्य ॐ प
वमानो व्यश्नवद्रश्मिभि र्वाजसातमः
दधाति स्तोत्रे सुवीर्य्यं इतिपुष्पस्य।
पञ्चधा ॐ भूरसि भुवनस्य।

दिति रसि विश्वस्यधायाविश्वा
रणाधत्री पृथिवी यच्छ पृथिवीं
दृंहपृथिवीं माहिंसीः इतिभूमे
ॐ धान्यमसि धिनुहि देवान् धिनु
हि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां
यज्ञन्य इतिधान्यस्य ॐ आजिघ्र
कलशं मह्यात्वा विशंत्विंदवः पुन
रूर्जा निवर्त्तस्वसानः सहस्रं धुक्ष्वो
रु धारा पयस्वती माविशताद्र
यि इतिघटस्य ॐ वरुणस्योत्तंभ
नमसि वरुणस्य स्कंभ सर्जनीस्थः।
वरुणस्य ऋतसदन्यसि वरुणस्य ऋत
सदनमसि वरुणस्य ऋतसदनीमा।
सीद इतिजलस्य ॐ धन्वनागाधन्वना
जिंजयेम धन्वनानीजाः समदोजयेम ध
न्वः शत्रोरपकामं कृणोतु धन्वनासर्वाः
प्रतिशा जयेम इतिपल्लवस्य ॐ याः
फलिनीर्य्या अफला अपुष्पा याश्च पुष्पि
णीः बृहस्पति प्रसूतास्तानो मुंचंत्वंह
हसः इतिफलस्य ॐ सर्वतीर्थमयं वा
रि सर्वदेव समन्वितं इमं घटं समारु
ह्य तिष्ठ देवगणैः सह इतिजलं दद्या
त् ॐ स्थिरो भव विड्वंग आशुर्भव वा
ज्यर्वन् पृथुर्भव सुषदस्त्वमग्नेः पुरीषवा
हनः इतिस्थिरीकरणस्य ॐ सिंधोरि
व प्राध्वने शूघनासो वातप्रमियः
पतयंति यह्वाः घृतस्य धारा अरुषोन

वाजीकाष्ठाभिंदन्नूर्मिभिःपिन्वमा
इतिसिंधूरसम् ॐश्रीश्चते लक्ष्मी
श्च पत्न्यावहोरात्रे पार्श्वेनक्षत्रा
णिरूपमश्विनौ व्यात्तंइष्णन्नि
षाणसर्वलोकं मनीषाण इतिइ
क्षुरस ततः फलपुष्प युतेविताने
ॐविमान एषदिवोमध्यआस्तआप
प्रिवान्रोदसी अन्तरीक्षंसविश्वाचीर
भिचष्टेघृताचीरन्तरापूर्वमपरंचके
तुं सामगानान्त ॐऊर्ध्वऊषुणऊतये
तिष्ठादेवोन सविताऊर्ध्वोवा जस्य
सनितायदंजिभि र्वाघद्भि र्विह्वया
महे इतिमंत्रेण वध्नीयात् ॐहि
रण्यगर्भः समवर्त्तताग्रेभूतस्यजातः
पतिरेक आसीत् सदाधार पृथि
वीद्यामुतेमां कस्मै देवाय हविषा
विधेम इति मंत्रेण मंडल मध्ये
स्वर्णपद्मंदत्वा स्वर्णशलाकयास्ला
स्तकीर्णमंडल मध्ये राजती प्र
तिमां ॐसुत्रामानं पृथिवीं द्या
मनेहसं सुशर्माणमदितिंसुप्रणी
तिं दैवीं नावं स्वरित्रामनाग
समस्रवंती मारुहेमास्वस्तये इति
मंत्रेण निःक्षिप्य घटपुस्त्वान् पूज
येत् प्रथमघटेगणेशं सूर्य्यंद्विती
यघटेशिवंदुर्गां तृतीयघटे विष्णु
लक्ष्मीसरस्वतीचतुर्थे अग्निवायुप

हृषंतेत्रपालान् कार्त्तिकेयमष्ठि
नीकुमारी पंचमे ब्रह्मान्तलोकपा
लान्स्वस्वमंत्रेणावाह्यपूजयेत्
ततोगुरुर्देवं प्रति मायोशा
लग्राममेवायथोक्तविधिनास्नापये
त् ॐभद्रंकर्णेभिःशृणुयामदेवाभ
द्रंपश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तु
ष्टुवांसस्तनूभिर्व्यशेमदेवहितंया
दायुः इतिमंत्रेणनिवेश्य ॐपताति
नु ॐलवामः शुद्धं शुद्धेनसाम्ना शु
द्धरूके वी द्वधा संशुद्धआशीर्वा
ममन्त इतिमंत्रेण शुद्धोदकेनस्ना
पयेत् ॐघृतवतीभिहतेनाभ्यज
ॐअतो देवा अवन्तु नोयतो वि
ष्णुर्विचक्रमे पृथिव्याः सप्तधाम
भिः इतिमसूरचूर्णेनोद्वर्त्य ॐस
मनेअग्नेसमिधःसमनिद्धाःसमक्ष
प्पःसमयामभियाणिसमहोत्राःसा
मध्वावा यजंति समयोनीरापहम्भा
हुतेन इतिउष्णोदकेनस्नापयेत् ॐ
द्रुपदादिवमुमुचानः स्विन्नःस्नातो
मलादिव पूतं पवित्रेणेवाज्यमापः
शुंधन्तु मैनसः इतिचंदनेनानुलिप्य
ॐआपोहिष्ठामयोभुवः स्तान ऊर्जे
दधातन महेरणाय चक्षसे इतिन
दीतोयेन स्नापयेत् ॐशन्नोदेवी
रभिष्टय आपो भवन्तु पीतये।

शंयोरभिस्रवन्तु नः इतितीर्थम्
त् कलसेनस्नापयित्वा गायत्र्यागंधयु
क्तजलेन स्नापये ॐहिरण्यवर्णाः
शुचयः पावकाः यासुजातः कश्य
पोयास्विन्द्रः अग्नीयागर्भन्दधिरे।
विरूपास्तान् आपःशंस्योनाभ
वंतु इतिपंचमृत्तिकया ॐइमंमेगं
गेयमुनेसरस्वतिशुतुद्रिस्तोमंसच
तापरुष्ण्या असिक्न्यामरुद्वृधे वित
स्तयार्जीकीये शृणुह्यासुषोमया
इतिमंत्रेणसिकताजलेन ॐतद्वि
ष्णोः परमंपदंसदापश्यंतिसूरयः
दिवीव चक्षुराततम् इतिवल्मीक
तोयेन ॐयाओषधीःसोमराज्ञी
र्विष्ठिताःपृथिवीमनुतासांत्वम
स्मिन्नासनेऽच्छिद्रंशर्म यच्छत इ
तिसर्वौषधिजलेन ॐयज्ञायज्ञा
वोअग्नये गिरागिराचदक्षसे प्रप्र
वय मृतंजातवेदसं प्रियंमित्रं
नशंसिषं इतिकषाययुक्तजलेन
पंचगव्येनस्वैः स्वैः मंत्रैः स्नापयेत्
ॐपयः पृथिव्यांपयओषधीषु प
योदिव्यंतरिक्षेपयोधाः पयस्वती
प्रदिशः संतु मह्यंस्नामि प
यसाहुतेन सप्तासम्जाम्प्रदः इति
पंचगव्येन ॐतस्माद्यज्ञात्सर्वहुत
ऋचःसामानियज्ञिरे छन्दां।


सि यज्ञिरे तस्माद्यजुस्तस्मादजा
यत इतिपंचामृतेन ॐयाःफलिनी
ति फलोदकेन ॐसहस्रशीर्षेति
वक्ष्यमाण मंत्रेण सहस्रधारया
ॐपतोविष्णुरिति पूर्वोक्तमंत्रेण त
लसी चन्दन युक्तजलेन ॐयासां
राजावरुणो याति मध्येसत्यानृते।
अवपश्यन्जनानां मधुश्चुतः शुचयो
याःपावकास्ताआपोदेवी रिहमा
मवन्तु इत्यनेनवेदादिचतुष्टयेन त
था ॐअग्निमीलेपुरोहितं यज्ञ
स्यदेवमृत्विजं होतारं रत्नधातमम् १
ॐइषेत्वोर्जेत्वा वायवस्थदेवोवः
सविताप्रार्पयतु श्रेष्ठतमायकर्म।
णे २ ॐअग्नआयाहिवीतयेगृ
णानो हव्यदातये निहोतासत्सि
बर्हिषि ३ ॐशन्नोदेवीरभिष्टयेआ
पो भवन्तु पीतये शंयोरभिस्रवं
तुनः ४ वक्ष्यमाण पुरुषसूक्तेन
च एकाशीति घटैः स्नापयेत् ।
अशक्तो अष्टाविंशति घटैरष्टघटै
र्वा स्नापयित्वा धौतवाससामलम्
पनीय यथोपचारैः संपूज्य मंडले।
आधार शक्त्यादीनि पूजयेत् ॐ
आधारशक्तयेनमः एवं सर्वत्र।
प्रणवादिनमो ऽन्तेन प्रकृत्यैकूर्मा
य अनंताय पृथिव्यै क्षीरसमु।

ध्याय रत्नद्वीपाय रत्नोज्वलसहि
त महामणिमंडपाय कल्पवृक्षाय
रत्नवेदिकायै रत्नसिंहासनाय आ
ग्नेय्यां धर्माय नैऋत्यां ज्ञानायवा
यव्यां वैराग्याय ऐशान्यां ऐश्वर्य्या
य पूर्वस्यां अधर्माय पश्चिमायां अ
वैराग्याय उत्तरस्यां अनैश्वर्य्याय
मध्ये अं अर्कमंडलाय उं सोम।
मंडलाय मं वह्निमंडलाय सं
सत्वाय रं रजसे तं तमसे आं
आत्मने अं अन्तरात्मने पं परमा
त्मने ह्रीं ज्ञानात्मने पूर्वादिकेश
रेषुमाद्दलेष्वेव ओंविमलायैनमः
एवमुत्कर्षिण्यै ज्ञानायै क्रिया।
यै योगायै प्रह्व्यै सत्यायै ईशा
नायै कर्णिकायां अनुग्रहायै क
र्णिकोपरि ओंनमोभगवते विष्णवे
सर्वभूतात्मने वासुदेवाय सर्वात्म
संयोगयोगपीठात्मने नमः।
ततोमंडलदेवं संस्थाप्य पौरा
णिक मंत्रेण पुरुषसूक्तेन वा षो
डशोपचारैः पूजयेत् तद्यथा
ओंसहस्रशीर्षा पुरुषः सहस्राक्षः
सहस्रपात् स भूमिं सर्वतोस्पृत्वा
अत्यतिष्ठद्दशांगुलं १ सर्वतःस्था
नेविष्णवः हत्वास्थानेस्थित्वा इत्य
पिपाठः इतिपठित्वा भगवन्।

विष्णोइहागच्छ २ इहतिष्ठ २ इहस
न्निरुद्धस्व मम पूजां गृहाण ततो
यथाविध्यासनमानीय वमिति वरु
णवीजेनाम्भसा संप्रोक्ष्यासन
मभ्यर्च्य ओंपुरुष एवेदं सर्वं यद्भू
तं यच्च भाव्यं उतामृतत्वस्येशानो
यदन्नेनातिरोहति २ इतिपठित्वा
इदं मत्कासनं ओं नमो भगवते
वासुदेवाय श्रीविष्णवे नमः एवं
सर्वत्र दाने ओंभगवान् विष्णो स्वा
गतं इतिस्वागतप्रश्नः ततस्ताम्र
पात्रस्थं यव श्यामाक दूर्वापद्म
जिन्यादि युक्तं जलं गृहीत्वा ओंए
तावानस्य महिमातोज्यायांश्च पू
रुषः पादोस्य विश्वा भूतानि त्रि
पादस्यामृतं दिवि ३ इतिपठित्वा
इदं पाद्यं पूर्ववन्मूलेन पादयो
र्दद्यात् ततो गंध पुष्पाक्षतयव
कुशाग्र तिल सर्षप दूर्वायुक्तं ज
लं शंखादिपात्रे कृत्वा ओंत्रिपादूर्ध्व
उदैत् पुरुषः पादोऽस्येहा भवत्
पुनः ततो विष्वङ् व्यक्रामत् सा
शनानशने अभि ततः स्थाने तस्मा
द्विराडिति पाठः इतिपठित्वा साम
गानामिदं मर्घ्यमन्येषामेषोऽर्घः
इतिशिरसि दद्यात् जातीलवंग
कक्कोलयुक्तं वेवलेवापात्रस्थज

लं गृहीत्वा ओंततो विराडजायत।
विराजो अधिपूरुषः सजातो अत्य
रिच्यत पश्चाद्भूमि मथोपुरः ५ इति
पठित्वा इदमाचमनीयं ओंनमो भ
गवते वासुदेवाय श्रीविष्णवे स्वधा
इति दद्यात् ततः कांस्यपात्रस्थं।
दधिमधुघृतात्मकं कांस्येन पिहि
तं मधुपर्कं गृहीत्वा ओंतस्माद्यज्ञात्
सर्वहुतः संभृतं पृषदाज्यं पशुं
स्तांश्चक्रे वायव्यानारण्या ग्राम्या
श्चये ६ इतिपठित्वाएषमधुपर्कः
ओं नमो भवतेवासुदेवाय श्रीविष्ण
वेस्वाहा इतिदद्यात् ततः पूर्वमं
त्रं पठित्वा पुनराचमनीयंच दद्यात्
कर्पूरवासित जलं गृहीत्वा ओं त
स्माद्यज्ञात् सर्वहुत ऋचःसामानि
जज्ञिरे छन्दांसि जज्ञिरे तस्माद्य
जुस्तस्मादजायत ७ इति पठित्वा
इदं स्नानीय जलंमूलेन दद्यात्।
पूर्ववत् पुनराचमनीयं दत्वा वस्त्रं
गृहीत्वा ओंतस्मादश्वा अजायंतये
केचो भयादतः गावोह जज्ञिरे
तस्मात्तस्माज्जाता अजावयः ८ इति
पठित्वा इदं वस्त्रं मूलेन दद्यात्
एव मुत्तरीयवस्त्रं यज्ञोपवीतं पू
र्ववदाचमनीयं दत्वाभरणं गृही
त्वा ओं तं यज्ञंबर्हिषि प्रोक्षन् पु

रुषं जातमग्रतः तेनदेवा अयजं
त साध्या ऋषयश्चये ९ इतिपठित्वा
मूलेन दद्यात् ओंयत् पुरुषं व्यद
धुः कतिधा व्यकल्पयन् मुखंकिम
स्यासीत्किं बाहू किमूरूपादा उच्ये
ते १० ऋग्वेदस्याश्वलायन शाखा
यांतु मुखं किमस्यकौ बाहू काऊ
रूपादा उच्येते इतिभेदः इति
पठित्वामूलेन गंधं दद्यात ओं ब्रा
ह्मणोस्य मुखमासीत्बाहूराजन्यः
कृतः ऊरूतदस्य यद्वैश्यः पद्भ्यां।
शूद्रो अजायत ११ इतिपठित्वामूलेन
पुष्पंदद्यात् ओंचन्द्रमामनसो जात
श्चक्षोः सूर्यो अजायत श्रोत्राद्वा
युश्चप्राणश्च मुखादग्निरजायत १२
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजा
यत इतिच पाठः इति पठित्वामूलेन
धूपंदद्यात ओंनाभ्या आसीदंतरिक्षं
शीर्ष्णोद्यौः समवर्त्तत पद्भ्यांभूमि
र्दिशः श्रोत्रात्तथा लोकानक
ल्पयन् १३ इतिपठित्वामूलेनदीपं
दद्यात ततो नैवेद्योपरि मत्स्य।
मुद्रया मूलमंत्रं दशधा जप्त्वाभ्य
र्च्य धेनुमुद्रां प्रदर्श्य ओंयत्पुरुषेण
हविषा देवा यज्ञ मतन्वत वसंतो
ऽस्यासीदाज्यं ग्रीष्मइध्मः शरद्धविः
१४ इति पठित्वा नैवेद्यं मूलेन।




दृयात् ॐ समास्यासन् परिधय
स्त्रिः सप्तसमिधः कृताः देवा यद्य
ज्ञं तन्वाना अबध्नन् पुरुषं पशुं ॥१५
इति पठित्वा कर्पूरादि वासितं पा
नीयं ताम्बूलं पुनराचमणीयं दद्ये
णोचरधात् ॐ यज्ञेन यज्ञमयजन्त
देवास्तानि धर्माणि प्रथमान्यासन् तेह
नाकं महिमानः सचन्त यत्र पूर्वे सा
ध्याः सन्ति देवाः ॥१६ इति पठित्वा अं
जलि त्रयं पुष्पं दत्वा आवरणानि स
मुच्चयस्थलमंत्र यथाशक्ति जप्त्वा अ
णोमेन ऋग्वेदस्याश्वलायनशाखो
योक्तपद्धत् पुरुषेणाहविषा इत्यादिना
स्नानीयं १ तं यज्ञं बर्हिषीत्यादिना
वस्त्रं २ तस्मात् यज्ञात् सर्वहुतः
संभृत मित्यादिना यज्ञोपवीतं ३
तस्माद्यज्ञात् सर्वहुत ऋचः सामा
नीत्यादिना चन्दनं ४ तस्मादश्वा अ
जायन्त इत्यादिना पुष्पं ५ यत् पु
रुषं व्यदधुरित्यादिना धूपं ६ ब्रा
ह्मणोस्य मुखमासीदित्यादिना दीपं
७ चंद्रमा मनसो जात इत्यादि
ना नैवेद्यं ८ नाभ्या आसीदन्तरि
क्षमित्यादिना ताम्बूलं ९ सप्तास्यास
न्परिधय इत्यादिना नीराजनं १० इति
भेदः अन्यत् समानं ततो गुरुः ॐ
इत्यभिषिमे उपविश्य कुंडे स्थंडि

लेवाद्यालम्ब विधिना तदन्तानेस्वगृ
ह्योक्त विधिना सहस्र नामानमग्निं
संस्थाप्य ब्रह्मस्थापनान्तं प्रमिषे
कार्थं पेशान्यां नव सब्रणाम पया
मंवहि ईच्छन्त क्षुधितं चूतास्वत्थन्य
ग्रोधोदुम्बरसप्त पल्लवच्छन्नमुखं
तवस्त्र युतं अन्तः स्थितपंचरत्नौषधि
मल्लजलपूर्णं दृढकलशं संस्थाप्य तता
नामुपरि ॐ आजिघ्र कलशमित्यादि मं
त्रेण स्थापयेत् तत्र वरुणस्थापनमन्त
मसीति वरुणं न्यसेत् ॐ गंगाद्याः
सरितः सर्वाः समुद्राश्च सरांसि च
सर्वे समुद्राः सरित स्तीर्थानि जल
दानदाः आयान्तु यजमानस्य दुरित
क्षय कारकाः इति तीर्थानि च न्य
सेत् तत्रैव कलशे अश्वस्थानाद्गज
स्थानात् वल्मीकात् संगमात् ह्रदा
त् गोकुलात् राजद्वारात् आनीय सप्त
मृदः क्षिपेत् सर्वौषधीश्च ततः स्व
स्वपार्श्वे कुर्यात् अग्नेरुत्तरे हस्तप्रमाण
विस्तारायामं प्रादेशपरिमितोदुम्बर।
निर्मितं हर्वी साङ्केशहस्तविस्तारायाम।
प्रादेश परिमितोदुम्बर निर्मितमेत
णं चरुस्थाली आज्यस्थाली उदूखलमु
षले स्रुवं स्रुचौ होमार्थं सवं समिधं
आज्यादीनि उपयुक्तानि पात्रस्पा
सं विनियोग क्रमेण सादयेत् ॥

संस्थाप्य यवान् व्रीहीन् तदभावे
तंडुलान् शूर्पे निधाय सामगाः
ॐ विश्वेभ्यो त्वा जुष्टं निर्वपामि इति
यवादि प्रसृति मेकां चरुस्था।
ल्यां कृत्वा उदूखल मध्ये स्थापये
त् यजुर्वेदी तु ॐ विश्वेभ्यस्त्वा जुष्टं
गृह्णामि ॐ विश्वेभ्यस्त्वा जुष्टं निर्वपामि
चमसस्थ जलेन ॐ विश्वेभ्यस्त्वा जुष्टं
प्रोक्षामीति त्रयं कुर्यात् ऋग्वेदी
तु ॐ विश्वेभ्यस्त्वा जुष्टं निर्वपामि ॐ वि
श्वेभ्यस्त्वा जुष्टं प्रोक्षामीति निर्वाप
प्रोक्षण मात्रं अस्य ग्रहण प्रतिष्ठा
नस्थादो जुष्टग्रहणं एवं सर्वत्र
एवमग्न्यादिभ्यः ॐ अग्नये त्वा जुष्टं नि
र्वपामि एवं वायवे सूर्याय ब्रह्मा
विश्वेभ्यः अग्नये वायवे पुनरग्न
ये वरुणाय पुनरपि अग्नये सूर्या
य प्रजापतये अन्तरीक्षाय द्यवे ब्रह्म
णे पृथिव्यै महाराजाय सोमाय इन्द्रा
य अग्नये यमाय नैरृताय वरुणा
य वायवे कुबेराय ईशानाय ब्रह्मणे।
अनन्ताय आदित्याय सोमाय मंग।
लाय बुधाय बृहस्पतये शुक्राय श
नैश्चराय राहवे केतवे इत्येवं त्रिं
शत् प्रसृतीः स्थापयेत् हविस्स्थाली उ
परिकृतरक्षिता वाममुष्टिभ्यां मुस
लेनावहत्य शूर्पेण प्रस्फोटयेत्

एवमपरं वारद्वयमवहत्य शूर्पेण
प्रस्फोटयेत् तथा कर्तव्यं यथावा
र त्रयेण तंडुल निष्पन्ना भवन्ति
तदशक्तौ संस्कारमात्रार्थं तंडुले।
ष्वेव तत स्तंडुलान् त्रिः प्रक्षाल्य।
चरुस्थाल्यां संमत्रकं कृत्वा नराग्रेय
विधिनिः क्षिप्य तत्र तंडुलान् नि
धाय कपिलायाः दुग्धं निः क्षिप्य तद
भावे अन्यधेनोः दुग्धं निः क्षिप्य सर्वा
पाणादि प्रदक्षिणं भीत हृद्गं म
वचरुयं स्थाप्य पचेत् यथा दारुका
ठिन्याति शैथिल्य मंडगलन रहि
तो ऽन्तरुष्मपक्वश्चरुर्भवति ज्वल
दुल्मुकेन स्थाली मध्यस्थं चरुं दृष्ट्वा
ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति
सूरयः दिवीव चक्षुराततमित्यनेन
मंत्रेण ॐ मित्यनेन च घृतेनाभिघा
र्य दक्षिणावर्तेन संमिश्रयेत्।
ततो ऽग्नेरुत्तरतो ऽवतार्य पुन
र्ज्वल दुल्मुकेन स्थाली मध्यस्थं दृष्ट्वा
पुनर्घृतेनाभिधारयेत् ततः प
श्चिमाभिमुखः कुशाङ्किं समाप्य।
सामगस्तु काम्य कर्मागत्वेन तपश्च
तेजश्च श्रद्धा च ह्रीश्च सत्यं चाक्रोध
श्च त्यागश्च धृतिश्च धर्मश्च सत्वं च
वाक्च मनश्चात्मा च ब्रह्म चतानि प्र
पद्ये तानि मामवन्तु इति जपित्वा।




विद्रूपात्तजपं कुर्य्यात् ततः प्रकृ
ते कर्मणि ॐ पिङ्गाक्ष स्मश्रुकेशा
न्तः पीनांग जठरारुणः छागस्थः ।
साक्षसूत्रोऽग्निः सप्तार्चिः शक्तिधार
कः इत्यादित्यप्रमाणीयं ध्यात्वा वि
रूवेश्म प्रतिष्ठाकर्मणि अग्नेर्वं साह
स्रनामासीति नामकृत्वा वाक्यसंपूज्य
प्रादेश प्रमाणां हुतांशां समिधं न्
सीमग्रीद्धुत्वा मेतत्तान बर्हं गृहीत्वा ।
ॐ तद्विसोरिन्यादि स्वाहा नेन्नत्तइया
त सर्वत्र सामगानां मन्त्रोक्त देवतो
देशो नास्ति अन्येषां इदं विष्णु
वे इति ॐ भूः स्वाहा इदमग्नये ॐ
भुवः स्वाहा इदं वायवे ॐ स्वः स्वा
हा इदं सूर्य्याय ॐ भूर्भुवः स्वः तत्स
वितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात् स्वाहा इ
दं सूर्य्याय ॐ तद्विप्रासो विपन्य
वो जागृवांसः समिन्धते विष्णोर्यत्
परमं पदं स्वाहा इदं विष्णवे ॐ
विश्वत श्चक्षुरुत विश्वतोमुखो ।
विश्वतो बाहुरुत विश्वतस्पात् संबा
हुभ्यां धमति संपतत्रै द्यावा भू
मी जनयन् देव एकः स्वाहा इदं वि
श्वे ॐ अग्निमीळे पुरोहितं यज्ञ
स्य देवमृत्विजं होतारं रत्नधातमं
स्वाहा इदमग्नये ॐ इषेत्वो ।

र्जेत्वा वायवस्थ देवो वः सविताप्रा
र्पयतु श्रेष्ठतमाय कर्मणे स्वाहा
इदं वायवे ॐ अग्न आयाहि वीतये
गृणानो हव्यदातये निहोता सत्
सि बर्हिषि स्वाहा इदमग्नये ॐ श
न्नो देवी रभीष्टये शन्नो भवन्तु पी
तये शंयो रभिस्रवन्तु नः स्वाहा
इदं वरुणाय ॐ भूरग्नये स्वाहा ॐ
सूर्य्याय स्वाहा ॐ प्रजापतये स्वा
हा ॐ अन्तरीक्षाय स्वाहा ॐ द्यौः स्वाहा
ॐ ब्रह्मणे स्वाहा ॐ पृथिव्यै स्वाहा
ॐ महाराजाय स्वाहा यद्यपि साम
गेतरे स्तत्तद्देवतोद्देशः पश्चात् ।
कार्य्यः ॐ सोमं राजानं वरुण
मग्निमन्वारभामहे आदित्यं वि
ष्णुं सूर्य्यं ब्रह्माणञ्च बृहस्पतिं स्वा
हा इदं सोमाय तत्र दिक्पाला
होमः ॐ त्रातार मिन्द्र मवितार
मिन्द्रं हवे हवे सुहवं शूर मिन्द्रं
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति
नो मघवा धात्विन्द्रः स्वाहा इदमि
न्द्राय ॐ अग्निं दूतं वृणीमहे होता
रं विश्ववेदसं अस्य यज्ञस्य सुक्रतुं
स्वाहा इदमग्नये ॐ नाके सुपर्ण
मुपयत् पतन्तं हृदा वेनन्तो अभ्य
चक्षत त्वा हिरण्य पक्षं वरुणस्य दू
तं यमस्य योनौ शकुनं भुरण्युं स्वाहा

इदं यमाय ॐ वेष्या हि निर्ऋती
नां वज्रहस्तः परिव्रजं अहरहः सि
न्धु परिपदा मिव स्वाहा इदं निर्ऋ
तये ॐ घृतवती भुवनाना मभि
श्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावा पृथिवी वरुणस्य धर्मणा
विष्कभिते अजरे भूरिरेतसा स्वाहा इ
दं वरुणाय ॐ वात आवातु भेषजं
शंभु मयो भुनो हृदे प्राण आयूंषि
तारिषत् स्वाहा इदं वायवे ॐ
सोमं राजानं वरुण मग्निमन्वारभा
महे आदित्यं विष्णुं सूर्य्यं ब्रह्माणं
च बृहस्पतिं स्वाहा इदं सोमाय ॐ
अभित्वा शूर णोनुमो ऽदुग्धा इव
धेनवः ईशान मस्य जगतः स्वर्दृश
मीशान मिन्द्र तस्थुषः स्वाहा इद।
मीशानाय ॐ ब्रह्मयज्ञानं प्रथमं
पुरस्ताद्विसीमतः सुरुचो वेन आवः
सबुध्न्या उपमा अस्य विष्ठाः सत
श्च योनि मसतश्च विवः स्वाहा इदं
ब्रह्मणे ॐ चर्षणीधृतं मघवानमु
क्थ्यामिन्द्रं गिरो बृहतीरभ्यनूषत
वावृधानं पुरुहूतं सुवृक्तिभिरम
र्त्यं जरमाणं दिवे दिवे स्वाहा ।
इदं मनन्ताय इतिसामगोनुहूयात्
तन्न देवतोद्देशस्तेन कर्त्तव्यः तत्र
देवता प्रकाशनायच देवता वि

शेषाउक्ताः यजुर्वेदीतु ॐ
त्रातार मिन्द्र मवितार मिन्द्रं हवे
हवे सुहवं शूर मिन्द्रं ह्वयामि शक्रं
पुरुहूत मिन्द्रं स्वस्तिनो मघवा धा
त्विन्द्रः स्वाहा इदं मिन्द्राय ॐ वैश्वा
नरो न ऊतय आप्रयातु परावतः
अग्निरुक्थेन वाहसा उपयामगृही
तोसि वैश्वानराय एषते योनि
वैश्वानराय त्वा स्वाहा इदमग्नये
ॐ असि यमो ऽस्यादित्यो ऽर्वन्नसि
त्रितो गुह्येन व्रतेन असि सोमेन
समया विपृक्त आहुस्ते त्रीणि
दिवि बन्धनानि स्वाहा इदं यमाय
ॐ यत्ते देवी निर्ऋतिराबबन्ध पा
शं ग्रीवास्व विचृत्यं तत्ते विष्याम्या
युषो न मध्यादथैतं पितुमद्धि प्रसू
तः नमो भूत्यै यदं चकार स्वाहा ।
इदं निर्ऋतये शाखानेरन्ते ॐ य
त्ते देवी निर्ऋतिराबबन्ध दाम ग्री
वा स्वविच र्त्यं इदं तेन द्विष्याम्या
युषो न मध्यादथा जीवः पितुमद्धि
प्रमुक्तः स्वाहा इदं निर्ऋतये ॐ
वरुणस्योत्तम्भनमसि वरुणस्य स्क
म्भसर्जनीस्थः वरुणस्य ऋतसदन्यसि
वरुणस्य ऋतसदनमसि वरुणस्य ।
ऋतसदनी मासीद स्वाहा इदं वरुणा
य ॐ वातो वा मनो वा गन्धर्वाः



सप्तविंशति स्ते ऽग्रेसमयुंजगेंस्ते
ऽस्मिन् यवमादधुः स्वाहा इदंवायवे
ॐ ऊविरंगायवमंतो यवंविधथा
दान्त्यनुपूर्वं वियूयं इह हैषां
कृणुहि भोजनानि बर्हिषानमउ
क्तिं नजग्मुः स्वाहा इदं ॐकुवेराय
ॐतमीशानं जगतस्तस्थुषस्पतिंधि
यिञ्जमवसेहूमहे वयं पूषाणोयथा
वेदसामसहृधे रक्षिता पायु रदब्ध
स्वस्तयेस्वाहा इदमीशानायॐ आ
ब्रह्मन् ब्राह्मणोब्रह्मवर्चसीजायता
माराष्ट्रेराजन्य शूर इषव्योतिव्याधी
महारथो जायतां इदं ब्रह्मणेॐ
नमोऽस्तु सर्पेभ्यो ये केच पृथिवी
मनुये अन्तरीक्षेयेदिविनेभ्यः स
र्पेभ्योनमः स्वाहा इदमनन्ताय ।
ऋग्वेदीत ॐत्रातारमिन्द्रमवितार
मिन्द्रं हवे सुहवं शूरमिन्द्रं ऊ
यामिशक्रं पुरुहूत मिन्द्रंस्वस्तिनो
मघवा धात्विन्द्रः स्वाहा इदमिन्द्रा
य ॐअग्निं दूतं पुरोदधेहव्यवाह
मुपब्रुवे देवा आसादयादिह स्वा
हा इदमग्नये ॐयमायसोमंसुनत
यमाय जुहुताहविः यमंहयग्नो
गच्छत्यग्नि दूतो अरंकृतः स्वाहाइ
दंयमाय ॐएषतेनिर्ऋते भाग
स्तंजुषस्व स्वाहा अग्निनेत्रेभ्यो दे

वेभ्यः पुरः सद्भ्यः स्वाहा यमनेत्रे
भ्योदक्षिणासद्भ्यः विश्वदेव नेत्रे
भ्यः देवेभ्यः स्वाहापश्चात् सद्भ्यः
स्वाहा मित्रावरुण नेत्रेभ्यो देवा
मारुत्वभ्य उत्तरासद्भ्यः स्वाहा सोम
नेत्रेभ्यो देवेभ्य उपविशद्भ्योदुवः
सद्भ्यः स्वाहा इदं निर्ऋताय ।
आश्वलायन शाखायांत ॐमोषुण
परापरा निर्ऋति र्दुर्हणावधीन प
दीष्ट तृष्णयासह स्वाहा इदंनैर्ऋता
ॐ तत्वायामि ब्रह्मणा वंदमानस्त
दाशास्ते यजमानो हविर्भिः अहे
ड मानोवरुणेहबोधुरुशं समा
नआयुः प्रमोषीःस्वाहाइदंवरुणाय
ॐवातो वातो मनोवा गंधर्वाः
सप्तविंशति स्तेग्रे ऽश्वमयुंजं स्ते
ऽस्मिन् यवमादधुः स्वाहा इदं वा
यवे आश्वलायन शाखायांत ॐ
तव वायु ऋतस्पते त्वष्टुर्जामातरं
द्भुत अवांस्या वृणीमहे स्वाहा
इदं वायवे ॐ ऊविरंगयेवमन्तो
यवंचियथा दान्त्यनुपूर्वंवियूयइह
इषां कृणुहि भोजनानिये- हिं
षो नमो वृक्तिं नजग्मुःस्वाहा इदं
कुवेराय ॐतमीशानंजगतस्तस्थु
षस्पतिं धियं जिन्व मवसे हूमहे
वयं पूषाणोयथा वेदसा मसहृ

रक्षिता पायु रदब्ध स्वस्तये स्वाहा
इदमीशानाय ॐ ब्रह्मजज्ञानं प्र
थमं पुरस्ताद्विसीमत सुरुचो वेन
आवः सबुध्या उपमा अस्यविष्ठा।
सतश्च योनि मसतश्चविवः स्वाहा
इदंब्रह्मणे ॐनमोऽस्तु सर्पेभ्यो।
येकेच पृथिवी मनुयेऽन्तरीक्षे ये
दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा।
इदमनन्ताय ततो नव ग्रह हो
मः ॐआकृष्णेन रजसा वर्तमानो
निवेशयन्नमृतं मर्त्यंच हिरण्ययेन
सविता रथेना देवो यातिभुवनानि
पश्यन् स्वाहा ॐआप्यायस्व समे
तुते विश्वतः सोमवृष्ण्यं भवावाजा।
स्य संगथे स्वाहा ॐ अग्निर्मूर्द्धा
दिवः ककुत्पतिः पृथिव्याअयं अ
पांरेतां सि जिन्वति स्वाहा । ॐ
अग्नेविवस्वदुषसश्चित्रं राधाऽमर्त्य
आदाशुषे जातवेदो वहात्वमद्या
देवां उषर्बुधः स्वाहा ॐबृहस्पते
परिदीया रथेन रक्षोहामित्रां अ
पबाधमानः प्रभंजत्सेना प्रमृणो
युधा यजन्नस्माक मेध्यविताद्या
नोस्वाहा ॐशुक्रन्ते ऽन्यद्यजतन्ते।
अन्यद्विषुरूपे अहनी द्यो रिवासि
विश्वा हि माया अवसिस्वधावन्
भद्रातेपूषन्निह रातिरस्तुस्वाहा ॐ


शन्नोदेवी रभीष्टये शन्नोभवन्तु पी
तये शंयो रभिस्रवंतु नः स्वाहा।
ॐकयान श्चित्र आभुव दूतीसदा वृ
धः सखा कया सचिष्ठया वृता स्वाहा
ॐ केतुंकृण्वन्नकेतवे पेशो मर्य्या अ
पेशसे समुषद्भिरजायथा स्वाहा ॥
यजुर्वेदी तु ॐ आकृष्णेनेत्यादि।
इदं सूर्य्याय ॐ इमं देवा अ
सपत्नं ऽसुवध्वं महते क्षत्राय म
हते ज्येष्ठ्याय इम मनु ममुष्य पुत्र
ममुष्याः पुत्रमस्यै विशे स्वाहा ॥
इदं सोमाय ॐ अग्निर्मूर्द्धा दिवः
ककुत्पतिः पृथिव्या अयं अपां ऽ
रेतांऽसि जिन्वति स्वाहा इदं मं
गलाय ॐ उद्बुध्य स्वाग्ने प्रतिजा
गृहि त्व मिष्टापूर्ते सं ऽसृजेथामयं
च अस्मिन् सधस्थे अध्युत्तरस्मिन्विश्वे
देवायजमानश्च सीदतस्वाहा इदं
बुधाय ॐबृहस्पते अति यदर्यो
अर्हाद्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदय च्छवस ऋतप्रजाततदस्मा
सु द्रविणं धेहि चित्रंऽस्वाहा इदं
बृहस्पतये ॐअन्नात् परिस्रुतो।
रसंब्रह्मणाव्यपिबत् क्षत्रंपयः सो।
मंप्रजापतिः ऋतेन सत्य मिन्द्रि
यं विपान ऽशुक्रमंधसः इंद्रस्येंद्रि
यमिदं पयोमृतं मधु स्वाहा ।

इदं शुक्राय ॐ शन्नोदेवीरभीष्टय आपो भवन्तु पीतये शंयो रभि स्रवन्तु नः स्वाहा इदं शनैश्चराय ॐ कांडात् कांडात्प्ररोहन्ती परुषः परुषः परि एवानो दूर्वे प्रतनु सहस्रेण शतेन च स्वाहा इदं राहवे ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे समुषद्भि रजायथाः स्वा हा इदं केतुभ्यः ऋग्वेदीक्त एभि रेव मंत्रै र्जुहुयात् ॥ ततो मेक्षणं मग्नौ प्रक्षिपेत् एवं चरु होमं समाप्य चरुशेषेण दिग्भ्यो बलिं दद्यात् तद्यथा एष पायस बलिः ॐ प्राच्यै दिशे नमः एवमा ग्नेय्यै अवाच्यै निर्ऋत्यै प्रतीच्यै । वायव्यै उदीच्यै ईशान्यै ऊर्द्ध्वायै । ध्रुवायै अधोदिशे ततो हुताशं ॥ पलाश समिधा अष्टोत्तरशतं जुहु यादनेन मंत्रेण ॐ तद्विष्णो रि त्यादि स्वाहा इदं विष्णवे ततः पू र्वोक्ते ग्रहहोम मंत्रै स्तत्तद्देवता भ्यः ऋग्वेदोक्ताहुती र्जुहुयात्तत स्त्वाज्येन पुरुषसूक्त नवभिर्मंत्रैः सामग्री र्जुहुयात् यथा ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं स मूढमस्य पांशुरे स्वाहा १ ॐ अग्ने त्वमिद्भो अग्रतोऽस्मसदः शतावोचा

विदथ्या जातवेदस्य वैश्वानरायम ति नेद्यसि शुचिः सोम इव पवते चारु रग्नये स्वाहा २ ॐ प्रकाव्य मुशनेव ब्रुवाणो देवो देवानां ज निमा विवक्ति महिव्रतः शुचिबंधुः पावकः पदा वराहो अभ्येति रेभन् स्वाहा ३ ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिं स र्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलं स्वा हा ४ ॐ त्रिपादूर्ध्व उदैत् पुरुषः पादो ऽस्येहा भवत् पुनः ततो विष्वङ् व्यक्रामत् साशनानशने अभि स्वाहा ५ ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं उतामृतत्वस्य ईशानो यदन्नेनातिरोहति स्वाहा ६ ॐ एतावानस्य महिमातो ज्या यांश्च पुरुषः पादो ऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि स्वा हा ७ ॐ ततो विराडजायत । विराजो अधिपुरुषः स जातो अत्यरिच्यत पश्चाद्भूमि मथो पुरः स्वाहा ८ ॐ कयानश्चित्र आभुवा दूती सदा वृधः सखा कया सचिष्ठ या वृता स्वाहा ९ यजुर्वेदीतेषा उशापचार पूर्वोक्त पुरुषसूक्त षोडशा मंत्रै राज्येन षोडशाहुती र्जुहुयात् ऋग्वेदिनामप्येवं ॥

तत आज्यमिश्रितान् तिलान् गृ हीत्वा ॐ इरावती धेनुमती हि भू तं सूयवसिनी मनवे दशस्या व्यस्क भ्ना रोदसी विष्णवेते दाधर्थ पृथि वी मभितो मयूखैः स्वाहा इदं विष्णवे इति सकृज्जुहुयात् ॐ ब्र ह्मानुयायिभ्यः स्वाहा ॐ विष्णवनुया यिभ्यः स्वाहा ॐ ईशानानुयायि । भ्यः स्वाहा एवं पूर्वोक्त नवग्रह मंत्रै र्दशदिक्पालमंत्रैश्च सकृत् सकृत् जुहुयात् एवं पर्वतेभ्यः स्वाहा ॐ नदीभ्यः स्वाहा ॐ समु द्रेभ्यः स्वाहा एवं तिलहोमं समा प्य स्रुवेण महाव्याहृतिभिराज्यं जुहुयात् ततः प्रायश्चित्तहोम । संकल्पं कृत्वा ॐ अग्नेत्वं विष्णुनामा सीतिना म कृत्वा आचार्य पूजयित्वा परिभाषा सिद्धं स्विष्टकृदोक्तं प्राय श्चित्तहोमादिकृत्वा पूर्णाहुत्या मृ ड्नामान मग्निं पूजयित्वा होतृन् । तांस्तुष्य उत्थाय यजमानेनान्वार ब्धः ॐ तद्विष्णोः परमस्पादिदैष ट् इत्युच्चार्य पूर्णाहुतिं च यजेद्घात तत आचारात् ईशान्यां पृष्ठे कृत्वा ला भवइत्युच्चार्य इत्यादि तिलकास्तः वलग्न भस्मना ॐ कश्यपस्य त्र्यायुषं तिष्यामि ॐ यज्जमदग्नेस्त्र्यायुषं करोति।

ॐ यद्देवानां त्र्यायुषं बाहुमूलयोः ॐ तन्नोऽस्तु त्र्यायुषं हृदि अन्य क न्यकपके ललाटे त्र्यायुष मिति विशेषः ततो यजमानः पंचगा व्यं चरुशेषं च प्राश्य स्नात्वा वा पूर्णपात्रादिकां दक्षिणां ब्रह्मणे दद्यात् ततो हेमयुक्तं सवस्त्र तिल पात्रं अलंकृता गवी तन्मूल्यं वा । एतद्धोम कर्म प्रतिष्ठार्थमाचार्या य दद्यात् अन्यहोतृ एते होत्रे। दद्यात् एतेन कृतेन कर्मणा प्रीयतां भगवान् विष्णुरिति विष्णवे समर्प येत् ततः प्रासादसंमुखे ॐ उत्ति ष्ठ ब्रह्मणस्पते देवा यजन्तस्त्वेमहे उपप्रयान्तु मरुतः सुदानव इन्द्रः प्रा शूर्भवा सचा इति मंत्रेण देवतामा नीय विष्णुगृहस्य संमुखे गरुडं शिव गृहस्य वृषं दुर्गागृहस्य सिंहं स्थाप येत् ततो गंधमाल्यवस्त्रादिना स्थ पतिं परितोष्य ॐ इदं विष्णु र्वि चक्रमे इत्यादि पठित्वा ॐ चक्राय नम इति चक्रं संपूज्य गृहोपरि । यथायोग्यं चक्रादिकं विन्यस्य गृहं । वस्त्रेणाच्छाद्य गृहद्वारात् रूपं तोरणं विधाय गृहाद्रूपं पताका चामर किंकिणी जाल वह्निप्रद्योतं सव स्त्र यष्टि समेतं ध्वजं गृहस्येशाने।



कोणेवायुकोणे वा स्थापयेत्।
ततो विष्णुं शालग्रामादौ यथार्हं
गृहसमीपे नीत्वा पंचविंशतिघटै
र्नारिकेलोदकैः पंचगव्य पंचामृ
तै स्तीर्थोदकैः स्नानं कारयित्वा
षोडशोपचारादिभिः पूजयेत्।
वक्ष्यमाण मंत्राणां पौराणिकत्वे
नशूद्राणामप्यधिकारः स्वगाद्यै।
पाद्याम्भसा प्रोक्षिते आसनंगृही।
त्वा इदमासनं ॐसर्वान्तर्यामिने दे
वसर्व बीज मयं ततं आत्मस्थाय
यं शुद्ध मासनं कल्पयाम्यहं।
ॐविष्णवे नम इतिमूलेन दद्यात्
१ ततः कृतांजलिः ॐ यस्य दर्श
न मिच्छंति देवाः स्वाभीष्टसिद्ध
ये तस्मै ते परमेशाय स्वागतं स्वा
गतंचमे कृतार्थोवगृहीतो ऽस्मि
सफलं जीवितं मम आगतो देव
देवेशस्वागतमिदं वपुः विष्णो
स्वागत मितिस्वागतप्रश्नः २ ताम्र
पात्रस्थ श्यामाक दूर्वापद्मापराजि
ताद्युक्तजलं गृहीत्वा ॐयद्भक्ति ले
श सम्पर्कात् परमानंदसंभवः त
स्मै तेचरणाब्जाय पाद्यंशुद्धायकल्प
ये इत्युच्चार्य मूलेनपादयोर्दद्यात्।
३ इदमासन मितीव मंत्रस्यपूर्वेम
न्त्रस्याद्यमिति प्रयोज्य मेव सुत

द्रव्ययथा योग्यमत्रेवः गंधपुष्पा
क्षत यव कुशाग्र तिल श्वेतसर्षप
दूर्वात्मक मर्घ्यं शंखस्थं गृहीत्वा ॐ
तापत्रय हरं दिव्यं परमानन्द ल
क्षणं तापत्रय विनिर्मुक्तं तवार्घ्यं
कल्पयाम्यहं इतिमूलेन शिरसि
दद्यात् ४ जाती लवंगकक्कोलयु
क्तं केवलंवा जलंगृहीत्वा ॐदेवा
नामपिदेवाय देवानां देवता
त्मने आचामं कल्पयामीश शुद्धा
नां शुद्धि हेतवे इति मूलेन
दद्यात् ५ कांश्यस्थं दधि मधु घृ
तात्मकं कांश्यपिहितं मधुपर्कं
गृहीत्वा ॐसर्वकल्मषहीनायपरि
पूर्णसुखात्मने मधुपर्क मिमंदेवक
ल्पयामि प्रसीद मे इतिमूलेन द
द्यात् ६ पुनराचमनीयं गृहीत्वा ॐ
उच्छिष्टोप्यशुचिर्वापि यस्यस्मरण
मात्रतः शुद्धिमाप्नोति तस्मै ते पु
नराचमनीयकं इतिमूलेनदद्यात्
७ लौकिक वस्त्रापिकशालत्रयतोल
कान्तं तीर्थजलं गृहीत्वा ॐ प
रमानंदबोधाब्धि निमग्ननिजमूर्त
ये सांगोपांग मिदं स्नानं कल्पया
म्यहमीश ते ॐतद्विष्णो रितिमू
लेन दद्यात् ८ पूर्वरीत्या पुनरा
चमनीयंच दद्यात् ऊर्णाम्भसा।

प्रोक्षितं वस्त्रं गृहीत्वा ॐ माया
चित्र पट च्छन्न निजगुह्योरुतेजसे
निरावरण विज्ञाय वासस्तेकल्प
याम्यहं इति मूलेन दद्यात् ९।
उत्तरीयवस्त्रंगृहीत्वा ॐयमाश्रित्य
महामाया जगत्संमोहिनी सदा
तस्मै ते परमेशाय कल्पयाम्युत्तरी
यकं इतिमूलेनदद्यात् १० ततःपू
र्ववत् पुनराचमनीयंच दद्यात्।
स्वर्णाद्याभरणं मर्घ्याम्भसाप्रोक्ष्य
ॐस्वभाव सुंदरांगाय नानाशक्त्या
श्रयाय ते भूषणानि विचित्राणि
कल्पयाम्यमरार्चित इतिमूलेन द
द्यात् ११ प्रोक्षितंगंधं गृहीत्वा।
ॐपरमानंद सौरभ्य परिपूर्ण।
दिगंतर गृहाण परमं गंधं कृप
या परमेश्वर इति मूलेन द
द्यात् १२ तत्तद्देवता प्रिय पुष्प।
मादाय ॐतुरीय वन संभूतंनाना
गुण मनोहरं आनंद सौरभं।
१ पुष्पं गृह्यतां परमेश्वर इति
२ वंदां संपूज्य ॐवनस्पति रसो
४ द्भवो गंधाढ्यः समनोहरः आ
२ मूलेन दद्यात् १३ धूपं प्रोक्ष्य
घ्रेयः सर्व देवानां धूपोऽयं प्रति
गृह्यतां इत्युच्चार्य वामहस्तेन घं
टां वादयन् मूलेन दद्यात् १४

ततो घृतादि प्रदीपमादाय ॐ सु
प्रकाशो महादीपः सर्वत स्तिमिरा
पहः सबाह्याभ्यन्तरं ज्योति दीप्यो
ऽयं प्रतिगृह्यतां इति मूले
नदद्यात् १४ प्रोक्षित नाना विध
नैवेद्योपरिमत्स्य मुद्रया मूलं ॥
दशधा जप्त्वाऽभ्यर्च्य धेनुमुद्रया।
मृतीकृत्य ॐसत्पात्र सिद्धं सुह
विर्विविधानेक भक्षणं निवेदयामि
देवेश सानुगाय गृहाणतत् इति
मूलेनदद्या १५ जलमादाय ॐ
समस्त देवदेवेश सर्वतृप्तिकरं प
रं अखंडानंद सम्पूर्ण गृहाण जल
मुत्तमं इतिमूलेन दद्यात् १६।
पूर्ववत् पुनराचमनीयंच ताम्बूलं
गृहीत्वा ॐताम्बूलं देवदेवेश कर्पू
रादि सुवासितं कल्पयामि तवेशा
न वक्त्राम्भोज भूषणं इतिमूलेन।
दद्यात् १७ ततः स्वस्वदेवता नम
स्कार मंत्रैः वंदनं कुर्यात् १८ उ
पचारद्वयापाराने सापारत्वेनो ॥
क्तैः इष्टगंधा लहाने तत ॐ
विष्णवे नमः इतित्रिः संपूज्य चंदा
वितानतोरण पुष्पं वस्त्रादिछत्रादिनं
वेद्य प्रोक्ष्य ॐ विष्णवे नम इति
त्रिः संपूज्य ॐतद्विष्णो रित्यनेन वि
सं स्पृष्ट्वा ॐतत्सवितुरित्युच्चार्य वाम

हस्तेन धृत्वा कुशतिलजलान्यादा
य अद्येत्यादि अमुकगोत्रः श्रीअ
मुक देव शर्मा एतन्मणकाष्ठादि
मयवेश्म परमाणु समसंख्यवर्ष स
हस्रावच्छिन्न स्वर्गलोक महितत्वका
मो विष्णुप्रीतिकामो वा एतन्मणि का
ष्ठादिमयवेश्म विष्णुदैवतं विष्णवे तु
भ्यमहं सम्प्रददे इत्युत्सृजेत् इ
ष्टकादिमये तु एतदिष्टकादि मय
वेश्म परमाणु समसंख्य वर्षसहस्र
दशगुण कालावच्छिन्न स्वर्गलोकम
हितत्वकाम एतदिष्टकादीति विशेषः
एतत् प्रतिष्ठार्थं स्वर्णं तन्मूल्यं
वा दक्षिणां विष्णवे दद्यात् पश्चा
दाचार्य्यादौ प्रति पत्तिः ततो दे
वं स्वयं गृहीत्वा गृह प्रदक्षिणां
कारयित्वा ॐ भद्रं कर्णेभिः शृणु
याम देवा भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरै रंगै स्तुष्टुवांस स्तनूभि र्व्यशे
म देवहितं यदायुः इत्यनेनाभि।
मंत्रितं देवं गृहं प्रवेशयेत् ॐ
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बा
हुभ्यां पूष्णो हस्ताभ्यां हस्तमाददे।
इतिमंत्रेण पिंडिकोपरिन्यसेत् ॥
ॐ स्थिरो भव वीड्वंग आशुर्भव वा
ज्यर्वन् पृथु र्भव सुषदस्त्वमग्नेः पुरीष
वाहनः इत्यनेन स्थिरी कुर्य्यात्।


पुनर्देवं संपूज्य यथाशक्ति चाम
रछत्र वितान गो हिरण्यामत्रा
यभांडादिकं दद्यात् तत ॐ
यावद्धरायरो देवो यावत्तिष्ठति मे
दिनी तावदत्र जगन्नाथ सन्निधीभव
केशव इतिमंत्रं पठेत् ततो
ध्वज समीपं गत्वा संशोध्य तमा
रोपयेदनेन मंत्रेण ॐ एह्येहि भ
गवन्नीश्वर विनिर्मित उपरिचरवा
सुमार्गानुसारित् श्रीकर श्रीनिवा
स रिपुध्वंसकर सज्जनापिलय सर्व
देवतासम्मत कुरु शान्तिं स्वस्त्ययनं
च मे भवतु सर्व विघ्नान् हर हर
स्वाहा ॐ ध्वजायनमः इति ध्वजं संपू
ज्य ॐ विष्णवे नम इति त्रिरभ्यर्च्य
ध्वजं संशोध्य वामहस्तेन स्पृष्ट्वा अ
द्येत्यादि अमुक गोत्रः श्री अमुक
देवशर्मा महापातकादिबहुपाप
क्षयकामो विष्णुप्रीतिकामो वा वि
ष्णुवेश्मनि इमं ध्वजं विष्णुदैवतं वि
ष्णवे तुभ्यमहं सम्प्रददे इत्युत्सृज्य
एतत् प्रतिष्ठार्थं दक्षिणां विष्णवे
दद्यात् पश्चादाचार्य्यादौ प्रतिपत्तिः
ततो गरुडस्तम्भं समारोप्य ॐ सु
पर्णोऽसि गरुत्मां स्त्रिवृत्ते शिरो गा
यत्रं चक्षुर्बृहद्रथन्तरे पक्षौ स्तोम
आत्मा छन्दांस्यंगानि यजुः ॥

षि नाम साम ते तनु र्वामदेव्यं य
ज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः
सुपर्णोऽसि गरुत्मान् दिवं गच्छ स्वः
पत यजुर्वेदी तु ॐ सुपर्णोऽ
सि गरुत्मां स्त्रिवृत्ते शिरो गायत्रं
चक्षुः स्तोम आत्मा साम ते तनूर्वाम
देव्यं बृहद्रथन्तरे पक्षौ यज्ञाय
ज्ञियं पुच्छं छन्दांस्यंगानि धिष्ण्याः
शफाः यजूंषि नाम सुपर्णो
सि गरुत्मान् दिवं गच्छ स्वः पत इ
ति पठित्वा ॐ गरुडाय नमः इति त्रि
संपूज्य ॐ नमस्ते पन्नग श्रेष्ठ प
न्नगान्तकर प्रभो त्वत् प्रसादान्म
हाबाहो मोदेयं दिवि देववत्
यथा त्वं संपुटकरः सततं नतकं
धरः तथैव पुरतो विष्णो स्त्वत्
प्रसादाद्भवाम्यहं इति प्रांज
लिः प्रार्थयेत् ततः पिष्ट प
दीपादिना निर्मञ्छनं कुर्य्यात्।
ततो विप्रान् स्वब्राह्मणेभ्यो भोज्या
नि दद्यात् दीनानाथ कृपणान्धबधिरे
भ्यो यथाशक्ति दद्यात् ततः प्रीयतां
पुंडरीकाक्ष सर्वयज्ञेश्वरो हरिः
तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणि
तं जगत् ततो नृत्य गीतवादित्र।
विस्तरे महोत्सवं कृत्वा अच्छिद्रा
वधारणं कृत्वा वैगुण्य समाधानार्थं त

द्विष्णो रिति विष्णुं स्मरेत् एवं
रुद्रादि मठादि प्रतिष्ठायं आसना
दिकं तु तत्तन्मंत्रं विहायकेवलं प्र
णवादि नमोन्तेन तत्तन्नाम्ना दत्वा य
थायोग्यं तत्तत् कर्मशेषं समाप
येत् एवं गोपथादि प्रतिष्ठायां
तत् समीपे वेदिकां कृत्वा तत्तत्
फलकामो विष्णुप्रीतिकामो वा त
त्तत् प्रतिष्ठां करिष्ये इति संकल्प्य
स्वस्तिश्राद्धादिकं विधाय यथाशक्तिवि
धिनाग्निस्थापनादि एतत्कर्मणा
प्रीयतां भगवान् विष्णुरित्यंतं क
र्म कृत्वा कूपादिवत् सर्वभूतेभ्यउ
त्सृज्य दक्षिणां दद्यात् नियमः
व्रतादि प्रतिष्ठायां तु विष्णुरित्यंतं
कर्म कृत्वा व्रतानुष्ठानं कृत्वा दक्षिणा
दिकं कुर्य्यात् ततो घटस्थ जलेन
यजमान मभिषिंचेत् तद्यथा ॐ सुरा
स्त्वा मभिषिंचन्तु ब्रह्मविष्णुमहेश्वराः
वासुदेवो जगन्नाथ स्तथा संकर्षणो
विभुः प्रद्युम्न श्चानिरुद्धश्च भवंतु
विजयाय ते आखंडलोऽग्नि र्भग
वान् यमो वै नैर्ऋत स्तथा वरुणः
पवनश्चैव धनाध्यक्ष स्तथा शिवः
ब्रह्मणा सहिताः शेषा दिक्पालाः
पान्तु ते सदा कीर्त्तिर्लक्ष्मी र्धृतिर्मे।
धा पुष्टिः श्रद्धा क्षमा मतिः बुद्धि।


सीज्वा वपुः शांति स्त्वपिः पुष्टि
मातरः एता स्त्वा मभिषिंचन्तु
देवपत्न्यः समागताः आदित्य
श्चंद्रमा भौमो बुध जीवसितार्क
जाः ग्रहा स्त्वा मभिषिंचन्तु राहुः
केतुश्च तर्पिताः देव दानव गं
धर्व यक्ष राक्षस पन्नगाः ऋष
यो मुनयो गावो देव मातर एव च
देवपत्न्यो ऽध्वरा नागा दैत्या
श्चाप्सरसांगणाः अस्त्राणि सर्व
शास्त्राणि राजानो वाहनानि च
औषधानि विचित्राणि कालस्यावय
वाश्च ये सरितः सागराः शैला
स्तीर्थानि जलदा नदाः एता स्त्वा
मभिषिंचन्तु धर्म कामार्थ सिद्धये
इति मठादि प्रतिष्ठा प्रयोग ॥
तत्वं समाप्तं । ॥
मठरः पुं मुनिविशेषः इत्युणादि
कोषः ॥
मड इ क मोदे इतिकविकल्प
द्रुमः इमंडयति इति दुर्गा
दासः । ॥
मड इ कि भूषे इतिकविकल्प
द्रुमः मंडयति मंडति हारो जनं
ई मंडते इतिदुर्गादासः ॥
मड इ ङ विभागे वेष्टे इतिकवि
कल्पद्रुमः इ मंडते ङ. मंडते ॥
इति दुर्गादासः ॥
मडकः पुं शस्यभेदः मेड्या इति
भाषा इति जटाधरः ॥
मड्डुः पुं वाद्यविशेषः इत्यमरः
डुडुक इति ख्यातः विपुलोडमह
मेड्डु रितिकोषः मड्डु इति रौति।
इति मड्डुः पूर्ववद्धो तडि मनीषादि
त्वाड्डुकस्य डुत्वं मज्जंति शब्दा
अत्रेति मज्जे निपातो वा इति
भरतः । ॥
मड्डुकः पुं मड्डुवाद्यं इतित्रिकां
डशेषः ॥
मण कूजे इतिकविकल्पद्रुमः
मणति कूजेः अव्यक्तशब्दे इतिदु
र्गादासः ॥ ॥
मणिः पुं स्त्री अश्मजातिः मु
क्तादिकं तत्पर्य्यायः रत्नं २ मणी
३ इत्यमरः अस्यगुणाः मणि
रत्नं सरं शीतं कषायं स्वादु ले
खनं चक्षुष्यं धारणात्तद्ध पापा
लक्ष्मी विनाशनं इति राजवल्लभे
अजायाः कंठस्थित स्तनः लिं
गाग्रं अलिंजरः इति मेदिनी ॥
योन्यग्रभागः इति शब्दरत्नावली
नागविशेषः इतिजटाधरः ॥
मणिबंधः इति हेमचंद्रः म
णिकं क्ली अलिंजरः इत्यमरः।

मणिकर्णिका स्त्री काशीस्थतीर्थ
विशेषः तदुत्पत्ति र्यथा विष्णुः प्रति
शिववाक्यं त्वदीयस्यास्य तपसो
महोपचय दर्शनात् यन्मयान्दो
लितो मौलि रहि श्रवणभूषणः
तदान्दोलनतः कर्णात् पपात म
णिकर्णिका मणिभिः खचितास।
स्यातनो ऽस्तु मणिकर्णिका चक्रपु
ष्करिणी तीर्थं पुरा ख्यातमिदंशु
भे त्वया चक्रेण खनना च्छंखचक्र
गदाधर ममकर्णात् पपातेयं यदा
च मणिकर्णिका तदाप्रभृति लोके
त्र ख्यास्तु मणिकर्णिका श्रीविष्णु
रुवाच मुक्ताकुंडलपातेन नवाद्रि
तनया प्रियं तीर्थानां परमं ती
र्थं मुक्तिक्षेत्रमिहास्त्विदं काशते।
ऽत्र यतो ज्योतिस्तदनाख्येयमी
श्वर अतो नामापरं चास्तु काशी
ति प्रथितं विभो श्रुत्वं वरं।
वरेदेव देयः सोप्यविचारितं।
सतेपरोपकारार्थं जगद्धत्ता मतो
शिव श्रा ब्रह्म स्तम्ब पर्य्यन्तं यत्
किंचिज्जंतु संज्ञितं चतुर्षु भूत
ग्रामेषु काश्यां तन्मुक्तिमाप्नुति
तस्मिं स्तीर्थे वरे शंभो मणिश्र
वणभूषणे संध्यां स्नानं जपंहोमं
वेदाध्ययन मुत्तमं तर्पणं पि
ण्डदानंच देवतानांच पूजनं गो
भूतिल हिरण्याश्वदीपान्नाम्बर भू
षणं कन्यादानं प्रयत्नेन सप्ततन्तू
नेनकशः व्रतोत्सर्गं वृषोत् सर्गं
लिंगादिस्थापनं तथा करोतियो
महाप्राज्ञो ज्ञात्वायुः चपलं त्वरं।
विपत्तिं विपुलांचापि सम्पत्तिं
मति भंगुरां श्रद्धया मुक्तिरेका
स्त विपाक स्तस्य कर्मणः अ
न्यत्रापि शुभंकर्म यद्दत्तं श्रद्धया
कृतं विनात्मख्यातमीशान त्यक्त्वा
प्रायोपवेशनं नैःश्रेयस्याः श्रियो
हेतुस्तदस्तु जगदीश्वर नातश्यो
वति नाप्नोति कृत्वा कालान्त
रे ऽपियत् तदिहास्तय तामेतो
तस्येश त्वदनुग्रहात् तवप्रसाद
त्रस्येह सर्व मस्तय मस्तनत यद
स्ति यद्भविष्यच्च यद्भूतंच सदाशिव
तस्मादेतच्च सर्वस्मात् क्षेत्रमस्त।
शुभोदयं इतिकाशीखंडे मणि
कर्णिकाख्यानं नाम ७ अध्यायः
मणिकाननं क्ली कंठः इतिशब्दर
त्नावली रत्नवनंच । ॥
मणिकारः पुं मणिनिर्मितालंकारा
दिकर्त्ता जोहरि इति भाषा तत्
पर्य्यायः वैकटिकः २ इतिहेमचंद्रः
न्यायचिन्तामणिकर्त्ता च ॥



मणिकूटः पुं पर्वतविशेषः यथा
मणिकूटस्याथ गिरे र्गन्धमादन।
कस्यच मध्ये भवति लौहित्यो ब्र
ह्मपुत्रः समास्थितः हत्वाम्बरं यथा
विष्णु स्तत्र वास मथाकरोत् नर
देवासुरादीनां यथा भवतिवै हि
तं ज्वरेणापीडित स्तत्र ज्वरं ह
त्वा महासुरं सर्वलोक हितार्था
य सो ऽवादत्वान माचरेत् अगद
स्नान संभूतं संजातंच महासरः
तस्यस्वयंनामवक्रे हयग्रीवो ऽपुन
र्भवं नपुनर्ज्जायते यस्मात् ततः
स्नात्वा नरोत्तमः अपुनर्भव सं
ज्ञं तत्सरस्तु परिकीर्त्तितं मणि
कूटाचले विष्णुर्हयग्रीव स्वरूपक
सच व्याम प्रमाणेन विस्तारेणैव
संस्थितः इति कालिकापुराणे ८०
अध्यायः ॥ ॥
मणिखनिः पुं मणेराकरः यथा
मणेः खनिः इति मुग्धबोधव्या।
करणं ॥
मणिग्रीवः पुं कुबेरपुत्रः इतिशब्द
रत्नावली रत्नकन्धरे त्रि
मणिच्छिद्रा स्त्री मेदानामौषधं अ
षभाख्यौषधं इति मेदिनी।
मणितं क्ली मैथुनकालीनवाक्यं
तत्पर्य्यायः रतकूजितं २ इति
हेमचंद्रः ॥
मणितारकः पुं सारसपक्षी इति
राजनिर्घंटः ॥
मणिद्वीपः पुं क्ली क्षीरसमुद्रम
ध्ये पद्मरागादिमणिमयान्तरीपः स
च त्रिपुरसुंदरी वासस्थानं यथास
यासिंधो र्मध्ये सुरविटपिवाटीप
रिसरे मणिद्वीपे नीपोपवनवति
चिंतामणिगृहे शिवाकारे मंचे
परमशिव पर्य्यंक निलये भजंति
त्वां धन्याः कतिचन चिदानंदलह
री इत्यानंदलहरी ॥
मणिपर्वतः पुं गिरिविशेषः यथा
ततोऽभ्ययाद्गिरिश्रेष्ठ मभितो।
मणिपर्वतं तत्र पुण्यावृत वीता
ल्पभवं श्यामलाः प्रभाः मणीनां
हेमवर्णाना मभिभूय दिवाकरं।
तत्र वैदूर्य्य वर्णानि ददर्शमधुसू
दनः सतोरणपताकानिद्वाराणि।
शिखराणिच विद्युद्युतिन मेघाभः
प्रबभौ मणिपर्वतः हेम वित्र।
वितानैश्च प्रासादे रुपशोभि ॥
तः तत्रना हेमवर्णाभा ददर्श म
धुसूदनः गंधर्व्वाप्सर सत्वानां।
प्रिया इष्टितर स्तथा ददर्श पु
लक्षणीः संरुद्धागिरिकंदरे ना।
केशा समानीता रत्नमाणोः समन्त

तः इतिमहाभारते हरिवंशे।
नरकवधाध्यायः ।
मणिपूरं क्ली षट्चक्रान्तर्गतनाभि
मध्यस्थतृतीयचक्रं यथा तदूर्द्ध्वे
नाभिदेशे तु मणिपूरं महत्प्रभं।
मेघाभं विद्युदाभंच बहुतेजोमय
यं ततः मणि वद्भिन्नं तत्पद्मं म
णिपूरं तथाच्यते दशभिश्च द
लैर्युक्तं डादि फान्ताक्षरान्वितं।
शिवेनाधिष्ठितं पद्मं विश्वालोक
नकारणं इतितंत्रे तन्त्राधिष्ठान
पद्मस्योर्द्ध्वे देशे तिष्ठति यच्चा
प्यतत्पद्मस्योर्द्ध्वे देशे महा पद्मं
सुफुल्लभं दशपत्रं नीलवर्णासज
लं घोर रूपकं डादि फान्तैः
सचंद्रैश्च पंकजंचाति शोभनं
तन्मध्येवीजकोषे निवसतिसतत
तं वह्निवीजस्सिद्ध वायौ तत्रै
पुराख्ये नव तपन निभंस्वलिके
तत्रिभागे स्वर्णकान्तमिदं देवि
सर्वदेव प्रपूजितं साकारंवह्नि
वीजंच सदैव मेव बाहनंतदा
लयंहि तत्रैव महामोहस्यनाश
नं भद्रकाली महाविद्याबासभा
गेसर्वशोभिता इतिनिर्वाण तंत्रे
६ पटलः तत्र देवतीर्थं यथा
मणिपूरे देवतीर्थं पंचकुंडं स
रोवरं तत्र श्रीकामनातीर्थे स्ना
ति यो मुक्ति मिच्छति इति रुद्र
यामलः स्वनामध्यानदेशाश्च ॥
मणिबंधः पुं प्रकोष्ठपाण्योःसन्धि
स्थानं कब्जा इति भाषा इत्या
मरटीकायंभरतः सच करस्या
दिभागः तत्पर्य्यायः मणिः २
इति हेमचंद्रः करशिः ३ करा
ग्रंथिकः ४ इतिशब्दरत्ना वली
तस्य शुभाशुभ लक्षणं यथा म
णिबंधै र्निगूढैश्च सुश्लिष्टशुभसं
धिभिः नृपाहीनैः करच्छेदमशाहे
र्धेन वर्जिताः इति गारुडे ६६
अध्यायः । ॥
मणिभद्रः पुं जिनानां पूर्वयक्षवि
शेषः तत्पर्य्यायः जम्भलः २
पूर्वयक्षः ३ जलेन्द्रः ४ इति
त्रिकांडशेषः ॥ ॥
मणिभूमिः स्त्री रत्नस्यखनिः तत्
पर्य्यायः कुट्टिमं २ इति शब्द
रत्नावली ॥ ॥
मणिमंडपः पुं रत्नमयगृहं यथा
मध्ये सुधाब्धि मणिमंडपरत्नवे
दी सिंहासनोपरिगतां परिपीत
वर्णां पीताम्बराभरणमाल्य विभू
षितांगी देवीं नमामिधृतमुद्गर
वैरिजिह्वां इति रुद्रयामले ॥




वगलास्तोत्रं ।
मणिमन्थं क्ली सैन्धवलवणं इ
ति मणिमन्थशब्दटीकायां भरतः
इति राजनिर्घंटः पर्वतविशेषः इ
ति मणिमान् त्रि मणिविशिष्टः र
त्नभूषितः मणिरस्तीति मतुप्प्रत्य
येन निष्पन्नः ॥
मणिमाला स्त्री हारः दंतक्षतवि
शेषः इति मेदिनी लक्ष्मीः
इति शब्दरत्नावली दीप्तिः इति
शब्दमाला ॥
मणिरागं क्ली हिंगुलं इति राज
निर्घंटः मणेर्वर्णो पुं ॥
मणिवः पुं नागविशेषः मणिशा
ब्दस्यार्थेव प्रत्ययेन निष्पन्नः इ
ति सिद्धांतकौमुदी ।
मणिवीजः पुं दाडिमवृक्षः इति
राजनिर्घंटः ॥
मणिसरः पुं मुक्ताहारः यथा
वदयसि सवने ऊवयुगगगणेम्
गमद रुचि रुचिर मणिसरममलं
तारक पटलं नखपदशशि रुचि
ते इति गीतगोविंदे ७ सर्गः
मणी स्त्री मणिः इति भरतद्विरू
प कोषः ॥
मणीचकं क्ली चंद्रकांतमणिः तत्प
र्यायः इंदुकांतः २ इति त्रि

कांडशेषः । ।
मणीचकः पुं मत्स्यरंगपक्षी यथा
कम्पाशी मत्स्यरंगः स्यात् जलम ।
द्गुर्मणीचकः इति हारावली ॥
मणीव व्य मणित्वस्य मणिशब्दे
न सह इव शब्दस्य षष्ठीतत्पुरुष
समासः प्रथमा द्विवचनांत मणिश
ब्दात् इवार्थे व शब्देन वा शब्देना
प्येवं रूपं यथा मणीवोष्ट्रस्य ॥
ति त इवार्थेव शब्दो वा शब्दो वा
बोध्यः इति सिद्धांतकौमुदी म
णीवकं क्ली पुष्पं इति हेमचंद्रः
मंटपी स्त्री लड्डोपादकी इति
राजनिर्घंटः ॥
मंठः पुं वटकविशेषः मांडा इति
हिंदीभाषा यथा समितां मर्द
येदाज्यैः तैलेनापि च संनयेत्
अस्मात् वटकं कृत्वा पचेत् सर्पि
षि नीरसं एला लवंग कर्पूर ।
मरिचाद्यैः रलंकृते मज्जयित्वा
सितापाके ततस्तंच समुद्धरेत् ।
अयं प्रकारः संसिद्धो मंठ इत्य
भिधीयते अस्य गुणाः मंठस्त्व
हं... हृद्यो वृष्यो बल्यः सम्मधुरो गु
रुः पित्तानिल हरो रुच्यो दीप्ताग्री
नां सुपूजितः प्रकारांत यथा
समिता शर्करा सर्पि निर्मिता


अपरेपिये प्रकारा अमुना त
स्यास्तेऽपि चैतद्गुणाः स्मृताः
इति निर्घंटः ॥
मंडं क्ली पुं सर्वेषामन्नरधान्यानां
मग्ररसः मांड इति भाषा इति च
भाषा इत्यमर भरतौ सारः ।
पिच्छं इति मेदिनी मंडं क्ली मस्त्वु इति मेदिनी ।
मंडः पुं एरंडवृक्षः शाकभेदः
इति मेदिनी मस्तु ॥ भूषा ।
सारः पिच्छं इति हेमचंद्रः ॥
दव्याः भक्तादि भवरसः तस्य
लक्षणं भक्ते विनाद्रवो मंडः
पेयं भक्त समन्वितं इति राज
निर्घंटः अथ मंडस्य लक्षणं
विधिर्गुणाश्च तंडुलानां सुसिद्धा
नां चतुर्दश गुणे जले रसः सि
क्थे विरहितो मंड इत्यभिधीय
ते शुंठी सैन्धव संयुक्तो दीपनः
पाचनश्च सः अन्नस्य सम्यक् सि
द्धस्य तेया मंडस्य सिद्धता प
या यूष यवागूनां विलेपी भक्त
योरपि तस्य गुणाः मंडो ग्राही ।
लघुः शीतो दीपनो धातुसाम्य
कृत् ज्वरघ्न स्तर्पणो वस्तः पित्त
श्लेष्म श्रमापहः इति भावप्रका
शः अपिच लाजोत्पन्नो व
॥ ॥ ॥ ॥

स्ति विशोधनश्च प्राणप्रदः शोणि
त वर्द्धनश्च ज्वरापहारी कफपि
त्तहन्ता वायुं जयेदष्टगुणो हि मंडः
लाजमंडोऽग्निजननो दाह ॥
तृष्णा निवारणः ज्वरातीसारशम
नोऽशोषदोषाम पाचनः ॥
वाट्यमंडोऽग्निजननः शूलानाह
विनाशनः पाचनो दीपनो हृद्यः पि
त्त श्लेष्मानिलापहः वाट्यमंडो ।
भृष्ट यवमंडः इति राजवल्लभः ॥
मंडकः पुं पिष्टकविशेषः मांडा इति
हिंदीभाषा यथा गोधूमा धवला
धौताः कुट्टिताः शोषिताः ततः
पोतिता यंत्र निष्पिष्टाश्चालिताः
समिताः स्मृताः वारिणा कोम
लां कृत्वा समितां साधु मर्दयेत्
हस्तचालेन या तस्याः लोमी सम्य
क् प्रसारयेत् अधोमुखघट स्य
तद्विस्तृते प्रतिपेद्वह्निः मृदुना ।
वह्निनासाध्यः सिद्धो मंडक उच्य
ते लोमी लेची इति लोके ॥
कुम्भेन साज्य खंडेन मंडकं भ
क्षयेन्नरः अथवा सिद्धमांसेन ॥
सतक्र वटकेन वा तस्य गुणाः
मंडको बृंहणो वृष्यो बल्यो रुचि ।
केशः भृशं पाके अपि मधुरो ग्राही
लघु दोषत्रयापहः ॥ इति ।




वत्वर्हस्तं समारभ्य यावद्धस्तश
तंभवेत् मंडलं तत्रकर्त्तव्यमत
ऊर्द्धं नकारयेत् विमलं विजयं
भद्रं विमानं शुभदंश्रीवं वर्द्धमा
नच दैवंच ललातं कामदायकं।
ऋचकं स्वस्तिकाख्यंच दिरश इति
मंडलः सिनादि हरितोनाम्र र
जाः कार्य्याः सशोभनाः शालि
षष्टिक कौसम्भ रजनी हरिपत्रजाः
मणिविद्रुम रागाश्च भस्मना अभि
मंत्रिताः सितसर्षप धूपाढ्या र
जाः हत्वा त पातयेत् अस्त्राजं
न्यसेन्मंत्री सम्भवेति परं पिवा
समोम्यानं शुभंकृत्वागोमयेनोपा
लेपितं चंदनागुरु कर्पूर लोह
धूपाधिवासितं भूभागं स मितं
सिद्धं पूर्वपश्चिम कोनरं याम्यं
स्वस्तिक मत्स्यायैः सूत्रै वीर्णीरा
पत्रजैः पद्मपत्राष्टकं मध्ये द्वि
गुणं त्रिगुणं पिवा द्वाराणि सम
स्यानिकर्णिका केशरोज्वलं प
मंत्रयावद्वीथाणि स्वस्तिकाम्तुन्या
लानिवं सव्यावलयहस्तस्तरगः
पानं समाचरेत् मध्यमानामिकांगुष्ठे
नपरिश्वापयेत्सया अधोमुखांगुलि
कत्वा पातयेत् विवत्ताः समारे
ब्वोत्कर्षया विच्छिमापुष्टिवर्जिता
अंगुष्ठ पर्व नैपुण्यासमाकार्ष्णो वि
ज्ञानता संसक्तं विषमंस्थूले वि
च्छिन्नं कृषराहतं पर्य्यंत सर्पितं।
कृस्व मालिखेत्र कदाचन संसक्तो
कलहं विघाद्धरेखेन विग्रहं।
अतिस्थाने भवेद्याधि निर्म्पे पीडा
विमिश्चिते विद्रभिर्भय मामो
ति शत्रुपत्तात्मसंशयः कृशायाचा
र्थहानिः स्यात् विच्छिन्ने मरणंध्रुवं
वियोगात्सुभवेत्तस्य दुःखदुव्यसनमपि
वा अविदित्वा लिखेयस्तु मंडलेत
यथेप्सया सर्वं दोषनवाप्नोति।
ये दोषाः पूर्वं भाषिताः इति
देवीपुराणे पुष्पाभिषेकविनानामा
ध्यायः सूर्य्य मंडले देवानां॥
स्थितिं यथा अर्च्चयत्पूजयदेवं ज
पेच्च रवि मंडले आदित्य मंडले।
देवंध्यात्वा विस्मयपतितं मो
जेन मंडलं यथा यात्र यानाः
पिशाचाश्च असुरा राक्षसास्तथा।
मंत्रि केवलमतस्य मंडलस्यविव
र्जेनात् आदित्यावसवोरुद्रा ब्रह्मा
चैव पितामहः मंडलान्युपजीवंति
तस्मात् कुर्वंतिमंडलं चतुःकोणं
द्विजातस्य त्रिकोणं क्षत्रियस्य तद्धि
कोणाकृति वैश्यस्य शूद्रस्य वर्तुलं।
सदा इत्याद्ये वह्नि पुराणे॥

आह्निकतत्त्वेनामाध्यायः॥
मंडलं त्रि विम्बं इत्यमरः हे
चंद्रस्यशरीरे उपचारादादित्य।
स्यच वेतिशोभते विम्बः बील
कांति गत्यादौ नाम्नीति डिम्बः
विम्बति भाति विम्बः सोत्राऽस्य
मिति स्वामी मंडयति मंडलं
नाम्नीति अलः स्त्रियां नदादित्वा
त् मंडली च इति भरतः॥
मंडलः पुं कुक्कुरः इतिमेदिनी
सर्पविशेषः इति विश्वः।
मंडलकं क्ली विम्बं कुष्ठभेदः
दर्पणं इतिमेदिनी मंडलाका
रव्यूहः इतिजटाधरः॥
मंडलकः पुं कुक्कुरः इतिधरणिः
मंडलनृत्यं क्ली मंडलाकारनृत्यं
तत्पर्य्यायः हल्लीषः २ इतिश
ब्दमाला॥
मंडलपत्रिका स्त्री रक्तपुनर्नवा
इतिराजनिर्घंटः॥
मंडलाग्रः पुं खड्गः इत्यमरः।
मंडलायितं क्ली वर्त्तुलं इतिश
ब्दरत्नावली॥
मंडलाधीशः पुं मंडलेश्वरः त
त्पर्य्यायः मध्यमः २ इति हेम
चंद्रः॥
मंडली पुं सर्पः इतित्रिकांडः।
शेषः विडालः इतिशब्दमाला
जाहकः खट्टाश इति भाषा
इतिहेमचंद्रः वटवृक्षः गो
नाशसर्पः इतिराजनिर्घंटः।
मंडली स्त्री दूर्वा इतिहारावली
मंडलेशः पुं मंडलेश्वरः तत्प
र्य्यायः एकजन्मा २ भयापहः ३
इतित्रिकांडशेषः॥
मंडलेश्वरः पुं भूम्येकदेशाधिपः
अन्या भूम्येक देशाधिपो मंडा
लेश्वरः स्यात् मंडलस्यापि नि
जादिरूपस्य देशस्य ईश्वरो मंड
लेश्वरः एकदेशाधिप इत्यर्थः
स्यान्मंडलं द्वादशराजके चदेशा।
च विम्बे च कदम्बकेच इतिविश्वः
इत्यमरटीकायां भरतः तस्या।
लक्षणांतरं चतुर्योजन पर्य्यंतम
धिकारं नृपस्यच यो राजा तत्र
शानगुणाः सएव मंडलेश्वरः इति
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखंडे ८६
अध्यायः॥
मंडहारकः पुं शौंडिकः इत्य
मरः॥
मंडा स्त्री सुरा इतिहारावली।
आमलकी इति मेदिनी॥
मंडितः पुं बौद्धगणाधिपविशेषः
इतिहेमचंद्रः भूषिते त्रि



इत्यमरः ॥
मंडूकः पुं भेकः इत्यमरः
शोणकः मुनिविशेषः इति
मेदिनी गाढतेजाः इतिशब्द
रत्नावली बंधविशेषे क्ली इ
ति विश्वः ॥
मंडूकपर्णः पुं श्योनाकवृक्षः इ
त्यमरः शोणकः इतिमेदिनी
मंडूकपर्णी स्त्री मंजिष्ठा ब्राह्म
णी इति मेदिनी आदित्यभ
क्ता इतिराजनिर्घंटः ओषधिवि
शेषः थुलकुडिइतिभाषा तत्पर्या
यः भेकी २ मंडूकी ३ मूलपर्णी
४ इतिरत्नमाला मंडूकपर्णिका
५ अस्या गुणाः मंडूकपर्णिकाल
ह्वीस्वादुपाका सरा हिमा पाठांतरे
मंडूकपर्णिका लघ्वीरुक्तावात वि
बंधकृत् इतिराजवल्लभः ।
मंडूकमाता स्त्री ब्राह्मी इतिराज
निर्घंटः भेकमाता च ॥
मंडूका स्त्री मंजिष्ठा यथा मंडू
काच लतायष्टि हेमपुष्पीच मंडि
री इति शब्दमाला ॥
मडूकी स्त्री मंडूकपर्णी इतिमे
दिनी आदित्यभक्ता ब्राह्मी
इति राजनिर्घंटः तृणविशेषः ।
थुलकुडी इति भाषा इतिरत्न
माला सुभयोषित् इति शब्द
रत्नावली मंडूकपत्नी इति
व्याकरणं ॥
मंडूरं क्ली पुं लोहमलं तत्प
र्यायः शिंघाणं २ इत्यमरः
सिंहानं ३ सिंहानं ४ मंडनं ।
लोहं वेष्टते अग्निदाहे लोहा
द्विभज्यते वा मंडयति भूषयति ओ
षधत्वा द्वारेण शितिवा मंडूरं कि
मति भूषे मडिङ् विभागे वेष्ट
नामीति ऊरः इति टीकायां
भानुः अस्य गुणाः लोहगुणा
तुल्यः शतवर्षीयं मंडूरमुत्तमा
अशीति वर्षीयं मध्यमं षष्टि
वर्षीयं अधमं अतो न्यूनं विषा
तुल्यं यथा यल्लोहं यद्गुणं यो
क्तं तत्किट्टंचापि तद्गुणं शा
णोहं मुत्तमं किट्टं मध्यं चाशीति
वार्षिकं अधमं षष्टिवर्षीयं त
तो हीनं विषोपमं इति रसे
न्द्रचिंतामणिः ॥
मंडोदकं क्ली चित्ररागः विचित्र
वर्णः आनर्थकं आलिम्पना ।
इति मेदिनी ॥
मत व्य अनहमहं अवंतं भवति
तद्भवति अनह महं महंवतीति
संक्षिप्तसार व्याकरणं असमह ।

शब्दाद्धि प्रत्यये कृते तत्त्वकिंच
स्मद्शब्दस्य मदादेशान्निष्पन्नं इ
ति तट्टीकायां गोयीचंद्रः ।
मतं क्ली सम्मतं तत्पर्यायः ।
छंदः २ अभिप्रायः ३ आकूतं ४
भावः ५ आशयः ६ इतिहेम
चंद्रः । ।
मतः त्रि सम्मतः ज्ञातः इति
मेदिनी अर्चितः इति हेम
चंद्रः ॥ ।
मतंगः पुं मुनिभेदः मेघः
इत्युणादिकोषः ॥
मतंगजः पुं हस्ती इत्यमरः ।
मतिः स्त्री बुद्धिः इत्यमरः इच्छा
स्मृतिः इति मेदिनी आर्य्या ।
शाकभेदः इत्यजयपालः ॥
विप्रेंद्र का प्रशंसेयं तन्मतेब्रा
ह्ममानसे यस्य यत्र कुले तन्मतस्म
ति स्तादृशी भवेत् इतिब्रह्मवै
वर्त्ते श्रीकृष्णजन्मखंडे ९अध्यायः
मतिकरोषधं यथा गारुडे ।
जीरकं कुष्ठ मश्वगंधाजमोदकं
वचा त्रिकटुकंचैव लवणंचूर्ण
मुत्तमं ब्राह्मीरसे भावितंच सर्पि
मधुसमन्वितं समाहृ भक्षितं कु
र्यान्मेधा स्वर्य्यमतिं परां इति
गारुडे १९८ अध्यायः ॥
मतिदा स्त्री ज्योतिष्मती शिम्बि
डीलता इति राजनिर्घंटः ॥
मतिभ्रमः पुं बुद्धिभ्रंशः तत्प
मति भ्रांतिः स्त्री पर्य्यायः भ्रमः २
मिथ्यामतिः ४ भ्रांतिः ५ इति श
ब्दरत्नावली ॥
मति विभ्रंसः पुं उन्मादरोगः ।
इति राजनिर्घंटः ॥
मतिष्ठः त्रि अतिशयबुद्धिमान् ।
इतिमुग्धबोधव्याकरणं ॥
मक्कः पुं मत्कुणः इति शब्द
माला मत्संबंधिनि त्रि इति
व्याकरणं ॥
मत्कुणः पुं कीटविशेषः छा
पोका इति भाषा तत्पर्य्यायः
रक्तपायी २ रक्तांगः ३ मंचका
श्रयः ४ इतिराजनिर्घंटः उद्दंशः
५ निर्विषाणहस्ती निःश्मश्रुपु
रुषः माकुण्या इति भाषा नारि
केलः इतिमेदिनी जंघात्रा ॥
णं इति हेमचंद्रः ॥
मत्कुणा स्त्री अज्ञानलोमभ
गं इति शब्दरत्नावली ॥
मत्कुणारिः पुं इन्द्राशनः सि
द्धि इतिभाषा इति शब्दमाला म
त्तः पुं ताम्रदहसी मात श्रेयालो



हाती इति भाषा तत्पर्य्यायः। प्रभिन्नः २ गर्जितः ३ इत्यमरः। पुंस्कारः कोकिलः महिषः इति राजनिर्घण्टः ॥

मत्तः त्रि हृष्टः मत्ततविशिष्टः तत्पर्य्यायः शौण्डः २ उत्कटः ३ क्षीवः ४ इत्यमरः ॥

मत्तकाशिनी स्त्री उत्तमस्त्रीत्यम रः मत्तकासिनीति मत्त इव क्षीव इव कसति गच्छति मत्तकासिनी कस गतौ ग्रहादित्वात्णिनि दन्त्यमध्यामप्येव काशते भाति मत्तकाशिनी तालव्य मध्यापि इति भरतः ॥

मत्तकीशः पुं हस्ती इति शब्दमाला ॥

मत्तरः पुं ममाधिकः मत्तो इति प्राग्यः अस्मद् शब्दात् इतरप् प्रत्ययेन निष्पन्नः इति सिद्धान्तकौमुदी ॥

मत्तवारणं क्ली प्रासादवीथीनां वरण्डः कोठरवारांडा इति भाषा अपाश्रयः प्रांगनावरणं इति हेमचन्द्रः विश्वस्य प्रासाद वीथीनां कुण्डहस्त वृतिः कुन्दहस्तवृति इति च पाठः इति मेदिनी शुगर्लः इति शब्दमाला ॥

मत्तवारणः पुं प्रभिन्नकटकुंजरः मत्तहस्ती इति मेदिनी हेमचन्द्रश्च ॥

मत्ता स्त्री मदिरा इतिराजनिर्घण्टः मत्तालम्बः पुं प्रांगनावरणं तत्पर्य्यायः अपाश्रयः २ प्रग्रीवः ३ मत्तवारणं ४ इति हेमचन्द्रः ॥

मत्तेभगमना स्त्री स्त्रीविशेषः मत्तगजगामिनी इति हेमचन्द्रः ॥

मत्यं क्ली दाचादीनामुष्टिः तत्पर्य्यायः वंटः २ इति हेमचन्द्रः। मत्र इ ड़ क गुप्तोक्तौ इति कविकल्पद्रुमः दन्त्यवर्गाद्यापधः इ क ड़ इति ध्रुवं मंत्रयते त्त्पो ऽयासिति मुरारिः मंत्र इत्यनेनैवेष्ट ॥ सिद्धे इदनुबंधो वेदमुच्चारणं भेदार्थः इति दुर्गादासः ॥

मत्सः पुं मत्स्यः इत्युणादि कोषः ॥

मत्सगंटः पुं व्यंजनविशेषः मत्स्यचेंट इति ख्यातः तत्पर्य्यायः गलग्रहः २ इति शब्दचंद्रिका ॥

मत्सरः पुं अन्यशुभद्वेषः इत्यमरः क्रोधः इति मेदिनी ॥

मत्सरः त्रि अपरसम्पत्तिः मान सर्य्युक्तः कृपणः इत्यमर मेदिनीकरौ आत्मयिक कारविशेषः यथा निंदन्ति मां सदा

लोका पिगस्त्व मम जीवनं इत्या त्मनि भवेयस्त पिक्कारः सचमत्सरः इतिपाप्मक्रियायोग सारे। १९ अध्यायः ॥

मत्सरा स्त्री मक्षिका इतिमेदिनी मत्सरी पुं अन्यशुभद्वेष्टा तत्पर्य्यायः कर्णेजपः २ दुर्जनः ३ पिशुनः ४ सूचकः ५ नीचः ६ द्विजिह्वः ७ खलः ८ इति हेमचंद्रः।


मत्स्यः पुं स्त्री जलजंतुविशेषः माछ इतिभाषा तत्पर्य्यायः ॥ पृथुरोमा २ झसः ३ मीनः ४ वैसारिणः ५ अण्डजः ६ विसारः ७ शकली ८ इत्यमरः शंबली ९ झषः १० आत्माशी ११ सम्बरः १२ मूकः १३ जलेशयः १४ कंठकी १५ शाल्की १६ मत्स्य १७ अनिमिषः १८ इति शब्दरत्नावली तस्य गुणाः बृंहणत्वं गुरुत्वं शुक्रवर्द्धनत्वं बलत्वं स्निग्धत्वं उष्णत्वं मधुरत्वं कफपित्तकरत्वं व्यायामशील दीप्ताग्नीनां पूजितत्वं वातरोगहरत्वंच इति हृह्मत्स्य। गुणाः गुरुत्वं शुक्रलत्वं मलबद्धकारित्वंच लघुमत्स्य गुणाः लघुत्वं ग्राहित्वं ग्रहणी रोगहितत्वंच हस्त मत्स्य गुणाः लघुत्वं स्निग्धत्वं वातघ्नत्वं वह्निवर्द्धनत्वंच पांडर मत्स्य गुणाः दोषलत्वं स्निग्धत्वं गुरुत्वं ॥ मलभेदित्वंच क्वथित मत्स्यस्य अर्थात पूति मत्स्यस्य गुणाः दोषलत्वं शुष्कमत्स्य गुणाः विष्टम्भित्वं दुर्जरत्वंच लवणाभावित मत्स्य गुणाः कफपित्तकरत्वं सारकत्वंच ॥ सामुद्र मत्स्यगुणाः लघुत्वं वृष्यत्वं मधुरत्वं स्वल्पमलकारित्वंच सामुद्रा गुरवो वृष्याः स्निग्धोष्णा वातनाशनाः इतिपाठांतरं नादेय मत्स्यगुणाः श्लेष्मलत्वं वृष्यत्वं। मधुरत्वं अल्पमलभेदकत्वंच। सरस्तडागभव मत्स्यगुणो स्निग्धत्वं स्वादुरसत्वंच महाह्रद भव मत्स्याः बलिनः अल्पजलभवाः अबलाः इग्यमत्स्यगुणाः गुरुत्वं वृष्यत्वं बृंहणत्वं बलवर्द्धनत्वंच तैल लवणशुक्रदग्धमत्स्यगुणाः क्षीणशुक्र भग्नजर्जरीत निरस्त्रीसेवि क्षीणतेजसां हितकारित्वं पलाश वेष्टित कर्दमलेपितांगार दग्धसलवण वेशवारपुरुकृत साईक कटुतैलसंतोलित मत्स्यगुणाः स्वादुत्वं कफ वात

हरत्वं शुक्रलत्वं बल वर्द्धनत्वंच
शाकमत्स्याख्य व्यंजन गुणाः
लघुत्वं हृद्यत्वं पुष्टिदत्वंच ॥
मत्स्य चंड गुणाः बलकरत्ववात
हरत्वं अतिशय रोचनत्वंच ।
शिरसि वृद्धकेशयादि मत्स्यगु।
णाः मुखप्रियत्वं हृद्यत्वं पुंस्त्व
घातकत्वंच इतिराजवल्लभः अपिच
निः शल्कानिंदितामत्स्याः सर्वेषा।
ल्कयुताहिताः वपुः स्थैर्यकरावी
र्य्यबल पुष्टिविवर्द्धनाः कन्दरजाज
लनिर्झर तडाग वापी जलेषु येमत्
स्याः ते ऽतिजडा 'नादेया पथो
त्तरं लघुतरास्तु नादेयाः ॥
स्तारस्तुमत्स्या गुरवो विदाहिनो
विष्टम्भदास्ते लवणार्णवादिजाः
नानाश्रिताः स्वादुजल स्थिता अ
पिस्तेयाजडास्ते ऽपितथाश्रिता इमे
इति राजनिर्घंटः अथ लघु
मत्स्यगुणाः लघुमत्स्याः स्वादुरा
सोदोष त्रय विनाशनाः लघुपा
काश्चिकराः सर्वदा ते हितामताः
अथातिलघु मत्स्य गुणाः
अति सूक्ष्माः पुंस्त्वहरा रुच्याः का
सानिलापहः अथ मत्स्या
ड गुणाः मत्स्यगर्भो भृशं हृष्यः
स्निग्धः पुष्टिकरो गुरुः कफ मेद

प्रदो बल्यो ग्लानि कृन्मेह नाशनः
अथ शुष्कमत्स्य गुणाः शुष्क
मत्स्या न बल्याः स्युर्दुर्जरा विष्टंब
धिनः अथ दग्ध मत्स्यगुणाः
दग्धमत्स्योगुणैः श्रेष्ठः पुष्टिकृद्बल
वर्द्धनः अथ कूपजादि मत्स्यगु।
णाः कूपमत्स्याः शुक्रमूत्र कृष्टा।
श्लेष्म विवर्द्धनाः सरोजा मधुराः
स्निग्धा बल्या वात विनाशनाः।
नादेया बृंहणा मत्स्या गुरवो ऽनि
ल नाशनाः रक्तपित्तकरा हृष्याः
स्निग्धाल्पाः स्वल्प वर्चसः चौ
ड्या पित्त हराः स्निग्धामधुरा लघ
वो हिमाः ताडागा गुरवो हृष्याः
शीतला बलमूत्रदाः ताडाग वन्नि
र्झरजा बलायु र्मति हृत्कराः ।
अथ ऋतु विशेषे मत्स्यविशेषगुणाः
हेमंते कूपजा मत्स्याः शिशिरे।
सारसा हिताः वसंतेते नु नादे
या ग्रीष्मे चौण्ड्य समुद्भवाः तडाग।
जाता वर्षासुतत्रास्वपथ्या नदीभवाः
निर्झराः शरदि श्रेष्ठा विशेषा ऽव
गुदाहृताः इति भावप्रकाशः
मत्स्यात्पत्ति कारणं यथा तत
स्तु मित्रावरुणो भ्रातरौ ब्रह्मचारि
णौ तौ तेन देशं गत्वा देवौ विचरंतौ
यदृच्छया ताभ्यां तत्र सदा

दृष्टा उर्वशी तु वराप्सराः तपंती
सहितान्याभिः सखीभिःसावरान
ना सस्वरेणाद्धि गीतेन उर्वशया।
मधुरेणाच इतितौ चकटाहेत्व।
स्कंदत स्तावुभावपि तत्रिया प
तितंरेतः कमले ऽथस्थले जले कम
ले ऽथवशिष्ठस्तु जातोदि मुनि स
त्तमः स्थाले त्वगस्त्यः सम्भूतोज
ले मत्स्यामहामते इतिनारसिंह
पुराणे ६ अध्यायः मत्स्यभक्ष
ण निषेधो यथा यो यस्य
मांसमश्नातिसतन्मांसाद उच्यते
मत्स्यादः सर्वमांसादस्तस्मान्मत्
स्यान् विवर्जयेत् इतिमानवे ५।
अध्यायः जल स्थल चरा येच
प्राणिनस्तान्मृतानपि न भक्षे।
त्मानवोज्ञानी हत्वानेता भवेन्नहि
हत्वा हत्वा तु मत्स्याशी सर्वेषां
योविशेषतः मांसादः प्राणिनां
सोऽपि तस्मान्मत्स्यं परित्यजेत्
इति पाद्मोत्तरखंडे १०५ अध्या
यः वर्जनीय मत्स्या यथा
शृणु देवि प्रवक्ष्यामि मांसभेदा
न्विवाधमे नादेयं तिक्तकमठं प
क्ष्मशृंगिणमेवच गोमीनं वक्र
शल्कं कराले राघवं तथा वीमीनं
वल्कर्णंच सचक्रं चेरामेवच भूविल

ग्धानिरुद्धंच गांगेयानि विवर्जयेत्
इतिमत्स्यसूक्त महातंत्रे ॥
रविवारे मत्स्यभक्षण निषेधो यथा
आमिषं रक्तशाकंच यो भुंक्ते च
रवे र्दिने सप्तजन्म भवेत्कुष्ठी
दरिद्रश्चोपजायते इति भविष्य
पुराणं माघ मामिष मासंच मस्तु
रे निम्बपत्रकं भक्षयेद्य रववीरे
सप्तजन्मान्यपुत्रकः इति तिथ्या
दितत्वे कार्त्तिके मत्स्य भक्ष।
निषेधोयथा नमात्स्य भक्ष
येन्मांसं नकौर्मंनान्यदेव हि चे
डालो जायतेराजन् कार्त्तिकेमां।
स भक्षणात् इतिनारदीयपुराणं
माघ वैशाखयो र्हविष्य ब्रह्म।
चर्य्य विधानात् मत्स्यभक्षणं नि।
तरानिषिद्ध मितिकृत्यतत्वदर्शना
त् जन्मतिथौ मत्स्यभक्षण निषे।
धोयथा आमिषं कलहं हिंसावर्ष
वृद्धौ विवर्जयेत् अपिचसंक्रेया
स्तुनिरामिषं सहि भवेज्जन्मान्तरे प
ण्डितः इतितिथ्यादितत्वे शैव।
स्यमत्स्य भक्षणनिषेधो यथा कु
मयं कुर्वि वभक्तिः कुमांसे कु
शिवार्चने मत्स्यमांसरतानांवै
दूरे तिष्ठति शंकरः इतिकाशीखंडे
ना भक्ष्यं नैवेद्यार्थ्ये ॥




भक्षेच्छुना महिषी क्षीरं वर्जयेत्
पंचनखं मत्स्यं वराहमांसानि च
इत्यादि कल्पतरुधृत विष्णुसूत्रं।
विन्ध्य पर्वतस्य पश्चिमे मत्स्यभ
क्षणनिषेधो यथा विन्ध्यस्य पश्चि
मे भागे मत्स्यभक्षणपतितो नरः
इति पुराणं कामतो मत्स्य
भक्षणे प्रायश्चित्तं यथा मत्स्यां
स्तु कामतो जग्ध्वा सोपवासस्त्र्य
हं वसेत् अज्ञानत स्त्वदंहे इति
प्रायश्चित्तविवेकः मत्स्य भ
क्षणे प्रतिप्रसवो यथा मत्स्यान्
सल्कान् भुञ्जीत मांसं रौरवमेव च
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यः।
श्चनान्यथा सफरं सिंहतुण्डं च तत्।
था पाठीन रोहितौ मत्स्यास्त्वेतो
समुद्दिष्टा भक्षणाय नयोपनैः
प्रोक्षितं भक्षयेदेषां मांसं च
द्विजमाम्यया यथा विधिनियुक्त
श्च श्राद्धानामपि वाम्येय इति कौर्म
उपरिभागे १९ अध्यायः अपि च
पाठीन रोहितावाद्यौ नियुक्तौ
हव्यकव्ययोः राजीवान् सिंहतु
ण्डांश्च सशल्कांश्चैव सर्वशः इति
मानवे ५ अध्यायः अनिवेद्य
न भोक्तव्यं मत्स्यं मांसं च यद्भवेत्
अर्थं विज्ञापयो मूढं यदि

स्मो ऽनिवेदितं इत्याह्निक तत्त्वं
प्रेतश्राद्धे मत्स्यदान विधि ॥
र्यथा सपिण्डीकरणं यावत् प्रेतश्रा
द्धं षोडशं पक्वान्नेनैव कर्त्तव्यं
सामिषेण द्विजातिभिः इति
श्राद्धतत्त्व धृत कामधेनुवचनं।
मत्स्यः पुं मीनविशेषः विराट
देशः नारायणः इति हेमचन्द्रः
देशविशेषे बहुवचनान्तः इति
मेदिनी द्वादशराशिः यथा।
मत्स्याघटी नृ मिथुनं सगदं सवी
णं इत्यादि ज्योतिस्तत्त्वं ॥
अष्टादश पुराणान्तर्गत पुराणवि
शेषः यथा पुराणं पवित्रमायुष्या
मिदानीं शृणुत द्विजाः मात्स्यं
पुराणमखिलं यज्जगाद गदाधरः
इति मत्स्यपुराणे १ अध्यायः।
दशावतारान्तर्गत प्रथमाव ॥
तारः यथा सूत उवाच पुरा रा
जा मनुर्नाम चीर्णवान् विपुलन्त
पः पुत्रे राज्यं समारोप्य क्षमा
वान् रविनन्दनः मलयस्यैकदेशे।
तु सर्वात्म गुणसंयुतः समदुःख
सुखो वीरः प्राप्तवान् योगमुत्तमं।
बभूव वरदश्चास्य वर्षायुतशते।
गते वरं ब्रूहि प्रोवाच प्रीतः सक
मलासनः एवमुक्तोऽब्रवीद्राजा

प्रणम्य स पितामहं एकमेवाह
मिच्छामि त्वत्तो वरमनुत्तमं भूत
ग्रामस्य सर्वस्य स्थावरस्य चरस्य च
भवेयं रक्षणायालं प्रलये समुप
स्थिते एवमस्त्विति विश्वात्मा तत्रै
वान्तरधीयत पुष्पवृष्टिश्च महती
खात् पपात सुरार्पिता कदाचि
दाश्रमे तस्य कुर्व्वतः पितृतर्पणं
पपात पाण्योरुपरि शफरी जल
संयुतः दृष्ट्वा तच्छफरीरूपं स दया
लुर्महीपतिः रक्षणायाकरोद्यत्नं
स तस्मिन् करकोदरे अहोरात्रे
णैकेन षोडशाङ्गुलविस्तृतः सो
ऽभवन्मत्स्यरूपेण पाहि पाहीति
चाब्रवीत् स तमादाय मणिके
द्विपजलचारिणं तत्रापि चैकरा
त्रेण हस्तत्रयमवर्द्धत पुनः प्राह
र्त्तनादैः सहस्रकिरणात्मजं स मत
स्यः पाहि पाहीति त्वामहं शरणं
गतः ततः स कूपे तं मत्स्यं
प्राहिणोद्रविनन्दनः यदा न माति
तत्रापि कूपे मत्स्यः सरोवरे।
क्षिप्तोऽसौ पृथुतामागात् पुन
र्योजनसम्मितः तत्राप्याह पुन
र्दीनः पाहि पाहि नृपोत्तम त
तः स मनुनाक्षिप्तो गंगायामप्य
वर्द्धत यदा तदा समुद्रे प्राक्षि

प्तो मेदिनीपतिः यदा समुद्रमखि
लं व्याप्यासौ समुपस्थितः तदा
प्राह मनुर्भीतः कोऽपि त्वमसुरेश्व
रः अथवा वासुदेवस्त्वमन्य ईदृक्
कथं भवेत् योजनायुतविंशत्या
कस्य तुल्यं भवेद्वपुः ज्ञातस्त्वं
मत्स्यरूपेण मां खेदयसि केशव।
हृषीकेश जगन्नाथ जगद्धाम न
मोऽस्तु ते एवमुक्तः स भगवान्मत्स्य
रूपी जनार्दनः साधु साध्विति चो
वाच सम्यक्ज्ञातस्त्वयानघ अचि
रेणैव कालेन मेदिनी मेदिनीपते
भविष्यति जलमग्ना सशैलवनका
नना नौरियं सर्वदेवानां निकाय।
येन विनिर्मिता महाजीवकाय
स्य रक्षणार्थं महीपते स्वेदाण्डजो
द्भिज्जाये वै ये च जीवा जरायुजाः
अस्यां निधाय सर्वांस्तानानाथान्
पाहि सुव्रत युगान्तवाताभिहता
यदा भवति नौर्नृप शृङ्गेऽस्मिन्
मम राजेन्द्र तदेमां संयमिष्यसि।
ततो लयान्ते सर्वस्य स्थावरस्य च र
स्य च प्रजापतिस्त्वं भविता जगतः
पृथिवीपते एवं कृतयुगस्यादौ।
सर्वज्ञो धृतिमान्नृपः मन्वन्तराधि
पश्चैव देवपूज्यो भविष्यसि इति
मत्स्यपुराणे मनुविष्णुसंवादे प्रथ।




मेसर्गे प्रथमोध्यायः विस्तारस्तु
श्रीभागवते ८ स्कंधे २४ अध्यायेद्रष्ट
व्यः तस्यमंत्रध्यान पूजादि यथा
शंकरउवाच एकत्रवामवन्मत्स्या
वतारः कल्पआदिसे तस्य मंत्रं
प्रवक्ष्यामि भक्तिमुक्ति प्रदायकं
तारोनमो भगवतेमं मत्स्याय १
मंत्रंवदेत् द्वादशाक्षर मंत्रो ऽस्य
ऋषि र्व्रह्मा समीरितः गायत्रीछंद
उदित देवता मीनविग्रहः भग
वान्शर्वरीनाथोवीजं श्रीपंचकी
लकं ताम्रयो रोहित सम श्या
कांठच तराकृतिः चतरपाम्भ्रत
वीजः शंख चक्रगदाधरः शृंगी
मत्स्यनिभोमूर्द्धा लक्ष्मीवक्षोविरा
जितः पद्मविकित सर्वांगःसदा।
स्मफुल्लोचनः जपेद्वादशसाहस्रंत्रि
मध्याके सिलैर्ड्डनेत् प्रत्यहं
तद्दशांशेनवैप्रथिकार्तिके तं
था माघेच मार्गशीर्षेवह्नविष्याशी
जितेन्द्रियः आरभ्य भाद्र वङ्कल
मङ्गवा षोडशाहकं लक्ष्मी मन्त्रं
जपेन्नित्य मितंचापि कला पातं।
तथैवहोमः कर्त्तव्यस्तथाप्यादिवस
पु तं तपयेद्वादश शतं तिल तं
डुलं चंदनैः आज्यंतथा शतांशेव
तर्पयेत् तथा श्रियं रक्तोत प

ले वी पंचेर्वी मालत्याद्यैः सम
यिभिः एकं कृते वर्षमेकं मंत्र
सिद्धिः प्रजायते नित्यद्वादश वि
प्रांश्च श्रीरूपांचसुवासिनी भो
जयेत् पूजनंचास्यवेरतो वाशयेत्
सदा षट्पत्र कर्णिकायांचश्रीश।
तंदेव मर्चयेत् षट्पत्रेषु षडंगानि
यजेद्वाह्य चतुर्दले मंडूकं मकरं
कूर्मं शिशुमारंच पूर्वतः तद्वाह्या।
ऽष्टदले पूज्याः द्वारपाः समसिंधा।
वः तद्वाह्येकदले पूज्या वासुक्या।
द्याः फणीश्वराः तस्यवाह्येशक
दले रत्नानि चतुर्दश समुद्रजानि
पूज्यानि लक्ष्मी कौस्तुभकानि च
गंगाद्याः षोडश ततो महानद्यः
प्रपूजयेत् ततश्चाष्टदले वेदाः।
एवेव समभिताव् दिगीशाश्चत
दस्त्राणि तथावराः पूजनं एवं सि
द्धमनुर्मंत्री जायतेसिद्धिभाजनं।
एतद्रक्तं पातं मंत्रं जपेद्होतत्रा।
शतं तद्देवतादिने सिद्धः पुस्त
कादेव जायते प्रकृतिन प्रयो
गेषु तपु तत्रस्य संस्कृतिः एतत
पल्लविता मंत्रा मम सिद्धंति पार्व
ति एतत्संपुटिताः सर्वे वैदि।
काः सिद्धिदाः कलौ अनेनग्रथिता
जप्याः कलम्बु इत सिद्धिदाः॥


इतिमेरुतंत्रे २९ प्रकाशः
मत्स्यकरंडिका स्त्री मत्स्यरक्षण
पात्रं खोलुइ इति भाषा तत्
पर्य्यायः मत्स्यधानी २ कुवेणी ३
इतिजटाधरः।
मत्स्यगंधा स्त्री लांगलीवृक्षः स
व जलपिप्पली इतिजटाधरः स
त्यवतीचेट्स्य व्यासमाता इति।
महाभारते॥
मत्स्यघंटः पुं स्वनामख्यातमत्स्य
व्यंजनं तत्पर्य्यायः गलग्रहः २
इति शब्दचंद्रिका।
मत्स्यजालं क्ली आनायः माछ।
धरा जाल इतिभाषा इतिहेमचंद्रः
मत्स्यंडिका स्त्री शर्कराविशेषः
मिछिरि इतिभाषायथा लसी
का फाणित गुडखंड मत्स्यंडिका
सिताः निर्मला लघवो ज्ञेयाः
शीतवीर्य्या यथोत्तरं यथा य
थैषां वैमल्यं भवेच्छैत्यं तथा
तथा इतिराजवल्लभः।
राव इति हिंदीभाषा तत्पलक्ष
णं यथा इक्षोरसो यः संपक्वो
घनः किंचिद्द्रवान्वितः मन्दयत्
स्यंदते यस्मान्मत्स्यंडीति निगद्य
ते अस्यागुणाः मत्स्यंडी भेदि
नी वल्याल्घ्वी पित्तानिलापहा।

मधुरा वृंहणीवृष्यारक्तदोषापहा
स्मृता इति भावप्रकाशः॥
मत्स्यंडी स्त्री खंडविकारः इत्या
मरः इक्षुविशेषस्यरसपाके खं
डेयाम्प्रसारभूते या गुडिकाका।
राजायतेसामत्स्यंडी खंडशा।
र्करं मिछिरी इति ख्यातेनवाम
इतिख्यातापि मत्स्यंडीति केचि
त् मत्स्यांडाकारत्वात् मत्स्यंडी
मनीषादित्वादलकं नरादित्वा।
दीपमत्स्यमतिति मत्स्यंडी अन
प्राणानेडः इत्यन्ये मदं स्पंदने।
मत्स्यंडीति केचित् इतिभरतः
मत्स्यधानी स्त्री मत्स्यरक्षार्थपात्रे
खोरयी इतिखोलुइ इतिचभाषा
तत्पर्य्यायः कुवेणी २ इत्या
मरः मत्स्यकरंडिका ३ खारपि।
का ४ मत्स्यवेधनी ५ कुवेणिः ६
कुवेणा ७ कुपिनी ८ कुपिनिः ९
इतिभरतः सास्वस्याचेत्कुपिनी
भवेत् इतिशब्दरत्नावली।
मत्स्यनाशकः पुं कुररपक्षी इति
भूरि प्रयोगः मत्स्यनाशनोपि
त्रि॥
मत्स्यनाशकः पुं कुररपक्षी इति
हेमचंद्रः॥
मत्स्यपित्ता स्त्री कटुरोहिणी।



इत्यमरः ॥
मत्स्यवंधी पुं धीवरः यथा कै
वर्त्तो धीवरो दासो मत्स्यवंधी च
जालिकः इतिहलायुधः ॥
मत्स्यवंधिनी स्त्री मत्स्यधानी इति
हलायुधः ॥
मत्स्यरंकः पुं मत्स्यरंगपक्षी ।
इति भूरि प्रयोगः ॥
मत्स्यरंगः पुं पक्षिविशेषः माछ
रांगा इति भाषा तत्पर्य्यायः
कम्पाशी २ जलमद्गुः ३ मणीच
कः ४ इतिहारावली मत्स्याशनः
५ मीनरंकुः ६ मत्स्यरंकः ७ सूचि
पक्षः ८ इति शब्दरत्नावली ।
मत्स्यराजः पुं रोहितमत्स्यः
इतित्रिकांडशेषः विराटराजः ।
इतिमहाभारते ॥
मत्स्यविन्ना स्त्री कटुका इति
वैद्यकं ॥
मत्स्यवेधनं क्ली वडिशं इत्यमरः
मत्स्यवेधनी स्त्री मद्गुपक्षी इति
जटाधरः वडिशं इति शब्द
रत्नावली ॥
मत्स्यसंतानिकः पुं मत्स्यव्यंजन
विशेषः यथा रम्यो ऽङ्गारे सल
वणोद्वेशवारे रुपस्कृतः सार्द्दकः
कटुतैलेन मत्स्यसंतानिको भ
वेत् इति शब्द चंद्रिका ।
मत्स्यांगी स्त्री हिलमोचिका इति
त्रिकांडशेषः ॥
मत्स्यादनी स्त्री जलपिप्पली इ
तिराजनिर्घंटः ॥
मत्स्याशनः पुं मत्स्यरंगपक्षी ।
इति त्रिकांडशेषः मत्स्यभक्ष ।
केचि ॥
मत्स्याक्षी स्त्री ब्राह्मी इत्यमरः
साच सोमलतायां ब्राह्मीशाके ।
इति केचित् इतिभरतः यथा
ब्राह्मीवयस्था मत्स्याक्षी मीनाक्षी ।
सोमवल्लरी मत्स्याक्षी शिशिरा ।
हृद्या व्रणदोष हृत्यापहा इति
राजनिर्घंटः गंडदूर्वा इतिराज ।
निर्घंटः हिलमोचिका ब्राह्मी
शाकः इतिरत्नमाला ॥
मत्स्यी स्त्री मत्स्यजातिः इति
मुग्धबोधव्याकरणं ॥
मत्स्योदरी स्त्री सत्यवती सा च
व्यासमाता इति जटाधरः का
शीस्थतीर्थविशेषः यथा कैला
साद्रेः समायाताः समकोटिमिताः
प्रभो दुर्गाणि ते कृतामीहमा
महर्गा समानिच महाशाणि स
यंत्राणि कवाट विकटानिच को
टिकोटिमिटान्यानि सर्वहिं सति

तान्यपि ततःशैलं महाङ्गं तैः
काशी परितः कृतं परिखानि
कृतान्तिदा मत्स्योदर्य्या नलावि
ला मत्स्योदरी द्विधाजाता वहि
रन्तश्चरा पुनः तस्यान्तीर्थंमहत
ख्यातं मिलितं गांगवारिणा य
दा संहार मार्गेण गंगाम्भः प्रस
रेदिह तदामत्स्योदरीतीर्थंलभ्य
ते पुण्यगौरवात् सूर्य्याचंद्रमसोः
पर्व तदा कोटिगुण शतं सर्व
पर्वाणि तत्रैव सर्वतीर्थानि तत्र
वै तत्रैव सर्व लिंगानिगंगामत्स्यो
दरी यतः मत्स्योदर्य्यां चये स्ना
ता यत्रकुत्रापिमानवाः कृतपिंड
प्रदाना स्नेन मातृ उदरे शय्याः
अविमुक्त मिदं क्षेत्रं मत्स्याकार
तमाश्रयात् परितः स्वर्धुनी वा
रिसंसारे परिवीतत्ते मत्स्योद ।
र्य्यां कृत स्नाना येनराक्षेत्रेन
माः कृत्वापिवङ्कपापानितेत्र
ते भास्करेः पुरी किंस्नात्वाबहु
तीर्थेषु किं तथा दुष्कंतपःय
दिमत्स्योदरी स्नाताःकृतागर्भभ
ये ततः यत्रयत्रहि लिंगानिवृदे
वर्षि कृतान्यपि तत्रमत्स्योदरी
प्राप्य सस्नातो मोक्ष भाजनं
संतितीर्थान्यनेकानि भूर्भुवःस्वर्गे
तान्यपि न समानि यां तानि ।
कोटंशेनापि निष्क्रितं इत्यं ।
तीर्थं कृतं तेन विभो कैलास ।
वासिना गणाधिपेन स्वमहत्सम
हीदर कर्मणा इतिकाशीखंडे ।
६९ अध्यायः ।
मथ ज प गाढे इतिकविकल्पद्रु
मः जमंथः मथः पत्रमथीत् इ
ति दुर्गादासः ॥
मथ इ कंथे इतिकविकल्पद्रुमः
इ मंथ्यते कंथावधक्लेशो इति
दुर्गादासः ।
मथनं क्ली विलोडनं मडायाइति
भाषा यथा क्वाहं मंदमतिः क्वे
दं मथनं क्षीरवारिधेः किंतत्रपर
माणु वै यत्र मज्जति मंदरः ।
इति श्रीधरस्वामी ॥
मथनः पुं गणिकारिकावृक्षः इ
तिरत्नमाला ॥
मथितं क्ली निर्जलघोलं इत्यमरः
अस्यगुणाः कफपित्तनाशकत्वं
रोचनत्वं धातुपुष्टिदत्वंच इति
राजवल्लभः विलोडिते त्रि ।
मथुरा स्त्री स्वनामख्यातपुरी अथु
ना म्यागरा इतिख्यातस्यासन्नस्थान
गं तत्पर्य्यायः मधुपघ्नं २ इति
त्रिकांडशेषः मधुपुरी २ ॥



मथुरा च इति शब्दरत्नावली सा च
मोक्षदायकतीर्थं यथा अयोध्या
मथुरा माया काशी कांची अवंतिका
पुरी द्वारवती चैव सप्तैता मोक्षदा
यिकाः अयोध्यारामनगरी मथुरा
लक्ष्मणपालिता यतास्त्वपृथिवी म
ध्येन गण्यंते कदाचन श्रीरामचन्द्र
रक्षया अयोध्या सा महापुरी मथुरा
केशवोत्सहस्रदर्शन विपापिता इ
त्यादि भूतशुद्धितंत्रं तत्र विष्णुद
र्शन माहात्म्यं यथा यज्ञेष्टशुक्ल
द्वादश्यां स्नात्वा वै यमुनाजले मथु
रायां हरिं दृष्ट्वा प्राप्नोति परमां।
गतिं यमुना सलिलस्नातः पुरु
षो मुनिसत्तम ज्येष्ठामूलामले प
क्षे द्वादश्यां समुपोषितः सम
भ्यर्च्याच्युतं सम्यक् मथुरायां समा
हितः अश्वमेधस्य यज्ञस्य प्राप्नो
त्यविकलं फलं कश्चिदस्मत्कु
लेजातः कालिंदी सलिलाप्लुतः
अर्चयिष्यति गोविंदं मथुरायामु
पोषितः ज्येष्ठामूले सिते पक्षे
येनैवं वयमप्यत्र परामृद्धिमवा
प्स्यामस्तारिताः स्वकुलोद्भवैः इति
विष्णुपुराणे ६ अंशे ८ अध्यायः
तस्या माहात्म्यं यथा वाराहे उ
वाच नविद्यते च पाताले नान्त

रीक्षे न मानुषे समत्वं मथुराया।
हि प्रियं मम वसुंधरे सूत उवाच।
तच्छ्रुत्वा वचनं तस्य प्रणम्य शिर
सा नरा पुण्यानां परमं पुण्यं पृथ्वी
वचनमब्रवीत् पृथिव्युवाच पुष्करं नै
मिषं चैव पुरी वाराणसी तथा प
ना हित्वा महाभाग मथुरां किंप्र
शंससि वाराह उवाच शृणु त्वं का
र्त्स्न्येन वसुधे कथ्यमानं मयानघे
मथुरेति च विख्यातं नास्ति क्षेत्रप
रं मम सा रम्या च सुशस्ता च जन्म
भूमिः प्रिया मम शृणु देवि यथा
लोके हि मथुरा पापहारिणी तन्नि
वासी नरो याति मोक्षं नास्त्यत्र
संशयः महामाघ्यां प्रयागे तु यत्
फलं लभते नरः तत्फलं लभ
ते देवि मथुरायां दिने दिने।
कार्त्तिक्यां चैव यत्पुण्यं पुष्करे त
वसुंधरे तत्फलं लभते देवि
मथुरायां दिने दिने पूर्णे वर्षसह
स्रेण वाराणस्यां तु यत्फलं तत्
फलं लभते देवि मथुरायां क्षणात्।
नहि मथुरां परित्यज्य योऽन्यत्र कु
रुते रतिं मूढो भ्रमति संसारमो
हितो मायया मम यः शृणोति
वाराहे माथुरं मम मंडलं।
अन्येनोच्चारितं पोसत सो

अपि पापैः प्रमुच्यते पृथिव्यां
यानि तीर्थानि आसमुद्रसरांसि
च मथुरायां गमिष्यंति सुप्ते चैव
जनार्दने मथुरां समनुप्राप्य स्ना
नं कृत्वा यथाविधि तर्पयेत्
पितरो यावत् स्थित्यग्रजन्मनः
ये वसंति महाभाग मथुरामितरे
जनाः तेपि यांति परां सिद्धिं मत्
प्रसादान्न संशयः कुब्जाम्रके शौ
करे च मथुरायां विशेषतः वि
नासांख्येन योगेन मुच्यते नात्र सं
शयः मथुरायां महापुण्या ये व
संति शुचिव्रताः बलिभिस्ताः प्र
दानाश्च ये वा तेनाविग्रहाः भ
विष्यामि वराहे द्वापरे युगसं
स्थिते ययाति भूपरं शाश्वतत्रि
यः कुलवर्द्धनः भविष्यामि वरारो
हे मथुरायां न संशयः मूर्त्तिं च
र्यां कृत्वा स्थास्यामि ऋषिभिः
स्तुतः स्थास्यामि वत्सरं पुण्ये
पुत्रतनिश्चयः एका वेदनसंकाशा
द्वितीया कनकप्रभा अशोकसद
शा चान्या अन्या चोत्पलसन्निभा तत्र
गत्वा नामानि भविष्यंति मम प्रि
ये पुण्यानि च पवित्राणि संसार।
क्लेशनानि च पश्चाद्यान्ययिष्या।
सिद्धात्रिंशति वसुंधरे दैत्यान चो

वान् महाभाग केशी दीत्योर दर्शि
तान् यमुना यत्र सर्वदा नित्यसं
निहिता एवं वैवस्वतसमा सम्या
यमुना यत्र विश्रुता तां नरीयमु
नां गंगां प्रयागे संग विश्रुतां
गंगाशतगुणा पुण्या मथुरे मम।
मंडले यमुना विश्रुता देवि नात्र का
र्या विचारणा तत्र तीर्थानि गुह्या
नि भविष्यंति ममानघे यत्स्नाप
रो देवि मम लोके महीयते अ
थात्र मुंचते प्राणान् मम कर्मपरा
यणाः न जायते समन्येषु जायते
च चतुर्भुजः अविमुक्ते नरः स्नातो
मुक्तिं प्राप्नोत्यसंशयः तथात्र
मुंचते प्राणान् मम लोकं स गच्छति
विश्रांति संज्ञकं नाम तीर्थं त्रैलोक्य
विश्रुतं यस्मिन् स्नातो नरो देवि
मम लोके महीयते सर्वतीर्थेषु य।
स्नानं सर्वतीर्थेषु यत्फलं तत्
फलं लभते देवि दृष्ट्वा देवं गत
श्रमं तत्र यत्ते मे तपसा नध्याने
नैव संयमैः तत्फलं लभते देवि
स्नातो विश्रांति संज्ञके कालत्रयं
तु वसुधे यः पश्यति गतश्रमं मे
त्वा प्रदक्षिणां देवविश्वलोकं स
गच्छति अस्यां चान्यत्र गंता सर्वसं
सार मोहानां यस्मिन् स्नातो।

नरो देवि ममलोके महीयते प्र
यागेनाम तीर्थन्तुदेवानामपि दुर्ल्ल
भं तस्मिन्स्नातो नरोदेवि अग्निष्टो
म फलं लभेत् इन्द्रलोकं समा
साद्य नरो वै तत्र मोदते अथात्र
मुंचते प्राणान्मम लोकं स गच्छति
तथा कनखलं तीर्थनाम गुह्यं परं
मम स्नान मात्रेण तत्रापि नाकपृ
ष्ठे स मोदते अस्ति ह्यत्र परं
गु तिन्दुकंनाम नामतः तस्मिन्
स्नातो नरो देवि मम लोके मही
यते अस्मिंस्तीर्थे पुरा वृत्तं तच्छृ
णुष्व वसुंधरे पाञ्चालविषये देवि
काम्पिल्ये च पुरोत्तमे धनधान्य
समायुक्तं ब्रह्मदत्तेन पालितं त
स्मिंस्त्वमते देवि तिन्दुकोनाम ना
मतः तस्मिंस्त्वसनतस्य नापित
स्य पुरोत्तमे कालेन महता त
स्य कुटुम्बं क्षयमागतं लोकदृ
ष्ट्वे त नराश्च भृशः दुःखपीडितः
सर्वसंग परित्यागी यो गच्छन्मथु
रापुरीं ब्राह्मणावसथेसोपि वस
मानो वसुंधरे तस्य कर्म प्रतो-
ष्ठताक्षालतैव यमुना नदी तत्रस्ना
नेव कुरुते नित्यकर्म दृढव्रतः
ततः कालेन महता पंचत्वमुपा
गतः तस्य तीर्थ प्रभावेन जातो।

ऽसौ ब्राह्मणोत्तमः तस्मिन्वरा।
हे देवि ब्राह्मणो योगिनां वरः
जातिस्मरो महाप्राज्ञो विष्णुभक्तो
वसुंधरे तस्य तीर्थप्रभावेन प्राप्ता
मुक्तिः सुदुर्लभा ततः परं सूर्य।
तीर्थं सर्वपाप प्रमोचनं वैरोचने
न बलिना सूर्यस्त्वाराधितः पुरा
भ्रष्टराज्येन बलिना धनकामेन वै
धृता ऊर्द्ध्वबाहुर्निराहार स्तमवा।
नुत्तमं तपः साग्रसंवत्सरं देवि
ततः काममवाप्नुयात् तस्य प्रस
न्नो भगवान् द्युमणिः प्रत्यभाषत
किंकारणं बले ब्रूहि तपस्यसि म
हत्तपः बलिरुवाच भ्रष्टराज्योस्मि
देवेश पाताले निवसाम्यहं वि
त्तेनापि विहीनस्य कष्टमभूशांक
नः मुकुटान्तस्य वै सूर्यो ददौ वि।
त्तामणिं ततः चिन्तामणिसमासा
द्य पातालमगमत्ततः तस्मिं स्ती
र्थे नरः स्नात्वा सर्वपापैः प्रमुच्यते
तत्रापि मुंचते प्राणान् ममलोकं स
गच्छति आदित्येऽहनि संक्रान्तौ।
ग्रहणे चन्द्र सूर्ययोः तस्मिन्स्ना
तो नरो देवि राजसूयफलंलभेत्
उत्तरे ध्रुवसंतमं इच्छया परमं त
पः ध्रुवे स्नानमात्रेण ध्रुवलोके
महीयते तत्रापि मुंचते।

प्राणान्मम लोके महीयते ध्रुवती
र्थे च वसुधेयः श्राद्धं कुरुते नरः
पितृन्संतारयते सर्वान्पितृपक्षे वि
शेषतः दक्षिणे ध्रुवतीर्थस्य तीर्थ
राजं प्रकीर्तितं तस्मिन्स्नातो नरो
देवि ममलोके महीयते तत्राथ
मुंचते प्राणान्ममलोकं स गच्छति।
तद्दक्षिणे महादेवि ऋषितीर्थं परं
मम तत्रस्नातो नरो देवि ऋषिलो
कं प्रपद्यते अथात्र मुंचते प्रा
णान्मम लोके महीयते दक्षिणे
ऋषितीर्थस्य मोक्षतीर्थं परं मम
स्नान मात्रेण वसुधे मोक्षंप्राप्नो
ति मानवः तत्राथ मुंचते प्राणान्म
म लोके महीयते तत्रैव कोटि
तीर्थं हि तीर्थानामपि दुर्ल्लभं तत्र
स्नानेन दानेन ममलोके महीयते
कोटि तीर्थे नरः स्नातः संतर्प्य
पितृ देवताः तारिताः पितरः।
स्तेन तथैव प्रपितामहाः कोटि
तीर्थे नरः स्नातो ब्रह्मलोके मही
यते तत्रैव वायुतीर्थं तु पितॄणा
मपि दुर्लभं पिंडं दद्यात्तु वसुधे।
पितृलोकं स गच्छति गयां पिंड
प्रदानेन यत्फलं लभते नरः तत्
फलं लभते देवि ज्येष्ठदानात्र संश
यः द्वादशैतानि तीर्थानि दे

वानां दुर्लभानि च स्नानं दानं ज
पो माहः सहस्त्र गुणितं भवेत्।
एषां स्मरणमात्रेण सर्वपापैः प्र
मुच्यते श्रुत्वा तीर्थस्य माहात्म्यं।
सर्वान्कामानवाप्नुयात् ॥ इत्या
दिवाराहपुराणमथुरातीर्थ प्रभा
वः इतः प्रभृति समविंशाध्या
येषु मथुरामाहात्म्यं द्रष्टव्यं ॥
मथुरेशः पुं श्रीकृष्णः इति शब्द
रत्नावली ॥
मथुरा स्त्री मथुरा इति द्विरूप।
कोषः ॥
मद ई भय इ र भि हर्षे इति
कविकल्पद्रुमः ई भि मत्तो ऽस्ति
भय माद्यति इ र अमदत् अमा
दीत् अस्मात् पुषादित्वात् नित्यं।
ङ इत्यन्ये इति दुर्गादासः ॥
मद म गर्वे ग्लेपने इति कवि
कल्पद्रुमः गर्वोऽहंकारः ग्लेपनं।
दैन्यं मम दयति नीचं सम्पत्तिः
मदयति शत्रुं शूरः इति दुर्गा
दासः ॥
मद क ङ तृप्तियोगे इति कवि
कल्पद्रुमः क ङ मनोमादयते य
स्य शास्त्राभ्यास रसायनात् इति
दुर्गादासः ॥ ॥
मद इ ङ स्वप्ने जाड्ये ॥ मदे

मोदे स्वनो गतौ । इति
कविकल्पद्रुमः ॥ मंघते । उ
मंदते जनः स्वपिति जडो भवति ॥
माद्यति मोदते स्तौति गच्छति वा
इत्यर्थः इति दुर्गादासः ॥
मदः पुं हस्तिगंडजलं तत्पर्य्या
यः दानं २ हर्षः तत्पर्य्यायः
आमोदः २ इत्यमरः रेतः ॥
कस्तूरी गर्वः इति मेदिनी ।
मद्यं सेव्यं मत्ततेति यावत्
इति हेमचंद्रः नदः कस्याण
वस्तु इति धरणिः । मदल
क्षणं यथा अहंमहात्मा धनवान्
मत्तस्यः कोऽस्ति भूतले इति
यज्जायते चित्तं मदः प्रोक्तः स
कोविदैः इति पाद्मे क्रियायो
गसारे ९ अध्यायः ॥ त
स्योत्पत्तिर्यथा बुद्धेर्मोहः सम
भवदहंकारादभून्मदः इति मात्
स्ये ३ अध्यायः ॥
मदकटः पुं षंडः षांढ़ इति भाषा
यथा इहरो गोपितः षंढो ।
द्वेषो मदकटो हलः इति हेम
चंद्रः ॥
मदकलः पुं मत्तहस्ती तत्पर्य्यायः
मदोत्कटः २ इत्यमरः अव्य
क्तमलापी इति शब्दरत्नावली ।

मदाव्यक्तवाचिनि त्रि इति मेदिनी
मदगंधः पुं सप्तच्छदवृक्षः इति
राजनिर्घंटः ॥
मदगंधा स्त्री मदिरा अतसी
इति राजनिर्घंटः ॥
मदघ्नी स्त्री पूतिका इति जटाधर
मदनः पुं कामदेवः इत्यमरः
तस्य नाम्नो व्युत्पत्तिर्यथा ऋषय
ऊचुः यस्मात्प्रमथ्य चेतस्त्वं जातो
ऽस्माकं तथा विधेः तस्मान्मन्मथ
नाम्ना त्वं लोके गेयो भविष्यसि ।
जगत्सु कामरूप स्त्वं त्वत् समो
नहि विद्यते अतस्त्वं काम नाम्ना
पि ख्यातो भव मनो भव मदा
नान्मदनाख्य स्त्वं शंभोर्दर्पात्सदा
र्पकः तथा कन्दर्प नाम्नापि लोके
ख्यातो भविष्यसि इति कालि
कापुराणे २ अध्यायः ब्रह्मण
स्तस्योत्पत्ति र्यथा प्रहृष्टमानसः
पुत्रं कन्यैकां च ससर्ज ह हृष्ट्या
कामिनः पुत्रः कामदेवो बभूव ह ।
कन्या षोडशवर्षी या रत्नभूषण भू
षिता उवाच पुत्रं सविधिः सदी
प्तं पुरतः स्थितं दुर्निवार्य्य मत्कलां
शं स्वात्मारामं मनो हरं ॥
ब्रह्मोवाच स्त्री पुंसोः क्रीडनार्था
य मदाज्ञ्या च विनिर्मितः हृदि

योगेन सर्वेषा मपि ध्यानं करिष्यसि
सम्मोहनं सरुद्रेण वीजं स्तंभित
कारणं उन्मत्त वीजं ज्वलनं प्रा
णस्वेतन हारकं पञ्चैते नाम याः
स्त्रात् सर्वान्सम्मोहनं कुरु इति
वाक्यों मम वरश्चैव वक्षभवेषु च
वाणांस्त्वैव शक्ता वृ महेष्म्या ।
जगद्विधिः हृष्ट्वा वाचं दुहितां वरां
दाने समधतः इति ब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखंडे ३५ अध्यायः
वसंतः धुस्तूरः सिक्थकं इति
मेदिनी वृक्षभेदः मयना इति
भाषा तत्पर्य्यायः पिंडकः २ श
ल्यकः ३ कंटकी ४ इति रत्नमा
ला पिंडीतकः ५ मरुवकः ६ श्वस
नः ७ करहाटकः ८ शल्यः ९ इत्य
मरः इति जटाधरः माषः इति
हेमचंद्रः खदिरवृक्षः इति शब्द
चंद्रिका मंकोठवृक्षः वकुलवृक्षः
वृक्षविशेषः मयनफल इति भा
षा तत्पर्य्यायः राठः २ केटर्य्यः
३ पिंडः ४ धाराफलः ५ नागरः ६
करहाटः ७ पिंडीतकः ८ श्वसनः ९
मरुवकः १० अस्य गुणाः वमिकार
कत्वं तिक्तत्वं उष्णवीर्य्यत्वं ले
खनत्वं लघुत्वं रूक्षत्वं कुष्ठकफा
नाहशोफ गुल्मव्रणापहत्वं च इति

राजनिर्घंटः आलिंगनविशेषः ।
तल्लक्षणं नायको नायिकायः कंठे
हस्तं दत्त्वा द्वितीयहस्तं तस्या मध्य
देशे दत्त्वा यदाश्लिष्यति इति
कामशास्त्रं ॥
मदनकः पुं मदनकवृक्षः इति र
त्नमाला ॥
मदनकाकुरवः पुं पारावतः इति
राजनिर्घंटः ॥
मदनगोपालः पुं श्रीकृष्णः यथा
वंदे मदनगोपालं कैशोराकार
मद्भुतं इति पाद्मे पाताल
खंडे ९ अध्यायः ॥
मदनचतुर्दशी स्त्री चैत्रशुक्लचतु
र्दशी यथा अथ मदनचतुर्दशीतत्र
मदनस्य पूजा कार्य्या स्कंदपुराणे सौ
रागमयोः मधुमासे तु संप्राप्ते
शुक्लपक्षे चतुर्दशी प्रोक्ता मदन
भंजीति सिद्धिदा तु महोत्सवे ॥
पूजयिष्यंति ये मर्त्त्याः स्तदंग भव प
ल्लवैः तयांति परमं स्थानं मद
नस्य प्रभावतः चैत्रे मासि चतु
र्दश्यां मदनस्य महोत्सवः जग
त्सितां किभि स्तत्र गीत वाद्यादि ।
भिर्नृणां भगवांस्तथ्यते कामः
पुत्र पौत्र समृद्धिदः वलिं प्रतिभ
गवद्धाक्यं न मानयंति ये पवे

मासनं मानवाधमाः तेषां पुण्यं
फलंदत्तं मया तेचैत्र मासिकं
देवलः चैत्र शुक्लचतुर्दश्यां यः
स्नायाच्छिव सन्निधौ पिशाचत्वेन
तस्य स्यात् गंगायांच विशेषतः
इति तिथितत्वं ॥
मदनत्रयोदशी स्त्री चैत्रशुक्लत्रयो
दशी तत्रमदनस्यव्रतंकर्त्तव्यं य
थाभविष्ये चैत्रशुक्लत्रयोदश्यां।
मदनं मदनात्मकं कृत्वासंपूज्य
विधिवद्वीजयेद्व्यजनेन च तत्र
संपुजितः कामःपुत्रपौत्र विव
र्द्धनः कामदेव त्रयोदश्यां पूज
नीयो यथा विधि रति प्रीति
समायुक्तो ह्यशोकमणिभूषितः
दमनो दमनकहस्तः संपुजितः प्री
णितः कामदेव ध्यानंच वापेत्।
इक्षुकामदेवो रूपवान् विश्वमो।
हनः नवस्तुति मंत्रः पुष्पधन्वन्
नमस्तेस्तु नमस्तेमीनकेतन मुनी
नांलोकपालानां धैर्य्यच्युति कृते
नमः माधवात्मजकंदर्प संबरारे
रतिप्रिय नमस्तुभ्यं जिताशेष
भुवनायमनोभुवे ध्याययोमम
नर्थंत व्यापयम्म शरी रजाः।
सम्पद्यता मभीष्टमे संपदः स
तमेस्थिराः नमोमाराय कामाय।

देव देवस्य मूर्त्तये ब्रह्मविष्णु शि
वेन्द्राणांमनः क्षोभकरायच प
वंयः कुरुते पूजामनंगस्य महा
त्मनः भवंतिमापद स्तस्यतुस्मिन्न
हे कदाचन इतितिथितत्वं ॥ म
दनद्वादशी स्त्री चैत्रशुक्लद्वाद
शी अत्रमदनव्रतंकार्य्यं यथा कृ
ष्णकृत्तुः श्रोतुमिच्छामहेस्तत्म
दनद्वादशी व्रतं सन्तानेकोनपंचा
शत येन लेभेदितिः पुनः सूत
उवाच यद्दुशिष्टादिभिः पूर्वदितेः
कथितमुत्तमं विस्तरेणानदेवं
मत्स्यकाष्ठात्रिवोधत चैत्रे।
मासि सिते पक्षे द्वादश्यां ॥
नियतव्रतः स्थापयेदव्रणं कुम्भ
सित तंडुल पूरितं नाना फल।
युतं तद्वदिक्षुदंडसमन्वितं सित
वस्त्र युगाच्छन्नं सितचंदन चर्च्चितं
नानाभक्ष्यफलोपेत सहिरण्यंचश
क्तितः ताम्रपात्रं गुडो पेतं।
तस्योपरि विवेदयेत तस्मात् प
रि कामन्तु कदलीदलसंस्थितं।
कुर्य्याच्छर्करयोपेतां रतिं तस्यच
वामतः गंधधूपं ततोदद्यात्।
गीत वाद्यंचकारयेत् तदभावे।
कथां कुर्य्यात् कामकेशवयोनिः
कामनाम्ना हरे रर्चां स्नापयेत्गुड।

वारिणा शुक्लपुष्पाक्षततिलैरर्च्च।
येन्मधुसूदनं कामायपादौसंपूज्य
जंघे सौभाग्यदायच ऊरुस्मरा
येति पुनर्मन्मथायेतिवैकटिं स्व
च्छोदरायेत्युदरं अनंगायेत्युरो।
हरेः मुखंपद्ममुखायेति वाहू पं
चशरायवै नमः सर्वात्मने मौलि
मर्च्चयेदिति केशवं ततः प्रभाते
तं कुंभं ब्राह्मणाय निवेदयेत्।
ब्राह्मणान्भोजयेद्भक्त्यास्वयंच।
लवणादृते भुक्त्वाथदक्षिणांदद्या
दिमंमंत्र मुदीरयेत् प्रीयतामत्रभ
गवान्कामरूपी जनार्द्दनः हृदये
सर्वभूतानामानंदो यो विधीयते।
अनेन विधिना सर्वं मासिमासि।
समाचरेत् उपवासी त्रयोदश्यां
अर्च्चयेद्विष्णु मव्यं फलमेकंच सं
प्राश्यद्वादश्यां भूतले स्वपेत् त
तस्त्रयोदशे मासि घृतधेनुसम
न्वितं शय्यांदद्यादनंगाय सर्वो।
पस्करसंयुतां कांचनं कामदेवंच
शुक्लां गांच पयस्विनीं वासोभि
र्द्विजदाम्पत्य पूज्य शक्त्याविभूष
णैः शय्यां गवादिकंदद्यात् प्री
यता मितिचोदीरयेत् होमं शुक्लै
स्तिलैः कुर्य्यात् कामनामानिकीर्त्त
यन् गव्येनसर्पिषाचैव पायसेन च

धर्मवित् विप्रेभ्यो भोजनं द
द्याद्वित्तशाठ्य विवर्ज्जितः इक्षु
दंडानथो दद्यात् पुष्पमालाश्चश
क्तितः यः कुर्य्याद्विधिनानेन मद
नद्वादशी मिमां सर्वपाप विनि
र्मुक्तः प्राप्नोति हरि साम्यतां।
इह लोकेवरान् पुत्रान् सौभा
ग्यंच समश्नुते इतिमत्स्य पुरा
णे ७ अध्यायः ॥
मदनपाठकः पुं कोकिलः इति
राजनिर्घंटः ॥
मदनमोहनः पुं श्रीकृष्णः यथा
वंदे मदनगोपालंकैशोराकार म
द्भुतं यमाश्रित्यै वनोद्भिन्ने ॥
श्रीमन्मदनमोहनं इति पाद्मे।
पातालखंडे ९ अध्यायः ॥
मदनशलाका स्त्री कामोद्दीपकौ
षधं सारिकापक्षी इति मेदि
नी कोकिला इतिशब्दरत्नावली
मदनसारिका स्त्री पक्षिभेदः सा
लिक इतिभाषा तत्पर्य्यायः ॥
शलाका १ सारिका २ चित्रलोचना
३ कृष्णपी ४ इति जटा धरः
मदना स्त्री सुरा इतिहेमचंद्र :
मदनांकुशः पुं लिंगं इति त्रिकां
डशेषः नखे इति कामांकुशशब्द
दर्शनात् यथा कामांकुशा ॥

कुसुमित कामि मतंगजेंद्र इति
ऋतुबोधकालिदासः ।
मदनाग्रकः पुं कोद्रवः इतिराज
निर्घंटः ॥
मदनायुधः पुं भगं इतिशब्द
चंद्रिका ॥
मदनायुधः पुं कामरुद्धिलपः इ
तिराजनिर्घंटः ॥
मदनालयः पुं भगं मदनपर्य्याय
कशब्दोत्तरगृहपर्य्यायकशब्देन भ
गस्योक्तत्वात् यथा सुग्धे रा
कीर्त्ति कुसुमधनुषो मंदिर महो
पुरोध्यायन् ध्यायन् यदि जपति
भक्त स्तव मंत्रं इति कर्पूरस्तवः
तन्मतगावधिसभम स्थानं तत्र
जायास्थानं यथा सुर्य्याघुद्यान कि
यदृषमृगस्त्री कुलीरान्मुकेद्रिव।
द्वीदृद्वयतिथिशरान् सप्तविंशाच्च
विंशान् संशानेतान् वदति य
वनस्त्राद्य तंगान् सप्तंगान्तताने
वंशान्मदनभवनेत्याह नीचान्स
नीचान् इतिदीपिकायां मदना
भवशब्ददर्शनात् ।
मदनावस्था स्त्री कामावस्था सा
त उद्वेगरूपा विरह इति यावत्
यथा ततः प्रविशति मदनावस्था
राजा निःश्वस्य जाने तपसो वी

र्य्यं सा बाला परवतीतिमे विदि
तं नच निम्नादिवसलिलं निवर्त्तते।
ततो मे हृदयं इत्यभिज्ञानश ।
कुन्तलायां २ अंकः मदनावस्था।
इति शक्तोऽउद्वेगरूपा पंचमी।
कामावस्था यदाह भरतः उद्वेगः
पंचमःप्रोक्त इति सुचिंतमि।
ति केनोपायेन मम शकुंतला ।
लोभो भविष्यति इतिनदीकामद
नी स्त्री सुरा इतिहारावली।
कस्तूरी अतिमुक्तकः इति राज
निर्घंटः ॥
मदनेच्छाफलः पुं वहुरसालः इ
ति राजनिर्घंटः ॥
मदनोत्सवः पुं उत्सवविशेषः ।
होलाका इति ख्याता तत्पर्य्या
यः वसन्तकः २ इति हारा
वली ॥
मदनोत्सवा स्त्री स्वर्गवेश्या इति
शब्दरत्नावली ॥
मदप्रयोगः पुं करिणांमदोद्गमः
तत्पर्य्यायः व्यस्तारं २ इति ।
त्रिकांडशेषः ॥
मदभंजिनी स्त्री शतमूली इति
शब्द चंद्रिका ॥
मदयंतिका स्त्री मल्लिकाइति।
शब्दरत्नावली ॥

मदयंती स्त्री वनमल्लिका काष्ठम
ल्लिका इतिभाषा इतिरत्नमाला म
ल्लिका इति राजनिर्घंटः ।
मदयित्नुः स्त्री मद्ये इतिमेदिनी
मदयित्नुः पुं कामदेवः शौंडिकः
इति शब्दरत्नावली मदयुक्तः
इति मेदिनी मेघः इति त्रि
कांडशेषः ॥
मदविक्षिप्तः पुं मत्तहस्ती इति
शब्दचंद्रिका ।
मदशाकः पुं उपोदकी इति
राजनिर्घंटः ।
मदसारः पुं तूलवृक्षः इतिरा।
जनिर्घंटः ॥
मदहस्तिनी स्त्री महाकरंजः इ
तिराजनिर्घंटः ॥
मदहेतुः पुं धातकी इतिवैद्य
कं मत्तताकारणंच ॥
मदस्थलं क्ली मदस्थानंयथा अ
वदंशः सुरापानं शुंडापानं मद
स्थलं इति शब्दरत्नावली ॥
मदस्थानं क्ली मद्यपानस्थानं त
त्पर्य्यायः शुंडापानं २ इत्यमरः
मदाढ्यः पुं तालवृक्षः इतिराज
निर्घंटः मदयुक्ते त्रि ॥
मदाघ्या स्त्री लोहितझिंटी इ
ति शब्द चंद्रिका ॥


मदातंकः पुं मदात्ययरोगः इति
राजनिर्घंटः ॥
मदात्ययः पुं मद्यपानादिजन्यरो।
गविशेषः तत्पर्य्यायः मदातं
कः २ पानात्ययः ३ मदव्याधिः ४
मदः ५ इतिराजनिर्घंटः अथम
दात्ययादीनांनिदानान्याह वि
षस्य ये गुणा दृष्टाः सन्निपात प्र
कोपनाः तएव मद्ये दृश्यंते।
विषे त्वबलवत्तराः तस्मादविधि
पीतेन तथा मात्राधिकेनच यु
क्तेनचाहितैरन्नैरकाले सेवितेन।
नच मद्येन खल्वजायंते मदा
त्यय मुख्यागदाः अविधि प्रयु
क्तं मद्यंविकारान् सप्तुत पाद
यतीत्याह निर्भक्त मेकान्तत एव
मद्यं निषेव्यमाणं मनुजेन नित्यं
उत्पादयेत् कष्टतमान् विकारा
नेत् पादयेत्ताधि शरीर भेदं।
एकांततो नैरन्तर्य्येणाधिकमात्म
दात्ययादीन् शरीरस्यभेदं नाशं
मदात्ययादीनां हेतुंतरम ।
प्याह क्रुद्धेन भीतेन पिपासि।
तेनशोकाभितप्तेन बुभुक्षि ॥
तेन व्यायाम भाराध्व परिक्षतेन
वेगावरोधाभिहतेन वापि अत्य
म्ल भुक्तावनतोदरेण साजीर्ण

भुक्तेन तथा ऽबलेन उष्णाभित
प्तेन च सेव्यमानं करोति मद्यं
विविधान् विकारान् नानेव
विकारान् विहन्तीति पानात्ययं।
परमदं पानाजीर्णं मथापि वा।
पानविकारान् विहन्तीति पान
विभ्रम मुग्रं चैतेषां वक्ष्यामि लक्ष
णं तत्र मदात्ययस्य सामान्यं लक्षण
माह शरीरदुःखं बलवत् प्रमोहो
हृदयव्यथा अरुचिः प्रततं तृष्णा
ज्वरः शीतोष्ण लक्षणः शिरःपा
र्श्वास्थि संधीनां वेदनाविततेय
या जायतेति बलात् जृम्भास्फुरणं
वेपनं श्रमः उरो विबंधः कासश्च
श्वासो हिक्का प्रजागरः शरीरकंपः
कर्णाक्षि मुखरोगास्त्रिकग्रहः छ
र्दिर्विट्भेद उत्क्लेशा वातपित्तकफा
त्मकः भ्रमः प्रलापो रूपाणां म स
तां चैव दर्शनं तृणभस्मलतापर्णां
पांशुभिश्चावपूरितं प्रधर्षणं वि
हंगैश्च भ्रांतचेताः समन्यते व्या
कुलानां मशस्तानां स्वप्नानां दर्श
नानि च मदात्ययस्य रूपाणि सर्वाण्य
ताति लक्षयेत् ॥ अथ मदात्य
यस्य वातिकस्य निदानमाह स्त्री
शोक भय भाराध्व कर्मभिर्यो ऽति
कर्षितः रूक्षाल्प प्रमिताशी च यः

पिबत्यमात्रया रूक्षं परिणतं।
मद्यं निशि निद्रां निहंति च क
रोति तस्य तच्छीघ्रं वातप्रायं म
दात्ययं तन्मद्यं अथ तस्य
लक्षणमाह हिक्काश्वासशिरः
कम्प पार्श्वशूल प्रजागरैः विद्या
द्बहुप्रलापस्य वातप्रायं मदात्यय
अथ पैत्तिकस्य निदानमाह ती
क्ष्णोष्णं मद्य मम्लं च योतिमात्रं
निषेवते अम्लोष्ण तीक्ष्ण भोजी च
क्रोधनो ऽग्न्यातपप्रियः तस्या
पजायते तीव्रः पित्तप्रायो मदा
त्ययः अथ तस्य लक्षणं माह।
तृष्णा दाह ज्वर स्वेद मोहातीसार
विभ्रमैः विद्याद्धरितवर्णस्य पित्त
प्रायं मदात्ययं ॥ अथ श्लैष्मि
कस्य मदात्ययस्य निदानमाह म
धुर स्निग्ध गुर्वाशीयः पिबत्यतिमा
त्रया अव्यायाम दिवास्वप्नशय्यास
न सुखे रतः मदात्ययं कफप्रायं
स नरो लभते ध्रुवं अथ तस्य॥
लक्षणमाह छर्दि अरोचक हृल्लास।
तन्द्रा स्तैमित्य गौरवैः विद्याच्छी।
तपरीतस्य कफप्रायं मदात्ययं।
अथ सान्निपातिकस्य मदात्यय।
त्ययस्य निदानं लक्षणं चाह त्रिदो
ष हेतुभिः सर्वैः सर्वैः लिंगैः।

मदात्ययः अथ परमद माह
श्लेष्मोच्छ्रयोंगः गुरुता विरसास्य
ता च विण्मूत्रसक्ति रथ तंद्रिररो
चकश्च लिंगं परस्य तु मदस्य वद
न्ति तज्ज्ञाः तृष्णा रुजा शिरसि संधि
षु चापि भेदः तंद्रिस्तन्द्रा ॥
पानाजीर्णं माह आध्मानमुग्रमा
थवोद्गिरणं विदाहः पाने त्वजी
र्णमुपगच्छति लक्षणानि उद्गिर
णं वांतिः उद्गारो वा पीयत इति पानं
मद्यं पानविभ्रम माह हृद्गा
त्रतोद कफसंस्रव कंठधूम मू
र्च्छावमी ज्वरशिरोरुजनन प्रदेहाः
द्वेषः सुरान्नविकृतेषु च तेषु तं
पानविभ्रम मुशन्त्यखिलेषु धीराः
कंठधूमः कंठाद् ऊष्मनिर्गम स्व प्र
देहः कफेन लिप्तास्यता द्वेषः सु
रान्नविकृतेषु सुराविकारेषु अन्नवि
कारेषु च द्वेषः अखिलेषु मद्यवि
कारेषु अप्रसाध्यानां मदात्य
यादीनां लक्षणमाह हीनोत्तरो
ष्ठमति शीत ममंद दाहं तैल प्र
भास्यमति पान हतं त्यजेच्च जि
ह्वोष्ठ दन्त मसितं त्वथवापि नीलं
पीते च यस्य नयने रुधिरप्रभे च
हिक्का ज्वरो वमथु वेपथु पार्श्वशू
लाः कास भ्रमावपि च पानहतं

त्यजेत्तं ॥ अथ मदात्ययादीनां।
चिकित्सा मदोत्थानां तु रोगा।
णां मद्य मेव हि भेषजं यथा
दहन दग्धानां दहन स्वेदनं हित
मिथ्याविहीन मद्येन यो व्याधिरु
पजायते समेनैव निपीतेन म
द्येन सहि शाम्यति बीजपूरक।
वृक्षाम्ल कोल दाडिम संयुत यवा
नी हपुषा जाजी शृंगवेराव चूर्णितं
सत्वेहैः शाकैर्भिर्युक्तमवदंशैर्शि
रोर्पितं दद्यात् सलवणं मद्यं
पैष्टिकं वान शांतये मद्यं।
सौवर्चल व्योषयुक्तं किंचिज्जला
न्वितं जीर्णमद्याय दातव्यं वात।
पानात्ययापहं चव्यं सौवर्चलं।
हिंगुपूरकं विश्वदीप्यकं चूर्णं।
मद्येन पातव्यं पानात्यय रुजापह
लाव तित्तिरि दक्षाणां रसैश्च
शिखिना मपि पत्रिणां मृग
मत्स्याना मातपूना तथोदकैः
स्निग्धोष्ण लवणाम्लैश्च वेसवारै सं
स्कृतैः स्निग्धैर्गोधूमिकैरन्नैर्वात
मदात्ययं जयेत् नारीणां यौवनो।
ष्णानां निर्दयैः रुपगूहनैः श्रो।
णिस्तन ऊच भारैश्च संरोधोष्म स
ख्यप्रदैः शयनाच्छादनैः उष्णैः
स्वांतर्गृहैः सुखैः उत् पत्रो।




मारुतात् शीघ्रं प्रशाम्यति मदा
त्ययः पित्तपानात्ययेयोज्याः ॥
सर्वतश्च क्रिया हिमाः सितामा
क्षिक संयुक्तं मद्य मद्वोदकं पि
वेत् मद्येखर्जूर मृद्वीकापरूष
क रसे र्युतं सदाडिम रसं शीतं
सक्तुभि श्चावचूर्णितं सशर्करंवा
माध्वीकं संयुक्तमथवापरं दद्या
द्द्द्रकं काले पातुंपित्तमदाम
ये शशान्कपिंजलात्तानान्।
लावानसित पुष्पकान् मधुराम्ला
न्भुंजीत भोजने शालिषष्टिका
न् पटोल यूष मिश्रंवाच्छागलंक
ल्पयेद्रसं सतीलंमुद्गमिश्रं वा
दाडिमामलकान्वितं द्राक्षामल
कखर्जूर परूषक रसेनव कल्पये
त् तर्पणान् यूषान्रसांविविधाम
कान् शीतानि चान्नपानानानिशी
तशय्यासनानिच शीतवातजलं
स्पर्शाः शीतान्युपवनानिच क्षौम
पद्मोत्पलानांच मणीनां मौक्ति
कस्यच चंदनोदक शीतानांस्प
र्शा चंद्रांशु शीतलाः दत्ततर्पणा
संयुक्तं यवानी व्योषसंयुतं यव
गोधूमकंवान्नं दत्तपुष्पंभोजयेत्
कुलत्थानांच शुष्काणां मूलकानां
रसेनवा प्रभूत कटू संयुक्तंयवान्नं

वा प्रदापयेत् छागमांस रसं
दत्त मम्लं वा जांगलं रसंव्यो
ष सूषं मनागम्लं पिवेत् कफ
मदात्यये श्यासामथ कपाले।
वा भृष्टं कृत्वा तु नीरसं कटम्ला।
लवणं मांसं खादेत् कफमदात्य
ये पावद्रव्य युक्तेन मद्येनोल्लेख
नं मतं मदात्यये कफोद्भूते।
लंघनंच यथावलं यदिदं।
कर्म निर्दिष्टं वातपित्त क
फान् प्रति सर्वजे सर्वमेवेदं।
प्रयोक्तव्यं चिकित्सकैः इति
भावप्रकाशः गरुड पुराणे।
क्त मदात्यय निदानादिकं तत्रै
व ९९· अध्यायेद्रष्टव्यं ॥
मदाम्नातः पुं गजढक्काहातीर
ऊपरे रडंका इति भाषा इतिहारा
वली ॥
मदाम्बरः पुं मत्तहस्ती इतित्रिकां
डशेषः ॥
मदारः पुं हस्ती भूर्तःइतिविश्वः
शूकरः कामुकः गंधभेदः।
मत्तहस्ती नृपभेदः इत्युणादि।
कोषः
मदार्मदः पुं फलकमत्स्यः इति
त्रिकांडशेषः ॥
मदालापी पुं कोकिलः इति।

शब्दमाला ।
मदाढ्यः पुं कस्तूरी इतित्रिकां
डशेषः ॥
मदिरः पुं रक्तखदिरः इतिश
ब्दचंद्रिका ।
मदिरा स्त्री मत्तखंजनः इतिश।
ब्दरत्नावली मादकद्रव्यविशेषः
मद् इतिभाषा तत्पर्य्यायः
सुरा १ हलि प्रिया २ हालाथप
रिस्रुत् ४ वरुणात्मजा ५ गंधोत्त
मा ८ प्रसन्ना ९ इरा १० कादम्बरी ११
परिस्रुता १२ कश्यं १३ मद्यं १४
इत्यमरः मानिका १५ इतिश।
ब्दरत्नावली कपिशी १६ गंधमा
दनी १७ माधवी १८ कत्तोयं १९
मदः २० कापिशायनं २१ इति
जटाधरः वारुणी २२ मत्ता २३
सीता २४ चपला २५ कामिनी।
२६ प्रिया २७ मदगंधा २८ माध्वीकं
२९ मधु ३० संधानं ३१ आसवः ३२
अमृता ३३ वीरा ३४ मेधावी ३५
मदनी ३६ सुप्रतिभा ३७ मनोज्ञा
३८ विधाता ३९ मोदिनी ४० हली
४१ गुणारिष्टं ४२ सरकः ४३ मधु
लिका ४४ मदोत्कटा ४५ महाने
दा ४६ इतिराजनिर्घंटः सीधुः
४७ मैरेयं ४८ बलवल्लभा ४९

इति भावप्रकाशः कारणं ५०
तत्वं ५१ इतिकैवल्यतंत्रे म
दिष्टा ५२ परिस्रुता ५३ कल्यं ५४
साद्ररसा ५५ मुंडा ५६ हारहूरं ५७
मार्द्वीकं ५८ मदना ५९ देवसृष्टा ६०
कापिशी ६१ अब्धिजा ६२ इति।
हेमचंद्रः सा द्वादश विधा।
यथा माध्वी पानसं द्राक्षं खा
र्जूरं ताल मैक्षवं मैरेयं मा
क्षिकं टांकं मधूकं नारिकेलजं
मुख्य मन्नविकारोत्थंमद्यानिद्वाद
शैवच इतिजटाधरः अस्याःसा
मान्यगुणाः समधुराम्लत्वं कफ
मारुतनाशनत्वं लघुत्वं पुष्टिकर
त्वं हृद्यत्वं सारकत्वं मदावहत्वंच
पातक्षीरस गुडादि कृता म
दिरा गौडी तद्गुणा यथा तीक्ष्णा
त्वं उष्णत्वं मधुरत्वं वातनाशित्वं।
पित्त वल कारित्वं दीपनत्वं प
थ्यत्वं कान्तितृप्तिकारित्वंच ॥
पुष्पद्रवादिमधुरारमयीमदिरामा
ध्वी तद्गुणा यथा मधुरत्वं नात्युष्णत्वं।
पित्तवातनाशित्वं पांडुकामल।
गुल्मार्शः प्रमेह शामनत्वंच वि
विधधान्यजाता मदिरा पैष्टी त
द्गुणा यथा कटुत्वं अम्लत्वं तीक्ष्ण
त्वं गौडीसमत्वं वातहरत्वं कफ




कटुत्वं उष्णत्वं पित्तकरत्वं मोह
नत्वंच । तालादिरसनिर्यासकृ
तामदिरा सैन्धीहालावत्तुणा
यथा शीतत्वं कषायत्वं अम्लत्वं
पित्तहरत्वं वातदातृत्वंच । स
र्वतृणा हत निर्यासरूपमदिरा।
गुणाः शीतलत्वं गुरुत्वं मोहनत्वं
वलदत्वं हृद्यत्वं तृष्णासंतापना
शकत्वंच नानाद्रव्यकदम्बकृता
मदिरा कादम्बरी तद्गुणा यथा म
धुरत्वं पित्तश्रमहरत्वं मदकारि
त्वंच पैत्तव मदिरा गुणो शि
शिरत्वं मदोत्कटत्वंच यवा
धान्यकृत मदिरागुणो गुरुत्वविष्ट
म्भदायकत्वंच शार्करा धातकी
तोयकृत मदिरा गुणो शीतत्वं
मनोहरत्वंच शार्कर मद्यगुणाः
हृद्यत्वं दीपनत्वं मोहनत्वंच।
इति नाना मद्य गुणाः ऋ
तुविशेषे पेयमदिरा यथा गौ
डी तु शिशिरे पेया पैष्टी हेमंत
वर्षयोः शरद्ग्रीष्म वसंतेषु माध्वी
ग्राह्या नाचान्यथा कादम्बरी श
र्करजादिमद्यं सुशीतलं हृद्यकरं
मदाढ्यं माध्वीसमंस्यात्तृणाद्
तजातं मद्यं सुशीतं गुरुतर्पि।
तोच अन्य कुरुते पानं मद्यं

संताप शोषदं अन्नदोष मदा
त्यादि कारत्वं मूर्छनत्वंच तत्
नवजीर्ण मद्ययो गुणाः मद्यं नवं
सर्व विकार हेतु सर्वंनवानादि
क दोष दायि जीर्णन्तु सर्वं सक
लामयघ्नं चूर्णप्रदं हृद्यकरत्वंच
दीपनं अन्यच्च पर्युषित मत्स्य।
मेतत मम्लं वापिच्छिलं विगंध्य।
स्वादोषावह मविशेषान्मद्यं हृद्यं।
विवर्जयेत् मद्यप्रयोगं कुर्वन्ति स्म
द्रादिषु महात्मसु द्विजास्त्विभिल्ला
नग्राहं यदपद्जीवयन्त्यते इति
मद्य वर्ज्यावर्ज्य अन्य हारा
शाया मद्य भेदानाह मनीषिणः
उत्तरस्यां न भवंतीति नान्येषां हृद्य
गीरितं इति राजनिर्घंटे मद्य
प्रकरणं अथ मतांतरे मद्यस्य।
लक्षणं गुणाश्च येयं यस्मात्के।
लौके तन्मद्यमभिधीयते यथारि
ष्टं सुरा सीधुरासवाद्यमनेकधा।
मद्यं सर्वं भवेदुष्णं पित्तकृत् वात
नाशनं भेदनं शीघ्रपाकं च रूक्षं
कफहरं परं अम्लं चदीपनं रुच्यं।
पाचनं चाशुकारि च तीक्ष्णं सूक्ष्मंच
विशदं व्यवायि च विकाशि च अ
थारिष्टस्य लक्षणं गुणाश्च पक्वौष
धाम्बु सिद्धं यन्मद्यं तत्स्यादरि ॥

ष्टकं अरिष्टं मद्य मिति लोके।
यथा द्राक्षारिष्टं दशमूलारिष्टं
वब्बूलारिष्ट मिति अरिष्टं लघुपा।
केन सर्वं तच्च गुणाधिकं अरिष्ट
स्य गुणा ज्ञेया वीज गुणैः समाः
अथ सुराया लक्षणं गुणाश्च शा
लि षष्टिक पिष्टादि कृतं मद्यं।
सुरास्मृता सुरागुर्वी वलस्तन्यपुष्टि
मेदः कफप्रदा ग्राहिणी शोथगु
ल्मार्शो ग्रहणी मूत्रकृच्छ्रनुत्।
अथ सुराभेदो वारुणी तस्या लक्ष
णं गुणाश्च पुनर्नवा शिलापिष्टैः
विहिता वारुणी स्मृता संहितैस्ता
लखर्जूर रसै र्या साऽपि वारुणी स्मृ
ता वारुणी लघ्वी पीनसाध्मान।
शूलनुत् सुरातो भेदार्थे लघ्वीति।
अथ सीधुद्वयस्य लक्षणं गुणाश्च
इक्षोः पक्वै रसैः सिद्धः सीधुः प
क्वरसश्च सः आमैस्तैरेव यः सी
धुः सच शीतरसः स्मृतः सीधुः प
क्वरसः श्रेष्ठः स्वराग्नि वलवर्णकृ
त् वातपित्तकरो हृद्यः स्नेहनो रो
चनो हरेत् विवंध मेदः शोफा
र्शः शोफोदरकफामयान् तस्मा
दल्पगुणः शीतरसः संलेखनः स्मृ
तः अथासवस्य लक्षणं गुणाश्च य
दपक्वौषधाम्बुभ्यां सिद्धं मद्यं स

आसवः आसवस्य गुणा ज्ञेया वी।
जद्रव्यगुणैः समाः ॥ अथ नव
पुराण मद्यगुणाः मद्यं नव मभि
ष्यंदि त्रिदोष जनकं सरं अहृ।
द्यं वृंहणं दाहि दुर्गंधं विशदं गुरु
जीर्णं तदेव रोचिष्णुकृमि श्लेष्मा।
निलापहं हृद्यं सुगंधि गुणवल्लघु
स्रोतो विशोधनं अथ सा त्वि
कानां मद्यं विवतां चेष्टा विशे।
षाः सात्विके गीत हास्यादि।
राजसे साहसाद्विकं तामसे नि
न्द्यकर्माणि निद्रांच मदिराचरेत।
आचरेत् कुर्यात् विधिनामात्रया
काले हितैरन्नैर्यथा वलं प्रहृ।
ष्टो यः पिवेन्मद्यं तस्यस्यादमृतं।
यथा किंतु मद्यं स्वभावेन यथैवा
न्नं तथा स्मृतं अयुक्ति युक्तं रोगा
य युक्ति युक्तं यथामृतं ॥
अथमद्य गंधनाशनोपायः मुस्तै
लवालगद जीरक धान्यकैला यश्च
र्वयन् सदसि चाद्य मभिद्यनक्ति स्वा
भाविकं मुखजमुग्रकृतिं पूतिगंधं
गंधंच मद्यलशुनादि भवंच पूतं।
इति भावप्रकाशः अपिच मह
त्या मद्यमत्त समत्वं चोक्त विपा
कतः सर्वसामान्यत स्तस्य विशेष
उपदेक्ष्यते कृपाणां सक्त।



मूत्राणांग्रहणपर्शोविकारिणां सुरा प्रशस्ता वातेषु रक्तपित्त क्षयेषुच प्रसन्ना गुल्म वातर्शो विबंधानाह नाशिनी मूत्रप्रवाहिका दीपकफवातार्शोसांहिता जगलोग्राहि रूक्षोष्णः शोथघ्नो भक्त पाचनः शोथार्शो ग्रहणीदोषान् हन्त्यरिष्टःकफामयान् अरिष्टो मद्यविशेषः प्रायसो। ऽभिनवं मद्यं गुरु दोषल। मीरितं स्रोतसांशोधनं जीर्णं दीपनं लघुरोचनं हर्षणं प्रीणनंवल्यं मद्यंशोकभ्रमापहं। प्रागल्भ्य प्रतिभा पुष्टिवीर्यबु। द्धिस्वरप्रदं इति राजवल्लभः ॥
अन्यत्मद्यशब्दे द्रष्टव्यं ॥

मदिरागृहं क्ली मद्यस्यगृहं मद्यसंधानगृहं तत्पर्यायः गंजा२ इत्यमरः गंजा २ यथा भांडागारे त्रिषु गंजं खनौ खंजा सुरागृहे मद्यभांडे स्मृता गंजा गंजा। स्यात् काकलंबिका इतिभरतधृतरुद्रः ॥

मदिरासखः पुं आम्रवृक्षः इति जटाधरः ॥

मदिराक्षी स्त्री मदिरावदक्षिणीयस्याःसा मत्तलोचना यथा अ विदितसखे दुःखंनिर्गुणंवस्तुकिं विजड मतिरिह कश्चिन्मोत इत्यावचक्षे ममतमनमनंग स्मर नारस्य चूर्णान्मदकलमदिराक्षीनीविमोक्षो हि मोक्षः इत्युद्भटः ॥

मदिष्ठा स्त्री मदिरा इतिहेमचंद्रः

मदी स्त्री कृषकवस्तु इतिनानार्थहेमचंद्रः कृषकवस्तु इतिवैश्यवर्गेजटाधरः ॥

मदीयं त्रि ममइदं आमार इति भाषा अस्मच्छब्दादीय प्रत्ययः। कवचनार्थेमदादेशेन निष्पन्नमिदं इति मुग्धबोधव्याकरणं ॥

मदोत्कटः पुं मत्तहस्ती इत्यमरः ॥

मदोत्कटा स्त्री मदिरा इतिराजनिर्घंटः ॥

मदोद्धतः त्रि मत्तः इतिजटाधरः

मदोदग्रा स्त्री नारी इति शब्दमाला ॥

मद्गुः पुं पक्षिविशेषःपानिकौडि इति भाषा इत्यमरः अस्यमांसगुणाः वायुनाशित्वं स्निग्धत्वं भेदकत्वं शुक्रकारित्वं रक्तपित्तनाशित्वं शीतत्वंच इति राजवल्लभः ॥


मद्गुरः पुं मत्स्यविशेषः मागुर इतिभाषा इत्यमरः ॥ अस्य गुणाः मधुरत्वं स्निग्धत्वं संग्राहित्वं शुक्रलत्वं गुरुत्वंच इति राजवल्लभः ॥

मद्गुरकः पुं मद्गुरमत्स्यः इतिशब्द रत्नावली ॥

मद्यं क्ली सुरा इत्यमरः अस्य

मद्गुरसी स्त्री शृंगीमत्स्यः इति शब्दरत्नावली ॥ ।

गुणपर्य्यायौ मदिरा शब्देद्रष्टव्यौ तद्द्वादशविधं यथा पुलस्त्यः पानसं द्राक्ष माधूकं खार्जूरं ताल मैक्षवं माध्वीकं टांक माध्वीकं मैरेयं नारिकेलजं । समानानि विजानीयान्मद्यान्ये॥ कादशैव तु द्वादशंतुसुरा मद्यं सर्वेषा मधमं स्मृतं अनेन एकादशानां सुरात्वं निषेधयति मद्य शब्दो मदहेतु द्रव्यावचनः अस्मादेववचनात्तत्तमाद्य मात्रं सुराशब्दार्थः बृहस्पतिः गौडी माध्वी सुरा पैष्टी पीत्वाविप्रः समाचरेत् तप्तकृच्छ्रं पराकंच चांद्रायण मनुक्रमात्। त्रयाणां सुरात्वेक्रमेण प्रायश्चित्तत्रयंतस्मात् तथा भविष्ये । सुरा च पैष्टी मुख्योक्तातु तस्यास्त्वितरे समे पैष्टीति तंडुल विकार। मात्रोपलक्षणं इतरे गौडी माध्व्यौ अतोऽन्न विकार एव सुराशब्दस्य मुख्यत्वात् त्रिविधासुरेतिगौडी माध्वी गौणी सुरात्वज्ञापना। र्थं तेनएतत् पानेपि महापातकत्व मतिदिशति यथैवैका तथा सर्वा इतिपैष्ट्यां पूर्वं प्रसिद्धि दर्शयति यथापैष्टी सुरातथासर्वा गौडी माध्वी चेति पूर्ववक्तोक्तात् पैष्टी दृष्टान्ततेनात्र दर्शिता तथा तथा द्विजोत्तमै रिति ब्राह्मणे तिस्यर्थः त्रैवर्णिक परत्वेऽन्न म यदान। र्थक्यात् बहुवचनानर्थक्यपरीहारार्थमुत्तम मातिपदिकानर्थक्यमयुक्तं अतोब्राह्मणस्यत्रिविधैवसुरामहा। पातकहेतुः क्षत्रिय वैश्ययोस्तुसुरा वै मलमन्नाना मिति वचनेन। पैष्ट्येव इति स्थितं अतएव एका माध्वी च गौडी च पैष्टीवत्रिविधा सुरा द्विजातिभि र्नपातव्याकदाचिदपि कर्हिचित् इतियमवचने द्विजाति पदं ब्राह्मणपरमेव अतएव द्विविध सुरापाने क्षत्रियादीनां महापातकं तावदस्तदोषाभाव मेवाह वृद्ध याज्ञवल्क्यः ॥



कामादपि हि राजन्यो वैश्यो वा
पि कथंचन मद्यमेव सुरां पीत्वा
न दोषं प्रतिपद्यते तदेवं पै
ष्टी निषेधस्त्रैवर्णिकानां गौडी मा
ध्वी निषेधस्तु ब्राह्मणानामेव ।
तज्जातेः स्त्रीणामपि सुरापाननि
षेधः तथा भविष्ये तस्मात् पे
यं विशेषेण सुरा मद्यं कथंचन ब्रा
ह्मण्यापि न पेया वै सुरा पाप
भयावहा या ब्राह्मणी सुरापी स्या
न्न तां देवाः पतिलोकं नयंति
इति श्रुतिः एतत्स्यार्द्धं शारीरेण
भार्य्या यस्य सुरां पिबेत् पति
तार्द्धं शारीरस्य निष्कृतिर्नोपपद्य
ते नचैवं क्षत्रियवैश्यस्त्रीणाम
निषेधः ब्राह्मणी पदस्य निषिद्धसु
रापानकर्त्तृभार्य्योपलक्षणत्वान्भा
र्य्यायस्य सुरां पिबेदिति सामान्य
श्रवणाच्च पानंच द्रवीभूतस्या ।
भ्यवहारः स च कंठदेशादधो नय
नं न तु वक्त्रमात्रप्रवेशः निष्ठीवना
न्तं कपोलधारणे पानशब्दप्रसे
गात् यथोक्तं जिह्वग्रहि स्वरां क
श्चित् पिबतीत्यभिधीयते यावन्न
क्रियते वक्त्रे गंडूषस्य प्रवेशनं ।
अत्र गंडूषप्रमाणं अविवक्षितं
गंडूषार्द्धपानेऽपि लोके पानशब्द
प्रयोगात् अतएव मुखप्रवेशनं ।
अत्राविवक्षितं किन्तु मुखप्रवेशा
त् कंठादधो नयनं भवति अतस्तदे
वोपलक्षयति अतएव ओष्ठमात्रले
पे न पान निष्पत्तिः अतस्तत्रोष्ठा
मांगस्पर्शे प्रायश्चित्तं अथ सु
रापानप्रायश्चित्तं तत्र मनुः
सुरां पीत्वा द्विजो मोहादग्निवर्णां
सुरां पिबेत् तया सकाये निर्दग्धे
मुच्यते किल्बिषात्ततः गोमूत्रमग्नि
वर्णं वा पिबेदुदकमेव वा पयो
घृतं वामरणात् गोशकृद्रसमेव वा
अग्निवर्णा अग्निसमस्पर्शा पयो
घृतं गोरेव आद्यावेतेन च गोः क्षी
रेनात् माहू शब्दोऽत्र वृद्धिपरः
देवलः सुरापाने ब्राह्मणो त्रपु
ताम्र सीसकानामन्यतममग्निवर्णं
पीत्वा शरीरत्यागात् मुच्यते त्र
प्वादयोऽत्र द्रवीभूताः पीतेति नि
र्देशात् स्वयमशक्तावन्यै रपि मु
खे सेवनीया यथा गोतमः ॥
सुरापस्य ब्राह्मणस्योष्णामासिंचेयुः
सुरामास्ये मृतः शुध्येत अतएव
न सेवकानां वधो विहितत्वात्स्वयं ।
पान इव एतच्च मरणप्रायश्चित्तं ।
कामकृते यथा बृहस्पतिः सुरा ।
पाने कामकृते ज्वलंतीं तां विनिः


क्षिपेत् मुखे सा हि विनिर्दग्धो मृ
तः शुद्धिमवाप्नुयात् कथंचिदिति
सकृदित्यर्थः अंगिराः सुरापानं
सकृत्कृत्वा योऽग्निवर्णां सुरां पि
वेत् स पावयेदथात्मानमिह लो
के परत्र च भविष्ये मति पूर्वं
सुरापाने प्राणांतिकमुदाहृतं ।
पैष्टीपाने तु ऋषिभिर्नैतदासा
कथंचन शंखेनापि महाबाहो प्रा
यश्चित्तमुदाहृतं सुरायाः कामतः
पाने मुख्यायाः प्राणनाशनं पुनः
पुनः पैष्टी विषयत्वाभिधानं शिवि
या सुरा मुख्या इति भ्रमनिरासार्थं
कथंचनसकृदित्यर्थः इतरासां ।
अन्यासां गौडी माध्वी प्रभृतीनां
ज्ञानतः सकृत्पाने मरणांतिकं न
भवति गौडी माध्योस्तु ज्ञानतो
ऽभ्यस्त पाने गौडी माध्व्यादिरि
क्तायास्तु सुराया अत्यंताभ्यासत्वा
न्मरणमुक्तं भविष्ये गौडीमा
ध्वोस्तथाभ्यासे प्राणांतिकमुदाहृ
अभ्यासेन सुरायास्तु तामेवाग्नि
निभां पिबेत् तथेति ज्ञानतः इत्य
र्थः अतएव असकृत् ज्ञानतः पी
त्वा वारुणीं पतति द्विजः मरणां
तस्य निर्दिष्टं प्रायश्चित्तं विधीयते
इति यमवचनमपि एतद्विषयमेव
अत्राभ्यासे मरणविधानात् द्वितीय
वार एव मरणं कार्य्यं गौडीमाध्योः
कामतः सकृत्पाने भविष्ये ॥
असुरा मद्यपाने त्वकृते विप्रस्त्व ।
कामतः चांद्रायणं समभ्यस्येत् ।
शुद्धिकामः स्वशुद्धये यद्यस्मिन्ने
व विषये मानवीयं प्रकल्पयेत् क
णान्वा भक्षयेदब्दं पिण्याकं वा स
कृन्निशि सुरापानापनुत्त्यर्थं वाल
वासा जटी ध्वजी पिण्याकं वलिं
उक्तम सुरापानं आयसेन पात्रेण
इत्याद्ययसः आयसे भाजने तमो
ब्राह्मणो वारुणीं पिबेत् गोवाल
चीरवाससा तत्कर्त्तव्यं आह उश
ना गोवालचीरवासाः स्वायः सुरा
मग्निवर्णां पीत्वा मृतो भवति ।
अज्ञानतः सकृत्पैष्टीपाने ब्राह्मण
स्य द्वादशवार्षिकं यथा ब्रह्महत्या
व्रतानहत्तौ यमः चरेता मनते ।
वोभौ सुराप गुरुतल्पगौ सगो ।
त्राहृषकश्चैव सवर्णास्तेयकृन्नरः
भविष्ये अकामतः सुरां पीत्वा पै
ष्टीं मतकुल नेदन कृच्छ्रातिकृ
च्छ्रौ कृत्वा वै पुनः संस्कारतः शु
चिः कणान्वा भक्षयेदब्दं पिण्याकं
वा सकृन्निशि सुरापानापनुत्त्यर्थं वा
लवासा जटी ध्वजी सुरापान मात्रा

पनेयरोगस्य रोगिणोऽन्यत् ततः
पान विषय मिदं इत्युक्तं भविष्ये
यथा तथास्मिन्नेव विषये वाशिष्ठप
रिकीर्त्तितं यदि रोगे भवेद्रुष्या।
न्नेतस्य कदाचन कृच्छ्रमाचरे
च्छ्रेष्ठ तप्तकृच्छ्र उदाहृतः कृच्छ्रा।
तिकृच्छ्राविप्रत्र कृच्छ्रपदं तथाऽज्ञाप
त्यपरं किन्तु तप्तकृच्छ्रपरं अत्ता
नतो गौडी माध्व्योः सङ्कल्पाने।
उक्तं भविष्यपुराणे सकृत् पीत्वा
तथा गौडी मत्त्यानात् स्वरसन्तम
कृच्छ्रातिकृच्छ्रौ विहितौ हुतप्राशन
मेवच अज्ञानाभ्यासे तत्रैवोक्तं।
गौडीमत्त्यानतः पीत्वा ब्राह्मणो ब्र
ह्मणप्रिया तप्तकृच्छ्रं तु वै कृत्वा पुनः
संस्कारतः शुचिः माध्वीं पीत्वा महा
बाहो अज्ञानात् द्विजसत्तमः शुद्ध्ये
त् तप्तकृच्छ्रेण विकर्माभ्यासनात्त
था रेतो मूत्र पुरीषाणां गौडीमाध्व्यो
श्चप्राशने क्रव्याद पशु विष्ठानां
(संस्कारात्शुद्धिरिष्यते प्राणान्तिके
२ श्चयोरपि यथोक्तं मरणान्तिकं।
४ प्रायश्चित्ते मेव द्वादशवार्षिकादो
५ पादपाद हानिरभक्ष्णो क्षत्रिया
२ वपादहाने स्संभवात् क्षत्रिय वै
श्यानां कामसदर्शनात् विप्रेण सक
लं देयं पादोनं क्षत्रिये मतं

वैश्येऽर्द्ध पादशेषेन्तु शूद्रजातिषु।
प्रास्पते पानमादि मद्यपा॥
नेत्वकामता कृतानेकसमयाभ्य
प्राणान्तिकं युक्तं ब्राह्मणस्य काम
तयासकृत् कृते तु पराशरः अग
म्यागमनेचैव मद्यगोमांस भक्षणे
शुद्ध्येच्चान्द्रायणं कुर्य्यात् नदीं गत्वा
समुद्रगां चान्द्रायणे ततश्चीर्णे कु
र्य्याद्ब्राह्मणभोजनं अनडुत्सहि
तां गां च दद्याद्विप्राय दक्षिणां।
अकामतः सकृत्पाने विष्णुः पीत्वा
प्रमादतो मद्य मतिकृच्छ्रं चरेद्द्विजः
कारयेत्तु नः संस्कारं भक्त्या वि
प्रांश्च भोजयेत्॥ कामतो।
ऽकामतश्चाभ्यासे ब्रताहत्ति माह
यमः गोत्र वहिर्द्विजः कस्यचिद्द्वा
यणमद्यापि वा अभ्यासे तु तथो
भूय स्ततः शुद्धिमवाप्नुयात् अप
र्युषित यानसाद्येकादशविध मद्य
पाने त्रिरात्रे पानसंज्ञात्त माधूकमि
त्याद्यभिप्राय पुलस्त्यः ज्ञात्वेत्ता।
टंक खर्जूर पनसाख्य यो रसः
सद्योजातेन्तु न पीत्वा अज्ञातः।
शुद्ध्येत् द्विजोत्तमः प्रयोजका
दीनां पाद पाद हानिर्द्रष्टव्या॥
वाल वृद्ध स्त्रीणामर्द्धादिकं प्रायश्चि
त्तं इतिप्रायश्चित्तविवेकः॥

अथपुराणे ब्राह्मणस्य मद्यपानादि
निषेधो यथा अद्येयं वाप्यपेयं च
तथैवास्पृश्यमेव च द्विजातीना।
मनालोच्यं नित्यं मद्यमितिस्थितं
तस्मात् सर्वं प्रयत्नेन मद्यं नित्यं
विवर्जयेत् पीत्वा पततिकर्मभ्य
स्त्वसम्भाष्यो द्विजोत्तमः भक्ष्यपि
त्वाप्यभक्ष्याणि पीत्वापेयान्यपि
द्विजः नाधिकारी भवेत्तावद्याव
त्तन्नजहात्यधः तस्मात्परिहरेन्नि
त्यमभक्ष्याणि प्रयत्नतः अपेया
नि च विप्रो वै पीत्वा तयाति रौरवं
इतिश्रीकूर्मपुराणे उपरिभागे १९
अध्यायः मद्यपस्य विष्णो
रुपसर्पणे दोषादि यथा वराह
उवाच मद्यं पीत्वा वरारोहे यस्तु
मामुपसर्पति तत्र दोषं प्रवक्ष्या
मि शृणु सुन्दरि ततः दशवर्ष
सहस्राणि दरिद्रो जायते पुनः
ततो भवेत्स पूतात्मा मद्भक्तश्चा
तसंशयः यस्तु भागवतो भूत्वा
काम रागेण मोहितः दीक्षितो
पिवतेमद्यं प्रायश्चित्तं न विद्यते
अन्यत्र ते प्रवक्ष्यामि तच्छृणुष्व
सुंधरे अग्निवर्णां सुरां पीत्वा तेन
मुच्येत किल्बिषात् एवं वैवापरा
धानि येन मुच्यन्ति किल्बिषात्।

तेन विधानेन प्रायश्चित्तं समाच
रेत् न स लिप्यति पापेन संसा
रंच तगच्छति इतिवराहपुराणे
मद्यपानापराध प्रायश्चित्तं अ
पिच अगम्यागमनं कृत्वा मद्य
गोमांसभक्षणं शुद्ध्येच्चान्द्रायणा
द्विप्रः प्राजापत्येन भूमिपः वै
श्यः सान्तपनाच्छूद्रः पंचाहोभिर्वि
शुद्ध्यति इति गरुडे ९९ अध्यायः
पतङ्गौडी माध्व्योः कामतः।
सकृत्पान विषय मिति प्रायश्चित्त
विवेक दर्शनात् द्विजस्य पूजा
दौ मद्यदान विध्यनुकल्प निषे।
धोयथा मदिरां दृष्टतोदघात् अ
न्यत् पानेन्तु वामतः अवश्यं वि
द्विनं यत्र मद्यं तत्र द्विजः पुनः
नारिकेल जलं कांस्ये ताम्रेच वि
सृजेन्मधु नाद्यपि द्विजो मद्यं
कदाचित् विसृजेदपि कृते पुष्पा
सराद्यं जननाद्वा विशेषतः रा
जपुत्रस्तथा मर्त्यः सविवः सो
मिकादयः दद्युर्नरवलिं स्वपसम्प
त्यादिभवाय च भूपालात्तमते मद्यं
ददत्यापमवाप्नुयात् इतिकालि
का पुराणे ८९ अध्यायः॥
अथ ब्राह्मणस्य मद्यपानविषये क
कशापो यथा वैशम्पायन उवाच॥



सुरापानाद्वंचनां प्राप्य विद्वान् सं
ज्ञानाशं प्राप्य चैवाति घोरं।
दृष्ट्वा कचंचापि तथाभिरूपं पीतं
तथा सुरया मोहितेन समन्यु।
रुत्थाय महानुभावस्तदोशना वि
प्रहितं चिकीर्षुः काव्यः स्वयंवा।
क्यमिदं जगाद सुरापानं प्रतिवैजा
तशंकः यो ब्राह्मणोऽद्यप्रभृती
हकश्चित् मोहात्सुरां पास्यति।
मंदबुद्धिः अपेत धर्मो ब्रह्महाचै
व सस्यादस्मिंल्लोकेगर्हितः स्यात्।
परे च मया चेमां विप्रधर्म्मोक्ति।
सीमां मर्य्यादां वै स्थापितां सर्व्व।
लोके संतोविप्राः शुश्रुवांसो गु
रूणां देवा लोकाश्चोप शृण्वंतु स
र्वे इति महाभारते आदिपर्व्वणि।
७६ अध्यायः॥ अथ तंत्रे म
द्यपान निषेधो यथा नारिकेलंच
खार्ज्जूरं पनसंच तथैवच पैत्तं
मधुकं शांकं तालंचैव तु माक्षिकं
द्राक्षंच दशमं ज्ञेयं गौडं वै
कादशंस्मृतं पैष्टंद्वादशं प्रोक्तं
सर्व्वेषां प्रथमं स्मृतं मध्यम
मधुजं गौडं शेषंचोत्तम मिष्यते
एतत् द्वादशकं मद्यंन पातव्यं।
द्विजैः क्वचित् क्षत्रियादिः पिबेत्
सर्वं पैष्टमेकांत वर्ज्जयेत् सुरां

पीत्वा द्विजोमोहात्कामात् तत्का
दि मिश्रितां त्रैवार्षिकं व्रतं ऊ
र्द्ध्वादीपन्मिश्रे त्वं वार्षिकं तत्कादि
मिश्रितां किंचित् सुरां पीत्वा स्व
कामतः कृच्छ्राब्द पादमुच्चर्य्यपुनः
संस्कार मर्हति मुख प्रवेशमात्रेतु
प्रायश्चित्ताद्र्दमाचरेत् अमुपनी
तो देवेशिव्रतं त्रैवार्षिकं चरेत्
वत्सर्थकालाहारी स्याद्ब्रह्मचर्यम
थापिवा आपंचवर्षदूर्द्ध्वात्तात्ता।
दर्द्धं विनिर्द्दिशेत् शूद्रस्यच विशे
षेण अतिकृच्छ्राद्र्दयं चरेत् सजाति
साधिते तस्मिंस्तदर्द्धं व्रतमाचरेत्।
पैष्टीपाने ब्राह्मणस्य मरणांतिक
मुच्यते माध्वी गौडी सुरापाने।
द्वादशाब्दं विधीयते इतरेषांतु
पानेन शुद्धिश्चांद्रायणेनतु रा
जन्य वैश्ययोश्चापि गौडीमाध्वी
नशास्यते मोहात् तत्रस्थवैश्यश्च
पीत्वा कृच्छ्रद्वयं चरेत् शूद्रोपि।
गौडी पैष्टीच न पिवेद्धीनसंस्क
तां कामात् पीत्वा सुरां विप्रोम।
रणांतिकमाचरेत् चरेच्चांद्रायणं
ज्ञानात् क्षत्रियो वैश्य एवच पै
ष्टीपाने तु शूद्रस्य प्राजापत्यं वि
निर्द्दिशेत् ज्ञानादभ्यासयोगेतु चां
द्रायणत्रयंस्मृतं नारिकेलं तथा

ज्ञानाद्विप्रश्चांद्रायणेनतु क्षत्रिय
श्चैव वैश्यश्च प्राणायामेन शुध्य
ति अपक्कं पनसंचैव आम्रंच व
दरं तथा स्यात्पयित्वा चटे नित्यं
दधाद्दाम पयः पलं त्रैलोक्यवि
जयांचैव मातुलंगं तथैवच स
मेहति ततो दद्यात् संधानात् स
तमीरितं दधिमधुघृतंचापि मां
जिष्ठं तिक्तकं तथा अतुपानेतु
देवेशि द्राक्षं मद्यं सुनिश्चितं।
विडंगं शालवोमूलं ॥
मधुना सहसंस्थाप्य शेषपाकं स
माचरेत् पिप्पलीलवणैस्तामधु
नामद्यमीरितं पानसंपक्कखर्ज्जूरं।
आर्द्रं सोमलतारसं एकीकृत्वा
ग्निसंधानात् खार्ज्जूरं मद्य मीरि
तं पक्कतालरसंतिक्तशाकं कटुभंव
तथैवच एते रेवससंधानात्।
तालमद्यं प्रकीर्त्तितं इक्षुदंडं।
मरीचंच वदरंच तथादधि शेष
तलवणं दत्वा इक्षुमद्यं प्रकीर्त्तितं
नवं मधु तथा बिल्वपक्कं शर्कर
यासह संधानाज्जायते मद्यंमाध्वी
कं शरतो रसं शतावरीटंकमूलं
तलमणं पद्ममेवच मधुनासहसं
धानात् टंकमाध्वीक मीरितं मा
तरमूलं बदरीशर्कराच तथैवच।

एषा मेकत्र संधानात् मैरेयं मद्य
मीरितं इंद्रजिह्वा पक्कधात्री ना
रिकेल जलेनथा कदलीफलं।
संधानान्मद्यं तन्नारिकेलजं दधि
त्रैलोक्यविजया तथैवक्करीक
णागुडेन सह संधानात् गौडीम
द्यंप्रकीर्त्तितं शष्कुली महासिद्धान्न
मुमोदकसमन्वितं वक्कोसंताप
येत् किंचित्स्थापयित्वा दिनद्वयं
शोषहंति तु संग्रामे जीवनं तत्र
निःक्षिपेत् शृंगवेरं मरीचंच मा
तुलंगं तथैवच एतेषामेव सं
धानात् पैष्टी मद्यं प्रकीर्त्तितं।
इति श्रीमत्स्यसूक्ते महातंत्रेचतु
र्विंशति साहस्रे ३९ पटलः॥
अपिच सिद्धमंत्री भवेद्धीरो न
वीरो मद्यपानतः कलौ तु भार
ते वर्षे लोका भारत वासिनः
गृहे गृहे सुरां पीत्वा वर्णभ्रष्टा।
भवन्ति हि इति उत्पत्तितंत्रे ६४
पटलः दिव्य वीर मयोभावः
कलौ नास्ति कदाचन केव
लं पशुभावेन मंत्रसिद्धिर्भवेन्नृ
णां इति महानिर्वाणतंत्रं॥
श्रीकूर्मे न दद्याद्ब्राह्मणो मद्यं म
हादेव्यै कथंचन वामकामो ब्राह्म
णो हि मद्यं मांसं न भक्षयेत् ॥

भैरवतंत्रे नारिकेलोदकं कां
स्ये ताम्रे गव्यं तथा मधुराजन्य
वैश्ययो र्देयं न द्विजस्यकदाचि
न एवं प्रदानमात्रेणाहीनायुर्ब्राह्म
णोभवेत् इति आगमतत्वविला
सः स्मृतो कलौमद्यपानादि नि
षेधो यथा याज्ञवल्क्यदीयकलि
कार्यांब्रह्मपुराणे नराश्वमेधेमद्य
वकलौ वर्ज्या द्विजातिभिः निषे
धविषयंस्पष्टयति उशना मद्यम
देयं मपेयं मनिर्ग्राह्यं अनिग्राह्य
मस्वीकार्य्य मिति कस्तन्तः का
लिकापुराणेपि स्वगात्ररुधिरंदत्वा
आत्महत्या मवाप्नुयात् मद्यं म
त्वा ब्राह्मणस्तु ब्राह्मण्यादेवहीयते
स्मृतिः ताम्रेचेत्क्षरसोमद्यं पय
सा यवचूर्णकं गव्यंचताम्रपात्र
स्थं मद्यत्वस्म घृतं विना अतोमद्य
प्रतिनिधि दानमपि न युक्तं इति
तिथ्यादितत्वं ॥ मद्यत्वस्यय
था नारिकेलोदकं कांस्ये ता
म्रपात्रे स्थितं मधु गव्यंच ताम्र
पात्रस्थं मद्यत्वस्मं घृतं विना
इतिकर्मलोचनः ॥
अथ मद्यपानं तद्दोषं कौला
नांमद्यपान विधि लिख्यते कुलाचा
रतो वीरः कुलसंगीसदा भवेत्

सन्विदा सेवनं कुर्य्यात् सोमपानं
महेश्वरि सर्वथा कुरुते देवि
वीर [illegible] हृतमानसः दिव्यस्तु दे
वता प्राय श्चन्दनागरु लेपनैः
रक्तचंदन गंधैश्च सदिग्धो नात्र
संशयः भस्मांग धूसरो वीर उन्म
त्त वद्विचेष्टितः सुरापान रतो
नित्यं वलि पूजा परायणः नर
श्छागश्च महिषो मेषः शूकरएव
च शशकः शल्लकी गोधावेङ्गी।
कूर्मोदशास्मृताः वानरश्चवेलश्चैव।
गजाश्वादि विहंगमाः इत्यादेस्तव
लेहीनैः पूजयेत्वेष्ट देवता नि
त्यं नैमित्तिकं काम्यं प्रकुर्य्याद्व
दिने दिने कुलवारे कुलर्क्षे च
तिथौ च कुलकेतथा भैरव्याः क
ल्पितं चक्रं संस्थाप्यपूर्ववत् प्रिये
सुराणां शोधनं कुर्य्याद्यथा वत्
परमेश्वरि महत्ते भैरवीचक्रे स
र्वे वर्णा द्विजोत्तमाः निवृत्ते भैर
वीचक्रे सर्वे वर्णाः पृथक्पृथक्
विजयांचानुकल्पंच द्विजोदद्यायु
गेयुगे इतिउत्पत्ति तंत्रे६२ प
टलः द्रव्याभावे चानुकल्पैः पूज
येत्सुरदेवतां सुराभावे च गौडीं
द्विजो दद्यायुगे युगे इतिनि
रुत्तरतंत्रे ५ पटलः ॥ म

संस्कृतां सुरां पीत्वाब्राह्मणो ब्र
ह्महाभवेत् संस्कृतांतुसुरांपीत्वा
ब्राह्मणो ज्वलदग्निवत् सौत्राम
ण्यां कुलाचारे ब्राह्मणः प्रपिबे
त्सुरां अन्यत्रकामतः पीत्वाब्राह्म
ण्यादेव हीयते इति उत्पत्ति
तंत्रे ब्राह्मणस्य महामोक्षे मद्य
पाने प्रियम्वदे ब्राह्मणः पर
मेशानि यदि पानादिकं चरेत्।
तत्क्षणात् शिवरूपोऽसौ सत्यं
सत्यं हि शैलजे तोये तोयं य
थालीनं तेजसं तेजसे यथा
घटे भग्ने यथा काशं वायो वा
युर्यथा प्रिये तथैव मद्य पाने न
ब्राह्मणो ब्रह्मणि प्रिये लीयते
नात्र संदेहः परमात्मनि शैलजे
सायुज्यादि महामोक्षं विमुक्तेत्त
त्रियादिषु मद्यपानं विना देवि
तत्वज्ञानं नलभ्यते अतएव हि
विप्रस्तु मद्य पानं समा चरेत्।
देवमाता जपेनैव ब्राह्मणो नहि
शैलजे ब्रह्मज्ञानं यदादेवि नरो
ब्राह्मणउच्यते देवानाममृतंब्रह्म
तदेव लौकिकी सुरा सुरत्वं भो
गमात्रेण सुरा तेन प्रकीर्त्तिता मं
त्रत्रयं सदापाप्यंब्रह्मणापादि मो
चनं प्रकुर्य्यात्तदा हि येनैव नरो ब्र


ह्ममयी सुरा हविरारोपमात्रेणाव
क्रि र्दीप्तो यथा भवेत् शापमो
चन मात्रेण सुरा मुक्तिप्रदायिनी
अतएवहि देवेशि ब्राह्मणः पान
माचरेत् मद्यात्ब्राह्मणः सर्वदेत्तः सो
ऽग्निहोत्री सदीक्षितः वङ्कर्कि।
कथ्येन देवि सएवनिर्गुणात्म।
कः मुक्तिमार्गमिदं देवि गोमय्यंप
श्वसंकटे प्रकाशात् सिद्धि हानिः
स्यान्निन्दनीयो नवान्यथा इति मा
तृकाभेदतंत्रे २ पटलः ॥ कु
लस्त्री सेवनं कुर्य्यात् सर्वथापरमे
श्वरि रमते युवतीं रम्यां कामो
न्मत्त विलासिनीं नटीकापालि
कावेश्यां हडिपानां वरांगनां।
शूद्राणीं म्लेच्छरमणीं जवनीपरमे
रि मातृयोनि विचारोऽस्ति मातृ
योनिं विनाप्रिये कुलाचारपरो
वीरः कुलपूजापरायणः भगलिं
ग समायोगादाकृष्य जप माचरेत्
निष्फलंतु भवेद्विद्ध कोटिसङ्ख्य ग
हेणकिं वल चिन्तं भवेद्यायि।
निष्फलं निष्फलं यथा शवानांसा
धनं देवि लतासाधनमुत्तमं वि
लायाः साधनं देवि सिद्धिरस्तिकलौ
युगे इत्युक्त यन्त्रितन्त्रं ॥ कालि।
नारिणी दीक्षां गृहीत्वा मद्य।

सेवनं न करोति नरो यस्तु स
कलौ पतितो भवेत् वैदिके
तांत्रिके चैव जप होम हविष्कृत
आह्मणः स एवोक्तः मद्यवहस्ति
मूर्खकः शुनी मूत्र समंतस्तनपे
णंयत् चिन्त्यपि काली तारा मंत्र
प्राप्य वीराचारं करोति प्रभुत्वं।
तच्छरीरेण मा भुयात् सनवामथा
इति कामाख्यातंत्रे ५ पटलः ॥
मद्यशोधन प्रकारो यथा शिव
उवाच शृणु पार्वति वक्ष्यामि तेषां
वैशोधनक्रियां प्रमासेनेन सं
क्षिप्य करपुटं समाचरेत् वामे।
गुरुं नमस्कृत्य दक्षिणे गणपतिं
स्मरेत् मध्ये देवीं नमस्कृत्य प्राणा
याम त्रयं चरेत् शरीरे मातृकां।
न्यस्य ऋष्यादिन्यास माचरेत् स
कल्योक्त विधानेन षडंगन्यासमाच
रेत् पश्चाद्भूमौ त्रिकोणं वा च
तुष्कोणं वा महेश्वरि विलिख्य मंड
लं शुभं तस्योपरि घटं न्यस्य
वद्धया प्रोक्षणं कृत्वा फट्कारेण पु
नः पुनः ततस्त्रिन् कारणं तन्मूले
नैव च स्थापयेत् मातृकार्णैन दे
वेशि विपरीतेनचैव हि पुनः फट्
कार मंत्रेण प्रोक्षणं कारयेत् सुधीः
ततो वियत् शक्तिबीजं चत

ईशा समन्वितं नाद बिंदु युतं
कृत्वा तस्योपरि शतं जपेत् ॥
ततो मूलं जपेन्मंत्रं मायाबीजं।
ततः परं धेनु योनिं गालिनीं च।
त्रिखंडं मीन संज्ञकं दर्शयित्वा
वरारोहे घटं स्पृष्ट्वा पठेन्मंत्रं ॐ।
एकमेव परं ब्रह्मस्थूल सूक्ष्ममयं ध्रु
वं कचोद्भवां ब्रह्महत्यां तेन ते
नाशयाम्यहं ॥ ॐ सूर्य मंडल
संभूते वरुणालय संभवे अमावी
जमये देवि शुक्रशापाद्विमुच्यतां
ॐ देवानां प्रणवो बीजं ब्रह्मानंद
मयं यदि तेन सत्येन ते देवि
ब्रह्महत्यां व्यपोहतु ततः षडंग
युक्तं च वकारं बिंदु संयुतं एवं
सकारकंवापि वर्णोद्धार समन्वितं।
जप्त्वा मंत्री ततो ध्यायेत् स्वमंत्रं।
कुलसुंदरि आनंदभैरवं ध्याये।
यथा तंत्रानुसारतः रक्तवर्णं च
तुर्बाहुं त्रिनेत्रं वरदंशिवं जटा।
जूट धरं देवं वासुकीकंठभूषितं
डमरुंच कपालंच शूलं पाश।
खड्गं धारिणं तं यजेद्देवं व्याघ्र।
चर्माम्बरं शिवं एवं ध्यात्वा महेशा
नि तस्य मध्ये प्रपूजयेत् माया
बीजं ततो हूं फट् मंत्रेणानेन सं
स्थापयेत् तत स्तस्मिन्महेशानि ॥

आनंदभैरवी स्मरेत् आनंद भै
रवीं देवीं वराभय लसत्करां ॥
घोररूपां वरारोहां त्रिनेत्रां रक्त
वाससं रक्तवर्णां महारौद्रीं स
हस्रभैरवान्वितां ब्रह्म विष्णु म
हेशाद्यैः स्तूयमानां शिवां भजे
इति ध्यात्वा महेशानि तेनैवमंत्र
नायजेत् तया रैक्यं विभाव्यै
व गायत्रीं दशधा जपेत् भैरवं
डे. त्रकंवाक्ता विद्महे तदनंतरं
स्वधा देव्यै ततः पश्चाद्धीमहीति
ततो वदेत् ततो देवी ततः
पश्चात्तदने च प्रचोदयात् इति
ते कथिता देवी गायत्री परमाद्भु
ती तस्याः स्मरण मात्रेणाद्ब्याक्षु
द्धिश्च जायते तस्य प्रसादादीशो
ऽहं सत्यंसत्यं न संशयः तस्य
मध्ये मूल मंत्रं विल्वदंडे लिखे
त्सहत् रक्तवस्त्रेण सपूजस्तथा
वस्त्रेणाप्यायेत् ॥ धर्मार्थका
म मोक्षाणां विषयानां च पार्वति
सर्वेषां कारणं यस्मात्कारणं प
रिकीर्त्तितं अस्माकं च महेशानि
शरीरकारणं हि तत् सूक्ष्मजयो
ऽहं वीरेशि वीरकार्य्ये प्रसादतः
निर्विकारेण देवेशि निर्विकल्पन
चेतसा सेव्यमानं कुलं भेद भक्ति

मुक्तिप्रदायकं निर्विकल्पो महे
शानि मुक्तिभागी न संशयः स
विकल्पो वरारोहे रौरवं याति
निश्चितं इति केवल्यतंत्रे २।
पटलः एतानि श्रुति स्मृति।
विरुद्धत्वान्मोहनार्थानि शिष्टैः क
दाचिदपि नाचरणीयानि।
मद्यद्रुमः पुं माडद्रुमः इति राज
निर्घण्टः ॥
मद्यपंकः पुं सुराकल्कः मेया इ
ति भाषा तत्पर्यायः मेदकः २
जगलः ३ इति हेमचंद्रः ॥
मद्यपाशनं क्ली पानरुचकमत्स्या
तत्पर्यायः उपदंशः २ अवदं।
शः ३ चक्षणं ४ इति हेम चंद्रः
मद्यपुष्पा स्त्री धातकी इति राज
निर्घण्टः।
मद्यमंडः पुं मद्यफेनः तत् प
र्य्यायः कारोत्तमः २ इति हेम
चंद्रः कपोत्तरः ३ सुरामंडः ४।
इत्यमरः ॥
मद्यवासिनी स्त्री धातकीवृक्षः इ
ति रत्नमाला राजनिर्घण्टौ ॥
मद्यबीजं क्ली नानाद्रव्यकृतसुरा
बीजं बाखर इति भाषा तत्प
र्य्यायः किण्वं २ नग्नहूः ३ नग्न
हूः ४ इति हेमचंद्रः ॥



मद्यसंधानं स्त्री सुरासज्जीकरणं
वंशांकुरफलादीनां बहुकालं संधा
ययत् क्रियते तत्. तत्पर्य्यायः
आसुतिः २ आसवः ३ अभिषवः ४
इतिहेमचंद्रः ।
मद्यामोदः पुं वकुलवृक्षः इति
राजनिर्घंटः ॥
मद्रः पुं देशविशेषः मद्रः इ
त्यमरादिकोषः तद्देशः विवरणं
यथा वैराट पांड्ययो र्मध्ये पूर्व
दक्षक्रमेण तु मद्रदेशः समाख्या
तो माद्रीका तत्र तिष्ठति इति
शक्तिसंगमतंत्रे ७ पटलः ।
मद्रकः त्रि मद्रदेशभवः इतिसि
द्धांतकौमुदी ॥
मद्रकारः त्रि मद्रंकरः यथाहे।
मप्रिय मद्रान् कुर्वंति सुग्यवो
यद्व्याकरणं ।
मद्रंकरः त्रिमंगलकारकः यथा
क्षेमंकरोऽरिष्टतातिः स्यान्मद्रंका
रशंकरौ इतित्रिकांडशेषः ।
मद्रसुता स्त्री मद्रराजकन्यासापां
डुराजस्यद्वितीयाभार्य्यानकुलसह
देवजननीच इतिशब्दरत्नावली ।
मद्रगीणः / मद्रगीयः { त्रिमद्रगसंबंधी इति सिद्धांतकौमुदी ।
मद्रर्पः ॥

मद्रा पुं शिवः इतिसिद्धांतकौ
मुद्यामुणादिवृत्तिः ।
मधु स्त्री मद्यं क्षीरं जलं इति
विश्वः हेमचंद्रः रसभेदः ।
मधुररस इतियावत् इति शब्द
रत्नावली पुष्परसः फूलेर मौ
इति भाषा तत्पर्य्यायः मकरा
न्दः २ इतिमरः मरन्दः ३ मर
न्दकः ४ इतिशब्दरत्नावली त्त
द्राभिर्मक्षिकाभिः कृतं मौ इति
भाषा तत्पर्य्यायः क्षौद्रं २ मा
क्षिकं ३ इत्यमरः मौक्तीकं ४
कुसुमासवं ५ पुष्पासवं ६ पवित्रं
७ पित्र्यं ८ पुष्परसाह्वय ९ इति
राजनिर्घंटः माध्वीकं १० सारघं
११ मक्षिकावांतं १२ वरटीवांतं १३
भृंगवांतं १४ पुष्परसोद्भवं १५
इतिभावप्रकाशः अस्य सामा
न्यगुणाः शीतत्वं मृदुत्वं स्वा
दुत्वं त्रिदोषव्रणनाशित्वं कषा
यानुरसत्वं रूक्षत्वं वल्यत्वं श्वा
सकास नाशित्वंच तद्भेदाः
यथा पौत्तिकं १ भ्रामरं २
क्षौद्रं ३ माक्षिकं ४ छात्रं ५ अ
र्घ्यं ६ औद्दालकं ७ दालं ८ ए
तेषां लक्षणानियथा पिंगलाम
क्षिकास्तेया महत्यस्तु वसाहिताः

महती पुत्तिका नाम्नी स्तत्स्यात्त्
दुत्तिकमुच्यते मध्यमा मक्षिकानी
लातिकेत्यभिधीयते पुत्तिका भ्र
मर स्तद्रा मक्षिका संभवंमधु यौ
त्तिकामुच्यतेक्षात्रं वरटीक्षत्रसंभ
वं तपोवने जरत्कारो ऋक्षा।
मधुनरद्भवं औद्दालकंतुवल्मीक
कारि कीट विनिर्मितं दाल मि
त्यभिनिर्दिष्टं वृक्षकोटरकीट।
जं एतेषां वर्णा यथा माक्षि
कं तैलवर्णं स्यात् घृतवर्णंतुपौ
त्तिकं क्षौद्रं कपिलवर्णंस्याच्छ्वे
तं भ्रामर मुच्यते एतेषां ।
गुणायथा पौत्तिकं तत्तु वी
र्य्योष्णंकषायानुरसान्वयात् वाता
सृक्पित्त कृद्भेदि विदाहि मदकृ
न्मधु पैत्तिकस्यात्त्वाडुभूयस्त्वाद्भ्रा
मरंगुरु कीर्त्तितं क्षौद्रं विशेषतो।
ज्ञेयं शीतलं लघु लेखनं त
स्मात्तु चतुरं रूक्षं माक्षिकंश्वरं।
स्मृतं श्वासादिषुच रोगेषुप्रशस्यत
द्विशेषतः छात्रं श्वित्रक्रिमिहरं
रक्त पित्त हरं गुरु अर्घ्यंवल्लष्य
मायुष्यं कफ पित्तामवातजित्।
औद्दालकं कषायोस्तं कटुरूक्षवि
षापहं दालं कफहरं रूक्षं दीप
नं छर्दि मेहहृत् उस मुस्तांत्।


मुलेभ्य ह्न्यान्मधु विषान्वयात्।
मधूष्णेन विरुध्यंते वर्जंपित्ताधिक्ये स
त्तिने उष्णैः रोगैः करणैः उष्णंमधु
उष्णार्त्ते रोगपीडितं जनं विषान्व
यात् विषत्वस्यत्वात् हन्यात् ॥
नव पुराण मधु गुणाः वृंहणीयंम
धुनवं वात श्लेष्महरं परं पुराणं।
लघुसंग्राहि निर्दोषंस्थौल्यनाश
नं दोष त्रय हरं पक्वमाममम्लं
त्रिदोष कृत् अत्रः केचिन्मधुनो
ऽग्नि संयोगाभावात् कालपक्वमा
माऽऽः मधुजातशर्करागुणाः ।
मधुजा शर्करारूक्षा छर्दिघाति
सारजित् इति राजवल्लभे मधुवर्गः
अपिच माक्षिकं भ्रामरंक्षौद्रं।
पौत्तिकं छात्रकं तथा ।
आर्घ्यमौद्दालकंदाल मित्यष्टौ
मधुजातयः नाना पुष्प रसा।
हाराः कपिला वनमक्षिकाः याः
स्थूलास्ताभि रुत्पन्नं मधुमाक्षि
कमुच्यते येक्षिप्यांजनभाला ।
भाः पुष्पासव परायणाः भ्रमरै।
र्जनितं तैस्तु भ्रामरं मधुमन्यते
ते पिंगला मक्षिकाः सूक्ष्माः
क्षुद्रा इति हि विश्रुताः ताभिकृ
तमिदं यत्र तत्क्षौद्रं मधुका
ष्यते ॥ महत्यो मक्षिकाः ।

पिंगाः पुत्तिका इति कीर्त्तिताः
तज्जातं मधु धीमद्भिः पौत्तिकं स
मुदाहृतं छत्राकारान् पटलं।
सरघा पीत पिंगलाः ये कुर्वन्ति
तदुत्पन्नं मधु छात्रक मीरितं।
मक्षिकास्तीक्ष्णतुंडा याः पीताः
षट्पद सन्निभाः तदुद्भूतं यदर्घ्या
र्हं तदार्घ्यं मधु मन्यते उद्दा
लाः कपिलाः कीटा भूमे रुद्
लनाः स्मृताः वल्मीकान्तस्तदुत्प
न्नमौद्दालकमुदीर्य्यते ईषन्नी
ल दलाकाराः सूक्ष्माश्चिन्वन्ति।
मक्षिकाः यद्दलं कोटरान्तस्तन्मधु
दालमिदं क्रमात् इत्येतत्स्यादष्टधा।
भेदे उत्पत्तिः कथिता क्रमात्
अष्टधस्याप्यहं तेषां वर्ण वीर्य्या
दिकं क्रमात् तद्यथा माक्षिकं
तैलवर्णं स्यात् घृतं भ्रामरमुच्य
ते क्षौद्रं तु कपिलाभासं पौ
त्तिकं घृत सन्निभं आपीत वर्णं
छात्रं स्यात् पिंगलं चार्घ्यनामकं
औद्दालं स्वर्णसादृश्यमापीतं दाल
मुच्यते माक्षिकं मधुरं रूक्षं
लघु श्वासादि दोषनुत् भ्रामरं पि
च्छिलं रूक्षः मधुरं गुरु जाड्यकृत्
क्षौद्रं तु पीनं च लघु पिच्छिलं पि
त्त वातहृत् पौत्तिकं मधु रूक्षोष्णं

कृम्यस्र पित्त दाहहृत् विशेषा
त् कृमिघ्नं च विषाच्छात्रं गुरो
ष्णं आर्घ्यं मधुति चक्षुष्यं कफपि
त्तादिदोषहृत् औद्दालकं तु कुष्ठा।
दि दोषघ्नं सर्वसिद्धिदं दालं कटु क
षायाम्लं मधुरं पित्तदायि च नवं
मधु भवेत् स्थौल्यं नातिश्लेष्महरं
परं देह स्थौल्यापहं ग्राहि पुराणं
मधु लेखनं पक्वं दोषत्रयघ्नं।
मधु विविधरुजानां जिह्वा
मयादिध्वंसं यत्न वृष्यं बलमति
प्रतिरं वीर्य्य वृद्धिं विधत्ते।
आमं वेदाम गुल्मामय पवन कृ
ज्ञापित्त दाहास्त्र दोषनाशं मूत्रं वि
शोषं जनयति नयति ध्वंसमध्य
डुहहः व्रण शोधन संधाने व्रण
संरोपणादिषु साधारण्यान्मधुहि
तं तत्कृता मधु शर्कराः उत्स।
महोत्सवकाले वा स्वयमस्तमथापि
वा आमं मधु मनुष्याणां विषव
न्नाशकं कीटकादि युत
मस्त्र दूषितं यच्चापर्य्युषितं मधु
स्वतः कण्ठकोटर गतं च मेचकं त
द्रोगहृज्जनितं च दोषकृत् हेडं।
निहन्ति यद्युष्णात्तमपास्मरेशं स्ता
हृद्विषं मधुरसायन योग योग्यं।
हिक्का गदांकुर विशोषकफश्वा
दि


दोषापहं भवति दोषद मन्यथा
वेत् माध्वीसिता मधूत्पन्ना।
मधुजा मधुशर्करा माक्षीकशर्क
राचैषा क्षौद्रजा क्षौद्रशर्करा यद्
र्णयन्मधु प्रोक्तं तद्गुणास्तस्य शर्क
राः विशेषाद्धल हृष्या च तर्पणं त्व
णदेहिनां इति राजनिर्घण्टः ॥
मतान्तरे मधुगुणाः मधुशीतं ल
घुस्वादुरूक्षं ग्राहि विलेखनं च
दीपनं स्वर्य्यं व्रण शोधनरोपणं।
सौकुमार्य्यकरं सूक्ष्मं परं स्रोतो
विशोधनं कषायानुरसं ह्लादि प्र
साद जनकं परं वर्ण्यं मेधाकरं
वृष्यं विषदं रोचनं हरेत् कुष्ठार्शः
कास पित्तास्त्र कफमेहक्लमक्रिमी
न् मेदस्तृष्णा वमिश्वासहिक्का।
तीसार विड्ग्रहान् दाहक्षतक्ष
यांस्तत्तु योगवाहल्प वातलं।
अथ मधुभेदाः माक्षिकं भ्रामरं
क्षौद्रं पौत्तिकं छात्र मित्यपि
आर्घ्य मौद्दालकं दालमित्य
ष्टौ मधुजातयः अथैतेषां ल
क्षणानि गुणाश्च तत्र माक्षिक
स्य मक्षिकाः पिंगवर्णास्तु महत्यो
मधुमक्षिकाः ताभिः कृतं तैलव।
र्णं माक्षिकं तत्प्रचक्षते माक्षिकं
मधुषु श्रेष्ठं नेत्रामय हरं लघु काम

लार्शः क्षत श्वास कासक्षयविना
शनं अथ भ्रामरस्य किंचित्।
सूक्ष्मैः प्रसिद्धेभ्यः पुष्पेभ्यो अलि
भिश्चितं निर्मलं स्फटिकाभं य
त्तन्मधु भ्रामरं स्मृतं भ्रामरं रक्त
पित्तघ्नं मूत्रजाड्यकरं गुरु स्वादु
पाकमभिष्यन्दि विशेषात् पिच्छि
लं हिमं अथ क्षौद्रस्य मक्षि
काः कपिलाः सूक्ष्माः क्षुद्राख्याः।
तत्कृतं मधु मुनिभिः क्षौद्रमित्यु
क्तं तद्वर्णात्कपिलं भवेत् गुणैर्मा
क्षिकवत् क्षौद्रं विशेषान्मेह नाश
नं अथ पौत्तिकस्य याः कृष्णा
मशकोपमा लघुतराः प्रायो म
हापिण्डितं वृक्षाणां तरुकोटरान्त
रगताः पुष्पासवं कुर्वन्ति ताः स्मृ
ताः इह पुत्तिका निगदिता स्ता
भिः कृतं सर्पिषाभं यन्मधु त
द्वेचरजनैः संकीर्त्तितं पौत्तिकं।
पौत्तिकं मधु रूक्षोष्णं पित्तदाह
स्रवातकृत् विदाहि मेदकृच्छ्रा
घ्नं ग्रंथ्यादि क्षत शोषि च ॥
अथ छात्रस्य वरटाः कपिलाः
पीताः प्रायो हिमवतो वने कुर्व
न्ति छत्रकाकारं तज्जं छात्रं मधु स्मृ
तं छात्रं कपिलं पीतं स्यात् पि
च्छिलं शीतलं गुरु स्वादुपाकं।



क्रिमि श्वित्र रक्त पित्त प्रमेहज्वर
श्रम तृड् मोह विषहृत् तर्पणं च
गुणाधिकं अथार्घ्यस्य मधुकस्य
त्वानियोसं जरत्कावांश्रमाङ्केवाः
स्रवं त्वार्घ्यं तदाख्यातं श्वेतकं मा
लवे पुनः तीक्ष्णतुण्डास्तया पी
ता मक्षिकाः षट्पदोपमाः अर्घ्या
स्तास्तत्कृतं यत्तदार्घ्यमित्यपरे
जगुः आर्घ्यं मधुति चक्षुष्यं कफपि
त्तहं परं कषायं कटुकं पाके ति
क्तं च बल पुष्टिकृत् अथौ
द्दालकस्य प्रायो वल्मीकमध्यस्थाः
कपिलाः स्वल्पकीटकाः कुर्वन्ति क
पिलं स्वल्पं तत्स्यादौद्दालकं मधु
औद्दालकं रुचिकरं स्वर्यं कुष्ठ वि
षापहं कषाय मुष्णमम्लं च कटुपा
कं च पित्तकृत् अथ दालस्य प्र
च्युत्य पतितं पुष्पात् यत्तु पत्रोप
रि स्थितं मध्वम्लं कषायं च तद्दा
लं मधुकीर्तितं दालं मधु लघु प्रो
क्तं दीपनीयं कफापहं कषायानु
रसं रूक्षं रुच्यं छर्दि प्रमेहजित्
अधिकं मधुरं स्निग्धं बृंहणं गुरु
भारिकं लघु पाके गुरु भारिको
त्तलितं अथ नव पुराण मधु
गुणाः नवं मधु भवेत् पुष्टै नाति
श्लेष्म हरं सरं पुराणं ग्राहकं
रूक्षं मेदोघ्न मति लेखनं।
मधुनः शर्करायाश्च गुडस्यापि वि
शेषतः एकसंवत्सरातीते पु
राणत्वं स्मृतं बुधैः अथ मधु।
नः पीतस्य गुणाधिकस्तनाया
निषेधः विष पुष्पादि रसं स
विषा भ्रमरादयः गृहीत्वामधु कु
र्वंति तल्लीनं गुणवन्मधु विषान्न
यात्तदुष्णेन उष्णार्त्तेन वा सह
उष्णार्त्तेनोष्णकाले च स्मृतं विष
समं मधु इति भावप्रकाशः॥
मधुः पुं मधुक्रमः मउलगाछ इ
ति भाषा वसंतर्तुः दैत्यभेदः॥
यं हत्वा विष्णुर्मधुसूदनोऽभवत्
चैत्र मासः इति मेदिनी अ
शोकवृक्षः इति हेमचंद्रः य
ष्टिमधु इति शब्दरत्नावली असुर
विशेषः सच शत्रुघ्नेन हतः यस्य
नाम्ना मथुरा मधुपुरी निख्याता।
मधुः स्त्री जीवंतीवृक्षः इत्यमरः।
मधुकं क्ली यष्टिमधुका इत्यमरः
त्रपु इति हेमचंद्रः॥
मधुकः पुं वन्दिभेदः यष्टाकः
विहङ्गान्तरः इति विश्वः॥
मधुकण्ठः पुं कोकिलः इति त्रिकां
डशेषः॥
मधुकरः पुं भ्रमरः इत्यमरः।

कामी इति धरणिः भृंगराज
वृक्षः इति शब्दमाला।
मधुककटिका स्त्री मधुरजम्बीर।
विशेषः मउकटी इतिभाषा पर्य्या
यः कुला २ इति शब्दचंद्रिका॥
मधुखर्जूरिका इतिराजनिर्घंटः
मधुकर्कटी स्त्री मधुबीजपूरः इति
राजनिर्घंटः॥
मधुका स्त्री मधुयष्टिका इत्यमरः
मधुपर्णीवृक्षः इति मेदिनी
कृष्णवर्णाकेगुनी इतिहेमचंद्रः
मधुकुक्कुटिका स्त्री जम्बीरविशे
षः मधुकुक्कुटी मखुर इतिमहा
इतिच भाषा तत्पर्य्यायः मातु
लुंगा २ सुगंधा ३ गिरिजाध पूति
पुष्पिका ५ अम्लका ६ देवदूती ७
इति रत्नमाला अस्या गुणाः
शीतत्वं श्लेष्मलत्वं श्वास प्र
सादनत्वं रुच्यत्वं स्वादुत्वं गुरु
त्वंच इति राजवल्लभः॥
मधुकृत् पुं भ्रमरः इतिहेमचंद्रः
मधुकेशटः पुं भ्रमरः इतित्रिकांड।
शेषः॥
मधुकैटभौ पुं असुरविशेषौ॥
तयोरुत्पत्त्यादि यथा दैनन्दि
ने तु प्रलये प्रसुप्ते गरुडध्वजे।
॥ ॥ ॥ ॥
तस्य श्रवण विड्जाता वसुरौ मधु
कैटभौ कूर्मपृष्ठ गता पृथ्वी वि
लीनेवा भावजलेः तां वीक्षणं
योगनिद्रा महामाया व्यलोकयत्।
तौ वै हन्तनरां कर्तुं पृथ्वी प्रति।
ततेश्वरी उपायं चिंतयामासकथं
पृथ्वीभवेद्दृढ इदानी माल्पवत्।
पृथ्वी महता कोमला जलैःसृष्टि
काले जनान् वोढुं कथंशक्ताभ
विष्यति इति संचिंत्य सा माता
जगतां सृष्टिकारिणी उपगम्यता।
वाविष्णुमासमासाद्य स्वनिद्रिते तेन
स्वमंसमासाद्य जगन्नाथं जगत्प
तिं वामहस्त कनिष्ठाग्र तस्यकर्णे
न्यशायत् निवेश्य तत्वराग्रेणाथ
हृत्य श्रावणं मलं चूर्णीचकार
सादेवी योगनिद्रा जगत्प्रसूः त
त्कर्णमलचूर्णेभ्यो मधुनामासुरो
भवत् ततोदक्षिणहस्तस्यकनि
ष्ठाग्रेण दक्षिणे कर्णे न्यवेशयद्दे
वी तस्मादप्युद्धृतं मलं तच्चापि तो
दयामास करशाखाग्रजेन त त
तोऽभूत् कैटभो नाम बलवानसु
रो महान् उत्पन्नः सच पानार्थं॥
यस्मान्मृणितवान्मधु अतस्तस्यमहा
देवी मधु नामाकरोत्तदा उत्पन्नः
कीट वद्धाति महामाया करे॥



घृतः अत स्तं कैटभाभ्यां स्वयं
देवी तदाकरोत् तावुवाच महा
माया युध्यन्तौ हरिणा सह युवानौ
श्रद्धयैवात्र भवन्तौ निहनिष्यति
यदा युवां प्रभाषेथे आवां विष्णो
वध्यावो नदेवायं युवां हन्ता
नान्यथा हरि रप्यथ महामायामो
हितौ तौ विष्णुगात्रे तदा मधुः
भ्रममाणौ ददृशात्र नाभिपद्मास्थि
तं विधिं तमूचतुस्तौ धातारं हनि
ष्यावो ऽद्य नाभितं त्वं जागरय
वैकुण्ठं यदि जीवितुमिच्छसि ततो
ब्रह्मा महामायां योगनिद्रां जग
त्प्रसूं प्रसादयामास तदा स्तुतिभि
र्नतिभि र्भिया चिरं स्तुता च सा दे
वी ब्रह्मणा जगदात्मना प्रसन्ना भव
दप्यर्थ मुवाच च यथाविधि किमर्थं
संस्तुता चाहं किं करिष्याम्यहं त
व तद्वदस्व महाभाग करिष्याम्यह
मद्य ते ततस्तेन महामायाभिक्ता
यात्रा महात्मना प्रबोधय जगन्ना
थं यावन्तौ मां हनिष्यतः संमो
हयैतौ दुर्द्धर्षौ वधायौ मधुकैटभौ
इत्युक्ता सा तदा देवी ब्रह्मणा जग
दात्मना बोधयामास वैकुण्ठः मो
हयामास तौ तदा ततः प्रबुद्धः
हृषीकेशः सद्दर्शी भयशालिनं ब्रह्माणं

तौ तदा घोरा वसुरौ मधुकैटभौ
ततस्ताभ्यां स युयुधे स्वसराभ्यां।
जनार्दनः नाशकद्धायितुं वीरा व
सुरौ मधुकैटभौ अनन्तो ऽपि
फणाग्रेण नाशोधर्यं तमो ऽभवत्
युध्यमानान्महावीरात् वैकुण्ठ मधु
कैटभात् अथ ब्रह्मा शिलारूपां।
स्थिति शक्तिं तदाकरोत् अर्द्ध
योजन विस्तीर्णां सार्द्धयोजनमाय
तां तस्यां शिलायां वैकुण्ठा ॥
युयुधेऽप्यसत्तम सहस्राभ्यां शि
ला सा तु प्रविवेश जलान्तरं त
स्यां तु पादाभ्यां मग्नायां तोयेषु यु
युधे हरिः पंचवर्ष सहस्राणि बाहु
युद्धे निरन्तरं यदा नैवाशकद्धन्तुं।
तौ विष्णु र्जगतां पतिः यदा।
चिन्तां तदा चाप चिन्तामपि भया
न्वितः ततस्तावेव तं विष्णुमूचतु
र्बलदर्पितौ पुनः पुनस्तौ गर्जन्तौ
महामायाविमोहितौ तुष्टौ स्वा
स्तव नियुद्धेन वरं वरय माधव तवे
प्सितं प्रदास्यावः तस्मै तद्धरा धुना ॥
तयोस्तद्वचनं श्रुत्वा भगवान् गरुड
ध्वजः उवाच तौ युवां वध्यौ भ
वेतां मे महाबलौ इति देहि वरं।
मह्यं दातव्यं यदि विद्यते तौ
तदा प्राहु युष्मन्तौ योग्यौ तौ ॥

शोभनौ वधः तत्रावां जहि तौ
यत्र तोयं संप्रति विद्यते तयो
स्तद्वचनं श्रुत्वा माधवो जगतांपति
ब्रह्माणं मां च शीघ्रेण प्राहेदं वाक्य
संज्ञया ब्रह्मशक्तिं शिलां शीघ्रा
मुद्धृत्य धीयतां यथा तत्र स्थितावाम
हावासुरे हनिष्यामि महाबलौ ततो
ब्रह्मा त्वहं चैव उद्धार शिलां ततो
तस्या मध्ये पूर्वभागे त्वहं पर्वत
रूपधृक् ऊर्द्धे स्थित्वा शिलां भि
त्वा प्रविवेश रसातलं पश्चात्या
मभवत् कूर्मः पर्वतः स्माग्रहीत्
शिलां वायव्यां च तथाऽनंतोनैऋर्त्यां
च खेश्वरी महामाया जगद्धात्री।
शैलरूप धारिणी आग्नेय्यां च स्व
यं विष्णुरेक रूपेण संस्थितः ब्रह्म
शक्तिं शिलां गृहीत्वा भगवान् पर
मेश्वरः मध्ये ब्रह्मा त्वहं चैव वराह
श्च तथा परः ततो वराहरूपस्य
वामे जगतां पतिः स्थित्वा शि
लामवष्टभ्य ब्रह्मशक्तिमयोगतो
वामे स्वजघने यत्वादारोप्य शिरसी
तयोः जगदाधार भूतः स सर्व यत्ने
संयुतः सर्वैर्बलैः समाक्रम्य वि
च्छेद स पृथक् पृथक् मधुकैटभ
योः सम्यक् वीरयोः पृथिवी भूते
तस्या वाक्रम्य संस्थानाद्ब्रह्मशक्तिरियो

गता भ्रियमाणापि देवी च यत्ना
दपि मग्ना मग्नः ततस्तयोस्तु मृत
योः शरीरे जगतां पतिः ब्रह्म।
शक्तिं समुद्धृत्य यथा तस्यां प्र।
यत्नतः उद्धृतायां पृथिव्यां तु त
योर्मेदो विलेपनैः संहत्या मक
रोत् पृथ्वीं कृदिनां तयोर्गात्र।
भिः मेदो विलिप्ता यस्माद्दीय
ते मेदिनीति सा अद्यापि पृथिवी
देवी देव मानुष राक्षसैः ॥
इति कालिकापुराणे ८१ अध्यायः
मधुकोषः पुं मधुमक्षिकाकृतको
षः मौचाक् इति भाषा तत्प।
र्यायः मधुक्रमः २ इति शब्द।
चन्द्रिका व्यागमत्त इति मोक्ष
शिनो वदन्ति ॥
मधुक्रमः पुं पुनः पुनर्मधुपानक्र
मः तत्पर्यायः मधुवारा२ इत्य
मरः मधुकोषः । इति शब्द
चन्द्रिका ॥
मधुखर्जूरिका स्त्री खर्जूरविशेषः
तत्पर्यायः मधुकर्कटिका२ को
लकर्कटिका३ कंटकिनी४ मधु
फलिका५ माधीमधुरा६ मधुख
र्जूरी७ मधुखर्जूरी८ अस्या गुणाः
मधुरत्वं हृद्यत्वं संताप पित्तशां
तिकारित्वं शिशिरत्वं जंतु ॥

कर्षत्वं बहुवीर्य्यविवर्द्धनत्वञ्च
इति राजनिर्घण्टः ।
मधुकायनः पुं कोकिलः इति
राजनिर्घण्टः ॥
मधुगुञ्जनः पुं शोभाञ्जनवृक्षः
इति शब्दमाला ॥
मधुघोषः पुं कोकिलः इति
शब्दमाला ॥
मधुच्छदा स्त्री मयूरशिखा इ
तिभावप्रकाशः ॥
मधुजं क्ली सिक्थकं इतिराज
निर्घण्टः ॥
मधुजम्बीरः पुं मधुरजम्बीरः इति
राजनिर्घण्टः ।
मधुजा स्त्री पृथिवी इति शब्द
चन्द्रिका सिता तत्पर्य्यायः
महाखला २ इतित्रिकाण्डशेषः
मधुजित् पुं विष्णुः इति शब्द
रत्नावली ॥
मधुतृणं क्ली इक्षुः इतित्रिका
ण्डशेषः ॥
मधुतृणः पुं इक्षुः इतिराजनि
र्घण्टः मधुत्रयं क्ली मधुरत्रयं इति
राजनिर्घण्टः ॥
मधुदीपः पुं कामदेवः इति हे
मचन्द्रः ॥
मधुदूतः पुं आम्रवृक्षः इति त्रि
काण्डशेषः ॥
मधुदूती स्त्री पाटलावृक्षः इति
भावप्रकाशः ॥
मधुद्रुः पुं भ्रमरः इति त्रिकाण्ड
शेषः ॥
मधुद्रवः पुं रक्तशिग्रुः इतिशब्द
रत्नावली ॥
मधुद्रुमः पुं वृक्षविशेषः मौल
गाछ इति भाषा तत्पर्य्यायः मधू
कः २ गुडपुष्पः ३ इत्यमरः ।
मधुधातुः पुं माक्षिकं इति राज
निर्घण्टः ॥
मधुधूलिः स्त्री खण्डः खाँड़ इतिभा
षा इतिहेमचन्द्रः ।
मधुधेनुः स्त्री दानार्थमधुकल्पि
र्मित सवत्सागौः यथा हेमाद्रौ वाव
मधूधेनुं प्रवक्ष्यामि सर्व्वपातक
नाशिनीं अनुलिप्ते महीपृष्ठे कृ
ष्णाजिन कुशोत्तरे धेनुं मधुम
यीं कृत्वा सम्पूर्णां घटषोडशीं
वत्सध्येन तथांशेन वत्सकं परि
कल्पयेत् सौवर्णेन मुखं कृत्वा शृ
ङ्गाण्यगुरुचन्दनैः पृष्ठं ताम्रमयं ।
कृत्वा सास्नां पट्टमयीं तथा पटा
नित्तमयान्कृत्वा सितकम्बलक
म्बलां खुरं गुडमयं कृत्वा जिह्वां
शर्करया तथा ओष्ठौ पुष्पमयौ


तस्यादन्ता फलमयाः स्मृताः द
र्भरोमयुता देवी रौप्यखुर विभू
षिता प्रशस्तपत्रश्रवणी प्रमाणा
त परित स्ततः सर्व्वलक्षणसंयुक्ता
समयाभ्याम्बिना तथा चत्वारि ति
लपात्राणि चतुर्द्दिक्ष्वपि स्थापयेत्
आच्छादितां वस्त्रयुग्मेन घण्टाभरण भू
षितां कांस्योपदोहनां कृत्वा गन्ध
पुष्पैस्तु धूपितां ॥ अयने वि
षुवे पुण्ये व्यतीपाते दिनक्षये ।
संक्रान्त्यामुपरागे च सर्व्वकाले ।
यदृच्छया द्रव्य ब्राह्मणसम्पत्तिं दृ
ष्ट्वा तां प्रदापयेत् ब्राह्मणाय दरि
द्राय श्रोत्रियायाहिताग्नये आर्य्या
वर्त्तसमुत्पन्ने देव देवाङ्ग पार
गे तादृशाय प्रदातव्या मधुधेनु
र्गोत्तम पुण्यदेशाय विशेषतः गन्ध
धूपादि पूजितं आच्छाद्य वस्त्रयु
ग्मेन मुद्रिका कर्णपत्रके स्वश
क्त्या दक्षिणां दत्वा पित्रशाठ्यविव
र्जितः जलपूर्व्वन्तु कर्त्तव्यं पश्चाद्दानं
समर्पयेत् रसज्ञा सर्व्वदेवानां सर्व्व
भूतहिते रता ॥ पीयतां पितृ
देवाश्च मधुधेनो नमोऽस्तु ते एव
मुच्चार्य्य तां धेनुं ब्राह्मणाय निवे
दयेत् अहं गृह्णामि त्वां देवि कु
टुम्बार्थे विशेषतः कामं कामा।
दुये कामां मधुधेनो नमोऽस्तु ते ।
मधुवातेति मन्त्रेण दद्यादाशु त्रिको।
णाद दत्वा धेनुं महाराजच्छत्रको।
पानहो तथा एवं यः कुरुते भक्त्या
मधुधेनुं नराधिप दत्वा दानं पा
यसेन मधुना च दिनं नयेत् ॥
ब्राह्मणोऽपि त्रिरात्रन्तु मधुपायस।
संयुतं एवं कृते तु यत् पुण्यं
तन्निबोध नराधिप यत्र नद्यो ।
मधुवहा यत्र पायसकर्द्दमाः ऋष
यो मुनयः सिद्धास्तत्र गच्छति धेनुदाः
तत्र भोगानथो भुंक्ते ब्रह्मलोके स
तिष्ठति क्रीड़ित्वा सुचिरं कालं पु
नर्मर्त्त्यमुपागतः स भुक्त्वा वि
पुलान्भोगान् विष्णुलोकं स ग
च्छति दशपूर्व्वान् दशपरानात्मा ।
नं चैक विंशति नयते विष्णुसा
युज्यं मधुधेनु प्रसादतः य इदं
शृणुयाद्भक्त्या श्रावयेद्वापि मानवः
सर्व्वपाप विनिर्मुक्तो विष्णुलोकं ।
स गच्छति इत्यादि वराह पुरा ।
णे श्वेतोपाख्याने मधुधेनु ॥
माहात्म्यं ॥
मधुनालिकेरकः पुं मधुनारिकेलः
एतनारिकेल इतिकोकण प्रसिद्ध
मोहानारल इतिख्यातं तत्
पर्य्यायः माक्षीकफलः २ मधु

कलः २ आसिनजफलः ४ माक्षि
कफलः ५ मृदुफलः ६ वृहत्क्षुद्रः ७
ह्रस्वफलः ८ अस्य गुणाः मधुरत्वं
शिशिरत्वं दाहतृष्णार्त्तिपित्त हा
रित्वं बलपुष्टिश्लेष्मकान्ति कारि
त्वं वीर्य्यविवर्द्धनत्वं रुच्यत्वंच ।
अपिच माधीकं नालिकेरं फल
मति मधुरं दुर्जरं जन्तुकारिस्निग्धं
वातातिसार श्रम शमन मपथ्यं
सनं वह्निरोगः आम श्लेष्म प्र
कोपं जनयति कुरुते चारुकान्तिं
बलेच स्थैर्य्यं देहस्य धत्ते वचन म
दनकला वर्द्धनं पित्तनाशं इति
राजनिर्घण्टः ॥
मधुनी स्त्री क्षुपविशेषः माकड
हाना इति माकडचाउली इति च
भाषा तत्पर्य्यायः ह्रस्वमंडा २
वायसोली ३ सुमंगला ४ इति
रत्नमाला ॥
मधुनेता पुं भ्रमरः इतिशब्द
चंद्रिका ॥
मधुपः पुं भ्रमरः इत्यमरः ॥
मधुपर्कं क्ली दधिसंयुक्तमधु तत्
पर्य्यायः महोदयः २ इति हेम
चंद्रः अपिच मधुपर्के दधि
मधु घृत मपिहित कांस्येनेति ।
अपिहित माच्छादितं इत्येका

दशी तत्त्वकात्यायनसूत्रं ।
मधुपर्कः पुं षोडशोपचार पूजा ।
ङ्गेन षष्ठोपचारः तस्य प्रमाणां ।
यथा दधि सर्पि र्जलं क्षौद्रं सि
तै ताभिस्तु पंचभिः प्रोच्यते ॥
मधुपर्कं सर्वदेवोंच तुष्टये ज
लेन सर्वतः स्वल्पं सिताद्दधिघृतं
समं सर्वेषामधिकं क्षौद्रं मधु
पर्कं प्रयोजयेत् तद्ध्यान् कां
स्यपात्रेण रौक्म स्थत भवेत् तथा
ज्योतिष्टोमाश्वमेधादौ यूते वेष्ट
प्रयुज्यते मधुपर्कः प्रतिष्ठो
ऽयं सर्वदेवोच तुष्टिदः धर्म्मार्थ
काम मोक्षाणां साधकः परिकीर्त्ति
तः मधुपर्कः सौख्यभाग्य तुष्टि
पुष्टि प्रदायकः इतिकालिकापुरा
णे ६७ अध्यायः अपिच आज्य
दधि मधु मिश्रं मधुपर्कं वि
दुर्बुधाः इति तंत्रसारः ॥
तद्दाने मुद्रायथा संयुक्तानामिकां
गुष्ठा तिस्रोऽन्याः संप्रसारि ॥
ताः मधुपर्केच साशुद्रा विद्वद्भिः प
रिकीर्त्तिता ॥ इति हरि भक्ति
विलासः ॥
मधुपर्णिका स्त्री गंभारी नीली
वृक्षः इत्यमरः वराहकांता इ
ति शब्दचंद्रिका गुडूची ॥

सहर्षीवात इति राजनिर्घण्टः ।
मधुपर्णी स्त्री गुडूची इत्यमरः
गंभारीवृक्षः नीलीवृक्षः इति ।
मेदिनी मधुवीज पूरः ॥ इति
राजनिर्घण्टः ।
मधुपाका स्त्री षड्भुजा इतिराज
निर्घण्टः ।
मधुपायी पुं भ्रमरः इत्यमर
टीकायां रामाश्रमः ॥ मधुपान
कर्त्तरित्रि ॥
मधुपालिका स्त्री गंभारी इति
शब्दमाला ॥
मधुपीलुः पुं महापीलुः इति
राजनिर्घण्टः ।
मधुपुरी स्त्री मथुरा इतिशब्दर
त्नावली ॥
मधुपुष्पः पुं मधुक्रमः इतिरत्न
माला शिरीषवृक्षः ॥ अशोक
वृक्षः वकुलवृक्षः इति राज
निर्घण्टः ॥
मधुपुष्पा स्त्री दंतीवृक्षः नागदंती
वृक्षः इति राजनिर्घण्टः ॥
मधुप्रियः पुं बलरामः इतित्रिकां
डशेषः भूमिजम्बुः यथा नादे
यी स्त्री नागरंग त्वक्सुगंधोमधु
प्रियः इतिजटाधरः ॥
मधुफलः पुं मधुनारिकेलः इति

राजनिर्घण्टः विकंकतवृक्षः इति
शब्दचंद्रिका ।
मधुफलिका स्त्री मधुखर्ज्जूरिका इ
राजनिर्घण्टः ॥
मधुबहुला स्त्री वासंतीलता इ
ति राजनिर्घण्टः ।
मधुभित् पुं विष्णुः इतिशब्दरत्ना
वली
मधुमज्जा पुं आखोटवृक्षः इति
राजनिर्घण्टः ॥
मधुमती स्त्री काश्मरीवृक्षः नदी
विशेषः तस्या जल गुणाः चंद्र
भाग गुणासाम्यदं जलं किंचमाधु
र्य्यमग्निदीपनं इतिराजनिर्घण्टः
उपास्यनायिकाविशेषः यथा त
था मधुमती सिद्धि र्जायते नात्र
संशयः देववेदी शतशते तस्य
वश्या भवंतिहि स्वर्गे मर्त्ये च
पाताले स यत्र गंतुमिच्छति त
त्रैव चेटिकाः सर्वानयंतिनात्र सं
शयः इति कुकलासदीपिकायां
२ पटलः ॥
मधुमथनः पुं विष्णुः इतिहला
युधः ॥
मधुमल्ली स्त्री मालती इतिशब्द
माला ॥
मधुमस्तकं क्ली पिष्टकविशेषः या




मधु तैल द्वाभ्यां मध्ये वेष्टिताः
समिताख्ययाः मधुमस्तक शष्टिं
तस्याख्या परिमार्जनं इति शब्द
चंद्रिका अस्य गुणाः पिष्टशब्द
द्रष्टव्याः ॥
मधुमक्षिका स्त्री कीटविशेषः मौ
माछी इतिभाषा तत्पर्य्यायः
सरघा २ इत्यमरः ॥
मधुमाध्वीकं मद्यं इत्यमर।
टीकायां भरतः ॥
मधुमारकः पुं भ्रमरः इतिराज
निर्घंटः ॥
मधुमूलं क्ली आलुकं मोआल
इति भाषा इतिशब्दचंद्रिका ।
मधुयष्टिः स्त्री इक्षुः इतिशब्द
चंद्रिका ॥
मधुयष्टिका स्त्री यष्टिमधु तत्प।
र्य्यायः मधुकं २ क्लीतकं ३ यष्टि
मधुकाथ इत्यमरः मधुयष्टी ५ इति
भरतः ॥
मधुयष्टी स्त्री मधुयष्टिका इति
शब्दमाला ॥
मधुरं क्ली वंगं इतिराजनिर्घंटः
विषं इति मेदिनी ॥
मधुरः पुं मिष्टरसः सचइक्ष्वादौ।
लभ्यते इत्यमरः तत्पर्य्यायः।
गौल्यः २ इतिराज निर्घंटः

रसज्येष्ठः ३ गुल्यः ४ स्वादुः ५ मधु
लकः ६ इति हेमचंद्रः तस्य
गुणाः प्रीणनत्वं वृष्यत्वं हृद्यत्वं
त्वं वायुपित्तनाशित्वं रसाय॥
नत्वं गुरुत्व स्निग्धत्वं चक्षुष्यत्वं।
तर्पणत्वं सरत्वंच अन्यच्च रसो
मधुरकः शीतो धातुस्तन्य वल
प्रदः चक्षुष्यो वातपित्तघ्नः कृ
ष्णीत स्थौल्यकफकृमीन् सोति
युक्तोज्वर श्वास गलगंडादि रोग
कृत् इतिराजवल्लभः अपिच।
मधुरस्तु रसश्चिनोतिकेशान् व
पुषः स्थैर्य्य बलोज वीर्य्यदायी
अतिसेवनतः प्रमेह शैत्य ज
डता मांद्य मुखान् करोति दो
षान् इति राजनिर्घंटः जीवकः
रक्तशिग्रुः राजाम्रः रक्तेक्षुः
गुडः शालिः इति च राज
निर्घंटः ॥
मधुरः त्रि मधुररसविशिष्टः स्वादुः
प्रियः इतिमेदिनी पारिभाषि।
कमधुराणियथा विरम्योक्तिः
प्रियाधर ऊचादिः शशी स्त्रियः
वालोक्तिः इतिकविकल्पलता।
मधुरकः पुं जीवकवृक्षः इत्यमरः
मधुरकंटकः स्त्री मत्स्यविशेषः
तत्पर्य्यायः कज्जली २ कज्जला ३


अनंता ४ माधवी ५ इतिशब्दरत्ना
वली ।
मधुरजम्बीरः पुं मधुजम्बीरः तत्
पर्य्यायः मधुजम्बः २ मधुजंभलः
३ रसद्रावी ४ शार्करकः ५ पित्तद्रा
वी ६ अस्यगुणाः मधुरत्वं शिशि
रत्वं कफ पित्त शोफश्रम नाशि
त्वं तर्पणत्वं हृष्यत्वं पुष्टिकार।
कत्वंच इतिराजनिर्घंटः ।
मधुरत्वचः पुं धवद्वृक्षः इतित्रि
कांडशेषः ॥
मधुरत्रयं क्ली सितामाक्षिकं स
र्पिश्च इति राजनिर्घंटः ।
मधुरत्रिफला स्त्री द्राक्षाफलंका
श्मर्य्यफलं खर्ज्जूरीफलंच इति।
राजनिर्घंटः ॥
मधुरनिस्वना स्त्री मधुरस्वरयुक्ता
नारी इतित्रिकांडशेषः ॥
मधुरफलः पुं राजवदरः इति
राजनिर्घंटः ॥
मधुरवल्ली स्त्री मधुवीजपूरः इ
तिराजनिर्घंटः ॥
मधुरसः पुं इक्षुः इतिशब्दमाला
तालः इतिराजनिर्घंटः ॥
मधुरसा स्त्री मूर्वा इत्यमरः
द्राक्षा दुग्धिका इति मेदिनी
गम्भारी इति भावप्रकाशः।

मधुरस्रवा स्त्री पिंडखर्ज्जूरी इति
राजनिर्घंटः ॥
मधुरा स्त्री शतपुष्पा मिश्रेया
मधुरानगरी मधुककर्कटिका मे
दा मधूली मधुयष्टिका इति
मेदिनी काकोली शतावरी॥
हृद्जीवंती पालक्यशाकं इति
राजनिर्घंटः ॥
मधुराम्लकः पुं आम्रातकः इति
शब्दचंद्रिका ॥
मधुराम्रफलः पुं रेफलः तत्
पर्य्यायः आरः इतिरत्नमाला।
मधुरालापा स्त्री शारिका इति
राजनिर्घंटः ।
मधुरालावुनी स्त्री राजालाम्बुः इ
तिराजनिर्घंटः ॥
मधुरिका स्त्री क्षुपविशेषः मौ
री इति भा तत्पर्य्यायः शाले।
यः २ शीतशिवः ३ छत्रा ४ तिशीर्प
मिश्रेया ६ इत्यमरः सालेयः ७
मिसिः ८ मिसी ९ मिशिः १० इति
तट्टीका अवाक्पुष्पी ११ मंगल्या १२
मधुरा १३ इति [illegible]रत्नमाला॥
मधुरी १४ इति शब्दरत्नावली ॥
अस्या गुणाः रोचकत्वं अकृका।
रित्वं दाह रक्तपित्तनाशित्वंच ॥
इति राज वल्लभः ॥



मधुरिपुः पुं विष्णुः इत्यमरः
मधुरेणुः पुं कटभीवृक्षः इति
राजनिर्घण्टः ।
मधुरोदकः पुं जलसमुद्रःसत्व
स्वादूदकमयः पुष्करद्वीपवेष्टितः
सप्तसमुद्राणां शेषसमुद्रः इति
जटाधरः ॥
मधुलं क्ली मद्यं इतिशब्दचंद्रि
का मधुलग्नः पुं रक्तशोभांजनः
इतिरत्नमाला ॥
मधुलता स्त्री स्थूलीतृणं इति
राजनिर्घण्टः ॥
मधुलिका स्त्री राजिका इति रा
जनिर्घण्टः ॥
मधुलिट् पुं भ्रमरः इत्यमरः
मधुलेही पुं भ्रमरः इतिशब्द
रत्नावली ।
मधुलोलुपः पुं भ्रमरः इतिराज
निर्घण्टः ॥
मधुवनं क्ली मथुरायांवनविशेषः
यथा तत्रात गच्छभद्रंतेयमुना।
या स्तटं शुचिः पुण्यंमधुवनंयत्र
सान्निध्यं नित्यदा हरेः इति
श्रीभागवते ४ स्कंधे ८ अध्यायः
किष्किंधायां सुग्रीवस्य वनविशे
षः इतिरामायणेकिष्किंधाकांडे।
मधुवनः पुं कोकिलः इतिशब्द
चंद्रिका ॥
मधु वल्ली स्त्री यष्टीमधुक्षीड
इति राजनिर्घण्टः ॥
मधुवारः पुं मधुक्रमः इत्यमरः।
सचपुनः पुनर्मद्यपान परिपाटी
इति तट्टीकायां भरतः ।
मधुवीजः पुं दाडिमः इति राज
निर्घण्टः ।
मधुवीजपूरः पुं मधुकर्कटिका।
मीठाबिजौरा इतिहिंदीभाषा त
त्पर्यायः मधुपर्णी १ मधुरकर्क
टी २ मधुरावली ३ मधुकर्कटी ४ म
धुरक ५ महाफला ६ वर्द्धमाना ७
अस्यगुणाः मधुरत्वं शिशिरत्वं
दाहनाशित्वं त्रिदोषशमनत्वं
रुच्यत्वं पथ्यत्वं गुरुत्वं दुर्ज
रत्वंच इतिराजनिर्घण्टः ।
मधुव्रतः भ्रमरः इत्यमरः ॥
मधुशर्करा स्त्री मधुजातशर्करा
सिताखंड इतिभाषा यथा माधी
सितामधुत्पन्ना मधुजा मधु
माक्षीकशर्करा वैषातोडज्ञातोड
शर्करा यदुक्तं यन्मधुशोक्तं तदु
क्ता तस्य शर्करा विशेषाद्दल द्
ष्याच तर्पणंक्षीणदेहिनां इति
राजनिर्घण्टः ॥
मधुशाखः मधुष्ठीलः इति

शब्दचंद्रिका ॥
मधुशिग्रुः पुं रक्तशोभांजनवृक्षः
इत्यमरः ॥
मधुशीर्षं क्ली सिक्थकं इतिराज
निर्घण्टः ॥
मधुश्रेणी स्त्री मूर्वा इत्यमरः
मधुस्रावा स्त्री जीवंतीवृक्षः इति
राजनिर्घण्टः ॥
मधुष्ठीलः पुं मधूकवृक्षः इत्यमरः
मधुसखः पुं कामदेवः इतिह
लायुधः ॥
मधुसारथिः पुं कामदेवः इति
त्रिकांडशेषः ॥
मधुसिक्थ पुं स्थावरविषभेदः
इतिहेमचंद्रः ।
मधुसुहृत पुं कामदेवः इति
केचित् ॥
मधुसूदनः भ्रमरः इति जटा
धरः श्रीकृष्णः इत्यमरटीकायां
भरतः तस्यव्युत्पत्ति र्यथा
सूदनं मधुदैत्यस्य यस्मात्स्मधु
सूदनः इति संतो वदंतीशं वेदे
भिन्नार्थे मीप्सितं मधु क्लीवंचमा
ध्वीके कृतकर्म शुभाशुभे भक्ता
नांकर्मणांचैव सूदनं मधुसूदनः
परिणामाशुभं कर्म भ्रांतानां म
धुरं मधु करोति सदनं यो हि
स एव मधुसूदनः इतिब्रह्मवैवर्त्ते।
श्रीकृष्णजन्मखंडे ११० अध्यायः
तस्यस्मरणफलं महाविपत्तौ स
मारेयः स्मरेन्मधुसूदनं विपत्तौ।
तस्यसम्पत्ति र्भवेदित्याह शंकरः
तत्रैवप्रकृतिखंडे २४ अध्यायः
मधुसूदनी स्त्री पालंकीशाकं इ
ति हेमचंद्रः ॥
मधुस्रवः पुं मधूकवृक्षः मोचट
लता इति राजनिर्घण्टः ॥
मधुस्रवा स्त्री मधुयष्टिका इतिज
टाधरः जीवंती इतिशब्दचंद्रिका
मूर्वा हंसपदी इति राज
निर्घण्टः ॥
मधुस्रवाः पुं मधूकवृक्षः इति
जटाधरः
मधुस्वरः पुं कोकिलः इतिशब्द
रत्नावली ।
मधुहा पुं विष्णुः इति हेमचंद्रः
मधुक्षीरः पुं खर्जूरवृक्षः इति
हारावली ॥
मधूकं क्ली यष्टीमधु इतिराज
निर्घण्टः ॥
मधूकः पुं वृक्षविशेषः महुला
इति मोल इति मऊया इतिचा
भाषा तत्पर्यायः गुडपुष्पः १
मधुद्रुमः २ वानप्रस्थः ३ मधुष्ठीलः ४




इत्यमरः मधुकः ६ मधुः ७ मधु
पुष्पः ८ इति शब्दरत्नावली ॥
मधुस्रवः ९ इतिजटाधरः मधु
वृक्षः १० रोधपुष्पः ११ माधव १२
अस्यगुणाः मधुरत्वं शीतत्वं
पित्त दाहश्रमापहत्वं वातलत्वं
जंतुदोषघ्नत्वं वीर्य्य पुष्टि विव
र्द्धनत्वंच अस्य पुष्पगुणाः मधु
रत्वं वृष्यत्वं हृद्यत्वं हिमत्वं ।
पित्तविदाह कारित्वंच अस्य
फलगुणाः वातामयपित्तनाशि
त्वं ज्ञेयं मधूकद्वय मेव मेतत्
इतिराजनिर्घंटः ॥ अपिच
मधूकपुष्पः मधुरं शीतलं गुरु
बृंहणं बलशुक्र करं प्रोक्तं वा
त पित्तविनाशनं फलंशीतं गुरु
स्वादु शुक्रलं वात पित्तनुत् अहृ
द्यं हंति तृष्णास्र दाहश्वास क्षत
क्षयान् इतिभावप्रकाशः ॥
अपरंच मधूक पुष्पंवाहृद्यं त
र्पणं बृंहणं परं मधूकस्यफलं
पक्वंवातपित्तप्रणाशनं तन्मज्जा
गुणास्तत्फल गुणावत् यथा यस्य
यस्यफलस्यैव वीर्य्यं भवति या
दृशं तस्यतस्यैव वीर्य्यंणा मज्जा
न मभिनिर्द्दिशेत् तस्यत्वगुणाः
मधूकं रक्तपित्तघ्नं व्रणशोधन रो

पणां इतिराजवल्लभः ।
मधुच्छिष्टं क्ली मधवशिष्टंमोम इ
तिभाषा तत्पर्य्यायः सिक्थकं २
इत्यमरः शिक्थकं ३ शिक्थं ४
इति शब्दरत्नावली ॥
मधूत्थितं क्ली सिक्थकं इतिरा
जनिर्घंटः ॥
मधूत्सवः पुं चैत्रीपूर्णिमा इति
जटाधरः ॥
मधूपघ्नं क्ली मथुरा इतिहेमचंद्रः
मधूपघ्नः पुं मथुरा इतिजटाधरः
मधूलः पुं जलज गिरिज मधूकवृ
क्षौ इतिजटाधरः ॥
मधूलकः पुं जलजमधूकवृक्षः
तत्पर्य्यायः दीर्घपत्रकः २ इति
जटाधरः गौरशाकः ३ मधूलः ४
स्वल्पपत्रकः ५ इति रत्नमाला ।
स्यात्मधूकेत्र जलजेगिरिजेऽपि
मधूलकः इति शब्दरत्नावली ॥
अस्यगुणाः मधूक गुण तुल्याः
मधुररसः इतिहेमचंद्रः तद्द
तिवि ॥
मधूलिका स्त्री मूर्वा इत्यमरः ।
मधूली स्त्री क्षीरतक्रं मधुकर्कटी
आम्रः इतिराजनिर्घंटः ॥
मध्यं क्ली दशान्त्यसंख्या शतसाग
रसंख्या इतिहेमचंद्रः अवसाने ।

तत्पर्य्यायः विरामः २ इति
त्रिकांडशेषः मेदस्त्व शीघ्रत्वा ।
भयेतरत्व पुक्त त्वन्यविषयक ग
मनविशेषः इति भरतः लयवि
शेषः इतिमधुः मध्यमावृत्तिः ।
इतिसांतः यथा विलम्बितं द्रु
तं मध्यंतत्त्व मोघो घनं क्रमात्
इत्यमरः ।
मध्यः पुं क्ली देहमध्यभागः मा
जा इति भाषा तत्पर्य्यायः मध्यमं
२ अवलग्नं ३ इत्यमरः विलग्नं
४ इति मेदिनी ॥
मध्यः पुं ग्रहस्फुटसाधकांकवि
शेषः सच ग्रहगणा मात्तदेशांतरादि
संस्कार रहितानांकत्पग्रहः इति
ज्योतिषं ॥
मध्यः त्रि न्यायः अंतरः अधमः
इति शब्दरत्नावली मध्यमः ।
यथा उत्तमाधम मध्यानितुद्रा ।
कार्य्याणि पार्थिवः उत्तमाधम म
ध्येषु पुरुषेषु नियोजयेत् इति
मात्स्ये ८९ अध्यायः ॥
मध्यगंधः पुं आम्रवृक्षः इतिशा
ब्दचंद्रिका ॥
मध्यतः व्य मध्यात् मध्ये इति
सिद्धांतकौमुदी स्यादेः स्याने ।
तसादयो ये आदेशा स्तेषा मद

न्तत्व मव्ययत्व मिति शाब्दः तेन
ऊतः ऊतः आगतं कौतस्कुतः
इत्यत्राव्ययत्वात्त टिलोपः इति
दुर्गादासः ॥
मध्यदेशः पुं देशविशेषः त
त्पर्य्यायः मध्यमः २ इत्यमरः
तस्य सीमा यथा हिमवद्विंध्ययो
र्मध्यं यः प्राग्विनशनादपि प्र
त्यगेव प्रयागाच्च मध्यदेशः प्रकी
र्त्तितः इतिमनु स्मृतिः विनश ।
ने तीर्थभेदः संध्यायति स्मरती
ति केसति मध्या दकारवानिति
सांज्ञे मनो थश्वेति य प्रत्यये
तस्य येसति चतर्थमात्रवानिति
दुर्गरत्नाकरः इति तट्टीकायां
भरतः ॥
मध्यदेश्यः त्रि मध्यदेशोद्भवः
यथा कशाश्वेव संसक्ता मध्य
देश्या नानास्त्रिमे इतिवामनपु ।
राणे १२ अध्यायः ॥
मध्यंदिनः पुं बंधूकवृक्षः इति
राजनिर्घंटः
मध्यपंचमूलकं क्ली पंचमूलपा
चनविशेषः यथा बला पुनर्नवैरं
ड सर्पपर्णी द्वयेन तु पकत्र यो
जितेनैव स्यान्मध्यं पंच मूलकं ।
इति राजनिर्घंटः ॥



मध्यमं क्ली पुं देहमध्यभागः
इत्यमरः ॥
मध्यमः पुं सप्तस्वराणांमध्येपंचम
स्वरः इत्यमरः गानशास्त्रमते ।
चतुर्थ स्वरः सतु क्रौंचस्वरानुस्वः
अस्योच्चारणस्थानं वक्षः व्याकरण
मते अपरः अयं विप्रवर्णः अ
स्य संज्ञा अंतरः अर्थात् चतुः
स्वरमिलितः तस्य नाना श्रुतिर्वि
शतिः तेषां प्रत्येकं द्वात्रिं श
द्भेदेन ७६८ नाना भवंति इति
संगीतशास्त्रं उत्पत्ति भेदः
तस्य लक्षणं प्रियायाः प्रकोपे ।
यः प्रकोपमनुरागं वा न प्रकटय
ति चेष्टया मनोभावं गूहति स
मध्यमः यथा आस्यं यद्यपि
हास्य वर्जित मिदं लास्येन हीनं
वचोनेत्रे शोण सरोजकांति रु
चिरे क्वापि क्षणं स्थीयते माला
याः करणेयम मकरिकारंभः कु
चाभोजयो धूपः कुंतल यो
रपीषु सततोः सायूतता दृश्यते
इति रसमंजरी मध्यदेशः इत्य
मरः ग्रहाणां सामयिक संज्ञा
विशेषः यथा युद्ध चक्रहतो ।
दिनसंचयः क्वहृत्वा भगणादि
फलं ग्रहः दृशाचिरः पूर मध्यम

भास्करे क्षितिज सन्निधिगे सति
मध्यमः इति सिद्धान्तशिरोमणिः
मृगभेदः रागभेदः इति ।
धरणिः ।
मध्यमः त्रि मध्यभवः इति मेदिनी
तत्पर्य्यायः माध्यम २ मध्य
मीय ३ माध्यंदिन ४ इति हेम
चंद्रः ॥
मध्यमपाण्डवः पुं अर्जुनः इति
जटाधरः ॥
मध्यमलोकः पुं पृथिवी इति
त्रिकाण्डशेषः ॥
मध्यमभृतकः पुं कृषीवलभृतकः
कृषाण इति भाषा यथा उत्तम
स्त्वायुधीयो ऽत्र मध्यमस्तु कृषीव
लः अधमो भारवाही स्यादि
त्येव त्रिविधो भृतः इति मि
ताक्षरा ॥
मध्यमसंग्रहः पुं स्त्रीग्रहणाख्य
विवादविशेषः तत्र गंध माल्य
वस्त्र भूषादि प्रेरणरूपः यथा
प्रथम साहसादि दंड पारुष्ये चे
था तत्स्वरूपं व्यासेन विवृतं ।
त्रिविधं तत्समाख्यातं प्रथमं
मध्यमोत्तमं अदेश काल भाषा
भि निर्जने च परस्त्रियाः कटा
क्षावेक्षणं हास्यं प्रथमं साहसं ।

स्मृतं प्रेषणं गंधमाल्यानां धूप
भूषण वाससां प्रलोभनं चान्न
पानै र्मध्यमं समुदाहृतं सहा
सनं विविक्तेषु परस्पर मपाश्रयः
केशाकेशि ग्रहश्चैव सम्यक् सं
ग्रहणं स्मृतं इति मिताक्षरायां
स्त्री संग्रहणप्रकरणं ॥
मध्यमसाहसं क्ली बलदर्पितेन
वासः पश्वन्नपानादीनां भंगाक्षेपो
पमर्दादिरूपं सहसा क्रियमाणं
कर्म यथा फल मूलोदकादीनां
क्षेत्रोपकरणस्य च भंगाक्षेपाप
मर्दाद्यैः प्रथम साहसं स्मृतं ।
वासः पश्वन्न पानानां गृहोपकर
णस्य च एतेनैव प्रकारेण मध्य
मं साहसं स्मृतं इति मिता
क्षरा ॥
मध्यमसाहसः पुं दंडविशेषः
सतु पंचशतपण रूपः यथा प
णानां द्वे शते सार्द्धे प्रथमः साह
सः स्मृतः मध्यमः पंच विज्ञेयः
सहस्रं त्वेव चोत्तमः लोभात् स
हस्रं दण्ड्य मोहात् पूर्वंत साह
सं भयाद्वा मध्यमो दंडो मै
त्रात् पूर्वं चतुर्गुणं इति मानवे
साक्षिप्रकरणे ८ अध्यायः ।
मध्यमा हृष्टरजस्कानारी कर्णिका


अंगुलिभेदः अक्षरच्छन्दः ॥
इति मेदिनी हृदयास्थित बुद्धि ।
पुन नादरूपवर्णः यथा पश्यन्त
पश्यंत्यथ हृदयगा बुद्धियुङ् मध्य
माख्यः इत्यलंकारकौस्तुभः स्वी
यार्यंतर्गत नायिकाभेदः तस्या
लक्षणं हिताहित कारिण्यपि ।
प्रियतमे हिताहित कारिणी या
सा अस्यास्तु व्यवहारानुसारिणी
चेष्टा इति रसमंजरी ॥
मध्यमिका स्त्री हृष्टरजस्कानारी इ
ति शब्दरत्नावली ॥
मध्यमीय त्रि मध्यमं इति हेम
चंद्रः ॥
मध्यमेश्वरः पुं काशीस्थशिवलिं
ग विशेषः यथा यत्रत्य देवते
विप्रा मन्दाकिन्यां कृतोदकाः
अर्च्चयंति महादेवं मध्यमेश्वरमी
श्वरं स्नानं दानं तपः श्राद्धं ॥
पिंड निर्वापणं त्विह एकैकशः
कृते विप्राः पुनात्यासप्तमं कुलं ।
सन्निहित्या मुपस्पृश्य राहुग्रस्ते नि
शाकरे यत्फलं लभते मर्त्य ।
स्तस्माद्दश गुणं त्विह एवमुक्ता
महायोगी मध्यमेशांतिके प्रभुः ।
उवास सुचिरं कालं पूजयन् वैमहे
श्वरं इति कौर्मे ३८ अध्यायः ।

मध्यपः पुं वहुस्येनसर्षपपरिमाणं इतिकेचित् । मध्यरात्रः पुं निशीथः अर्द्धरात्रः इतिहलायुधः ॥ मध्यलोकः पुं पृथिवी मर्त्यलोक इतियावत् वक्ष्यमाण शब्दार्थदर्शनात् ॥ मध्यलोकेशः पुं राजा इति हेमचंद्रः ॥ मध्यस्थः त्रि मध्यस्थायी तत्पर्यायः विलम्बः २ इति त्रिकांडशेषः उभयपक्षहीनः यथा कृत्वापुरोधसं रामः कुरूणां सह पांडवैः तीर्थाभिषेक व्याजेन मध्यस्थः प्रययौकिल इतिश्रीभागवते ९ स्कंधे ७८ अध्यायः अर्थो विरोधेन परार्थघटकः यथा ते ते सत्पुरुषाः परार्थघटकः स्वार्थस्य बाधेन ये मध्यस्थाः परकीयकार्यकुशलाः स्वार्थाविरोधेन ये ते ऽमी मानुष राक्षसाः परहिते येः स्वार्थेनो हन्यते ये तत्त्वनिविरर्थकं परहितं तेकेनजानी महे । इति प्राचः ॥ मध्यस्थलं क्ली कटिदेशः यथा वैामरिचसन्निभौ मरजमध्यमध्यस्थली अहो तिमिरमंजरी सहचरी नरी नृत्यते इन्दुरहटः ॥

मध्या स्त्री मध्यमांगुलिः इतिहेमचंद्रः नायिकाविशेषः अस्या लक्षणं समानलज्जा मदना प्रोक्त यौवनशालिनी मध्या ...

लक्षणं समानलज्जा मदना प्रैव वानिश्चयादतिविश्रब्धनवोढा अस्याश्चेष्टा सागसि प्रेयसि धैर्यो वक्रोक्ति रधैर्यपरुषवाक् यथा स्वापे प्रियानन विलोकन हानिरेव स्वापयुनोप्रियकर ग्रहणे प्रसंगः इत्थं सरोरुहमुखी परिविंतयंती स्वापं विधानमपि हानमपि प्रपेदे मध्या प्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे धीरा अधीरा धीराधीरा चेति इतिरसमंजरी । मध्याह्नः पुं त्रिधाविभक्तदिनमध्यभागः सच दशदंडात्परं दशदंडद्वयः इतिस्मृतिः अमरो । कृस्य पंचधा विभक्तदिन तृतीयभागः स त्वद्वादशदंडात् परं वड्दंडात्मकः इतिस्मार्त्तसम्मत स्पृहाणे एष नियमस्त्रिं शद्दंडदिनाभिप्रायेण न्यूनाधिके न्यूनाधिककालो ज्ञेयः मध्याह्नकृत्यं यथा ततो मध्याह्नसमये स्नानार्थं मृदमाहरेत् पुष्पाक्षतं कुशतिलान् गोमयं शुद्ध

मेवच नदीषु देवखातेषु तडागेषु सरित्सु च स्नानं समाचरेन्नित्यं गर्भप्रस्रवणेषु च परकीयनिपानेषु न स्नायाद्धि कदाचन पंचपिंडान् समुद्धृत्य स्नायाद्वासंभवे पुनः मृदैकया शिरः क्षाल्यं द्वाभ्यां नाभेस्तथोपरि अधश्चतिसृभिः कार्य्यपादौ षड्भिस्तथैव च मृत्तिका च समुद्दिष्टा साड्रामलकमात्रिका गोमयस्य प्रमाणं तत्तेनांगं लेपयेत्ततः लेपयित्वाथतीरस्थस्तल्लिंगेनैव मंत्रतः प्रक्षाल्याचम्यविधिवत्ततः स्नायात् समाहितः अभिमंत्र्य जलं मंत्रैस्तल्लिंगैर्वारुणैः शुभैः भावपूतस्तदव्यक्तं ध्यायन् वै विष्णुमव्ययं आपो नारायणोद्भूता स्ता एवास्यायनं पुनः तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः प्रेक्ष्य सोंकारमादित्यं त्रिर्निमज्जेज्जलाशये ॥ पुनः पुनराचम्यावाभेन्मंत्रेणानेन । मंत्रवित् अंतश्चरसि भूतेषु गुहायां विश्वतो मुखः त्वं यज्ञस्त्वंवषट्कार आपोज्योतीरसोऽमृतं । द्विवारम्वा त्रिरभ्यस्येत् व्याहृतिं प्रणवान्वितां सावित्रीं वा जपेद्विद्वांस्तथा चैवाघमर्षणं ततः संमार्ज्जनं कुर्य्यादापोहिष्ठा मयो भुवः इदमापः प्रवहत व्याहृतिभिस्तथैव च ततोऽभिमंत्र्य तत्तीर्थमापोहिष्ठादि मंत्रकैः अंतर्जले त्रिरावर्त्त्य सर्वपापात् प्रमुच्यते । अपः पाणौ समादाय जप्त्वा वै मार्जने कृते विन्यस्य मूर्ध्नि तत्तोयं मुच्यते सर्वपातकैः अघमर्षणः क्रतुराट् सर्वपापापनोदनः तथाघमर्षणं सूक्तं सर्वपापापनोदनं । अथोपतिष्ठेदादित्यं मूर्ध्नि पुष्पान्वितांजलिं प्रक्षिप्यालोकयन्दं ॥ वमुद्वयं वैदिकैः पां उदुत्यं चित्रं देवानां मित्यादिभिरनन्यधीः हंसः शुचिषदेतेन सावित्र्या च विशेषतः अन्यैश्च वैदिकैर्मंत्रैः सौरैः पाप प्रणाशनैः सावित्रीं वै जपेत् पश्चाज्जप यज्ञः स वै स्मृतः विविधानि पवित्राणि गुह्यविद्यास्तथैव च शतरुद्रियमथर्वशिरः सौरमंत्राश्च शक्तितः प्राक्कूलेषु समासीनः कुशेषु प्राङ्मुखः शुचिः तिष्ठंश्चदीक्षमाणोऽर्कं जाप्यं कुर्य्यात्समाहितः । स्फाटिकेन्द्राक्ष रुद्राक्ष पुत्रजीव समुद्भवैः कर्तव्या अक्षमाला वा उत्तराउत्तमा स्मृता जपकालेन ।



भाषेत नान्यानि प्रेक्षयेद्बुधः न
कम्पयेच्छिरो ग्रीवां दन्तान्नैव प्रका
शयेत् गुह्यका राक्षसाः सिद्धा
हरंति प्रस भम्भयात् एकान्तेषु।
शुभे देशे तस्माज्जप्यं समाचरेत्
चंडालाशौचि पतितान् दृष्ट्वाचम्य
पुनर्जपेत् मेरेव भाषणं कृत्वा
स्नात्वा चैव जपेद्बुधः आचम्य प्र
यतो नित्यं जपेदशुचि दर्शने
सौरान् मंत्रान् शक्तितो वै पा
वमानीस्तु कामतः यदि स्यात् क्लि
न्नवासो वै वारिमध्यगतो जपेत्
अन्यथा तु शुचौ भूम्यां दर्भेषु सु
समाहितः प्रदक्षिणं समावृत्य
नमस्कृत्वा ततः क्षितौ आचम्य
च यथा शास्त्रं शक्त्या स्वाध्याय मा
चरेत् ततः संतर्पयेद्देवानृषीन्पितृ
गणान् क्रमात् आदावोंकारमुच्चा
र्य नमोऽन्ते तर्पयामि च देवान्ब्र
ह्मऋषींश्चैव तर्पयेदक्षतोदकैः
तिलोदकैः पितॄन् भक्त्या स्वसू
त्रोक्त विधानतः अन्वारब्धेन स
व्येन पाणिना दक्षिणेन च देवर्षी
स्तर्पयेद्धीमानुदकांजलिभिः पि
तॄन् यज्ञोपवीती देवानां निवीती
ऋषितर्पणं प्राचीनावीती पैत्र्ये
स्वेन तीर्थेन भावतः नाभीरूप

स्नान वस्त्रं वै समाचम्य च वा
ग्यतः सौ मैत्रै रर्चयेद्देवान् पुष्पैः
पत्रैरथाम्बुभिः ब्रह्माणं शंकरं सू
र्यं तथैव मधुसूदनं अन्यांश्चाभि
मतान्देवान् भक्त्या चाक्रोधनो न
रः प्रदद्याद्वाथ पुष्पाणि सूक्तेन
पुरुषेण तु आपो वा देवताः स
र्वास्तेन सम्यक् समर्चिताः नम
स्कारेण पुष्पाणि विन्यसेद्वै पृथक्
पृथक् न विष्ण्वाराधनात् पुण्यं वि
द्यते कर्मवैदिकं तस्मादनादिमध्यां
ते नित्य माराधयेद्धरिं तद्विष्णो
रिति मंत्रेण सूक्तेन पुरुषेण तु
नैताभ्यां सदृशो मंत्रो वेदेषूक्त
श्चतुर्ष्वपि निवेदयेत् स्वमात्मनं
विष्णावमल तेजसि तदात्मा त
न्मनाः शांतस्तद्विष्णो रिति मंत्रतः
अथवा देव मीशानं भगवंतं सना
तनं आराधयेन्महादेवं भावपू
तो महेश्वरं मंत्रेणरुद्रगायत्र्या।
प्रणवेनाथ वा पुनः ईशानेनाथ
वा रुद्रैस्त्र्यम्बकेन समाहितः पुष्पै
पत्रैरथाद्भिश्च चंदनाद्यैर्महेश्वरं
अथो नमः शिवायेति मंत्रेण ।
नेन याजयेत् नमस्कुर्यान्महादेव
मृतं सत्यमितीश्वरं निवेदयीत
स्वात्मानं यो ब्रह्माण मितीश्वरं ।

प्रदक्षिणं द्विजः कुर्यात् पंचब्रह्म
णैवजपन् ध्यायेत्तं देवमीशानं ।
व्योम मध्य गतं शिवं अथावलो
कयेदर्कं हंसः शुचिषदित्यृचा ॥
कुर्यात् पंच महायज्ञान्गृहं कृत्वा
समाहितः देवयज्ञं पितृयज्ञं
ऋषियज्ञं तथैवच मानुष्यं ब्रह्म
यज्ञंच पंचयज्ञान्प्रचक्षते यदि
स्यात्तर्पणादर्वाक् ब्रह्मयज्ञः कृ
तोनहि कृत्वा मनुष्ययज्ञं वै ततः
स्वाध्याय माचरेत् अग्नेः पश्चिम
तो देशे भूतयज्ञान्त एव वा कु
शासन समासीनः कुशपाणिः स
माहितः शालाग्नौ लौकिकाग्नौ वा
जले भूम्यां यथापिवा वैश्वदेवं।
निमित्तं वै देवयज्ञः सवै स्मृतः
यदिस्याल्लौकिके पक्वं ततोऽन्नं
तत्र हूयते शालाग्नौ तत्र देवान्नं
विधि रेष सनातनः देवेभ्यस्तु
हुतादद्यात् शेषात् भूतबलिं ह
रेत् भूतयज्ञः सवैज्ञेयो भूति
दः सर्वदेहिनां श्वभ्यश्च श्वपचेभ्य
श्च वयोभ्यो नित्यमेवच दद्या
द्भूमौ बलिं त्वन्नं पतितेभ्योऽप्य
द्विजोत्तमः सायं चान्नस्य सिद्धं।
स कुर्यादेव मतंद्रितः भूतयज्ञः
स्वयंनित्यं सायंप्रात र्विधीयते ॥

एकंतु भोजयेद्विप्रं पितॄनुद्दिश्य स
त्तम अथवाप्य यथाशक्ति किंचिदन्नं
समाहितः देवतत्वार्थविदुषे द्विजा
यैवोपपादयेत् पूजयेदतिथिं ।
नित्यं नमस्येदर्चयेद्द्विजं मनो
वाक्कर्मभिः शांतमागतं स्वगृहं त
ते हंतकार मथाग्रं वा भिक्षां ।
वा शक्तितो द्विजः दद्यादतिथये
नित्यं बुद्ध्या तं परमेश्वरं भिक्षा
माहुर्ग्रासमात्र मग्रं स्याच्चतुर्गु
णं पुष्कलं हंतकारं तत्त्रिगुणं
मुच्यते गोदोह मात्रं कालं वै
प्रतीक्ष्यो ह्यतिथिः स्वयं अभ्या
गतान् यथा शक्ति पूजयेदतिथिं
यथा भिक्षां वै भिक्षवे दद्या
द्विधिवद्ब्रह्मचारिणे दद्यादन्नं यथा
शक्ति त्वर्थिभ्यो लोभवर्जितः ॥
सर्वेषा मप्यलाभे तु अन्नं गोभ्यो।
निवेदयेत् भुंजीत बंधुभिः सार्द्धं
वाग्यतोऽन्नमकुत्सयन् अकृत्वा तु
द्विजः पंचमहायज्ञान् द्विजोत्तमाः
भुंजीतचेत् समूढात्मा तिर्यग्यो।
निं स गच्छति वेदाभ्यासोऽन्वहं।
शक्त्या महायज्ञ क्रियाक्षमाः ना
शयत्याशु पापानि देवानामर्चनं त
था यो मोहादथवालस्यादकृत्वा।
देवतार्चनं भुंक्ते स याति नरकान्।

शूकरेष्वभिजायते तस्मात् सर्व्वप्रयत्नेन कृत्वा कर्म्माणि वै द्विजः । भुञ्जीत स्वजनैः सार्द्धं स याति परमां गतिम् ॥ इति कौर्म्मे उपरिभागे ७ अध्यायः ॥ अत्र भोजनविधिर्भोजनशब्दे द्रष्टव्यः ॥

मधूलः पुं मधुवारः इति शब्दचन्द्रिका ॥

मधालु स्त्री मूलविशेषः मौआलु इति भाषा अस्य गुणाः रक्तपित्तनाशित्वं गुरुत्वं स्वादुत्वं शीतत्वं स्तन्यशुक्रकारित्वञ्च इति राजवल्लभः ॥

मधालुकं क्ली कन्दविशेषः मौआलु इति भाषा इति शब्दचन्द्रिका ॥

मध्वासवः पुं मधूकपुष्पकृतमद्यं तत्पर्य्यायः माधवकः २ मधु ३ माध्वीकं ४ इत्यमरः ॥

मध्वासवनिकः पुं शौण्डिकः इति शब्दमाला ॥

मध्विजा स्त्री मदिरा इति हेमचन्द्रः ॥

मन अर्च्चे गर्व्वे गर्व्वे इति कविकल्पद्रुमः मनति इति दुर्गादासः ॥

मनक उ गर्व्वे इति कविकल्पद्रुमः क उ मानयते गर्व्वकोऽहङ्कारः मनस्तम्भे इति प्रांचः मानयते शार्ङ्गं वली स्तम्भानीत्यर्थः इति रमानाथः इति दुर्गादासः ।

मन द उ बोधे इति कविकल्पद्रुमः द उ मनुते इति दुर्गादासः ।

मन य ङौ उ बोधे इति कविकल्पद्रुमः य उ मन्यते सौ अमंस्त । इति दुर्गादासः ॥

मन तक ह्रतौ इति कविकल्पद्रुमः दन्त्यनोपधः मन्यति इति दुर्गादासः


मनः पुं जटामांसी इति शब्दचन्द्रिका ।

मनः क्ली ज्ञानेन्द्रियविशेषः तत्तु बुद्धीन्द्रियाणां मध्ये प्रधानं श्रीकृष्णविभूतिश्च यथा इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना इति भगवद्गीता तत्तु गर्भस्य सप्तमे मासि जायते इति सुखबोधः तत्पर्य्यायः चित्तं २ चेतः ३ हृदयं ४ स्वान्तं ५ हृत् ६ मानसं ७ इत्यमरः अनंगकं ८ अंगं ९ इति शब्दरत्नावली अपि च मनो महान् मतिर्ब्रह्मा पूर्ब्बुद्धिः ख्यातिरीश्वरः प्रज्ञा संवित् चितिश्चैव । स्मृतिश्च परिपठ्यते पर्य्यायवाचकैः शब्दैर्मनसः परिकीर्त्तितः इति महाभारते मोक्षधर्म्मः ॥

मायमने अस्य गुणाः ॥ परत्वं अपरत्वं संख्या ॥ परिमितिः पृथक्त्वं संयोगः विभागः । वेगश्च मनोग्राह्याणि यथा सुखं दुःखं इच्छा द्वेषः मतिः यत्नश्च इदं परमाणुस्वरूपं शिरोमणिमते वायवीय परमाणुरूपं यथा परापरत्वं संख्याद्याः पंचवेगश्च । मानसे मनोग्राह्ये सुखदुःखमिच्छा द्वेषो मतिः कृतिः अयोगपद्याज्ज्ञानानां तस्याणुत्वमिहोच्यते इति भाषापरिच्छेदः जन्यज्ञानसामान्यं प्रति च मनोयोगः कारणं यथा त्वचो योगो मनसा ज्ञानकारणं इत्यपि तत्रैव ॥ तस्य नव गुणा यथा धैर्य्योपपत्तिर्व्यक्तिश्च विसर्गः कल्पना क्षमा । सदसच्चाशुता चैव मनसो नव वै गुणाः इति मोक्षधर्म्मः अस्य व्याख्या धैर्य्यं १ उपपत्तिः ऊहापोहकौशलं २ व्यक्तिः स्मरणं ३ विसर्गः विपरीतसर्गो भ्रान्तिः ४ कल्पना मनोरथवृत्तिः ५ क्षमा ६ सत्त्वगुणादि ७ असत् रागद्वेषादि ८ आशुता अस्थिरत्वं ९ इति तट्टीका ॥ अस्य चातुर्विध्यं यथा मनोबुद्धिरहंकारश्चित्तं करणमान्तरं संशयो निश्चयो गर्व्वः स्मरणं विषया अमी इति वेदान्तः ॥ तस्य अध्यात्मत्वादि यथा अध्यात्मं मन इत्याहुः पंचभूतात्मधारकं अधिभूतञ्च संकल्पश्चन्द्रमाश्चाधिदैवतं इति महाभारते आश्वमेधिक । पर्व्व तस्य स्वरूपं यथा अनिरूप्य महत् पंच ज्ञानभेदं मनः स्मृतं इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः तस्य पापा ॥ स्थापाशस्यानुमापकानि यथा । जनानां हृदयं सद्यः सद्यक्त वचनेनैव शिष्ये कलत्रे कन्यायां । दौहित्रे बान्धवेऽपि च पुत्रे पौ ॥ त्रे च वचसि प्रताप यशसि श्रियो वृद्धौ वारिणि विद्यायां ज्ञायते हृदयं नृणाम् इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २ अध्यायः ॥ तस्यैव बन्धमोक्षहेतुत्वं यथा मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धस्य विषयासंगि मुक्त्यै । निर्व्विषयं तथा इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥

मनश्चापः त्रि मनोज्ञः इति त्रिकाण्डशेषः ॥

मनःशिलः पुं मनःशिला यथा टंकैर्मनःशिलगुहैर्विदार्य्यमाना



इत्यमरटीकायां भरतः ।
मनःशिला स्त्री रक्तवर्णधातुवि
शेषः मनछल इति भाषा सा च लक्ष्मी
वीर्य्य इति वैद्यकं तत्पर्य्यायः कुन
टी २ मनोह्वा ३ नागजिह्विका ४
इत्यमरः नेपाली ५ शिला ६
इति रत्नमाला मनोज्ञा ७ नेपा
लिका ८ मनोगुप्ता ९ कल्याणिका
१० रोगशिला ११ इति राजनिर्घण्टः
गोला १२ दिव्यौषधिः १३ इति
भावप्रकाशः अस्या गुणाः कटु
त्वं स्निग्धत्वं लेखनत्वं विष भू
तावेश भयोन्माद नाशित्वं व
श्यकारित्वञ्च इति राजनिर्घण्टः
अपिच तिक्तत्वं कफनाशित्वं
सारकत्वं छर्दिकारित्वं कुष्ठज्व
र पाण्डुकास श्वासनाशित्वं अक्ष
मङ्गलकारित्वञ्च इति राजवल्लभः
अन्यच्च मनःशिला गुरुर्वर्ण्या
सरोष्णा लेखनी कटुः तिक्ता ।
स्निग्धा विष श्वासकासभूतकफा
स्रनुत् मनःशिला मन्दबलं करो
ति जन्तुं ध्रुवं शोधनमन्तरेण म
लानुबन्धं किल मूत्ररोधं सशर्करं
कृच्छ्र गदञ्च कुर्य्यात् इति भाव
प्रकाशः ॥
मननं क्ली बुद्धिः इति राजनिर्घण्टः

मनसा स्त्री देवीविशेषः तत्प
र्य्यायः कद्रूः १ मनसादेवी २ विषह
री ३ इति जटाधरः अस्याः प्रणाम
मन्त्रः आस्तीकस्य मुनेर्माता भ
गिनी वासुकेस्तथा जरत्कारु मु
नेः पत्नी मनसादेवि नमोऽस्तु ते ।
इति तस्याः पूजापद्धतिः तस्या
नाम्नां व्युत्पत्ति र्यथा श्रीनारायण
उवाच श्रूयतां मनसाख्यानं यत्
श्रुतं धर्मवक्त्रतः कन्या सा च भग
वती कश्यपस्य च मानसी तेनेयं
मनसादेवी मनसा या च दीव्यति
मनसा ध्यायते या वा परमात्मान
मीश्वरी तेन सा मनसादेवी यो
गेन तेन दीव्यति आत्मारामा
च सा देवी वैष्णवी सिद्धयोगिनी
त्रियुगञ्च तपस्तप्त्वा कृष्णस्य परमा
त्मनः जरत्कारुशरीरञ्च दृष्ट्वा य
त्क्षीणमीश्वरः गोपीपतिर्नाम च
क्रे जरत्कारुरिति प्रभुः वाञ्छितं
तञ्च ददौ तस्मै कृपया च कृपानिधिः
पूजाञ्च कारयामास चकार च ॥
पुनः पुनः स्वर्गे च नागलोके च पृ
थिव्यां ब्रह्मलोकतः भृशं जग
द्गौरी सा सुन्दरी च मनोहरा ॥
जगद्गौरीति विख्याता तेन सा पू
जिता सती शिवशिष्या च सा

देवी तेन शैवीति कीर्त्तिता विष्णु
भक्तातीव याच वैष्णवी तेन नार
द नागानां प्राणरक्षित्री यज्ञे ज
न्मेजयस्य च नागेश्वरीति विख्या
ता सा नागभगिनीति च विषं संह
र्त्तुमीशा सा तेन विषहरीति सा
सिद्धं योगं हरात् प्राप तेनासौ
सिद्धयोगिनी महाज्ञानञ्च गो
प्यञ्च मृतसञ्जीवनीं परां महा
ज्ञानयुतां ताञ्च प्रवदन्ति मनीषि
णः आस्तीकस्य मुनीन्द्रस्य माता सा
च तपस्विनः आस्तीकमाता वि
ख्याता जगत्सु सुप्रतिष्ठिता प्रिया
मुनेर्जरत्कारो र्मुनीन्द्रस्य महात्मनः
योगिनो विश्वपूज्यस्य जरत्कारु
प्रिया ततः ओं नमो मनसायै ।
जरत्कारु र्जगद्गौरी मनसा सिद्ध
योगिनी वैष्णवी नागभगिनी शै
वी नागेश्वरी तथा जरत्कारुप्रि
यास्तीकमाता विषहरीति च म
हाज्ञानयुता चैव सा देवी विश्वपूजि
ता द्वादशैतानि नामानि पूजाका
ले च यः पठेत् तस्य नागभयं नास्ति
तस्य वंशोद्भवस्य च । नागभीते
च शयने नागग्रस्ते च मन्दिरे ना
गक्षते महादुर्गे नागवेष्टितविग्रहे
इदं स्तोत्रं पठित्वा तु मुच्यते


नात्र संशयः नित्यं पठेद्यस्तं दृष्ट्वा
नागवर्गः पलायते दशलक्षजपे
नैव स्तोत्रसिद्धि र्भवेन्नृणां स्तोत्र
सिद्धि र्भवेद्यस्य स विषं भोक्तुमी
श्वरः नागौघं भूषणं कृत्वा स भवे
न्नागवाहनः नागासनो नागतल्पो
महासिद्धो भवेन्नरः इति ब्रह्म
वैवर्त्ते महापुराणे प्रकृतिखण्डे ना
रायणनारदीये मनसोपाख्याने म
नसास्तोत्रं नाम द्विचत्वारिंशत्तमो
ऽध्यायः तस्याः पूजा मन्त्रा
दि यथा श्रीनारायण उवाच पूजा
विधानं स्तोत्रञ्च श्रूयतां मुनिपुङ्गव
ध्यानञ्च सामवेदोक्तं देवी पूजा
विधानकं श्वेतचम्पकवर्णाभां ।
रत्नभूषणभूषितां वह्निशुद्धांशु
कधानां नागयज्ञोपवीतिनीं ॥
महाज्ञानयुतां चैव प्रवरां ज्ञा
निनां सतां सिद्धाधिष्ठातृदेवीञ्च ।
सिद्धां सिद्धिप्रदां भजे इति
ध्यात्वा तु तां देवीं मूलेनैव प्रपू
जयेत् नैवेद्यै र्विविधै र्दीपैः
पुष्पधूपानुलेपनैः मूलमन्त्रश्च वे
दोक्तो भक्तानां वाञ्छितप्रदः ।
मूलकल्पतरु र्नाम सुसिद्धो द्वादशा
क्षरः ओं ह्रीं श्रीं क्लीं ऐं मनसा
देव्यै स्वाहा पञ्चलक्ष जपेनैव ॥

मंत्रसिद्धिर्भवेन्नृणां मंत्रसिद्धि
र्भवेद्यस्य स सिद्धो जगतीतले
स्वयासमं विषं तस्य धन्वंतरिसमो
भवेत् ब्रह्मन्नाषाढसंक्रान्त्यां गू
हीशाखासु यत्नतः आवाह्य देवी
मीशानां पूजयेद्यो हि भक्तितः
पंचम्यां मनसाख्यायै देव्यै दद्या
च्च यो बलिं धनवान् पुत्रवांश्चैव
कीर्तिवांश्च भवेद्ध्रुवं पूजाविधा
नं कथितं तदाख्यानं निशामय
कथयामि महाभाग यच्छ्रुतं धर्म
वक्त्रतः तस्या जन्म कारणं यथा
पुरा नागभयाक्रान्ता बभूवुर्मानवा
भुवि यान् यान् खादंति नागा
स्तेन जीवंति नारद मंत्रांश्च स सृ
जे भीतः कश्यपो ब्रह्मणार्थितः
वेदबीजानुसारेण चोपदेशेन ब्रह्म
णः मंत्राधिष्ठातृदेवीं तां मनसा
ससृजे सतः तपसा मनसा तेन
बभूव मनसा च सा तस्मात्
पस्या दिव्यया कुमारी सा च संभूय
जगाम शंकरालयं भक्त्या संपूज्य
कैलासे तं चंद्रशेखरं दिव्यं।
वर्षसहस्रं च तं सिषेवे संसता
आशुतोषो महेशश्च तां च तुष्टो
बभूव ह महाज्ञानं ददौ तस्यै
पाठयामास सामवेदं कृष्णमंत्रं क

ल्पतरुं दशाक्षरं लक्ष्मी
मायाकामबीजं ङेंतं कृष्णपदं
तथा त्रैलोक्यमंगलं नामकवचं पू
जाक्रमं सर्वं पूजां च स्तवनं ध्यानं
भुवनपावनं पुरश्चर्याक्रमं चापि
वेदोक्तं सर्वसम्मतं प्राप्य मृत्यु
जयाज्ञानं परं मृत्युंजयं सती।
जगाम तपसे साध्वी पुष्करं शं
कराज्ञया त्रियुगं च तपस्तप्त्वा कृ
ष्णस्य परमात्मनः सिद्धा बभूव सा
देवी ददर्श पुरतः प्रभुं दृष्ट्वा कृ
शांगीं बालां च कृपया कृपानिधिः
पूजां च कारयामास चकार च स्वयं
हरिः वरं च प्रददौ तस्यै पूजि
ता त्वं भवे भव वरं दत्वा च कल्या
णे सद्यश्चान्तर्दधे विभुः प्रथमे
पूजिता सा च कृष्णेन परमात्मना
द्वितीये शंकरेणैव पेन सुरेण।
च मनुना मुनिना चैव नागेन मान
वादिना बभूव पूजिता सा च त्रिषु लो
केषु सुव्रता तस्या विवाहः।
सा मिके ह्येक नागश्च यथा जरत्का
रुमुनीन्द्राय कश्यपस्तां ददौ पुरा
अयाचितो मुनिश्रेष्ठो जग्राह ब्र
ह्मणाज्ञया कृत्वोद्वाहं महायोगी
विश्रान्तस्तपसा चिरं सुष्वाप देव्या
स्तवने वटमूले च पुष्करे निद्रां

जगाम च मुनिः स्नात्वा निद्रेशा
मीश्वरं जगामास्तं दिनकरः सायं।
कालज्ञस्तपस्विनः संचिन्त्य मनसा त
त्र मनसा साध्वी पतिव्रता धर्मलोपभ
येनैव चकाराथो चनं सती श्रुत्वा
पश्चिमां संध्यां नित्यां चैव द्विज
न्मनां ब्रह्महत्यादिकं पापं ल
भिष्यति पति मम नोपतिष्ठति
यः पूर्वां नोपास्ते यस्तु पश्चिमां
स च एवाशुचिर्नित्यं ब्रह्महत्यादि
कं लभेत् देवोक्तमपि संचिन्त्य
बोधयामास तं मुनिं स च बुद्ध्वा
मुनिश्रेष्ठश्चुकोप तां दृष्ट्वा मुनिः
जरत्कारुरुवाच कथं मे सव्रते।
साध्वि निद्राभंगः कृतस्त्वया व्यर्थ
व्रतादिकं तस्याया भर्तुश्चापका
रिणी तपश्चानपानं चैव व्रतं दा
नादिकं च यत् भर्तुरप्रियकारि
ण्याः सर्वं भवति निष्फलं यया पि
यः पूजितस्तया श्रीकृष्णः पूजितस्त
या पतिव्रतार्थं च पतिरूपी।
हरिः स्वयं सर्वदानं सर्वयज्ञः सर्व
तीर्थनिषेवणं सर्वव्रतं तपः।
सर्वमुपवासादिकं च यत् सर्वधर्म
च सत्यं च सर्वदेवप्रपूजनं तत्
सर्वं स्वामिसेवायाः कलां नार्हति
षोडशीं सुपुण्ये भारते वर्षे प

तिसेवां करोति या वैकुंठं स्वा
मिना सार्द्धं सा याति ब्रह्मणः शान्ते
विप्रियं कुरुते भर्त्तुर्विप्रियं वद
ति प्रियं असत्कुल प्रजाता या
तत्फलं श्रूयतां सति कुंभीपा।
कं व्रजेत् सा च यावच्चंद्रदिवाकरौ।
ततो भवति चांडाली पति पुत्र
विवर्जिता इत्युक्त्वा च मुनिश्रेष्ठो ब
भूव स्फुरिताधरः चकंपे मनसा।
साध्वी भयेनोवाच तं पतिं मन
सोवाच संध्यालोप भयेनैव नि।
द्राभंगः कृतस्तव कुरु शान्तिं महा
भाग दुष्टाया मम सुव्रत शृंगाराहा
र निद्राणां यश्च भंगं करोति च।
स व्रजेत् कालसूत्रं च स्वामिनश्च
विशेषतः इत्युक्त्वा मनसा देवी स्वा
मिनश्चरणाम्बुजे पपात भक्त्याभी
ता च रुरोद च पुनः पुनः कुपितं च
मुनिं दृष्ट्वा श्रीसूर्य्यं शशाप तं।
तत्राजगाम भगवान् संध्यया सह
नारद तत्रागत्य मुनिश्रेष्ठमुवा
च भास्करः स्वयं विनयेन च भीत।
स्तेनया सह यथोचितं श्रीसूर्य्य उवा
च सूर्यास्तसमयं दृष्ट्वा साध्वीय
र्मभयेनैव बोधयामास त्वां विप्रनाह
मस्तं गतस्तदा त्वामस्व भगवन्ब्रह्मन्मा
शाप्तुं नोचितं मुने ब्राह्मणा।



नांच हृदयं नवनीत समं तदा
तेषां तामाईं क्रोधश्च ततो भस्मा
भवेज्जगत् पुनः स्रष्टुं द्विजः प्रा
क्तो नतेजस्वी द्विजात्परः ब्राह्मणो
ब्राह्मणो वंशः प्रज्वलन् ब्रह्मतेजा
सा श्रीकृष्णं भावयेन्नित्यं ब्रह्मज्यो
तिः सनातनं सूर्यस्यवचनं श्रुत्वा
द्विजः शांतो बभूवह सूर्यो जगाम
स्वस्थानं गृहीत्वा ब्राह्मणाशिषं। त
त्याज मनसां विप्रः प्रतिज्ञापालनाय
च रुदंती शोकयुक्ता च हृदयेन
विदूयता सा सस्मार गुरुं शंभु
मिष्टदेवं हरिं विधिं कश्यपं ज
न्मदातारं विपन्नो भयकर्षिता त
त्राजगाम भगवान् गोपीशः शंभु
रेवच विधिश्च कश्यपश्चैवमनसा
परिचिंतितः दृष्ट्वा विप्रो ऽभीष्ट
देवं निर्गुणं प्रकृतेः परं तुष्टाव
परया भक्त्या प्रणनाम मुहुर्मुहुः
नमश्चकार शंभुंच ब्रह्माणं कश्यपं।
पन्नदा कथमागमनं देवा इति प
श्नं चकारसः ब्रह्मा तद्वचनं श्रुत्वा।
सहसा समयोचितं समुवाच नम
स्कृत्य हृषीकेश पदाम्बुजं ब्रह्मोवाच
यदि त्यक्ता धर्मपत्नी धर्मिष्ठा मन
सासती कुरुष्वास्यां सुतोत्पत्तिं
स्वधर्म पालनाय वै पत्नीवा ब्रह्म

चारी वा भिक्षुर्वनचरोऽपि वा।
जायायां च सुतोत्पत्तिं कृत्वा प
श्चात् त्यजेत्सुते अकृत्वा त सु
तोत्पत्तिं वैराग्यं त्यजेत् प्रियां
स्रवेत्तप स्तत्पुण्यंच चालन्यांवा
यथा जलं ॥ तस्याः पुत्रो
त्पत्तिर्यथा ब्रह्मणोवचनं श्रुत्वा
जरत्कारु र्मुनीश्वरः चकार तन्ना
भिस्पर्शं योगेन मंत्रपूर्वकं त
स्यै शुभाशिषं दत्वा ययुर्देवाःमुदा
न्विताः मुदान्विता च मनसा जरत्
कारुर्मुदान्वितः मुनेःकरस्पर्शमा
त्रात् सद्यो गर्भो बभूवह मनसा
या मुनिश्रेष्ठ उवाच मां ॥
जरत्कारु रुवाच गर्भेणानेन मन
से तव पुत्रो भविष्यति जिते
न्द्रियाणां प्रवरो धार्मिको वैष्णवा
ग्रणीः तेजस्वी च तपस्वी यशस्वी।
गुणान्वितः वरो वेदविदांचैव।
ज्ञानिनां योगिनां तथा सच पुत्रो
विष्णुभक्तो धार्मिकः कुलमुद्धरेत्
नृत्यन्ति पितरः सर्वे यज्जन्ममात्र
तोमुदा पतिव्रता सुशीला या सा
प्रिया प्रियवादिनी धर्मिष्ठा पुत्र
माता च कुलजा कुलपालिका ह
रिभक्तिप्रदो बंधुस्तदभीष्टं तत्सुख
प्रदं यो बंधच्छित्सच पिता हरेः।

बंधप्रदर्शी सा गर्भधारिणीयाच
गर्भवास विमोचनी विष्णुमंत्रप्रदा
ताच सगुरु विष्णु भक्तिदः गुरोश्च
ज्ञानोद्गिरणाज्ज्ञानं कृष्णभावनं
आब्रह्मस्तम्ब पर्यन्तं यतो विश्वं
चराचरं आविर्भूतं तिरो भूतं।
किंवा ज्ञानं तदन्यतः वेदज्ञं
योगज्ञं यद्यत्तत् सारं हरिसेवनं
तत्त्वानां सारभूतंच हरेरन्यद्विडम्ब
नं दत्तं ज्ञानं मयातुभ्यंसस्वामी
ज्ञानदो हि यः ज्ञानात् प्रमुच्यते
बंधात्सरिपुर्यो हि बंधदः विष्णु
भक्तिप्रदं ज्ञानं नददाति हि यो
गुरुः सरिपुः शिष्य घातीव यतो
बंधान्न मोचयेत् जननी गर्भजात
क्लेशाद्यम ताडनजात्तथा नमोच
येद्यः स कथं गुरुस्तातो हि बांध
वः परमानंद रूपंच कृष्णमार्गं म
नश्वरं न दर्शयेद्यः सकथं कीदृ
शो बांधवो नृणां भजसाध्वि परं ब्र
ह्माच्युतं कृष्णंच निर्गुणं निर्मूलंच
पुराकर्म भजेद्यत् सेवयाश्वं मया
च्छलेनवं त्यक्ता त्वमेदेवि मम प्रिये
त्वमाश्रुतानां साध्वीनां सत्वात् को
पोनविद्यते पुष्करं तपसे यामि
गच्छ देवि यथासुखं श्रीकृष्णच
रणाम्भोज ध्यान विच्छेदकातरः यता


दिष्टु स्त्रियां प्रीतिः प्रहन्ति वल्मीगच्छ
तां श्रीकृष्णचरणाम्भोज निष्ठहाणां
मनोरथाः जरत्कारु वचः श्रुत्वा
मनसा कोश कातरा सा साश्रु
नेत्रा विनयादुवाच प्राणवल्लभे म
नस्युवाच दोषनाहं त्वया त्यक्ता
निद्राभंगेन तेप्रभो यत्र स्मरामि
त्वां बंधो तत्र मामागमिष्यति बंधु
भेदः क्लेशतमः पुत्रभेदस्ततःपरः
प्राणेशभेदः प्राणानां विच्छेदात्
सर्वतः परः पतिः पतिव्रतानांच।
शतपुत्राधिकः स्मृतः सर्वस्मात्प्रि
यः स्त्रीणां प्रिय स्तेनोच्यते बुधैः
पुत्रे यथैक पुत्राणां वैष्णवानां।
यथा हरौ नेत्रे यथैक नेत्राणां।
तृषितानां यथा जले क्षुधितानां
यथान्नेच कामुकानां यथा स्त्रियां
यथा परस्वे चौराणां यथा जारे।
कुयोषितां विदुषांच यथा शास्त्रे
वाणिज्ये वणिजां यथा तथा शश्व
न्मनः कांते साध्वीनां योषितां प्र
मो इत्युक्त्वा मनसादेवी पपात।
स्वामिनःपदे क्षणं चकार क्रोडे।
तांकृपया स कृपानिधिः नेत्रोदके
न मनसां स्नापयामास तां मुनिः
साश्रुणा च मुनेः क्रोडं सिषेच भे
दकातरा तदा ज्ञानेन तौ द्वौ च

विशाकौ च बभूवतुः स्मारं स्मारं
पदाम्भोजं कृष्णस्य परमात्मनः
जगाम तपसे विप्रः स्वकान्तास्तप
सोऽप्यच जगाम मनसा शंभोः कै
लासं मंदिरं गुरोः ॥ पार्वती
बोधयामास मनसां शोक कर्षि
तां शिव स्थानीव ज्ञानेन शिवेन
च शिवालये सुप्रसन्नदिने साध्वी
सुसुवे मंगल क्षणे नारायणांशं
पुत्रंच ज्ञानिनां योगिनां गुरुं
गर्भस्थितो महाज्ञानं कृत्वा शंकर
वक्त्रतः स बभूवच योगीन्द्रो यो
गिनां ज्ञानिनां गुरुः जातकं
कारयामास वाचयामास मंगलं
वेदांश्च पाठयामास शिवायच शि
वः शिशोः रत्नत्रिकोटिलक्षं च
ब्राह्मणेभ्यो ददौ शिवः पार्वतीच
गवां लक्षं रत्नानि विविधानि च
शंभुश्च चतुरो देवान् वेदांगानी
नरो स्वयं बालकं पाठयामास
ज्ञानं मृत्युंजयं परं भक्ति रक्ति
स्वकान्तेचाभीष्टदेवगुरौहरे य
स्मात्ते नेन त्वत्सुतो बभूवास्तीक
एवच जगाम तपसे विप्रः पुष्क
रं शंकरात्तया संप्राप्य च महा
मंत्रं ततश्च परमात्मनः दिव्यं
वर्षत्रिलक्षंच तपस्तप्त्वा तपोधनः

आजगाम महायोगी नमस्कृत्वेशि
वं प्रभुं शंकरंच नमस्कृत्य कृत्वाच
वालकं पुरः साचाजगाम मनसा
कश्यपस्याश्रमं पितुः तांस पु
त्रां सतां दृष्ट्वा मुदं प्राप प्रजाप
तिः शतलक्षंच रत्नानां ब्राह्मणे
भ्यो ददौ मुने ब्राह्मणान् भोज
यामास सोऽसंख्यान् श्रेयसे शि
शोः अदितिश्चदितिश्चान्या मुदं
प्रापुः परं तथा सासपुत्राच सुचि
रं तस्यौ तातालये तदा तदीयं
पुनराख्यानं वक्ष्यामि तन्निशामय
तस्या माहात्म्यं यथा अथा
भिमन्यु तनये ब्रह्मशापः परी
क्षिते बभूवसहसा ब्रह्मन् दैवदो
षेण कर्मणा समाहे समनीते त
क्षक स्तावं भोक्ष्यते शशापश्य
गीनृपतिं कौशिक्याश्च जलेनच।
राजा श्रुत्वा त तदहनि गंगाद्वारं।
जगाम सः तत्र तस्यौ च समाहं श्रु
श्राव धर्मसंहितां समाहे—— स
मनी तेन गच्छन्ते तक्षकपथिय
त्वन्तरि नृपं नया वंभूव समाहः।
स्वपीति शिष्य परस्परं धन्वन्तरिं मणिं पा
प तक्षकः स्वेच्छया ददौ स्वयौ
नं गृहीत्वा च तक्षः प्रहृष्टमानसः
॥ ॥ ॥ ॥ ॥

तक्षको भक्षयामास नृपंचयेचर।
कश्चितं राजा जगामवैकुंठं स्मा
रं स्मारं हरिं गुरुं सत्कारंकार
यामास पितृ जन्मेजयः सुता रा
जा चकार यज्ञंच सर्पसत्रं ततो
मुने प्राणं तत्याज सर्पाणां सा
मूहो ब्रह्मतेजसा स तक्षकश्चभी
तश्च महेन्द्रं शरणं ययौ सेन्द्रं च
तक्षकं हन्तुं विप्रवर्गः समुद्यतः
अथदेवाश्च मुनयश्चाययुर्मनसा
न्तिकं तां तुष्टाव महेन्द्रश्चभयका
तर विकलः ततश्चास्तीकआगम
यज्ञंच मातृ राज्ञया महेन्द्र त
क्षक प्राणान् ययाचेभूमियं वरं
ददौ वरं नृपश्रेष्ठः कृपया ब्राह्म
णाज्ञया यज्ञं समाप्य विप्रेभ्यो
दक्षिणांच ददौ मुदा विप्राश्च मु
नयो देवा गत्वाच मनसान्तिकं
मनसां पूजयामासुः स्तुस्तुवुश्च पृ
थक्पृथक् शक्रः संभृतसंभारो
भक्तियुक्तः सदाशुचिः मनसां पू
जयामास तुष्टाव परमादरं दत्वा।
षोडशोपचारं बलिंच तत्प्रियं तदा
प्रददौ परितुष्टश्च ब्रह्मविष्णुशिवा
ज्ञया संपूज्य मनसादेवी प्रययुः
स्वालयंचते इत्येवं कथितं सर्वं
किंभूयः श्रोतुमिच्छसि इन्द्र

कृत मनसा पूजास्तोत्रयथा नार
उवाच केन तुष्टाव स्तोत्रेण महे
न्द्रो मनसां सतीं पूजा विधि क्र
मं तस्याः श्रोतुमिच्छामि तत्त्वतः
श्रीनारायण उवाच सुस्नातः शुचि
राचांतो धृत्वा धौते च वाससी रत्न
सिंहासने देवीं वासयामास भ
क्तितः स्वर्गगंगाजलेनैव बहुकु
म्भस्थितेनच स्नापयामास मनसां
महेन्द्रो देव मंत्रतः वाससी वा
सयामास वह्निशुद्धे मनोहरे ।
सर्वांगे चंदनं दत्वा पाद्यार्घ्यं भ
क्ति संयुतः गणेशंच दिनेशंच।
वह्निं विष्णुं शिवं शिवां संपू
ज्यादौ देव षट्कं पूजयामास तां
सतीं ॐ ह्रीं श्रीं मनसादेव्यै
स्वाहेत्येवंच मंत्रतः दशाक्षरेण
मूलेन ददौ सर्वं यथोचितं द
त्वा षोडशोपचारं दुर्लभं दुर्लभो
हरिः भक्त्याच पूजयामास ब्रह्मणा
प्रेरितो मुदा वाद्यं नाना प्रकारं
च वादयामास तत्रैव बभूव पुष्प
वृष्टिश्च नभसो मनसोपरि देव
विप्राज्ञया तत्र ब्रह्म विष्णुशिवाज्ञ
या तुष्टाव साश्रुनेत्रश्च पुलकांचि
त विग्रहः महेन्द्र उवाच देवित्वां
स्तोतुमिच्छामि साध्वीनां प्रवरां



वृतां परात्पराञ्च परमां त्वहिं स्तोतुं क्षमो ऽधुना स्तोत्राणां। लक्षणं वेदे स्वभावाख्यान तत्परं न क्षमः प्रकृतेर्वक्तुं गुणानां त्वं स्तवने शुद्ध सत्त्व स्वरूपा त्वं कोप हिंसा विवर्जिता न च शप्तो मुनि स्तेन त्यक्तया च त्वया यतः त्वं मया पूजिता साध्वी जननी च यथा ऽदितिः दयारूपा च भगिनी क्षमारूपा यथा प्रसूः त्वया मे रक्षिताः प्राणाः पुत्रदारा सुरेश्वरि। अहं करोमि त्वां पूज्यां प्रीतिश्च वर्द्धतां सदा नित्या यद्यपि त्वं पूज्या भवे ऽत्र जगदम्बिका तथापि तव पूजां च वर्द्धयामि च सर्वांतः ये त्वामाषाढसंक्रान्त्यां पूजयिष्यन्ति भक्तितः पञ्चम्यां मनसाख्यायां मासान्तां वा दिने दिने पुत्रपौत्रादयस्तेषां वर्द्धन्ते च धनानि च यशस्विनः कीर्त्तिमन्तो विद्यावन्तो गुणान्विताः ये त्वां न पूजयिष्यन्ति निन्दन्त्यज्ञानतो जनाः लक्ष्मीहीना भविष्यन्ति तेषां नागभयं सदा त्वं स्वयं स्वर्गलक्ष्मीश्च वैकुण्ठे कमलाकला नारायणांशो भगवान् जरत्कारु मुनीश्वरः तपसा तेजसा त्वां च मनसा ससृजे

पिता अस्माकं रक्षणायैव तेन त्वं मनसाभिधा मनसा देवितुं शक्ता स्वात्मना सिद्धयोगिनी तेन त्वं मनसादेवी पूजिता वन्दिता भवे यां भक्त्या मनसा देवाः पूजयन्त्यनिशं भृशं तेन त्वां मनसां देवीं प्रवदन्ति पुराविदः सत्त्वरूपा च देवि त्वं शश्वत् सत्त्व निषेवया। यो हि यं भावयेन्नित्यं सतं प्राप्नोति तत्समः इन्द्रश्च मनसां स्तुत्वा गृहीत्वा भगिनीं च तां प्रजगाम स्वभवनं भूषा वासः परिच्छदां पुत्रेण सार्द्धं सा देवी चिरं तस्थौ पितृगृहे भ्रातृभिः पूजिता शश्वन्मान्या वंद्या च सर्वतः गोलोकात् सुरभी ब्रह्मन् तत्रागत्य सुपूजितां तां स्नापयित्वा क्षीरेण पूजयामास सादरं ज्ञानं च कथयामास गोप्यं सर्वं सुदुर्लभं तया देव्या पूजिता सा स्वर्लोकं च पुनर्ययौ इदं स्तोत्रं पुण्यबीजं तां सं पूज्य च यः पठेत् तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च विषं भवेत् सुधातुल्यं सिद्ध स्तोत्रं यदा भवेत् पंचलक्ष जपेनैव सिद्ध स्तोत्रो भवेन्नरः सर्पशायी भवेत्सोपि निश्चितं सर्प

वाहनः इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४४ अध्यायः पञ्चन्तरि। कृत मनसा ध्यान पूजादि यथा यत्वं जरत्कारुवाच इहागच्छ जगद्गौरि गृहाण मम पूजनं पूज्या त्वं त्रिषु लोकेषु परा कश्यपकन्यके त्वयाजितं जगत्सर्वं देवि विश्व स्वरूपया तेन ते ऽस्तु प्रयोगश्च न कृतो रणे भूमिषु इत्युक्त्वा संयतो भूत्वा भक्तिनम्रात्मकंधरः गृहीत्वा शुक्लकुसुमं ध्यानं कृत्वा समुद्यतः चारुचम्पकवर्णाभां सर्वाङ्ग सुमनोहरां ईषद्धास्य प्रसन्नास्यां शोभितां सूक्ष्मवाससा कबरी। भार शोभाढ्यां रत्नाभरण भूषितां सर्वाभय प्रदां देवीं भक्तानुग्रह कातरां सर्व विद्याप्रदां। शान्तां सर्व विद्या विशारदां नागेन्द्रवाहिनीं देवीं भजे नागे। श्वरीं परां ध्यात्वैवं कुसुमं दत्वा नानाद्रव्य समन्वितं दत्वा षोडशोपचारं पूजयामास तां प्रिये। स्तोत्रं चकार भक्त्या च पुलकाञ्चित विग्रहः पुटाञ्जलियुतो भूत्वा भक्तिनम्रात्मकंधरः पत्नेतरिहवाच नमः सिद्धिस्वरूपायै सिद्धिदायै नमो नमः नमः कश्यपकन्यायै वरदायै

नमो नमः नमः शंकरकन्यायै। शंकरायै नमो नमः नमस्ते नागवाहिन्यै नागेश्वर्यै नमो नमः। नमो नागभगिन्यै च योगिन्यै च। नमो नमः नमः स्त्रीक जनन्यै च जनन्यै जगतां नमः नमो जरत्कारुनाम्न्यै जरत्कारुस्त्रियै नमः नमश्चिरं तपस्विन्यै सुखदायै नमो नमः नमस्तपः स्वरूपायै फलदायै नमो नमः सुशीलायै। च साध्व्यै च शान्तायै ते नमो नमः इत्येव मुक्त्वा भक्त्या च प्रणनाम। प्रयत्नतः तुष्टा देवी वरं दत्वा सत्वरं स्वालयं ययौ इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे पञ्चन्तरि दर्प भंग मनसा विजयो नाम ४५ अध्यायः ॥

मनसादेवी स्त्री मनसा इति जटाधरः अस्या विवरणं पूर्वे द्रष्टव्यं ॥

मनसिजः पुं कामदेवः इत्यमरः मनोजाते त्रि ॥

मनसिशयः पुं कामदेवः इति हलायुधः ।

मनस्कारः पुं मनसः स्वोदिः तत्पर्यायः चित्ताभोगः २ इत्यमरः हे मनसः स्वोदो तन्मर ।

त्वे एकस्मिन् विषयेमनसःपुन
पुनः प्रवृत्ति राभोगः आभोग
स्तात्पर्य्यमिति सर्वानंदः स्थैर्य्ये
मितिन्योव्यापार इत्यपरे वा
च्छिनत्वस्याभ्यावित्तस्याभिका
त्वता आभोगः परिपूर्णतेतिपरे
अनागत चिंतनादि रूपोमनस्कार
इत्यपरे मनसो मनसिवा कारो
निश्चयो मनस्कारः सेवकत्वेनिसः
मनसिकरणं मनसिकारः इत्यपि
दृश्यते अत्र वाहुल्यात् समस्या
अलुक् इति तट्टीकायां भरतः।
मनस्तापः पुं मनःपीडायथा म
नस्तापं न कुर्वीत आपदं प्राप्य
पार्थिवः समबुद्धिःप्रसन्नात्मासु
खेदुःखे समो भवेत् इतिगारुडे
११ अध्यायः अनुतापः यथा
ब्राह्मणेन यदादैवात् छिन्नं यत्ता
पवीतकं मनस्तापेन शुद्धिःस्या
दापस्तम्बोऽब्रवीन्मुनिः इति प्रा
यश्चित्ततत्त्वं ॥
मनस्तालः पुं दुर्गायाः सिंहः इ
ति त्रिकांडशेषः ॥
मनस्यः त्रि मनःस्थितवंत य
था आजन्म मन्मनस्यंयदपिम
ममनो मथ्नतः कापिनाभूत्तत्ते
पुण्यस्तात्पापादिह प्रादिसतः सिद्धमा

भूतत्त्वेन इत्युज्ज्वलः।
मनस्विनी स्त्री प्रशस्तमनाःस्त्री
यथा मनस्विनी मानविघातदक्षंत
देवजातंवचनं स्मरस्य इतिकुमार
संभवः ॥
मनस्वी पुं शरभः इति राज
निर्घंटः प्रशस्तमनोयुक्ते त्रि
यथा मनस्वि गर्हितः पंथाःक्षमा
रोद्धुमसाम्प्रतं इतिकारकटी।
कायां दुर्गादासः ॥
मनाक् अव्य अल्पे इत्यमरः मंदः
इति मेदिनी ॥
मनाका स्त्री हस्तिनी इत्युणादि
कोषः ॥
मनाक्करं क्ली मंगल्या मल्लिका
गंधयुक्तागुरु इति शब्दचंद्रिका।
ईषत्कारके त्रि ॥
मनायी स्त्री मनोःपत्नी इतिज
टाधरः ॥
मनावी स्त्री मनुपत्नी इतिमुग्धबो
धव्याकरणं।
मनितं त्रि ज्ञाते इत्यमरः।
मनीकं क्ली अंजनं इत्युणादिको
षः मनीषा स्त्री बुद्धिः इत्यमरः।
मनीषी पुं पंडितः इत्यमरः॥
बुद्धियुक्ते त्रि ॥
मनुः स्त्री पृक्का इतिराजनिर्घंटः

मनुपत्नी इति स्त्रीपुंलिंग सं
ग्रहे अमरः।
मनुः पुं ब्रह्मणः पुत्रः सवप्रजा
पति धर्मशास्त्रवक्ता च इतिलिंगा
दिसंग्रहे अमरः मनुष्यः इति
शब्दरत्नावली जिनभेदः इति
त्रिकांडशेषः मंत्रः इति जटा
धरः प्रतिकल्पेचतुर्दश मनवो
भवंति तेषां नामानियथा स्वाय
म्भुवः १ स्वारोचिषः २ उत्तमः ३ ता
मसः ४ रैवतः ५ चाक्षुषः ६ एते
गताः वैवस्वतः ७ वर्त्तमानोऽयं
सावर्णिः ८ दक्षसावर्णिः ९ ब्र
ह्मसावर्णिः १० धर्मसावर्णिः ११ रुद्र
सावर्णिः १२ देवसावर्णिः १३ इंद्रसा
वर्णिः १४ एते भविष्यंति इतिश्रीभा
गवते ८ स्कंधे १ अध्यायः एतेषा।
मुत्पत्तिर्यथा आद्योमनुर्ब्रह्म पु
त्रः शतरूपापति र्ज्ञानी धर्मिष्ठा
नां वरिष्ठश्च गरिष्ठो मनुषु प्रभुः
स्वायंभुवः शंभुशिष्यो विष्णुव्रतप
रायणः जीवन्मुक्तो महाज्ञानी भ
वतः प्रपितामहः संप्राप कृष्ण
दास्यंच गोलोकंच जगाम सः
दृष्ट्वासुतं स्वपुत्रंच शश्वद्ब्रह्मप्रजा
पतिः तुष्टाव शंकरं तुष्टः सस्र
जे मनुमन्यंच सच स्वयंभुपुत्रश्चा


शुरः स्वायम्भुवो मनुः स्वारोचि।
षो मनुश्चैव द्वितीयो वह्निनंदनः
राजा वदान्यो धर्मिष्ठः स्वायम्भुव
समो महान् प्रियव्रत सुतावन्यौ
द्वौ मनू धर्मिणां वरौ तौ तृतीय
चतुर्थौच वैष्णवौ तामसोत्तमौ।
तौच शंकर शिष्यौ च कृष्णभक्ति प
रायणौ धर्मिष्ठानां वरिष्ठश्च रैव
तः पंचमो मनुः षष्ठश्च चाक्षुषो
ज्ञेयो विष्णुभक्तिपरायणः श्राद्ध
देवः सूर्य्यसुतो वैष्णवः सप्तमो
मनुः सावर्णिः सूर्य्यतनयो वैष्णवो
मनुरष्टमः नवमो दक्षसावर्णिर्वि
ष्णुव्रत परायणः दशमो ब्रह्मसाव।
र्णिर्ब्रह्मज्ञान विशारदः ततश्चधर्म।
सावर्णि र्मनुरेकादशः स्मृतः धर्मिष्ठ
श्चवरिष्ठश्च वैष्णवानां सदा व्रती ज्ञा
नी च रुद्रसावर्णि र्मनुश्च द्वादशः स्मृ
तः धर्मात्मा देवसावर्णि र्मनुरेव त्रयो
दशः चतुर्दशो महाज्ञानी चेंद्रसा
वर्णिरेवच इतिब्रह्मवैवर्ते प्रकृ।
तिखंडे ५४ अध्यायः अपिच ॥
स्वायम्भुवः १ सच गायत्र्यांब्रह्म
णो जातः अस्य पुत्राः दशाग्नी
ध्रः अग्निबाहुः सिद्धः सवलः।
ज्योतिष्मान् द्युतिमान् हव्यः।
मेधाः मेधातिथिः वसुश्च ॥

स्वारोचिषः २ अस्य पुत्राश्चत्वारः ।
नभः नभस्यः प्रसृतिः भानश्च ।
औत्तमिः ३ अस्य पुत्राः दश
इषः ऊर्जः सूर्जः शुचिः शुक्रः
मधुः माधवः नभस्यः नभः सह-
श्च तामसः ४ तस्य पुत्राः दश
अकल्मषः तपोधन्वी तपोमूलः
तपोधनः तपोरतिः तपस्यः
तपोद्युतिः परन्तपः तपोभो-
गी तपोयोगीच रैवतः ५
तस्य पुत्राः दश अरुणः तत्त्वद-
र्शी वित्तवान् हव्यपः कपिः
मुक्तः निरुत्सुकः सत्त्वः निर्मो-
हः प्रकाशकश्च चाक्षुषः ६ सच
ध्रुव पौत्रात् रिपुञ्जयात् ब्रह्मदोहि-
त्र्यां वीरणा कन्यायां वैरिण्यां जातः
तस्य भार्य्या नड्वला तस्य पुत्राः
दश ऊरुः पुरुः शतद्युम्नः त-
पस्वी सत्यवाक् कविः अग्निष्टुप्
अतिरात्रः सुद्युम्नः अभिमन्युश्च
वैवस्वतः ७ सच सूर्य्यात् संज्ञायां
जातः तस्य पुत्राः दश इलः
इक्ष्वाकुः कुशनाभः अरिष्टः धृ-
ष्टः नरिष्यन्तः करूषः शर्य्यातिः
पृषध्रः नाभागश्च सावर्णिः ८
सच सूर्य्यात् छायायां जातः त-
स्य पुत्राः दश धृतिः वरीयान् यव-
सः सुवर्णः धृष्टिः चरिष्णुः ईड्यः
सुमतिः वसुः शुक्रश्च रौच्यः
९ असौ रुचेः प्रजापतेः पुत्रः
भौत्यः १० असौ भूति नामक-
प्रजापतेः पुत्रः मेरुसावर्णिः ११
असौ ब्रह्मणः पुत्रः ऋभुः १२
ऋतधामा १३ विष्वक्सेनः १४
इति मात्स्ये नवमाध्यायादपि प-
कविंशतिरध्याय पर्य्यन्तं ।

मनुजः पुं मनुष्यः इत्यमरः ।
मनुजी स्त्री मानुषी इति जटाध-
रः मनुभूः पुं मनुष्यः इति श-
ब्दचन्द्रिका ॥
मनुराट् पुं कुवेरः इति त्रिकाण्ड-
शेषः
मनुषी स्त्री मानुषी इति शब्दर-
त्नावली ॥
मनुष्यः पुं मनोरपत्यं तत्-
पर्य्यायः मानुषः २ मर्त्यः ३ मनु-
जः ४ मानवः ५ नरः ६ इत्यमरः भू-
मिजः ७ द्विपदः ८ चेतनः ९ भूस्पृः
१० इति राजनिर्घण्टः मनुः ११
पंचजनः १२ पुरुषः १३ पूरुषः १४
पुमान् १५ ना १६ इति शब्दरत्ना-
वली मर्त्तः १७ विट् १८ इति जटा-
धरः स तु अर्वाक् स्रोतः ब्रह्म-
णो नवमः सर्गः एकविधश्च ।

यथा अर्वाक् स्रोतस्तु नवमः तत्र
एकविधो नृणां रजोधिकाः कर्म
परा दुःखे च सुखमानिनः इति
श्रीभागवते ३ स्कन्धे १० अध्यायः
अपिच तस्यापि ध्यायतः सर्गं
सत्याभिध्यायिन स्ततः प्रादु-
र्बभूव चाव्यक्तादर्वाक्स्रोतस्तु साध-
कः यस्मादर्वाक् प्रवर्त्तन्ते ततो-
ऽर्वाक्स्रोतसस्तु ते तेच प्रकाश-
बहुला स्तमोद्रिक्ता रजोधिकाः त-
स्मात्ते दुःखबहुला भूयोभूयश्च का-
रिणः प्रकाशा वहिरन्तश्च मनुष्याः
साधकास्तु ते इति वह्निपुराणे
सर्गकथन नामाध्यायः मनुष्या-
जन्मशक्तिकारणं यथा विमुक्ति-
हेतुकाम्या तु नरयोनिः कृतात्म-
नां नाशयति हि संसारे विभ्रान्तम-
नसो गताः जीवा मानुष्यतां मम्ये
जन्मना मधुते रपि तदीदृक् दु-
र्लभं प्राप्य मुक्तिद्वारं विचेतसः
पतन्ति भूयः संसारे विष्णुमाया-
विमोहिताः सुतरापि दुःसाध्या
माया कृष्णस्य मोहनी इति तत्रैव
श्रुहित्वत नामाध्यायः मनुष्या-
णां पिता माता धाता वहरिर्यथा
विशेषतो मनुष्याणां पिता माता
जनार्दनः धाता च सर्वलोकाच्च ।
वात्सल्य गुणसागरः इति पा-
द्मोत्तरखण्डे १८ अध्यायः ॥
स त्रिविधो यथा यजन्ते सात्त्विका
देवान् यक्ष रक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते ता-
मसा जनाः इति श्रीभगवद्गीतायां
१७ अध्यायः ऊर्द्ध्वं गच्छन्ति सत्त्वस्था
मध्ये तिष्ठन्ति राजसाः जघन्य गु-
णवृत्तिस्था अधोगच्छन्ति तामसाः
इति तत्रैव १४ अध्यायः ॥

मनुष्यधर्म्मा पुं कुवेरः इत्यमरः
मनुष्ययज्ञः पुं अतिथिपूजनं ।
इति नृयज्ञ शब्द दर्शनात् ।
मनुष्यी स्त्री मानुषस्त्रीजातिः त-
त्पर्य्यायः मानुषी २ नारी ३ मानवी
४ इति शब्दरत्नावली मर्त्या ५
मनुजी ६ नरी ७ इति जटाधरः ।
मनोगुप्ता स्त्री मनःशिला इत्यमरः
मनोजन्मा पुं कंदर्पः इति त्रिका-
ण्डशेषः ।
मनोजवः पुं विष्णुः यथा मनो-
जव स्तीर्थकरो वसुरेता वसुप्रदः
इति महाभारते दानधर्मे सहस्र-
नामस्तोत्रं ॥
मनोजवः त्रि पितृतुल्यः तत्प-
र्य्यायः पितृसन्निभः २ इत्यमरः ।
अतिशय वेगवान् ॥ मनसो ।




वेगे पुं इति व्याकरणं ।
मनोजवसः त्रि पितृसन्निभः इत्य
मरटीकायां स्वामी ॥
मनोजवा स्त्री अग्निजिह्वाभेदः
इति जटाधरः ॥
मनोजवृद्धिः पुं कामवृद्धिक्षुपः
इति राजनिर्घंटः ॥
मनोज्ञं क्ली सरलकाष्ठं इति रत्न
माला ॥
मनोज्ञं त्रि मनोहरं तत्पर्यायः
सुंदरं २ रुचिरं ३ चारु ४ सुषमं
५ साधु ६ शोभनं ७ कांतं ८ मनो
रमं ९ रुच्यं १० मंजु ११ मंजुलं
१२ इत्यमरः मनोहरं १३ बंधु
रं १४ वंधूरं १५ पेशलं १६
पेषलं १७ सुमनं १८ वामं १९
रुच्यं २० अभिरामं २१ नंदिनं
२२ इति शब्दरत्नावली ॥
मनोज्ञा स्त्री मनःशिला इति रत्न
माला राजपुत्री इति जटाधरः ।
वंध्याकर्कोटकी आवर्तकी ।
स्थूलजीरकः जाती मदिरा
इति राजनिर्घंटः ॥
मनोभवः पुं कंदर्पः इति हला
युधः ॥
मनोभूः पुं कामदेवः इति श
ब्दरत्नावली ॥

मनोयोनिः पुं कामदेवः इति
हेमचंद्रः ॥
मनोरथः पुं इच्छा इत्यमरः ।
मनोरमं त्रि मनोज्ञं इत्यमरः ॥
मनोरमा स्त्री गोरोचना इति
राजनिर्घंटः बुद्धशक्तिविशेषस्तु
तत्पर्यायः तारा १ महाश्रीः २
ओंकारा ३ स्वाहा ४ श्रीः ५ तारिणी ६
जया ७ अनंता ८ शिवा ९ लोके
श्वरात्मजा १० खदिरवासिनी ११ भ
द्रा १२ वैश्या १३ नीलसरस्वती १४ शं
खिनी १५ महातारा १६ वसुधारा १७
धनंददा १८ त्रिलोचना १९ लोचना
२० इति त्रिकांडशेषः रुचिभा
र्य्या तस्या नामांतरं मालिनी ।
सा वरुणपुत्रपुष्करोरसेन प्रम्लो
चाप्सरो गर्भजा रौच्यमनुमाता च
यथा तत स्तस्मान्नदीमध्यात् स
मुत्तस्थौ मनोरमा प्रम्लोचा नाम
तन्वंगी तत्समीपे वराप्सरा ॥
सा चोवाच महात्मानं रुचिं सुम
धुराक्षरं प्रसयावनता सुभ्रूः प्र
म्लोचा वै वराप्सराः अतीव रू
पिणीकन्या मत्सुता तपतां वर
जाता वरुणपुत्रेण पुष्करेण महा
त्मना तां गृहाणमयादत्तां भा
र्य्यार्थं वरवर्णिनीं मनु महामति

स्तस्यां समुत्पत्स्यति ते सुतः
मार्कंडेय उवाच तथेति तेन चा
प्युक्ता तस्मात्तोयाद्वपुष्मती उ
ज्जहार ततः कन्यां मालिनीं ना
म नामतः नद्याश्च पुलिने त
स्मिन् स मुनि र्मुनिसत्तम जग्राह
पाणिं विधिवत्समानाय्य महामु
नीन् तस्यां तस्यसुतो जज्ञे
महावीर्य्यो महामतिः रौच्याख्य
भवत् पितुर्नाम्ना ख्यातोऽत्र व
सुधातले इति मार्कंडेयपुराणे
रौच्यमन्वंतराध्यायः ।
मनोहतः त्रि प्रतिहतः इत्यमरः
मनोहरं त्रि मनोज्ञं इति शब्द
रत्नावली कुंदवृक्षे पुं स्वर्णयू
थी इति राजनिर्घंटः ॥
मनोहरा स्त्री जाती स्वर्णयूथी
इति राजनिर्घंटः ॥
मनोहर्त्री त्रि मनोहरणकर्त्री
यथा वसनं ते ऽपनेष्यामि त्रिलो
क्यां यदि मायसे तमानेष्ये ।
वरं य स्ते मनोहर्त्री तमादिश
इति श्रीभागवते १० स्कंधे २२
अध्यायः ॥
मनोहारि त्रि मनोहरं इत्यमर
टीकायां स्वामी तथाहि गंभी
वारिमनोहारि मुरारि चरणाच्युते

त्रिपुरारि शिरश्चारि पापहारि ।
पुनातु मां इति वाल्मीकिकृत ।
गंगास्तोत्रे ।
मनोह्वा स्त्री मनःशिला इत्यमरः
मंतव्यं त्रि मननीयं भाव्यं यथा
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो
मंतव्यो निदिध्यासितव्यः इत्या
दि छान्दोग्योपनिषत् ॥
मंता पुं मंत्री इति सिद्धांतकौ
मुद्यामुणादिवृत्तिः ॥
मंतुः पुं अपराधः मनुष्यः ।
प्रजापतिः इति मेदिनी द्वा
त्रिंशदपराधा यथा भगवद्भक्ता
नां त्याज्यसिद्धान्नभोजनं १ अति
सिद्धदिने दंतधावनमकृत्वा वि
ष्णोरुपसर्पणं २ मैथुनं कृत्वा अस्ना
त्वा विष्णोरुपसर्पणं ३ मृतं नरं स्पृ
ष्ट्वा अस्नात्वा विष्णुकर्मकरणं ४ र
जस्वलां स्पृष्ट्वा अस्नात्वा विष्णुगृहप्र
वेशनं ५ मानवं शवं स्पृष्ट्वा अस्नात्वा
विष्णुसन्निधावस्थानं ६ विष्णुस्पर्श
नःपादुकाप्रयोगः ७ विष्णोः कर्म
कुर्वतः पुरीषत्यागः ८ विष्णुशास्त्रम
नादृत्य शास्त्रांतरप्रशंसा ९ अतिम
लिनं वासः परिधाय विष्णुकर्माचा
रणं १० अविधानेनाचम्य विष्णोरु
पस्पर्शनं ११ विष्णोरपराधं कृत्वा ।



विस्रोरुपसर्पणं १२ क्रुद्धस्यविस्र
स्पर्शनं १३ निषिद्धपुष्पाणाविस्रोर
र्पणं १४ रक्तंवासःपरिधायविस्रोरुप
सर्पणं १५ अंधकारे दीपेनविनावि
स्रोस्पर्शनं १६ कृष्णवस्त्रंपरिधायवि
स्रोः कर्मचारणं १७ वायसोहृतव
स्त्रंपरिधायविस्रोःकर्माचरणं १८
विस्रवे क्रुद्धेरोच्छिष्टदानं १९ वरा
हमांसंभुक्त्वा विस्रोरुपसर्पणं २० जा
लपादशरीरिमांसंभुक्त्वाविस्रोरुपा
सर्पणं २१ दीपस्पृष्ट्वाहस्तमप्रक्षाल्यवि
स्रोः स्पर्शनंकर्माचरणंवा २२ श्म
शानंगत्वाअस्नात्वाविस्रोरुपसर्प
णं २३ पिण्याकंभुक्त्वाविस्रोरुपस
र्पणं २४ विस्रवेवराहमांसनिवेदनं
२५ मद्यमादाय स्पृष्ट्वा पीत्वावाविस्र
गृहप्रवेशनं २६ परकीयेनान्नेनविना
वावस्त्रेणपरिहितेनविस्रकर्माचरणं
२७ विस्रवेनवान्नमप्रदायतद्भोजनं २८
गंधपुष्पे अप्रदायधूपदीपदानं २९
उपानहावारुह्य विस्रस्थानप्रवेश
नं ३० भेरीशब्देनविना विस्रोः प्रबो
धनं ३१ अजीर्णेसतिविस्रोरुप स
र्पणं ३२ एतदपुपलक्षणं तथाच
नारसिंहपुराणे अपराधसहस्राणि
अपराधशतानिच पद्मनेके नदेव
शः क्षमते हेलयाच्चितः इत्या

दिकाचारतोत्र वर्त्तयामाहं क्षमं
अपिच वराहउवाच अभक्षान
परकीयान्नं नत्पर सन्निवर्तेन :
प्रथमस्त्वापराधोऽयंधर्मविज्ञायवे
भवेत अभक्ष्यादंतकाष्ठानि यस्तु
मामुपसर्पति द्वितीयस्त्वापराधस्तु
कर्मविज्ञाय विद्यते गत्वामैथुन।
संयोगे योऽनुमांस्पृशते नरः तृ
तीय मपराधोऽयंकल्पयामिवसुं
न्धरे दृष्ट्वारजस्वलां नारीमस्माकं
यःप्रपद्यते चतुर्थमपराधंतु दृ
ष्टैनैव तमाम्यहं स्पृष्ट्वामृतकं
चैव असंस्कारकृतंतु वै पंचमं
चापराधंचन तमामिवसुंधरे दृ
ष्ट्वातु मृतकंयस्तु नाचमस्पृशते
तमां षष्ठकंचापराधंतनतमामि
वसुन्धरे मामेवार्चनकालेतु पु
रीषं यस्पगच्छति सप्तमंचापराध
तु कल्पयामिवसुंधरे यस्तुनीले
नवस्त्रेण प्रावृतोमांप्रपद्यते अ
ष्टमंचापराधंतु कल्पयामिवसुंधरे
म॰॰मवार्चने कालेतुयस्त्वसत्यं
प्रभाषते नवमंचापराधंतनरोचा
मिवसुंधरे अविधानेनमांस्पृश्य
स्तमां प्रतिपद्यते दशमंचापराधं
तुमम चाप्रियकारकं क्रुद्धस्तमा
नि कर्माणि कुरुते कर्मकारकः

एकादशापराधंतु कल्पयामिवसु
न्धरे अकर्मण्यानि पुष्पाणियस्तु
मामुपकल्पयेत् द्वादशंचापराधंतु
कल्पयामिवसुंधरे यस्तुरक्तेनवस्त्रे
णाकौसुंभेनोपगच्छति त्रयोदशा।
पराधंतु कल्पयामि वसुंधरे अन्ध
कारेपिमां देवि यः स्पृशनकदाचन
चतुर्दशापराधंतु कल्पयामिवसुं
धरे यस्तुकृष्णेन वस्त्रेण ममकर्मा
णि कारयेत् पंचदशापराधानिक
ल्पयामिवरानने अधौतेनचवस्त्रेण
यस्तुमामुपकल्पयेत षोडशंत्वपरा
धानां कल्पयामि वरानने स्वयम
न्नेन योदघादत्ताना यच्चमाधवि सप्त
दशापराधंतुकल्पयामिवसुंधरे ।
यस्तुमत्स्यानिमांसानिभक्षयित्वा
वरानने अष्टादशापराधानि अन्न
जानानि माधवि जालपादंभक्ष।
यित्वा यस्तु मामुपसर्पति एको
नविंशापराधं प्रतिजानामिसुंदरि
यस्तुमेदीपकं स्पृष्ट्वायोमांस्पृशति
माधवि विंशकंचापराधानां क
ल्पयामि वरानने श्मशानंयस्तुवै
गत्वा यो मामेवाभिगच्छति एकविं
शापराधानि कल्पयामिवसुंधरे पि
ण्याकं भक्षयित्वा तुयोमामेवाप
चक्रमे द्वाविंशमापराधानां ता

न्महं चोपकल्पये यस्तुवाराह।
मांसानि प्रापणेनोपपादयेत् ॥
अपराधं त्रयोविंशं कल्पयामि व
सुंधरे सुरां पीत्वापि यो मर्त्यः
कदाचिदुपसर्पति अपराधं चतुर्विं
शं कल्पयामि वसुंधरे यः कुसुं।
भंच मशाकं भक्षयित्वाप चक्रमे ।
अपराधं पंचविंशं कल्पयामिवसुं
धरे परप्रावरणेनैव यस्तुमामुप।
सर्पति अपराधेषु षड्विंशं कल्प
यामिवरानने नवान्नंयस्तुभक्तेन।
न संददाति पितृन्यजेत सप्तवि
शापराधानि कल्पयामिगुणान्वि
ते उपानहौच प्रपदे नत्वामैवोप
चक्रमे अष्टाविंशापराधानिकल्प
यामि गुणान्विते शरीरंमंडयित्वा
तयो मामाप्नोतिमाधवि एको।
नत्रिंशमपराधं स स्वर्गेषुनगच्छति
अजीर्णेन समाविष्टो यस्तुमामभि
गच्छति त्रिंशकंचापराधानां कल्प
यामिवसुंधरे गंधपुष्पाण्यदत्वा तु
यस्तुधूपं प्रयच्छति एकत्रिंशापरा
धंतु कल्पयामि यशस्विनि विनाभे
र्यादिशब्देन द्वारस्योद्घाटनं मम
महापराधं विद्यते तु द्वात्रिंशापराध
कं इतिवाराहे द्वात्रिंशदपरा ॥
धाध्यायः ॥

मंत्रः पुं वेद भेदः सचमंत्र स्व
रूपभागः शुभिवाद्ः सत्व र
हस्य कर्त्तव्यावधारणं मंत्रणेति
ख्यातं इत्यमर भरतो देवा
दीनांसाधनं इति मेदिनी ।
तन्मंत्राद्यऽक्षरद्वीणं यत्रतृतीया
द्यऽगोचरं रहस्यालोचनं म
न्त्रोरहस्यत्न सुपक्षरं इति हेम
चंद्रः मंत्रव्याख्याकृदे कना
वत्यृषयो यथा एते मंत्र कृतः
सर्वे कृत्स्नशस्त्व निबोधत तत्रः
काश्यपः प्रचेताश्च दधीचो त्वात्म
वानपि ऊर्वो ऽथ जमदग्निश्च।
विदः सारस्वतस्तथा आर्ष्टिषेणो
ऽत्यवनश्चवीतहव्यः सवेधसः वै
णयः पृथु दिवोदासो वंध्यश्वो।
गृत्सशौनकः एकोनविं शति
र्होते भृगवो मंत्रकृत्तमाः १९
अंगिरावेधसश्चैव भरद्वाजो न
मात्मकः तथा भृगयरो गर्द्दः सि
तिः संकृतिरेवच गुरुवीतश्च मा
न्धाता अम्बरीष स्तथैवच युवना
श्वः पुरुकुत्सः समदस्युः सदस्यवा
न् अजमीढो ऽस्वहार्यश्चतत्कः क
विरेवच पृषदश्चो विरूपश्च कण्व
श्चैवाथ मुद्गलः उतथ्यश्च शारद्वा
श्च तथा वाजिश्रवा अपि।

अयस्योथ सुचित्तिश्च वामदेव स्त
थैव च ऊशिजो बृहच्छक्ति ऋषि
र्दीर्घतमा अपि कक्षीवांश्च त्रय
स्त्रिंशतस्मृता ह्यांगिरसावराः ३३
एते मंत्रकृतः सर्वे काश्यपांस्त
न्निबोधत काश्यपः सहवत्सारो।
निध्रुवो रैभ एवच असितो देव
लश्चैव षडेतेब्रह्मवादिनः ६ अत्रि
र्वेदश्रवनश्चैव श्यावाश्वोऽथगविष्ठि
रः वल्गानकोऽऋषिः सिद्धस्तथापूर्वा
तिथिश्चयः इत्येते अत्रयः षो।
क्ता मंत्रकृतस्तु महर्षयः ५ वशि
ष्ठश्चैव शक्तिश्च तृतीयश्चपराश
रः ततस्तु इंद्रप्रमतिः पंचमस्तु
भरद्वसुः षष्ठस्तु मित्रावरुणिः स
प्तमः कुंडिनस्तथा इत्येते सप्त वि
ज्ञेया वाशिष्ठाब्रह्मवादिनः ७ विश्वा
मित्रश्च गाधेयो देवरातस्तथोद्दा।
लः तथाविद्वान् मधुच्छंदास्तथिश्चा
न्योऽघमर्षणः अष्टकोलोहितश्चैवभू
तकीलश्च तावुभौ देवश्रवा देवरा
तः पुराणश्च धनंजयः शिशिरश्च
महातेजाः सालंकायनएवच प
योदशैते विज्ञेया ब्रह्मिष्ठाः कौशि
कावराः १३ अगस्त्योऽथदृढद्युम्न
इंद्रवाहुस्तथैवच ब्रह्मिष्ठागस्तयो
ह्येते त्रयः परमकीर्त्तयः ३ मनु

र्वैवस्वतश्चैव इलोराजा पुरूरवाः
क्षत्रियाणां वरास्त्वेन विज्ञेया मन्त्र
वादिनः ३ भलन्दश्चैव भल्लश्च
वत्सलश्चैव ते त्रयः एते मंत्र
कृतोज्ञेया वैश्यानां प्रवराःस्मृताः
३ इत्येकनवतिः प्रोक्ता मंत्रा
येश्च वहिष्कृताः ब्राह्मणाःक्षत्रि
यावैश्या ऋषिपुत्रास्तथास्मृताः
ऋषीणांचसुतास्त्वेतऋषिपुत्राःस्मृ
तर्षयः इति मात्स्ये १२१ अध्यायः
कुलमंत्रमाहात्म्यं यथा ताव
न्निबद्धः संसारकारागारे विये
गिनः तथावत्कुलमंत्रेचशासनाति
गुरुवक्त्रतः कृतकर्मभोगत्रय नि
गडोच्छेदकारणं मायाजालोच्छे
दकरमाशापाशनिकृंतनं मोलो
कमार्गसोपानं निस्तारबीजकार
णं भक्तपंकर स्वरूपंचनित्यंहृद्
मनस्थरं सारंवासर्वतपसां यो
गांच तथैवच सिद्धीनां वेद
पाठानांव्रतादीनांचनिश्चितन स
नानां तीर्थस्नानानां यज्ञादीनां
पुरंदर जपानां सुपवासानां सि
त्याहू कमलोद्भवः पुंसां लब्धे
पितृणांच शतं मातामहस्य च पू
र्वं परंच तन्नस्थ्यांपितरं मातं
---- । सहोदरं कलत्रंच वंधु


शिष्यंच किंकरं समुद्धरेत्स्वपरं
स्वश्कं कन्यांच तन्नते आत्मानंच।
सतीर्थंच गुरुपत्नी गुरोः सुतं।
उद्धरेद्बलवान्भक्तो मंत्रग्रहणमा
त्रतः मंत्रग्रहणमात्रेण जीवन्मुक्तो
भवेन्नरः तत्स्पर्शी पूत स्तीर्थोचः
सद्यः पूता वसुंधरा अनेकजन्म
पर्यन्तं दीक्षाहीनोभवेन्नरः तदा
न्यदेव मंत्रंच लभते पुण्यशोष
तः सप्तजन्मोपदेवानां कृत्वा।
सेवां स्वकर्मतः लभतेच रवेर्मं।
त्रेसात्विणः सर्वकर्मणां जन्मत्रयं
भास्करंच निषेव्यमानवः शुचिः ल
भेद्गणेशमंत्रंच सर्वविघ्नहरं परं।
जन्मत्रयं तंनिषेव्यनिर्विघ्नश्च भ
वेन्नरः विघ्नेशस्यप्रसादेन दिव्य
ज्ञानं लभेन्नरः तदाज्ञान प्रदी
पेन समालोच्य महामतिः अ
ज्ञानांधतमो हित्वा महामायांभ
जेन्नरः विष्णुमायांच प्रकृतिं दुर्गां
दुर्गतिनाशिनीं सिद्धिदां सिद्धिरू
पांच परमां सिद्धयोगिनीं वाणीं
रूपांच पद्मांच भद्रांहंसप्रियान्वि
कां नानारूपां तां निषेव्य जन्म।
नांशतकं नरः तत्प्रसादाद्देवेन
ज्ञानी ज्ञानानन्दं ततो भजेत्कृ
सज्ञानाधिदेवंच महाज्ञाने स

नातनं शिवंशिवस्वरूपंशिव दं
शिवकारणं परमानंदरूपंच पर
मानंददायिनं सत्वदं मोक्षदंचै।
वदातारं सर्वसम्पदां प्रमरत्व प
दंचैव दीर्घायुष्प्रदं परं इंद्र
त्वंच मनुत्वंच दातृत्वंशक्रंच लील
या राजेंद्रत्वप्रदंचैव ज्ञानदं हरि
भक्तिदं जन्मत्रये समाराध्य चाशु
तोष प्रसादतः सर्वदस्यवरेणैव
निर्मलं ज्ञान मालभेत् निर्मल
ज्ञानदीपेन सप्रदीपेन तत्ववित्।
वस्त्वादि त्वणपर्यंतं सर्वमिथ्यैवप
श्यति इत्यानियेः प्रसादेनशंकरं
स्यमहात्मनः वरदस्यवरेणैव हरि
भक्तिं लभेत् ध्रुवं तदानंदकं।
संसर्गात् कुलमंत्रंलभेत्ध्रुवं त
दाविहत्रिमाशोतिसारात् सारां।
परात्परां यत्रदेहे लभेन्मंत्रं तदे
तद्देहावधि भारते नत्यांचभो।
क्तिं त्यक्त्वा विभर्ति दिव्यरूपकं
करोतिदास्यं गोलोक वैकुंठे।
वाहरेः पदे परमानंदसं युक्तो
मोहादिषु विवर्जितः नविद्यते।
पुनर्जन्म पुनरागमनं सर पुनः।
स्तनपिबेत् तीर्थं [illegible] नं प
रं विलोमंत्रोपासकानां गंगादि ती
र्थसेविनो सधर्मिणांच मित्रत्रयां

पुनर्जन्म न विद्यते इतिब्रह्मवैव
र्ते प्रकृतिखंडेः २२ अध्यायः।
शिवमंत्रा यथा प्रथमंप्रणवमंत्रं
ततो ऽनुध्यान गोचरं ततः क्रम
त्व पूजायाः क्रमाद्दितं नर्षभो।
समस्तानां स्वराणां च दीर्घाः शे
षाः सविंदुकः ऋ लृ क स्मृताः
साहैचंद्रार्द्धयान्ते नाभिसंहिताः प
भिः पंचाक्षरैर्मंत्रं पंचवक्त्रस्य की
र्तितं क्रमात्सम्मद संदोह माद
गोरव संज्ञकाः प्रासादस्त्वभवेत्
शेषः पंचमंत्राः प्रकीर्तिताः एकै
केन तथैवैकं वक्त्रं मंत्रेण पू
जयेत् एकं समस्तदितं कृत्वा पंच
भिर्वा प्रपूजयेत् प्रासादेनाथवा
पंचवक्त्रं देवं प्रपूजयेत् सम्मा
हादिषु मंत्रेषु प्रासादस्तु प्रशस्य
ते शंभोः प्रसादनेनैव यस्मात्तस्मा
मंत्रकः तेनप्रासाद संज्ञो ऽयं
कथ्यते मुनिपुंगवैः तस्मात्सर्वे
षु मंत्रेषु प्रासादः प्रीतिदः प्रभो
आमोदकारकः शंभो मंत्रः स।
म्मद उच्यते मनः प्रपूरणाच्चापि
संदोहः परिकीर्तितः आकर्षको
भवेन्मोदो गुरुत्वाद्गौरवाक्रयः प
तद्धास्तं समस्तंच मंत्रं शंभोः प्रकी
र्तितं पंचाक्षरं च यन्मत्र----।

वक्त्रस्य कीर्तितं पुरानेनैव मंत्रेण
आराधयत मीश्वरं॥ इतिकालिका
पुराणे ५ः अध्याये वेताल भैर
वौप्रति वशिष्ठवाक्यं मंत्रस्य
त्रिविध जपो यथा वाचिकश्च उ
पांशुश्च मानसश्च त्रिधामृतः त्र
याणां जपयज्ञानां श्रेयान् स्यादु
त्तरोत्तरः यदुच्चनीचस्वरितैः स्पष्ट
शब्द वदक्षरैः मंत्रमुच्चारयद्व्यक्तं
जप यज्ञः स वाचिकः शनैरुच्चा
रयेन्मंत्र मीषदोष्ठौ प्रचालयन्
किंचित् शब्दं स्वयं विद्यादुपांशुः
सजपः स्मृतः धियायदक्षरश्रे।
णीवर्णाद्वर्णं पदात्पदं शब्दार्थ
चिन्तनाभ्यासः सउक्तो मानसो ज
पः तेनस्वरादि सव्यक्त वर्णोच्चार
णवान् वाचिकः स्वयंशब्दग्रहणमा
त्रयोग्य किंचिच्छ्रुत्वा नुपांशुः जि
ह्वोष्ठचालन मंत्ररेण वर्णानुसंध्या
नको मानसः वाचिकेष्वत्रे जपनि
षेधमाह शंखः नोच्चैर्जपं बुधः कु
र्यात् सावित्र्यास्तु विशेषतः या
गि याज्ञवल्क्यः न चंक्रमन् न विह
सन् पार्श्वमवलोकयन् नोपाश्रि
तो न जल्पन्नप्रावृतशिरा स्त
था नपदा पाद माक्रम्य नैव व
हिः करौ स्मृतो नैवं विधं जपं

कुर्यात् न च संश्रावयेज्जपं उ
त्तिष्ठन्वीक्षमाणो ऽकृत्मासीनः प्रा।
ङ्मुखो जपेत् प्राक् कुशेष्वे व मा
सीनो वसानो वाससी शुभे दृढ
मतः यदि स्यात् क्लिन्नवासा वै वा
रिमध्यगतो जपेत् अन्यथा तत्प
थोभूम्यां कुशोपरि समाहितः
व्यासः जपकाले न भाषेत व्रत।
होमादिकेषु च एतेष्वेवावशक्त
स्तु यद्यागच्छेत् द्विजोत्तमः अभि
वाद्य ततो विप्रं योगक्षेमं च कीर्त्त
येत् योगि याज्ञवल्क्यः यदि वाग्य
मलोपः स्यात् जपादिषु कदाचन
व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णु
मव्ययं गौतमः क्रोधं मोहं क्षु
तं निद्रां निष्ठीवन विजृम्भितं॥
दर्शनं वनितानांच वर्जयेज्जप क
र्मणिः आचामेत् संभवे चैषां।
स्मरेद्विष्णुं सुरार्चितं बौधायनः।
नाभेरधश्च संस्पर्शं कर्मकाले वि
वर्जयेत् इत्याह्निकाचारतत्त्वे मे
त्र शब्दस्य व्युत्पत्तिर्यथा मननात्त्रा
यते यस्मात्तस्मान्मंत्रः प्रकीर्तितः
मंत्र दीक्षा रहितानां दोषो।
यथा मत्स्यसूक्ते श्रीशिवाना
मर्चनानां दोषं [illegible] वरानने अ
त्रं विष्ठा समं तस्य जलं मूत्र



सुमंस्मृतं तत्कृतं तस्यवा प्रा
दं सर्वपाति त्यधोगतिं ॥
शूद्रस्य मंत्रविशेषनिषेधमाह तं
त्रे प्रणवाद्यं न दातव्यं मंत्रं
शूद्राय सर्वथा आत्ममंत्रं गुरो
र्मंत्रं वाजप संज्ञकं ॥ स्वाहा
प्रणव संयुक्तं शूद्रेमंत्रं दददद्विजः
शूद्रो निरय मायाति ब्राह्मणोया
त्यधोगतिं श्रुतिरपि । सावि
त्री प्रणवं यजु र्लक्ष्मी स्त्रीशूद्रयो
र्नेच्छंति सावित्रीप्रणवंयजुर्लक्ष्मीं ।
स्त्रीशूद्रो यदि जानीयात्स मृतो
ऽधोगच्छति विशेषमाह वाराही।
ये गोपालस्यमनुर्देयो महेशस्य
त पादजे तस्यत्माप्यापि सू
र्यस्य गणेशस्यमनुस्तथा यथा
दीक्षाधिकारी स्यादस्यथापाय ।
माप्नुयात् मंत्र दीक्षा प्रशंसा
यथा गोविंदवृंदावने अदीक्षित
स्य मरणे प्रेतत्वं नच मुंचति
नवरत्नेश्वरे सर्वासामपिदीक्षाणां
मुक्तिःफलमवांदितं अविरोधा
द्भवत्येव प्रासंगिकास्तु भक्तयः
तथा उपपातककलशानिमहाधा
तक कोटयः शताहृहतिदेवशी
दीक्षाहि विधिनाकृता अत्रा
पात्रकृत मंत्रं दीक्षत स्वता र

राशिकोष्ठानां अकुलत्वात् भजेन्म
न्त्र वाराहीये ताराचक्रं राशि।
चक्रं नामचक्रं तथैवच अथचेत्
स्वगुणेमंत्रेणान्यचक्रं विचारयेत्
इतिशारदान्यतयावाध्यं तथाच
यतिमंत्रेण गृह्णीयादतत्कुलेनचे
वच इत्यादि दर्शनान्नक्षत्रचक्रवि
चारस्यावश्यकत्वात्प्रथमं तत्रि
त्रयपते सिद्धसारस्वते तंत्रं तुसिं
हार्कवराहाणांपासादप्रणवस्यच
सपिंडाक्षरमंत्राणां सिद्धादीन्नैव।
शोधयेत् सप्तमत्सरेस्त्रिया देवे
मालामंत्रे च अक्षरे वैदिकेषु।
च मंत्रेषु सिद्धादीन्नैव शोधयेत्।
मालामंत्रस्तु वाराहीये विंशत्य
क्षराधिका मंत्रा मालामंत्राः प्रकी
र्तिताः नपुंसकस्यमंत्रस्य सिद्धादी
न्नैवशोधयेत् हंसस्याष्टाक्षरस्या
पि तथा पंचाक्षरस्यच एक हि
आदि बीजस्य सिद्धादीन्नैव शोध
येत् तथाएकाक्षरस्य मंत्रस्यमा
ला मंत्रस्यपार्वति वैदिकस्यच मं
त्रस्य सिद्धादीन्नैव शोधयेत् त
था चामुंडातंत्रे काली तारामा
हाविद्या षोडशी भुवनेश्वरी भै
रवी छिन्नमस्ता च विद्याधूमावती
तथा वगलासिद्धविद्याच मातंगी

कमलात्मिका एता दशमहावि
द्याः सिद्धविद्याः प्रकीर्तिताः नात्र।
सिद्धाद्यपेक्षास्ति न नक्षत्रविचारणा
कालादिशोधनं नास्तिनचामित्रा
दि दूषणं सिद्धविद्या तथा नात्र
युगसेवा परिश्रमः नास्तिकिंचि
न्महादेविदुःखसाध्यंकथंचन ।
पृथिव्यां पूर्णफलप्रदा महाविद्या
यथा मालिनीविजये अथवक्ष्या।
म्यहं या या महाविद्या मही तले
दोषजाले रसंस्पृष्टा स्ताःसर्वा हि
फलैः सह काली नीलामहादुर्गा
त्वरिता छिन्नमस्तका वाग्वादिनी
चान्नपूर्णा तथा प्रत्यंगिरापुनः का
माख्या वासली वालामातंगीशैल
वासिनी इत्याद्याः सकला विद्याः
कलौ पूर्णफलप्रदाः सिद्धमंत्र त
या नात्र युगसेवा परिश्रमः तथा
चैता महाविद्याः कलिदोषान्नवा
धिताः इत्यादि वचनादेषुविचारो
नास्ति वस्तुतस्तु इदंप्रशंसापरं।
सर्वत्र विचारस्यावश्यकत्वं गुरुहा।
श्चवशात् कदाचिद्देवेमंत्रस्यस्वप्ना
दौप्राप्तान्तरदोषस्यहक्षत्वात् इति
त साम्प्रदायिकाः मंत्रोद्धारा।
र्थं षट्चक्र प्रमाणानि वक्ष्यते तेह
श्यानि तेषांलेखनप्रकारा यथा

कुलाकुलचक्रं

[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]

अकथहचक्रं

अ क थ ह	उ ङ प	आ ख ट	ऊ च फ	
ओ ड व	ऌ फ म		औ छ श	ॡ भ य
ई घ न	ऋ ज भ		इ ग थ	ॠ ख व
अः त स	ऐ ढ ल		अं ण ष	ए ट र

मंत्र
अकडमचक्रं



मंत्र
राशिचक्रं



अ आ १ देवः	इ ई २ मानुषः	उ ऊ ३ राक्षसः	ऋ ॠ ऌ ॡ ४ मानुषः	ए ५ देवः	ऐ ६ मानुषः	ओ औ ७ देवः	क ८ देवः	ख ग ९ राक्षसः
घ ङ १० राक्षसः	च ११ मानुषः	छ ज १२ मानुषः	झ ञ १३ देवः	ट ठ १४ राक्षसः	ड १५ देवः	ढ ण १६ राक्षसः	त थ द १७ देवः	ध १८ राक्षसः
न प फ १९ राक्षसः	ब २० मानुषः	भ २१ मानुषः	म २२ देवः	य र २३ राक्षसः	ल २४ राक्षसः	व श २५ मानुषः	ष स ह २६ मानुषः	अं अः क्ष २७ देवः

मंत्र ऋणिधनिचक्रं मंत्र

६	६	६	०	१	४	४	०	०	०	२
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ	ए	ऐ	ओ	औ	अं	अः
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
ब	भ	म	य	र	ल	व	श	ष	स	ह
२	२	५	०	०	२	१	०	४	४	१

देवताभेदे चक्रविचारस्यावश्यक
त्वमाह वाराहीतंत्रे यामलादौ।
च तारशुद्धिर्वैलवानां कोष्ठशु
द्धिः शिवस्य च राशिशुद्धिस्त्वगुरे
च गोपाले ऽकडमः स्मृतः अ
कडमो वामने च गणेशेच तथैव
च कोष्ठचक्रं वाराहस्य महालक्ष्म्याः
कुलाकुलं नामादिचक्रे सर्वेषां
भूतचक्रे तथैवच वैष्णवं तार
चक्रं तु शुद्धमंत्रं जपेद्बुधः तथा
वैष्णवे राशिसंशुद्धं शैवचाकड।
मं स्मृतं कालिकायाश्च तारायाः
स्ताचक्रं शुभावहं चंडिकाया
स्तुकोष्ठगोपाले ऽकडमः स्मृतः
हाचक्रे सर्वमंत्रे धनाधिक्ये नवा


श्नयेत् ऋणाधिके शुभं विद्यात्
धनाधिक्ये च नोविधिं दोषान्।
संशोध्य गृह्णीयान्मंत्रदेशोद्भवस्य
च मंत्रस्य ऋणी शुभफलो ऽप्यशुभो
धनीतथा समदासमफलः कथितो।
मुनीन्द्रैः अन्यत्रापि शून्ये मृत्यु।
मवाप्नोति धनेचविफलं भवेत्।
ऋणंचशांतिमात्रेण सर्वसिद्धिस्तदा
यते अथमंत्राणां दशसंस्काराः
गोतनमीये जननं जीवनं।
पश्चात्ताडनं बोधनं तथा अथाभि
षेको विमलीकरणाप्यायने पुनः
तर्पणं दीपनं गुप्ति दशैता मंत्र
संस्क्रियाः स्वर्णादिपात्रे संलिख्य।
मातृकायंत्रमत्रमं काश्मीर चंद

नेनापि भस्मना वा यस्तत्र न का
श्मीरं भक्ति संस्कारे चंदनेनैव वे
मनो शैवे भस्मसमाख्याते मा
तृका यंत्रलेखने मंत्राणां मातृका
यंत्राद्युद्धारो जननं स्मृतं पंक्तिक्र
मेणाविधि नाम निभिन्नत्रनिर्मिते
१ व्योमेंदोरसनार्णकर्णिकमचांह
न्हेः स्फुरत्केशरं वर्गोल्लासिवस
स्वदं वसुमतीगेहेन संवेष्टितं श्रा
शास्वश्रिशुक्लांतलांगलियुज्जाता।
त्तीपुरेणाहृतं यंत्रं वर्णतनोः परं
निगदितं सौभाग्य सम्पत्करं यं
त्रस्यादित्वरं विदिक्चंदं लिखेत्ता।
तथा च गौतमीये कादिमांताः पे
चवर्गादि दिक्षु पूर्वादितो न्यसेत्।
यादिवांताः शादि हांतालसमीश
प्रविन्यसेत् चत्वरस्वचवर्हीरंत्रि
वंठं विदिक्षु च इति मातृकायंत्रे
प्राणवानतरित्वा कृत्वा मंत्रवर्णान्।
जपीतसुधीः प्रत्येकं शतवारं त।
जीवनं तद्धराहृतं २ मंत्रवर्णान्
समालिख्य ताडयेच्चंदनेनैव भस्मा प
त्येकं वायुबीजेन पूर्ववन्नाडनं म
तं ३ विलिख्य मंत्रवर्णास्तु प्रस
नैः करवीरजैः तन्मंत्रवर्णसंख्या
के हन्याद्वेकैकाबाधनं ४ तन्मं
त्रोक्त विधिना अभिषेकः प्रकी

र्त्तितः तंत्रांतरे मंत्रस्य वाचकवा
र्णामभिषिंचामि हृदंत इति वद
नात् प्रत्येकमभिषिंचेत् अश्वत्थ
पल्लवैः सिंचेत् मंत्री मंत्राणां सं
ख्यया ५ संचिंत्य मनसा मंत्रं सुस
म्यक् मथनतः ज्योतिर्मंत्रेण वि
धिवत् दहेन्मलत्रयं यती तारं।
व्योमाग्निमनयुक्ददंडी ज्योतिर्मंत्र
मितः तारं प्रणवः व्योम हकारः
अग्नीरेफः मनुरौकारः दंडी अनु
स्वारः ६ स्वर्णानकुशतोयेन प्रोक्षितो
येन वा तथा तेन मंत्रेण विधिव
दाप्यायनविधिः स्मृतः ७ मंत्रेण
वारिणा मंत्रे तर्पणं तर्पणं मतं म
नुना शान्ति मंत्रस्य वैसव वेन्दुमज्ज
लेः शैवहृत्वेन इत्यनेन तर्पणं सा
मर्गीरितं अभिषेकेपि तथा ८
तारमायारमायोगा मनोर्दीपनमु
च्यते ९ जप्यमानस्य मंत्रस्य गो।
पनं त्वप्रकाशनं १० संस्कारा दश
संप्रोक्ताः सर्वतंत्रेषु गोपिताः।
यान्कृत्वा सम्प्रदायेन मंत्री वांछित
माप्नुयात् मलत्रयमिति आन।
वंमायिकं कार्मणं च प्रपंच सा
रे मायिकं नाम योषाम्यं पौ।
रुषं कार्मणं मलं आनवं तत।
हृयंप्रोक्तं निषिद्धं तन्मल त्रयं

न नवं अनवं तस्य भावः आनवं
हृद्व स्निग्धः तार माया रमा
योगाइति तारमायारमावीज पु
टितं मंत्र मष्टोत्तर शतं जपेत्
इत्यर्थः तथा च विश्वसारे तार
माया रमावीज पुटितेन मंत्रं ज
पेत् शतमष्टोत्तरं चैव दीपयेत्।
साधकोत्तमः ॥ अथ दुर्गा मं
त्रः अथ दुर्गामनुं वक्ष्ये हृष्ट
फल प्रदं मायाद्रिः कर्णविंद्वाढ्या
भूयो ऽसौ सर्गवान् भवेत् पंचा
न्तकः प्रतिष्ठावान्मारुतो भौतिका
सनः तारादि हृदयांतो ऽयं मं
त्रो वस्वक्षरात्मकः अद्रिर्दकारः।
कर्णोउकारः पंचान्तको गकारः
प्रतिष्ठा आकारः मारुतो यकारः
भौतिक पैकारः ॐ ह्रीं दुं दुर्गा
यै नमः अथ विष्णोः मंत्रः
तारं नमःपदं ब्रूयात् नरोदी च
समन्वितो पवनोणाय मंत्रो ऽयं
प्रोक्तो वस्वक्षरः परः ॐ नमो
नारायणाय अथ शिवमंत्रः
सांत सौकार संयुक्तं विंदुभूषित
मस्तकं प्रासादाख्यो मनुः प्रोक्तो
भजतां कामदो मनुः हौं अ
थ गणेशमंत्रः पंचान्तके शशि
धरं बीजं गणपते विंदु पंचान्त

को गकारः गं अथ सूर्य
मंत्रः तारो घृणि सूर्यः पश्चाद्वा
मकर्णविभूषितः वह्न्यासनो मरु
त्प्रोक्षः सनेत्रो ऽद्रिस्य पश्चिमः ॥
अष्टाक्षरो मनुः प्रोक्तो भानो र।
भिमतः परः ॐ घृणि सूर्य आदि।
त्य पंचदेवतानामेक एकोमंत्रो।
लिखितः एतासामन्या सा।
चान्यमंत्रा ग्रंथविस्तार भयान्न लि
खिताः कलावागमोक्त मंत्र
जपविधि यथा आगमोक्तविधा
नेन कलौ मंत्रं जपेत् सुधीः न
हि देवाः प्रसीदन्ति कलौ चान्यवि
धानतः तथा कृते श्रुत्युक्तमार्गः
स्यात् त्रेतायां स्मृतिसम्भवः द्वा
परेतु पुराणोक्तः कलावागम स
म्भवः मंत्राणां देवताः प्रोक्ता।
देवता गुरुरूपिणी तेषां भिदा।
न कर्तव्या यदीच्छेच्छुभमात्मनः
पित्रादितो मंत्रग्रहणनिषेधो यथा
पितुर्मंत्रं न गृह्णीयात् तथा माता
महस्य च सोदरस्य कनिष्ठस्य वैरि।
पक्षाश्रितस्य च तपस्वी दीक्षये।
द्भर्त्रा न पित्रादीक्षयेत् सुतां न
पुत्रं च तथा भ्राता भ्रातरं न च दी
क्षयेत् सिद्धमंत्रो यदि पतिस्तदा प
त्नीं स दीक्षयेत् शक्तित्वेन वरा




रोहेनच साकन्यकाभवेत् न
था गणेशविमर्षिण्यां यंते दीक्षा
पितुर्दीक्षा दीक्षाच वनवासिनः
विविक्ताश्रमिणां दीक्षान साक।
स्याण दायिका इत्यादि निषेध
वचनादेभ्यो मंत्रं नगृह्णीयादि
त्यर्थः इति तंत्रसारः ॥
मंत्रकृत् पुं मंत्री मंत्रणाकारकः
इतिसिद्धांतकौमुदी ।
मंत्रकंडकः पुं विद्या इतिहारा
वली ॥
मंत्रगूढः पुं चरः इतिशब्दरत्ना
वली ।
मंत्रगृहं क्ली मंत्रणागारं अस्य
प्रमाणं मंत्रणागृहेद्रष्टव्यं ॥
मंत्रजा स्त्री मंत्रशक्तिः इतिपुरा
णं मंत्रजिह्वः पुं अग्निः इतिहे
मचंद्रः ॥
मंत्रज्ञः पुं चरः इतिहलायुधः।
मंत्रज्ञातरि त्रि ॥
मंत्रणं क्ली मंत्रणा मंत्रधातोर्भा
वे अनट्प्रत्ययेन निष्पन्नं ॥
मंत्रणा स्त्री रहसिकर्तव्यावधा
रणं इतिमंत्रशब्दटीकायांभरतः
मंत्रः यथा वादीमूकतिरंकति।
तितियतिर्वैश्वानरः शीतति कोपी
शाम्यतिदुर्जनः सज्जनतितिप्राज्ञः
त्वं जति गर्वी खर्वतिसर्वविद्गुजड
ति त्वन्मंत्रणा यंत्रितः श्रीनित्यवा
गलामुखिप्रतिदिनं कल्याणितुभ्यं
नमः इति तंत्रसारे वगलास्तोत्रं
मंत्रणायां वर्जनीयानि यथा मं
त्रे यंत्रागता शक्तिः षाड्गुण्योपाय
सिद्धयः उदयाश्चिन्तनीयाश्च स्थै
र्यौन्नत्यादि सत्क्रियः इति कवि
कल्पलता व्यक्तित्रयादि कृतं
मंत्रणायां दोषा यथा षट्कर्णो
भिद्यते मंत्रश्चतुष्कर्णश्च धार्यते
द्विकर्णस्य तु मंत्रस्य ब्रह्माप्यंतो
न बुध्यते इति गारुडे ११४।
अध्यायः राजाविद्यादि गुण
युक्त विप्रा मंत्रिणः कार्याः य
था मंत्रिणस्तुनृपः कुर्याद्विप्रान्
विद्याविशारदान् विशुद्धांश्च कुली
नांश्च धर्मार्थ कुशलानृजून् मंत्रये
त्तैः समंकालेनात्यर्थं वहुभिश्चरेत्
एकैकेनैव कर्तव्यं मंत्रस्तु विनि
श्चयं व्यस्तैश्चैव समस्तैश्च वान्य
स्यव्यपदेशतः स्वयं मंत्र गृहं।
स्थूलमारुह्य मंत्रयेत् अरण्येनिः
शलाकेवा नयामिन्यां कदाचन।
शिखिन शाखामृगा मंडान् शुका
न्वैशारिकांस्तथा वर्जयेन्मंत्रगेहे
षु मनुष्यान् कुब्जांस्तथा ह्यवणं मंत्र

भेदेषु नृपाणां यत्रजायते नतत्
सम्यक्समाधातं दक्षैरपि शक्यते
रपि इति कालिकापुराणे ८५
अध्यायः अथ मंत्र निर्णयः
मंत्रमूले यतोराज्यं ततो मंत्रं
सरक्षितं कुर्याद्वारासदामंत्रात्
कर्मणामाफलोदयात् अर्थान
र्थौहि यत्रोभौ संशयश्च परी
क्ष्यते समंत्र इति विज्ञेयः यो
धास्त्रवल्लविभ्रमाः एकमेवविं
षं हंति शस्त्रेणैकश्च वध्यते सरा
ष्ट्रं सप्रकृतिं हंति राजानं मंत्रविस्र।
वः कुरिष्यत्र प्रभाषेत कृतान्ये
व तुदर्शयेत् धर्मार्थकामकार्या
णि कृतो मंत्रो न भिद्यते गिरिपृ
ष्ठमुपारुह्य प्रासादस्यारहोगतः
अरण्ये निःशलाके वा तत्र मंत्रो
विधीयते तत्रसामप्रयोक्तव्यो।
कार्येषु गुणवत्स्वपि दानेलब्धे
ऽपि भेदश्च शंकितेष्वपिनिश्चयः
जडमूकांधवधिरान् तिर्यग्योनी
न्नेवप्युपिकान् स्त्रीम्लेच्छव्यापि
तदंगान्मंत्रकालेनिषेधयेत् इ
तिमत्स्यनतः शोकाराजनीतिरियं
मया यत्रिवर्गविरुद्धंस्याद्राज
नीतिस्तदुच्यते इतियुक्तिकल्प
तरौ नीतियुक्तिः ॥
मंत्रतः अ मंत्रात् इतिसिद्धांत।
कौमुदी ।
मंत्रदाता त्रि मंत्रदानकर्त्तागुरुः
यथा सर्वेषां च गुरूणां चजन्मदाता
परोगुरुः पितुः शतगुणो माता
पूज्या वंद्या गरीयसी विद्यादा
ता मंत्रदाता ज्ञानदो हरि भक्ति
दः पूज्याद्वंद्यश्च सेव्यश्च मातुः
शतगुणो गुरुः मंत्रशुद्धिरणेनै
व गुरुरिष्टश्चतेवुधैः अंयो
वंद्योगुरुरय मन्यश्चारोपितोगु
रुः अज्ञान तिमिरांधस्य ज्ञा।
नांजन शलाकया चक्षुरुन्मी।
लितं येन तस्मै श्रीगुरवे नमः श्री
हीतिनस्पमूर्खस्य निष्कृतिर्नास्ति
निश्चितं सर्वकर्मस्वनर्हस्य नरके
तस्य शोः स्थितिः जन्मदाता त्र
दाता वा माताप्य गुरव स्तथा।
पारं कर्तुं न शक्तास्ते घोरे संसा
रसागरे विद्यामंत्रज्ञानदाता।
निपुणः पार कर्मणि न शक्तः
शिष्यमुद्धर्तुमीश्वरश्रेष्ठश्च प
रः गुरु विष्णु गुरुर्ब्रह्मा गुरुर्देः।
वोमहेश्वरः गुरुर्धर्मोगुरुः शे
षः सर्वात्मा निर्गुणोगुरुः सर्वती
र्थाश्रमश्चैव सर्वदेवाश्रयोगुरुः
सर्ववेद स्वरूपश्च गुरु रूपी।

हरिःस्वयं अभीष्टदेवे रुष्टे च
गुरुः त्राता हि रक्षिता गुरौ
रुष्टेऽभीष्टदेवो नहि त्राताऽस्य र
क्षिता सर्वे ग्रहाश्च यं वष्टा यं
रुष्टा देव ब्राह्मणाः तमेव रुष्टो
भवति गुरुरेव हि देवतः स गु
रोश्चापि यस्मात्मात्गुरोश्च प्रियः
सुतः पत्नं प्रियं नच गुरोर्नच मा
र्या प्रिया तथा न गुरोश्च परो।
धर्मो न गुरोश्च परं तपः न गुरो।
श्च परं सत्यं न पुण्यं च गुरोः परं
गुरोः परो न शास्ता च नहि बंधु
गुरोः परः देवो राजा च शास्ता
च शिष्याणां च सदा गुरुः यावत्
शक्तोदातुमन्त्रं तावत् शास्ता तद
न्तदः गुरुः शास्ता च विद्यानां प्र
ति जन्मनि जन्मनि मंत्रो विद्या
गुरुर्देवः सर्वलब्धो यथा पतिः प्र
तिजन्म विवं येन सर्वेषामुपरि स्थि
ताः पिता गुरुश्च वंधश्च यत्र
जन्मनि जन्मदः गुरवोऽन्यतथा मा
ता गुरुश्च पति जन्मनि इति ब्रह्म
वैवर्त्ते श्रीकृष्णजन्मखंडे शचीकृ
त गुरुस्तोत्रकथनंनाम ४९ अध्या
यः अपि च मान्यः पूज्यश्च सर्वेभ्यः
सर्वेषां जनको भवेत् अहो यस्य
प्रसादेन सर्वान्पश्यति मानवः।
जनको जन्मदाता च रक्षणाच्चापि
नृणां ततो विस्तीर्णकारणात्क
स प्रजापतिः पितुः शतगुणो मा
ता पोषणाद्गर्भ धारणात् वंद्या
पूज्या च मान्या च प्रसूतेः वसुंध
रा मातुः शतगुणो वंद्यः पूज्यो
मान्यो ऽन्नदायकः यद्विनाऽस्य वै
देहो विलश्च कलयान्तरः अन्नदा
तुः शतगुणोऽभीष्टदेवः परः स्मृतः
गुरुस्तस्मात्छतगुणो विद्यामंत्रप्र
दायकः अज्ञानतिमिराच्छन्नं ज्ञा
नदीपेन चक्षुषा यः सर्वार्थदर्श
यति तत्परः कोऽपि बांधवः गुरु
दत्तेन मंत्रेण तपसेष्टसुफल भेत्।
सर्वज्ञत्वं सर्वसिद्धिं तत्परः कोऽपि
बांधवः सर्वं जयति सर्वत्र विद्य
या गुरुदत्तया तस्मात्पूज्योऽहि
जगति कोवा वंधुस्ततोऽधिकः
विद्यां ध्यो वा यतो या वाया मूढो।
न भजेद्गुरुं सोऽपि विस्तीर्थ स्नातः
ऽपिनाधिकारी च कर्मसु पितरंमा
तरं भार्य्यां गुरुपत्नी गुरुं परं ॥
योन पुष्णाति प्रसादात् स महापा
तकी शिव गुरुर्ब्रह्मा गुरुर्विष्णुर्गु
रुर्देवो महेश्वरः गुरुरेव परं ब्रह्म।
गुरु ओंकारस्वरूपकृत् गुरुश्चंद्रस्तु
येन तुश्च वा यश्च वरुणोऽनलः सर्वे

रूपो हि भगवान् परमात्मा स्वयं
गुरुः नास्ति वेदात्परं शास्त्र
नहि कृष्णात्परः नास्ति गंगा
समं तीर्थं न पुष्पं तुलसीपरं।
क्षमावती भूपरा नपुत्रान्नास्ति प
रः प्रियः नच देवात् परः शास्त्रो
व्रतं नैकादशी विना शालग्रा
मात्परो यंत्रो न क्षेत्रं भारतात्।
परं परं पुण्यस्थलानां च पुण्यं
वृंदावनं यथा मोक्षदानां यथा
काशी वैष्णवानां यथा शिवः न
पार्वती परा साध्वी न गणेशात्
परो वशी नच विद्यासमो बंधु
र्नास्ति कश्चिद्गुरोः परः विद्यादा
तुः पुत्रदारे तत्समो नात्र सं
शयः इति ब्रह्मवैवर्त्ते पुराणे गण
पति खंडे ४४ अध्यायः ॥
मंत्रदीधितिः पुं वह्निः इति त्रि
कांडशेषः ॥
मंत्रपूतः त्रि मंत्रेण पवित्रीकृतः
यथा ब्रह्मास्त्रमंत्रपूतेन तोये
नान्ये निराकृताः इति मार्कंडेय
पुराणे देवीमाहात्म्यं ॥
मंत्रपूतात्मा पुं गरुडः इति
धरणिः ॥
मंत्रवित् पुं चरः इति हेमचंद्रः
मंत्रज्ञातरि त्रि ॥
मंत्रस्पृक् त्रि मंत्रकरणकंपीक।
मंत्रेण स्पृशति इति सिद्धांतकौ
मुदी ॥
मंत्रितः त्रि मंत्रेण संस्कृतः अभि
मंत्रितः मंत्रोऽस्य जातः इति मंत्र
धातोः क्त प्रत्यये न मंत्र शब्दा
त् इतिप्रत्ययेन च निष्पन्नः।
मंत्री पुं मंत्रजातकर्त्तव्य निश्चया।
कर्त्ता तत्पर्य्यायः धीसचिवः २
अमात्यः ३ इत्यमरः सचिवः ४
धीसखः ५ सामवायिकः ६ इति
हेमचंद्रः तस्य लक्षणं यथा मं
त्रीभक्तः शुचिः शूरोऽनुरक्तो बु
द्धिमान्वमी आन्विक्षिकादि कु
शलः परिच्छेदी स्वदेशजः इति
कविकल्पलता बहुभिर्मंत्रयेत।
कामं राजा मंत्रं पृथक्पृथक्।
मंत्रिणामपि नाकुर्य्यान्मंत्री मंत्र
प्रकाशनं न क्वचित्कस्य विश्वा
सो भवती सदा नृणां निश्च
यश्च सदा मंत्रे कार्य्यं एकेन सूरि
णा भवेद्धानिश्चयावाप्तिः परबुद्धि
तुजीवनात् एकस्यैव महीभर्त्तु
र्भूयः कार्य्या विनिश्चयः इति
मत्स्यपुराणे १८९ अध्यायः ॥
मंथ ऊंथे गाहे इति कविकल्प।
द्रुमः मंथति ऊथः कोऽस्मि नम।




न्यते इति दुर्गादासः ॥
मंथ ग गाहे इतिकविकल्पद्रुमः
गाहो विलोडनं गमथ्नाति दधि
बल्लवी रथं ममंथसद्रूपे इति
दुर्गादासः ॥
मंथः पुं मंथदंडकः इत्यमरः
साक्तवः दिवाकरः इति मेदिनी।
साक्तवो यथा सक्तुभिः सर्पिषा।
प्युक्तैः शीतवारि परिप्लुतैः ।
नात्यच्छो नातिसान्द्रश्च मंथ इत्य
भिधीयते इति राजनिर्घंटः ॥
पेयविशेषः तस्य विधि र्यथा
जलेचन्द्रबले शीतेत्वेसांद्रव्यं प
लं क्षिपेत् मृत्पात्रे मंथयेत्।
सम्यक् तस्माच्च द्विपलं पिवेत्।
त्वक्सं चूर्णीकृतं मंथयेत्रमृद्वी
यात् इति भावप्रकाशः मारणं
इतित्रिकांडशेषः नेत्रमलं ।
इतिधरणिः नेत्रामयः इति
विश्वः अंशुः इति शब्दरत्ना
वली क्षुभ्यनं विलोडनं इतिमे
धपानर्थ्यदर्शनात् ॥
मंथजं क्ली नवनीतं इतिरत्नमा
ला मंथदंडकः पुं मंथानदंडः क्षौ
चुनी इति चोलमौनी इतिखड्गउ
तिच भाषा तत्पर्यायः वैशाखः
२ मंथः ३ मंथानः ४ मंथाः ५ इत्य

नरः करहर्षकः ६ मंथनः ७ म
ञ्जाटः ८ इति शब्दरत्नावली।
तक्राटः ९ इतिजटाधरः ॥
मंथनं क्ली विलोडनं क्षुभ्यनं इति
मंथधातो र्भावे अनट प्रत्ययेन
निष्पन्नं ॥
मंथनः पुं मंथानदंडः इतिशब्द
रत्नावली ।
मंथनचटी स्त्रीदधिमंथपात्रं य
था कलसी मंथनचटी मंथनी
चापिगर्गरी इतिजटाधरः ॥
मंथरं क्ली कुसम्भी इतिमेदिनी
मंथरः पुं कोषः फलं वाधः
मंथानः इति मेदिनी सूचकः
इति विश्वः मंदगामियोद्धा इ
तिक्षत्रियवर्गे अमरः कोपः ।
इत्यजयः ॥
मंथरः त्रि मंदः पृथुः वक्रः
इति मेदिनी जडः इति शब्द
रत्नावली नीचः इतिहेमचंद्रः।
मंथरा स्त्री कैकय्यादासी यथा
रामाभिषेके विघ्नार्थयतस्य अल्प
वाक्यतः मंथरा प्रविशत्वादौ कै
केयींच ततःपरं इत्यध्यात्मरा
मायणे अयोध्याकांडे २ अध्यायः
मंथरुः पुं चामरवातः तत्पर्यायः
कुटेरुः २ इतित्रिकांडशेषः ॥

मंथशैलः पुं मंदरपर्वतः इति
जटाधरः ॥
मंथा स्त्री मेथिका इतिराजनि
र्घंटः मंथाः पुं मंथानदंडः इत्य
ममरः मंथानः पुं मंथदंडकः इत्य
मरः आरग्वधः इतिराजनिर्घंटः
मंथानकः पुं तृणभेदः तत्पर्य्या।
यः हरितः १ हृच्छमूलः २ तृणा
धिपः ३ अस्यगुणाः स्निग्धत्वं दो
ग्धीणां प्रियत्वं मधुरत्वं वहुवीर्य्य
दत्वंच इतिराजनिर्घंटः ।
मंथिनी स्त्री दधिमंथनपात्रं त
त्पर्य्यायः गर्गरी १ कलसी २ इ
तिहेमचंद्रः ।
मंथोदधिः पुं क्षीरसमुद्रः इति
केचित् ॥
मंदः पुं शनिः हस्तिजातिविशे
षः इतिमेदिनी यमः इति।
त्रिकांडशेषः प्रलयः इत्यजयः
मंदः त्रि अनीहाः मूर्खः स्वैरः
अभाग्यः रोगी अल्पः । इति
मेदिनी मद्यपः खलः इति
हेमचंद्रः ॥
मंदगः त्रि मृदुगामी यथामंद
गानि शनि स्नानि हय हंसगज
स्त्रियः इति कविकल्पलता ।
मंदगामी त्रि मृदुगमनशीलः तत्

पर्य्यायः मंथरः २ इत्यमरः
मंदजननी स्त्री शनैश्चरमातासू
र्य्यपत्नी इति त्रिकांडशेषः।
मंदटः पुं पारिभद्रवृक्षः इति
शब्दरत्नावली ॥
मंदता स्त्री आलस्यं इति राज
निर्घंटः मंदत्वंच ॥
मंदनं क्ली स्तोत्रं इतिसिद्धांत।
कौमुद्यामुणादिवृत्तिः ॥
मंदरः पुं मंथशैलः मंदारपा।
दपः इतिमेदिनी स्वर्गः ॥ हार
भेदः इतिहेमचंद्रः मुकुरः ॥
इतिशब्दरत्नावली ॥
मंदरः त्रि वहलः मंदः इति
मेदिनी ॥
मंदसानः पुं अग्निः प्राणः इति
सिद्धांतकौमुद्या मुणादिवृत्तिः
निद्रा इत्युणादिकोशः ।
मंदसानुः पुं स्वमः जीवः इति
संक्षिप्तसारोणादिवृत्तिः ॥
मंदा स्त्री संक्रांतिविशेषः सा
उत्तरफल्गुन्युत्तराषाढोत्तरभाद्रप
दारोहिणी नक्षत्रेषु रविसंक्रांति
श्चेत्तदा भवति तस्याः सन्निहित
दंडत्रयस्य पुण्यजनकत्वं यथा मं
दामंदाकिनी ध्वांक्षीघोराचैव म
होदरी राक्षसी मिश्रिता प्रो।



क्रा संक्रान्तिसमया नृप मंदा
फ्रेवषु विज्ञेया मृतौ मंदाकिनी
तथा क्षिप्रेष्याख्यौ विज्ञानीया।
दुग्रेघोरा प्रकीर्त्तिता वैरमेद्रा।
दरी ज्ञेया क्रूरै ऋक्षे तैस्लराक्षसी
मिश्रिता चैवविज्ञेया मिश्रे ऋक्षे
तैस्लसंक्रमः इत्येते द्वादशा।
स्वेव संक्रान्तिषु फ्रवादिनस्तत्रयो
गान्मंदादिरूपतया समया मि
श्रास्व वि चतः पंचसप्ताष्टनव द्वा
दशपवच क्रमेण घटिकास्तेना
स्लासणं पारमार्थिक मिति दे
वी पुराण पवत्रि वत्राद्विचहि।
कानां पुणपव पुण्यं इतितिथ्या
दितत्वं ॥

मंदाकं क्ली स्लवनं इत्युणादि।
कोषः ॥

मंदाकिनी स्त्री स्वर्गगंगा तत्पर्या
यः वियद्गंगा १ स्वर्नदी २ सुरदी।
र्घिका ४ इत्यमरः स्वर्गंगा ५ देव
भूतिः ६ स्वर्गापगा ७ सुरेश्वरी ८
इतिशब्दरत्नावली तस्याविवरणं
यथा प्रयान धारायास्वर्गेसा च
मंदाकिनी स्मृता योजनायुत वि
स्तीर्णा प्रस्थेन योजनास्मृता ती
रतस्य जलाशाघ्रदस्तुतंग तरंगि
णी वैकुंठाब्रह्मलोकंच ततः स्व
र्गं समागता इति ब्रह्मवैवर्त्ते।
श्रीकृष्णजन्मखंडेजाह्नवीजन्मप्र
स्तावे ३४ अध्यायः संक्रान्तिवि।
शेषः अस्यप्रमाणं मंदा शब्दे।
द्रष्टव्यं ॥

मंदाक्रान्ता स्त्री छंदोविशेषः य
था चत्वारः प्राक्तनस्तु गुरवो द्वौ
दशैकादशौ चेन्त्यौ वर्णौ तद
नुक्रमंदामो विनिहाद्दशांमौ तद्व
ह्माक्तौ युगरसहयैर्यत्रकांतेविरा।
मो मंदाक्रान्तां प्रवरकवयस्तन्वि।
तां संगिरन्ते इति श्रुतबोधः ॥

मंदाग्निः पुं कफाद्वारास्यजठरानलः
तस्यनिदानादि यथा मन्दस्तीक्ष्णो
ऽथविषमः समश्चेति चतुर्विधः।
कफपित्तानिलाधिक्यात्तत् साम्या।
ज्जाठरोऽनलः विषमो वा तत्रा
त्र्योगं लीहृतः पित्तसम्भवान्।
करोत्यग्निस्तथा मंदो विकारान्।
कफ संभवान् समासामामेराग्नि
तामात्रा सम्यग्विपच्यते ऽल्पा।
पिनैव मन्दाग्नेर्विषमाग्नेस्तु दे
हिनः कदाचित्पच्यते सम्यक्।
कदाचिच्च न पच्यते इति माधवक
रः तस्यौषधं यथा चित्रकस्या
ष्ट भागानिश्शूरणस्य च षोडश्या।
ढाश्चत्वारि भागानि मरी चानो।

द्वयं तथा पिप्पली पिप्पलीमूलं
विडंगानां चतुष्टयं अष्टौगुग्गुलि
भागाश्च त्रिफलाया चतुष्टयं द्वि
गुणेन गुडेनैषां मोदकानि हि
कारयेत् तद्भक्षणं मनीर्षीहि पां
डुरोगं च कामलां अतिसारं च त
मंदाग्निं प्लीहाद्यं च निवारयेत् इति
गारुडे १९८ अध्यायः ॥ अथ
जठराग्नि विकाराधिकारः तत्र स
निकृष्ट निदान पूर्वकान् उदरा
ग्निविकारानाह कफ पित्तानिला
धिक्यात्तत् साम्याज्जाठरोऽनलः
मंदस्तीक्ष्णोऽथविषमः समश्चेति
चतुर्विधः तत्रमंदस्याग्नेर्लक्षण
माह स्वल्पापि नैवमंदाग्नेः मात्रा
भुक्तापि पच्यते छर्दिर्दाहः प्र
सेकः स्याच्छिरो गौरव जाठरं।
मंदाग्नि जन्या विकारानाह मंदो
ऽग्निर्देहिनां कुर्य्याद्विकारान्कफ
सम्भवान् अथ चिकित्सा हरी
तकीं तथा शुंठीं भक्ष्यमाणां गुडे
नवा सैन्धवेन युता वा सा सात।
त्येनाग्निदीपनी १ गुडेन शुण्ठीम
थवोपकुल्यां पथ्यातृतीयामथवा
दिमं वा आमेषु जीर्णेषु गुदाम्येषु
वर्चो विबन्धेषु च नित्यमद्यात् २
बोधं दंतित्रिवृत्चित्रकसप्तमूलं वि
चूर्णितं तच्चूर्णं गुडसंमिश्रं भक्ष
येत्पान तृप्तिनः पत्रकृड्राष्टकं ॥
नाम बलवर्णाग्नि वर्द्धनं शोथारा
र्शःशूलघ्नं प्लीह पांडुघ्नमयापहं।
सर्वचूर्णं समो गुडो देयः गुडाष्टकं
३ दहनाजमोद सैन्धवनागर।
मरिचानि चाम्लनकेण समाहार
ग्निकरं पांडुर्पीनाशनं परमं ४
वैश्वानरः क्षारः सामुद्रलवणांशा
दाम कर्ष मितं बुधैः सौवर्चल
पंचकर्ष विडसैन्धवधान्यकं पिप्प
ली पिप्पलीमूलं पत्रकं कृष्णजीरकं
तालीसकेशरं चव्यम स्तवेत सकं
तथा द्विकर्षमात्राण्येतानि प्रत्ये
कं कारयेद्बुधः ५ मरिचं जीरकं।
विश्वमेकेककर्षमात्रकं दाडिम
स्याम्लवर्षाक्षं त्वगेले वार्द्धकर्षके
एतच्चूर्णीकृतं सर्वं लवणं भास्करा
भिधं भक्षयेत्क्काणमानेन तक्र
मस्तुक काञ्जिकैः वातश्लेष्मभवं
गुल्मं प्लीहानमुदरं क्षयं अर्शां।
सि ग्रहणी कुष्ठं विबन्धंच भगंदरं
शूलं श्वासकासावामरोषं।
च हृद्रुजं अश्मरीं शर्करां चापि।
पांडुरोगं कृमीनपि मन्दाग्निं ना
शयेदेतद्दीपनं पाचनं परं हिता
य सर्वलोकानां भास्करेण ॥

तद्दीरितं हन्यात् सर्व्वान्यजीर्णा
नि भुक्तमात्र मसंशयं निम्बरसा
दिकं दत्वा गुटिकां मेध्य के कुर्व्वीत ॥
६ टङ्कनं रसगन्धौ च समं भा
गत्रयं विषात् कपर्दः सर्जिका
क्षारो मागधी विश्वभेषजं पृथक्
पृथक् कर्षमात्रं वत्सनाभमिहोषणं
जम्बीराम्भसा दिनं द्वयं भवेदग्नि कु
मारकः विशुचीशूलवातादिवह्नि
मान्द्यप्रशान्तये क्षारो यवक्षारः ।
अग्निकुमारो रसो विशूच्याद्यजी
र्णे ७ पारदामृत लवङ्ग गन्धकं
भाग युग्म मरिचेन मिश्रितं तत्र
जातिफल मर्द्धभागिकं तिन्तिडी
फलरसेन मर्द्दितं वह्निमान्द्य ।
दुष्टवह्निनाशनो रामवाण इति वि
श्रुतो रसः संग्रहग्रहणी कुम्भक
र्णकं साम वात खरदूषणं नयेत्
दीयते त्व चणकानुमानतः सद्य
वद्धमग्नि दीपनः रोचकः कफ
कुलान्तकारकः श्वासकासवमि
जन्तुनाशनः ८ पारदभागः १ वि
षभागः १ लवङ्गभागः १ गन्धक
भागः १ मरिचभागः २ जातीफल ।
भागः रामवाणो रसो ऽजीर्णे इति भा
वप्रकाशः ॥
मंदारुः त्रि अलसः यथा मेघस्य
मंदपत्रस्य यथा मंदारुषश्वैवे ॥
निद्रया क्रियते नक्तं दिवा च व्यर्थक
र्मभिः इति श्रीभागवते १ स्कन्धः ॥
मन्दारः पुं स्वर्गीय पञ्चवृक्षान्तर्गत
देववृक्षविशेषः यथा पंचैते ॥
देवतरवो मंदारः पारिजातकः सं
तानः कल्पवृक्षश्च पुंसि वा हरि
चंदन मिति पारिभद्रवृक्षः ।
पालितामादार इति भाषा यथा
पारिभद्रे निम्बतरु मंदारः पारि
जातक इति अर्कवृक्षः आको
न्द इति भाषा यथा अर्काह्व
वसुकास्फोत गणरूप विकीरणाः
मंदार श्वार्कपर्णो ऽत्र शुक्लेऽलर्क
प्रतापसौ इति चामरः हस्ति ।
धूर्त्तः इति मेदिनी तीर्थवि ॥
शेषः यथा वराह उवाच शृणु
सुंदरि यत्नेन यन्मां परिपृच्छ
सि कथयिष्यामि ते गुह्यं मंदा
रस्य महाक्रियां क्रीडमानोऽस्म्यहं
तत्र दृष्ट्वा मंदारपुष्पितं मंदार
पुष्पमादाय मनोज्ञं स्वस्य वै हरि ।
तत्रैकादश कुण्डानि निःसृतानि ।
गिरौ वरे विन्ध्ये च मम प्रभावे
न मंदारस्य महाद्रुमः स्थितो ह
तत्र स्वभोग भक्तो गृहकाम्यया
दृश्यते यत्र मंस्थानं मनोज्ञं तत् ॥


शिलातले यत्र तिष्ठाम्यहं देवि
मंदारद्रुम माश्रितः विस्मयं श्रु
णु सुश्रोणि मंदारेऽस्मिन् द्रुमे त
था द्वादश्यां च वत्सरे पुष्पसंभवम् ।
तिष्ठमानमः तत्र मध्याह्नवेलायां
वीक्ष्यमाणो जनैस्तैः ततोऽन्या
दिनमासाद्य दृश्यते न कदाचन त
स्मिन्मन्दारकुण्डे तु एक भक्तोषि
तो नरः स्नानं करोति शुद्धात्मा ।
न गच्छेत्परमां गतिं अथ प्राणा
न् प्रमुच्यते कुण्डे मंदारसंस्थिते
तपः कृत्वा वरारोहे मम लोका
य गच्छति तस्य चोत्तर पार्श्वे तु
स्थापनं नाम तं गिरिं तिस्रो धा
राः पतन्त्यत्र दक्षिणां दिशमाश्रि
ताः स्नानं कुण्ड मिति ख्यातं त
स्मिंस्तत्रैव परं मम दक्षिणे पत
न्धारास्त्वत्रैव चोत्तरामुखे तत्र ।
स्नातो वरारोहे एकरात्रोषितो ।
नरः मोदते दक्षिणे शृङ्गे तस्मिन्
मेरौ शिलोच्चये तत्राथ मुञ्चते
प्राणान् मम कर्मपरायणः सर्व
संगं परित्यज्य मम लोकं प्रपद्यते
नाकपृष्ठे समासाद्य मोदते दे
वैः सह तथात्र मुञ्चते प्राणा
न् कृत कृत्यः सति स्थितः तारयि
त्वा कुलं सर्वं मम लोकं प्रपद्यते ।
तस्य दक्षिणे पूर्वेण समन्ततो
वरांगने पतते विन्ध्यशृंगतु अ
गाधश्च महाह्रदः तत्र स्नानं तु यः
कुर्यादेक भक्तोषितो नरः मो
दते पूर्वपार्श्वे तु तस्मिन्मेरौ शि
लोच्चये अथात्र मुंचते प्राणान्
मम चित्तव्यवस्थितः छित्वा वै सर्व
संसारं मम लोकाय गच्छति मंदा
रस्य तु पूर्वेण गुह्यं कोटर संस्थि
तं यत्र धारापतनेन काममुषलेन ।
समन्विता तत्र स्नानं प्रकुर्वीत पं
च भक्तोषितो नरः मोदते पूर्व
पार्श्वे तु तस्मिन्मेरौ शिलोच्चये
तत्राथ मुंचते प्राणान् कृत्वा कर्म
सुदुष्करं मेरुशृंगं समुत्सृज्य म
म लोकं च गच्छति तस्य दक्षिण
पार्श्वे तु गुह्यं विन्ध्य विनिःसृतं पं
च धाराः पतन्त्यत्र सुबलेन समन्वि
ताः तत्र स्नानं तु कुर्वीत अष्टभक्तो
षितो नरः मोदते दक्षिणे शृंगे म
हामेरौ शिलोच्चये अथात्र मुंचते
प्राणान् कृत्वा कर्म सुदुष्करं मे
रुशृंगं परित्यज्य मम लोकं प्र
पद्यते दक्षिणे पश्चिमभागे म
न्दारस्य यशस्विनि तत्र धारापत
न्त्येका आदित्य सम तेजसा त
त्र स्नानं तु कुर्वीत अष्टरात्रोषि ।

नोनरः मोदते पश्चिमे भागे
शृंगोयत्र प्रवर्त्तते अथात्रस्तु वते
प्राणान्मम कर्मव्यवस्थितः सर्वथा
प विनिर्मुक्तो ममलोकेच मोद
ते तस्यपश्चिम पार्श्वे तु गुह्यं
देवसमन्वितं वक्रावर्त्त इतिख्यात
मगाधश्च महाह्रदः स्नानंकरोति
यस्तत्रपंचभक्तोषितोनरः मो
दते सर्वशृंगेषु स्वछंदगमनाल
यः अथवैस्तु वतेप्राणान् वक्रावर्त्ते
महायशाः शृंगान्सर्वान्परित्यज्य
मोदते मम सन्निधौ देशां
वायव्य माश्रित्य तस्मिन्विंध्यशि
लोच्चये तिस्रोधाराः पतंत्यत्र सु
धलाकृतयः शुभाः तत्रस्नानं प्र
कुर्वीत ममचित्तव्यवस्थितः मोद
ते सर्वशृंगेषु एकचित्तसमाश्रितः
तथात्रसंचते प्राणांश्चास्मिन् गुह्ये
यशस्विनि सर्वसंगं परित्यज्य मम
लोकाय गच्छति तस्य त्रिक्रोशा।
मात्रेण दक्षिणां दिशा माश्रितः
गुह्यं गंभीरकं नाम अगाधंच महा
ह्रदं तत्रस्नानंतु कुर्वीत षष्ठभक्तो
षितोनरः मोदतेसर्वद्वीपेषु स
र्वत्र गमनालयः अथैवं संचते
प्राणान्मम कर्मव्यवस्थितः सर्व
द्वीपान् परित्यज्यममलोकं प्रप

द्यते तस्यपश्चिमपार्श्वे तु गु
ह्यंमे परमं महत् समधाराः
पतंत्यत्र अगाधश्च महाह्रदः ॥
तत्रस्नानंतु कुर्वीत अहोरात्रो ॥
षितोनरः मोदते शक्रलोकस्थ
स्वछंदगमनालयः अथवैसुचते
प्राणान् स्वकर्मपरिनिष्ठितः स
र्वसंगं परित्यज्य ममलोकं प्रपद्य
ते मंडलं तस्य तेजस्य कथ्य
मानं मयाशृणु स्पमंत पंचकं चै
व मंदारस्य गिरोमम तत्रति।
ष्ठामि सश्रोणि विंध्यस्य गिरि
मूर्द्धनि मंदारे परमं गुह्यं त
स्मिन् गुह्य शिलोच्चये दक्षिणे
संस्थितं चक्रं वामस्थाने च वै
गदा लांगलं मुषलंचैव शंखं।
तिष्ठतिचायतः य एतत्शृणुया
न्नित्य गुह्यं मंदार संस्थितं ॥
तवचैव प्रियार्थाय मम भक्त स
ख्यावहं एतत्र जानते कश्चिन्मम।
माया विमोहितः सुच्च भागव।
तान् शुद्धात्येववाराहसंस्थितान्।
इत्यादिवाराहपुराणे भगवत्वाक्ये
मंदारगुह्यवर्णनं नामाध्यायः।
मंदास्यं क्ली लज्जा इति शब्द
रत्नावली ।
मंदाक्षं क्ली लज्जा इत्यमरः॥

मंदिकुक्कुरः पुं मत्स्यविशेषः।
इति भूरिप्रयोगः ॥ ग्रंथांतरे
मज्झिकुकुडोपि पाठः ।
मंदिरं क्ली गृहं इत्यमरः म
न्द्यते स्वप्यते ऽत्र मंदिरं मदिइ
स्वपने जाड्य मदे मोदे स्तुतौ
गतौ नाम्नीति इरः नगरं।
मंदिरं पुरमिति पुं नपुंसकयो
रहणेन पठ्यते स्त्रियोमंदिरा
च प्रयोगश्च मंदिरा यास्तुरावाणि
तिमधुमकुटाटयः इतितद्दीकायां
भरतः अथ भगवन्मंदिर
निर्माण माहात्म्यं यः कारय
न्मंदिरं केशवस्य पुण्याल्लोकान्
सजये च्छाश्वतान्वै दत्वाचारामा
न् भुक्ते कामतः श्लाघनीयान् पास
मर्मं पितृकुलं तथामातृकुलंनरः
नारयेदात्मना सार्द्धं विष्णो मं
दिर कारकः इमाश्च पितरौ दे
व्य गाथा गायंति योगिनः पु
त्रो यङ्कस्मिन्दृश्यनचस्य नय
स्विनः अपिनः स्वकुलेकश्चिद्धि
सभक्तो भविष्यति हरिमंदिर।
कर्त्ता योभविष्यति शुचिव्रतः
इति वामने शेषाध्यायः ॥
अपिच अग्निपुराणे ये ध्यायंति
॥ ॥ ॥ ॥ ॥

सदाक्षुद्ध्याकरिष्यामो हरेर्गृहं।
तेषां विलीयते पापं पूर्वजन्मशता
तोद्भवं किंच समतीतं म
विष्यंचकुलानामयुतं नरः विष्णु
लोकं नयत्याशुकारयित्वाहरे र्गृ
हं किंवालस्तेनायसहस्रेणशते
नार्द्धेन वाहरेः तत्स्यफलमसमा।
प्नोति मिहस्थर दरिद्रयोः विष्णु
धर्मोत्तरे तृतीयकांडे कृत्वावास
गृहं तस्य देवस्य परमेष्ठिनः राज
सूयाश्वमेधानां फलेन सहयुज्यते
प्रासादे मृन्मये पुण्यं मयेतत्।
कथितं द्विजाः तस्माद्दारुमये पु
ण्यं ह्येतेशतगुणं भवेत् ततो
दशगुणं पुण्यं तथाशैलमये भ
वेत् ततोदशगुणं लोहे ताम्रे
शतगुणं ततः सहस्रगुणितं रौ
प्ये तस्मात्फलमवाप्नुते ततः
शतसहस्रं वै सौवर्णे द्विजसत्तमाः
अनन्तं फलमाप्नोति रत्नचित्रे म
नोहरे स्थाने प्रारंभे कृत्स्य पि
स्य स्यसप्तजन्मानि यत्कृतं पापं।
विलयमाप्नोति नरकाद्धरेतपि
तृन् प्रासाद पादेकृतस्य यावन्ति
ष्टन्ति रेणुकाः तावद्वर्षसहस्राणि
वसतेविष्णुसद्मनि प्रासादेकृत्स्नदेवा
स्यविश्वकर्मकरोतियः वसेत विष्णु



लोकेत्व यावत्तिष्ठन्ति सागराः
नारसिंहे यः कुर्य्याच्छोभनं वेश्म
नरसिंहस्य भक्तिमान् सर्व्वपाप
विनिर्मुक्तो विष्णुलोकमवाप्नुया
त् हयशीर्षे देवागारं करोमीति
मनसा यस्तु चिन्तयेत् तस्य काय
गतं पापं तत्क्षणाद्विप्रणश्यति ।
कृतेन किं पुनस्तस्य प्रासादे वि
धिनैव तु अष्टेष्टका समायुक्तं यः
कुर्य्याद्देवस्य गृहं न तस्य फल ।
सम्पत्तिर्वक्तुं शक्येत केन चित् ।
अनेनैवानुमेयं तत्फलं प्रासाद वि
स्तरात् मरणं च व्रजेन्मर्त्यो यः कृ
त्वा प्रथमेष्टकां समस्मात्तस्य यत्त
स्य फलं प्राप्नोत्यसंशयं विस्तरह
स्ये बाल्ये च क्रीडमाना ये पांशु
भिर्भवनं हरेः वासुदेवस्य कुर्व्वी
न्ति तेऽपि तल्लोकगामिनः आदि
पुराणे लेपनाच्छादनं चैव यः क
रोति पुनर्नरः देवस्यायतनं कृ
त्वान भवेत् कीटजं भयं अ
थ मंदिरनिर्म्माणकालः मात्स्ये
चैत्रे व्याधिमवाप्नोति यो गृहं
कारयेन्नरः वैशाखे धनरत्नानि
ज्यैष्ठे मृत्युं तथैव च आषाढे
भृत्यरत्नानि पशुवर्गमवाप्नुया
त् श्रावणे मित्रलाभं तु हानिं भाद्रप

दे तथा पत्नी नाशं चाश्वयुजे का
र्त्तिके धनधान्यकः मार्गशीर्षे त
था भक्तं पौषे तस्करजं भयं लाभं
तु बहुशो विघ्नमग्निं माघे विनि
र्द्दिशेत् कांचनं फाल्गुने पुत्रानि
ति कालबलं स्मृतं अश्विनी रोहि
णी मूलमुत्तरात्रयमैन्द्रवं स्वाती
हस्तानुराधा च गृहारम्भे प्रशस्यते
आदित्यभौमवर्ज्जं च सर्व्वे वाराः
शुभावहाः वज्रव्याघातशूलानि
व्यतीपातातिगण्डके विष्कुम्भगण्ड
परिघान वर्ज्ज्यं योगेषु कारयेत् ।
श्वेतमैत्रे च माहेन्द्रे गान्धर्व्वाभि
जिद्रौहिणे तथा वैराजसावित्रे
मुहूर्त्ते गृहमारभेत् चन्द्रादित्य
बले लब्ध्वा लग्नं शुभनिरीक्षितं ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र परिव
र्ज्जयेत् हयशीर्षे वास्तुकर्मन वा
रभ्यं वर्षाकाले विजानता कृष्णप
क्षे त्रिभागान्ते शुक्लपादौ हितौ
पक्षे चतुर्थी नवमी वर्ज्ज्या तिथि
श्चापि चतुर्दशी भौमस्य तु दिनं
वर्ज्ज्यं करणं विष्टिसंज्ञितं ति
स्रोत्तरादित्यो स्येहस्ताने भेयपी
डितं उपसृष्टं ग्रहैः भं च याति
पातहतं तथा चन्द्रताराबले
च कार्य्यं कर्म विजानता अथवा ।

णि वा तत्र शस्तानि नैऋतं शक्रदैव
तं पुष्यं पौष्णं च सावित्रं वायव्य
वैष्णवं तथा स्थिरांशे च स्थिरे
लग्ने कर्त्तव्यमापवयात्मके केन्द्र
सौम्यग्रहा यस्य त्रिकोणे तु स
रोत्तम पापश्चापचय स्थाने
तदा कार्य्यं समारभेदिति ॥
अथ प्रासादस्थानं हयशीर्षे पू
र्व्वं देवकुलं पीठं प्रासादं स्वल्पकं
तथा समं वाप्यधिकं वापि नैक तो
व्यं विजानता उभयोर्हि गुणो
सीमां त्यक्त्वा चोच्छ्रायसमितो
प्रासादं कारयेदन्यो नो भयं पी
डयेद्बुधः ॥ अथ स्थानशोध
नानि देवीपुराणे देवो विष्णु
स्तथा रुद्रो ब्रह्माद्याः सर सत्तमाः
प्रतिष्ठाप्याः शुभे स्थाने अन्यथा
ते भयावहाः गर्त्तादिलक्षणाथा
श्री गन्धस्वादेन यथा भवेत् वर्णेन चा
प्यथ श्रेष्ठ सा मही सर्व्वकामदा मा
त्स्ये पूर्व्वं भूमिं परीक्षेत पश्चाद्
वास्तु प्रकल्पयेत् श्वेता रक्ता त
था पीता कृष्णा चैवानुपूर्व्वशः वि
प्रादेः शस्यते भूमिरतः कार्य्यं परी
क्षणं विप्राणां मधुरा स्वादा क ।
षाया क्षत्रियस्य च कषायेकटुका तु
हद्वैश्यशूद्रस्य शस्यते आदि मात्रे ।

वै गर्त्तं स्वनुलिप्ते च सर्व्वतः हस्त
मात्र शरावस्थं कृत्वा वर्त्तिचतुष्टयं
ज्वालयेत् परीक्षार्थं पूर्णं तत्सर्व्व
दिक्षु वै दीप्ता पूर्व्वादि गृह्णीया
द्वर्णानामनुपूर्व्वशः वास्तुः समन्
दिक्को नाम क्षीयन्ते सर्व्वतस्त्वयं शु
भदः सर्व्ववर्णानां प्रासादेषु गृहेषु च
अरत्निमात्रके गर्त्ते परीक्ष्य खात
पूरणे अधिके श्रियमाप्नोति न्यूने
हानिं समे समं फालकृष्टेऽथवा
देशे सर्व्वबीजानि रोपयेत् त्रि
पंचसप्तरात्रेण यत्र रोहन्ति तान्य
पि ज्येष्ठा मध्या कनिष्ठा भूर्व्वर्ज्जनी
येतरा सदा हयशीर्षे स्वरभीना
रतिर्यत्र सवत्सानां हृषेः सह
सुन्दरीणां रतिर्यत्र पुरुषैः सह
सत्तम राज्ञां पूर्व्वं गृहं यस्या
मग्नीनां यज्विनां तथा काश्मी
रचन्दनामोदा कर्पूरागुरुगन्धिनी
कमलोत्पलगन्धा च जातीचम्प
कगन्धिनी पाटलामल्लिकागन्धा
नागकेशरगन्धिनी द्पिद्धीय
म्यगन्धा च मदिरासवगन्धिनी स
गन्धिश्रीर्हि गन्ध्या च शुभद्रव्यसना च
या सर्व्वेषां वर्णानां भूमिः सर्व्वसाधार
णा मता दुर्गन्धा दुःस्वमाया च नाना
वर्णा च दुर्भगा हमाहेवं दसदृशा

विस्ताराद्द्विगुणायता विवर्णा च
र्णहीना च वक्रा भ्रविस्तीर्णतया।
द्विवर्णा सूर्पसदृशी गोमुखी च त्रि
कोणिका षडस्रा सदृशीरंति ए
ष्टाभ्यश्च या सरीसृपसमाया च द
ग्धा शकटाकृतिः एवं प्रकारा
या भूमिं वर्ज्जयेद्यत्नेन देशिकैः
किं च प्रासादस्य विशेषेण प्रो
क्ता भूमि स्त्रविधा सप्तधा भद्र
का पूर्णा भूद्रा रागिणप्रधाप्रा ति
लकै नीरिके वैश्य वर्हिः कोशैश्च
शोभिता पद्मेन्दीवरसंयुक्ता सा
सप्तमेति विश्रुता नदीसमुद्रा।
यत्नेन तीर्थपर्य्यन्तशोभिना पुष्प
वृक्षसमाकीर्णा तीरवृक्षोपशो।
भिता वनोद्यान लतागुल्मफल
स्तवसमावृता यज्ञीयवृक्षसंसेव
युक्ता भद्रेति कीर्त्तिता वकुलाशो
कवङ्कला तथा सप्तात्मोहितैः
मथवी वेष्टिता पाचसङ्कनिषाव
कोट्टवैः भ्रकथान्यैश्च पुन्नागै
गिरिपार्श्वगता च या तो यंच स
त्वकं यस्या सा पूर्णा परिकीर्त्ति
ता विल्वार्कस्त्रहिपीलुनावनैर्या
परितोवृता सशर्करा च कठिना पु
ष्पाकंटकिभि द्रुमैः शुभगोमायु
काकानां शेपनानायाऊलाउलैः

पूर्वेति कीर्त्तिता सा त्वतां यत्नात
परिवर्ज्जयेत् ततो भूमिं परी
क्षेत पूर्वोदक्प्लवनां शुभां शु
भेकस्तां तथा ब्रह्मनामल्पतोयां प
रिस्तृतां संपूर्ण्णमाणोवानेन त
थाधिक मृदं शुभां कृष्णभसह
शं वर्णं यस्मात्तस्मान्निम्नत्वाति न
निर्वाति तथा दीपस्तोये शीघ्रं न
जीर्य्यते स्वेतारुणपीतकृष्णाविप्रा
प्रादीनां प्रशस्यते आज्यसङ्केथम
धानां तस्यगंधा तया भवेत् मधुरा
चक षायाव अम्लाचकटुका च या
क्रमैः शरैस्तथा कोशैः डर्वाभिर्या
व संवृता तस्यां पुणेऽस्य न क्षेत्रकृ
ष्याद्भूमि परिग्रहं अथ भूमि।
परिग्रहः तत्रैव प्राकारसीमा प
र्य्यन्त ततो भूतबलिं हरेत् मांस
हरिद्राचूर्ण्णं च सलाजदधिशक्रवः
एभिर्भूतबलिं दत्वा सप्तसप्तेरा त्त
रेणत पातयित्वा ततः शंकुनष्ट
क्लिप्तनिवेशयेत् राक्षसाः श्चापि
भूताश्च येऽस्मिंस्तिष्ठंति भूतले।
ते सर्व्वेऽपगच्छंतु स्थानं कुर्य्यामहं
हरे इत्युक्त्वा पश्चात् नारीन् तोभू
मिं परिशोधयेत् या दिग्भ्यादि ग्र
हाणां च लोकपालैः समं कृती शा
स्त्रे मिश्रविधानेन ततो च होम।

मावरेत् वह्नौ होमं ततः कुर्य्या
न्मूलमंत्रेण देशिकः दघात्सु
वर्णान्ति पश्चात् वीषडेनेन देशि
कः वृषभौ कपिलौ शुभ्रसवर्णौ
वा विचक्षणः योजनार्थं हलं चैव
गृह्णीयाद्रसतोऽद्भवं पाशुवे यो
ज्यमंत्रज्ञो वस्त्रालंकारभूषितः
श्रामंनी यष्टिमादाय द्वादशाचार
विधया संमर्द्दन समीकृत्य शुभ
बीजानि वापयेत् संयामे शुभा
काले तु गोभिस्तत् खादयेत् द्युयः
पुनस्तं कर्षयित्वा तु समीकृत्य गृ
हेगुरुः मांसेव ह्रीमाधिकां ग
ता वालोः सर्वतः परिवर्जयेत्।
नगरग्राम देशेषु सर्वत्रैव विव
र्जयेत् अथ दिक्साधनं वृ
यशीर्षं वास्तुवास्तु समं कृत्वा
चतुरस्रं समं ततः भूमितोयस
मां कृत्वा दर्पणोदरसन्निभां द्वाद
शांगुल मानेन वाष्टोवारास्त्र धा
मयेत् मध्ये सन्निश्चलं शंकुस्था
पच्छायां निरीक्षयेत् प्रवेशा।
निष्क्रमे तस्यां शंकुच्छायां निरू
पयेत् वैष्णवे विमले व्योम्नि शंकु।
नासाधयेद्दिशं शारहसं तया रेव
मादित्यात् साधयेद्दिशं प्राची
वा पुष्पवेधेन विचित्रामंतरेण वा।

उदीची फवेधेन मध्ययोगेन
बोधयेत् चत्वारस्त्वा शिलाशुभ्राः शु
का वास्तुशोभना चतुर्दिक्षु नि
वेशाय सूत्रविक्षेत्र कारयेत् एवं
कृत्वा सूत्रचिह्नं ब्राह्मणांस्तत्र भोज
येत् वेसवास्यायसे नाग्रान् द्वा
दशैव समाहितः अथ शा
स्योद्धरणं मात्स्ये गृहारंभेति।
कं इतिः स्वाम्यंगेयत्र जायेत शा
स्यं त्वपनयेत्तत्र प्रासादे भवनेऽथवा
सशस्यं भयदं यस्मात् शाल्यं भय
नाशनं हयशीर्षे आदिशोद्धास्त
नः शाल्य शुद्धिस्ता ऽद्रु विकारतः
शकुनाद्दर्शनाद्वापि यस्यवाक्क्रय।
ते धनिः कीर्त्त्यते यस्य वै नामशास्त्र
तस्य विनिर्दिशेत् ॥ अथवा।
ऽत्र मंडले मात्स्ये पंचगव्यौष।
धिजलैः परीक्षित्वा वसेचयेत्।
एकाशीति पदं कुर्य्याद्रेखाभिः
कनकेन तु पश्चाल्लेख्येन वालिख
सूत्रेणालोड्य सर्वतः दश पूर्वा।
यता रेखा दश वैवोत्तरायताः।
सर्ववास्तुविभागेषु विज्ञेयानव।
का नव एकाशीतिपदं कृत्वा वास्तु।
विन्सर्ववास्तुषु पदस्थान्पूजयेद्देवा
न्त्रिंशत्पञ्चदशैव च द्वात्रिंशद्वा
तः पूज्याः पूज्यास्तान्ते अयोदश।

नामतस्तान् प्रवक्ष्यामिस्थानानि
चनिबोध मे ईशकोणादिषुस्तरा
न्पूजयेच्च विधानतः शिखीचैवा
थपर्ज्जन्योजयंतः कुलिशायुधःसू
र्य्यः सत्योभृशश्चैवआकाशोवायु
रेवच पूषाच वितथश्चैवगृहक्षत
यमावुभौ गंधर्वोभृंगराजश्च मृ
गः पितृगणस्तथा दौवारिकोथ
सुग्रीवः पुष्पदंतोजलाधिपः अ
सुरःशोषपापौचरोगोऽहि र्मुख्य
एवच भल्लाटः सोमसर्प्पौच अ
दितिश्चदितिस्तथा वहिर्द्वात्रिं
शदेते तु तदंतश्चसुरान्शृणु
ईशानादि चतुष्कोणेसंस्थितान्पू
जयेद्बुधः आपश्चैवाथ सावित्रो
जयोरुद्रस्तथैवच मध्येनवपदो।
ब्रह्मातस्याष्टौ चसमीपगाः स
वीनेकोत्तराविद्यान्पूर्वादीन्ना म
तःशृणु अर्य्यमासविताचैव वि
वस्वान् विबुधाधिपः मित्रोथराज
यक्ष्माच तथापृथ्वीधरःक्रमात् अ
ष्टमश्चापवत्सश्चपरितो ब्रह्मणः
स्मृताः अर्य्यमाच विवस्वांश्चमित्रः
पृथ्वीधरस्तथा ब्रह्मणः परितोदि
क्षुत्रिपदास्ते तु सर्वतः आपश्चैवा
पवत्सश्च पर्ज्जन्योग्नि र्दितिस्त
था पदिकानांच वर्गोयमेवंको

णेषुसर्वतः तन्मध्येतु वहिर्विं
शा द्विपदास्ते तु सर्वतः अर्य्यमाच
विवस्वांश्च मित्रः पृथ्वीधरस्तथा ब्र
ह्मणः परितोदिक्षु त्रिपदास्ते तु
सर्वतः वंशानिदानीं वक्ष्यामि र
ज्जुरपिपृथक्पृथक् वायुंयावत्त
थारोगात् पितृभ्यःशिखिनंतथा
मुख्याद्भृशं तथा शोषाद्वितथं।
यावदेवतु सुग्रीवाददितिं याव
त्मृगात् पर्ज्जन्यमेवच एतेवंशाः
समाख्याताः क्वचिद्रज्जवएवतु प
तेषां यत्तुसम्पातः पदमध्यंसमं
तथा समंचैतत्समाख्यातं त्रि
शूलं कोणगंच यत् तस्मिन्योस
षुवर्ज्यानि तलाविधिषुसर्वदा की
लोत्सर्गेपधानादि वर्जयेद्यत्न।
तोनरः सर्वत्रवास्तुनिर्दिष्टः पितृ
वंशोत्तरायतः मूर्द्धन्यग्निःसमा।
श्रितोमुखेचापःसमाश्रितः पृथ्वी
धरो ऽर्य्यमाचैवस्तनयोस्तावधिष्ठि
तौ वक्षःस्थले चापवत्सः पूजा
नीयः सदाबुधैः नेत्रयोर्दिति प
र्ज्जन्यौश्रोत्रेदितिजयंतकौ सर्प
द्वावंशसंस्थौतुपूजनीयौ प्रय।
त्नतः सूर्य्यः सोमात्ययस्तद्बाहोः
पंचच पंचच रुद्रश्च राजयक्ष्माच
वामहस्ते समाश्रितौ सावित्रः

सवितानद्धहस्ते दक्षिणमाश्रितौ
विवस्वानथ मित्रश्चजठरेसंस्थि
स्थितौ पूषाचपापयक्ष्मीचहस्तयो
र्मणिबंधने तथैवासुरशोषौच
वामपार्श्वे समाश्रितौ पार्श्वे तु
दक्षिणे तद्वद्वितथः सगृहक्षतः
ऊर्वो र्यमाम्बुपौ ज्ञेयौ जान्वो र्गं
धर्व पुष्पकौ जंघयोर्भृंगसुग्रीवौ
स्फिक्स्थौ दौवारिकोमृगः जयः
शक्रस्तथा मेढ्रे पादयोः पितृ
स्तथामध्येनवपदोब्रह्माहृदयेत्त
सपूज्यते चतुःषष्टिपदो वास्तुः
प्रासादे ब्रह्मणःस्मृतः ब्रह्मा।
चतुष्पदस्तद्वत्कोणेष्वेकपदास्त
था वहिःकोणेषुचाष्टौतुसार्द्धौ।
भयतःस्मृताः विंशतिर्द्विपदा
स्तेषां चतुःषष्टिपदेस्मृतः हृषशी
र्षे वास्त्वंगं सृजेयत्नप्राज्ञः श्वेतांव
रधरःस्रग्वि श्वेतगंधानुलिप्तांगः
सर्वालंकारभूषितः चतुःषष्टि
प्रासादे एकाशीतिगृहेस्मृता चतु
स्त्रीकृतेक्षेत्रे अष्टधाभंगभाजिते
कोणरेखां ततोदत्वासप्तभागास्त
कल्पयेत् शिवःकोणार्द्धेतोज्ञेयः
पर्ज्जन्यः पदसंस्थितः द्विपदस्था
जयोज्ञेयः सुरेशश्चैकपादिकः
भास्करस्तुपदेज्ञेयो द्विपदः।

सत्यइष्यते भृशःपदस्थोविज्ञे।
योव्योमश्चैव पदार्द्धगः कृशा
नःपदार्द्धश्चपूषा च पदसंस्थितः
वितथोद्विपदस्थश्चपदेकश्चगृह
क्षतः वैवस्वतः पदैकस्थो गंध
र्वोद्विपदस्थितः भृंगश्चैकपदो
ज्ञेयो मृगश्चार्द्धे पदेस्थितः पि
तरश्चार्द्धेतोज्ञेयाः पदेदौवारिकः
स्तथा सुग्रीवश्चपदेज्ञेयोस्त्वेक
स्थः पुष्पदंतकः यादसांपतिरेक
स्थोऽसुरस्तु द्विसंस्थितः शोषश्चै
कपदे ज्ञेयोऽप्यर्द्धगःपापइष्यते।
रोगश्चार्द्धे पदेज्ञेयो नागश्चापि।
पदेस्थितः मुख्यश्चद्विपदेज्ञेयो
भल्लाटः पदसंस्थितः यक्षेश्वरः
पदेज्ञेयो नागस्तु द्विपदेस्थितः।
पदस्था श्रीमहादेवी अदितिश्चा
र्द्धसंस्थिता आपोज्ञेयास्तुपदगा
वली द्विपद संस्थितः चतुष्पदा।
स्थो विज्ञेयस्त्वर्य्यमा पूर्वमध्यगः स
वितात्रपदेज्ञेयः सावित्रीच पदे
स्थिता तत्वविवस्वान्विज्ञेयश्च।
तुष्पद पदेस्थितः इंद्रश्चेंद्रोजया।
श्चैव पकेके संख्यावस्थिताः मित्र
श्चतुष्पदस्थश्चपश्चिमेतुव्यवस्थि
तः रुद्रः पदैकसंस्थोवैयक्ष्मावेक
पदेस्थितः पादयाश्च विज्ञेयो ॥

स्तम्भे च चरक्याद्यः चरमुखस्य
तक्रस्य मध्येज्ञेयः प्रजापतिः ॥
अथ वास्तुपूजा मात्स्ये अथातः
संप्रवक्ष्यामि प्रासाद विधिनिर्ण
यं वास्तौ परीक्षिते सम्यग्वास्तुदे
हविचक्षणाः वास्तूपशमनं कु
र्यात्सर्वमेक विचक्षणाः प्रकाशी
तिपदं लिख्यवास्तुमध्ये तु पिष्टकैः
होमस्त्रिमेखले कार्य्यः कुंडेहस्त
प्रमाणके यवैः कृष्णतिलैस्सहित
समिद्भिः क्षीरवृक्षजैः पलाशैः
खादिरैर्वापि मार्गेडुम्बरसम्भवैः
कुशाद्दूर्वामयैर्वापि मधुसर्पिः स
मन्वितैः कार्य्यस्तु पंचभिर्बिल्वै
र्बिल्व बीजैः स्थापिता होमान्ते
भक्ष्यभोज्यैश्च वास्तुदेशे बलिं
हरेत तद्दिशमनेवघ मितं
दद्यात्क्रमेणतु ईशकोणकृता
न्नं शिखिने विनिवेदयेत उदनं
सोत्पलं दद्यात् पर्जन्याय हुता
क्तं जयन्ताय ध्वजं पीतं पेयं
कूर्मवसंतजेत इंद्राय पंचरत्ना
नि येद्रक्तं कुलिशं तथा वित्ता
नकं च सूर्याय धूम्रं रक्तं तथैव च
सत्याय हुत गोधूमं मत्स्यान् द
द्याद्भृशाय च शष्कुलीं चांतरीक्षा
य दद्यात्क्षौद्रं चे वायवे पुष्पलाजास्तु

दातव्या वितथे चणकोदनं गृह
क्षताय मध्वन्नं यमाय पिशितौद
नं गंधोदनं च गंधर्वे भृंगे मेषस्य
शृंगकं मृगाय यावकं दद्यात्पि
तृभ्यः कृशरामतः दौवारिके ।
दंतकाष्ठं पेयं कृसं बलिं तथा
सुग्रीवे पूपकं दद्यात्पुष्पदन्ताय
पायसं कुशस्तंबेन सहितं दद्यात्
पद्मं च वारुणे पेयं हिरण्मयं ।
दद्यादसुराय सुरामला होतोदनं
च शोषाय गोधूमं वै पापयक्ष्मणे
हुतं लड्डुकाश्च रोगाय नागे पुष्प
फलान्वितं सर्पिर्मुख्याय दातव्यां ।
मुद्गौदनमतः परं भल्लाटाय त
तो दद्यात् सोमाय हुतपायसं ।
सर्पाय पेयं शालूकमदित्यै लोपि
कास्तथा दित्यै तु पूरिकां दद्यात्
इत्येवं बाह्येनावलिं तीरा ।
मापाय दातव्या मापवत्साय वै
दधि सवित्रे लड्डुकान् दद्यात् ।
समरीचान् कृशोदनं सवित्रेऽडु
पूपांश्च जयाय हुतं चंदनं विवस्व
तेनथा दद्यात् रक्तचंदनपायसं
हरिद्रौदनं दद्यादिन्द्राय हुत ।
संयुतं हुतौदनं च मित्राय रुद्रा ।
हुतपायसं आमं पक्वं तथा मांसं
देयं स्याद्राजयक्ष्मणे पृथ्वी ।

धराय मांसानि कूष्मांडाय वहाप
येत् सशर्करान्नं सदद्यादर्यम्ने
सर्वतः क्रमात् नमस्कारान्तयुक्ते
न मंत्रेण पुनरेव च पंचगव्ययवा
क्षैर्वतिलाक्षतहविष्यान्नं भक्ष्यं
भोज्यं च विविधं ब्राह्मणान्विनिवेद
येत् एवं संपूजिताद्देवाः शांतिं
कुर्वन्ति ते सदा स्वरेभ्यः काचनंद
द्यात् ब्राह्मणो गां पयस्विनीं राक्ष
सीनां बलिर्देयो अपिपाक्षता ।
पाश्चात्ये मांसौदनं हृतं पद्मकेश
रं हविषान्वितं ईशानभागमाश्रि
त्य चरक्यै विनिवेदयेत् दध्योद
नं सरुधिरमस्थिखंडैश्च संयुतं पी
तरक्तबलिं दद्यात् पूतनायास्तु ।
राक्षसी वायव्ये पापराक्षस्यै मत्
स्यमांस सुरासवं पायसं वा पिश
ताद्यं स्वनाम्ना सर्वतः क्रमात् नम
स्कारान्त युक्तेन प्रणवाद्येन सर्व
तः ततः सर्वौषधिस्नानं यजमा
नस्य कारयेत् द्विजांस्तु पूजयेद्भ
क्त्या ये चान्ये गृहमागताः एतद्वा
स्तूपशमनं कृत्वा कर्म समारभेत्
प्रासाद भवनोद्यानप्रारंभे परि
वर्तने पुरवेश्मप्रवेशेषु सर्व
दोषापनुत्तये इति वास्तूपशमनं
कृत्वा सूत्रेणावेष्टयेत् रक्षोघ्न पव

मानेन सूत्रेण भवनादिकं नृत्य
मंगलवाद्येन कुर्य्याद्ब्राह्मणवाच
ने अनेन विधिना यस्तु प्रतिसंवत्स
रं बुधः गृहदेवायतने कुर्य्यान्नसदुः
खमवाप्नुयात् न च व्याधिभयं त
स्य न च बंधुधनक्षयः जीवेद्वर्षश
तं स्वर्गे कल्पमेकं सवेन्नरः हयशी
र्षपंचरात्रे एवं प्रगृह्य काष्ठानि रज
सापूर्य्य देशिकः एतेषामेव देवा
नां बलिं दद्यात्तु कामिकं ईशा
नाय प्रदातव्यं पायसं मधुनासह
पर्जन्याय जलं देयं पुष्पगंधादि
वासितं जयंताय प्रदातव्या पता
का पीतवर्णिका सुरेशायवस्त्रा
नि भास्कराय हुतं तथा धूम्रकं
पीतवर्णं वा सत्ये दद्याद्वितानकं
दद्याद्भृशे पक्षिमांसं व्योमाय त
च मग्नये पूषे धानाः सलाजास्तु
सवर्णा वितथे तथा गृहक्षताय
मध्वन्नं यमाय पिशितौदनं गंध
गंधर्वदेवाय भृंगे दद्यात्पशाकनं
मृगे तिलयवांश्चैव पितृभ्यः कृश
रं तथा दौवारिके दंतकाष्ठं सुग्री
वे यावकं तथा पुष्पदन्ते कुशा
देया वरुणे पद्मसुत्पलं असुरा
ये सवं देयं रसं शोषे हुतौदनं
यवास्तु देयाः पापाय रोगाय ।

भूतमंडकं नागाय नागपुष्पा
णिभस्यान्नखावयदापयेत् विश्वे
देवं च भल्लाटे सोमाय मधुपायसं
नागाय वापि शाल्कं श्रियेसर
सपायसं अदित्यपूरिकां देया ती
रं वाप्योदरदेदलिं दधि क्षीरं
चापवत्सेऽर्घ्यमन्न लड्डुकं बलिं
कृशरायकं सविन्द्र सावित्रे गुड
पूर्वकं विवस्वते रक्तपुष्पं रक्तचं
दनमेव च हरिद्रान्नं तथेन्द्राय
सान्त्वामंत्र जयाय [illegible]
च भूतपूरान्नमिन्द्राय रुद्राय रुद्राय
सं आमपक्वानि मांसानि पदद्यात्
जयन्तायाम् स्त्रीयदायामांसं खड्गि
मांसं बलिं हरेत् सार्वतं सलिलं
चैव पंचगव्यं तथा चरुं कृशान्नं
गंधं तथा पुष्पं ब्रह्मस्थाने निवे
दयेत् आममांसं पूर्वभागे स्कं
न्दाये तथोदकं क्षितपश्चे भूतं
मांसं विदार्य्यै वाग्निकोणके कृशं
वा पूपकं मांसमर्घ्यमन्नमेव द
क्षिणे पिंडं चैव तथा रक्तं पूत
नायै नैर्ऋते तथा मांसमांसं प्रदा
तव्यं जृम्भकायै च पश्चिमे अग्नि
दग्धेन संहितं रक्तपिंडेन मिश्रितं
प्रदेयं पापराक्षसे वायव्यां मांस
मेव च उत्तरे पिलिपिच्छायै ॥

मांसं रक्तं बलिं हरेत् वारा
हैच्छागमांसानि पशाच्यां दिशि
दापयेत् नमो भूतगणानां रा
क्षसानां सरोत्तम पिशाचानां
गणानां बलिर्दयस्तु कामिकः प
नान्यापूजयेत् सर्वान् कृशपुष्पा
द्यैर्धूपः एवं संपूजिता देवाः
शान्तिपुष्टिप्रदायकाः अपूजिता
वहिंसन्ति कारकं स्थापकं तथा
तस्मादेतांस्तु संपूज्य गंधपुष्पैर्म
नोहरैः प्रासादं कारयेद्विद्वान्
गृहं वा सुरसत्तम अथ प्रासा
दमूलारंभः तत्रैव ब्रह्मस्थाने
ततः कुर्य्याद्वासुदेवस्य पूजनं श्रि
यः संपूजनं कुर्य्यात् हृषीकेशगणा
स्य च पूजनं ततः कुर्य्याद्वासुदेव
गणस्य च गंधाद्यैः पुष्पनैवेद्यधूप
दीपैः सुरोत्तम ततः संपूज्य तत्र
स्मिन् सर्वलोकधरां महीं सत्यां
सप्तमदारूपां दिव्याभरणभूषितां
ध्यात्वा समर्चयेद्देवीं परितुष्टां
स्मिताननां ततः प्रणम्य विज्ञा
प्यतन्मयत्वेन चिन्तयेत् ततः
स्वनाम मंत्रेण सर्वदेवमयं परं
ध्यात्वा समर्चयेत्तत्र यत्नाद्वास्तुमयं
नरः ब्रह्मस्थाने ततो विद्वान् कुर्य्या
द्यथारमत्नैः तस्मिन्संस्थापयेत्

कुंभं वर्द्धन्यासह पूजितं हैमं
वा राजतं वापि मृन्मयं वा दृढं नवं
सर्वबीजौषधीयुक्तं सर्वरत्नसमन्वितं
वितं रत्नगर्भं संपूर्णं वस्त्रपूतेन
वारिणा प्रशस्तपल्लवोपेतं श्वेत
चंदनचर्चितं पुष्पैः समालितं ।
कृत्वा गंधपुष्पैर्विधूपितं आह
तेन च शुक्लेन वस्त्रयुग्मेन वेष्टितं
ब्रह्मस्थाने ततो मंत्री कलशं स्थाप्य
पूजयेत् तस्मिं स्तन्मुखे देवं
प्रजेशं मंत्रविग्रहं गंधपुष्पैश्च
नैवेद्यैः पूजयेत् समनोहरैः त
तो मंडल बाह्ये तु प्राच्यां वास्तु
मूर्त्तिस्थितः आचार्य्यो गरुड सं
भारान् ग्रहादीनुपर्पयेत्सुरान् ह
तैस्तिलैर्यवैर्मंत्रैर्ब्रह्मादीनुप
येत्ततः प्रजेशं तर्पयेद्विद्वा ना
हुतीनां शतेन च द्रुतयान् दद्या
द्यथा पूर्णाहुतिं पश्चात् वौषडं
तेन मंत्रवित् तत्र प्रणम्य विज्ञा
प्य कृत्वा वै स्वस्तिवाचनं प्रगृह्य
कर्करीं सम्यक् मंडलं तं प्रदक्षिणं
सूत्रमार्गेण दिव्येन तोयधारां त
भ्रामयेत् पूर्ववत्तेन मार्गेण सूत्र
बीजानि भ्रामयेत् सशोभनं स्थ
स्थानं तथा ख्यातं स्वकारयेत् त
॥ ॥ ॥ ॥ ॥

त्रैलोक्यविधिभिः प्रतर्पयेत्

तोयान्तं खनेत्मध्ये हस्तमात्रप्रमा
णकं चतुरंगुल मात्रेन दृढ्यः स्व
न्यात् सुसम्मितं गोमयेनोपलि
प्याथ चंदनेन च भूषयेत् मध्ये
दत्वा तु पुष्पाणि शुक्लान्यत्न तमेव
आचार्य्यः प्राङ्मुखो भूत्वा ध्यायेद्दे
वं चतुर्भुजं तूर्य्यमंगलघोषेण तु
ल्यघोष रवेण च अच्छेद्यान्तरा
ख्यं कुंभं तोयेन मंत्रवित् प्रगृह्य
कर्करीं तावत्कुंभं प्रपूरयेज्जलैः ।
सर्वरत्नसमाकीर्णं विमलैः सम
गंधिभिः तस्मिन् शुक्लानि पुष्पा
णि प्रक्षिपेदामितिस्मरन् तदा वन्हे
परीतेन वेदाद्येनात्तनं क्षिपेत् ॥
कुंभं स्याद्दक्षिणावर्त्तं कुंभं वामे ।
भवेत्ततः बीजैः शालियवादीनां
तं गर्भं पूरयेद्बुधः तत्रजाभिः
पवित्राभिर्मृद्भिर्गर्त्तं प्रपूरयेत् ।
एवं पुष्पाद्यविधिनाचार्य्यदानं सु
रोत्तम सवर्णगांवस्त्रयुग माचा
र्य्याय निवेदयेत् कालसंस्थाप
नी पूज्यो वै सर्वास्माञ्छिल्पिनोऽर्चयेत् ।
ब्राह्मणान् भोजयित्वा च गेयनृत्या
दि कारयेत् ॥ ततस्तं वो तथा ।
यत्नाज्जलं तोनं यावद्द्वन्तं गुरु
पाथः स्थितं शाल्मन गृहदोषदं भवे
त् प्रासादे दोषदं शल्यं ॥

भवेद्यावज्जलांतिकं तस्मात् प्रा
सादिकी भूमिः शोध्यायावज्जलांति
कं शिवांते कर्करांतं वा यावद्वा।
भूः कुमारिका आकोत्यतां समी
कृत्य ततो यागं समाचरेत् ॥
किंच पूरयेत्खातकं यत्नात् पा
दं पादं यथा क्रमं अष्टांगुलं मृ
त्तिकया स्वस्तिकं वेदिकादिभिः
सिक्ता सिक्ता तु तोयेन कलशैः
कांचनादिभिः आकोटनं ततः
कुर्य्यात्सुदृढं भ्रमहस्तैः पा
दोनं पूरयेत्खातं समसमं चैव।
कारयेत् देशिकः पंचगव्येन तां
भूमिं प्रोक्षयेद्बुधः सुवर्णव्रीहि
गर्भेण चूतपल्लवशोभिना तीर्थ
तोयसुपूर्णेन् स्वर्णताम्रमयेन वा
सेचयेद् भिन्नमेन वा रिणा कलसे
नतः सुदृढा भवेद्भूमिर्दीर्घयुक्तापि
या भवेत् ॥ अथ शिला ल
क्षणं मात्स्ये प्रादावेवं समासे
न शिलालक्षणमुत्तमं शिला
न्यास विधानंच प्रोच्यते तदनंतरं
शिला वाथेष्टका वापि चतस्रो ल
क्षणान्विताः प्रासादादौ विधानेन
न्यस्तव्याः सुमनोहराः चतुरस्राः
समाः कृत्वा समेनारुह्य वेष्टकाः शि
लानूपास्तना विधानं दाघ्या स्रवेष्ट।

कालिका संपूर्णाः सतलाः स्नि
ग्धाः सुसमा लक्षणान्विताः कुश
दूर्वांकिता यस्याः सध्वजछत्र चामराः
सांकुशा तोरणोपेताः कूर्म मत्
स्यफलान्विताः दर्पणाहस्ति वंश
काः प्रशस्तद्रव्यलांछिताः शस्त्रप
ति मृगांकाश्च वृषांकाः सर्वदा हि
ताः स्वस्तिका वेदिकाश्छत्रानंद्या
वर्तकलांछिताः पद्मादिलक्षणो
पेताः शिलाः सर्वार्थ सिद्धिदाः
तथा गोवाजि पादांकाः शिला यु
ग्माः सुखावहाः कव्यादमृगपादां
काम शस्ताः पतितास्तथा छिद्र
च्छादि विहीनाश्च दीर्घत्वतान्वि
ताः विवर्णाः स्फुटिताभग्नाः संमा
ज्यालक्षणच्युताः प्रशस्तपाणि रू
पांकाः अशस्तद्रव्यलांछिताः य
थोक्तलक्षणोपेताः शिलानित्य।
हितावहाः अथ इष्टका लक्ष
णं तत्रैव इष्टकानां समासेन ल
क्षणं शृणुसाम्प्रतं एकवर्णाः सुप
क्वाश्च सुप्रमाणा मनोरमाः नेदा।
घाभिन्नाः अस्थ्यंगारान्विता नेष्टाः र
क्तसवर्णाः सशर्कराः मंदपक्वा।ध
क्ष्येष्टकाः कार्य्या श्वतरस्राः सर
पक्वाश्च बहुछिद्राश्च वर्जिताः भ
ग्नाश्च विषमा हीना वर्जनीयाः प्र

यत्नतः हयशीर्षे पंचरात्रे इष्टका
नां प्रमाणं च लक्षणं साम्प्रतं शृ।
णु स्वतलालक्षणोपेता द्वादशा
गुलसंमिताः सविस्तारविभागेन
त्रैगुण्येन च संमिताः सुपक्वाः सु
प्रमाणास्तास्त्वेकवर्णामनोहराः वि
मलाइष्टकाः कार्य्याश्चतरस्राः ससं
मिताः छिन्नकर्णाश्च प्रशस्ताः पा
णिपादविवर्जिताः सशर्कराः कृष्ण
वर्णाश्च अस्थ्यंगारविनाश्रयाः विवर्णा
मेदगंधाश्च याः पीताः पिंडिकाश्च
याः हीनाश्च विषमा भग्नाश्च वर्जयेत्।
श्चविवर्जिताः अथ शिलादिन्यास
व्यवस्था मत्स्ये शिलान्यासस्तु कर्त्त
व्यः प्रासादे तु शिलामये इष्टकानां
तु विन्यासः प्रासादेष्टकामये।
शैलजे शैलजः पीठपैष्टिके पैष्टि
कः स्मृतः शिलान्यासादिकोभेद
मूलपादो विधीयते हयशीर्षपं
चरात्रे कर्त्तव्यश्चेष्टकान्यासः प्रा
सादे चेष्टकामये शैलेशिलानां
विन्यासः कार्केरान्यसेत् कृ
त्वा शिलादिन्यासं च प्राक्शिला
न्यधिवासनं इष्टकानां प्रतिष्ठां च
गर्भाधानं च कारयेत् गावेदति
णादत्वा पीठबंधं समापयेत् स्वयं
श्रीहयशीर्षेण प्रोक्तस्तद्विधिः स्फु


टं ॥ अथ पीठबंधनं हय
शीर्षे पीठबंधं ततः कुर्यान्महा
प्रासाद मानतः पीठोत्तमं चोक्त
येण प्रासादस्यार्द्धमानतः पाद।
हीनं मध्यमं स्यात् कन्यसं चार्द्ध
मानतः उत्तम वासुदेवस्य कुर्य्या
त् पीठं विचक्षणः अथ प्रा
साद लक्षणानि मात्स्ये एवं
वास्तुबलिं कृत्वा भजेत् षोडश
भागिकं तस्य मध्ये चतुर्भिस्तु
भागैर्गर्भं च कारयेत् भागद्वाद
शकं तत्र भित्त्यर्थं परिकल्पयेत्
चतुर्भागेन भित्तीनामुच्छ्रायः स्या
त्प्रमाणतः द्विगुणः शिखरोच्छ्राया
भित्त्युच्छ्रायात्प्रमाणतः शिखरार्द्ध
स्य चार्द्धेन विधेयाः स्युः प्रदक्षिणा
चतुर्दिक्षु तदा ज्ञेयो निर्गमस्तु त
था बुधैः गर्भसूत्रद्वयं भागो विस्ता
रो मंडपस्य तु आयतः स्यात्रिभि
र्भागैः भद्रयुक्तः सुशोभनः पंच
भागेन संभज्य गर्भमानं विचक्षणः
भागमेकं गृहीत्वा तु प्राग्ग्रीवं क
ल्पयेद्बुधः गर्भसूत्रसमो भागाद
ग्रतो मुखमंडपः एतत्सामान्यमु
द्दिष्टं प्रासादस्य हि लक्षणं किंच मे
रु मंदर कैलास कुम्भसिंहमृग
स्तथा विमानछंदक स्तु ॥

हृच्छीहस्तो ऽथ मृगाधिपः वलभि
च्छंदकस्तद्वद्धृतमेलः सर्वभद्रकः गज
श्च नंदनश्चैव नंदिवर्द्धन एव च
हंसो वृषः सुपर्णोऽथ पद्मकोऽथ स
मुद्गकः प्रासादानामतः प्रोक्ता वि
भागाश्चैतनहिजाः शतस्तुंगा।
श्चतहीरो भूमिकाषोडशोच्छ्रितः
नानाविचित्रशिखरो मेरुः प्रासाद
उच्यते मंदरो द्वादशः प्रोक्तः
कैलासो दशभूमिकः विमानच्छं
दकस्तद्वदनेकशिखरान्वितः सप्ता
ष्टभूमिकस्तद्वत् सप्तभिर्नंदिवर्द्ध
नः विंशांडकसमायुक्तो नंदनस्तु स
मुदाहृतः षोडशांडकसंयुक्तो
नानारूपसमन्वितः अनेकशिख
रस्तद्वत्सर्वतोभद्र उच्यते चंद्र
शालसमोपेतो विज्ञेयः पंचभू
मिकः वलभिच्छंदकस्तद्वच्छुक।
नासात्रयान्वितः वृषस्याप्ययनस्त
स्यामंडलस्याभिवर्जितः सिंहः
सिंहगतिर्ज्ञेयो मृगो मृगसमस्त
था कुम्भः कुम्भाकृतिस्तद्वद्भूमि।
कानवको ज्ञेयः अंजलीपुटसंस्था
नपंचांडकविभूषितः षोडशास्रः
समन्तात्तु विज्ञेयः समुद्गकः प्रा
र्श्वयोश्चंद्रशालस्यादुच्चायां भूमिका
द्वयं षोडशास्रः सविज्ञेयो वि

चित्रशिखरः शुभः मृगराजस्तु वि
ख्यातश्चंद्रशालाविभूषितः प्राग्ग्री
वेण विशालेन भूमिकास्तषडुन्नतः
अनेकचंद्रशालस्तु गजः प्रासाद
उच्यते पर्यस्तशृङ्गराजो वै गरु
डो नाम नामतः सप्तभूम्युच्छ्रयस्त
द्वच्चंद्रशालात्रयान्वितः भूमिका
षडशीतिस्तु वा स्यान्सर्वतो भवेत्
तथान्यो गरुडस्तद्वड्प्राप्या दश भू
मिकः पद्मकः षोडशास्रस्तु भूमि
द्वयसमन्वितः पद्मतस्य प्रमाणे
न श्रीवृक्षक इति स्मृतः पंचांडक
स्त्रिभूमिस्तु गर्भे हस्तचतुष्टये वृ
षो भवति नाम्नायः प्रासादः सर्वका
मिकः समाष्टौ पंचकश्चैव प्रासा।
दाये मयादिताः सिंहस्यैते समा।
ज्ञेयाये चाप्येतत्प्रमाणतः चंद्र
शालैः समोपेताः सर्वप्राग्ग्रीवा।
संयुताः पट्टकाद्वारवाश्चैव शै
लावाश्च सतोरणाः मेरुः पं
चाशद्धस्तः स्यान्मंदरः पंचहीन
कः चत्वारिंशत्तु कैलासश्चत्रिं
शद्विमानकः नंदिवर्द्धनकस्तद्वद्वा
त्रिंशत्समुदाहृतः त्रिंशता नंद
नः प्रोक्तः सर्वतोभद्रकस्तथा।
वर्तुलः पद्मकश्चैव विंशद्धस्तउदा
हृतः मृगः सिंहश्च कुम्भश्च वलभी

च्छंदकस्तथा एते षोडशहस्ताः
स्युश्चत्वारो देववल्लभः श्रीवृ
क्षो मृगराजश्च समुद्गकगजौ तथा
एते द्वादशहस्ताः स्युरेतेषां हंस
कः समः गरुडोऽष्टको ज्ञेयो वृ
षो दश उदाहृतः एवमेते प्रमा
णेन कर्तव्याः शुभलक्षणाः यक्ष
राक्षसनागानां मानहस्तः प्रशस्य
ते तथा मेर्वादयः सप्त ज्येष्ठलिं
गेसुखावहाः श्रीवृक्षकास्त्वाष्टौ
मध्यमस्य उदाहृताः तथा हंसा
दयः पंचकन्यस्य शुभदा मताः।
हयशीर्षपंचरात्रे प्रासादं सं
प्रवक्ष्यामि सर्वसाधारणं शृणु च
तुरस्त्रीकृतं क्षेत्रं भवेत्षोडशधा
पुनः मध्येनस्य चतुभिस्तु कुर्य्या
दायसमन्वितं द्वादशैव तु भागा।
नि भित्त्यर्थं परिकल्पयेत् जंघोच्छ्रा
यं तु कुर्वीत चतुर्भागेन चायतं जंघ
यो द्विगुणोच्छ्रायं मंजर्याः कल्पये
द्बुधः चतुर्भागेन मंजर्याः कार्य्या
समकादतिणा तन्मानं निर्गमे।
कार्य्यमुभयोः पार्श्वयोः समं शिख
रेणसमं कार्य्यमग्रेजगतिविस्तरं।
त्रिगुणेनापि कर्तव्यं यथाशोभान्
रूपतः विस्तारं मंडपस्याग्रे गर्भस्
त्रहयेन तु दैर्घ्यात्पादाधिकं कु

र्यान्मध्ये स्तंभैर्विभूषितं प्रासाद।
गर्भमानं वा कुर्वीत मुखमंडपं।
एकाशीतिपदैर्वास्तुं यजेन्मंडप
मारभेत् शुकाच्छद्वारि विन्यासे।
पादान्तस्थान्यजेत् सुरान् तथा
प्रकारविन्यासे यजेद्द्वात्रिंशदंतगा
न् सर्वसाधारणं चैतत्प्रासादस्य।
तु लक्षणं मानेन प्रतिमाया वा।
प्रासादमपरं शृणु प्रतिमायाः
प्रमाणेन कर्तव्या पिंडिका शुभा
गर्भस्तु पिंडिकार्द्धेन गर्भमानात्तु
भित्तयः भित्तेरायाममानेन उच्छ्रा
यं तु प्रकल्पयेत् भित्त्युच्छ्रायात्तु द्वि
गुणं शिखरं कल्पयेद्गुरुः शिखरा।
स्य तु तुर्येण भ्रमणं परिकल्पयेत्
शिखरस्य चतुर्थेन अग्रतो मुखमं
डपं अष्टकांशेन गर्भस्य रथका
नां तु निर्गमः परिधेर्गुणभागेन
रथकांस्तत्र कल्पयेत् तत्तृतीयेन वा
कुर्याद्रथकानां तु निर्गमं वामत्रा।
यं स्थापनीयं रथकत्रितये सदा।
शिखरार्थं च सूत्राणि स्थितानि विनि
पातयेत् शिखरस्यार्द्धभागस्थं सिं
हं तत्रैव कारयेत् शुकनासां स्थि।
रीकृत्य मध्यसंधौ विवर्जयेत्॥
अपरेव तथा पार्श्वे तद्वत्सूत्रं नि।
पातयेत् तदूर्ध्वं तु भवेद्वंशः॥




कंठेशपामल सारवान् स्कंधभंगेन
कर्णेव विकरालं तथैव कुहुतं ।
वेदिकामानात्कलसंधिकल्पये
त् किंच गरुत्मंतं तथा कुर्य्याद्
परिक्षाचतुर्गुणं कुर्य्याद्दिक्पालिमा
यामात् दिक्पाशस्वोपरि महा
वराहमैशाने नरसिंहं तु दक्षिणे
प्रतीच्यां श्रीधरं देवं उदीच्यां ।
हयशीर्षकं आग्नेय्यामेवं
नैर्ऋते राममेवच वामनं चैववाय
व्यां वासुदेवमथापरे किंच
पूर्वभूमौ तु शयनं द्वितीये वासनं।
भवे स्थानमेव तृतीये तु चतुर्थे
यानमेवच पंचमे योगनिद्रा तु
षष्ठेयोगासनं भवेत् स्थानं यो
गस्यमाप्तकं सप्तमे परिकल्पयेत्
नानागवाक्षकैर्यंत्रालपत्रवल्यादि
भूषितं नानाप्रकार पुष्पाद्यै र्य
थाशोभं प्रकल्पयेत् कनिष्ठमध्य
ज्येष्ठानां प्रासादानां यथा क्रमं
वसुभागा च कृतिभिः प्रत्येयार
वनामुथैः द्वारस्य वाष्टमेषुक्तेनव
मेरुशामे तथा ललाटवेध्यौ नैवं
स्यादायस्यमृणमाम्नातं यावद्व
स्तैरभिप्रेतः प्रासादकर्त्तृणा नच
तावद्विरंगुलैरायोवसुभागेन वा
भवेत् एकत्वमोक्षजौ तयो द्वि

स्तंभा वेदिका मता दशाभूम्यंत
नितं चतुस्तंभं प्रकल्पयेत् ॥
अथमंडपलक्षणविशेषः मात्स्ये
अथातः संप्रवक्ष्यामि मंडपानां
तु लक्षणं मंडपान् प्रवरान् व
क्ष्ये प्रासादस्यानुरूपतः विवि
धा मंडपाः कार्य्या ज्येष्ठमध्यकनी
यसः नामतस्तान्प्रवक्ष्यामि शृणु
ध्वं द्विजसत्तमाः पुष्पकः पुष्पभद्रश्च
सुव्रतोमृतनंदनः कौशल्यो बुद्धि
संकीर्णो राजभद्रो जयावहः श्री
वृक्षो विजयश्चैव वास्तुकीर्णः श्रुति
धरः यज्ञभद्रो विशालश्च संश्लि
ष्टः शत्रुमर्दनः भागपंचो नंद
नश्च मानवो मानभद्रकः सुग्रीवो
हर्षणश्चैव कर्णिकारः पदार्द्धकः
सिंहश्च श्यामभद्रश्च सभद्रश्च त
थैवच सप्तविंशतिर्व्याख्याता ल
क्षणं शृणुतेन द्विजः स्तम्भानत्र चतुः
षष्टिः पुष्पकः स उदाहृतः द्वाषष्टिः
पुष्पभद्रस्तु षष्टिः सुव्रत उच्यते अ
ष्टपंचाशकस्तंभः कथ्यतेमृतनंद
नः कौशल्यः षट्पंचाशच्चतुःपंचा
शता पुनः नाम्नात्र बुद्धिसंकीर्णो
द्विहीनो राजभद्रकः जयावहस्त
पंचाशच्छ्रीवत्सस्तु द्विहीनकः विज
यस्तु द्विहीनः स्याद्वास्तुसंकीर्णकस्तथा

द्वाभ्यामेव प्रहीयेत ततः श्रुति
धरः पुनः चत्वारिंशद्यज्ञ भद्रो
द्विहीनोथ विशालकः षट्त्रिंश
च्चैव संश्लिष्टो द्विहीनः शत्रुमर्द्दनः
द्वात्रिंशद्भागपंचस्तु त्रिंशता नंद
नः स्मृतः अष्टाविंशन्मानवस्तु ।
मानभद्रो द्विहीनकः चतुर्विंशस्तु
सुग्रीवो द्वाविंशद्धर्षणो मतः विंश
तिः कर्णिकारः स्यादष्टादशः पदा
र्द्धकः सिंहो भवेद्विहीनश्च श्याम
भद्रो द्विहीनकः सुभद्रस्तु तथा
प्रोक्तो द्वादश स्तम्भसंयुतः मंड
पाः कथितास्तेते यथावल्लक्षणा
न्विताः त्रिकोणं वृत्तमर्द्धेन्दु मष्ट
कोणं द्विरष्टकं चतुष्कोणं च कर्त्तव्यं
संस्थानं मंडपस्य तु राज्यं च विज
यश्चैवमायुर्वर्द्धनमेवच पुत्रला
भः श्रियः पुष्टिस्त्रिकोणादिषु भवेत्क्र
मात् एवं तु शुभदाः प्रोक्ता अन्य
था तु भयावहाः अथ तत्र द्वार
निर्णयः हयशीर्षपंचरात्रे ग्रामम
ध्ये च पूर्वे च प्रत्यग्द्वारं प्रकल्पयेत्
विदिशासु च सर्वासु तथा प्रत्यङ्मु
खं भवेत् दक्षिणे चोत्तरे चैव पश्चि
मे प्राङ्मुखं भवेत् किंच वि
स्ताराद्द्विगुणं द्वारं कर्त्तव्यं तु सुशो
भनं ज्ञानरूपं सरजनं तद्वदुदुम्ब

रैर्हतं उदुम्बरार्द्धेनः स्वर्णं रत्ना
शाखोन्मेषद्वयः तूर्य्यमंगल चो
षेण ब्राह्मणान् स्वस्तिवाच्य च द्वार
स्य च चतुर्थांशे कार्य्यौ चंडप्रचंडको
दंडहस्तौ तु कर्त्तव्यौ विष्वक्सेनोप
मावुभौ शाखोर्द्धन्यसपरस्त्रानिम्न
सेहर्द्ध उदुम्बरे तस्य मध्ये स्थि
ता देवी साक्षाल्लक्ष्मीः सुरेश्वरी ।
कर्त्तव्यादिग्गजैः सा तु स्नाप्यमा
ना घटेन तु शाखोदुम्बरकौ का
र्य्यौ पत्रवल्ल्यादि भूषितौ एकशा
खं त्रिशाखं वा षट्शाखं द्वारमिष्य
ते नवशाखं च कुर्वीत श्रुतकर्द्धेन
कारयेत् विस्तवत्तारं रूपाद्यैः शा ।
खांत्वेन भूषयेत् मात्स्ये चतुः
षष्टिपदं कृत्वा मध्ये द्वारं प्रकल्प
येत् विस्ताराद्द्विगुणोच्छ्रायस्तत्त्रि
भागा कटिर्भवेत् विस्तारार्द्धे भ
वेद्गर्भो भित्तयोऽन्याः समन्त ।
तः गर्भपादेन विस्तीर्णो द्वारं द्विगु
णमायतं उच्छ्रायात्पादविस्तीर्णा
शाखा तद्वदुदुम्बरः विस्तारपाद ।
प्रतिमं बाहुल्यं शाखयोः स्मृतं ।
त्रिपंचसप्तनवभिः शाखाभिद्वार
मिष्यते कनिष्ठं मध्यमं ज्येष्ठं य
थायोगं प्रकल्पयेत् मंगलानां श
तं सार्द्धं चत्वारिंशद्विरुत्तमं ॥




यम्यसप्तम मापुष्यंयन्थाम्यट मेव
च शतं चाशीति सहितं वान
निर्गमनं भवेत् अधिकं दशभि
स्तहस्तया षोडशभिः शतं शत
मानं द्वितीयंत भवेत् षडशीतिभि
स्तथा दशद्वाराणि चैतानि क्रमे
णोक्तानि सर्वदा अन्यानि वर्जनी
यानि मानमोहकराणि तु द्वारवे
धं तु यत्नेन सर्वेषां तु विवर्जयेत् वृ
क्षकोणाद्य भूद्वारात्स्तम्भकूपध्वजा
दपि कृत्वा भ्रमेण वा विद्धं न द्वा
रं शुभदं भवेत् तयस्य दुर्गति
श्चैव प्रवासः स्वद्वयेन तथा दौ
र्भाग्यं वधमं रोगो दारिद्र्यं कल
हं तथा विरोधश्चार्थनाशश्च स
र्वे वेधे भवेत्क्रमात् ॥ अथ
प्राकारादि निर्णयः हयशीर्षपं
चरात्रे प्रासादस्य चतुर्भागैः प्रा
कारस्योच्छ्रयो भवेत् पंचहस्तस्य
देवस्य एकहस्ता तु पीठका त
स्मात्तु द्विगुणः प्रोक्तस्तथा गरुड
मंडपः एकहस्तादिकं पीठं त्रिंशा
द्धस्तान्तमेव च अथ हस्तारोपणा।
निर्णयः मासे पूर्वेण फलिनो
वृक्षाः क्षीरवृक्षास्तु दक्षिणे पश्चि
मेन जलं श्रेष्ठं पद्मोत्पलं विभू
षितं उत्तरेण तु शैलाः शुभा

स्यात्पुष्पवाटिका सर्वतस्तु जलं श्रे
ष्ठं स्थिरमस्थिरमेव च सर्वतस्त्वापि
कर्तव्यं परिखावप्रयादिकं याम्ये
तपोवनं स्थानं मन्त्रे मातृकागृहं
महानसं तथाग्नेये नैर्ऋते तु वि
नायकः वारुणे श्रीनिवासश्च वाय
व्ये ग्रहमालिका उत्तरे यज्ञशा
ला तु निर्माल्यस्थानमुत्तरे वारु
णे सोमदेवस्य वलिनिर्वपनं स्मृतं
पुरतो गरुडस्थानं तथान्येषां य
थोचितं एवमायतनं कुर्य्याच्छु
भमंडपसंयुतं चैत्यं वितानकस
तोरणं चित्रशुक्लं निष्पाद्य समुदि
तेन जनेन सार्द्धं यः कारयेत्
स्वगृहं विविधध्वजाढ्यं श्रीस्तं
न मुंचति सदा दिवि पूज्यते च अ
थ जीर्णोद्धारः विश्वधर्मोत्तरीय
कोषे यस्य राज्ञस्तु विषये देव वे
श्म विशीर्य्यते तस्यासीदति तद्रा
ज्यं देववेश्म यथा तथा कृत्वा जी
र्णस्य संस्कारं तथा देववेश्मनः
द्विगुणं फलमाप्नोति नात्र कार्य्या
विचारणा विस्तरहस्य पतित।
स्य च यः कर्त्ता पतमानस्य रक्षिता
विष्णवायतनस्येह स नरो विष्णु।
लोकभाक् अग्निपुराणे पतितं
पतमानं तु तथार्द्धस्फुटितं नरः

समुद्धरेत् हरेर्द्धाम द्विगुणं फल
माप्नुयात् देवीपुराणे मूला
च्छतगुणं पुण्यं प्राप्नुयाज्जीर्ण
कारकः तस्मात्सर्वप्रयत्नेन जी
र्णस्योद्धारमाचरेत् हयशीर्षपंच
रात्रे वापीकूपतडागानां प्रा
सादानां तथानच प्रतिमानां स
भानां च संस्कर्त्ता यो नरो भुवि
पुण्यं शतगुणं तस्य भवेत्कृत्वा
न संशयः प्रतिष्ठाया विधिः
कार्य्यस्तथा मंदिरनिर्मिते प्रायः
श्रीहयशीर्षोक्त रत्नसारणवैस्त
वैः देवालयप्रतिष्ठाच ख्याता
तल्लिखनेन किं श्रीमूर्त्तिस्थापा
नेनैव संपूर्णा साविशेषतः इति
श्रीहरिभक्तिविलासे २० विलासः
मंदिरं क्ली नगरं इति मेदिनी।
पुंलिंगोऽप्ययं शब्दः यथा नग
रं मंदिरं पुरमिति पुं नपुं।
सकयोरनुरूपेण पठ्यते इत्यमर
टीकायां भरतः ॥
मंदिरः पुं समुद्रः इति मेदिनी।
जानुपश्चाद्भागः इति हेम
चन्द्रः ॥
मंदिरपशुः पुं विडालः इति
शब्दचन्द्रिका ॥
मंदिरा स्त्री मंदिरं यथा मंदिरा

यास्त्वरावानितिमधुमङ्कुटादयः
मंदुरा स्त्री वाजिशाला इत्यमरः
शयनीयार्थवस्त्र मादुर इति भा
षा इति मेदिनी ॥
मंदोदरी स्त्री रावणमहिषी सा
तु मयदानवकन्या इति रामायणं
मंदोदरीशः पुं रावणः इति त्रि
काण्डशेषः ॥
मंदोदरीसुतः पुं इंद्रजित् इति
जटाधरः ॥
मंदोष्णं क्ली ईषदुष्णं तद्वति त्रि
इत्यमरः ॥
मंद्रः पुं गंभीरध्वनिः इत्यमरः
वाद्यविशेषः तत्पर्य्यायः मड्डुः २
मृदंगकः २ इति शब्दरत्नावली।
मन्मथः पुं कामदेवः कपित्थवृ
क्षः इत्यमरः कामचिंता इति मे।
दिनी कामदेवस्योत्पत्तिर्यथा।
एवं चिंतयतस्तस्य ब्रह्मणो ॥
मुनिसत्तमः मनसः पुरुषो वल्या
राविर्भूतो विनिःसृतः कांचनी
चूर्णपीताभः पीनोन्नतसुनासि
कः सुवृत्तोरुकटीजंघो नीलाव।
लितकेशकः लग्नभ्रूयुगलो लो
लः पूर्णचंद्रनिभाननः कपाटवि
स्तीर्णहृदि रोमराजीविराजितः अ
भ्रमातंगकरवत्पीनविस्तृत बाहु



कः आरक्तपाणि नयनाङ्घ्रिमुखपाद
करोद्भवः क्षीणमध्यश्चारुदंतः
प्रमत्तगजकंधरः प्रफुल्लपद्मपत्रा
क्षः केशरघ्राणतर्पणः कम्बुग्री
वो मीनकेतुः प्रांशुर्मकरवाहनः
पंचपुष्पायुधो योगी पुष्पकोदंड
मंडितः कांतः कटाक्षपातेन भ्राम
यन्नयन द्वयं सुगंधिमारुतो भा
वी शृंगाररससेवितं वीक्ष्य तं ताद
शं दक्षप्रमुखा मानसाश्च तेम
रीच्याद्या दश ततो विस्मयाविष्ट
चेतसः औत्सुक्यं परमं जग्मु रा
पूर्वैकारिकं मनः सचापि वेध
सं वीक्ष्य स्रष्टारं जगतां पतिं
प्रणम्य पुरुषः प्राह विनयानत
कंधरः श्रीपुरुष उवाच किंकरि
ष्याम्यहं कर्म ब्रह्मंस्तत्रनियोज
य मां नार्ह्यपुरुषो यस्माद्भविते।
शोभिते विधे अभिधानंच यद्यो
ग्यं स्थानं पत्नीचयाममं तन्मेऽकु
रुष्व लोकेशास्त्वष्टा त्वं जगतां यतः
मार्कंडेय उवाच एवं तस्यवचः।
श्रुत्वा पुरुषस्य महात्मनः क्षणं न
किंचित्प्रोवाच स्रष्टापि विस्मि
तः ततो मनः स्वसंयम्य समागत
स्वप्नविस्मयं उवाच पुरुषं ब्रह्मा
तत्कर्मादेशमावहन् ब्रह्मोवाच।

अनेन चारुरूपेण पुष्पबाणैश्च पं
चभिः मोहयन् पुरुषां स्त्रीश्च
कुरु सृष्टिं सनातनीं न देवा नच
गंधर्वा न किन्नरमहोरगाः नासुरा
नच दैत्या वान विद्याधरराक्षसाः
न यक्षा न पिशाचाश्च न भूता न
विनायकाः न गुह्यका न सिद्धाश्च
न मनुष्या न पक्षिणः पशवो न
मृगाः कीटाः पतंगा जलजाश्च ये
नेते सर्वे भविष्यंति न लक्ष्या ये
शरस्य ते अहं वा वासुदेवो वा
स्थाणुर्वा पुरुषोत्तम भविष्याम
स्तव वशे किमन्यैः प्राणधारिभिः
प्रच्छन्नरूपी जंतूनां प्रविशन् हृद
येसदा स्वयं हेतुः स्वयंभूत्वा कुरु
सृष्टिं सनातनीं त्वल्लक्ष्यबाणस्य
सदा सख्ये लक्ष्यं मनोत्वच सर्वे
षां प्राणिनां नित्यं मद मोदका
रो भवान् इति तेकर्मकथितं ॥
सृष्टि प्रावर्त्तकं पुनः नामानि च
वदिष्यामि यत्ते योग्यं भविष्यति।
मार्कंडेय उवाच इत्युक्त्वाथ सुर
ज्येष्ठो मानसानां मुखानि च प्रा
लोक्य वासने पद्मे सोपविष्टोऽभ
वत्क्षणात् इति कालिकापुराणे
कामप्रादुर्भावो नाम १ अध्यायः
मार्कंडेय उवाच ततस्ते ॥

मुनयः सर्वे तदभिप्रायवेदिनः
चक्रुस्तदुचितं नाम मरीच्यादिमु
खास्तदा मुखावलोकनादेव स्रष्टा
वृत्तान्त मन्मथः दक्षादयश्च स्रष्टा
रः स्थानं पत्नीं चैतददुः ततो नि
श्चित्य नामानि मरीचिप्रमुखा द्वि
जाः ऊचुः संगतमेतस्मै पुरुषाय
द्विजोत्तमाः ऋषय ऊचुः यस्मात्
प्रमथ्य चेतस्त्वं जातोऽस्माकं तथा
विधेः तस्मान्मन्मथनाम्ना त्वं लोके
गेयो भविष्यसि जगत्सु काम रू
पस्त्वं त्वत्समो नहि विद्यते अत
स्त्वं कामनाम्नापि ख्यातो भव म
नोभव मदनान्मदनाख्यस्त्वं शंभो
र्दर्पात् कंदर्पकः तथा कंदर्पनाम्ना
पि लोके ख्यातो भविष्यसि ॥
त्वत्सायकानां यद्वीर्यं तद्वीर्यं न भ
विष्यति वैष्णवानां च रौद्राणां ब्र
ह्मास्त्राणां च तादृशं स्वर्गो मर्त्य
श्च पातालं ब्रह्मलोकः सनातनः
अवस्थानानि सर्वाणि सर्वव्यापी
भवान्यतः किमन्याथापि विशेषो।
णसामान्येनास्ति ते समः यत्र यत्र
भवेत्प्राणी शाह्लादस्तत्र वोऽथवा
तत्र तत्र तवस्थान मन्मथाब्रह्मसदे
तयं दक्षोऽयं भवतः पत्नीं स्वयं
दास्यति शोभना इति कालिका।


पुराणे २ अध्यायः ॥
मन्मथानंदः पुं महाराजचूतः इति
राजनिर्घण्टः ॥
मन्मथालयः पुं आम्रः इति राज
निर्घण्टः ॥
मन्मनः पुं गद्गदध्वनिः इति त्रि
कांडशेषः ॥
मन्या स्त्री ग्रीवायाः पश्चात्शिरा
इत्यमरः ॥
मन्याका स्त्री मन्या इति शब्दर
त्नावली ॥
मन्युः पुं शोकः दैन्यं क्रतुः
क्रोधः इत्यमरः अहंकारः।
इति शब्दरत्नावली ॥
मन्वंतरं क्ली दिव्यानां युगानामे
कसप्ततिः इत्यमरः देवमाने
नैकसप्ततियुगानि मन्वंतरमुच्य
ते मनोरंतरमवकाशोऽवधिर्वा।
अस्मिन्निति मन्वंतरं एवं चतुर्युगा
ख्यानां साधिकाह्येक सप्ततिः
कृतत्रेतादि युक्तानां मनोरंतर
मुच्यते इति लिंगपुराणं मनवः
स्वायंभुवादयः तेषां मंतरमव
काशोऽवधिर्वा मन्वंतरमिति वा।
एकसप्ततिरिति यद्यपि गणनया
अष्टयुगेनाधिका दैविकानां युगा
नां तु सहस्रं ब्रह्मणो दिनं मन्वंतरं

तथैवैकं तस्य भागा स्त्वर्दशा।
नकिंचिदधिका दिव्ययुगान्येक
सप्तति रिति नाम विधाने सर्वज्ञ
नारायणेनोक्तत्वात् तथापि ग्रन्थ
त्वादिह नोक्तं मन्वंतरस्य संख्यान
वर्षाणि यथा त्रिंशत्कोट्यस्तु वर्षा
णां मानुषेण द्विजोत्तमाः सप्तषष्टि
स्तथान्यानि नियुतान्यधिकानि तु
विंशतिस्तु सहस्राणि कालोऽयं सा
धिकं विना मन्वंतरस्य संख्येयालिं
गेऽस्मिन्कथिता द्विजाः ॥ इति
एतदंका यथा ३०६७२···· एवं
चतुर्दश मन्वंतरै ब्रह्मदिनं यु
गानि यथा लैंगे पूर्वं कृतयुगं त्वा
मनन्तरं त्रेता विधीयते द्वापरश्च क
लिश्चैव युगान्येतानि सुव्रताः
युगमानानि यथा चत्वारि त्रीणि।
द्वे चैकं कृतादिषु यथाक्रमं दिव्या
ब्दानां सहस्राणि युगेष्वाहुः पुराविद
इति अन्यच्च चत्वार्याहुः सहस्रा
णि वर्षाणां तत्कृतं युगं तस्य तावच्च
तीसंध्या संध्यांशश्च तथा विधः
इतरेषु ससंध्येषु ससंध्यांशेषु च
त्रिषु एकापायेन वर्तन्ते सहस्रा।
णि शतानि चेति अस्यार्थः देवमाने
सत्यस्य वर्षाणि ४··· चतुःसह।
स्राणि संध्या वर्षाणि ४·· चत्वारिंशता
नि

संध्यांशवर्षाणि ४··· चत्वारिंश
तानि एवं देवमाने सत्यस्य वर्षा।
णि अष्टशताधिक चतुःसहस्राणि
णि ४८·· एवं त्रेतायाः षट्शताधिक
त्रिसहस्रं ३६·· एवं द्वापरस्य चतुःशता
धिकं द्विसहस्रं २४·· एवं कलेः
शतद्वयाधिक मेकसहस्रं १२·· स
मुदायेन द्वादशसहस्राणि १२···।
मानुषमानेन सत्यादीनां मानं य
था ज्योतिषे वस्वाब्धिमेघा ऋतु
रंध्रमासा देवा रसाष्टौ भुजवह्नि
वेदाः एतानि सूर्यत्रय नाडिना।
नि युगाह्वसंख्याः परिकीर्तितानि
एतदंकै र्दृश्यते सत्यस्य यथा
१७२८··· त्रेताया यथा १२९६···
द्वापरस्य यथा ८६४··· कले
र्यथा ४३२··· समुदायेन ४३२····
अपरं श्राद्धवर्षादिमानं वाङ्मल्या।
भिया नोक्तं इति तट्टीकायां मन्व
तः अपि च ब्रह्मणो दिन म
ध्ये चतुर्दश मन्वंतराणि भवंति।
एको मनुर्यावदधिकारी भवति स
कालो मन्वंतर संज्ञको भवति।
तत्र मनूनां नामानि प्रथमः स्वायं
भवो मनुः द्वितीयः स्वारोचिषो ॥
मनुः तृतीय उत्तमो मनुः चतुर्थो।
स्तामसो मनुः पंचमो रैवतो ॥

मनुः षष्ठ श्चाक्षुषो मनुः सप्तमो।
वैवस्वतो मनुः वर्तमानो ऽष्ट
अष्टमः सावर्णिर्मनुः नवमो दक्ष।
सावर्णिर्मनुः दशमो ब्रह्मसावर्णि
र्मनुः एकादशो धर्मसावर्णिर्मनुः
द्वादशो रुद्रसावर्णिर्मनुः त्रयोदशो
देवसावर्णि र्मनुः चतुर्दश इंद्र।
सावर्णिर्मनुः प्रतिमन्वंतरं भगवद
वतारेंद्र देवगणसप्तर्षिमनुमनुपु
त्रादयः पृथक्पृथग्भवंति तद्यथा
स्वायंभुवे मन्वंतरे यज्ञोऽवतारः
सप्तवेंद्रः यमादयो देवाः मरी
चिप्रभृतयः सप्तर्षयः स्वायंभुवो
मनुः प्रियव्रतोत्तानपादौ मनुपुत्रौ
। स्वारोचिषे विभुरवतारः रो
चन इंद्रः देवा स्तुषितादयः ॥
ऊर्जस्तम्भादयः सप्तर्षयः अग्नि
स्तनः स्वारोचिषो मनुः द्युमत्सेनरो
चिष्मन् प्रमुखा मनुपुत्राः २।
उत्तमे सत्यसेनोऽवतारः सत्य
जिदिन्द्रः सत्यवेद श्रुतभद्रादयो
देवाः वशिष्ठसुताः सप्तर्षयः प्रम
दादयः प्रियव्रतसुत उत्तमो मनुः
पवनसृंजय यज्ञहोत्राद्या स्तत्
सुताः ३ तामसे हरिरवतारः ॥
त्रिशिखइंद्रः वैधृतादयो देवाः
ज्योतिर्धामादयः सप्तर्षयः ॥

तामसो मनुः वृषख्यातिनरादय।
स्तत्सुताः ४ रैवते विकुंठो ॥
ऽवतारः विभुरिंद्रः भूतरयादयो।
देवाः हिरण्यरोमादयः सप्तर्षयः
रैवतो मनुः वलि विंध्यादय स्तत्
सुताः ५ चाक्षुषे अजितो ऽवतारः
मंत्रद्रुम इंद्रः आप्यादयो देवाः
हर्यष्मवीरकादयः सप्तर्षयः
चाक्षुषो मनुः पुरु पुरुष सुद्यु
म्नादय स्तत्सुताः ६ वैवस्वतेवा
मनो ऽवतारः पुरंदर इंद्रः आदि
त्या वसवो रुद्रा विश्वेदेवा मरु
द्गणा अश्विनावृभव इत्याद्या दे
वाः कश्यपोऽत्रि र्वसिष्ठो विश्वा
मित्रो गौतमो जमदग्नि र्भरद्वाजप
नेसप्तर्षयः वैवस्वतो मनुः इक्ष्वा
कुः नृगः शर्यातिः दृष्टः धृष्टः क
रूषकः नरिष्यन्तः नाभागः कविः
एते मनुपुत्रा दश ॥ अथ भवि
ष्याणि सावर्णिके सार्व भौमो ऽव
तारः वलिरिंद्रः , सुतपसो वि।
रजा अमृतप्रभा देवाः गालव :
दीप्तिमान्परशुरामः अश्वत्थामा कृ
पः ऋष्यशृंगः व्यासः एते सप्तर्षयः
सावर्णिर्मनुः निर्मोक विरजस्का
द्याः तत्सुताः ८ दक्षसावर्णिके ऋ
षभो ऽवतारः अद्भुत इंद्रः।



पारमरीचि गर्भाद्यादेवाः द्युति
मदाद्याः सप्तर्षयः दक्षसावर्णिर्म
नुः भूतकेतुदीप्तिकेत्वाद्यास्तत्सु
ता ९ ब्रह्मसावर्णिके विष्वक्सेनोऽ
वतारः शंभुरिंद्रः सारसेन विरु
द्धाद्यादेवाः हविष्मदाद्याः सप्त
र्षयः ब्रह्मसावर्णिर्मनुः भूरिषेणा
द्यास्तत्सुताः १० धर्मसावर्णिको
धर्मसेतुरवतार वैधृतरिंद्र वि
हंगम कामगमाद्या देवाः अरु
णादयः सप्तर्षयः धर्मसावर्णिर्म
नुः सत्यधर्मादयस्तत्सुताः ११
रुद्रसावर्णिके स्वधामाख्योऽवता
रः ऋतधामा इंद्रः हरितादयो
देवाः तपोमूर्त्यादयः सप्तर्षयः
रुद्रसावर्णिर्मनुः देववद्रुपदेवाद
यस्तत्सुताः १२ देवसावर्णिके यो
गेश्वरोऽवतारः दिवस्पति रिंद्रः
सुकर्मसूत्राद्या देवाः निर्मोक तत्व
दर्शाद्याः सप्तर्षयः देवसावर्णिर्म
नुः चित्रसेन विचित्राद्यास्तत्सुता
१३ इंद्रसावर्णिके बृहद्भानु रवता
रः शुचि रिंद्रः पवित्र चाक्षुषादयो
देवाः अग्निबाहु शुचि शुद्ध मा ग
धाद्याः सप्तर्षयः इंद्रसावर्णिर्मनुः
उरुगंभीर बुध्याद्यास्तत्सुताः १४
युगैनेषांकर्मउच्यते इंद्रो ॥

देवगाद यथावर्षीच मन्वादौष्ट
थिव्या राजा भवति तत्समये ।
ब्रह्मणो मन्वंतर समाप्ति पर्यंतेरा
जानोभवंति देवताः प्रजानां य
ज्ञादिकर्मतत्फलस्य भ्रंशाभ्येति
सप्तर्षयो धर्मशास्त्राणि प्रकाशयंति
भगवद्वतारा धर्मान् स्वस्वकर्माणि
नियोजयंति दैत्यराक्षसादीन्मर्द
यंतीति चतुर्दशमन्वंतरै ब्रह्म
णएकं दिनं भवति तत्परिमाणं
नैकः कल्पः त्रिंशत्कल्पैर्ब्रह्मण ए
कोमासोभवति इति श्रीभागवतेम
तं अथ द्वादशवर्षलक्षाणि चत्वारि
भवेत्कलियुगेक्रमे द्वात्रिंशत्या
सहस्रैस्तु सहितान्यपि संख्यया
चतुःषष्टि सहस्राणि लक्षाण्यष्टौ
च संख्यया वर्षाणां द्वापरे प्रोक्ता
युगं पूर्व निदर्शनात् त्रेता द्वादश
लक्षाणि वर्षाणां परिकीर्त्तिता य
ण्णवत्या सहस्रैस्तु संयुक्तानि भवंति
हि दशसप्तचलक्षाणां वर्षाणां च
कृतं युगं सहस्रैरष्टविंशत्या संयुता
न्यपि संख्यया त्रिचत्वारिंशल्लक्षा
णि सहस्राणि च विंशतिः मानुषे
णप्रमाणेन भवेच्चातुर्युगं क्रमा
त् सप्तषष्टिश्च लक्षाणि त्रिंशत्को
ट्यस्तथैव च विंशतिश्च सहस्रा ।

णि मन्वंतर मिहोच्यते चतुर्युगै
क सप्तत्या मन्वंतरमिति स्मृतिः क
ल्पे मन्वंतरै रेभि श्चतुर्दशभिरुच्य
ते कोट्यो द्वादशषड्विंशल्लक्षा
णि तत्र भवंति च अष्टाशीति सहस्रा
णि जीवेस्वायंभुवो मनुः इति व
ह्निपुराणं अपरं च मार्कंडेया
उवाच मन्वंतरं मनोः कालो
यावत्पालयते प्रजाः प्रकोम
नुः स कालस्तु मन्वंतरमिति स्मृ
तं तदेक सप्तति युगैर्देवानामिह
जायते ते चतुर्दशभिः कल्पादि
नमेकं तु वेधसः इति कालिकापु
राणे २३ अध्यायः अन्यदपि ।
मन्वंतराण्यशेषाणि श्रोतुमि
च्छाम्यहं क्रमात् मन्वंतराधिपांश्चै
व शक्रदेव पुरोगमान् भवताक
थितानेतान् श्रोतुमिच्छाम्यहं गु
रो श्रीपराशरउवाच अतीतानागा
तानीह यानिमन्वंतराणि वै ता
न्यहं भवतः सम्यक् कथयामि स
मासतः स्वायंभुवो मनुः पूर्वं मनुः
स्वारोचिष स्तथा उत्तमस्ताम
सश्चैव रैवतश्चाक्षुषस्तथा षडेते म
नवो ऽतीताः सांप्रतं तु रवेः सुतः
वैवस्वतोऽयं तस्यैतत् सप्तमं
वर्त्तते ऽत्तरं स्वायंभुवं तु कथितं

कल्पादावंतरं मया देवास्तत्रर्षयै
श्चैव यथा वत्कथिता मया । अत ऊ
र्द्धं प्रवक्ष्यामि मनो स्वारोचिषस्य तु
मन्वंतराधिपान् सम्यग्देवर्षीस्तत्
सुतांस्तथा पारावताः सतुषिता
देवाः स्वारोचिषेऽन्तरे विपश्चित्तत्र
देवेंद्रो मैत्रेयासीन्महाबलः ऊ
र्जस्तंभस्तथा प्राणो दत्तोलि ऋष
भस्तथा निश्चरश्चार्ववीरांश्च तत्र
सप्तर्षयो भवन् चैत्र किंपुरुषा ।
द्याश्च सुताः स्वारोचिषस्य तु द्वि
तीयमेतद्व्याख्यातमन्तरं शृणु चो
त्तमं २ तृतीयेऽप्यन्तरे ब्रह्मन्नो
त्तमिर्नाम यो मनुः सुशांतिर्नाम
तत्रेंद्रो मैत्रेयाभूत्सुरेश्वरः सु
धामानस्तथा सत्याः शिवाश्चाथ
प्रतर्दनाः वशवर्त्तिनश्च पंचैते ।
गणा द्वादशकाः स्मृताः वशिष्ठत
नयास्तत्र सप्त सप्तर्षयोऽभवन् अ
जः परशु दिव्याद्यास्तथोत्तममनोः
सुताः ३ तामसस्यान्तरे देवाः सु
रूपा हरयस्तथा सत्याश्च सधियः
श्चैव सप्तविंशतिका गणाः शिबि
रिन्द्रस्तथा चासीच्छतयज्ञोपलक्ष
णः सप्तर्षयश्च ये तत्रैतेषां नामानि
निमेधस्ते ज्योतिर्धामा पृथुः काव्य
श्चैत्राग्निर्वनकस्तथा पीवरस्तथर्षे ।

र्षयोह्येते सप्ततत्रापिचांतरे नरः
ख्यातिः शांतहयो जानुजंघादय
स्तथा पुत्रास्तामसस्यासन् राजानः
सुमहाबलाः ४ पंचमे चापि मै
त्रेय रैवतो नाम नामतः मनुर्विभु
स्तत्रेंद्रो देवांश्चैवांतरे शृणु ।
अमिताभा भूतरया वैकुंठाः सुस
मेधसः एते देवगणास्तत्र चतुर्दश
चतुर्दश हिरण्यरोमा वेदश्रीर्
ऊर्ध्वबाहुस्तथापरः वेदबाहुः सुधा
मा च पर्जन्यश्च महामुनिः एते सप्त
र्षयो विप्र तत्रासन् रैवतान्तरे ।
बलबन्धुः ससंभाव्यः सत्यकाद्या
श्च तत्सुताः नरेंद्राश्च महावीर्या
बभूवुर्मुनिसत्तम स्वारोचिषश्चो
त्तमिश्च तामसो रैवतस्तथा प्रि
यव्रतान्वया ह्येते चत्वारो मनवः स्मृ
ताः विष्णुमाराध्य तपसा स राज
र्षिः प्रियव्रतः मन्वन्तराधिपानेता
न् लब्धवानात्मवंशजान् ५ षष्ठे
मन्वन्तरे चासीच्चाक्षुषाख्यस्तथा म
नुः मनोजवस्तथैवेंद्रो देवानपि ।
निबोध मे आर्याः प्रसूता भव्याश्च
पृथुगाश्च दिवौकसः महानुभावा
लेखाश्च पंचैते ह्यष्टकाः गणाः स
मेधा विरजाश्चैव हविष्मानुन्नतो
मधुः अतिनामा सहिष्णुश्च सप्तास

न्निति चर्षयः ऊरुः पूरुः शतद्यु
म्नप्रमुखाः सुमहाबलाः चाक्षुषस्य
मनोः पुत्राः पृथिवीपतयोऽभवन् ।
६ विवस्वतः सुतो विप्र श्राद्धदेवो
महाद्युतिः मनुः संवर्त्तते धीमान्
साम्प्रतं सप्तमेऽन्तरे आदित्या
वसुरुद्राद्या देवाश्चात्र महामुने
पुरंदरस्तथैवात्र मैत्रेय त्रिदशे
श्वरः वशिष्ठः काश्यपोऽथात्रिर्जम
दग्निः सगोतमः विश्वामित्र भर
द्वाजौ सप्तर्षयोऽत्र च इक्ष्वा
कुश्च नाभागो धृष्टः शर्यातिरेव
च नरिष्यंतश्च विख्यातो नाभाने
दिष्टएव च करूषश्च पृषध्रश्च वसु
मान् लोकविश्रुतः मनोर्वैवस्व
तस्यैते नव पुत्राश्च धार्मिकाः ७ वि
ष्णुशक्तिरनौपम्या सत्वोद्रिक्ता स्थि
तौ स्थिता मन्वंतरेष्वशेषेषु देवत्वे
नाधितिष्ठति अंशेन तस्य यज्ञो
ऽसौ जज्ञे स्वायंभुवान्तरे आकू
त्यां मानसो देव उत्पन्नः प्रथमे
ऽन्तरे ततः पुनः स वै देवः प्राप्ते स्वा
रोचिषेऽन्तरे तुषितायां समुत्प
न्नो ह्यजितस्तुषितैः सह औत्तमे
ऽन्तरे चापि तुषितस्तु पुनः स वै ।
सत्यायामभवत्सत्यः सत्यैः स
ह सुरोत्तमैः तामसस्यान्तरे ॥

चैव संप्राप्ते पुनरेव हि हर्य्यायां ।
हरिभिः सार्द्धं हरिरेव बभूव ह
रैवतेऽप्यन्तरे देवः संभूत्यां मा
नसोऽभवत् संभूतो राजसैः सा
र्द्धं देवैर्देववरो हरिः चाक्षुषे
चान्तरे देवो वैकुंठः पुरुषोत्तमः
विकुंठायामसौ जज्ञे वैकुंठैर्दे
वतैः सह मन्वन्तरेऽत्र संप्राप्ते त
था वैवस्वते द्विज वामनः कश्य
पाद्विष्णुरदित्यां संबभूव ह त्रि
भिः क्रमैरिमाल्लोकान् जित्वा येन
महात्मना पुरंदराय त्रैलोक्यं द
त्तं निहतकंटकं इत्येतास्तनव
स्तस्य सप्तमन्वन्तरेषु वै सप्तस्वेवा
भवन्विप्र याभिः संरक्षिताः प्रजाः
यस्माद्विष्टमिदं सर्वं तस्य शक्त्या
महात्मनः तस्मात्स प्रोच्यते विष्णु
र्विशेर्धातोः प्रवेशनात् सर्वे च
देवा मनवः समस्ताः सप्तर्षयो ये
मनुसूनवश्च इंद्रश्च योऽयं त्रिदशे
शभूतो विष्णोरशेषास्तु विभूतय
स्ताः इति विष्णुपुराणे ३ अंशे मा
न्वंतराख्याने नाम १ अध्यायः श्री
मैत्रेय उवाच प्रोक्तान्येतानि भव
ता सप्तमन्वन्तराणि वै भविष्याण्य
पि विप्रर्षे ममाख्यातुमर्हसि ।
श्रीपराशर उवाच छाया संज्ञा

सुतो योऽसौ द्वितीयः कथितो ।
मनुः पूर्वजस्य सवर्णोऽसौ सा
वर्णिस्तेन कथ्यते तस्य मन्वन्तरं ह्ये
तत्सावर्णिकमथाष्टमं तच्छृणुष्व
महाभाग भविष्यत् कथयामि ते साव
र्णिस्तु मनुर्योऽसौ मैत्रेय भविता त
तः सुतपाश्चामिताभाश्च मुख्या
श्चापि तदा सुराः तेषां गणास्तु
देवानामेकैको विंशकः स्मृतः
सप्तर्षीनपि वक्ष्यामि भविष्यानथ
सप्त च दीप्तिमान् गालवो रामः
कृपो द्रौणिस्तथापरः मत्पुत्रश्च
तथा व्यास ऋष्यशृंगश्च सप्तमः
विष्णुप्रसादादनघः पातालांतरगो
चरः विरोचनसुतस्तेषां बलि
रिंद्रो भविष्यति विरजाश्चोर्वरीवां
श्च निर्मोहाद्यास्तथापरे सावर्णे
स्य मनोः पुत्रा भविष्यंति नरेश्व
राः ८ नवमो दक्षसावर्णिर्मैत्रेय
भविता मनुः पारा मरीचिगर्भाश्च
सुधर्माणस्तथा त्रिधा भविष्यंति
तदा देवा एकैको द्वादशो गणः
तेषामिंद्रो महावीर्यो भविष्यत्य
द्भुतो द्विज सवनो द्युतिमान् ।
हव्यो वसुर्मेधातिथिस्तथा ज्यो
तिष्मान् सप्तमः सत्यस्तत्रैते च महा
र्षयः धृतिकेतुर्दीप्तिकेतुः पंच ।


हूत्तो निरामयः पृथुश्रवाघष्टन
घाद्दक्षसावर्णिकामनाः ९ दश
मोब्रह्मसावर्णिर्भविष्यतियोमनुः
सुधामानोविरुद्धाश्च शतसंख्या।
स्तथासुराः तेषामिंद्रश्चभविताशां
तिर्नाममहाबलः सप्तर्षयोभविष्यं
ति येतदातान्शृणुष्वच हविष्मा
न्सुकृतिःसत्यस्तपोमूर्तिस्तथा
परः नाभागो प्रतिमौजाश्च स
त्यकेतुस्तथैवच सुक्षेत्रश्चोत्तमौ
जाश्चभूरिषेणादयोदशब्रह्मसाव
र्णिपुत्राश्चरक्षिष्यंतिवसुंधरां ११
एकादशश्चभविताधर्मसावर्णि
कोमनुः विहंगमाः कामगमा
निर्माणरुचयस्तथा गणास्त्वेतेत
दामुख्यादेवानांहिभविष्यतां एके
कस्त्रिंशकस्तेषां गणश्चेंद्रश्चवैवृ
षः निःस्वरश्चाग्नितेजाश्चवपुष्मान्
घृणिरारुणिः हविष्माननघश्चैव।
भाव्याः सप्तर्षयस्तथा सर्वत्रगः स
र्वधर्मा देवानीकादयस्तथा भवि
ष्यंतिमनोस्तस्यतनयाः पृथिवीश्वराः
१२ रुद्रपुत्रस्तुसावर्णिर्भविताद्वादशो
मनुः ऋतधामाच तत्रेंद्रोभविताशृ
णुमेसुरान् हरितारोहिता देवा
स्तथासुमनसो द्विज सुकर्माणः।
सुरापाश्चदशकाःपंचवैगणाः त

पस्वीसुतपाश्चैव तपोमूर्तिस्तपो
रतिः तपोधृतिर्द्युतिश्चान्यः सप्त
मस्तुतपोधनः देववानुपदेवश्च
देवश्रेष्ठादयस्तथा भविष्यंतिमनो
स्तस्यमहावीर्याः सुतानृपाः १३
त्रयोदशो रौच्य नामा भविष्यति
मुनेमनुः सुत्रामणिःसुकर्माणः
सुधर्माणस्तथापराः त्रयस्त्रिंशद्विभे
दास्तेदेवानां यत्रवैगणाः दिवा
स्पतिर्महावीर्यस्तेषामिंद्रो भवि
ष्यति निर्मोहस्तत्त्वदर्शीचनिष्प्रक
म्पो निरुत्सुकः धृतिमानव्ययश्चा
न्यः सप्तमः सुतपामुनिः सप्तर्षय
स्त्विमेतस्य पुत्रानपिनिबोध मे।
चित्रसेन विचित्राद्या भविष्यंतिम
हीक्षितः १४ भौत्यश्चतुर्दशश्चा
त्र मैत्रेय भवितामनुः शुचिरि
न्द्रः सुरगणास्तत्रपंच शृणुष्व।
तान् चाक्षुषश्च पवित्राश्च कनि
ष्ठाभ्राजिनस्तथा वाचावृद्धाश्च वै
देवाः सप्तर्षीनपिमेशृणु अग्नि
बाहुः शुचिः शुक्रोमागधोग्नीध्र
एवच युक्तस्तथाजितश्चान्त्यामनुः
पुत्रानतः शृणु उरुगंभीर ब्रध्ना
द्यामनोस्तस्यसुतानृपाः कथिता।
मुनिशार्दूलपालयिष्यंतिमेदिनीं ४
चतुर्युगांते वेदानां ना ।।

यते किल विप्लवः प्रवर्त्तयंति।
तानेत्यभुवि सप्तर्षयो दिवः कृते
कृते स्मृते विप्र प्रणेताजायते
मनुः देवा यज्ञभुजस्तेतुयावन्मन्वं
तरंतुतत् भवंतियेमनोःपुत्रायाः
वन्मन्वंतरं द्विजः तदन्वयोद्भवैश्चै
वतावद्भूःपरिपाल्यते मनुः सप्त
र्षयो देवा भूपालाश्च मनोःसुताः
मन्वंतरे भवंत्येते शक्रश्चैवाधि।
कारिणः चतुर्दशभिरेतैस्तुगते
र्मन्वन्तरे द्विज सहस्रयुगपर्यंते
कल्पोनिःशेषउच्यते तावत्प्रमा
णाच निशा ततोभवति सत्तम
इतिविष्णुपुराणे ३ अंशे २ अध्या
यः मन्वंतर श्रवणफलं यथा
श्रुते मन्वंतरे पूर्वे धर्ममाप्नोति
मानवः स्वारोचिषस्यश्रवणात्स
र्वान् कामानवाप्नुयात् औत्तमं
धनमाप्नोतिज्ञानंचाप्नोति ताम
से रैवते चश्रुतेबुद्धिं सुरूपां।
विंदते स्त्रियं आरोग्यं चाक्षुषे पु
सां श्रुते वैवस्वते बलं गुणवत्
पुत्रपौत्रांश्च सूर्यसावर्णिके श्रु
ते माहात्म्यं ब्रह्मसावर्णेर्धर्मसा।
वर्णिके शुभां मतिमाप्नोति मनुजो
रुद्रसावर्णिकेजयं जाति श्रेष्ठो
गुणेर्युक्तो दक्षसावर्णिके श्रुते।

विपक्षानयत्यारि बलं रौच्यं श्रुत्वा।
मत्रेत्तमं देव प्रसादमाप्नोति भौ।
त्ये मन्वंतरे श्रुते तथाग्निदीप्ति
पुत्रांश्चगुणयुक्तानवाप्नुते सर्वा
ण्येतु क्रमाद्यस्तु शृणोति श्रुतिस
त्तम मन्वंतराणितस्यापिश्रूयतां
फलमुत्तमं तत्रदेवानृषीन् वि
प्रान्मनून् सेनयानृपान् इंद्रांश्च
श्रुत्वासर्वेभ्यःपापेभ्यो विप्रमुच्यते
देवर्षिनृपाश्चान्ये ये तन्मन्वंत
राधिपाः ते प्रीयंते तथाप्रीताः
प्रयच्छंतिशुभां मतिं ततःशुभां
मतिं प्राप्यकृत्वाकर्मतथाशुभं।
शुभां गतिमवाप्नोति यावदिंद्रा
श्चतुर्दश सर्वेष्वृतवः सौम्याः
सर्वेसौम्या स्तथा ग्रहाः भवं।
त्यसंशयं श्रुत्वा क्रमान्मन्वंतरा।
स्थितिं इति श्रीमार्कंडेय पुरा
णे मन्वंतरानुवर्णनं नामाध्यायः ।।

मपष्टः
मपष्टकः } पुं वनमुद्गः इत्यमर।
मपुष्टकः } टीकायां भरतः ।।
मम्ब गतौ इतिकविकल्पद्रुमः
डोप्य वर्ग चतुर्थोपधः मम्बति
इति दुर्गादासः ।।
मम च मदीयं आमात्इतिभाषा
यथा ममत्वं ममराज्यस्य राज्या ।।




ऽखविलेष्वपि जानतोऽपि यथा
तत्किमेतन्मुनि सत्तम इति
मार्कण्डेयपुराणे देवीमाहात्म्ये।
तेषु मदीयत्वं जानतोऽपि मम
यथा तस्य अतस्यैव राज्यादिषु
ममत्वमेतन्न किं किंनिबंधनमि
त्यर्थः इति तट्टीकायां नागोजी।
भट्टः अस्माद्व्ययेन सह ममा
तो ममत्व शब्देद्रष्टव्य अस्मच्छब्द
षष्ठ्येकवचनान्तस्येदं रूपं तच्चा
दंत्रिषु लिंगेषु सदृशं ॥
ममता स्त्री दर्पः अभिमानः इ
ति हेमचन्द्रः ममत्वं यथा तथापि
ममतावर्त्ते मोहगर्त्ते निपाति
ताः इति देवी माहात्म्यं ॥
ममतायुक्तः पुं कृपणः इति शब्द
माला अभिमानादिविशिष्टेति।
ममत्वं क्ली मदीयत्वं यथा दुःखा
यतन भूता हि ममतालम्बनागृही
इति मार्कण्डेयपुराणं स्नेहः
यथा सोऽभिविन्नयन्नदानतमममता
कृष्टचेतनः इति देवीमाहात्म्यं।
ममत्वेन स्नेहेन आकृष्टचेतना
मतिर्यस्य ममेति षष्ठ्यन्तरूपम
व्ययं तस्यभावः ममत्वं इति
तट्टीकायां काशीरामः ॥
ममापतालः पुं विषयः मयते

णल प्रत्ययः स्यात्तस्यापत्तडाग।
मो धातोर्यलोपो मकारस्यात्वाभाव
इति सिद्धान्तकौमुद्यामुणादि।
वृत्तिः ॥
मय ङ. गतौ इति कविकल्पद्रुमः
ङ. मयते इति दुर्गादासः ॥
मयः पुं उष्ट्रः इत्यमरः अश्वत
रः दानवविशेषः सतु दैत्यानां
शिल्पी इति मेदिनी तस्यस
मायत्यानि यथा मयस्य जाता
हेमायां पुत्राः सममहाबलाः।
मायावी दुन्दुभिश्चैव वहुषस्त्र महिष
स्तथा वालिका वज्रकन्या वकन्या
मंदोदरी तथा इति वह्नि पु
राणं ॥
मयटः पुं तृणकुटी हर्म्यः इति
हारावली ह्लंतस्येतत्तद्व्याप्त्यै
प्राचुर्य्यार्थेच मयट् इति प्रत्ययो
भवति ॥
मयष्टकः पुं वनमुद्गः इत्यमरटी
कायां भरतः ॥
मया स्त्री चिकित्सा इति शब्द
चंद्रिका तृतीयैकवचनान्तास्मच्छ
ब्दस्य रूपमप्येवं ॥
मयीति आत्मनि आमाते इति
भाषा सप्तम्येकवचनान्तास्मच्छब्द
स्यरूप मिदं इति व्याकरणं ॥

मयी स्त्री मयस्यस्त्रीजातिः उ
ष्ट्री इति व्याकरणं ॥
मयुः पुं किन्नरः इत्यमरः मृगः
इति मेदिनी ॥
मयराजः पुं कुवेरः इति शब्द
रत्नावली ॥
मयुष्टकः पुं वनमुद्गः इत्यमरटी
कामयूखः पुं किरणः दीप्तिः ज्वा
ला इत्यमरः शोभा इति मेदि
नी कीलः इत्यजयः ॥
मयूरः पुं स्वनामख्यातपक्षिविशे
षः तत्पर्य्यायः वर्हिणः २ वर्ही
३ नीलकंठः ४ भुजङ्गभक्षः ५ शि
खावलः ६ शिखी ७ केकी ८ मेघना
दानुलासी ९ इत्यमरः प्रचलाकी १०
चन्द्रकी ११ सितापांगः १२ इति शब्द
रत्नावली ध्वजी १३ मेघानंदी १४
कलापी १५ शिखंडी १६ चित्रपि
च्छिकः १७ भुजगभोगी १८ मेघ
नादानुलासकः १९ अस्यमांसगु
णाः मयूरः श्रोत्रनेत्राग्नि मेधा
वर्णस्वरायुषां हितो वल्यो गुरु
श्चोष्णो वातघ्नः शुक्रः मांसदः
हेमन्तकाले शिशिरे वसंते सेव्या।
हि मायूरमुशंति मांसं उष्णोहि
हि वर्ही विष भोजनेष्ववर्षी श
रद्ग्रीष्मेष्वपथ्यः इति राज

निर्घंटः एतन्मांस मेरंडतैल भृ
ष्टं विषतुल्यं इति राजवल्लभः।
मयूरशिखाक्षुपः तत्पर्य्यायः
शिखाख्या २ कारवी ३ दीपः।
४ लोचमस्तकः ५ इत्यमरः अ
पामार्गः इति मेदिनी ॥
मयूरकं क्ली अंजनविशेषः तूति
या इति भाषा तत्पर्य्यायः तुत्थां
जनं २ शिखिग्रीवं ३ वितुन्नकं ४
इत्यमरः ॥
मयूरकः पुं अपामार्गः इत्यमरः
तुत्थकं मयूरः इति विश्वः।
मयूरशिखा इति जटाधरः ॥
मयूरग्रीवकं क्ली तुत्थं इति राज
निर्घंटः ॥
मयूरचटकः पुं गृहकुक्कुटः इ
ति हारावली ॥
मयूरचूडं क्ली स्थौणेयकं इति
निर्घंटः ॥
मयूरचूडा स्त्री मयूरशिखा इ
ति वैद्यकं ॥
मयूरजंघः पुं श्योनाकः इति रा
ज निर्घंटः ॥
मयूरतुत्थं क्ली तुत्थं इति राज
निर्घंटः ॥
मयूरपदकं क्ली नखाघातः यथा
तथावकेरकोली च नखाघाते त




मण्डनं मयूरपदकं व्याघ्रनखे कोल
गलपत्रके इति शब्दमाला ।
मयूरविदला स्त्री अम्बष्ठा इति
वैद्यकं ॥
मयूरशिखा स्त्री स्वनामख्यात
क्षुपविशेषः तत्पर्य्यायः बर्हिचूडा
१ शिखिनी २ शिखिवल्लः ४ सशिखो ५
शिखा ६ शिखावला ७ केकिशि
खा ८ अस्या गुणाः रसे स्वादुत्वं मू
त्रकृच्छ्रबालग्रहदोषनाशित्वं ।
वश्यकर्म्मणि शस्तत्वञ्च इति राज
निर्घण्टः अपि च मयूराख्या शिखा
प्रोक्ता सहस्राङ्घ्रिर्मरुच्छदा नील
कण्ठशिखा लघ्वी पित्तश्लेष्मातिसा
रजित् इति भावप्रकाशः ।
मयूरिका स्त्री अम्बष्ठा इति राज
निर्घण्टः ॥
मयूरी स्त्री मयूरस्त्रीजातिः इति
व्याकरणं लिङ्गादिसंग्रहश्च ।
मरकः पुं मारिः मडक इति भाषा
इति हेमचन्द्रः तत्पर्य्यायः ।
मारी २ मारकः २ इति जटाधरः
तस्य कारणादि यथा यावन्मा
नेंद्रसूनुर्गतिविपर्य्ययसेतमध्ये
वाल्लिनार्ण्णी तावद् दुर्भिक्षपीडाभ
वति च मरकं संशयं यान्ति लोकाः
हाहाकारा तथोर्व्वी मतज भय

करी केतुराव्वैश्च भीमैः शून्यग्रामा
भवेयु र्नरपतिरहिता भूरिकङ्काल
माला वर्क्कं करोति रविजो यत्र राशौ
स्तनो वा मूलर्क्षं हस्तमचेर्वति मे
त्रभेषु क्षेत्रापभङ्गपतनानि च
मैनकानां सर्व्वत्रलोकमरणं जल
योनदेशाः मांसास्थीनि समादाय
श्मशानाद् ध्वांक्षवायसः स्वाशृगाला
श्च ग्रामे प्रविशन्ति चेत् ।
विकिरन्ति गृहादौ च श्मशानं सा
महीभवेत् चौरणाहन्यते लोकः
परचक्रसमागमः संग्रामश्च म
हाघोरो दुर्भिक्षं मरकं तथा प्रद्
नानि प्रसूयन्ते तस्य देशस्य विद्रवः
इति ज्योतिस्तत्त्वं अपि च सार्द्धि
षष्ठिर्ये गैरिकरूपे च युद्धानि ।
दुर्व्वीकाद्दक्षिणामे हारिद्रे वापि नि
द्दिशन्मरकं इति ग्रहणप्रकरणे
तिथ्यादितत्त्वं अन्यच्चापि रवावि
दौ गत्वा रुद्धाशन्यगारे वङ्गमेनो
कया गुरुशुक्राभ्यां दोलया, बु
धवासरे गजे च जलदास्वी क
त्रभेगत्वरंगमे नौकायां शस्या
वृद्धिः स्याद्दोलायां मरकं भवेत्
इति पत्रिकाप्रवेश फल ।
कथने ज्योतिषं अस्य शा ।
तिः देवीमाहात्म्य पाः ठ ।

वटुकभैरवस्तवपाठः तलस्या वि
विलपूजनञ्च यथा उपसर्गान शे
षांस्तु महामारी समुद्भवान् तथा
त्रिविध मुत्पातं माहात्म्यं शमये
न्मम इति मार्कण्डेयपुराणं ॥
मारीभये राजभये तथा चोरा
ग्निजभये औत्पातिके महाघोरे
तथा दुःस्वप्नदर्शने वंधनेच ।
तथाघोरे पठेत्स्तोत्रं समाहितः
इति विश्वसारोद्धार तंत्रे आप
दुद्धारकल्पः ग्रहयज्ञैः शा
न्तिकेश्च किं क्षिपन्ति तथा हिज
महाशान्तिकरः श्रीमांस्तस्या ।
पूजितो हरिः उत्पातान् दारु
णान्सुसां दुर्णिमित्तान्यशोषतः
ततस्या पूजितो भक्त्या महाशा
न्तिकरो हरिः अग्निपुराणी
यामन्त्रः ॐ नमस्ते वज्ररूपाय वि
ष्णवे परमात्मने स्वाहेति इति
ज्योतिस्तत्त्वं ॥
मरकतं क्लीं हरिद्वर्णमणिविशेषः
पान्ना इति भाषा तस्य देवता
बुधः इति ज्योतिषं तत्पर्य्या
यः गारुत्मतं २ अश्मगर्भं ३
हरिन्मणिः ४ रुद्रमरः मरक्तं
५ राजनीलं ६ गरुडाङ्कितं ७ इ
ति शब्दरत्नावली रौहिणेयं ।

८ सौपर्णं ९ गरुडोद्गीर्णं १० बुध
रत्नः ११ अश्मगर्भजं १२ गरलारि
१३ वापवोलं १४ गारुडं १५ ।
क्वचित् पुस्तके गरुडोद्गीर्णस्था
ने गरुडोत्तीर्णं वापवोलस्थाने वा
प्रवालं इति च पाठः अस्य गुणाः
विषघ्नत्वं तथा शीतलत्वं रसे मधु
रत्वं आम पित्त हरत्वं रुच्यत्वं ।
पुष्टिदत्वं भूतनाशनत्वं च ॥
अस्य लक्षणं स्वच्छं च गुरुसच्छाये
स्निग्धं गात्रं च मार्दव समेतं ।
अव्यंगं बहुरंगं शृंगारी मरकतं
शुभं विभृयात् तस्य कुलत्व
णां कर्कशिल कलिल रूक्षे म
लिनं लघु हीनकान्ति कल्माषं ।
त्रासयुतं विकृताङ्गं मरकतमम
रोपि नोपभुञ्जीत ॥ तस्य परी
क्षा यच्छेवालशिखंडि शाड्वल
हरित्काचैश्च वाषच्छदैः खद्यो
तेनच बालकीरवपुषा शैरीषपु
ष्पेणच च्छायाभिः समतां दधाति
नरिदं निर्दिष्ट मष्टात्मकं जात्यं ।
यत्नयतानपेक्षपरितो गारुत्मतं ।
रंजयेत् इति राजनिर्घण्टः ॥
ग्रन्थान्तरे तस्य परीक्षादि यथा सूत
उवाच दानवाधिपतेः पित्तमादाय
यभुजगाधिपः द्विधा कुर्व्वन्निव व्योम




सत्वरं वासुकिर्ययौ सतदा स्वशि
रोरत्न प्रभा दीप्ते नभो ऽम्बुधौ।
राजतः सुमहानेकः सेतुबन्ध इवा
बभौ ततः पक्षनिपातेन संहर
न्निव रोदसी गरुत्मान् पन्नगेन्द्रस्य
प्रहर्तुमुपचक्रमे सहसैव स मो
च तत्फणीन्द्रः सुरसाग्रुक्ततुरुष्क
पादपानां नलिकावनगन्धवासि
तायां वरमाणिक्यगिरेरुपत्यका
यां तत्प्रपात समनन्तर काल
मेव तद्वदुरालय मतीत्य रमा स
मीपे स्थानं क्षितेरुपपयोनिधि
नीरलेखं तत्तस्य यान्मरकताक
रतां जगाम तत्रैव किंचिन्पतन्।
तस्य पित्तात् अन्य जग्राह तुण्डे
गरुत्मान् मूर्च्छापरीतः सहसै
व घोणारन्ध्र द्वयेनरुग्भोच सर्वं
तत्राकठोरशुककण्ठशिरीषपुष्प।
खद्योत पृष्ठचरशाद्वलशैवलानाम्।
कल्हारशस्यकभुजंगभुजांचपत्र
प्रान्त त्विषो मरकताः शुभदा भवं
ति मघत्र भोगीन्द्रभुजा विमुक्तं
पपात पित्तं दितिजाधिपस्य।
तस्याकरस्यातितरां स देशो दुः
खोपलभ्यश्च गुणैश्च युक्तः तस्मि
न्मरकतस्थाने यत्किंचिदुपजायते।
तत्सर्वं विषरोगाणां प्रशमाय।

प्रकीर्त्यते सर्वं मंत्रौषधिगणैः।
यन्नशक्यं चिकित्सितं महाहिदं
ष्ट्रा प्रभवं विषं तत्तेन शाम्यति
अन्यमप्याकरे तत्र यद्दोषैरुप
वर्जितं जायते तत्पवित्राणां।
मुत्तमं परिकीर्त्तितं अत्यन्त हरि
त वर्णं कोमलमर्च्चिर्विभेद ज
टिलं च काञ्चन चूर्णस्यान्तः पूर्ण।
मिव लक्ष्यते यच्च युक्तं संस्थान गुणैः
समरागं गौरवेण विहीनं सवितृ
कर संस्पर्शाच्छुरयति सर्वाश्रमं दी
प्त्या हित्वा च हरितभावं यस्या।
न्तर्निहिता भवेद्दीप्तिः अचिर
प्रभा प्रभाहत नवशाद्वलसन्निभा
भाति यच्च मनसः प्रसादं विदधा
ति तदतिमति मात्रं तन्मर।
कतं महागुणमिति रत्नविदो मनो
हरिः यत्तु भास्करसंस्पर्शात् हृ
स्तन्यत्तो महामणिः रञ्जयेदाश्र
यादेश्म महामरकतं हि तत् व
र्णाभ्यां भाति भेदस्तु महामरकतेम
तौ छाया पाभेदेन विज्ञेया चत्वर्वर्ग
स्थलहतैः अष्टच्छाया भवेदा।
इति षट्च्छायामतो मरकतस्य च।
बर्हिपुच्छ समा भाषा चाषपत्र स
मा ऽपरा हरित्काचनिभा चान्यान्या
शैवालसन्निभा खद्योत पृष्ठ॥

संकाशा बालकीर समातथा ना।
वशाद्वल सच्छाया शिरीषकुसुमो
पमा एवमष्टौ समाख्यातास्छायाः।
मरकताश्रयाः छायाभिर्युक्तमेता
भिः श्रेष्ठं मरकतं भवेत् पद्मराग।
गतः स्वच्छो नलविद्धर्य्यथा भवेत् त
था मरकतच्छाया श्यामलाद्धरिता
मता अथ दोषगुणाः दोषाः सप्त
भवंत्यस्य गुणाः पंचविधोमतः
अस्निग्धं रूक्षमित्युक्तं व्याधिस्तस्य
प्रतेभवेत् विस्फोटःस्यात्सापि।
इके तत्र शस्त्रहतिर्भवेत्स पा
षाणो भवेद्दिष्ट नाशो मरकते इत
विच्छायं मरकतं शाक्रूर्वीर्य्यतेनवा
पार्थ्यते शर्करं कर्करायुक्तं पुत्र
शोकप्रदं इतं जठरं कान्तिहीन
त्व दृष्टि वह्नि भयावहं कल्माष
वर्णं पृथक्तं ततो मृत्युभयं भवेत्
इति दोषाः समाख्याता वर्ण्यते
ऽथ महा गुणाः निर्म्मलं कथितं
स्वच्छं गुरु स्यात्कुरूतायुतं स्निग्धं
रूक्षविनिर्मुक्तं मरमस्कमरेणुकं
स्वरागरागवहुलं मणेः पंचगुणा
मताः एतैर्युक्तं मरकतं सर्वथा
पभयापहं गज वाजि रथा
त्वा विषेभ्यो विसराहिमे तत्क
तं समवाप्नोति शुद्धे मरकते

एते यत्र यन्त्यादि कारणेनथ्यासै
न्यक्रियाविधौ विषरोगोपशमने।
कर्मस्वाथर्वणोश्च शस्यते मुनिभि
र्यस्मादयं मरकतो मणिः तथा च
स्वच्छता गुरुता कान्तिः स्निग्धत्वपि
त्वकारणं हरितत्वं नकं चैव सम्म
रकते गुणाः अथ कृत्रिमाकृ
त्रिम परीक्षा कृत्रिमत्वं सहजत्वं
हृश्यते सूरिभिः क्वचित् घर्षयेत्
प्रस्तरे वेगकाच लस्याहिपद्यते।
लवयेच्चाहृ भंगेण चूर्णेनाथ वि
लेपयेत् सहजःकान्ति माप्नोति।
कृत्रिमो मलिनायते वर्णस्याति
वर्द्धनात् यस्यान्तःस्वच्छकिरण
पीधानं सान्द्रस्निग्धविशुद्धको।
मलवर्हप्रभादिसमकान्ति चलोत्प
लया कान्त्या सान्द्राकारं विभासया।
भाति तदपि गुणावल्लत्ता माप्नो
ति हि याहृशी पूर्वे सकलकठो।
रं मलिनं रूक्षं पाषाणकर्करायतं
दिग्धं च शिलाजतुना मरकत।
मेव विपर्य्ययगुणं यत्तयि ष्वेपि
तं रत्नमस्मन्मरकता द्भवेत् श्वेत्र
स्वामे नेतद्दार्ष्ट्येन तच्चं वा कथं
चन भल्लातक पत्रिकाल हर्णोसम
योगतः मणेर्मरकतस्येते लक्ष
णीया विजानतः लौमेण वास




साहस्रा दीप्तिं त्यजति शुक्तिका
लाघवेनैव काचस्य शकलाकृतेर्वि
भावना कस्यचिदनेकरूपैर्मरकत
मनुगच्छतोपि गुणवर्णैः भ्रान्त
कस्य निर्वैशद्यमुपैति वर्णस्या
वघातिमृक्ताः संत्यन्ये च केचि
द्विजातयः तेषामप्रतिबद्धानां ।
मा भवतु हृद्गामिनी कृच्छ्रेणैव
केषांचित्कथंचिदुपजायते ति
र्य्यगालोक्यमानानां सद्यश्चैव प्र
णश्यति स्नानाचमनजप्यहुतरक्षा
मंत्रक्रियाविधौ दद्भिर्गो हिर
ण्यानि कुर्वद्भिः साधनानि च दैव
पित्र्याणि येषु गुरुसंपूजनेषु च
वाध्यमानेषु विषमे दोषजाते वि
बोद्धव्यैः दोषहीनं गुणोत्कृष्टं कां
चनं प्रतियोजितं संग्रामे वि
चरद्भिश्च धार्य्यं मरकतं बुधैः ।
अयमूल्यं तुलया पद्मरागस्य य
न्मूल्यमुपजायेत लभतेऽभ्यधि।
कं तस्मात्गुणैर्मरकतं स्मृतं त
थाच पद्मरागाणां दोषैर्मूल्यं प्रली
ने ततोऽप्याधिकाहानि दोषै
र्मरकते भवेत् गुणार्द्ध समायु
क्ते हरितश्याम भास्वरे मूल्यं ।
द्वादशांशं प्रोक्तं जातिभेदेन सू
रिभिः यद्यैकेन शतंपंचसहस्रं ।

हिनये यद्वै त्रिभिश्चैव सहस्रे
हे चतुर्भिश्चचतुर्गुणं इति गारु
डे मरकतपरीक्षा ७८ अध्यायः यु
क्तिकल्पतरुश्च ॥
मरकतपत्री स्त्री पाची इति राज
निर्घण्टः ॥
मरकं क्ली मारकतमणिः इति श
ब्दरत्नावली ॥
मरणं क्ली वत्सनाभः इति राज
निर्घण्टः विजातीयात्ममनःसंयो
गध्वंसः इति न्यायमते तत्पर्य्या
यः पंचता २ कालधर्मः ३ ॥
दृष्टांतः ४ प्रलयः ५ अत्ययः ६
अन्तः ७ नाशः ८ मृत्युः ९ निधने १०
इत्यमरः भूमिलाभः ११ निधा
नः १२ साम्परायिकं १३ मृतिः १४
इति शब्दरत्नावली कीर्त्तिशेषः
१५ महानिद्रा १६ महापथगमः १७
संस्थानं १८ इति जटाधरः ॥
मरणाद्दुःखोप्याह मरणेयानि दुः
खानि प्राप्नोति मृत्युतोऽन्यपि ।
स्वयं ग्रीवांछिद्रस्तोयबद्धोव
पाशुना नरः मृत्युग्लानिः परवशो
मृतलीनलवान्वितः हिरण्यधान्य
तनयभार्याभृत्यगृहादिषु यते
कथं भविष्यंतीत्यनीव ममताकु
लः मर्ममिद्भिर्महारोगैः कृश ॥

वै रिव दारुणैः शवैरिवान्तक
स्योग्रे छिद्यमानास्थिवन्धनः विव
र्त्तमानताराक्षि हस्तपादं मुहुः
क्षिपन् संशुष्यमाणताल्वोष्ठ पु
टो घुरघुरायते निरुद्धकंठो दो
षौघैरुदानश्वासपीडितः ता
पेन महता व्याप्तस्तृषा चार्त्तस्तथा
क्षुधा क्लेशादुत्क्रान्तिमाप्नोति या
म्यकिंकरपीडितः ततश्च यात
ना देहं क्लेशेन प्रतिपद्यते प
ताम्यस्यानि चोग्राणि दुःखानि मर
णे नृणां इति विष्णुपुराणे ६ अंशे
५ अध्यायः सहन्मरणश्रावण
निषेधो यथा अग्नौ न निक्षिपे
दग्निं नाद्भिः प्रशमयेत्तथा सुहृ।
न्मरणमातिन्द्या नस्वयं श्रावयेत्स
तत् इति कौर्मे उपविभागे १५ अ
ध्यायः धर्मात्मिकमरणं ल
क्षणं सोमशर्मोवाच धर्म्मिणो हि
कीदृशो मृत्युर्जन्म चैव वदस्व मे
उभयो लक्षणं कान्ते त्वमेवं हि व
दस्व मे सुमनोवाच सत्यंशौचं।
क्षमा शान्तिस्तीर्थपुण्यादिकं तथा
धर्मं च पालितं येन तस्य मृत्युं व
दाम्यहं रोगोन जायते तस्य ।
नच पीडा कलेवरे नश्रमो वै नच
ग्लानि नच स्वेदोभ्रमस्तथा दिव्यत्

धवरा भूत्वा गंधर्वा ब्राह्मणास्तथा
देवपाठसमायुक्ता गतिज्ञानवि
शारदाः तस्य पार्श्वं समायान्ति ।
स्तुतिं कुर्वंति वात्सलां सख्यो हि
आसने युक्तो देवपूजारतः किल
तीर्थं च लभते प्राज्ञः स्नानार्थं।
धर्मतत्परः अग्न्यगारे च गोष्ठे ।
च देवतायतनेषु च आरामे च ।
तडागे च यत्राश्वत्थो वटस्तथा ब्रह्म
वृक्षं समाश्रित्य प्लीवृक्षं तत्र तथा पुनः
अश्वस्थानं समाश्रित्य गजस्थाने त
तो नरः अशोकं चूतवृक्षं च समा
श्रित्य यदास्थितः सन्निधिं ब्राह्म
णानां च राजवेश्मगतोपि वा रण
भूमिं समाश्रित्य पुरा यत्र मृता भटाः
मृत्युस्थानानि पुण्यानि केवलं य
मेकारणं गोगृहं तत्समं प्राप्य त
था समरशीकटं स्वहृदयमेकतो ।
नित्यं धर्मज्ञो धर्मवत्सलः एवं
स्थानं समाप्नोति यदा मृत्युं समा
श्रितः मातरं पश्यते श्रेष्ठ पितरं च
ततोमम भ्रातरं श्रेयसा युक्त
मन्यं स्वजनं बांधवं वं द्विजं ।
तथा पुण्यं स्तूयमानं पुनः पुनः
पापिष्ठं नैव पश्येत मातृपित्रा
दिकं पुनः गीतं गायंति गंधर्वाः
स्तुवंति स्तावकाःस्तवैः मंत्रपाठैः ।




स्तथा विप्रामाता स्नेहेन पूजयेत्
पिता स्वजनवर्गश्च धर्मात्मानं महा
मतिं एवंभूताः समाख्याताः पुण्य
स्थानानि ते विभो मयस्तात् ॥
पश्यते भूतान् हास्य स्नेह समा
वितान् न च स्वपेन मोहेन क्लेश
रक्तेन नैव तु धर्मराजो महा।
प्राज्ञो हराज्ञेन समाह्वयेत् त्वा।
त्वेहि त्वं महाभाग यत्र धर्मः स्ति
ष्ठति तस्य मोहो न च भ्रांति र्ग्ला
निर्न च विक्रिया जायते तत्र सं
देहः प्रसन्नात्मा प्रतिष्ठते ज्ञान
विज्ञानसंपन्नः स्मरन्नेवं जनार्दनं।
नैष्कर्म्याद्धि प्रयात्येवं संप्रेष्टा हृष्ट
मानसः दृष्ट्वा महात्मा धर्मात्मा
तस्य हि गच्छति शिबिकां तस्य वा
याति स्वयानं स्वमनोहरं विमा
नैरेव यान्ये वायो वेगेन चोत्त
मः छत्रेण ध्रियमाणेन चामरव्यज
नैस्तथा वीज्यमानः स धर्मात्मा पु
ल्पैरेव समंततः गीयमानस्तथ
र्मात्मा स्तूयमानस्तु पंडितैः वंदिभि
श्चामरैर्दिव्यैर्ब्राह्मणैर्वेदपारगैः
साधुभिः स्तूयमानस्तु सर्वैः सौख्येस
मन्वितः यथादान प्रभावेन फलं
प्राप्नोति तत्र सः आराम वाटिका
मध्ये स प्रयाति सुखेनैव अप्सरो।

भिः समाकीर्णो दिव्याभिर्मंगलै
र्गतः देवैस्तु स्तूयमानस्तु धर्मराजं
प्रपश्यति देवाश्च धर्म संयुक्ता।
जग्मुः सौम्यमेव ते ज्ञाते हितं ॥
महाभाग भुंक्ष्व भोगान्मनोऽस्मात्
एवं संपश्यते धर्मं सौम्य तु यः।
महामतिः अस्य पुण्यस्य भावेन।
भुंक्ते स्वर्गमनुत्तमं भोगंतयात्।
स धर्मात्मा पुनर्जन्म प्रयाति च नि
ज धर्म प्रसादात्सत्कुलं पुण्यं प्रया
ति च ब्राह्मणस्य सुपुण्यस्य तु विप
स्य तथैव च धनाढ्यस्य सुपुण्यस्या।
वैश्यस्य च महामते धर्मेण मो।
दते भद्र पुनः पुण्यं करोति सः
इति श्रीपद्मपुराणे भूमिखंडे सुम
नोपाख्याने ९५ अध्यायः ॥
अथ पापिनां मरणलक्षणं सोम
शर्मोवाच पापिनां मरणं भद्रे।
कीदृशं लक्षणं पृतं तन्मे तं वि
स्तराद्धि यदि जानासि भाविनि।
सुमनोवाच कथयता मभिधास्यामि
तस्मात्किं हा तु श्रुतं मया पापि
नां मरणं कान यादृशं लिंगमेव च।
महापातकिनां चैव स्थानं मेषां।
वदाम्यहं लिमाममेथ्य संक्षेदे ॥
भूमिं पापसमन्वितां मनां प्राप्य स
दुष्टात्मा प्राणान्दुःखेन मुंचति।


चांडालभूमिं संप्राप्य मरणं याति
दुःखितः गर्दभाचरितां भूमिं वे
श्यागारं समाश्रितः मद्यपानगृ
हं गत्वा नैधन्यमुपगच्छति अ
स्थि चर्मनखैः पूर्णामाश्रितां पाप
किल्बिषैः तामवाप्य स दुष्टात्मा।
मृत्युं प्राप्नोति निश्चितं अन्यां
पाप समाचारां प्राप्य मृत्युं स ग
च्छति अथ चेष्टां प्रवक्ष्यामि हन्ता
नां प्रिय निश्चितां भैरवान् दा
रुणान् घोरान् निकृष्टान्महोद
रान् पिंगाक्षान्पीत नीलांश्च श्वेत
खेतान्महोदरान् अन्त्यजांश्च करा
लांश्च शुष्कमांस त्वचोपमान् रौ
द्र दंष्ट्रा करालांश्च जिह्वास्यान्सर्प
हस्तकान् सतान्दृष्ट्वा प्रकंपेन स्वि
द्यन् च मद्गुरुः शिवासंवाद ब
न्धोरान्महारावान्महामते सुवंति
हृतकाः सर्वकर्णमूलेन तस्य हि
गले पाशा एव ह्यास्ते कंठे बद्धास्त
थोदरे समाकृष्य नयंत्येते हा
हेति रुदतो मृत्युः म्रियमाणस्य
याचेष्टा तामेवं प्रवदाम्यहं पर
द्रव्यापहरणं परभार्याविडम्बनं
ऋणं परस्य सर्वस्वं गृहीतं यैस्तु
पापिभिः पुनर्नैव प्रदत्तं हि लो
भस्वाद विमोहितैः अन्यदेव।

महापापं कृतं निग्रहमेव च कंठ
मायांति ते सर्वे म्रियमाणस्य तस्य च
यानि कानि च पापानि पूर्वमेव कृ
तानि च आयांति कंठमूलं हि।
महापापस्य नान्यथा दुःख मुत्
पादयंत्येते कफवेपेन दारुणं।
पीडाभिर्दारुणाभिश्च कंठो घुरघु
रायते रोदने कंपने ऽत्यर्थं मात
रं पितरं पुनः स्मरति भ्रात ॥
रं तत्र भार्यां पुत्र पुनः पुनः
पुनर्विस्मरणं याति महापापेन।
मोहितः तस्य प्राणा न गच्छंति बहु
पीडा समाकुलाः पतनेन कंपने।
नैव मूर्च्छनेन च पुनः पुनः एवं पीडा
समायुक्तो दुःखं भुंक्ते ऽति मोहितः
तस्य प्राणाः सुदुःखेन महाकष्टैः
प्रचालितः अधानं मार्ग माश्रित्य
मृणकांत प्रयांति ते एवं प्रया
दुरात्मानो लोभमोह समन्विताः
नीयंते च महाभूतैस्तेषां दुःखं वदा
म्यहं इति पाद्मे भूमिखंडे सुम
नोपाख्याने पापिमरणं नाम ९६ अ
ध्यायः पापिनां यमालय गमन।
नानायोनि प्राप्ति विवरणं यथा सु
मनोवाच अंगार संचये मार्गे कृष्णा
माना हि नीयते दह्यमानः सु दु
ष्टात्मा चेष्टमानः पुनः पुनः यत्रा




तपो महा तीव्रो द्वादशादित्यता
पितः नीयते तेन मार्गेणासंततः
सूर्य्य रश्मिभिः पर्वतेष्विव दुर्गेषु।
छायाहीनेषु दुर्मतिः नीयते तेन
मार्गेण त्वथा तस्मादि पीडितः
महते हन्यमानस्तु प्रहारदंडैः प्र
चण्डैः कशाभिस्ताड्यमानस्त्वतिघ
मानस्तद्दूतकैः ततः शीतमये मा
र्गे वायुना सेव्यते पुनः तेन पी
तेन दुःखी सम्भवायाति न संशयः
आक्रुश्यमाणो दूतैस्तु नानादुःखा
न्नीयते एवं पापी सदुष्टात्मा दो
षवान्लात्मा निन्दकः सर्वपापसमा
युक्तो नीयते यमकिंकरैः यमं प
श्यति दुष्टात्मा कृष्णांजनचयोपमं
तमुग्रं दारुणं भीमं यमदूतैः स
मावृतं सर्वव्याधिसमाकीर्णं चि
त्रगुप्त समन्वितं आरूढमहिषं
देवं धर्मराजं हि तेनाननं दंष्ट्रा
करालमत्युग्रं लम्बास्यं कालसन्नि
भं पीतवासं महाहस्तं रक्तांगं
धारुलेपनं रक्तमाला कृताभूषं
गदाहस्तं भयंकरं एवं विधं
महाकायं यमं पश्यति दुर्मतिः
तं दृष्ट्वा समनुप्राप्तं सर्वधर्मबहि
ष्कृतं यमः पश्यति तं दुष्टं पापि
ष्ठं धर्मकंटकं घातयेत्स महादुः
खैः पीडाभिर्दारुणदुःखैः याव
द्युगसहस्रान्तं तावत्कालं प्रपच्य
ते नाना नरक देशेषु पच्यते च
पुनः पुनः नरकं च प्रयात्येवं।
कृमिकीटेषु पापकृत् अमेध्ये।
पच्यते नित्यं हाहाभूतो विचे
ततः मरणं चैव पापात्मा एवं।
याति सुनिश्चितं एवं पापस्य।
सम्भोगं भुंक्ते चैव सदुर्मतिः पुन
र्जन्म प्रवक्ष्यामि यासु योनिषु जा
तिषु स्वयोनिं समनुप्राप्य भुंजते
पातकं पुनः व्याघ्रो भवति दुष्टा
त्मा रासभे याति वै पुनः मा
र्जार शौकरी योनिं सर्पयोनि।
स्तथैव च नाना भेदास्तु सर्वास्तु
तिर्य्यक्तु च पुनः पुनः पाप प
तिषु संयाति अन्यासु गर्हितासु
च चांडालभिल्लजातिषु पुलिंदी
याति पापकृत् पतन्ते सर्वमा
ख्यातं पापिनां जन्म चैव हि
पापपुण्यसमाचारस्तदग्रे कथि।
मया इति याम्ये भूमिखंडे सम
नोपाख्याने पापपुण्य विवेको
नाम ८७ अध्यायः शालग्रा
म शिलास्पर्शमरणफलं यथा।
राजान ऊचुः पूर्वं नारायणस्यास
कल्केः स्मरतो गतो वयं रूपा

इमे लोका ऋषयो ब्राह्मणाश्चये
प्रेत्य भक्ति विताने वा हरौ।
विस्मित मानसः श्रुत्वामत्वामियं
भक्तिः क लब्धा परमात्मनः क
थं वा शिक्षिता राजन् किं वा नेत्रा।
र्गिकीतव श्रोतुमिच्छामहे राजन्
त्रिजगत् पावनीं कथां भागव
तोत्तमः संसाराश्रम नाशिनीं।
शशिध्वजउवाच स्त्री पुंसाववयो
र्यूयं शृणुताम्मे मोचविक्रमा हते
यज्जन्मकर्मादिस्मृतिं तद्दिला।
तानं पुरा युगसहस्रान्ते गृध्रोऽ
हं पूतिमांसभक्ष गृध्रीयं मे प्रिया
रोपकृतनीडो वनस्पतौ चकार।
कामं सर्वत्र वनोपवनसंकुले मृ
तानां पूतिपलालैः प्राणिनां हति
कल्पकौ एकदाल्लुब्धकः क्रूरात्मा।
लोभ पिशिताशिनौ आवां वीक्ष्य
गृहे पुष्टं गृध्रे तन्मायोजयेत
तं वीक्ष्य जात विश्वासौ तन्मध्याय
रिपीडितौ स्त्री पुंसौ पतितौ।
तन्मांस शोणितं वेतसौ व
ह्वावावां वीक्ष्य पिशिताद्दूषाद्गत्य
लुब्धकः नग्राहकं टेन रसा पंचवग्र
यान पीडितः आवां गृहीत्वा गे
हकायाः शिलायां सलिलान्तिके।
मस्तिष्कं चूर्णयामास लुब्धकः पिशि
ताशनः चक्रांकित शिला संगा
त्मरणादपितत्क्षणात् ज्योति।
र्मय विमानेन सद्यो भूत्वा चतुर्भु
जौ प्राप्तौ वैकुंठनिलयं सर्वलोक
नमस्कृतं ततः स्थित्वा युगशतं
ब्रह्मणो लोकमागतौ ब्रह्मलो।
के पंचशतं युगानां सय भु
क्त्वैव देवलोके कालवशाद्गत
युग चतुःशतं ततो भुवि रूपा।
स्तावत् बहु स्वन्तरं हे स्मरन्त
हरे रनुग्रहं लोके शालग्रामा।
शिलाश्रयं जातिस्मरत्वंगंडक्याः
किं तस्याः कथयाम्यहं यज्जला।
स्पर्शमात्रेणमाहात्म्यं महदद्भुतं।
चक्रांकितशिलास्पर्शमरणस्य।
ईदृशं फलं नजाने वासुदेवस्य।
सेवया किं भविष्यति इति कल्कि
पुराणे २४ अध्यायः मरणाजन
कवत्नि यथा अग्निरापः स्त्रि
यो मूर्खः सर्पा राजकुलानि च नि
त्यं पराप सेव्यानि सद्यः प्राण
हराणि षट् इति गारुडे ११४ ।
अध्यायः ॥
मरन्तः पुं मरणं इत्युणादिकोषः
मरंदः पुं मकरंदः इति शाहम
रंदकः रत्नावली ॥
मराकाली स्त्री हस्तिकालीविकाटी



इति भाषा इतिरत्नमाला ।
मराः पुं शास्यरक्षणस्थाने मराइ
इतिभाषा इतिजटाधरः ॥
मरालः पुं राजहंसः इति जटा
धरः कज्जलं कारण्डकः तुरङ्गमः
वारिवाहः दाडिमीविपिनं ।
खलः इति सारस्वतः ॥
मसृणोऽपि इतित्रिकाण्डशेषः ।
मरालकः पुं कलहंसः इतिरा
जनिर्घण्टः ॥
मरिचं क्ली कक्कोलकं स्वनाम
ख्यातवर्त्तुलाकारकटुद्रव्यविशेषः
तत्पर्य्यायः पवितं २ श्यामं ३ को
लं ४ वल्लीजं ५ ऊषणं ६ यवने
ष्टं ७ वृत्तफलं ८ शाकाङ्गं ९ धर्म
पत्तनं १० कटुकं ११ शिरोवृत्तं १२ वी
रं १३ कफविरोधि १४ सूषं १५ सर्व
हितं १६ कोलं १७ वेल्लजं १८ अस्य
गुणाः कटुत्वं तिक्तत्वं उष्णत्वं ।
लघुत्वं श्लेष्मविनाशनत्वं शमीर
कृमि हृद्रोगहरत्वं रुचिकारक
त्वंच इतिराजनिर्घण्टः अपिच
मरिचं वेल्लजं कोलमूषणं धर्मपत्त
नं मरिचं कटुकं तीक्ष्णं दीपनं
कफवातजित् उष्णं पित्तहरं ।
रूक्षं श्वासशूलकृमीन्हरेत् तदा
र्द्रं मधुरं पाके नात्युष्णं कटु ।
कं गुरु किंचित्तीक्ष्णगुणं श्लेष्म
प्रसेकि स्यादपित्तलं इति भा
वप्रकाशः ॥
मरिचः पुं मरुवकवृक्षः इतिराज
निर्घण्टः ॥
मरिचपत्रकः पुं सरलवृक्षः इति
राजनिर्घण्टः ॥
मरिमा पुं मृत्युः इतिसिद्धान्त
कौमुद्यामुणादिवृत्तिः ॥
मरीचं क्ली स्वनामख्यातकटुद्र
व्यविशेषः तत्पर्य्यायः वेल्लजं २
कोलकं ३ कृष्णं ४ ऊषणं ५ धर्म
पत्तनं ६ इत्यमरः मरिचं ७ ।
श्यामं ८ वरिष्ठं इतिजटाधरः ।
आर्द्रस्य तस्य गुणाः पाके स्वादु
त्वं गुरुत्वं श्लेष्मप्रसेकित्वंच ॥
शुष्कस्य तस्य गुणाः रूक्षत्वं अग्नि
दत्वं तिक्त कटुत्वं उष्णत्वं ल
घुत्वं श्लेष्मनाशित्वंच इति
राजवल्लभः अन्यन्मरिचशब्दे
द्रष्टव्यं ॥
मरीचिः पुं मुनिविशेषः सतु ब्र
ह्मणो मानसपुत्रः अस्यभार्य्या
कर्द्दममुनिकन्याकला पुत्रः कश्यप
पूर्णिमासश्च इतिश्रीभागवतम
तं कृपणः इतिहेमचन्द्रः ॥
मरीचिः पुं स्त्री किरणः इत्यमरः

षट्त्रसरेणुपरिमाणं इतिवैद्यक ।
परिभाषा ॥
मरीचिका स्त्री मृगतृष्णा इत्यमरः
मरीचि रिवमरीचिका स्वार्थे संज्ञे
इत्यादिनाइवार्थेकः ग्रीष्मे मरु
देशसिकतासु अर्ककराः प्रतिफ
लिताः दूरस्थानां जलत्वेनाभान्ति
हाविका मृगतृष्णेति टीकाकारः
उत्कटरविरश्मि जन्यत्विति वा
म्बुजालं मरीचिका इत्यन्येच ।
न्मयूखे जलमिव दृश्यते इत्यपरे
इति भरतः ॥
मरुः पुं सर्वतः निर्जलदेशः
तत्पर्य्यायः धन्वा २ इत्यमरः ॥
दपोरकदेशः यथा शाल्मलिका
रुक्मीया मरवस्तदपोरकाः इति
हेमचन्द्रः मरुवकवृक्षः इति
भावप्रकाशः सूर्य्यवंशीय भावि
राजविशेषः तस्यविवरणं यथा
रामात्कुशोऽभूदतिथि स्ततो
ऽभून्निषधान्नभः तस्मात्पुण्डरी
कः क्षेमधन्वाभवत्ततः देवा
नीकस्ततोऽहीनः पारियात्रो ऽथ
हीनतः बलाहक स्ततोऽर्कस्त्र
रजनाभ स्ततोऽभवत् खगणा
द्विधृत स्तस्माद्धिरण्यनाभ संज्ञि
तः ततः पुष्यार्णस्तस्माद्ध्रुव स्ततो
ऽग्निवर्णकः तस्मात्शीघ्रो ऽभ
वत्पुत्रः पिता मे ऽतुलविक्रमः ।
तस्मान्मरुं मां केपीद्र श्रुयथा ।
पि सुमित्रकं कलाप ग्राम मा
साद्य विद्धि सत्त्वसिस्थितं तवा
बतारं विज्ञाय व्यासात् सत्य ।
वतीसुतात् प्रतीक्ष्यकालं लक्षा
न्ते कालग्राम स्त्वदन्तिकं क
ल्किरुवाच मरोत्वा मभिषेक्ष्या ।
मि निजायोध्यापुरेऽधुना हत्वा
म्लेच्छानधर्म्मिष्ठान् प्रजाभूत विद्धि
सकान् विशाखयूपभूपालस्तन
याविनयान्वितां विवाहे रुचिरा ।
पाङ्गी सुंदरी त्वां प्रदास्यति इ
तिकल्किपुराणे ९ अध्यायः ।
मरुजः पुं नखीनामगन्धद्रव्यं इति
शब्दचन्द्रिका मरुदेशजाते त्रि
मरुजा स्त्री मृगेर्वारुः इति राज
निर्घण्टः ॥
मरुत्ता स्त्री उच्चललाटयुक्तस्त्री
शब्दरत्नावली ॥
मरुण्डा स्त्री उच्चललाटानारी इ
तित्रिकाण्डशेषः ॥
मरुतः पुं वायुः देवः इतिभर ।
तधृतव्याडिः चेटोपाटलिवृक्षः
इति शब्दचन्द्रिका ॥
मरुत् पुं वायुः इत्यमरः मरु




वकः इतिभावप्रकाशः देवः
ग्रंथिपर्णी क्ली इतिमेदिनी ए
क्वायांस्त्री इतिशब्दरत्नावली।
मरुत्करः पुं राजमाषः इतिशब्द
चंद्रिका ॥
मरुत्क्रिया स्त्री अपानोत्सर्गःवा
तकर्म इतिख्यातः इतिकेचित्
मरुत्तः पुं चंद्रवंशीयराजविशे
षः सच अवीक्षिद्राजपुत्रः यथा
क्रोष्टुकिरुवाच आवीक्षितस्यनृप
तेर्मरुत्तस्यमहात्मनः श्रोतुमिच्छा
मिचरितं कथयते सोऽतिचेष्टितः
चक्रवर्त्ती महाभागः शूरः कान्तो।
नोमहामतिः धर्मविद्धर्मकृच्चैव
सम्यक्पालयिताभवः मार्कंडेय
उवाच सपित्रासमनुज्ञातो राज्यं।
प्राप्यपितामहात् धर्मतः पाल।
यामास प्रजाः पुत्रानिवौरसान्
इयाजसमहायज्ञान्यथावत्प्राज्य
दक्षिणान् ऋत्विक् पुरोहितादे।
शादनिर्विंनो महीपतिः तस्या
प्रतिहतंचक्रमासीद्द्वीपेषुसप्तसु
गतय श्चाप्यविच्छिन्नाः स्वः पाता
लजलादिषु इत्यादि मार्कंडेय
पुराणं ॥
मरुत्तकः पुं मरुवकः इतिभा
वप्रकाशः ॥

मरुत्पथः पुं आकाशं इति
हेमचंद्रः " ॥
मरुत्पालः पुं इंद्रः " इति
केचित् ॥
मरुत्पुत्रः पुं भीमसेनः इति
हेमचंद्रः हनुमांश्च ॥
मरुत्प्लवः पुं सिंहः इति त्रि
कांडशेषः ॥
मरुत्फलं क्ली घनोपलः इति
शब्दमाला ॥
मरुत्वान् पुं इंद्रः इत्यमरः
हनुमान् इति शब्दरत्नावली
मरुत्सखः पुं इंद्रः इतिधरणिः
अग्निः वायुसख इत्यमरदर्शनात्
मरुद्दोलः पुं धवित्रं इति
शब्दमाला ॥
मरुद्दिष्टः पुं गुग्गुलः इतिराज
निर्घंटः ॥
मरुद्धजं क्ली वानलं बडीरस
इति भाषा यथा ग्रीष्महासं वं
शकर्फं वानलं मरुद्धजं इति
हारावली ॥
मरुद्भवा स्त्री ताम्रमूलाखपःखि
रा इतिभाषा इतिरत्नमाला।
मरुद्रथः पुं अश्वः इतित्रिकांड।
शेषः देवरथः इतिहेमचंद्रः म
रुद्रुमः पुं विट्खदिरः इतिरत्न

माला ॥
मरुद्वर्त्म क्ली आकाशं इतित्रिकां
डशेषः ॥
मरुद्वाहः पुं धूमः इतित्रिकांड
शेषः अग्निः इतिशब्दमाला।
मरुद्विषः पुं उष्ट्रः इतित्रिकांड
शेषः ॥
मरुन्माला स्त्री स्पृक्का पिडिंशाक
इतिभाषा इत्यमरः ॥
मरुप्रियः पुं उष्ट्रः इति हेम
चंद्रः ॥
मरुभूः स्त्री दाशेरकदेशः मार
त्रया इतिभाषा इतित्रिकांड।
शेषः निर्जलभूमिश्च ॥
मरुभूरुहः पुं करीरवृक्षः इति
भावप्रकाशः मरुभूमिजाते त्रि
मरुलः पुं कारंडवपक्षी इति
हेमचंद्रः ॥
मरुवः पुं वृक्षविशेषः मरुआ
इतिनागदौना इतिचभाषा तत्प
र्यायः खरपत्रः २ गंधपत्रः ३ फ
णिज्झकः ४ बहुवीर्यः ५ शीतल
कः सुराकः ७ समीरणः ८ जंबीरः
९ प्रस्थकुसुमः १० मरुवकः ११ आ
जन्मसुरभिपत्रः १२ मरिचः १३ अ
स्यगुणाः कटुत्वं तिक्तत्वं उष्णत्वं
कृमिकुष्टविड्व्याध्मान शूल माघ

त्वदोष नाशित्वंच इति राजनिर्घंटः
अपिच मरुत्तको मरुवको।
मरुन्मरु रपि स्मृतः फणीफणि
ज्जकश्चापि प्रस्थपुष्पः समीरणः
मरुदग्निप्रदो हृद्य स्तिक्तोष्णः पि
त्तलो लघुः वृश्चिकादि विषश्लेष्म
वात कुष्ट कृमि प्रणुत् कटुपाक
रसोरुच्य स्तिक्तो रूक्षः सुगंधि
कः इति भावप्रकाशः ॥
मरुवकः पुं कंटकिवृक्षविशेषः
मयना इतिभाषा तत्पर्यायः
पिंडीतकः २ श्वसनः ३ करहाट
कः ४ शल्यः ५ मदनः ६ स्वल्पपत्र
तुलसी तत्पर्यायः समीरणः २
प्रस्थपुष्पः ३ फणिज्झकः ४ जंबीरः ५
इत्यमरः जम्बीरभेदः इतित
ट्टीकायां भरतः पुष्पवृक्षविशे
षः मरुयाफूल इति भाषा
तत्पर्यायः शुक्लपुष्पः २ तिलकः
३ कुलकः ४ क्षुपविशेषः नागदा
ना इति भाषा तत्पर्यायः।
खरपत्रः २ गंधपत्रः ३ इतिरत्न
माला व्याघ्रः राहुः भयानकः
इति जटाधरः ॥
मरुसंभवं क्ली चाणक्यमूलकं इ
तिराजनिर्घंटः ॥
मरुसंभवा स्त्रीमहेंद्रवारुणी स्वड्ड




कुशालभा इति राजनिर्घण्टः ॥
मरुस्यास्त्री लघुकुशालभा इति
राजनिर्घण्टः ॥
मर्कटकः पुं मृगविशेषः इत्युणादि
कोषः मयूरः पाठी इति सं
क्षिप्तसारोणादिवृत्तिः ॥
मर्कटवा स्त्री कार्पासी यवासः
लघुखदिरः इति राजनिर्घण्टः ।
मरोलिः पुं मकरः यथा जल
रूपस्तु मकरो मरोलिरसितदंष्ट्रकः
इति त्रिकाण्डशेषः ॥
मरोलिकः पुं मकरः इति शब्द
रत्नावली ॥
मर्क सर्पे सौत्रधात्वयं इति
कविकल्पद्रुमः मर्कटः इति दु
र्गादासः ॥
मर्कः पुं देहः वायुः इत्युणादि
कोषः वानरः इति शब्दरत्ना
वली ॥
मर्ककः पुं गलगण्डपक्षी हाड
गिल इति भाषा इति शब्दरत्ना
वली ॥
मर्कटः पुं वानरः इत्यमरः ।
ऊर्णनाभः स्थावरविषभेदः ॥
इति हेमचन्द्रः गलगण्डपक्षी हा
डगिल इति भाषा इति त्रि
काण्डशेषः ॥

मर्कटकः पुं शस्यभेदः वानरः
लूता इति मेदिनी मत्स्यभेदः ।
दैत्यः इति शब्दरत्नावली ॥
मर्कटतिन्दुकं पुं कुपीलुः इति
भावप्रकाशः ॥
मर्कटपिप्पली स्त्री अपामार्गः इ
ति राजनिर्घण्टः ॥
मर्कटप्रियः पुं क्षीरवृक्षः इति
शब्दमाला ॥
मर्कटवासः पुं लूतातन्तुः माकड
शारजाल इति भाषा तत्पर्यायः
आशाबन्धः २ इति शब्दरत्ना
वली ॥
मर्कटशीर्षं क्ली हिंगुलं इति
रत्नमाला ॥
मर्कटास्यं क्ली ताम्रं इति हेम
चन्द्रः वानरमुखं तद्वति त्रि ॥
मर्कटी स्त्री कपिकच्छुः अपामा
र्गः अजमोदा इति राजनिर्घण्टः
करञ्जभेदः माकडाकरञ्जा इति
भाषा इत्यमरः वानरी च ॥
मर्कटेन्दुः पुं काकतिन्दुकवृक्षः
यथा काकेन्दुः कुलकः काकपी
लुकः काकतिन्दुके मर्कटेन्दुः म
न्युपुत्रो द्वावेतौ तत्र कीर्त्तितौ ॥
इति शब्दचन्द्रिका ॥
मर्करः पुं भृङ्गराजः इति शब्द

रत्नावली ॥
मर्करा स्त्री दरी भाण्डं सुरंगा ।
निष्फलास्त्री इति विश्वः ।
मर्च कग्रहे सौत्रोऽयं धातुः ॥
इति कविकल्पद्रुमः तालव्यवर्गी
यप्रथमान्तः मर्कः इति दुर्गादासः
मर्चिः स्त्री शुद्धिः इति मेदिनी
मर्चिः पुं रजकः इति हेमचन्द्रः
पीठमर्द्दः इति शब्दरत्नावली ।
मर्त्तः पुं मनुष्यः इति सिद्धान्तकौ
मुद्यामुणादिवृत्तिः मानवकः ।
इति संक्षिप्तसारोणादिवृत्तिः ॥
मर्त्यः पुं मनुष्यः इत्यमरः ।
मध्यमलोकः इति जटाधरः
मर्दनं क्ली अंगमर्दनं गाचापा
इति भाषा तत्पर्यायः संवाह
नं २ इत्यमरः संवलं ३ इति
शब्दरत्नावली अस्य गुणाः श्रम
हरत्वं निद्राप्रकृत्सुखप्रदत्वं ।
मांस रक्तत्वक्प्रसन्नकारित्वं वा
युकफनाशित्वं च इति राजवल्ल
भः चूर्णने इति मुग्धबोधटीका
तान् मर्द्दलः पुं वाद्यविशेषः मा
दल इति भाषा इत्यमरः तत्पर्या
यः मुरजः २ इति शब्दरत्नावली ॥
मर्दितं त्रि ग्रथितं इति विश्वः ।
विश्ववर्गटीकायां भरतः चूर्णिते

यथा तिन्तिडीफलरसेन मर्दि
तो रामबाण इति विद्धतो रसः ।
इति भावप्रकाशः ॥
मर्व गत्यां इति कविकल्पद्रुमः ।
मर्वति इति दुर्गादासः ॥
मर्म्म क्ली स्वरूपं तत्त्वं यथा शृगया
न विगीयते नृपे इपि धर्मागमा
मर्म्मपारगैः स्मरसुन्दर मां यद
त्यजस्तव धर्मः सदयोदयोज्वलः
इति नैषधीय द्वितीयसर्ग श्लोक
व्याख्याने भरतः संधिस्थानं ।
इति लिंगादिसंग्रहे अमर भर
तौ जीवस्थानं इति राजनिर्घ
ण्टः अथ मर्म्माणि सन्निपा
तः सिरा स्नायु संधि मांसास्थि सं
भवः मर्म्माणि तेषु तिष्ठन्ति प्राणाः
खलु विशेषतः सप्तोत्तरं शतं
संति देहे मर्म्माणि देहिनां ता
न्येकादश मांसे स्युः रक्तावस्थि
संति हि संधीनां विंशति स्नानि
स्नायूनां सप्तविंशतिः चत्वारिंश
त्वथैकं च सिरामर्म्माणि तत्र तु ।
द्वाविंशतिः सक्थियुगे तावन्त्ये
व भुजद्वये द्वादशोरसि कुक्षौ च
पृष्ठदेशे चतुर्द्दश ग्रीवायाऊर्द्ध्व
भागे तु सप्तत्रिंशन्मतानिहि म
र्म्माणि हन्तानि संतिपंचधा भवंति




तान्याह सद्यःप्राणहराणि स्युः।
मर्म्माण्येकोनविंशतिः मर्म्मदेशा
स्त्रयस्त्रिंशत्स्युः कालान्तर मारकाः
चत्वारिंशच्च चत्वारि वैकल्यं जन
यन्ति हि मर्म्माष्टकं रुजाकारि वि
शल्यघ्नं त्रिकं मतं शृङ्गाटकान्य-
धिपतिः शङ्खौ कण्ठसिरा गुदं
हृदयं वस्तिनाभ्यौ च सद्योघ्नानि
हतानि चेत् शृङ्गाटकानि घ्रा
ण श्रोत्र जिह्वासन्तर्पकानां सिरा
मुखानां शिरसो मध्ये संयोग
स्थाने तानि चत्वारि सिरामर्म्माणि
चतुरङ्गुलप्रमाणानि हतानि सन्ति
सद्योमारकाणि अधिपतिः मस्त
कस्याभ्यन्तरे सन्धिसिरयोः सन्निपा
ते उपरिष्टाद्रोमावर्त्तः स एकः स
न्धिमर्म्मेदं अर्द्धाङ्गुलप्रमाणं सद्यो
मारकं शङ्खौ भ्रुवोरन्तोपरि कर्णौ।
ललाटमध्यतो द्वौ अस्थिमर्म्मणी
अर्द्धाङ्गुले सद्योमारके कण्ठ
सिराः मातृकाः ग्रीवायाउभयपा
र्श्वयोश्चतस्रश्चतस्रः शिरास्ता अ
ष्टौ शिरामर्म्माणि चतुरङ्गुलानि सद्यो
मारकाणि गुदं प्रसिद्धमेकं मांस
मर्म्म चतुरङ्गुलं सद्योमारकं हृ
दयं स्तनयोर्मध्यमामाशयद्वारमे
कं सिरामर्म्म चतुरङ्गुलं सद्योमा।

रकं वस्तिः नाभिपृष्ठकटीमुष्कगु
दवंक्षणशेफसां मध्ये वस्तिस्तनुत्व
एकद्वारो ह्यधोमुखः स्नायुमर्म्मैतच्च
तुरङ्गुलं सद्योमारकं नाभिः प्र
सिद्धा सिरामर्म्मेदं चतुरङ्गुलं स
द्योमारकं वक्षोमर्म्माणि सीम
न्तास्तल क्षिप्रेन्द्रवस्तयः बृह
त्यौ पार्श्वजौ सन्धी कटीकतरुणे
च ये नितम्बाविति चैतानि काला
न्तरहराणि तु वक्षोमर्म्माणि स्तन
मूल स्तनरोहितापलापापस्त
म्भाः स्तनमूले स्तनयोरधस्ताद्व्यङ्गु
लं यावत् द्वे सिरामर्म्मणी द्व्यङ्गुले
कफपूर्णकोष्ठतया कालान्तरमा
रके स्तनरोहिते स्तनयोरुपरिद्व्यङ्गु
लं यावत् द्वे मांसमर्म्मणी रक्तपू
र्णकोष्ठतया कालान्तरमारके।
अपलापौ अंसकूटयोरस्तात्।
पार्श्वयोरुपरि द्वौ सिरामर्म्मणी
अर्द्धाङ्गुले रक्तेन पूयतां गतेन का
लान्तरमारके अपस्तम्भौ उरस
उभयतो नाड्यौ वातवहे सिरा
मर्म्मणी अर्द्धाङ्गुले वातपूर्णकोष्ठत
या कासश्वासाभ्याञ्च कालान्तरमारके
सीमन्ताः शिरसि पञ्च सन्धयः स
न्धिमर्म्माणि चतुरङ्गुलाः उन्मादभय
चित्त विनाशैः कालान्तरमारकाः।

तलानि मध्याङ्गुलिमनुक्रम्य हस्त
मध्ये तलं एवं पादस्य हस्तस्य
पादयोश्च चत्वारि तलानीमानि म
र्म्माण्यर्द्धाङ्गुलानि रुजाभिः काला
न्तरमारकाणि क्षिप्राणि अङ्गुष्ठाङ्गु
ल्योर्म्मध्ये क्षिप्रं तच्च हस्तयोर्द्वे पादयो
र्द्वे एवं चत्वारि स्नायुमर्म्माण्यर्द्धाङ्गु
लान्याक्षेपकेण कालान्तरमारका
णि इन्द्रवस्तयः प्रकोष्ठयोर्मध्ये द्वौ
जङ्घयोर्मध्ये द्वौ एवं चत्वारो मांस
मर्म्माणि द्व्यङ्गुलाः शोणितक्षयेण।
कालान्तरमारकाः बृहत्यौ स्तनमू
लादुभयतः पृष्ठवंशं यावत् सिराम
र्म्मणी अर्द्धाङ्गुले शोणितातिप्रवृत्ति
निमित्तैरुपद्रवैः कालान्तरमारके
पार्श्वसन्धी जघनपार्श्वयोः सन्धी
सिरामर्म्मणी अर्द्धाङ्गुले शोणित
पूर्णकोष्ठतया कालान्तरमारके
कटीकतरुणे त्रिकसन्निधाने उ
भयतः श्रोणिकाण्डं लक्षीकृत्य।
स्थिनी अस्थिमर्म्मणी अर्द्धाङ्गुले शो
ण क्षयात् पाण्डुविवर्णरूपतया
कालान्तरमारके नितम्बौ प्रसिद्धौ
द्वौ अस्थिमर्म्मणी अर्द्धाङ्गुलावधः
कायशोषणाद्दौर्ब्बल्येन च कालान्तरमा
रकौ लोहिताक्षाणि जान्वोर्व्वीकूर्च्चौ
विटपकूर्पराः कुकुन्दरे कक्षधरे।

विधुरे सकृत्कार्त्तिके अंसांसफल
कापाङ्गा नीले मन्ये फणौ तथा
वैकल्यकारकाण्यावर्त्तौ द्वौ त
थैव च लोहिताक्षाणि ऊर्व्वोरधो
मध्ये वङ्क्षणसन्धेर्लोहिताक्षं तच्च
हस्तयोर्द्वे ऊर्व्वोर्द्वे एवं तानि च
त्वारि सिरामर्म्माण्यर्द्धाङ्गुलानि वैक
ल्यकारकाणि तत्र शोणितक्षयेण
पक्षाघातः सक्थिसादो वा प्राण
यः जानुनि ऊर्द्धे उभयोः पार्श्वयोरङ्गु
गुलाप्येकस्मिन् जानुनि द्वे अपरस्मि
न् द्वे एवं चतस्रः स्नायुमर्म्माण्यर्द्धा
ङ्गुला वैकल्यकर्य्यः तत्र शोथाभि
वृद्धिः सक्थिस्तम्भश्च जानुनी ज
ङ्घोर्व्वोः सन्धी सन्धिमर्म्मणी त्र्यङ्गुले वै
कल्यकरे तत्र खञ्जता ऊर्व्वोः द्वे
ऊर्व्वोर्मध्ये द्वे प्रगण्डयोर्मध्ये एवं
चतस्रः सिरामर्म्माण्येकाङ्गुला वै
कल्यकर्य्यः तत्र शोणितक्षयात्।
सक्थिशोषः कूर्च्चौ पादयोरङ्गुष्ठाङ्गु
ल्योर्मध्ये तयोरूर्द्धमयश्च एवं चत्वारः
स्नायुमर्म्माणि वैकल्यकरास्तत्र पाद
योर्भ्रमणवेपने भवतः विटपे।
द्वे वङ्क्षणवृषणयोर्मध्ये स्नायुम
र्म्मणी एकाङ्गुले वैकल्यकरे तत्र षाण्ड
मल्पशुक्रता वा कूर्परौ कफोणी
तौ द्वौ सन्धिमर्म्मणी त्र्यङ्गुलौ वैक।



स्यकरौ तत्र बाहुमध्ये संकोचः
ऊरुंदरे नितम्ब कूपकौद्वौसंधि।
मर्म्मणी आर्द्धाङ्गुले वैकल्यकरे तत्र
स्पर्शाज्ञान मधःकाये चेष्टापचा
तश्च कक्षयोरे वक्षःकक्षयोर्म्मध्ये
द्वे स्नायुमर्म्मणी एकाङ्गुले वैकल्य
करेतत्र पक्षाघातः विधुरकर्णौद्वा।
कृतायः संश्रितेकिंचित्रिम्नाकारेद्वे
स्नायुमर्म्मणी अर्द्धाङ्गुलेवैकल्यकरे
तत्रवाधिर्य्यं कृकाटिकेशिरो ग्री
वयो रुभयतः संधीद्वेसंधिमर्म्मणी
अर्द्धाङ्गुलेवैकल्यकरे तत्रशिरःक
म्पः अंसौस्कन्धौस्नायुमर्म्मणी अर्द्धा
ङ्गुलौ वैकल्यकरौ तत्रबाहुस्तम्भः
अंसफलके पृष्ठोपरि पृष्ठवंशं मु
भयत स्त्रिकसंबद्धे ग्रीवायाअंसा
हृदयस्यचसंयोगो यत्रतत्त्रिकं अस्थि
मर्म्मणी अर्द्धाङ्गुले वैकल्यकरेतत्र
बाह्वोः शून्यता शोषश्च अपाङ्गौ
नेत्रयो र्नेत्रौ सिरामर्म्मणी अर्द्धा
ङ्गुलौ वैकल्यकरौ तत्रान्ध्यं हृ
ष्ट्युपघातो वा नीलेमन्येचकंठा
नाडी मुभयतश्चतस्रो धमन्यो द्वे
नीले द्वे मन्ये तत्रएकानीला एका
मन्या एकस्मिन् पार्श्वे मन्या नीला
अपरस्मिन्पार्श्वे द्वे द्वे सिरामर्म्मणी
द्व्यङ्गुलेद्व्यङ्गुले वैकल्यकरे तत्र


मूकता विकृतस्वरता रसाग्राहिता
फणे घ्राणमार्गमुभयतः श्रवणा
न्तेसिरमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे
तत्रगन्धाज्ञानं आवर्त्तौ भ्रुवोरु।
परि निम्नयोः संधिमर्म्मणी अर्द्धा
ङ्गुलौवैकल्यकरौ तत्रान्ध्यं दृष्ट्यु
पघातोवा गुल्फौ द्वौ मणिबंधौ
द्वौ तथा कूर्चशिरांसिच रुजा
कराणि जानीयाद्दृष्टावेतानिद्वि
मान् गुल्फौ चुटिके संधिमर्म्मणीद्व्य
ङ्गुलौ रुजाकरौतत्ररुजापादस्तम्भः
खञ्जता वा मणिबंधौहस्तप्रको
ष्ठसंधी संधिमर्म्मणी द्व्यङ्गुलौरुजा
करौ तत्र हस्तयोः क्रियाराहित्यं कू
र्चशिरांसि गुल्फ संधेरध उभयतः
एकस्मिन् पादे द्वे द्वे च द्वितीये
एवं चत्वारिस्नायुमर्म्माण्येकाङ्गुला
नि रुजाकराणि तत्ररुजाशोफश्च
उत्क्षेपौस्थापनी चैव विशल्यघ्नं
त्रिकं मतं उत्क्षेपौशङ्खयो रुपरि।
केशान्तं यावत्स्नायुमर्म्मणीअर्द्धा
ङ्गुलौ तयो विद्धयोः सशल्यो[illegible]
हृतशल्यस्तु म्रियेतस्थानएवविश
सशल्यहृतशल्यः हन्तीतिविशल्यघ्नंम
स्थापनी एकाभ्रुवोर्मध्येसिरामर्म्म
द्व्यर्द्धाङ्गुलं विशल्यघ्नं सप्तरात्रा
॥ ॥ ॥ ॥

न्तरे हन्तुः सद्यः प्राणहराणि।
कालान्तर प्राणहरं पक्षे मासे च
मारकं सद्यः प्राणहरं चोन्ने
विद्धं कालेन मारयेत् कालान्तर
प्राणहरं मन्ते विद्धंन्तु दुःखदं॥
अन्ते मर्म्मसमीपे मर्म्माण्यपिविहाय
हि ये विकारामूर्च्छातिकाये विवि
धा नराणां प्रायेण नेकृच्छ्रतमा
भवन्ति वैद्येन यत्ने रपि साध्य
मानाः इति भावप्रकाशः ॥
मर्म्मस्पर्शनिषेधो यथा परस्त्रे
णां परेतीनवाचक्षीत कस्यचित्
नसमस्यसेत् सूतके चनकं वै मर्म्म
णिस्पृशेत् इति कूर्म्मपुराणे उ
परिभागे १५ अध्यायः ॥
मर्म्मकीलः पुं भर्त्ता इतिजटाधरः
मर्म्मज्ञः त्रि मर्म्मवित् तत्त्वज्ञः
मर्म्मस्वरूपं संधिस्थानंवा तज्ज्ञा
नातियः सः ॥
मर्म्मरः पुं वस्त्रस्यपत्रस्यवध्वनिः
मड्मड्शब्द इतिभाषा इत्यमरः
मर्म्मरी स्त्री पीतदारु दारुहरिद्रा
इतिख्याता इति मेदिनी।
मर्म्मरीकः पुं दीनः इत्युणादि
कोषः ॥
मर्म्मवित् पुं मर्म्मज्ञः तत्पर्य्यायः
कार्पटिकः २ इतित्रिकाण्डशेषः।

मर्म्मिकः ३ मर्म्मवेदी ४ इति
जटाधरः ॥
मर्म्मवेदी पुं मर्म्मवित् तत्त्वज्ञः
इति जटाधरः ॥
मर्म्मस्पृक् त्रि मर्म्मपीडकः तत्प
र्य्यायः अरुन्तुदः २ इत्यमरः ॥
व्यथकः ३ इतिहेमचंद्रः ॥
मर्म्मावित् त्रिसंधिस्थानवेधकर्त्ता
मर्म्माविद् मर्म्मज्ञः यथा चिरं क्लि
शित्वा मर्म्माविद्रामो विलम्भितसवं
शाखायमान मव्यात्सीद्धृदयं त्व
णदाचरं इतिभट्टिकाव्ये ५ सर्गः
मर्म्माणि विध्यतीतिक्विप् ञिः वी
रुहो यङ्कावितिदीर्घनिर्द्देशात्
क्वचित् क्विबंतेपूर्वपददीर्घत्वंस्या
दिति सूचितं आङ् पूर्वस्य रूपं
वा मर्म्मावित् मर्म्मज्ञोवावेत्ते रू
पं इतितट्टीकायां भरतः।
मर्म्मिकः त्रि मर्म्मवित् इतिजटाधरः
मर्य्या व्य सीमा इतिमर्य्याशब्द।
टीकायां रायमुकुटः ॥
मर्य्यादा स्त्री न्यायपथस्थितिः
तत्पर्य्यायः संस्था २ धारणा ३ स्थि
तिः ४ इत्यमरः पर्य्यादीयते मर्य्या
दा पर्य्याङ् पूर्वात् दाञो ङः नि
पातनात् पस्यमः इतितट्टीकायां।
भरतः मर्य्येति सीमार्थे ॥

ऽव्ययं तत्र दीयतेमर्य्यादेति स्वा
मी इति रायमुकुटः मियेत
ऽनेति मर्य्या तां ददातीति म
र्य्यादा इति सारसुंदरी सीमा
इति जटाधरः कूलं इति
हेमचंद्रः ॥
मर्य्यादकः त्रि मर्य्यादाकर्त्ता म।
र्य्यादांकरोतीति कर्त्तरिटचेकादि
ति कण्प्रत्यये के ऽकः स्वो ह
स्ववेति आकारस्य ह्रस्वे निष्पन्नो
ऽयंशब्दः ॥
सर्व पूर्णौ गतौ इतिकविकल्प
द्रुमः मर्षतिपयसा कुम्भं चेटी
इति दुर्गादासः ॥
मर्षः पुं क्षांतिः मृषधातोर्भा
वेघञ प्रत्ययेन निष्पन्नः ॥
मर्षणं क्ली क्षमा मृषधातो।
र्भावे अनट्प्रत्ययेननिष्पन्नं ॥
मर्षितः त्रि क्षमायुक्तः क्षांतिवि
शिष्टः मृषधातोः कर्त्तरिक्त प्र
त्ययेननिष्पन्नः भावे क्ते क्ली
मर्षितवान् त्रि क्षांतः मृषधातोः
कर्त्तरि क्त वत प्रत्ययेननिष्पन्नः
मल ऊ धृतौ इतिकविकल्पद्रुमः
ऊ मलते इतिदुर्गादासः ॥
मलः पुं क्ली पापं विट् किट्टं
इत्यमरः पापं किल्बिषं ॥
विट् विष्ठा किट्टं कर्णमलं मूत्रा
दि स्वेदादिच पशुमलः वसासृ
मस्ङ्मज्जा मूत्रं विट्कर्णविण्नखाः
श्लेष्माश्रुदूषिका स्वेदोद्वादशैते
नृणांमलाः इति स्मृतिः इति
नदीकायां भरतः कर्पूरं ॥
इति शब्दचंद्रिका वात पित्त
कफाः यथा सर्वेषामेव रो
गाणां निदानं कुपितामलाः
तत्प्रकोपस्यतुप्रोक्तं विविधा
हित सेवनं इतिमाधवकरः।
मलघ्नः पुं शाल्मलीकंदः इति
राजनिर्घंटः मलनाशके त्रि
मलघ्नी स्त्री नागदमनी इतिरा
जनिर्घंटः ॥
मलजं क्ली पूयः इतिशब्दचंद्रि
का मलोद्भवे त्रि ॥
मलदूषितं त्रिमलिनं इत्यमरः
मलद्रावी पुं जयपालः इतिरा
जनिर्घंटः ॥
मलनं क्ली मर्दनं इतिमेदिनी
मलनः पुं पटवासः तांबु इति
भाषा इतिमेदिनी ॥
मलपूः स्त्री काकोडुम्बरिका इत्य
मरः ॥
मलभुक् पुं काकः इतिशब्द।
रत्नावली ॥

मलभेदिनी स्त्री कटुका इतिराज
निर्घंटः ॥
मलमासः पुं अधिकमासः तत्
पर्य्यायः मलिम्लुचः २ अधिमासः
३ असंक्रांतमासः ४ नपुंसकः ५
तस्यलक्षणं यथा वरिसं क्रांत्य
भावविशिष्टचांद्रमासत्वं मलमा
सत्वं इतिश्राद्धविवेकटीकायां।
श्रीकृष्णतर्कालंकारः अपिच।
ज्योतिषे अमावस्य द्वयं यत्र
रविसंक्रांतिवर्ज्जितं मलमासः स
विज्ञेयो विस्तुः स्वपितिकर्कटे
अमावस्याद्वयं अमावस्याद्वयान्त
लक्षणद्वयं रविसंक्रांतिभ्यां रवि
क्रियोत्पत्तिरूपोत्तरसंयोगरूपा
भ्यांयथाक्रमं वर्ज्जितं तेन द
र्शद्वयांत्य लक्षणद्वयपूर्वापरयोरे
व रवेः क्रियोत्पत्युत्तरं संयो।
गाभ्यां यथाक्रमं योगेनाधिमा ष
सः संक्रांते रेकक्षणे क्रियोत्।
पत्तिरपरक्षणेपूर्व संयोगनाशः
उत्तर संयोगात्पत्तिश्चेति क्षण
द्वय वृत्तित्व मिति मीमांसक सि
द्धांतात् गृह्यपरिशिष्ट ज्योतिः
पराशरौ रविणालंघितो मास
श्चांद्रः ख्यातो मलिम्लुचः तत्रया।
द्विदिनं मृकंडउत्तरे मासि कार।
येत् पराशरः पक्षद्वयेपि सं
क्रांति र्यदि तस्यात् सितासिते
तदा तन्मास विद्धित्युत्तरेमासि
कारयेत् अत्र लंघनसंक्रमणांच
रवे स्तदा भवति यदा तन्मासतत्
पूर्वमासांत्यक्षणयो रेकराश्यवस्थि
तस्यरवे स्तन्मासांतेतरसेवराश्यं।
तर संयोगः तत्वेकराशिस्थितस्या।
मासव्यापन मात्रं तथात्व चक्रं।
श्रुणा मेकराशौ संक्रांतस्य प्रति
पत्प्रथमक्षणे ऽपर राशौ तत्
पर राशौच द्वितीयायां प्रतिपदि
वारवेः संयोगे ऽपरस्यापि मल
मासता स्यात् अतएव ज्योति।
षे अमावास्या परिच्छिन्ने रविसं
क्रांति वर्ज्जितं मलमासं विजानी
याद्गर्हितं सर्वकर्मसु तस्यार्को
दर्शिक श्चैक राशौदर्शद्वयातिगः
अत्रैक राशिस्यार्कस्यदर्शद्वयाति
गत्वमुक्तं एतच्च पूर्वापरवर्तितयो
र्मासयोः पूर्वस्यैव संभवति ॥
न परस्य मलमासकारणांत।
ज्योतिषे दिवसस्य हरत्यर्कः ष
ष्टिभागं ऋतौ ततः करोत्येक ॥
महश्छेदं तथैवैकंच चंद्रमाः।
एव मर्द्ध तृतीयानामह्नाना मधि
मांसकं ग्रीष्मे जनयतः पूर्वे प



श्चाद्यंते तु पश्चिमं तेन द्वि
वसस्य निषेधः षष्ठिभागं दंडमेकं
रवि र्हरति छेदयति उत्तरे छेद
मित्यभिधानात् ततश्चक्रमेणा
सद्वये षष्टिनाडी छेदात्कल्पिते
ष्के ˣ एवमुक्तक्रमेण वर्षद्वादशाति
व्याप्त्मक कालाकर्षादर्द्धतृतीया
णामह्नानामंते च्छेदे तृतीयं यथां
तेनथाग्रीष्मे माधवादिषट्के पूर्वं
माधवादि त्रिकपतितं पयाद्यंते तु
पश्चिमं श्रावणादित्रिकपतितं म
लमासं वेद्वार्को जनयतः ग्रीष्मे
माधवादि षट्के इतियदुक्तंतद्या
क्रमाह मिहिरः माधवादिषु ष
ट्कषु मासिद्वर्शाद्वयं यदा द्विराषाढ.
सविज्ञेयः शेनेतश्रावणोऽद्युतः
द्विराषाढो द्विराषाढादिः श्रावणो
सौरश्रावणो तथाच ज्योतिषे।
मिथुनस्थोयदाभानुरमावस्याद्वयं
स्पृशेत् द्विराषाढः सविज्ञेयो वि
ष्णुः स्वपिति कर्कटे अमावस्याद्व
यं तत्संत्वल्लणद्वयं स्पृशेत्क्रमेणा
त् न तन्मध्येराश्येतरसंयोग इत्य
र्थः नतु कर्कटादित्रिके अधिमास
पाते तत्पूर्वं मिथुन एव हरिशा
यनं तत्कथं माधवादि षट्क
कमात्र ॥

द्व्याकर्षणांकरो
ति एवं वेद्वापि

मलमा

कर्कटेनत् तथाह राजमार्त्तंडः
कन्या सिंहतुलीरेषु यदादर्शाद्वय
मेवत् आगामिनि तदाषेडुली
रेमाधवः स्वपेत् माधवादित्रि क
श्रावणादि त्रिकाधिमासविवेचन
मप्येतदर्थं इदंतु साद्धवर्षद्वयाधि
मास पात सोविन्यक्रमाडुक्तं क
विज्ञियोंतो ज्ञासवाड्डेलन दंडष
ष्ट्याधिक न्यून दर्शानाडुक्तंकालन्यू
नाधिककालेपि मलमासो भवती
तिसमयप्रकाशोक्तं वस्तुतस्तु
दर्शान्त्ययत्नोन्यूनदंडनिषेधः आधिक
त्वे न तु तिथित्वयस्य कदाचिदप ल
भ्यमानत्वात् स्वल्पकालेन तिष्ठत
रसंबंधात् शीघ्रंरविलंघनप्रती
तेः शीघ्रमेव मलमासो भवतीति
अधिकदंडनिषेधः आधिकत्वेनत्वति
थित्वयस्य कदाचिदपलभ्यमानत्वे
नाधिकेनेव कालेन तिथ्यंतरसंबं
धात् विलंबेनैव रविलंघनप्रतीते
श्चिरेनैव मलमासो भवतीति त
थाच विष्णुधर्मोत्तरे सौरसंवत्।
सरस्यांते मानेन शशिजेन तु
एकादशातिरिच्यंते दिनानि भृगु
नंदन समाद्वये साढमासे तस्मा
त्मासो ऽतिरिच्यते सचाधिमास।
कः प्रोक्तः काम्यकर्मसु गर्हितः

इदं तु नियतं एकस्मादधिमासा
त्तृतीयाद्ब्दे अधिमासांतरमिति य
द्यपि यांतिथिं समनुप्राप्य तुला
गच्छति भास्करः तस्यैव सर्वसंक्रां
तिर्याबन्मेषं नगच्छति इति राज
मार्त्तंडवचनात्तुलादिषण्मासेतिथि
वृद्ध्यभावात् द्वादशतिथिवृद्धि
रनुपपन्नातथापिमध्येविषुवतो भी
र्यान्महानित्व वर्द्धयेत् तेः संभृ
ति कोमासः पतत्येष त्रयोदशः।
इतिगृह्यपरिशिष्ट वाक्ये विषुव
तो मेष तुलासंक्रांत्यो मध्ये मे
षादिषण्मास एव तिथिवृद्धिरुक्ता
अहर्गणेन मेषादिषण्मासमध्य
ऋा समदिन वृद्धिस्तुलादौशीघ्र
भुक्त्या दिनद्वयज्ञासइति तथाच
ज्योतिःशास्त्रे मेषादीनां महद्धी
त्वं षसांसमाष्ट चेद्रुकं तुलादी
नामष्ट सप्त चंद्रकं तुलिखेत् पृथ
कृ चंद्रएकः अंकस्यवामागतिस्थि
कविदो समयात् व्युत्क्रमेणांका
वोध्याः तेन दिनवृद्धिक्रमसंचया
भ्यां मेषादि षट्क एवएकादशा
दि तिथि वृद्धिः एवंच गतेह्न।
दितये साद्धं पंचपले दिनद्वये।
दिवसस्याष्टमे भागे पतत्येकोऽधि
मासकः इति राजमार्त्तंडोक्तः ॥

मलमा


समदश दिनाधिकाष्टमासाधिकव
र्षद्वये अधिमासः स सौरमासि सम
दशादिनोत्तरं चांद्रमास लंघनात्सं
भवात् सावनमानेन ज्ञेयः तथा
च विष्णुधर्मोत्तरे प्रथमकांडं सौ
रेणाह्णस्तु मानेन यदा भवति भाग
व सावने च तदा माने दिनषट्कं
प्रपूर्यते सौरसंवत्सरे दिनषट्का
धिकः सावनः संवत्सरो भवतीति
सौर मासाष्टकाधिक वर्षद्वये सप्तद
शा दिनानि वर्द्धंते सावनक्रमेणेति
पूर्वोक्त विष्णुधर्मोत्तरोक्त समान
विषयतास्याति ज्योतिषे दशा
नां फाल्गुनादीनां प्रायो माचस्य
च क्वचित् नपुंसकत्वं भवतियोऽ
स्यकदाचन नपुंसकत्वं मलमास
त्वं तथाचोक्तं असंक्रांतो द्वियो
मासः कदाचिन्निथि वृद्धितः ॥
कालांतरात् समायाति संनपुंसक
इष्यते सांदिसोपि प्रायशो न।
श्रुभः सौम्यो ज्येष्ठाषाढक स्त
था मध्यमो चैत्र वैशाखावधिको
ऽन्यः समिलहृत् सौम्यो मार्ग।
शीर्षः अधिकोऽधिमासः ॥
तदयं संक्षेपः शुक्ल प्रतिपदादि।
दर्शावास्यांतो रविलंघितो मासोम।
लमासः सच माघवादो ज्ञेत्।

सर्गिकः कदाचित्कार्त्तिकादावपि ।
अयं चानिष्टकृत् माघवादिकार्त्तिका
दि षट्कयो रपि नतु तत्र योगे
माघवादावेव तत्रादि षट्कपक्षो
भयमासे नतु तत्र योगपूर्व एव
आश्विनवैशाखयोस्तु लक्षणयोग
परएवमलमासः तद्भिन्नस्तु भानुलं
घितः मलमासेऽत्राषाढादेर्द्वित्वे भा
नुलंघिते त्वनेनदितिविस्तरः म
लमासे निषिद्धानि यथा काठक
गृह्ये चूडां मौञ्जी बंधनंच अग्न्या
धेयं महालयं राजाभिषेकं का
म्यंच न कुर्य्यादधिमासके चूडां
मौञ्जीबंधनंच अग्न्याधेयं महाल
यं राजाभिषेकंकाम्यंच न कुर्य्यात्
नुलंघिते महालयं कन्यार्कश्राद्धं
भीमपराक्रमेपि अधिमासे दिन
पाते भगुषिरवौ भानुलंघिते मा
सि चक्रिणिस्वपे कुर्य्यान्नो मांगल्यं
विवाहंच दिनपाते दिनक्षये ।
अधिमासे विवाहं यात्रांचूडां न
चोपनयनादि कुर्य्यात्सावकाशं
मांगल्यंन त्वविशेषज्ञो इति
अत्र विवाहादिकीर्त्तनं निरवकाश
त्वेपि निषेधार्थं अन्यथा सावका।
शा मित्यनेनैव सिद्धेः सावकाशंच
संभवत्कालानां कर्मअनो निरव

काशस्या नन्यगतिकस्यप्रतिप्रसवो
ऽप्यांस्तवितं तथाच मलमासापि।
कारे काठकगृह्ये कालेऽनन्यगतिं
नित्यां कुर्य्यान्नैमित्तिकीं क्रियां।
इति मलमासतत्त्वं अपिच अ
ग्न्याधानं प्रतिष्ठांचयज्ञदान व्रता
नि च देवव्रत वृषोत्सर्गचूडाकरण
मेखलाः मांगल्यमभिषेकंच मल
मासे विवर्जयेत् इतिगारुडे १२९
अध्यायः अथ मल मास
कर्त्तव्य व्रतादि वाल्मीकस्मृत मा
षाढ्यशुक्लेवेन विहितं तदप्यारब्ध
व्रतपणादि मलमासेपिकर्त्तव्यं श्रा
द्धादि प्रतिदिन कर्त्तव्यत्वेन नि
रवकाशत्त्वात् षष्टा तु दिवसैर्मासः
कथितो वादरायणैः इतिज्यो।
तिःशास्त्रेपितामहेन एकमासत्वा
भिधानात् यत्र संवत्सरं त्वयःपूर्णि
मेक भक्तेन तिष्ठति इत्यादौ।
माघादवलिखितसंवत्सरव्रतेन मा
रब्धं तन्मलमासे ऽपि कर्त्तव्यं।
कृतिवित्रयोदशमासाः संवत्सर इति
श्रुतेः यत्र प्रतिमासविहितं तमा
चातुर्मास्येन तन्मलमासेऽपिकर्त्त
व्यं तथावरं मालतीयाव्रते शिवा
रहस्यं मासमलिम्लुचेप्येवं यजे
द्देवी सर्पांकरां किंतु नोया ॥

पनं कार्य्य मित्याहभगवान् शिवः
उद्यापनं प्रतिष्ठा व्रतारम्भो ॥
ऽपिनिषिद्धः पूर्वोक्त काश्यप व
चनात् ज्येष्ठादिमासविशेष विहि
ते सावित्रीव्रतादिकंतुसावकाशा।
त्वान्मलमासे नकार्य्यं किंतुप्रकृतए
वज्येष्ठादौ कर्त्तव्यमिति वृहस्पतिः
नित्यनैमित्तिके कुर्य्यात् प्रयतः
सन्मलिम्लुचे तीर्थस्नानं गजच्छा।
यांप्रेतश्राद्धं तथैवच नित्यमहरहः
पुरस्कार विहितं स्नान संध्या पंच
महायज्ञादि काम्यमपि तथा विधं
संकल्पितं यत्किंचिद्भव्यदान शिव
पूजादि व्यक्तं भविष्य कुर्य्यात्।
प्रात्याहिकं कर्म प्रयतः सन् मलि
म्लुचे नैमित्तिकंचकुर्वीत सावका
शं न यद्भवेत् कालमाधवीये ।
मत्स्यपुराणं वर्षवाहरहः श्राद्धं
दानेच प्रतिवासरं गो भूमि ल
हिरण्यानां मासेपि स्यान्मलिम्लुचे
काठकगृह्यपरिशिष्टं प्रवृत्तं म
लमासात् प्राक् यत्कर्मनेसमापि
तं आगतेमलमासेपि तत्समा।
प्यमसंशयं ब्रह्मसिद्धांते श्राद्धे
कर्म यत् किंचित्तत्कार्य्यं हि
मलिम्लुचे नैमित्तिकं मास संवत्
सरदिवसादि विशेष नियमस्पृष्टा

वशप कर्त्तव्यकादाचित्कनिमित्तेन
पन्ने । जातकर्माद्यपि मल ।
मासकार्य्यं जातकर्मान्यकर्माणिनव
श्राद्धं तथैवच मघात्रयोदशी श्रा
द्धश्राद्धान्यपिच षोडश चंद्रसूर्य्य।
ग्रहे स्नानदान श्राद्धक्रियादिकं।
कार्य्यंतन्मलमासेपि नित्य नैमि।
त्तिकंतथा स्मृतिः श्राद्ध जातक।
नामानि येच संस्कार माश्रिताः म
लिम्लुचे ऽपिकर्त्तव्याः काम्या इष्टा
न्ववर्जयेत् संस्कारा अन्नप्राशन ।
निष्क्रमणादयः इति माधवाचार्य्यः
अन्त्यकर्माणि वहन दहनोदकदान
पिंडदानास्थि संचयादीनि नवश्रा
द्धं चतुर्थे पंचमे चैवनवमैकाद ।
शेतथा यदत्रदीयतेजंतो स्तत्तवा।
श्राद्ध मुच्यते इतियमोक्तं अत्र।
चतुर्थाद्यादि ग्रहणंमरणा दिनावधी
ति बालग्रह भूतग्रह तथाधिप्र
बल श्रुतु इः सहरोगाभिवाङ्गत इः
स्वप्न ग्रहदोष्यादि निमित्तं शांति
कर्माणि मलमासेपि कर्त्तव्यं वि।
स्तना शांति स्वस्त्ययने दैवोपघाता
न् शमयेत् परवेक्षोपघातानाम्रइत्यु
क्तं इति मलमासतत्त्वं ॥
मलयः पुं स्वनामख्यातपर्वत् तत्प
र्य्यायः आषाढः २ दक्षिणाचलः



१ इति हेमचंद्रः चंदनाद्रिः ४
मलयाचलः ५ इतिशब्दरत्नावली
शैलांगं देशविशेषः ॥ आ
रामः इति मेदिनी चंदनवनं
इति धरणिः अष्टादशोपद्वीपो ।
नगेन द्वीपविशेषः इतिशब्दमा
ला ऋषभदेवस्यशतपुत्रांतर्गतपं
चम पुत्रः इतिश्रीभागवते ५ स्कं
धे ४ अध्यायः ॥
मलयगंधिनी स्त्री ऊमासखीविशे
षः इति शब्दमाला ॥
मलयजं पुं क्ली चंदनं इत्यमरः
राहौ पुं यथा राहुं मलयजं
मूर्द्धपेठी नं द्वादशांगुलं कुसु
माम्बरं सिंहासनं ध्यात्वानया
क्रमेण इतिग्रहयज्ञतत्त्वं ।
मलया स्त्री त्रिवृता इति मेदिनी
मलयाचलः पुं मलयपर्वतः इ
ति शब्दरत्नावली ॥
मलयानिलः पुं वसंतकालीनवा
युः तत्पर्य्यायः वासंतः २ इति
त्रिकांडशेषः ॥
मलयूः स्त्री मलयूः इतिशब्दर
त्नावली ॥
मलयोद्भवं क्ली चंदनं इति राज
निर्घंटः ॥
मलविनाशिनी स्त्री शंखपुष्पी इति


राजनिर्घंटः ॥
मलहंता पुं शाल्मलीकंदः इति
राजनिर्घंटः ॥
मला स्त्री भूम्यामलकी इति शब्द
चंद्रिका ॥
मलाकर्षी पुं हडिकः हाडिइति
भाषा इतिशब्दमाला ॥
मलाका स्त्री कामिनी हस्तिनी
दूती इतिसंक्षिप्तसारोणादि ।
वृत्तिः ॥
मलापकर्षणं क्ली पापमोचनं ।
मलहरीकरणं इतिकेचित् ।
मलापहा स्त्री नदीविशेषः यथा
मलापहा भीमरथीच वेदणाया ।
श्याच कलाजलसाम्पगा शुणाः म
लापहा चदृगयोस्तथापिपृथ्वं ल
घुस्वाडनरं स्वकांतिर इतिराज
निर्घंटः ।
मलावहं क्ली नवविधपापांतर्गत
पापविशेषः यथा कृमि कीट
वयो हत्यामद्यानुगत भोजनं ।
फलैधः कुसुमस्तेय मधैर्य्यंच म
लावहं इतिमानवे ११ अध्यायः ।
मलारिः पुं सर्वक्षारः इति राज
निर्घंटः ॥
मलिनं त्रि मलयुक्तवस्त्र तत्प ।
र्य्यायः मलीमसं २ कच्चरं ३ मलदूषितं

४ इत्यमरः दूषितं कृत्स्नं इति
मेदिनी नित्यनैमित्तिक क्रिया
त्यागी इतिमार्कंडेयपुराणं ॥
मलिनं क्ली चोलं इतिशब्दचंद्रि
का दोषः इति हेमचंद्रः ॥
टंकणः इति राजनिर्घंटः ॥
मलिनमुखः पुं अग्निः गोलांगूलः
इति मेदिनी । प्रेतः ॥ इति
हेमचंद्रः ॥
मलिनमुखः त्रि क्रूरः खलः इति
मेदिनीहेमचंद्रश्च म्लानवदनश्च
मलिनाम्बु क्ली मसी इतिहेमचंद्रः
मलिनास्यः त्रि खलः इति शब्द
माला ॥
मलिनी स्त्री रजस्वलानारी इत्य
मरः ॥
मलिम्लुचः पुं मलमासः यथाना
मतिक्रम्य तु रविं यदागच्छेत्कथंच
न आद्योमलिम्लुचोज्ञेयो द्वितीयः
प्रकृतः स्मृतः यदानं दर्शांत मा
समतिक्रम्यतत्पूर्वं मासांत्यक्षणा
द्गति राशिस्थः सन् सूर्यो ऽति
वाह्य गच्छेत् मासांतरे राश्यंतर
संयोगं गच्छेत् तदा आद्यो ॥
ऽतिक्रांतमासो मलिम्लुचो ज्ञेयः
मली सन् म्लोचति गच्छतीतिम
लिम्लुचः द्वितीयस्तुप्रकृतःशुद्धःक

माहत्वात् इतिमलमासतत्त्वं ।
अग्निः चोरः इति मेदिनी ।
वायुः इति शब्दमाला ॥
मलिष्ठा स्त्री रजस्वलानारी इति
त्रिकांडशेषः ॥
मलीमसं क्ली लोहं पुष्पकासीसं
इति मेदिनी ॥
मलीमसः त्रि मलिनः इत्यमरः
मल्लकः पुं कृमिविशेषः इत्युणा
दिकोषः ॥
मल्ल ड़ धृतौ इतिकविकल्पद्रुमः
ड़मल्लते इति दुर्गादासः ॥
मल्लः पुं बाहुयोधी माल इति
भाषा इत्यमरभरतौ सच ।
ब्रात्यात्क्षत्रियात् सवर्णायां जातः
इतिमानवे १० अध्यायः पात्रे
कपाले मत्स्यभेदः व ।
लीयान् इति मेदिनी वर्णसंकर
जातिविशेषः माला इति भाषा
सच लेटात् तीवर कन्यायां जा
तः इतिब्रह्मवैवर्तेपुराणं तंत्र
वाय्यां कुंदकाराज्जातः इतिप
राशरपद्धतिः देशविशेषः ॥
यथा दशार्णा नवराष्ट्रंच मल्लाः
शाल्वा युगंधराः इतिविराटपर्व
णि १ अध्यायः ॥
मल्लकः पुं दंतः इतिहेमचंद्रः ।

मल्लकः पुं स्त्री दीपाधारः नारिकेलफलावयवजपात्रविशेषः माला इति भाषा स्त्रियां मल्लिका इत्यमरभरतौ प्रदीपः इति मथुरेशः ॥
मल्लजं क्ली मरिचं इति जटाधरः ॥
मल्लतूर्य्यं क्ली वाद्यविशेषः तत्पर्य्यायः महास्वनः २ इति त्रिकाण्डशेषः ॥
मल्लनागः पुं वात्स्यायनमुनिः । अभ्रमातङ्गः इति मेदिनी लेखहारः इति शब्दरत्नावली कामशास्त्रविशेषः इति धरणिः
मल्लभूः स्त्री मल्लभूमिः इति जटाधरः मल्लभूमिः स्त्री मल्लक्रीडास्थाने तत्पर्य्यायः अक्षवाटः २ रङ्गभूमिः ३ रणस्थली ४ इति शब्दरत्नावली मल्लभूः ५ अक्षपाटः ६ इति जटाधरः देशविशेषश्च ॥
मल्लयात्रा स्त्री मल्लानां युद्धार्थयात्रा तत्पर्य्यायः माल्लवी २ इति हारावली ॥
मल्लयुद्धं क्ली मल्लानां संग्रामः । तत्पर्य्यायः नियुद्धं २ बाहुयुद्धं ३ इति शब्दरत्नावली तत्प्रकारो यथा अथ सप्तदशेन तं मत्स्यं योधयामास मत्स्यराट् बोध्यमानः । स्ततो भीमो दुःखेनैवाकरोन्मतिं नहि शक्नोति विवृते प्रत्याख्यातुं नराधिपं ततः स पुरुषव्याघ्रः शार्दूलशिथिलश्चरन् प्रविवेश महारङ्गं विराटमभिपूजयन् बबन्ध कक्षां कौन्तेयस्ततः संहर्षयन् जनान् ततस्तं वृत्रसङ्काशं भीमो मल्लं समाह्वयत् । जीमूतं नाम तं मल्लं तत्र प्रख्यातविक्रमं तावुभौ सुमहोत्साहौ । उभौ तीव्रपराक्रमौ मत्ताविव महाकायौ वारणौ षष्टिहायनौ ततस्तौ नरशार्दूलौ बाहुयुद्धं समीयतुः वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ आसीत्सुभीमः सम्पातो वज्रपर्वतयोरिव ९ उभौ । परमसंहृष्टौ बलेनातिबलावुभौ अन्योन्यमन्तरं प्रेप्सू परस्परजयैषिणौ उभौ परमसंहृष्टौ मत्ताविव महागजौ कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः ११ सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः जानुभिश्चाश्मनिर्घोषैः शिरोभि

श्चावघट्टनैः तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा बलप्राणेन शूराणां समाजोत्सवसन्निधौ । अरज्यत जनः सर्वः सोत्कृष्टनिनदोत्थितः बलिनोः संयुगे राजन् वृत्रवासवयोरिव प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः आकर्षतामथान्योन्यं जानुभिश्चाभिजघ्नतुः १२ ततः शब्देन महता भर्त्सयन्तौ परस्परं व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ बाहुभिः समसज्जेतामायसैः परिघैरिव चकर्ष दोर्भ्यामुत्पाट्य भीमो मल्लममित्रहा विनदन्तमभिक्रोशन् शार्दूल इव वारणं समुद्यम्य महाबाहुर्भ्रामयामास वीर्यवान् ततो मल्लाश्च मत्स्याश्च विस्मयं चक्रिरे परं भ्रामयित्वा शतगुणं गतसत्त्वमचेतनं प्रत्यपिंषन्महाबाहुर्मल्लं भुवि वृकोदरः १३ तस्मिन् विनिहते मल्ले जीमूते लोकविश्रुते विराटः परमं हर्षमगच्छद्बान्धवैः सह सहर्षात् प्रददौ वित्तं बहुराजा महामनाः इति विराटपर्व्वणि [illegible] अध्यायः ॥ एषां टीका यथा दुःखेन स्वप्रकटनं राजाज्ञालङ्घनं द्वंद्वजेन विवृते लोकसमक्षं शार्दूल शिथिलः सिंहव्याघ्रवच्छिथिलः सावज्ञः स्यात् सिंहेऽपि च शार्दूल इति दर्पणात् कक्षां कच्छं सम्पातः संघर्षः ९ । सुसङ्कटैः कङ्कटः करघर्षणजः किणः कडा इति प्रसिद्धः कृतप्रतिकृतैः परप्रयुक्तप्रतिकृतैः चित्रैर्विचित्रैर्बन्धैरिति शेषः ११ सन्निपातेत्यादि एते मल्लानां शिक्षाविशेषाः सन्निपातैः परस्परसंघाते रवधूतैः देहमुष्टिभुजाघातैः प्रमाथैः पातयित्वा पेषणैः उन्मथनैः अन्तरीते भुजाभ्यां मथनैः क्षेपणैः स्थानात्प्रच्यावनैः । बद्धाङ्गुलिकरो मुष्टिः अधोमुखं स्कन्धयान्तं भ्रामयित्वा तथैव यः तिरस्य शत्रुः सम्भवेद्वराहोद्धूतनिःस्वनः तर्जन्यङ्गुष्ठमध्येन प्रसारितकरो हि यः संप्रहारस्तलाख्यस्तु । संग्रहो वज्रमित्याहुः अर्द्धचन्द्र । तस्य मल्लमुष्टिं वज्रमित्यर्थः प्रसृताङ्गुलिहस्तेन प्रसृष्टिः प्रहृतिः स्मृता द्विगुणीकृत बाहुर्यस्तदीयाग्रे यथाबलं प्रहारः सशलाकास्यात् पादोद्धूतः पदाहतेः जानुभिश्चाश्मनिर्घोषः पाषाणघोषसदृशध्वनिभिः करणैर्यान्यवक्रतानि



नैः वल पाणेन वलेनात्कर्षणं
सोत्कृष्ट निनदो ध्वनिः उत्त क्रो
शान्तविनदोप्यानसहितः प्रकर्ष
णं बाहुसंमुखानयनं प्रकृष्टाकर्ष
णं नदोवाकर्षणमीषत्संमुखानय
नं अभ्याकर्षः समंततःकर्षणं वि
कर्षणंपश्चात् नयनंतदेवविपरीत
कर्षणमुच्यते उपसर्गभेदादर्थभे।
दोऽपीति १२ शानगुणं शान
वारं १२ इत्यर्जुनमिश्रकृत भा।
रतार्थदीपिका ॥

मल्ला स्त्री नारी पत्रवली मल्लि
का इतिशब्दरत्नावली ॥

मल्लारः पुं रागविशेषः सत्व ष
सां रागाणां मध्ये द्वितीयः यथा
आदौ मालव रागेंद्र स्ततो म
ल्लार संज्ञितः श्रीराग स्तस्य प
श्चाद्वे वसंत स्तदनंतरं हिंदोल
श्चाथ कर्णाट एते रागाः प्रकीर्ति
ताः अस्यषड्रागिण्यो यथा
वेलावली पूरवी च कानडा माधवी
तथा कोडा केदारिका चैव मल्ला
रस्य प्रिया इमाः अस्य गान स
मयः मेघ मल्लार रागस्य गानं
वर्षासु सर्वदा अस्यस्वरूपं यथा
शंखावदातं पलितं दधानः प्रल
म्बकर्णः कुसुदेन्दुवर्णः कौपीनवा
साः सखि हारवारी मल्लार रागः
प्रविशानमूर्तिः इतिसंगीत दा
मोदरः ॥

मल्लारी स्त्री वसंतरागस्यरागिणी
यथा आंदोलिता च देशाख्यालो
ला प्रथममंजरी मल्लारी चे
ति रागिण्यो वसंतस्य सदानुगाः
इति संगीतदामोदरः मेघरा
गस्यरागिणी इति हला युधः

मल्लिः पुं चतुर्विंशतितमार्हतांम
ध्ये कुतविशजनः इति हेम
चंद्रः ॥

मल्लिः स्त्री मल्लिका इतिशब्दर
त्नावली ॥

मल्लिकः पुं मलिनचंचुचरणयु
क्तहंसः मलिनैः किंचिद्धूसरवर्णैरा
लोहितैश्चंचुचरणैरुपलक्षितः श्
क्लहंसः इत्यमरभरतौ तृणां
शुपाधिविशेषश्च ॥

मल्लिका स्त्री स्वनामख्यातपुष्पवृ
क्षः बेलफूल इतिभाषा तत्पर्या
यः तृणशून्यं १ भूपदी २ शीत
भीरुः ३ इत्यमरः तृणशून्या ४
शीतभीरुः ५ इतिभरतः भद्रव
ल्ली ६ गौरी ७ वनचंद्रिका ८ प्रिया
९ सौम्या १० नारीष्टा ११ गिरिजा १२
सिता १३ मल्ली १४ मदयंती १५


चंद्रिका १७ मोदिनी १८ अस्य
गुणाः कटुत्वं तिक्तत्वं चक्षुष्यत्वं
मुखपाककुष्ठ विस्फोट कंडूतिवि
षव्रणनाशित्वंच इतिराजनिर्घंटः
कफनाशित्वं इतिराजवल्लभः।
उष्णत्वं लघुत्वं वृष्यत्वं वात
पित्तास्य दृग्व्याध्यरुचि नाशित्वंच
इति भावप्रकाशः अस्या उत्प
त्तिर्यथा विचरंतं तदा भूयो म
हेशं कुसुमायुधः आराध्यित्वा
ग्रतो धन्वी संतापयितुमुद्यतः
ततस्तमग्रतो दृष्ट्वा क्रोधाध्मान
दृग्घरः स्मरमालोकयामास
शिखाग्रात्पदनांतिकं आलोकि
त स्त्रिनेत्रेण मदनोद्युतिमानपि
प्रादह्यत तदा व्रह्मन् पादादा र
भ्यकक्षवत् प्रदह्यमानो वरणौ
दृष्ट्वासौ कुसुमायुधः उत्ससर्ज्ज
तुः श्रेष्ठं तज्जगामाथ पंचधा।
यदासीन्मुष्टिवंधं तद्रुक्मपृष्टं।
महाप्रभं सचकस्तनरुजातः स
गंधाढ्यो गुणाकृतिः नाहस्थाने
शुभाकारं यदासीद्वज्रभूषितं तज्जा
तं केशवारण्ये वकुलं नामतो न
गैः याच कोटी शुभा त्वासीदि ॥
द्रनील विभूषिता जाता सा पाट
ला रम्या भृंगराज विभूषिता ना
होपरि तथा मुष्टौ स्थानं चंद्रमणि
प्रभं पंचगुल्मा भवज्जाती शशां
ककिरणोज्ज्वला ऊर्द्धं मुष्ट्याश्रयः
कोट्याः स्थानं विद्रुम भूषितं।
तस्माद्बहुपुटा मल्ली संजाताविवि
धामने इतिवामनपुराणे ६ अ
ध्यायः ॥ मत्स्यविशेषः।
मृत्पात्रभेदः इति मेदिनी।
पानपात्रं इति हेमचंद्रः।

मल्लिकाख्यः पुं मलिनचंचुचरण
युक्तहंसः इत्यमरटीकायां सिता
हंसामलिनैः किंचिद्धूसरवर्णै रा
लोहितैश्चंचुचरणैर्लक्षितामल्लि
काख्या मल्लिकनामानः मल मल्ल
इ. हंसो लोनः नाम्नीति ङकः कल्लि
को हंसभेदेस्यात्तृणशून्येचकल्लि
का इति रुद्रः शुक्लांगत्वान्मल्लिका
पुष्पमिव आख्याति यषांते मल्लिका
ख्या इतिस्वामी ॥ इतिभरतः

मल्लिकाख्या स्त्री त्रिपुरमालीपुष्पं
तत्पर्यायः मोदिनी १ वटपत्रा।
२ मोहनाथ इतिरत्नमाला ॥

मल्लिकागंधं क्ली मंगल्यागुरु इ
ति राजनिर्घंटः ॥

मल्लिकापुष्पः पुं कुटजवृक्षः इति
राजनिर्घंटः करुणावृक्षः करुणा
लेबु इति भाषा इति हेमचंद्रः




स्वनामख्यात पुष्पवृक्षश्च ॥
मल्लिकाक्षः पुं मलिनचंचुचरणो
शुक्लहंसः इति हेमचंद्रः शुक्लच
रणोपेतेन चल्लहंस शुक्लहयः इति
हलायुधः ॥
मल्लिगंधि क्ली अगुरु इतिश
ब्दचंद्रिका ॥
मल्लिपत्रं क्ली छत्राकः इति त्रि
कांडशेषः ॥
मल्ली स्त्री मल्लिका इतिराजनिर्घ
ण्टः शब्दरत्नावलीच ॥
मलीकरः त्रि चौरः इति शब्द
रत्नावली ॥
मल्लुः पुं भाल्लूकः इति शब्द
चंद्रिका ॥
मव बंधे इति कविकल्पद्रुमः
मवोबंधनं मवतिचौरं लोकः
इति दुर्गादासः ॥
मवितः त्रि बद्धः इत्यमरटीकायां
स्वामी ॥
मव्य बंधे इतिकविकल्पद्रुमः ॥
मव्यति चौरं राजा यद्यपितेऽप्य
मित्यके इतिदुर्गादासः ॥
मश ध्वनौ कोपे इति कवि
कल्पद्रुमः मशतिमशकः इति
दुर्गादासः ॥
मशकः पुं कीटविशेषः मशाइति

भाषा तत्पर्य्यायः वज्रतुंडः २
सूच्यास्यः ३ क्षुद्रमक्षिकः ४ रात्रि
जागरदः ५ इतिराजनिर्घण्टः ॥
तन्नाशकधूपो यथा त्रिफलार्जुन
पुष्पाणि भल्लातकशिरीषकं ला
क्षा सर्जरसश्चैव विडंगश्चैव गुग्गु
लुः धूने धूपे मक्षिकाणां म
शकानां विनाशनं इतिगारुडे
१८९ अध्यायः चर्मभेदः सत्वस
नामख्यानचर्मनिर्मितस्नेहादिपा
त्रं रोगविशेषः मशा इति हि
न्दी आंचिल इति वंगभाषा इति
शब्दरत्नावली मशकरोगमाह
अवेदनं स्थिरंचैव यस्य गात्रे
प्रदृश्यते माषवत्कृष्णमुत्सन्नं ।
मलिनं मशकं दिशेत् स्थिरं ।
अचलं अस्यचिकित्सा यथा
चर्मकीलं जतुमणिमशकांस्तिल
कालकान् उत्कृत्य शस्त्रेण द
हेत् क्षाराग्निभ्यां मशेषतः ।
इतिभावप्रकाशः अपिच लशु
नानांत्र दूर्गास्य वर्षीमशकनाशनः
इतिगारुडे १७५ अध्यायः ॥
मशकी पुं उडुम्बरवृक्षः इतिहे
मचंद्रः ॥
मशहरी स्त्री मशकनिवारकपाव
णविशेषः मशारी इतिभाषा तत

पर्य्यायः चतुष्की २ इतिजटाधरः
मष्णः पुं ठक्कुरः इतिशब्दमाला
मथ वधे इतिकविकल्पद्रुमः ।
मषति इति दुर्गादासः ॥
मषिकूपी स्त्री मस्याधारः इति
मषिधानं क्ली हेमचंद्रः ॥
मषीलेख्यदलः पुं श्रीतालवृक्षः
इति राजनिर्घण्टः ॥
मस इर यई परिमाणे परिणा
मे इतिकविकल्पद्रुमः ॥
इर अमसत् अमासीत् अस्मात्
पुषादित्वान्नित्यं ङः इत्यन्ये य
मस्यति धान्यं गृही परिमाती
त्यर्थः ई मंतः परिमाणं कस्य
चिद्वयोधात् इतिदुर्गादासः
मसनं क्ली सोमराजीवृक्षः इति
शब्दचंद्रिका ॥
मसरा स्त्री मसूरः इतिजटाधरः
मसारः पुं इंद्रनीलमणिः इति
मसारकः शब्दरत्नावली ॥
मसिः स्त्री पुं लिपिप्रयोजना
लेखनद्रव्यं इत्यमरटीकायां भ
रतः तत्पर्य्यायः मसिजलं २
पत्राञ्जनं ३ इतित्रिकांडशेषः ॥
मेला ४ काली ५ अंजनं ६ ।
मसी इति शब्दरत्नावली रज
नी ८ इतिस्वामी मलिनाम्बु ९

मशी १० इतिहेमचंद्रः शेफा ।
लिकावृंतं इतिरुद्रः शब्दरत्ना ।
वलीच ॥
मसिका स्त्री शेफालिका इतिश
ब्दरत्नावली मल्लिका इतिग्रंथांत
रेपाठः ॥
मसिधानं क्ली मस्याधारः इति
शब्दरत्नावली ॥
मसिधानी स्त्री मस्याधारः दोया
ति इति भाषा तत्पर्य्यायः मसि
मणिः २ मेलांधुः ३ वर्णकूपिका
मेलानंदा ५ मेलाम्बु ६ मसिधानं ७
इतिशब्दरत्नावली मसिकूपी ८
इति हेमचंद्रः मसिकूपिका ९ ।
इतिजटाधरः ॥
मसिनं क्ली सपिंडकं इत्युणादि
कोषः ॥
मसिपण्यः पुं लेखकः इति त्रि
कांडशेषः ॥
मसिप्रसूः स्त्री मस्याधारः इति
हारावली लेखनी इतिकेचित्
मसिमणिः स्त्री मस्याधारः इति
शब्दरत्नावली ॥
मसिवर्द्धनं क्ली रसगंधः इति
कांडशेषः ॥
मसी स्त्री काली सेफालिकावृ
न्ते इतिशब्दरत्नावली ॥



मसीजलं क्ली मसी काली इति त्रिकाण्डशेषः ॥

मसीधानी स्त्री मस्याधारः इति त्रिकाण्डशेषः ॥

मसी स्त्री स्वनामख्यातशस्यं यथा मसीनाचानसी विज्ञाल्लमो मामालिकामिता इति शब्दचन्द्रिका

मसरः पुं मसूरकलायः इति त्रिकाण्डशेषः ॥

मसरा स्त्री वेणा ब्रीहिप्रभेदः इति मेदिनी ॥


मसूरः पुं ब्रीहिभेदः मसूरी । कलाइ इति भाषा तत्पर्य्यायः मंगल्यकः २ इन्दुमरः मसूरः ३ ब्रीहिकाञ्चनः ४ इति त्रिकाण्डशेषः मसूरा ५ मसूरा ६ इति मेदिनी रागदालिः ७ मंगल्यः ८ पृथुबीजकः ९ सूरः १० कल्याणबीजः ११ गुडबीजः १२ मसूरकः १३ इति राजनिर्घण्टः मंगल्या १४ मसूरिका १५ इति भावप्रकाशः अस्य गुणाः मधुरत्वं शीतलत्वं । संग्राहित्वं कफपित्तनाशित्वं । वातामयकरत्वं मूत्रकृच्छ्रहरत्वं लघुत्वञ्च इति राजनिर्घण्टः अस्र हरत्वं रूक्षत्वं ज्वरनाशित्वञ्च इति भावप्रकाशः तस्य यूषगुणाः संग्राहित्वं स्वादुपाकित्वं प्रमेहपित्तश्लेष्मज्वरातीसारनाशित्वञ्च इति राजनिर्घण्टः ॥

मसूरकः पुं उपबर्हविशेषः गोबालिश इति भाषा तत्पर्य्यायः चतुरः २ चातुरः ३ अंगेरुः ४ वकगण्डुः ५ इति शब्दरत्नावली ।

मसूरविदला स्त्री कृष्णत्रिवृत् इत्यमरः श्यामलता इति रत्नमाला ।

मसूरा स्त्री वेश्या मसूरकलायः इति मेदिनी ॥

मसूरिका स्त्री कुट्टनी इति शब्दमाला वसन्तरोगः तत्पर्य्यायः पापरोगः २ रक्तवटी ३ मसूरी ४ इति शब्दरत्नावली अथ मसूरिकाधिकारः तत्र मसूरिकाविप्रकृष्टं निदानपूर्व्विकां संप्राप्तिमाह कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः क्रूरग्रहेक्षणाच्चापि देशे दोषाः समुद्धताः जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन संगताः मसूराकृतिसंस्थानाः । पिडकाः स्युर्मसूरिकाः तासे । यवत्ताः विरुद्धाध्यशनाशनैः । कट्वादि विरुद्धान्तानामशनैः अध्य च अध्यशनाशनं अधिमशनं । अध्यशनं दुष्टनिष्पावशाकाद्यैः दुष्टैर्निष्पावशाकमाषशाल्मलिशालकादिभिः प्रदुष्टपवनोदकैः सविषकुसुमादिसंसर्गात् क्रूरग्रहेक्षणाच्चापि देशे क्रूरग्रहाः राहुशनैश्चरादयस्तेषामीक्षणाद्दृष्टेः यस्मिन् देशे क्रूरग्रहदृष्टिस्तत्रापि मसूरिकोत्पत्तिरित्यर्थः मसूराकृतिसंस्थाना मसूरस्येव आकृतिस्तद्वत्संस्थानमाकृतिर्यासां ताः अथ पूर्व्वरूपमाह तासां । पूर्व्वं ज्वरः कण्डूर्गात्रभंगोऽरतिः । भ्रमः त्वचि शोफः सवैवर्ण्यो नेत्ररागस्तथैव च ॥ वातजामाह । स्फोटाः कृष्णारुणा रूक्षास्तीव्रवेदनयान्विताः कठिनाश्चिरपाकाश्च भवन्त्यनिलसंभवाः ॥ पैत्तिकामाह संध्यस्थिपर्व्वणां भेदः कासः कम्पोऽरतिर्भ्रमः शोषस्तालोष्ठ । जिह्वानां तृष्णा चारुचिसंयुता ॥ रक्ताः पीताः सिताः स्फोटाः सदाहास्तीव्रवेदनाः मृदवश्चिरपाकाश्च पित्तकोपसमुद्भवाः ॥ रक्तजामाह विड्भेदश्चाङ्गमर्दश्च दाहः । तृष्णाऽरुचिस्तथा मुखपाकोऽतितीव्राकश्च ज्वरस्तीव्रः सरारुणाः रक्तजायां भवन्त्यत्र विकाराः पित्तलक्षणाः ॥ अथ कफजामाह श्वेताः स्निग्धा भृशं स्थूलाः कण्डूरा मन्दवेदनाः मसूरिकाः कफोद्भूताश्चिरपाकाः प्रकीर्त्तिताः ॥ सान्निपातिकीमाह नीलाश्चिपिटविस्तीर्णा मध्ये निम्ना महारुजः पूतिस्रावाश्चिरं पाकाः प्रभूताः सर्व्वदोषजाः समथानगतामाह मसूरिका त्वचं पामास्तोय बुद्बुदसन्निभाः स्वल्पदोषाः प्रयत्नेन भिन्ना स्तोयं स्रवन्ति च त्वचं शामाः तत्कृत्स्नात्र रसउच्यते रसाश्रयत्वात् ॥ रक्तस्थामाह रक्तस्था लोहिताकाराः शीघ्रपाकास्तनुत्वचः साध्या नात्यर्थं दुष्टास्तु भिन्ना रक्तं स्रवन्ति च साध्या रक्तस्था इत्यर्थः नात्यर्थं दुष्टास्तु अत्यर्थदुष्टशोणिताः पुन ने साध्याः किन्तु कष्टसाध्याः ॥ मांसस्थामाह मांसस्थाः कठिनाः स्निग्धाश्चिरपाका घनत्वचः गात्रशूलतृषाकण्डूमूर्च्छादाहतृषान्विताः मेदस्थामाह मेदोजा मण्डलाकाराः मृदवः किञ्चिदुन्नताः घोरज्वरपरीताश्च स्थूलाः स्निग्धाः सवेदनाः संमोहारतिसंतापाः कश्चिदाभ्यो विनिस्तरेत् ॥ अस्थिमज्जागतामाह अस्थिगात्र समा दु




ताश्चिपिटाः किञ्चिदुन्नताः मज्ज
स्था भृशसम्मोहवेदनारतिसंयु
ताः भ्रमरेणेव विद्धानि कुर्व्वन्त्यस्थी
नि सर्व्वतः छिंदंति मर्म्मधामानि प्रा
णानाशु हरंति ताः गात्रसमाः गात्र
तुल्यवर्णाः चिपिटाः चिपिटा का
राः मज्जाग्रहणेनास्थ्यपि ग्रहणं त
दाधारत्वात् अतएवाग्रे भ्रमरेणे
व विद्धानि कुर्व्वन्त्यस्थीनि सर्व्वत इति
मर्म्मधामानि मर्म्मस्थानि ॥ शुक्र
गतामाह पक्वाभाः पिडकाः स्नि
ग्धाः सूक्ष्माश्चात्यर्थवेदनाः स्तैमि
त्यारतिसम्मोहदाहोन्मादसम
न्विताः शुक्रगायां मसूर्य्यां लक्ष
णानि भवंति हि निर्द्दिष्टं केवलं
चिह्नं जीवनं तु न दृश्यते पक्वाभाः
पक्वाकाराः न तु पक्वाः सूक्ष्माः
कोमलाः निर्द्दिष्टं केवलं चिह्न
न तस्याश्चिकित्सा शुक्रायतो जीव
नं न दृश्यते सप्तम्येता दोषदृ
तं विना न भवंति दोषसंतरेण
रसादि दुष्टेरभावादित्यत आह
दोषमिश्रास्तु सप्तैता दृष्ट्वा दोष
लक्षणैः चर्म्मजामाह कंठरो
धारुची तंद्राप्रलापारति संयुताः
दुश्चिकित्स्याः समुद्दिष्टाः पिडका
श्चर्म्मसंज्ञिताः ॥ रोमांतिका

माह रोमकूपोन्नति समारागि
ण्यः कफपित्तजाः कासारोचक
संयुक्ता रोमाञ्च ज्वरपूर्व्विकाः ॥
साध्याः माह त्वग्गता रक्तगाश्चैव
पित्तजाः श्लेष्मजास्तथा श्लेष्मपित्त
कृताश्चैव सुखसाध्या मसूरिकाः
एता विनापि क्रियया प्रशाम्यन्ति श
रीरिणां त्वग्गता रक्तगताः ॥
कष्टसाध्यतमाः माह वातजा वात
पित्तोत्था वातश्लेष्मकृतास्तथा ।
कष्टसाध्यतमास्तस्माद्यत्नादेता उपा
चरेत् असाध्याः माह । असा
ध्याः सन्निपातोत्थास्तासां व
क्ष्यामि लक्षणं प्रवालसदृशाः का
श्चित् काश्चिज्जम्बुफलोपमाः लो
हजालसमाः काश्चिदतसीफल
सन्निभाः आसां बहुविधा वर्णा जाये
न्ते दोषभेदतः प्रवालसदृशा
इत्यादि आसां प्रवालजम्बुफल
लोहजालातसीफलसादृश्यं व
र्णेन अनुक्तवर्णसंग्रहार्थमाह
आसां बहुविधा वर्णा इति ॥
अपरा अप्यसाध्याः माह कासो
हिक्काप्रमेहश्च ज्वरस्तीव्रः सुदारु
णः प्रलापारतिमूर्च्छाश्च तृष्णा दा
होति घूर्णता दाहस्थाने दौर्गंध्य
इतिपाठः मुखेन प्रस्रवेद्रक्तं तथा


घ्राणेन चक्षुषा कण्ठोद्घुर्घुरकं कृत्वा
श्वसित्यत्यर्थदारुणं मसूरिकाभि ।
भूतस्य यस्यैतानि भिषग्वरः लक्ष
णानि दृश्यंते न दद्यात्तत्र भेषजं
मसूरिकास्वरिष्टमाह ॥ मसू
रिकाभिभूतो यो भृशं घ्राणेन नि
श्वसेत् स भृशं त्यजति प्राणान्
तृष्णार्त्तो वायुदूषितः वायुदूषितः
अपतानकादि वातव्याधि दूषितः
मसूरिका हैत्वकं शोथवि ।
शोषमाह मसूरिकांते शोथः स्यात्
कूर्परे मणिबंधके तथांसफलके
वापि दुश्चिकित्स्यः सुदारुणः दु
श्चिकित्स्यः कष्टसाध्यः दुःशब्दोऽत्र
निषेधे तेनासाध्य इत्येके का
श्चिद्विनापि यत्नेन सिध्यंत्याशु म
सूरिकाः दृष्टाः कृच्छ्रतराः काश्चि
त्काश्चित्सिध्यंति वा न वा काश्चित्ते
व न सिध्यंति साध्यमानाः प्रयत्नतः
अथ मसूरिकायाश्चिकित्सा म
सूरिकायां कुष्ठोक्ता लेपनादि ।
क्रियाहिता पित्तश्लेष्मविसर्पोक्ता
क्रियाचात्र प्रशस्यते स्नत चंदन
कल्केहि हिलमोचीभवरसं पि
वेन्मसूरिकारम्भे नवा केवलं र
सं हिलमोचिका शाकविशेषः
हुरहुर इति लोके हेपचम्लेसा

रास्नाच धात्रीरं दुरालभा सा
मृतं धान्यकं मुस्तं जयेद्दाह मसू
रिकां मंजिष्ठा बहुपाल्मत्त शि
रीषोडुम्बर त्वचः वातत्रायां मसू
र्य्यां स्यात्प्रलेपः सहतो हितः
बहुपाहटः गुडूची मधुकं द्राक्षा
मोरटं दाडिमैः सह पाककाले
प्रदातव्यं भेषजं गुड संयुतं ।
तेन कुर्य्यात्ततो वायुं पाकं यांति
मसूरिकाः मसूरिकस्तु भुंजीत शा
लीन्मुक्तान्मसूरिकान् रसं मधु
रमेवाद्यात् सैंधवं चाल्प मात्रकं ।
पटोलमूलक्वथितं मोरटं सरसं
तथा पटोलमूलं क्वथितं मिम्बत्र
पटोलं क्वथितं चैवेति वा पाठः
आदावेव मसूर्य्यान्तु पित्तजायां प्र
योजयेत् निम्बपर्पटकः पाठा प
टोल चंदन हृयं उशीरं कटुका
धात्री तथा वासा दुरालभा पच्च
पानं शुभं शीतमुत्तमं शर्करान्वि
तं मसूर्य्यां पित्तजायांतु प्रयो
क्तव्यं विजानता दाहज्वरे विस
र्पे च व्रणे पित्तादिकेपि च मसू
र्य्यां रक्तजा नाशं यांति शोणित
मोक्षणैः वासामुस्तक भूनिम्ब
त्रिफलेन्द्रयवासकं पटोलारिष्टकं
वापिक्वाथयित्वा समाक्षिकं पि



वेनेनप्रशाम्यंतिमसूर्यः कफसम्भ
वाः इंद्रः इंद्रयवः ॥ शिरीषो
डुम्बर त्वग्भ्यां खदिरादिहिजे जैलेः
कफोत्थासु मसूरीषु लेपः पित्तो
त्थितासु च निम्ब पर्पटकः पा
ठा पटोलः कटु रोहिणी चंदने
हे उशीरं च धात्रीवासाडूरालभा
एष निम्बादिकः क्वाथः पीतः शर्क
रयान्वितः मसूरी सर्वजां हंति ज्वर
वीसर्पसंयुतां ॥ उत्थिता प्र
विशाघाचतांप्रनवीरप्यंतां नयेत्
कांचनारत्वचः क्वाथस्ताप्यचूर्णावचू
र्णितः तार्क्ष्यसुवर्णमाक्षिकं धा
त्रीफलं समधुकं क्वथितं मधुसंयु
तं ग्लक्ष्णकंठव्रणोज्ज्ञाने गंडूषार्थे प्र
शस्यते श्लेष्मोत्सेकं प्रणं सं
ति गवेधुमधुकाभ्यां गवेधुर्गवे
धुका गवड़्या इति लोके मधुकं
त्रिफलामूर्वा दार्वीत्वक् नीलमुत्प
लं उशीर लोध्र मंजिष्ठा प्रलेपा
च्छोतने क्लिन्नाः नश्यंत्यनेन हग्जा
ता मसूर्यो न भवंति च प्रलेपं च
त्वचो हृदयाहरूवारस्यकल्कैः पं
च वल्कलचूर्णेन क्लेदिनी मवधूनयेत्
भस्मनाकेचिदिच्छंतिकेचिद्गोमय रे
णुना खदिरीपत्रनिर्यासं हरिद्राचू
र्णसंयुतं रोमजज्वरसंयुक्त व्रणा
नाशांतये पिबेत् निर्यासं द्रवं
प्रथमसूरिकाभेदस्य शी ॥
तलाया अधिकारः तत्र शीतलाया
रूपमाह देव्या शीतलाया क्रोता म
सूर्यैव हि शीतला ज्वर पक्वतया
भूताधिष्ठिता विषम ज्वरः सा च
सप्तविधा ख्याता तासां भेदान् प्र
वक्ष्ये ज्वर पूर्वा वृहत् स्फोटैः
शीतला वृहती भवेत् समाह्वा
त्रिः सरत्येषा समाह्वात् पूर्णा प्र
जेत् ततस्त्वनीये समाहे स्फुष्या
तिस्वलति स्वयं तासां मध्ये यदा
काविन्याकं गम्धास्फुटं स्ववेता
न्नावधूनं कुर्याद्दृन गोमयभस्म
ना निम्बसत्पत्र शाखाभि मृत्तिका
मपसारयेत् जलं च शीतलं द
द्यात् ज्वरेऽपि न त द्रापयेत् ।
स्थापयेत् स्थले पूते रम्य रहसि ।
शीतले नाभ्रवि संस्पर्शा तेन न
च नस्यांतिकं व्रजेत् वहवो भि
षजो नात्र भेषजं योजयंति हि
केचित् प्रयोजयंत्येवमतेनेषामथ
द्रवो ये शीतलेन सलिलेन वि
पिष्टमम्यक् चिंचाज बीज सहितां
रजनीं पिबंति तेषां भवंति न
कदाचिदपीह देह पीडावरा जगति
शीतलिका विकाराः मोच ।

थिताः इतिनहीकायां भरतः
व्यासः इति मेदिनी ॥
विषः इति हेमचंद्रः शौंडिकः
इति सिद्धांतकौमुद्यामुणादिवृ
त्तिमाडः पुं वृक्षविशेषः माडवै
नो इति कोकरणोप्रसिद्धः तत्पा
र्य्यायः माडाद्रुमः २ दीर्घः ३ ध्व
जवृक्षः ४ वितानकः ५ मद्यद्रुमः
६ अस्य गुणाः माडकाथित्वं श्रम
हृत्वं श्लेष्मकारकत्वं च इति राज
निर्घंटः ॥
माडवः पुं वर्णसंकरजातिविशे
षः यथा लेटस्त्री वरकन्यायां जे
तया मास षष्ठमयात् माडवमाडः
वं च मडंकोलेच कंदरं इतिब्र
ह्मवैवर्ते ब्रह्मखंडे १० अध्यायः
पुस्तकांतरे माडवस्थाने मातर इ
तिपाठः कंदरस्थाने कलंदर इ
तिपाठः ॥
माडुकः पुं माड्डिकिः मड्डुवाद
कः इति सिद्धांतकौमुदी ॥
माटिः स्त्री दंशभेदः पत्रशिरा
इति रत्नकोषः दंतभेदः इति
केचित् इत्यमरटीकायां भरतः
पत्रभंगे दैन्यप्रकाशने ॥
इति मेदिनी शब्दरत्नावल्यां माटि
दैन्यं पत्रशिरास्त्रो मृद्ध लाङ्गिते ।
जडे इति हेमचंद्रः ।
माटी स्त्री दंतशिरा इति शब्दर
त्नावली ॥
माणकं क्ली कंदविशेषः माण
कचु इति भाषा अस्य गुणाः स्वादु
त्वं शीतलत्वं गुरुत्वं शोथहरत्वं
कटुत्वं च इति राजवल्लभः ॥
माणकः पुं स्वनामख्यातवृक्षः मा
णकचुकाख्य इति भाषा तत्पर्य्या
यः स्थूलपद्मः २ इति रत्नमाला
माणः २ वृहत्छदः ४ छत्रपत्रः ५
इति केचित् ॥
माणवः पुं मनुष्यः बालकः इति
शब्दरत्नावली षोडशयष्टिकहारः
इति हेमचंद्रः ॥
माणवकः पुं बालकः स च षोड
शवर्षपर्यंतप्रथमवयस्कः हार
भेदः स तु विंशतियष्टिकः विश
नरहार इति भाषा इत्यमर भ
रतौ कुपुरुषः इति मेदिनी ।
वटुः इति हेमचंद्रः ॥
माणवीनं त्रि माणवसम्बन्धिमा
णवस्येदमिति निर्देशात् अस्यानेनति
माणवं क्ली शिशुसमूहः इ
त्यमरः माणवानां समूहो माणवं
विकारसंघातिस्यः माणवो बालः सु
हेत्यमरयः दृत्यमध्यस्थकेके इति




नदीकायां भरतः ॥
माणिका स्त्री अष्टपलपरिमाणं
इति शब्दमाला ॥
माणिक्यं क्ली रत्नविशेषः मा
णिक इति भाषा तत्पर्य्यायः शो
णरत्नं १ रत्नराट् २ रविरत्नकं ३
शृङ्गारी ४ रङ्गमाणिक्यं ५ तरुणं
६ रत्ननायकं ७ रागयुक् ८ पद्मरा
गः ९ रत्नं १० शोणोपलः ११ सौ
गन्धिकं १२ लोहितकं १३ कुरुवि
न्दं १४ अस्य गुणाः मधुरत्वं
स्निग्धत्वं वातपित्तनाशित्वं रत्न
प्रयोगे प्रधानत्वं रसायन ।
कारित्वंच तस्य लक्षणं यथा
स्निग्धं गुरुगात्र्युतं तेजोमस्वच्छं स
मांगंच सुरंगदंच इति जात्यमाणि
क्यंकल्याणंधारणात्कुरुते ॥
तस्य दोषो यथा द्विच्छायमथापि
हितं कर्कशं शार्करिलं भिन्नंधू
म्रंच विरूपं रागविमलत्वमाणि
क्यं नधारयेद्धीमान् ॥ तस्य
चत्वारिंशा जाति यथा तद्रक्तंयदि
पद्मरागमथ तत्पीतंतिदि रक्त
हिंगुलाभं नीलाञ्जनकुरुविन्दकं यदल
लांसपादेषु सौगन्धिकं तन्नीलं यदि
नीलगन्धिकमिति ज्ञेयं चत्वार्युक्ते
माणिक्यं कथ चर्चितोऽप्यविकले

रागेणाज्ज्यात्यं जगुः इति राज नि
र्घण्टः मतान्तरे तस्य दोषाः ।
यथा माणिक्यस्य समाख्याता अ
ष्टौ दोषा मनीषिभिः द्विच्छायंचद्वि
रूप संभेदः कर्करं तथा अशोभ
नंकोकिलंच जलं धूम्राभियेवचा ।
वैगुण्याश्चत्वार आख्याता छायाश्चा
रूपा कीर्त्तिताः छायास्तु पूर्वोक्ता
एवतास्तु पद्मरागाश्चेदृक्षयाः
छायाद्वितय सम्बन्धा द्विच्छायं बंधु
नाशनं द्विरूपंद्विपदं तेन माणिक्ये
नपराभवः संभेदो भिन्न मित्युक्ते
शस्त्रघात विधायकं कर्करं क
र्कराघुक्तं पशुबन्धुविनाशकृत
दुग्धेनेव समालिप्तमतछनौष्ट
युच्यते अशोभनं सशहिर्हमाणि
क्यं वहुदुःखकृत् मधुविन्दुसम
च्छायं कोकिलं परिकीर्त्तितं आ
युर्लक्ष्मीयशोहन्ति सदोषं तत्तथार
येत् रागहीन जलंप्रोक्तं धनधा
न्यापवादकृत् धूम्रं धूमसमाकारं
वैद्युतंभयमावहेत् तथा शोभा
हितयवंतो येमणयः तालिकार
काः उभयत्र परं येषां तेन वस्मात्
पराभवः भिन्नमत्युदृह्मद्वस्मात्
कर्करं धननाशकृत दुग्धेनेव स
मालिप्तः पुत्रके यत्नसंभवेन दुःख

कृत् समाख्याता न नृपे रत्नणीय
कः मधुविन्दुसमाशोभा कोकि
लानां प्रकीर्त्तिता तेषांच वद्ध
भेदाः स्मृर्त्तिते धार्य्याः कदाचन
अथ गुणाः गुरुत्वं स्निग्धता ।
चैव वैमल्यमतिरक्तता तथाचा ।
वर्णाधिकं गुरुत्वंच स्निग्धताच ते
धार्च्छता अर्च्चिष्मत्तामहत्ता चमणी
नां गुणसंग्रहः फले ये कर्करा स्नि
ग्धमयोपदिग्धा प्रभाविशुद्धाः पुरु ।
षाविवर्णाः तनेश्वस्त्वाममणयोभ
वन्ति समासतो जाति गुणाः समस्ते
दोषोपसृष्टं मणि मप्रबोधादिभ
र्त्तियः कश्चन कंचिदेकं तेवंधु
दुःखामयवंधुवित्तनाशादयोदोष
गणा भजन्ते सपत्नमध्येऽपि कृ
ताधिवासं प्रमाद तश्चापि वर्त्त
मानं नपद्मरागस्य महागुणस्य ।
भर्त्तार मापत्समुपैति काचित्
दोषोपसर्गप्रभवाश्रयेत्तेनोप ॥
द्रुवान्तसमभिद्रवंति गुणोःसमुपैः
सकले रूपैतयः पद्मराग प्रय
तो विभर्त्ति बालार्ककरसंस्पर्शात्
यः शिखांलिहितांवमेत् रंजयेत् ।
द्वाश्रममथापि समहागुणास्तेयाने उ
श्रप्रानगुणोहितिभोरंजयेयः समेततः
वेमञ्छिखालोहिता वा पद्मरा ।

गः सउत्तमः अंधकारे महाघोरे ॥
चो न्यस्तः सन्महामणि प्रकाशय ।
ति सूर्य्याभः स श्रेष्ठः पद्मरागकः ।
पद्मकोषे तथान्यस्तो विकाशयति
तत्क्षणात् पद्मराग वरो दोषा ।
देवानामपि दुर्लभः सर्वोऽष्ट प्र ।
शमनाः सर्वसम्पत्तिदायकाः चता
रस्त्वमयो द्विशगुणान्श्रयथोत्तर ।
योमणिर्द्दृश्यते हृाज्वलदग्निसमच्छ
विः वंशकान्तिः स विज्ञेयः सर्वस
म्पत्तिदायकः पंचसप्तनवविंशति
रागः सम्पन्नोपि सकलः खल्व
स्त्र वर्जयेद्ध मतिवाकर जालडत्तरा
न्तरमहागुणितस्तु नीलीरसं दुग्ध
रसं जलं वाथरंजयंति हिशतप्रमा
णं तेनेयथापूर्वमतिप्रशस्ताः सौ
भाग्यसम्पत्ति विधानदायकाः गुं
जाफल प्रमाणास्त्वदपासमविगुंज
कान् पद्मरागास्तु लयति यथापूर्वंम
हागुणाः कोलकालफलाकारा द्वा
दशाष्टाद्विगुंजकान् पद्मरागस्तुल
यति यथापूर्वं महागुणाः बदरीफ
लत्वसोयः स्युर्दिगसमासकः त
थाथाश्रीफलत्रिशात् विशतिद्वादशमा
सकः तथालफलत्वसोयावन्द्रिया ।
दैकमासकः आम्रलफलमानोया ।
स्ववसिद्धिकतोलकः विम्बीफलसमा




कारो वस्तु षड्दश नोलकः स्मृतः यं प्रमाणेन मानेन च न लभ्यते यदि लभ्येत मूल्येन नरा सिद्धि मवाप्नुयात् केचित्सारतराः सन्ति जात्यानां प्रतिरूपकाः विजातयः प्रयत्नेन सिद्धास्तान् समादरेत् कांकलकाः सिंहलदेशोत्थाः कुरुमालीयाः श्रीपर्णीकास्तु सदृशा विजातयः पद्मरागाणां तथोपसंगात्तु कलशाभिधानं मणेः स्वभावादपि तथोत्थाः कालाक्षपरासिंहलदेशजातं मुक्ताभिधानं भस्मः स्वभावात् श्रीपर्णीकं दीप्तिनिराकृतिना हि जाति लिंगाश्रयभेदपक्षः तथाच स्नेहप्रदेहो मृदुता लघुत्वं हि जातिलिंगं खलु सार्वजन्ये यः प्रथमिकोऽस्ति पद्मरागोयो वा तथापि च वस्तुनि मध्यः स्नेहप्रदिग्धोऽन्तर्वयो विभाति यो वा प्रमृज्यः प्रजहाति दीप्तिं आक्रान्तमूर्द्धा च तथांगुलिस्थ्यो यः कालिको पार्श्वगतो विभर्ति संशाण नाद्धोऽपि पर्णं सहते विभर्ति यः सर्वगुणान्वितोऽपि तत्प्रमाणस्यवन् स्तज्जातयो वा गुरुत्वेन भवेत् लस्वः यो गाढकौ नानाकरदेशजातं तथा तुषो जाति गुणेन ल

शेत् प्रमाणपति संदेहे शिलायां परिघर्षयेत् हृष्टायांस्तु तच्छोभया न परिमानं त्यजति सत्त्वेयः सुदृढ जातिस्ततो यात्मनो विजातयः स्वजातकं च समुत्थेन विलिखेद्वा परस्परं वज्रं वा कुरुविंदं वा विमुच्यान्योन्यकेन चेत्। तथाक्य लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः गुणोपपन्नेन सद्भाववंशा मणिस्त्वजात्या विगुणेन जातः स्वयं न कुर्यादपि कौतुकेन विहार विजातिं न भूयाद्युक्तं चंडाल पकोऽपि तथाऽभिजातानां मेतदूरानयद्वृत्तियत्नात् तथा मलीन भविगुणोपपन्नात् शंको ध्वनिविशावयिंद विजातेः प्रथमस्य वालार्काभिमुखं कृत्वा दर्पणे धारयेन्मतिं तत्र कांतिविभागेन छायाभागं विनिर्दिष्टं येन वज्रस्य यत्तं तुलसंख्यायोक्तं मूल्यं समुन्नापित गोरवस्य तत्पद्मरागस्य गुणान्वितस्य स्यान्माषकाख्यातुलितस्य मूल्यं यन्मूल्यं पद्मरागस्य सगणस्य कीर्तितं तावन्मूल्यं तथा मुद्गे कुरुविंदे विधीयते सगुणकुरुविंदे च यावन्मूल्यं प्रकीर्तितं। तावन्मूल्यं तत्र्यंशहीनं स्यादे

रसेन सहितं सितचंदनेन वासारसेन मधुक मधुकेन वाथ प्रातौ पिबंति समना स्वरसेन मिश्रितेन प्रवंति भुवि शीतलिका विकारान् मोचारसेन कदलीस्तम्भजलेन मधुकेन वाथ अथवा मधुनाथ प्रातो पूर्वरूपेज्वरागमनमात्रे समना स्वरसेन जातीपत्ररसेन शीतलास क्रियाकार्या शीतलारत्नयासह व श्रीयात्रिस्वपत्राणि परितो भवनांतरे कदाचिदपि नोकार्य्य मुच्छिष्टस्य प्रवेशनं स्फोटेष्वपि कदाहेषु रत्नारेणुरक्तो हितः तेन ते शोषमायांति प्रपाकं न भजंति च रत्नारेणुकरः शुष्कगोमयभस्मचूर्णितः चंदनं वासकोसस्ने गुडूचीद्राक्षया सह पथ्यं शीतकषायस्तु शीतलाज्वरनाशनः शीतकषायो हिमः जपहोमोपहारैश्च दानस्वस्त्ययनार्च्चनैः विप्र गोष्ठाम्बु गौरीणां पूजनैः स्तां समंनयेत् स्तोत्रं च शीतला देव्याः पठेत् शीतलिनोऽन्तिके ब्राह्मणाः प्रत्यहायुक्तस्तनयाम्यतिशीतला स्कंद उवाच भगवन्देवदेवेश शीतलायाः स्तवं शुभं वक्तुमर्हस्यशेषेण विस्फोटकभयापहं ईश्वर उवाच नमा

मि शीतलां देवीं रासभस्थां दिगम्बरीं मार्जनी कलशोपेतां सर्पालंकृत मस्तकां वंदेहं शीतलां देवीं सर्वरोग भयापहां । यामासाद्य निवर्त्तेत विस्फोटकभयं महत् शीतले शीतले चेति यो ब्रूयाद्दाह पीडितः विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति यस्त्वामुदक मध्ये तु ध्यात्वा संपूजयेन्नरः विस्फोटक भयं घोरं कुले तस्य न जायते शीतले ज्वर दग्धस्य पूतिगंधगतस्य च प्रनष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधं शीतले तनुजान्रोगान्नृणां हरसि दुस्तरान् विस्फोटक विशीर्णानां त्वमेकामृतवर्षिणी गलगंड ग्रहा रोगा ये चान्ये दारुणा नृणां त्वदनुध्यानमात्रेण शीतले यांति ते क्षयं न मंत्रो नौषधं किंचित् पापरोगस्य। विद्यते त्वमेका शीतले त्रात्रीं त्वां प्रपद्यामि देवतां मृणालतन्तुसदृशीं नाभिहृन्मध्यसंस्थितां यस्त्वां विचिन्तयेद्देवी तस्य मृत्युर्न जायते अष्टकं शीतलादेव्या यः पठेन्मानवः सदा विस्फोटकभयं घोरं कुले तस्य न जायते श्रोतव्यं पठितव्यं च नरैर्भक्ति सम



विनैः उपसर्गविनाशाय परं
स्वस्त्ययनं महत् शीतलाष्टकमेत
न्नहि न देयं यस्यकस्यचित् दा
तव्यं हि सदा तस्मै भक्ति श्रद्धा
विनीतधियः इति श्रीस्कन्दपुराणे ।
काशीखण्डे शीतलाष्टकस्तोत्रं स
मासम् ॥

मसूरिका स्त्री मशाहरी मशारी इ
ति भाषा यथा दंशांश्च मशकां
श्चैव वर्षाकाले निवारयेत् मसू
रिकाभिः प्रहृत्य मंचशायिन म
घ्नते इति पाकक्रियायोगसारे १२
अध्यायः ॥

मसूरी स्त्री पापरोगः इति मेदि
नी सतवसन्तरोग इति प्रसिद्धः
त्रिवृत् रक्तत्रिवृत इति राज
निर्घण्टः ॥

मसृणं त्रि अकर्कशं स्निग्धं इ
ति मेदिनी ॥

मसृणा स्त्री उमा मसिना इति
भाषा इति मेदिनी ॥


मस्क ङ गतौ इति कविकल्पद्रु
मः दन्त्यमध्य इति दुर्गासिंहः क्वि
पि संयोगादेर्लोपे मक् मूर्द्धन्य
मध्य इत्येके क्विपि संयोगान्त्य
लोपे मट् ङ मस्कते इति
दुर्गादासः ॥

मस्करः पुं वंशः इत्यमरः रंध्र
वंशः इति राजनिर्घण्टः ॥

मस्करी पुं भिक्षुः इत्यमरः चन्द्रः
इति शब्दचन्द्रिका ॥


मस्ज ओ इ श औ स्नाने इति कवि
कल्पद्रुमः दन्त्यमध्यः क्विपि संयो
गादिलोपे मक् ओ मग्नः श
मज्जती मज्जन्ती ट्ट मज्जथुः औ
अमाङ्क्षीत् स्नायते अनेनेति ।
स्नानमिह जलान्तः प्रवेशः मज्जति
प्रस्तरो जले इति दुर्गादासः ।

मस्तं क्ली मस्तकं इति द्विरूपको
षः मस्तकः पुं क्ली मथानोगो मा
ना इति भाषा तत्पर्यायः उत्तमा
ङ्गं २ शिरः ३ शीर्षं ४ मूर्द्धा ५ इत्य
मरः मुण्डं ६ शिरं ७ इति शब्द
रत्नावली वराङ्गं ८ इति जटाधरः
कं ९ मुण्डं १० मौलिः ११ कपालं
१२ केशभूः १३ इति राजनिर्घण्टः
तस्य शुभाशुभ लक्षणं यथा ।
छत्राकारैः शिरोभिस्तु नृपा निम्न
शिरा धनी चिपिटैश्च पितृमृत्यु
र्घटाख्याः परिमण्डलैः घटमूर्द्धा
पापरुचिर्धनाद्यैः परिवर्जितः ।
इति गारुडे ६६ अध्यायः मस्त
केऽधोमुखसहस्रदलकमलमस्ति
तत्कर्णिकायां परमात्मा तिष्ठति ।



यथा स्वांके उत्तानौकरौ कृत्वा
सोहमिति जीवात्मानं हृदयस्थ
दीपकलिकाकारं मूलाधारस्थ।
कुलकुंडलिन्या सहसुषुम्नावर्त्म
नामूलाधार स्वाधिष्ठानमणिपूरा
नाहत विशुद्धाज्ञाख्यषट्चक्राणि
भित्वा शिरोवस्थितनाधोमुखसहस्र
दलकमल कर्णिकांतर्गतपरमा
त्मनिसंयोज्यतत्रादितत्त्वसारः तथा
च सुषुम्ना वर्त्मनासोहमिति मं
त्रेण योजयेत् सहस्रारे शिरःस्था
ने परमात्मनि देशिकः इतिगौ
तमीयतंत्रे ॥
मस्तकस्नेहः पुं शिरोमज्जा यथा
गोर्दंत्र मस्तकस्नेहोमस्तिष्काम।
स्तलुंगकः इतिहेमचंद्रः ॥
मस्तकाख्यः पुं वृक्षशिरः इतिश
ब्दचंद्रिका ॥
मस्तदारु क्ली देवदारु इतिभा
वप्रकाशः ॥
मस्तमूलकं क्ली शिरोधः घाडइ
तिभाषा इतिशब्दचंद्रिका ॥
मस्तिष्कं क्ली मस्तकभवघृताका
रस्नेहः मगज इतिपारस्यभाषा त
त्पर्यायः गोर्दं २ इत्यमरः ॥
गोर्दं २ मस्तकस्नेहः ४ मस्तुलु
ङ्गकः ५ इति हेमचंद्रः ॥

मस्तु क्ली दधिभवमंडं दधिस्मात
इतिभाषा इत्यमरः दधिजलं
द्विगुणवारियुतंदधि अस्यगुणाः
उष्णाम्लं रुचि पित्तदं श्रमहरं।
बल्यं कषायं सरं भुक्तिच्छंदकरं।
तृषोदरगद सौहार्दशोषं नाशनं।
स्रोतः शुद्धिकरं कफानिलहरंवि
ष्टम्भ शूलापहं पांडुश्वास वि
कारगुल्म शमनं मस्तुप्रशस्तंले
चु इतिराजनिर्घंटः अपिच मस्तु
क्लमहरं स्वलं लघु भक्ताभिलाषक
त् स्रोतोविशोधनं ह्लादिकफतृष्णा
विलापहं अवृष्यंप्रीणनं शीघ्रं।
भिनत्ति मलसंग्रहं इति भाव
प्रकाशः ॥
मस्तुलुंगः पुं मस्तिष्कं इतित्रिकां
डशेषः ॥
मस्तुलुंगकः पुं मस्तिष्कं इतिहे
मचंद्रः ॥
मह पूजे इतिकविकल्पद्रुमः
महति इतिदुर्गादासः ॥
मह इ क विषि इतिकविकल्प
द्रुमः इक मंहयति विषि दीप्तौ।
इतिदुर्गादासः ॥
मह इ ङ वृद्धौ इतिकविकल्पद्रुमः
इ मंहते ङ मंहते ॥ इति
दुर्गादासः ॥




मह तक पूजे इतिकविकल्पद्रुमः महयति इति दुर्गादासः ।
महः पुं उत्सवः इत्यमरः । तेजः इतिमेदिनी यज्ञः इति
इतिहेमचंद्रः शब्दरत्नावली महिषः १ ॥
महः क्ली उत्सवः तेजः इति मेदिनी यज्ञः इतिशब्दरत्नावली ॥
महकः पुं वकुलामोदः इति जटाधरः ॥
महत् क्ली राज्यं इतिमेदिनी ।
महत् त्रि बृहत् इतिमेदिनी तत् पर्य्यायः विशंकटं २ पृथु ३ बृहत् ४ विशालं ५ पृथुलं ६ वड्रं ७ उरु ८ विपुलं ९ इत्यमरः पुलं १० विस्तीर्णं ११ इति शब्दरत्नावली ।
महती स्त्री वल्लकीभेदः इति मेदिनी नारदवीणा बृहत्यमाणा इत्यमरटीकायांभरतः बृहती वार्त्ताकी इतिराजनिर्घंटः ॥
महतीद्वादशी स्त्री श्रवणाद्वादशी यथा मासिभाद्रपदेशुक्लेद्वादशी श्रवणान्विता महतीद्वादशी ज्ञेया उपवासे महाफला इतिगरुडे १४१ अध्यायः ॥
महतत्वं क्ली वुद्धिः विशानिनत्वाऽरणीत ॥

द्वितीयतत्वं तत्वप्रक्रमेरुतत्वं समष्टि बुद्धिस्वरूपः तत्पर्य्यायः यथा महानात्मा मति विष्णुर्जिष्णुशंभुश्चवीर्य्यवान् बुद्धि प्रज्ञोपलब्धिस्तथा ख्यातिर्धृतिः स्मृतिः पर्य्याय वाचकैः शब्दै महानात्मा विभाव्यते तं जानन् ब्राह्मणोविद्वान्नमोहं नाधिगच्छति इतिमहाभारते आश्वमेधिकपर्व्व अपिच एकामूर्त्तिस्त्रयोभागाब्रह्मविष्णुमहेश्वराः सविकारात् प्रधानात्तु महत्तत्वं प्रजायते महानितियतः ख्यातिर्लोकानां जायते सदा अहंकारश्च महतो जायतेमान वर्द्धनः इति मात्स्ये ३ अध्यायः ॥
महत्तरः पुं स्त्री शूद्रः यथा शूद्रः स्यात्यादजो दासो ग्रामकूटो महत्तरः इतित्रिकांड शेषः ॥
अतिशयमति त्रि ॥
महत्वं क्ली महतोभावः यथा महत्वं षड्विधे हेतुरिन्द्रियं करणं मनं इतिभाषापरिच्छेदः महत्वं षड्विध इति द्रव्य प्रत्यक्षे महत्वं समवाय सम्बंधेनकारणं द्रव्य समवेतानं गुणकर्म सामान्यानां प्रत्यक्षे स्वाश्रय समवाय

सम्बंधेन द्रव्यसमवेत समवेतानां रूपत्वादीनां प्रत्यक्ष स्वाश्रय समवेत समवायसम्बंधेनकारणं इतिसिद्धांतमुक्तावली ॥
महर्लोकः पुं भूरादिसप्तलोकांतर्गतचतुर्थलोकः यथा भूर्भुवः स्वर्महश्चैवजनश्चतप एवच सत्यलोकश्चसप्तैतेलोकास्तु परिकीर्त्तिताः चतुर्युगेदिनस्यांते जगदेतच्चराचरं तदाहि दह्यते सर्वं त्रैलोक्यं भूर्भुवादिकं ॥ जनंप्रयांतितापार्त्तामहर्लोकनिवासिनः इतिवह्निपुराणं चैतन्यमहर्लोकेतिष्ठंते कल्पवासिनः इति देवीपुराणं ॥
महर्षभी स्त्री कपिकच्छुः इतिराजनिर्घंटः ॥
महर्षिः पुं व्यासादिः इतित्रिकांड शेषः अस्यव्युत्पत्तिर्यथा ॥ ऋषिहिंसागतोधातु र्विद्या सत्यतपःश्रुतैः एषसन्निचयो यस्माद्ब्रह्मणश्च ततस्त्वृषिः विद्वत्ति समकालंतुवुद्ध्याव्यक्तिमृषिस्त्वयं ऋषतेपरमं यस्मात्परमर्षिस्ततःस्मृतः गत्यर्थादृषतेर्धातो र्नामनिर्वृत्तिकारणं यस्मादेषस्वयम्भूतस्तस्माच्चऋषितामता तेने


श्वराः स्वयंभुवाब्रह्मणोमानसाः सुताः विवर्द्धमानैस्तै र्वुद्ध्यामहान् परिगतः परः यस्मादृषिः । परत्वेनमहांस्तस्मान्महर्षयः ईश्वराणां सुतास्तेषां मानसाश्चौरसाश्च वे ऋषयस्तत्परत्वेन भूतादि ऋषयस्ततः ऋषिपुत्राऋषीकास्तु मैथुनाद्गर्भसंभवात् परत्वेनर्षयस्ते वैभूतादि ऋषिकास्ततः ऋषीकाणां सुतायेवे विज्ञेया ऋषिपुत्रकाः श्रुत्वा ऋषं परत्वेन नाम तस्मात्श्रुतर्षयः अव्यक्तात्मा महात्मा ऽहंकारात्मा तथैवच भूतात्मा चेन्द्रियात्माच तेषांतु ज्ञानमुच्यते इत्येवमृषिजातस्तु पंचनाम्नामभिः स्मृतः भृगुर्मरीचि रत्रिश्च अंगिरापुलहः क्रतुः मनुर्दक्षो वशिष्ठश्च पुलस्त्यश्चेति ते दश ब्रह्मणोमानसा ह्येते उत्पन्नाः स्वय मीश्वराः परत्वेनर्षयो यस्मात्स्मृतास्तस्मान्महर्षयः इति मात्स्ये १२० अध्यायः ॥
महल्लकः पुं अंतःपुररक्षकः तत् पर्य्यायः सौविदल्लः २ कंचुकी ३ स्थापत्यः ४ सौविदः ५ विशाकः ६ इतिजटाधरः सौविदल्लकः ७ अन्तर्वंशिकः ८ इति शब्दरत्नावली ।



महल्लिकः पुं अन्तःपुररक्षकः खोजा इति भाषा तस्य लक्षणं। यथा मृदवस्तोऽन्तपस्थायः स्त्री स्वभावो महल्लिकः इति शब्द माला ॥
महसं क्ली ज्ञानं प्रकारः इत्यु णादिकोषः ॥
महा स्त्री गोपवल्ली गोरक्षचा कुलिया इति भाषा इति शब्दचं द्रिका स्त्रीगवी इति शब्दरत्ना वली ॥
महाकच्छः पुं समुद्रः वरुणः इ ति मेदिनी पर्वतः इति शब्दरत्ना वली ॥
महाकंटकिनी स्त्री विषसारकं। फणिमनसा इति भाषा इति शब्द चंद्रिका ॥
महाकंदः पुं रसोनकः इत्यमरः। मूलकं इति शब्दरत्नावली ॥ चाणक्यमूलकं रक्तलशुनं राज पलांडुः इति राजनिर्घंटः ॥
महाकपित्थः पुं विल्ववृक्षः इति त्रिकांडशेषः ॥
महाकरंजः पुं करंजविशेषः वड करंजा इति भाषा तत्पर्यायः षड्ग्रंथा २ हस्तिवारिणी ३ उदकी र्णः ४ विषघ्नी ५ काकघ्नी ६ मदहस्ति नी ७ शार्ङ्गेष्टा ८ मधुमती ९ रसा यनी १० हस्तिरोहणकः ११ हस्ति करंजकः १२ सुमनाः १३ काकभां डी १४ मधुमत्ता १५ अस्य गुणाः तीक्ष्णत्वं उष्णत्वं कटुत्वं विष कंडू विचर्चिका कुष्ठत्वग्दोषव्रण नाशित्वंच इति राजनिर्घंटः।
महाकर्णिकारः पुं आरग्वधः इ ति राजनिर्घंटः ॥
महाकायः पुं नंदी सचशिवद्वार पालः इति त्रिकांडशेषः हस्ती इति केचित् वृहत् शरीरं ॥ तद्वति त्रि ॥
महाकार्त्तिकी स्त्री रोहिणीनक्षत्र युक्ता कार्त्तिकी पूर्णिमा यथा शा जापत्यं यदा ऋक्षं तथैतस्यां। तदापि सा महाकार्त्तिकी प्रो क्ता देवाना मपि दुर्लभा इति पाद्मे २ खंडे २ अध्यायः।
महाकालः पुं विश्वस्वरूपाखंडे दं डायमानसमयः यथाकालोद्धहत्वा महाकालत्वात् इति सिद्धांतत। त्वं महादेवः प्रमथगणावि ॥ शेषः इति मेदिनी लतावि। शेषः माकाल इति भाषा तत् पर्यायः उरुकालः २ किंपाकः ३ काकमर्द्दकः ४ इति रत्नमाला।

काकमर्द्दः ५ देवदालिका ६ दाला ७ दालिका ८ जलेंगः ९ बोधका ह्नति १० इति राजनिर्घंटः ॥ शिवपुत्रविशेषः तस्यजन्मवृत्तान्तं यथा श्रीदेवा ऊचुः पुरैवस्वानरः श्रीमान्भूरितेजोमयो वली म हामैथुनवीजेन त्वत्तेजः संग्रही ष्यति इत्युक्ता त्रिदशाः सर्वे वीतिहोत्रं पुरःस्थितं तस्मै नि देशयामासुः सम्भवे सर्वहेतवे। ततः षडंगरूपं रेतो व्याहिते दृ हुताशने उत्ससर्ज महावाहुर्महा मैथुनकारणं अग्निवृत्तरूपमा न स्य तेजसः शशभृद्वृत्तः अण्डद्वय मति स्वल्पं गिरिशस्य पपात ह ॥ तयोः कारणयोः सद्यः संभूतौ शंकरात्मजौ एकोभृंगसमः कृष्णो भिन्नांजननिभोऽपरः भृंगी तस्य तदाब्रह्मानाम भृंगीति चाकरोत्। महाकृष्णेक रूपस्य महाकालेति लोकभृत् ततस्तौ पालयामास। शंकरः प्रमथाकरैः अपर्णया चापि तथा क्रमात्तावभिवर्द्धितौ प्रहृष्टौ तौ महात्मानौ हरोमा। प्रतिपालितौ क्रमाद्गणेशौ कृ तान्तौ हरो द्वारि न्ययोजयत्। इति कालिकापुराणे ४५ अध्यायः

तस्य वानरत्वकारणं ज न्मांतरंच यथा अथैकदामया सा र्द्धं निगूढे रतिमंदिरे नर्म्मकरो। महादेवो मोदयुक्तो रति प्रियः यदा सा नर्म्मणा जाता गौरी स्मर हर्षान्तिकं तदाभृंगिमहाकालौ द्वा स्थौ द्वारि प्रतिष्ठितौ नर्म्माव। साने सा देवी मुक्त धम्मिल्लवंधना ग्रंथिहीन गलद्वासा वस्त्र माल्य पाणिना व्यस्तहारा गंधपुष्पे रा कुलेनीति शोभना विलसत्कुंकुमा। दष्टदशनच्छदविभ्रमा निःसृता रति संकेतशालाया जलन्यानतना ईष दाघूर्णनयना निचिता स्वेदविंदुभिः तां निःसरंती सहसा तथाभूता मनिंदितां अयोग्य वीक्षितं ॥ वामेहृषध्वज मूर्त्ते प्रियं ददृशात् महात्मानौ नाति हृष्टात्मानसो। भृंगी चापिमहाकालः प्रापकाल स्य कोपनः दृष्ट्वातोमातरं दी नौ तदाभूता वयो मुखो चिंताच्छा न्नमत लीनौ निश्वासत्तधनमं तौ पश्यंतौ तदा देवी ददर्श हि मवत्सुता वकोपच तदापूर्ण वा क्यंचैतदुवाच ह एवंभूतांत मां कस्मादसंवद्धामपश्यतां भवंतौ। ततयो श्रुद्धौ स्त्रीमर्य्यादा विवर्जि




तो तस्मादिमा मम र्ष्यातां भवंतौ
निरपत्रपौ अकुर्वतां ततो भ्रू
याद्भवतो जन्ममानुषे मानुषीं
योनिमासाद्यमानुषीलक्षणोषतः
भविष्यतो भवंतौ तु शाखामृग
मुखौ भुवि इति तावुभया शप्तौ
हरपुत्रौ महामती अथोमया
समं देवो वियता चंद्रशेखरः ॥
आजगाम तदा गत्वाश्रमसारं प्रति
तंतूप दहशेय चरंतौ ता समा
याः सदृशी गुणैः सर्वलक्षणस
म्पूर्णां माधवस्यैव माधवीं तां
दृष्ट्वा व्यगदद्देवी गौरी वृषभके
ततः स्मित प्रसन्नवदनः प्रसन्निव
भाविनी ईश्वरउवाच इयं ते
मानुषीमूर्त्तिः प्रियेतारावतीतिया
भृंगी महाकालयोस्ते जन्मनु वि
हिता स्वयं त्वत्तो त्वनन्य कांतो
ऽहंनाम्ना गंतमिहात्मदे । त
मिदानी स्वयंचास्यामूर्त्या प्रविश्य
भाविनि तत्र उत्पादयिष्यामि म
हाकालंच भृंगिणं श्रीदेव्युवाच।
ममैव मानुषी मूर्त्तिरियंवृषभके
तत्र विशामि तेऽत्रवचनादुत्पादय
सुत द्वयं प्रविवेश ततो देवी
स्वयं तारावती ततो महादेवो।
ऽपितस्यां तु कामार्थे समुपस्थितः

ततः सापर्णयाविष्टा देवी तारा
वती सती कामयानं महादेवं।
स्वयमेवाभजन्मुदा तस्मि न्काले
ऽभवद्गर्भः कापाली चास्थिमाल्या।
द्भुक् कामावमाने तस्यां तु सद्यो
जातं सुतद्वयं अभवन्नृपशार्दूल
तथा शाखामृगाननं इति कालि
कापुराणे ४८।४९ अध्यायः।
वाणासरस्य महाकालत्वं यथा अ
षयऊचुः कथितो भवता सर्गः संश
या अपिशान्तितः त्वत्प्रसादा
न्महाभागकृत कृत्या वयं गुरो।
भूयश्च श्रोतुमिच्छामो वयमेतद्धि
ज्ञोत्तम कौप्या भृंगी महाका
लो जातौ वेतालभैरवौ ॥ वे
तालंच महाकालं भैरवं भृंगिणं।
तथा श्रुतमे हि नृपशार्दूल कथमे
षां चेतद्द्वयं मार्कंडेय उवाच।
एवं गते महाकाले मानुषस्यैव
भृंगिणि वेतालभैरवाख्ये च त
था भूते हिमांतमाः वालके व
वेतालभैरवेतन्तसंगते अंधे।
के तपसापुत्रके भृंगिणाचाकरोद्धरः
अंधकस्त्वहरं पूर्वं विरूपापद
मागतः पश्चाद्धरं समाराध्य पु
त्रो भूतस्य सोऽभवत् भृंगि स्नेहा
द्भृंगिणा तत्संज्ञया चाकरोद्धरः।

त्स्नेहेन तमहाकालंवाणं वलि
सुतं हरः विसुना छिन्नवाहुं तं
महाकाल मथाकरोत् एवमुनि
वरा स्तेषां संजातंच चतुष्टयं।
वेतालो भैरवो भृंगी महाका
लेत्यनुक्रमात् इति कालिकापु
राणे ८५ अध्यायः ॥ तस्य
ध्यानादि यथा महाकालं यजेद्दे
व्या दक्षिणे धूम्रवर्णकं बिभ्रतंदंड
खट्वांगौ दंष्ट्रा भीममुखं शिशुं
व्याघ्रचर्मावृतकटिं तुंदिलं रक्तवा
ससं त्रिनेत्रं मूर्द्ध्वकेशंच मुंडमा
ला विभूषितं जटाभार लसच्चंद्र
खंडमुग्रं ज्वलन्निभं तथाच कुमा
रीकल्पे देव्यास्त्वदक्षिणे भागे म
हाकालं प्रपूजयेत् ॐ ह्रौं यां
रां लां वां क्रों महाकालभैरवस
र्व विघ्नान्नाशयनाशय ह्रीं श्रीं फट्
स्वाहा इत्यनेन पाद्यादिभि रारा
ध्यत्रिस्तर्पयित्वा मूलेनदेवी पंचो
पचारैः प्रपूजयेत् तथाच काली।
तंत्रे महाकालं यजेयत्नात् प
श्चाद्देवीं प्रपूजयेत् कालीकल्पा
क्कवचे ह्रौं मसहस्र यां रां लां।
वां च क्रों ततः महाकाल भैरवा।
ति सर्व विघ्नान्नाशयेतिच नाशा
येतिपुनः प्रोच्यमाया लक्ष्मी समुद्ध

रेत् फट्स्वाहयासमायुक्तो मंत्रः
सर्वार्थसाधकः इति तंत्रसारः ॥
महाकाली स्त्री महाकालस्यपत्नी
सातु पंचवक्त्राष्टभुजकालीविशेषः
इति तंत्रे जिनानां चतुर्विंश ।
तिशासनदेवतांतर्गतदेवी विशेषः
इति हेमचंद्रः ॥ अथमहा
काली तंत्रः ॐ फ्रें क्रों क्रों
पशून् गृहाण हुं फट् स्वाहा।
श्मशानभैरवी मंत्रेणायावत् क्रूर
कर्माणि प्रयोगः कर्त्तव्यः अथ म
हाकाली मंत्रप्रयोगः तत्र न्या
सपूजादिकं नकर्त्तव्यं तथाच
न्यास पूजादिकं किंचिन्नात्र का
र्या विचारणा कृत्स्नतोयेष्व संपू
र्णे कुलकुम्भेषु कालिकां पंचव
क्त्रां महारौद्रीं प्रतिवक्त्रं त्रिलो।
चनां शक्तिशूल धनुर्वाणखड्गखेट
वराभयान् दधतीदशभुजे देवीं।
बिभ्राणां भूरिभूषणां ध्यात्वेवं।
साधकः साध्यंसाधयेन्मनसेप्सितं
ब्राह्मी माहेश्वरी चैव कौमारी।
वैष्णवीतथा वाराहीच तथा चै
न्द्री चामुंडा चंडिकाष्टमी पूर्वादी
शानपर्यंतं कुंभस्थाने स्थिता इमाः
तत्र क्रमः देवी ध्यात्वा यथा
विधुनाचारेण संपूज्य ब्राह्मयाद्य



शक्तीः पूर्वादि क्रमेण पूजयेत्
तथा नामोच्चारणं संरक्षु वृक्षो
प्रज्वलितेश्वरे जुहुयाद्धारिणोष्ठ
हौ देवी मंत्रं जपंस्तथा स
मिधः पिचुमर्दस्य तथा विभीत
काष्ठिकाः गृहधूम श्मशानास्थि
विभीतागार होमतः समाहाद्वै
रिणं हंति कालिकामंत्र योग
तः उच्चाटनं वायसाक्षे संध्या।
यांमारणं तथा दक्षिणस्यां दि
शि स्थित्वा ग्रामाद्दे दक्षिणामुखः
इतितंत्रसारः ॥

महाकाव्यं क्ली काव्यशास्त्रविशे
षः तत्पर्य्यायः सर्गबंधः २ इति
त्रिकांडशेषः तस्यलक्षणं यथा
सर्गबंधोमहाकाव्यं तत्रैको ना
यकः सुरः सद्वंशः क्षत्रियो वापि
धीरोदात्त गुणान्वितः एकवंशः
भवा भूपाः कुलजा बहवोऽपिवा
शृंगारवीर शांतानामेको ऽङ्गी
रस इष्यते अंगानि सर्वे ऽपि
रसाः सर्वे नाटक संधयः इति
हासोद्भवं वृत्तं अन्यद्वा सज्जनाश्र
यं चत्वारस्तत्र वर्गाः स्युस्तेष्वेकं।
च फलं भवेत् आदौ नमस्क्रिया
शीर्वा वस्तुनिर्देश एववा क्वचि
न्निंदा खलादीनां सतां च गुणकी
र्तनं एकवृत्तमयैः पद्यैरवसा।
नेऽन्यवृत्तकैः नातिस्वल्पानाति
दीर्घाः सर्गा अष्टाधिका इह नाना
वृत्तमयः क्वापि सर्गः कश्चन दृश्य।
ते सर्गांते भाविसर्गस्य कथा
याः सूचनं भवेत् संध्यासूर्येन्दु।
रजनी प्रदोष ध्वांत वासराः ॥
प्रातर्मध्याह्न मृगया शैलर्तु वन
सागराः संभोग विप्रलंभौ च।
मुनि स्वर्ग पुराध्वराः रणप्रयाणो।
पयम मंत्रपुत्रोदयादयः वर्णनी
या यथायोगं सांगोपांगा अमी
इह कवेर्वृत्तस्यवा नाम्नानायक
स्येतरस्यवा नामास्य सर्गोपा।
देय कथया सर्गनामतु इति सा
हित्यदर्पणं महाकाव्य ग्रंथा
यथा कालिदासकृतकुमारसंभव
रघुवंश मेघदूताः भर्तृहरिकृत
भट्टिकाव्यं भारविकृत किराता
र्जुनीयं श्रीहर्षकृतनैषधीयच
रितं माघकृत शिशुपालवधश्चे
त्यादयः ॥

महाकुमुदा स्त्री काश्मरी इति
राजनिर्घंटः ॥

महा कुंभी स्त्री कट्फलः इति
राजनिर्घंटः ॥

महाकुलः त्रि उत्तमकुलजातः तत

पर्य्यायः कुलीनः २ आर्य्यः ३
सभ्यः ४ सज्जनः ५ साधुः ६ इत्य
मरः कुल्यः ७ अभिजातः ८
कौलेयकः ९ जात्यः १० इति
हेमचंद्रः माहाकुलः ११ कौ
लेयः १२ कौलेयकः १३ इत्य
मरटीका कुलजः १४ साधुजः १५
कुलश्रेष्ठः १६ इतिशब्दरत्नावली

महाकुलीनः त्रि महाकुलः यथा
महाकुलीन ऐक्ष्वाके वंशे दाश
रथि र्म्मम पितुः प्रियंकरो भर्त्ता
तेमकार स्तपस्विनो इति भट्टि
पंचमसर्गः ॥

महाकूपः पुं वृहत्कूपः तत्प
र्य्यायः अरघट्टः २ इतिजटा
धरः ॥

महाकूलः पुं महाकुलः सत्कु।
लः इति द्विरूपकोषः ॥

महाकोशफला स्त्री देवदालील।
ता इतिराजनिर्घंटः ॥

महाकोशातकी स्त्री हस्तिघोषा
इति राजनिर्घंटः ॥

महागदः पुं ज्वरः इति राज।
निर्घंटः ॥

महागंधं क्ली हरिचंदनं बोल
इति राजनिर्घंटः ॥


महागंधः पुं कुटजवृक्षः इति
राजनिर्घंटः जलवेतसः इति
शब्दचंद्रिका ॥

महागंधा स्त्री नागवला केविका
पुष्पं इतिराजनिर्घंटः चामुंडा।
यथा चामुंडा चर्चिका चर्ममुंडा
मार्जारकर्णिका कर्णमोटी महा
गंधा भैरवी च कपालिनी इति
हेमचंद्रः ॥

महागवः पुं गवयः यथा वन।
गो गवयः प्रोक्तो वलभद्रो महागवः
इति राजनिर्घंटः ॥

महागिरिः पुं बौद्धभेदः यथा।
महागिरिः सुहस्त्याद्या वज्रांता दश
पूर्विणः इतिहेमचंद्रः वृहत्।
पर्वतश्च ॥

महागुरुः पुं अतिगुरुः सच पुरु
षस्य पिता माता आचार्य्यश्च ॥
स्त्रियः पतिः अदत्तकन्यायाः
पिता माता च यथा त्रयः पुरु
षस्यातिगुरवो भवंति माता पि
ताचार्य्यश्चेति इति विष्णुसूत्रं ॥
यत्तु महागुरुत्वमाह रामायणे।
नातो विशिष्टं पश्यामि बांधवं वै
कुलस्त्रियाः पतिर्बंधु र्गतिर्भर्त्ता
दैवतं गुरुरेव च शाता तपः
गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्म
णोगुरुः पतिरेको गुरुः स्त्रीणां



मेधुपुष्पितायां वैतानिके महति मुमणि गुज्यमानः इति श्रीभागवतेषष्ठस्कंधेजनामिलोपाख्याने यमवाक्यव्याख्याने श्रीधरस्वामी

महाजवः पुं गवयः श्रीकारीमा गः इतिराजनिर्घंटः अतिवेगयुक्ते त्रि ॥

महाजम्बुः स्त्री हहज्जम्बुः यथा महाजम्बुर्महायज्ञा राजजम्बुर्हृहत्फला इतिरत्नमाला ॥

महाजम्बूः स्त्री हहज्जम्बुः तत्पर्य्यायः राजजम्बूः २ स्वर्णमाता ३ महाफला ४ पिकप्रिया ५ कोकिलेष्टा ६ महानीला ७ हहत्फला ८ अस्याः गुणाः उष्णत्वं मधुररसत्वं कषायत्वं श्रमहरत्वं कटित्वमास्यजडिम नाशित्वं स्वारकरत्वं विष्टम्भित्वं शोषशमनत्वं श्रमातिसारनिर्बर्हकत्वं श्वासिनकफकासशमनत्वंच इतिराजनिर्घंटः अपिच फलेंदुः कथितोनंदो राजजम्बूः महाफला तथा सुरभिपत्राच महाजम्बूरपिस्मृता राजजम्बूफलंस्वादु विष्टम्भि गुरुरोचनं इति भावप्रकाशः ॥

महाजाति स्त्री वासंतीलता इतिराजनिर्घंटः ॥ श्रेष्ठवर्णास्त्र

महाजातीयः त्रि महतःप्रकारः इति व्याकरणं ॥

महाजाली स्त्री पीतवर्णघोषा इत्यमरः राजकोशातकी इति राजनिर्घंटः हहज्जालवाहके त्रि

महाज्येष्ठी स्त्री नक्षत्रविशेषादियुक्तज्येष्ठीपूर्णिमा सा यथा। ब्रह्मपुराणे ऐंद्रे गुरुः शशीचैव प्राजापत्ये रविस्तथा पूर्णिमः गुरुवारेण महाज्येष्ठी प्रकीर्त्तिता ऐंद्रे ज्येष्ठायां प्राजापत्ये रोहिण्यां १ विना गुरुवारेणापि। ऐंद्रे गुरुः शशीचैव प्राजापत्ये रविस्तथा पूर्णिमाज्येष्ठ। मासस्य महाज्येष्ठी प्रकीर्त्तिता २ अनुराधास्य गुरावपि ऐंद्रे। मैत्रे यदा जीवस्तस्य चंद्रमाके। रविः पूर्णिमाशक्रचंद्रेण महाज्येष्ठी प्रकीर्त्तिता ३ अनुराधास्ये चंद्रेपि आद्रभूतिः ऐंद्रे। तथवा मैत्रे गुरुचंद्रो यदा। स्थितौ पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्त्तिता ४ राजमार्तंडे ज्येष्ठे संवत्सरे चैवज्येष्ठमासस्य पूर्णिमा ज्येष्ठाभेन समायुक्ता महाज्येष्ठी प्रकीर्त्तिता ५ ज्येष्ठसंवत्सरश्च ॥ ज्येष्ठा

मूलोपगे जीवे स्यात् शक्रदैवत मिति विस्मयमीजनेक्ता। ग्राह्यः नतसंवत्सरादि पंक्त्यागतेन वर्षविशेषः ज्येष्ठइति वर्षविशेषणस्य वैयर्थ्यापत्तेः संवत्सरे यदिस्यादिति पाठः कात्यनिकः महाज्येष्ठ्यां यः पश्यति पुरुषः पुरुषोत्तमं । विष्णुलोकमवाप्नोति मोक्षं गंगाम्बु मज्जनात् इति तिथ्यादितत्त्वं ॥

महाज्योतिष्मती स्त्री लताविशेषः बडीमालकंगुनी इतिहिंदीभाषा तत्पर्य्यायः तेजोवती २ वज्रस्रा ३ कनकप्रभा ४ तीक्ष्णा ५ सुवर्णनकुली ६ लवणा ७ अग्निदीप्ता ८ तेजस्विनी ९ स्वरलता १० अग्निफला ११ अग्निगर्भा १२ कंगुनी १३ शैलसुता १४ सुतैला १५ सुवेगा १६ वायसी १७ तीक्ष्णा १८ काकांडी १९ वायसादनी २० गीर्लता २१ श्रीलता २२ सौम्या २३ ब्राह्मी २४ लवणाकिंशुका २५ पारावतपदी २६ पीता २७ पीततैला २८ यशस्विनी २९ मेध्या ३० मेधावती ३१ धीरा ३२ अस्याः गुणाः तिक्तत्वं कटुत्वं किंचित्कटुत्वं ॥ वातकफापहत्वं दाहप्रदत्वं दीपनत्वं मेधा प्रज्ञा कारित्वंच इति राजनिर्घंटः ॥

महाज्वालः पुं होमाग्निः इति हेमचंद्रः ॥

महाज्वाला स्त्री जिनानांविद्याधरीविशेषः इतिहेमचंद्रः हृदग्निशिखाच ॥


महाख्यः पुं कदम्बः इतिराजनिर्घंटः अतिशायनवति त्रि

महातमःप्रभा स्त्री नरकविशेषः सप्तातिशयांधकारमयः यथा घनोदधि घनवात तनुवाततमः स्थिता रत्नशर्करा वालुकापंक धूम तमःप्रभाः महातमःप्रभा चेत्यधोऽधो नरकभूमयः इति हेमचंद्रः ॥

महातरुः पुं स्नुहीवृक्षः इतिहेमचंद्रः हहदृक्षश्च ॥

महातलं क्ली पातालविशेषः यथा अतलं वितलंचैव नितलंच तलातलं महातलंच सुतलं सप्तमंचरसातलं इतिशब्दमाला ॥

महातारा स्त्री जिनानांदेवीविशेषः तत्पर्य्यायः तारा २ महाश्रीः ३ ओंकारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनंता १० शिवा ११ लोकेश्वरा १२ आत्मजा।



१३ खेहरवासिनी १४ भद्रा १५ वैष्णवी १६ नीलसरस्वती १७ शांखनी १८ वसुधारा १९ धनंददा २० त्रिलोचना २१ लोचना २२ इति हेमचंद्रः ॥
महानाली स्त्री आवर्त्तकी इति राजनिर्घंटः ॥
महातिक्तः पुं महानिम्बः इति राजनिर्घंटः अतिशयतिक्तरसयुक्ते त्रि ॥
महातिक्ता स्त्री यवतिक्ता इति राजनिर्घंटः पाठा इति शब्दचंद्रिका ॥
महातीक्ष्णा स्त्री भल्लातकवृक्षः इति राजनिर्घंटः अतिशयतीक्ष्णे त्रि महातेजः क्ली पारदः इति राजनिर्घंटः ॥
महातेजाः पुं कार्त्तिकेयः इति हलायुधः अग्निः इति शब्दचंद्रिका अतिशयतेजस्विनि त्रि।
महात्मा त्रि उत्तमस्वभावयुक्तः तत्पर्य्यायः महेच्छः २ उद्धटः ३ उदारः ४ उदात्तः ५ उदीर्णः ६ महाशयः ७ महामनाः ८ इति हेमचंद्रः ॥
महादंष्ट्रः पुं यमदूतप्रभेदः इति वृहद्धर्मपुराणे ५९ अध्यायः। वृहद्दंष्ट्रे ॥
महादन्तः पुं गजदन्तः तत्पर्य्यायः ईषादन्तः २ इति त्रिकांडशेषः वृहद्दन्तमात्रे च तद्वति त्रि ॥
महादानं क्ली श्रेष्ठदानं तच्च तुलापुरुषादि षोडशप्रकारं यथा मत्स्यपुराणे अथातः संप्रवक्ष्यामि महादान्यलक्षणं इत्यभिधाय आद्यं तु सर्वदानानां तुलापुरुषसंज्ञितं हिरण्यगर्भदानं च ब्रह्मांडं तदनंतरं कल्पपादप। दानं च गोसहस्रं तु पंचमं हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च पंचलांगलकं तद्वद्धरादानं तथैव च हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा द्वादशं विश्वचक्रं च ततः कल्पलतात्मकं सप्तसागरदानं च रत्नधेनुस्तथैव च महाभूतघटस्तद्वत् षोडशः परिकीर्त्तितः अत्र सामान्यलक्षणं सर्वाङ्गं तपांगकं दानं महादाने। विनायकादि पंचापहेवतानां। मांगकं वा तथा मत्स्यपुराणे। विनायकादि ग्रहलोकपालवसुरुद्रादित्यमरुद्गणानां ब्रह्माच्युतेशानवृहस्पतीनां स्वमंत्रतो होम। वन्हौ यस्मात् महानि सर्वाणि।

तथैव वैषां मन्त्रक्रमेणापि यथास्वरूपं कृत्वाद्विना स्रक् जप होम रूपांगयोर्विधानं प्रत्येकं षोडश तुलापुरुषप्रधानानुदिश्येत्युक्तं तत्र महादानत्वेनोद्दिश्येति अत्र नेतरेतराश्रयः तत्र कुंड। मंडपेतिकर्त्तव्यता यागितंजिकनीय लक्षणं अचलदानेपिगतत्वात् एवंच कनकाश्वतिलागावोदासी रथमही गृहाः कन्याच कपिलाधेनुः महादानानि वै दश। इति कूर्मपुराणोक्तमहादानपदं गौणं अन्यथा वज्रशक्तिकल्पनापत्तेः कनकदानादि साधारणेन गतैक रूपाभावाच्च अतएव यदीत्यमिति सर्वेषामेव दानानामेकजन्मार्गं फलं इति मलमासतत्त्वे ॥
महादारु क्ली देवदारु इति जटाधरः वृहत्काष्ठं च ॥
महादेवः पुं शिवः इत्यमरः अस्य अष्टमूर्त्तिगतसोममूर्त्तिरयं यथा महादेवाय सोममूर्त्तये नमः इति शिवपूजापद्धतिः। अस्य व्युत्पत्तिर्यथा ब्रह्मादीनां सुराणां च मुनीनां ब्रह्मवादिनां तेषां च महतां देवो महादेवः प्रकीर्त्तितः महती पूजिता विश्वे मूलप्रकृतिरीश्वरी तस्या देवः पूजितश्च महादेवः स च स्मृतः इति ब्रह्मवैवर्त्ते प्रकृतिखंडे ५३ अध्यायः। तस्य पंचवक्त्रत्व त्रिनेत्रत्व। कारणं यथा ग्रस्तीवकमनीयांगविशारं श्यामसुंदरं अहो निर्वचनीयंच हष्टारूपमतन्मे नवभूव वितृप्तस्य लोचनाभ्यां त्रिलोचनः पद्मनिमेषरहित इति मत्वास्व मानसे भक्त्युद्रेकान्महाभक्तो रुरोद प्रेमविक्लवः सहस्रवदनोऽनंतो भाग्यवांश्चतुराननः वक्त्रभिर्लोचने दृष्ट्वा तदाववक्त्रभिर्मुखैः पश्यामि किं वा किं स्तोमि संप्राप्य नाथमीहशं आस्ये के। न लोचनाभ्यां चक्षुर्भ्यां सपुनः पुनः स्वमानसे कुर्वतीदं शंकरेव तपस्विनि तदभूव चतुर्वक्त्रं पूर्वेणास हपंचमं एकैक वक्त्रे अत्रभे लोचनैश्च त्रिभिस्त्रिभिः वभूव तेन तन्नाम पंचवक्त्रस्त्रिलोचनः चहंषि गुणरूपाणि तस्य ब्रह्मस्वरूपिणः सत्वं रजस्तम इति तस्य हे तनिशामय सत्वांशेन हशा शंभुः पश्यतीति च सात्विकाच राजसेन राजसिकान्तामसेन च ता।

मसान् चबस्य स्नामसानपश्चात
ललाटस्याउरसश्च संहारकाले।
संहर्त्तुरग्नि राविर्भवेत्क्रुधा को
हिताल प्रमानश्च सूर्यकोटिसम
प्रभः ललिह्वानो दीर्घशिख स्त्र
लोकं दग्धुमीरः तस्य भस्म
धारणकारणं यथा विभूतिगात्रः
स विभुः सतीसत्कार भस्मना
यत्ने तस्याश्चास्थिमालां प्रेमभावे
न भस्मच स्वात्मारामो यद्यपीश
स्तथापि पूर्णामहकं सतीशवं गृ
हीत्वाचभ्राम भ्रामं रुरोदहा प्र
लंगां गंचतस्याश्चपपात यत्र यत्र
च सिद्धपीठस्तत्र तत्रबभूव मंत्र
सिद्धिकृत तदाशवावशेषं वक्षू
त्वा वच्चसि शंकरः पपात मूर्छि
तो भूत्वा सिद्धतोरेव राधिके त
दागत्वा महेश्वं तंहत्वा क्रोडे प्रेवा।
थाव श्रुद्दं स्थितत्वं च तस्मै शो
कहरं परं तदाशिवश्च संतुष्टः स्व
लोकं च जगाम ह मृत्युंजये रसका
लेन तां संप्राप प्रियो सती ।
तस्य दिगम्बरत्व जटाधारित्वका
रणं यथा दिग्वस्त्रधारी योगेन ने
त्वा निर्त्यपटं विभोः जटास्तपस्या
कालीनाथत्त्वे यापि विवेकतः न
वेच्छा केश संस्कार स्वाभावेशान

योगिनः समताचेदने पंके लो
ष्ट्रे रत्ने मणीश्वरे तस्य नाग ।
भूषणत्व वृषवाहनत्वकारणं य
था गरुडद्वेषिणो नागाः शंकरं श
रणं ययुः विभर्त्ति कृपयाः सांगेनाने
व शरणागतान् वाहने वृषरूपोह
मप्यस्त वाक्रमहोमः त्रिपुरस्या।
वधे पूर्वमकलाश समुद्भवः
तस्य धुस्तूरपुष्प विल्वपत्रप्रियत्व
व्याघ्रचर्मधारित्व श्मशानस्थायित्व
कारणं यथा पारिजातादिकं पुष्पं
सुगंधि चंदनादिकं मयि संन्यस्य
ते षेव प्रीति र्नास्ति कदाचन।
धुस्तूरे तस्य सदा प्रीति विल्व पत्रा
नुलेपने गंधहीने प्रसूने च योग
हे व्याघ्रचर्मणि दिव्यलोके दिव्य
तल्पे जननताया नु तस्मनः श्मशाने
मीवरहसि ध्यायते मामहर्निशं।
श्रस्य महिमादि यथा श्चाब्रह्म
तृणपर्यंतं सर्वत्र सर्वस्य शिवः स
मा ऽनिर्वचनीयो ऽत्रेपेतस्य प्रमान।
सं ब्रह्मणः पतनेनापि शूलपाणेः त
णोभवेत् अस्यायुषः प्रमाणं च ना
हं जानामि का स्तुतिः ताते मृ
त्युंजयं स्थलं यत्ने मत्तेजसा समं
विनाभया न कश्चित्तं शंकरं तेन
मीश्वरः शंकरः परमात्मा मे प्रा

णोभ्योपि परः शिवः अम्बके स
त्मनः शश्वत्प्रियो मे भवान्परः
नसंवसामि गोलोके वैकुण्ठे न च
वक्षसि सदाशिवस्य हृदये निवद्धः
प्रेमपाशेनः सबंशको हि न ष्टं
चक्रभंगली लयाह्यियः आलोडा।
निकरं योगात्त्र योगी शंकरात् प
रः दिव्यज्ञानेन यः सवृतेष्ट भ्रू
भंगलीलया मृत्युकालादिकं श
क्रोन ज्ञानी शंकरात्परः मम
भक्तिं च दासस्य च मुक्तिं च सर्वसंपदं
सर्वसिद्धिं दातुमीशो न दाता
शंकरात्परः पंचवक्त्रेण मन्नाम
यशो गायत्यहर्निशं मद्रूपं ध्या
यते शश्वत् भक्तः शंकरात्परः ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३६
अध्यायः ॥ शिवनैवेद्य भक्षण
दोष कारणादिकं यथा राधिको
वाच एवंभूतस्य च विभोः सर्व
शस्य महात्मनः तस्य कथय शुक्ल
हे श्रुहि संदेहभंजन श्रीकृष्ण
उवाच श्रृणु देवि प्रवक्ष्यामि नि
हासं पुरातनं पापेंधनानां द
हने ज्वलदग्नि शिखोपमं स्नात
कुमारो वैकुण्ठमेकदाच जगाम ह।
ददर्श भूक्तवंतं च नारायणं हि
नः लक्ष्मीव गृहे स्नात्वैश्च प्रणम्य


भक्तिनोत्सदा अवशेषं ददौ तस्मै
संतुष्टो भक्तवत्सलः प्राप्तमात्रे।
ण तत्रैव भक्ष्य तेनापि किंचन
किंचिद्वरत्त वंधूनां मत्तेणायवत्
र्लभं सिद्धाश्रमेच तद्दत्तं गुरवे
शूलपाणिने भक्ष्य इकाद्य नत्स
र्वं भक्तं च प्राप्तिमात्रतः भूत्वासद्
लभं वस्त्रेनतन्न प्रेमविक्लवः यथा
न डमरु हस्तात् शृंगं च व्याघ्रचर्म
च स्वयं निपत्यप्यश्चाच्च रुदन्मूर्छा
मवापच पतस्मिन्नंतरे देवी दुर्गा दुर्ग
तिनाशिनी सुहाजगाम शीघ्रं तत्र
प्रसन्नवदनेक्षणा रुदंतं मूर्छितं
दृष्ट्वा निपतंतं च भक्तितः प्रहस्य
वांछा पप्रच्छ कुमारं शूलपाणिनः
सर्वं तां कथयामास कुमारः संप्रा
दांजलिः श्रुत्वा क्रुद्धोपमा देवी
शिवं प्रस्फुरिताधरा श्रुत्वा मनोह
रं स्तोत्रं तप्तशाप शिवं शिवा।
दुष्टं चक्रे तदुच्छिष्ट ममद्य विष्णो
मपि सविरंचनपस्तस्मा मयालव्ध
स्त्वमीश्वरः त्वया विष्णोः प्रसादेन
दो विनाहं कथं विभो यतो नैद
त्तं नैवेद्यं विष्णोर्मह्यं त्वयाधुना।
आत्तोमन्तो गृह्णाणतत्फलमेव म
हेश्वर अद्यप्रभृति ये लोका
नैवेद्यं भुंजते तव ते जन्मेके ॥

सारमेया भविष्यंत्यव भारते
इत्युक्ता पार्वती माता इतोदय प्र
तोविभोः हृष्टिः प्रपानतत्कंठे ।
नीलकंठो बभूवसः अपूर्वेनवने
वेघंजन्ममृत्युजराहरं हते उष्ट्रे
यतस्तस्मात्पशपदेहं त्यक्ता मिव ।
लिंगोपरि व यत्नं नरवा स्थाप्य ।
मीश्वर स्तपवित्रं भवेन्नत्र विलो
नैवेद्यमिश्रितं इत्येवं कथितं ।
सर्वं तयाहृष्टं सोप्यपि अमिश
स्तंशंकरस्यनिर्माल्यंचनहृतवा ।
इतिब्रह्मवैवर्ते श्रीकृष्णजन्मखंडे
३७ अध्यायः तस्यावतारायथा
सूतउवाच वेदव्यासावतारापि
द्वापरे कथितानि व महादेवावता
राणि कलौ श्रूयतेनसत्वताः आद्यो
कलियुगे श्वेत देवदेवोमहाद्यु
तिः नाम्नाहिताय विप्राणां मभूद्धे
वस्वतेऽन्तरे हिमच्छिखरे रम्य
छागले पर्वतोत्तमे तस्यशिष्याः
शिखायुक्ताबभूवुरमितप्रभाः श्वे
तः श्वेतशिखश्चैवश्वेताश्वः श्वेत
लोहितः चत्वार स्ते महात्मानो
ब्राह्मणावेदपारगाः सभाव्यो द
मनश्चाथ सहोत्रःकंकणस्तथा ।
लोकाक्षिरथयोगींद्रो जैगीषव्यस्तु
सप्तमे अष्टमेदधिवाहः स्यान्नवमे
ऋषभः प्रभुः भृगुस्तुदशमेप्रोक्त
स्तस्मादुग्रपरः स्मृतः द्वादशोऽत्रिः
समाख्यातोवाली चाथत्रयोदशी ।
चतुर्दशो गौतमस्तु वेदशीर्षोततः
परं गोकर्णश्चाभवत्तस्माद्गुहा
मः शिखंडाथ जटामाल्यट्टहास
श्च दारुकोलांगली क्रमात् श्वेत
स्तथापरः शूली तिंडी मुंडीच वै
क्रमात् सहिष्णुः सोमशर्मा च कु
लीशो अंतिमे प्रभुः वैवस्वते ।
ऽन्तरे शंभोरवतारा स्त्रिशूलिनः
अष्टाविंशति विख्यातास्तेकलि
युगे प्रभोः तीर्थकार्यावताराःस्यु
र्देवशोनकुलीश्वरः इतिकौर्मे ।
५ अध्यायः अस्याष्टषष्टि ना
मानि क्षेत्राणिच यथा मनुरुवाच
मंदरस्थं महादेवं ब्रह्मापृच्छति
शंकरं केषु केषुचस्थानेषुद्रष्टव्यो
सिमया प्रभो ईश्वरउवाच वा
राणस्यां महादेवं प्रयागेतु महे
श्वरं नैमिषे देवदेवंच गयायांप्र
पितामहं कुरुक्षेत्रे विदुःस्थाणुं
प्रभासे शशिभूषणं पुष्करे त
अयोगंधि विश्वंच विमलेश्वर अट्ट
हासे महानादं महेंद्रे च महा
व्रतं उज्जयिन्यां महाकाल माको
टेत्त महोत्कटं ॥ शंकुकर्णं ।

महातेजं गोकर्णेच महाबलं
भैरवे भैरवाकारं भवं वस्त्रापदे
विदुः उग्रं कनखलेचैव भद्रक ।
र्णे भद्रेशिवं देवदारुवने दिंडि
चंडीशंमध्यमंगले ऊर्ध्वरेतं ब
रंडे तु सकलांडे कपर्दिनं कृत्ति
वाससमेकाम्रे स्थलेनाम्नातिकेश्व
रे कालंजरे नीलकंठश्रीकंठं मंड
लेश्वरे ध्यानं सिद्धेश्वरे योगी
गायत्रीचोत्तरेश्वरे विजयं नाम
काश्मीरे जयंतं मरुकेश्वरे हरि
श्चंद्रे हरिंचैव पुरिश्चंद्रेतु शंकरं
जटा वासेश्वरे विद्यां सौम्यं कु
क्कुटेश्वरे भूतेश्वरे भस्मगात्र
जललिंगे जलेश्वरे भिल्लकंक ।
र्णिकायांतु वाराहे विंध्यपर्वतेत्ता
स्त्रं पश्चिमसंध्यायां विरजायां
त्रिलोचनं हृमेश्वरे त्रिशूलिन श्री
शैलेत्रिपुरांतकं नललिंगे विदुः
कालिं कापालिकरवीरके दीम
वकेश्वरे वेदं नेपाले पशुपतिं
पतिं श्रीकारारोहणे कूटे देवि
कायां उमापतिं गंगायां साग
रे त्वमर मोंकारं मसरकंटके स
प्तगोदावरे भीमं स्वयंभुं नकुले
श्वरे कर्णिकारे गणाध्यक्षं के
लासेच गणाधिपं हेमकूटे वि
रूपाक्षं भूर्भुवं गयमादने सि
द्धेश्वरं तु आकाशे पाताले चह
केश्वरं अष्ट षष्टिस्तु नामानिदेव
देवस्य धीमतः पुराणे चोपगी
तानि ब्राह्मणस्य स्वयंभुवायःपठे
त्प्रातरुत्थाय स्नात्वावायदिवाशु
चिः मुच्यते सर्वपापेभ्यः शिव
लोकं स गच्छति इत्याद्य देवी
पुराणे अष्टषष्टि नामानिमहादेव
स्य तस्यद्वादशनाम स्तोत्रं प्र
थमस्तु महादेवो द्वितीयस्तु महे
श्वरः तृतीयः शंकरोज्ञेयश्चतुर्थो
वृषभध्वजः पंचमःकृत्तिवासाश्च ष
ष्ठः कामांगनाशनः सप्तमो देवदेवे
शः श्रीकंठश्चाष्टमःस्मृतः ईश्वरो
नवमोज्ञेयो दशमः पार्वतीपतिः
रुद्र एकादशश्चैव द्वादशः शिव उ
च्यते द्वादशैतानिनामानि त्रिसं
ध्यंयः पठेन्नरः कृतघ्नश्चैव गो
घ्नश्च ब्रह्महा गुरुतल्पगः स्त्रीबाल
घातकश्चैव सुरापो वृषलीपतिः
मुच्यते सर्वपापेभ्यो रुद्रलोकं स
गच्छति इतिस्कंदपुराणे तन्ना
मोच्चारण फलं यथा कोटयो
ब्रह्महत्यानामगम्यागमकोटयः
सद्यः प्रलयमायांति महादेवेति
कीर्त्तनात् महादेवमाहादेव म

हादेवमि वादिनं वत्सं गोरिव
गौरीशो धावंतमनुधावति इति
पुराणं ॥ तस्य प्रणाम मंत्रः
नमस्ते त्वां महादेव लोकानां ।
गुरुमीश्वरं पुंसामपूर्णकामानां
कामपूरामरांघ्रिपं इतिश्रीभा
गवतं महादेवं महात्मान म
हायोगिन मीश्वरं महापापहरं
देवं मकाराय नमो नमः इति
तंत्रं । तस्य कालरूप वर्णानं
यथा नारद उवाच काल रूपी
त्वया ख्यातः शंभुर्गगणगोचरे
लक्षणंच स्वरूपंच सर्वं व्याख्यातु
मर्हसि पुलस्त्य उवाच स्वरूपं ।
त्रिपुरघ्नस्य वक्ष्ये कालरूपिणः
अश्विनी भरणी चैव कृत्तिकापथा ।
मांशकं मेषकं हि विजानीयात्
ऊर्जनेत्रमुदाहृतं आग्नेयांशास्त्र
योब्रह्मन् प्राजापत्यं कवे गृहं
सौम्यार्द्धं वृषनामेदं वदनं परि
कीर्त्तितं मृगार्द्धं मार्द्रादित्यांशा
स्त्रयः सौम्यगृहं त्विदं मिथुनं भुज
योरस्य गगनस्य स्य शूलिनः आ
दित्यांशश्च पुष्यंच अश्लेषा शशि
नो गृहं राशिकर्कटको नाम पा
र्श्वेनत्व विलासिनः पित्र्यं भग
दैवत्य उत्तरांशाश्चकेशरी सूर्य
लेत्रं विभोर्ब्रह्मन् हृदयं परिकी
र्त्तितं उत्तरांशास्त्रयः पाणि श्चि
त्रार्द्धं कन्यकाविदं सोमपुत्रस्य
सम्भूतत्व द्वितीयं जठरं विभोः
चित्राशद्वितयं स्वातीविशाखायां
शक त्रयं द्वितीयं शुक्रसदनं त
लानाभिरुदाहृतं विशाखांशमनु
राध्या ज्येष्ठा भौमगृहं त्विदं द्वि
तीयं वृश्चिकोराशि र्मेढ्रं कालस्व
रूपिणः मूलं पूर्वोत्तराशश्च दे
वाचार्यगृहं धनुः ऊरुयुगलमीश
स्य अमरर्षे प्रगीयते उत्तरा
शास्त्रयोऽत्र तु श्रवणामकरो मुने
धनिष्ठार्द्धं शनिक्षेत्र जानुनी परि
कीर्त्तिते धनिष्ठार्द्धं शतभिषा
प्रोष्ठपद्यांशकं त्रयं सौरं सभा
परमिदं कुम्भो जंघेच विश्रुते ।
प्रोष्ठपद्यांशमेकन्तु उत्तरा रेव
ती तथा द्वितीयं जीवसदनं मी
नस्तच्चरणावुभौ एवं कृत्वा काल
रूपं त्रिनेत्रो यस्तु कोपयन्मार्गे ।
तो राजत्वान विद्वांसो वेदना
बुद्धि युक्तः खे संस्थो नारकाभि
ख्यिनां गः इतिवामनपुराणे ५
अध्यायः ॥
महादेवी स्त्री दुर्गा यथा अपर्णा
सा महादेवी गिरिजा मेनकात्म

जा इति हलायुधः तस्याश्च त
पत्नि यथा पुष्पनेयास्तैः सर्वै
र्महाश्चैव प्रमाणतः धातमिद
ति पूजायां महादेवीततः स्मृता
इति देवीपुराणे ४५ अध्यायः
राज्ञी पाटराणी इति भाषा
तत्पर्यायः महिषी २ पट्टराज्ञी ३
पट्टदेवी ४ इतिराजनिर्घंटः ।
महादैत्यः पुं भौत्यमन्वंतरीयदे
त्यविशेषः यथा बलदैत्यस्य भौ
त्यस्य ष्टात्मपुत्राश्च मनोर्ममेवपकृ
मप्रविरिंद्रो महादैत्यो रिपु
र्हन्ता हरिः स्वयं इतिगारुडे ८८
अध्यायः ॥
महाद्रुमः पुं अश्वत्थवृक्षः इ
तिशब्दचंद्रिका वृहद्वृक्षश्च ।
महाद्रोणा स्त्री वृक्षविशेषः व
डीद्रोण पुष्पी इति हिंदीभाषा
तत्पर्यायः देवकुसुमा २ दिव्या
पुष्पा ३ महाद्रोणी ४ देवी ५ कां
नी ६ देवद्रोणा ७ अस्या गुणाः
कटुत्वं तिक्तत्वं मेध्यत्वं भूता
र्त्तिवात कफाग्निमांद्यनाशित्वं
युक्त्या पारद शोधनत्वंच इति
राजनिर्घंटः ॥
महाद्रोणी स्त्री महाद्रोणा द्रष्टव्यः
इति राज निर्घंटः ॥
महादंदः पुं युद्धवाद्यं इतिश
ब्दरत्नावली अतिशयकलहश्च
महाधनं क्ली वहुमूल्यवस्त्र इ
त्यमरः सवर्णं सिल्हके इतिमेदि
नी चारुवस्त्रे इति हेमचंद्रः ।
कृषिः इतिशब्दरत्नावली अ
तिशयधनयुक्तेत्रि ॥
महाध्वजः पुं स्वर्गे इतिशब्द
चंद्रिका ॥
महान् त्रि वृहत् इत्यमरः अस्य
पर्यायः महत्शब्दे द्रष्टव्यः ।
महान् पुं उष्ट्रः इतिराजनिर्घंटः
दुर्गा यथा महानयायस्थिता
सर्वे महान्वा प्रकृतिर्मता स्मृतिः
सं स्मरणाद्देवी नियतीच नियाम
ता इतिदेवीपुराणे ४५ अध्यायः
महत्तत्त्वं यथा स विकारात् प्र
धानात्तु महत्तत्त्वं प्रजायते महा
निति यतः ख्यातिर्लोकानां जा
यते सदा इति मात्स्ये ३ अ
ध्यायः महत्शब्दप्रयोगनिषेधो
यथा शंखे तैले तथा मांसे ।
वैद्ये ज्योतिषिके द्विजे यात्रायां
पथि निद्रायां महत्शब्दो न दी
यते इति महिम्नस्तवगीय ।
चतुर्थश्लोकटीकायां भरतः ।
महानटः पुं शिवः इतित्रिकांडः ।



घोषः ॥
महानदी स्त्री पुरुषोत्तमक्षेत्रान्त
र्गत कटकस्योत्तरदेशस्थनदीवि
शेषः तस्या नामान्तरं चित्रोत्
पला यथा नदी तत्र महापुण्या
विन्ध्यपाद विनिर्गता चित्रोत्प
लेति विख्याता सर्वपापहरा शुभा
चित्रोत्पला महानदी इति
पुरुषोत्तमतत्त्वे गंगा यथा
अम्बुजमम्बुनि जातं जातु न जायते
अम्बुजादम्बु मुरहरे तद्विपरीतं
पादाम्बुजान्महानदी जाता इत्यु
द्भटः ॥
महानन्दः पुं मुक्तिः इति हला
युधः अतिशयानन्दश्च ॥
महानन्दा स्त्री सुरा इति राज
निर्घण्टः माघशुक्लनवमी यथा
भविष्ये माघमासस्य या शुक्ला न
वमी लोकपूजिता महानन्देति
सा प्रोक्ता सदानन्दकरी नृणां
स्नानं दानं जपो होमो देवार्च्चन।
मुपोषणं सर्वमक्षयं प्रोक्तं
यदस्यां क्रियते नरैः इति ति
थ्यादितत्त्वं नदीविशेषः सा
पद्माया विनिःसृता रामपुराख्य
ग्रामात्पश्चिमत उत्तरदिग्गता म
हानन्दिः पुं नन्दिवर्द्धनराजपुत्रः
यथा चत्वारिंशत्त्रयाभाव्यो रा
जा वै नन्दिवर्द्धनः चत्वारिंशत्त्र
य एव महानन्दिर्भविष्यति म
हानन्दिसुतश्चापि शूद्रायां कलि
कांशजः उत्पत्स्यते महापद्मः
सर्वक्षत्रान्तको नृपः ततः प्रभृति
राजानो भविष्याः शूद्रयोनयः
एकराट् स महापद्म एकच्छत्रो
भविष्यति इति मत्स्यपुराणे २७२
अध्यायः अपि च महानन्दिसुतः
शूद्रा गर्भोद्भवोऽतिलुब्धो महा
पद्मानन्दः परशुराम इवापरो।
ऽखिलक्षत्रियान्तकारी भविता
ततः प्रभृति शूद्रा भूपाला भवि
ष्यन्ति तेन महानन्दिपर्य्यन्तं क्षत्रि
यस्यासीत् इति शुद्धितत्त्वधृतवि
ष्णुपुराणं ॥
महानरकः पुं अतिशयनानाप्र
कारयातनास्थानं इति पुराणं।
महानलः पुं देवनलः इति राज
निर्घण्टः हृद्वह्निश्च ॥
महानवमी स्त्री आश्विनशुक्ला
नवमी यथा श्रीभगवानुवाच उ
ग्रतन्त्रेण मन्त्रेण कुर्य्याद्दुर्गामहो
त्सवं महानवम्यां शारदे बलिदा
नं नृपादयः आश्विने शुक्लपक्षस्य
भवेद्या अष्टमी तिथिः महाष्टमीति।


सा प्रोक्ता देव्याः प्रीतिकरा परा
ततोऽनु नवमी या स्यात्सा महा
नवमी स्मृता सा तिथिः सर्वलो
कानां पूजनीया शिवाप्रिया इति
कालिकापुराणे ६९ अध्यायः
अपि च शरत्काले विशेषेण।
आश्विने ह्यष्टमीषु च महाशब्दो
नवम्यां तु लोके ख्यातिं गमिष्य
ति इति तिथ्यादितत्त्वे ॥
महानसं क्ली रन्धनगृहं तत्पर्य्या
यः रसवती २ पाकस्थानं ३ इ
त्यमरः तत्र रक्षणीया जनायथा
सदृशास्त्रविधानज्ञाः पराभेद्याः
कुलोद्गताः सर्वे महानसे पार्थ्या
लमकेशनखा जनाः इति मात्
स्ये २१९ अध्यायः महानसोऽपि
पुंसि इत्यमरटीकायां रमानाथः
महानाटकं क्ली नाटकविशेषः
तस्य लक्षणं यथा एतदेव यदास
र्वैः पताकास्थानकैर्युतं अंकैश्च
दशभिर्धीरा महानाटकमूचिरे
एतदेव नाटकं यथा बालरामा
यणं इति साहित्यदर्पणं स्व
नामख्यात हनुमद्विरचितरामचरित
ग्रन्थविशेषः यथा एकशीलहनु
मता विरचिते श्रीमन्महानाटके
वीरश्रीयुतरामचन्द्रचरिते प्रत्यु
द्धृते विक्रमैः मिश्रश्रीमधुसूद
न कविना सन्दर्भ्य सज्जीकृते स्व
र्गारोहणनामकोऽत्र नवमो या
तोऽङ्कः एवेत्यसौ इति तस्या
न्तिमश्लोकः ॥
महानाडी स्त्री कण्डरा इति राज
निर्घण्टः ॥
महानादः पुं हस्ती वर्षुकमेघः
महाशब्दः इति मेदिनी सिंहः
कर्णः इति हेमचन्द्रः उष्ट्रः
शंखः इति राजनिर्घण्टः काहल
वाद्यं इति हारावली ॥
महानिद्रा स्त्री मरणं इति जटा
धरः महानिम्बः पुं निम्बवृक्षवि
शेषः घोडानिम इति भाषा तत्प
र्य्यायः कैटर्य्यः २ पवनेष्टः ३ या
वनः ४ इति रत्नमाला अस्य गुणाः
परमग्राहित्वं कषायत्वं अम्लत्वं
शीतलत्वञ्च इति राजवल्लभः।
महानिशा स्त्री निशामध्यभागः
तत्पर्य्यायः निशार्द्धः २ निशीथः
३ इति हेमचन्द्रः ॥ स्मृतिरुक्ता।
महानिशा सार्द्धप्रहरोपरि प्रहर
द्वयं महानिशा तु विज्ञेया मध्यमे
प्रहरद्वये तत्र स्नानं न कुर्वीत।
काम्य नैमित्तिकादृते इति कुबेर
नमहाचार्य्यधृतवचनात् महा।

निशा परकालस्य नाडी चतुष्टया।
स्या परदिनादित्वेन तदानीं पूर्व्वदि
वसीय भोजनानुपपत्तेः नहि न
कृत्यलोपापत्तेश्चेति तिथिन
क्षीयलिखनं स्वरसाच्च तत्र
भक्षणनिषेधो यथा धन्मष्टेव्य
तीते तराचा चैव महानिशा ल
भतेब्रह्महत्यां च तत्र भुक्त्वा च ना
रद गोमांसविण्मूत्रसमं तान्त
न्नं च फलं जलं पुष्पा मभक्ष्या।
मुद्गाया मोदकस्यापिका कथा
इति ब्रह्मवैवर्त्तपुराणं तत्र
पारण निषेधो यथा न रात्रौ
पारणं कुर्य्यादृते वै रोहिणी व्र
तात् निशायां पारणं कुर्य्याद्
र्जयित्वा महानिशां महानिशा
यां पामायां तिथि भांते यदा
भवेत् तृतीयह्नि मुनिश्रेष्ठ पा
रणं कुरुते व्रती इति ब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखण्डे ८ अध्यायः
देवलोक्तमहानिशा रात्रिमध्यम
दण्डद्वयात्मि का द्वितीयप्रहर
शेषदण्ड तृतीयप्रहर प्रथमदण्ड
रूपा तस्यां शिवलिंगोद्भवो य
था माघ कृष्णचतुर्द्दश्यामादि
देवो महानिशि शिवलिंगतया।
योद्भूतः कोटिसूर्य्य समप्रभः

अत्र महानिशा द्वे घटिके रात्रे
र्मध्यमयामयोः इति देवलोक्ता
महानिशा घटिका दण्डरूपा
इति निष्पादितत्वं नोक्ति
क महानिशा यथा गते तु प्रथ
मे यामे तृतीये प्रहरावधि महा
निशायां जन्मवंशाति शेषजेप
त्वन्तु इति तन्त्रसारः । अपि च
निशान्त परमेशानि सूर्य्ये चास्त
मुपागते प्रहरे च गते रात्रौ
घटिके द्वे परे च ये महानिशा
समाख्याता तत्सापि महानिशा
अर्द्धरात्रे गते देवि पशुभावे
न पूजयेत् दण्डैतया पूजा
तत्सर्व्वमक्षयं भवेत् षष्ठे को
शमहेशानि तत्सर्व्वमृतोपमं
सप्तमकोशाके देवि सर्व्वं
क्षीरोपमं भवेत् अष्टम को
शके देवि दुग्धतुल्यं न संशयः
अतः परं महेशानि विषतुल्यं ।
न संशयः एतत्सर्व्वं महेशानि
पशुभावे मयोदितं दिव्य वीर
मते देवि तत्तज्ञानेन पूजयेत्
पंचतत्वं समानीय यदि पूजापरो
भवेत् कालाकाल महेशानि।
विचारं तत्र वर्जयेत् अर्द्धरात्रग
ते देवि कुलपूजा प्रकीर्त्तिता ।


भवेत्तं चानुरूपेण सर्व्वं पूजादिकं
चरेत् अतिस्नेहेन देवेशि नव
स्थाने प्रकाशितं पशो रग्रक ।
दाविह्वे प्रकाशं नैव कारयेत्
इति गुप्तसाधनतन्त्रे ९ पटलः
महानीचः पुं रजकः इति श
ब्दमाला अतिशयहीनवर्णश्च ।
महानीलः पुं भृङ्गराजः नाग
विशेषः मणिविशेषः इति हेम
दिनी तस्य लक्षणं यथा यत्तु
वर्णासम्भूयस्त्वान्ती रशतगुणोस्थि
तः नीलतां तद्याच्चैवं महा
नीलः स उच्यते इति गारुडे
७२ अध्यायः ॥
महानीला स्त्री महाजम्बुः इति
राजनिर्घण्टः ॥
महानीली स्त्री नीलापराजिता
बृहन्नीली तत्पर्य्यायः श्रमरा २
जनिनीलिका ३ तत्यायं श्रीफ।
लिका ५ मेला ६ केशार्हा ७ भृङ्गप
त्रिका ८ अस्याः गुणाः गुणाढ्य
त्वं रंगश्रेष्ठत्वं सवर्णदानत्वं नी
लिकामपेत्य सर्व्वकर्म्मस्वगुणत्वं
इति राजनिर्घण्टः ॥
महानुभावः त्रि महाशयः यथा
सकृत्नीपुणवान्यम्नाय धर्म्मीचयम
वानपि महाशयो महेच्छः स्यात्

हानुभाव इत्यपि इति शब्द
रत्नावली ॥
महान्तः पुं नवधाभक्तियुक्तास्ते
भक्ताः ते शिव शेष धर्म्मादयः
यथा शिवः शेषश्च धर्म्मश्च ब्रह्मा
विष्णुर्महाविविराट् सनत्कुमारः
कपिलः सनकश्च सनन्दनः वो
ढुः पंचशिखो दक्षो नारदश्च स
नातनः भृगुर्मरीचिर्दुर्व्वासाः कश्य
पः पुलहोऽङ्गिराः मयस्ता।
लोमशः शुक्रो वशिष्ठः क्रतुरेव
च बृहस्पतिः कर्द्दमश्च शक्तिरत्रिः
पराशरः मार्कण्डेयो बलिश्चैव।
प्रह्लादश्च गणेश्वरः यमः सूर्य्यश्च
वरुणो वायुश्चेन्द्रो हुताशनः
अक्रूरो पाण्डुलूकश्च नाडीजंघश्च
वायुजः नरो नारायणः कूर्मेन्द्र।
युम्नो विभीषणः नवधाभक्ति
युक्ताश्च कृष्णस्य परमात्मनः एते।
महान्तो यथिष्ठा भक्तानां प्रवराल
या इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे
९ अध्यायः ॥
महापंचमूलं क्ली बृहत्पंचमूलं
तद्यथा विल्वोऽग्निमन्थः श्योनाकः
काश्मर्य्यः पाटला तथा सर्व्वैस्त
मिलितैरेतैः स्यान्महापंचमूलकं
इति राजनिर्घण्टः ॥



महापंचविषं क्ली हृद्धविषपंच
कं तद्यथा शृंगीचकालकूटस्व
मुस्तकोवत्सनाभकः शांखकर्णी
तियोगोऽयंमहापंचविषाभिधः
इतिराजनिर्घंटः ॥
महापद्मा स्त्री महाजम्बुः इति
रत्नमाला वृहज्जम्बुके त्रि
महापथः पुं प्रधानपथः तत्
पर्य्यायः कंदापथः २ संसरणं ३
श्रीपथः ४ राजवर्त्म ५ उपनिष्क्रा
मणं ६ उपनिष्करं ७ इतिहेमचंद्रः
महापथगमः पुं मरणं इतिज
टाधरः ॥
महापद्मः पुं अष्टनागांतर्गतना
गभेदः तत्पर्य्यायः अतिशुक्लः
२ दशाविंडकमस्तकः ३ इतिहेम
चंद्रः कुवेरस्यनवनिध्यंतर्गत नि
धिविशेषः इतिजटाधरः लक्ष
कोटिसंख्या इतिलीलावती ।
शुक्लपद्मेक्ली इतिरत्नमाला
महापातक क्ली पापविशेषः त
द्भेदविधं यथा ब्रह्महत्या सु
रापानंस्तेयं गुर्वंगनागमः महा
ति पातकान्याहुः संसर्गश्चापि
तैसह इतिमानवे ॥ अन्यच्च
यः महापातकजं विह्नं
सप्तजन्मसुजायते वाधतेव्याधि
रूपेण तस्यकृच्छ्रादिभिः समः ।
इति शातातपीय कर्मविपाकः
तत्नामकरमेषेषु शतः स्नानं ।
विधीयते हविष्यं ब्रह्मचर्य्यंच म
हापातक नाशनं इतिमलमासत
त्वे हठेनिमंगलं नाम यस्य
वापि प्रवर्त्तते भस्मीभवंति राजें
द्र महापातक कोटयः इति
पुराणं ॥
महापातकी त्रि पंचप्रकारमहा
पातकयुक्तः सचपतितः यथा
महापातकिनोयेचपतिता स्ते
प्रकीर्त्तिताः पतितानां नराद्रः
स्यात्रान्यो हि नोष्पिसंचयः तथा
फ्कपानः पिंडोवाकार्य्य आद्ध
दिकं क्वचित् पतानिपतितानां
तयः करोति विमोहितः तमा
कृच्छ्रद्वयेनैव तस्यशुद्धिर्नचान्य
था इतिशुद्धितत्त्वधृतविष्णु
वचनं ॥ पारिभाषिक महा
पातकी यथा कृतपापप्रतिष्ठांच
नीचै र्यो प्रतिमाणां द्विजदुर्गा न
प्रणामेषस्तुसमहापातकी स्मृतः
इति देवीपुराणे व्यासनारद सं
वादः अपिच पितरं मातरं ।
भार्य्या गुरुपत्नी गुरुंपरं योन
पुष्णाति कापसात स महा पा

तकीशिव इतिब्रह्मवैवर्त्तेगण
पतिखंडे ४४ अध्यायः ।
महापापं क्ली महापातकं य
था महापापेषु सर्वे स्यात्तदर्द्धं त
पपातके दयात्पापेषु षष्ठां
शं ज्ञात्वा व्याधिवलावलं इति
मलमासतत्वे ॥
महापारेवतं क्ली फलवृक्षविशे
षः बडापारेवत इति हिंदी भाषा
तत्पर्य्यायः स्वर्णपारेवतं २ सा
म्राणिजं ३ द्वारिकं ४ रक्तरैवतकं
५ वृहत्पारेवतं ६ द्वीपजं ७ द्वी
पखर्जूरं ८ अस्यगुणाः मधुर
त्वं वलकारित्वं पुष्टिवर्द्धनत्वं
हृष्यत्वं मूर्च्छाभ्रमद्वनत्व पारेवता
दधिकगुणत्वंच इतिराजनिर्घंटः
महापाशः पुं यमदूतविशेषः
इतिब्रह्मवैवर्त्तपुराणे ५९ अध्यायः
वृहन्याशाख्य ॥
महापासकः पुं वृद्धभिल्लकः
तत्पर्य्यायः वेलकः श्यामसा
रः ३ प्रव्रजितः ४ गोमीनः ५ इति
त्रिकांडशेषः ॥
महापिंडीतकः पुं कृष्णवर्णोम।
हामदनवृक्षः तत्पर्य्यायः वारा।
हः २ अस्यगुणाः श्रेष्ठत्वं कटु ति
क्तरसान्वितत्वं वह्निदीपनत्व कफहरो
गपक्कामाशय शोधनत्वंच इति
राजनिर्घंटः ॥
महापिंडीतरुः पुं वृक्षविशेषः
पेडिया इतिहिंदीभाषा तत्पर्य्या
यः स्थनपिंडीतकः २ करा
हाटः ३ त्वरः ४ शस्त्रकोषतरुः ५
शारः ६ पिंडीतरुः ७ अस्यगुणाः
कषायत्वं उष्णत्वं त्रिदोष शा
मनत्वं चर्मरोगापहत्वं विशे
षात् रक्तदोष नाशित्वंच इति
राजनिर्घंटः ॥
महापीलुः पुं पीलुवृक्षविशेषः
तत्पर्य्यायः वृहत्पीलुः २ महा
फलः ३ राजपीलुः ४ महावृक्षः ५
मधुपीलुः ६ अस्यफलगुणाः म
धुरत्वं हृष्यत्वं विषनाशित्वं ।
पित्तप्रशमनत्वं रुच्यत्वं आम
घ्नत्वं दीपनीयकत्वंच इतिराज
निर्घंटः ॥
महापुराणं क्ली यकादशलक्षणा
युक्तव्यासप्रणीताष्टादशसंख्यक
पुराणविशेषः तस्यलक्षणंयथा स
र्गश्चापि विसर्गश्च स्थिति स्तेषां ।
च पालनं कर्मणांवासनावार्त्ता ।
मनूनाञ्चक्रमेणच वर्णनेप्रलया
नांच मोक्षस्यच निरूपणं उत्की
र्त्तनं हरेरेव देवानांच पृथक् ।



पृथक् दशाधिकं लक्षणं च मह
तां परिकीर्त्तितं इति ब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखंडे १२२ अध्यायः
महापुरुषः पुं श्रेष्ठनरः नाराय
णः यथा ध्येयं सदापरिभवघ्न
मभीष्टदो ऽहं तीर्थास्पदं शिव
विरिंचिनुतं शरण्यं भृत्यार्त्तिहं
प्रणतपाल भवाब्धिपोतं वंदे
महापुरुषते चरणारविंदं त्य
क्त्वा सुदुस्त्यजसुरेप्सितराज्य ल
क्ष्मीं धर्मिष्ठ आर्य्यवचसा यदगाद
रण्यं मायामृगं दयितयेप्सितम
न्वधावद्वंदे महापुरुषते चरणार
विंदं इत्येकादशस्कंधे श्रीभा
गवते महापुरुषदन्ता स्त्री शतमू
ली इति रत्नमाला ॥
महापुरुषदंतिका स्त्री महाश्रा
वणी इति राजनिर्घंटः ॥
महापुष्पा स्त्री अपराजिता इ
ति शब्दचंद्रिका ॥
महापृष्ठः पुं उष्ट्रः इति राज
निर्घंटः बृहत्पृष्ठश्च ॥
महाप्रकृतिः स्त्री दुर्गा यथा।
विनिश्चेतन्मभावाद्धा चेतनाचाविनि
स्तृता महात्वाच्च स्थिता सर्वे
महत्वा प्रकृतिर्मता इति देवी
पुराणे ४५ अध्यायः ॥


महाप्रभः त्रि अतिशयदीप्तियुक्तः
महती प्रभा यस्येति बहुव्रीहि
मास निष्पन्नः ॥
महाप्रभा स्त्री महतीदीप्तिः य
था महाप्रभात्वावच्छिन्नाभावो ऽन्य
कारः इति सामान्यलक्षणायां
जगदीशः ॥
महाप्रभुः पुं परमेश्वरः यथा
वंदेऽनंताद्भुतैश्वर्यं श्रीचैतन्यं
महाप्रभुं नीचोऽपि यत्प्रसा
दात्स्यात्सदाचार प्रवर्त्तकः
इति हरिभक्तिविलासे २ विला
सः अनेन महतं चाविनर्को।
ऐश्वर्य्यप्रभावो यस्येति यतो म
हाप्रभुं परमेश्वरं इति तट्टी
कायां जीवगोस्वामी अपिच
सोयं नीलगिरीश्वरः सविभवा
याचाच सा गुंडिचा ते ते दिग्दि
गागताः सत्कृतिनस्तास्ता दिदृक्षा
र्त्तयः आरामाश्च तपवनेंद्रनवन
श्रीणां तिरस्कारिणः सर्वाण्येवम
हाप्रभुं वन विना शून्यानि मन्याम
हे इति चैतन्यचंद्रोदयनाटकः।
महाप्रलयः पुं त्रिलोकनाशः त
त्पर्य्यायः संहारः २ इति स्त्राकुय
तस्यविवरणं यथा श्रीमार्कंडे
यउवाच मन्वंतरे मनोः कालो

यावत्पालयते प्रजाः एको मनुः
सकालस्तु मन्वंतरं मितिश्रुतं त
देकसप्ततियुगे र्देवानामिह जा
यते तेलत्र्यब्दैशाभिः कल्पोति
नमकं त्वं वेधसः दिनांते वेधसो
जातेस्वप्नस्तस्य जायते योग
निद्रा महामायासमायातिपितामह
हं नाभिपद्मप्रविश्याथ विश्रा
मितेतेजसः सत्वं सशेते भ
गवान् ब्रह्मालोकपितामहः त
तोविष्णुः स्वयंभूत्वा रुद्ररूपीजना
र्द्दनः पूर्ववन्नाशयामास समर्दं म
वनत्रयं वायुनावह्निनासर्वं दा
हयामासवैयथा महाप्रलयकाले
षु तथासर्वं जगत्त्रयं ततं यांति
प्रतापाज्जा महर्लोक निवासिनः
त्रैलोक्यं दाहयामास पीडिता।
दारुणाग्निना ततःकालांतकैर्मे
घैर्नीना वर्षोर्महास्वनैः समुत्था
यमहावृष्टि मापूर्य्यभुवनत्रयं व
लत्तरंगे स्तोयौघै रेकवस्यानसं।
शेनेः निधाय जठरे लोकानिमां
स्त्रीन्सजनार्द्दनः नागपर्य्यंकशाय
ने शेते स परमेश्वरः शयाने।
नाभिकमलेब्रह्माणंसजगत्प्रभुः
संस्थाप्य जीनिमालोकान्दग्धान्पुत्रा
श्रियासह शेते स योगिशय्या

यांब्रह्मानारायणात्मकः योगनि
द्रावशंयात स्त्रैलोक्यग्रासबृंहितः
त्रैलोक्यमखिल दग्धं यदा काला
ग्निना तदा अनंतः पृथिवींसर्वा
विस्तारितक्रमागतः तेनत्यक्ता
तपृथिवीत्तणमात्रादधोगता प
तिता कूर्मपृष्ठतुविशीर्णा तदा भ
वत कूर्मोपि महत्तोयत्वाच्चलत्पी
पृथिवी जले ब्रह्मांडंपद्मि गच्छ।
मपृष्ठस्थयंतदा ॥ ब्रह्मांडं।
खिंडसंयोगाच्चूर्णिता पृथिवीभवद्
इतितां परिजग्राह कूर्मरूपी ज
नार्द्दनः चलजलौघ सस्वर्गाच्चले
ना धरया तदा कूर्मपृष्ठे बद्धतैर
वेरंडैविंतनीकृतं अनंतस्तत्र ग
त्वा त यत्रक्षीरोदसागरः तत्र
स्वयंश्रियायुक्तं सशुभ्रंतंजनार्द्दनं
फणायामस्थया दभ्रेत्रैलोक्यग्रास
बृंहितं पूर्वफणां वितत्योर्द्ध।
पम कृत्वामहाबलः विस्तमाछाद
यामास शेषाख्यः परमेश्वरः त
स्योपधान मकरोद्दंततो दक्षिणां
फणां उत्तरां पादयोश्चक्रे उप
धानं महाबलः तालवृन्तेन दाव
क्रेसशेषः पश्चिमांफणां स्वयंत्वा
वीजयामास शेषरूपी जनार्द्दने।
शांखचक्रं नंदकासिमिषुधीहे म

हाबलः पेशानयाथफलाथासस्थे
गरुडंनरा गदांपद्मंच शार्ङ्गंचा
तथैव विविधायुधं यानिचान्या।
नस्यासन्नाभेय्याफलयादयोएवं
कृत्वास्वकं कायं शयनीयंनदाह
रेः दृष्टीमयरकायेनमग्नामाक्रम्य
वांभसि त्रैलोक्यंब्रह्मसहितं स
लक्ष्मीकंजनार्दनं सोथासंगज
गहीजगत्कारणकारणं नि
त्यानंदं वेदमयंब्रह्मण्यंपरमेश्वरं
जगत्काभणकर्त्तारं जगत्कारण
कारणं भूतभव्यभवन्नाथं पय
पापतिं हरिं स्थाय शिरसा
नंतः स्वयमेवस्वकांतनुंएवं ब्र
ह्मदिनस्यैव प्रमाणेन निशाह्वाः
संख्यांच समयिशायशेते नार
यणो हृषीकः यस्माद्ययंतपस्ता।
योब्रह्मणःस्याहिने दिने तस्मा
द्दैनंदिनमिति व्याचक्षते पुराविदः
यातीनायां निशायांतु ब्रह्मालो
कपितामहः त्यक्त्वानिद्रांसमुत्ता।
योसयुनः सृष्टयेविदुः इतिका
लिकापुराणे २२ अध्यायः ग्याथमते
तत्प्रभावानथिकारणकालः सचव
रमध्वंसरूपः ॥
महाप्रसादः पुं विसनैवेद्यादि।
यथा पादोदकंच निर्माल्यं नै।
वेद्यंचविशेषतः महाप्रसाद इ
त्युक्त्वा ग्रासं विष्णोः प्रयत्नतः
इत्येकादशीतत्त्व धृत मत्स्यसूक्त
वचनं श्रीजगन्नाथस्यमहाप्रसा
दमाहात्म्यंजगन्नाथशब्दे द्रष्टव्यं
अतिशयप्रसन्नता च ॥
महाप्राणः पुं द्रोणकाकः इति
राजनिर्घण्टः वर्णविशेषः सच
खघछझठढथधफभशषस
हरूपः यथा वर्गाणांप्रथमतृती
यपंचमाः प्रथमतृतीयपंचमोयरल
वाश्चाल्पप्राणाः अन्येमहाप्राणा
इत्यर्थः इतिसिद्धांतकौमुदी ।
महाफलः पुं विल्ववृक्षः इतिर
त्नमाला वृहत्फले क्ली ॥
महाफला स्त्री इंद्रवारुणी इति
जटाधरः ।
महाफेणा स्त्री हिंडीरः इतिशब्द
चंद्रिका ॥
महाबलं क्ली सीसकं इतिहेम
चंद्रः ॥
महाबलः पुं बुद्धः इतित्रिकांड
शेषः वायुः बलीयसि त्रि
इतिहेमचंद्रः ॥
महाबला स्त्री बलाभेदः पीत
वाट्यालकः तत्पर्यायः ऋषिप्रो
क्ता २ अतिबला ३ पीतपुष्पी ४

इतिरत्नमाला ॥
महाबोधिः पुं बुद्धः इति हेम
चंद्रः ॥
महाब्राह्मणः पुं निन्दितब्राह्मणः
इति पाणिनिव्याकरणं अस्मिन्
देशेअयंअग्रदानित्वेनप्रसिद्धः ।
महाभद्रा स्त्री गंगा इतिशब्दमाला
काश्मरी इतिराजनिर्घण्टः ॥
महाभटः पुं अतिशययोद्धा य
था ततोजसा दैत्यमहाभटार्पितं
चकास दंतः खड्गीनिसीयितिच
क्रेणाविच्छेद निशात नेमिना ह
रिर्यथा ताम्रसूत तुमूर्जितं इति
श्रीभागवते २ स्कंधे ९ अध्यायः
महाभारतं क्ली व्यासप्रणीतेति
हासशास्त्रं तन्नाम कारणंयथा
एकत श्चतुरो वेदा भारतं चैक।
देकतः पुरा किलसुरैः सर्वैः
समस्य तुलयाधृतं चतुर्भ्यः स
रहस्येभ्यो वेदेभ्यो ऽभ्यधिकं।
यदा तदाप्रभृति लोकेऽस्मिन्।
महाभारत मुच्यते महत्वाद्भा।
रवत्वाच्च महाभारतमुच्यते इति
महाभारते आदिपर्व लोक।
विशेषतस्तस्य श्लोकसंख्या वाच
कास्ययथा षष्टिशतसहस्राणिच
कारणांसंहितां त्रिशक्त्वन ।
महस्त्रंच देवलोके प्रतिष्ठितं।
पित्र्ये पंचदश प्रोक्तं रक्षो यक्षे
चतुर्दश एकंशतसहस्त्रंतुमान्
षेषु प्रतिष्ठितं नारदोऽश्रावयद्देवा
नसितो देवलः पितॄन् गंधर्व य
क्षरक्षांसि श्रावयामास वै शुकः
अस्मिंस्तुमानुषेलोके वैशंपायन
उक्तवान् इतिमहाभारते पर्वाणि
अनुक्रमणिकाध्यायः तत्र शा
तपर्वाणि तनष्टादशमुख्यानियथा
आदि सभाविपिनानि विराट प्रो
द्यम भीष्म गुरूणिचकर्णः शल्य
कसौप्तिक पर्व तथास्त्री शांत्यनु
शासिततुरगममेधाः आश्रममौषल
यानिक नाकाः पर्वाणिपर्वणां ना
मविशेषः इतिभारतटीका ह
रिवंश सहितो नविंशति पर्व
णामंतर्गत शतपर्वविभागस्तेषा
मध्याय श्लोकसंख्याच यथा आ
दि पर्वणि २२७ अध्यायः ॥
८९८४ श्लोकाः २ सभापर्वणि ९
पर्वाणि ७८ अध्यायाः २५११ श्लोकाः
३ आरण्यकपर्वणि १६ पर्वाणि २६
अध्यायाः ११६६४ श्लोकाः ४ वि
राटपर्वणि ४ पर्वाणि ६७ अध्याया
२०५० श्लोकाः ५ उद्योगपर्वणि ११
पर्वाणि १९९ अध्यायाः ६६२८।




श्लोकाः ९ भीष्मपर्वणि ५ पर्वाणि
११७ अध्यायाः ५८८४ श्लोकाः ७
द्रोणपर्वणि ८ पर्वाणि १७० अध्यायः
९९०९ श्लोकाः ८ कर्णपर्वणि १ पर्व
६९ अध्यायाः ४९६४ श्लोकाः ९
शल्यपर्वणि ४ पर्वाणि ५९ अध्या
याः ३२२० श्लोकाः १० सौप्तिकपर्व
णि २ पर्वाणि १८ अध्यायाः ८७० श्लो
काः ११ स्त्रीपर्वणि ५ पर्वाणि २७ अ
ध्यायाः ७७५ श्लोकाः १२ शान्तिपर्व
णि ४ पर्वाणि ३३९ अध्यायाः १४७३२
श्लोकाः १३ अनुशासनपर्वणि ११
पर्व १४६ अध्यायः ८००० श्लोकाः
१४ अश्वमेधपर्वणि २ पर्वाणि १०३
अध्यायाः ३३२० श्लोकाः १५ आ
श्रमवासपर्वणि ३ पर्वाणि ४२ अ
ध्यायाः १५०६ श्लोकाः १६ मौसलप
र्वणि १ पर्व ८ अध्यायाः ३०० श्लोकाः
१७ महाप्रास्थानिकपर्वणि १ पर्व
३ अध्यायाः ३२० श्लोकाः १८ स्वर्ग
पर्वणि १ पर्व ५ अध्यायाः २०० श्लो
काः १९ हरिवंशे आश्चर्यपर्वणि
१ पर्व २४४ अध्यायाः १२००० श्लो
काः हरिवंशे भविष्योत्तरपाठभो
वे १ पर्व ११२ अध्यायाः २४४८ श्लो
काः इति महाभारते आदिपर्वणि
पर्वसंग्रहनामकः २ अध्यायः ।

तत्श्रवणविधादि यथा जन्मेजय
उवाच भगवन्केनविधिना श्रोतव्यं
भारतं बुधैः फलं किं के च देवाश्च ।
पूज्या वै पारणेष्विह देयं समा
प्ते भगवान् किं वि पर्वणि पर्वणि
वाचकः कीदृशश्चात्र एष्टव्यस्तद्ब्रवीहि
मे वैशंपायन उवाच शृणु राजन्
विधिमिमं फलं यच्चापि भारतात
श्रुताद्भवति राजेन्द्र यत्त्वं मामनु
पृच्छसि दिविदेवा महीपाल क्री
डार्थं अवनिं गताः कृत्वा कार्य
मिदं चैव ततश्च दिवमागताः हंत
यत्ते प्रवक्ष्यामि तच्छृणुष्व समाहितः
ऋषीणां देवतानां च संभवं वसुधा
तले अत्र रुद्रास्तथा साध्या विश्वेदे
वाश्च शाश्वताः आदित्या अश्वि
नौ देवौ लोकपाला महर्षयः गुह्य
काश्च सगंधर्वा नागा विद्याधरा
स्तथा सिद्धा धर्मः स्वयंभूश्च मुनिः
कात्यायनो वरः गिरयः सागरा न
द्यस्तथैवाप्सरसां गणाः ग्रहाः सं
वत्सराश्चैव अयनान्यृतव तथा
स्थावरं जंगमं चैव जगत्सर्वं सुरा
सुरं भारते भरतश्रेष्ठ एकस्थ
मिह दृश्यते तेषां श्रुत्वा प्रतिष्ठा
नं नामकर्मानुकीर्तनात् कृत्वापि
पातकं घोरं सद्यो मुच्येत मानवः ।

इतिहासमिमं श्रुत्वा यथावत्ता
नुपूर्वशः संयतात्मा शुचिर्भूत्वा पा
रं गत्वा च भारत तेषां श्राद्धा
नि देयानि श्रुत्वा भारत भारतं
ब्राह्मणेभ्यो यथाशक्त्या भक्त्या च
भरतर्षभ महादानानि देयानि र
त्नानि विविधानि च गावः कांस्यो
पदोहाश्च कन्याश्चैव स्वलंकृताः
सर्वकामगुणोपेता यानानि विवि
धानि च भवनानि विचित्राणि भू
मिर्वासांसि कांचनं वाहनानि च दे
यानि हया मत्ताश्च वारणाः शयनं
शिबिकाश्चैव स्यंदनाश्च स्वलंकृताः
यद्यद्गृहे वरं किंचिद्यदस्ति ।
महद्वसु तत्तद्देयं द्विजातिभ्यश्चा
त्मा दाराश्च सूनवः श्रद्धया पठ्या
त्तं क्रमशस्तस्य पारगः शक्तितः
सुमनाहृष्टः शुश्रूषुरविकल्पनः
सत्यार्जवरतो दान्तः शुचिः शौच
समन्वितः श्रद्धधानो जितक्रोधो
यथा सिध्यति तच्छृणु शुचिः
शीलान्वितोऽचारः शुक्लवासा जितें
द्रियः संस्कृतः सर्वशास्त्रज्ञः श्रद्द
धानोऽनसूयकः रूपवान्सुभगो दा
न्तः सत्यवादी जितेंद्रियः दानमान
गृहीतश्च कार्यो भवति वाचकः अ
विलंबमनायस्तमद्रुतं धीरमूर्जि

तं असंसक्ताक्षरपदं रस भाव
समन्वितं त्रिषष्टिवर्णसंयुक्तमष्ट
स्थानसमन्वितं वाचयेद्वाचकः स्व
स्थः स्वासीनः सुसमाहितः नाराय
णं नमस्कृत्य नरं चैव नरोत्तमं दे
वीं सरस्वतीं चैव ततो जयमुदी
रयेत् ईदृशाद्वाचकाद्राजन् श्रुत्वा
भारत भारतं नियमस्थः शुचिः
श्रोता शृणुयात्फलमश्नुते पा
रणं प्रथमं प्राप्य द्विजान् कामैः
स्तर्पयेत् अग्निष्टोमस्य यागस्य
फलं वै लभते नरः अप्सरोगणा ।
संकीर्णं विमानं लभते महत् प्र
हृष्टः सत्वदेवश्च दिवं याति समा
हितः द्वितीयं पारणं प्राप्य अ
तिरात्रफलं लभेत् सर्वरत्नमयं
दिव्यं विमानमधिरोहति दिव्य
माल्याम्बरधरो दिव्यगंधविभूषितः
दिव्यांगदधरो नित्यं देवलोके ।
महीयते तृतीयं पारणं प्राप्य द्वा
दशाहफलं लभेत् वसत्यमर ।
संकाशो वर्षाण्ययुतशो दिवि चे
तुर्थे वाजपेयस्य पंचमे द्विगुणं
फलं उदितादित्यसंकाशं ज्वलन
मनलोपमं विमानं विबुधैः सा
र्द्धमारुह्य दिवि गच्छति वर्षायुता
नि भवने शक्रस्य दिवि मोदते सुखं ।




द्विगुणमस्तीह समस्मे त्रिगुणं फलं
कैलासशिखराकारं वैडूर्यमय वे
दिकं परिक्षिप्तं च बहुधा मणि वि
द्रुमभूषितं विमानं समधिष्ठाय का
मगं साप्सरोगणं साप्सरोगणः सर्वा
ल्लोकान् विचरते द्वितीय इव भास्करः
अष्टमे राजसूयस्य पारणे लभते फ
लं चंद्रोदयनिभं रम्यं विमानमधि
रोहति चंद्ररश्मिप्रतीकाशैः हयै
र्युक्तं मनोजवैः सेव्यमानो व
रस्त्रीणां चंद्रकांततरैर्मुखैः
मेखलानां निनादेन नूपुराणां च।
निस्वनैः अंके परमनारीणां सुख
सुप्तो विबुध्यते नवमे क्रतुराज।
स्य वाजिमेधस्य भारत कांचनस्तं।
भनिर्व्यूहं वैडूर्यकृतवेदिकं जाम्बून
दमयैर्दिव्यैर्गवाक्षैः सर्वतो वृतं
सेवितं चाप्सरःसंघैर्गंधर्वैर्दि
व्यचारिभिः विमानं समधिष्ठाय श्रि
या परमया ज्वलन् दिव्यमाल्याम्ब
रधरो दिव्यचंदनरूषितः मोद
ते दैवतैः सार्धं दिवि देव इवा
परः दशमं पारणं प्राप्य द्विजा
तीन् अभिवंद्य च किंकिणीजालनि
र्घोषं पताकाध्वजशोभितं रत्न
वेदिकसंबाधं वैडूर्यमणितोरणं।
णं हेमजालपरिक्षिप्तं प्रवालवड।

भीमुखं गंधर्वैर्गीतकुशलैरप्स।
रोभिश्च शोभितं विमानं सुकृता।
वासं सुखेनैवाधिगच्छति मुकु
टेनार्कवर्णेन जाम्बूनदविभूषिता
दिव्यचंदनदिग्धांगो दिव्यमाल्यवि
भूषितः दिव्यान् लोकान् विचरति
दिव्यैर्भोगैः समन्वितः विबुधानां
प्रसादेन श्रिया परमया युतः अथ
वर्षगणानेवं स्वर्गलोके महीयते
अथगंधर्वसहितः सहस्राण्येक
विंशतिं पुरंदरपुरे रम्ये शक्रेण।
सह मोदते दिव्ययानविमानेषु
लोकेषु विविधेषु च दिव्यनारीग
णाकीर्णो निवसत्यमरो यथा ततः
सूर्यस्य भवने चंद्रस्य भवने तथा
शिवस्य भवने राजन् विष्णोर्याति।
सलोकतां एवमेतन्महाराज ना
त्र कार्या विचारणा श्रद्दधानेन वै
भाव्यमेवमाह गुरुर्मम लेख
कस्य तु दातव्यं मनसा यद्यदिच्छति
हस्त्यश्वरथयानानि वाहनं विशे
षतः कटकं कुंडले चैव ब्रह्मसूत्रं
तथापरं वस्त्रं चैव विचित्रं च गंधं
चैव विशेषतः देववत्पूजयेत्तं।
विष्णुलोकमवाप्नुयात् अतः परं
प्रवक्ष्यामि यानि देयानि भारते वा
च्यमाने तु विप्रेभ्यो राजन् ।

पर्वणि पर्वणि जातिं देशं च स
त्वं च माहात्म्यं भरतर्षभ धर्मे
वृत्तिं च विज्ञाय क्षत्रियाणां नराधि
प स्वस्ति वाच्य द्विजानादौ ततः
कार्यं प्रवर्तते समाप्ते पर्वणि
ततः स्वशक्त्या पूजयेत् द्विजान्
आदौ तु वाचकं तत्र वस्त्रगंधसमन्वि।
तं विधिवद्भोजयेद्राजन् मधुपाय
समुत्तमं ततो मूल फलप्रायं पा
यसं मधुसर्पिषा आस्तीके भो।
जयेद्राजन् दद्याच्चैव गुडौदनं॥
अपूपैश्चैव पूपैश्च मोदकैश्च
समन्वितं सभापर्वणि राजेंद्र ह
विष्यं भोजयेत् द्विजान् आरण्य।
के मूलफलैस्तर्पयेत् द्विजोत्तमान्
अरणीपर्व चासाद्य जलकुंभान् प्र
दापयेत् तर्पणानि च मुख्यानि
वन्यमूल फलानि च सर्वकाम गु
णोपेतं विप्रेभ्योऽन्नं प्रदापयेत्।
विराटपर्वणि तथा वासांसि विवि
धानि च उद्योगे भरतश्रेष्ठ सर्व
काम गुणान्वितं भोजनं भोजये
द्विप्रान् गंधमाल्यैरलंकृतान् भी
ष्मपर्वणि राजेंद्र दत्वा यानमतः।
परं ततः सर्वगुणोपेतमन्नं दद्या
त् सुसंस्कृतं द्रोणपर्वणि विप्रेभ्यो
भोजनं परमार्चितं शराश्चरे।

याराजेंद्र चापान्यसिवरांस्तथा।
कर्णपर्वण्यपि तथा भोजनं सार्व
कामिकं विप्रेभ्यः संस्कृतं सम्य
क् दद्यात् संयतमानसः शल्य
पर्वणि राजेंद्र मोदकैः सगुडौ द
नैः अपूपैस्तर्पणैश्चैव सर्वम
न्नं प्रदापयेत् गदापर्वण्यपि तथा
मुद्गमिश्रं प्रदापयेत् स्त्रीपर्वणि
तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान्।
घृतौदनं पुरस्ताच्च ऐषीके दाप
येत् पुनः ततः सर्वगुणोपेतमन्नं
दद्यात् सुसंस्कृतं शांतिप
र्वण्यपि तथा हविष्यं भोजयेद्द्वि
जान् आश्वमेधिकमासाद्य भोज
नं सर्वकामिकं तथाश्रमनिवासे
तु हविष्यं भोजयेत् द्विजान् मौ
सले सार्वगुणिकं गंधमाल्यानुले
पनं महाप्रास्थानिके तद्वत् सर्व
कामगुणान्वितं स्वर्गपर्वण्यपि त
था हविष्यं भोजयेद्द्विजान् हरिवं
शपर्वणि च पायसं तत्र भोजयेत्
पारणे पारणे राजन् यथावद्भरत।
र्षभ समाप्य सर्वाः प्रयतः संहि
ताः शास्त्रकोविदः शुभे देशे।
निवेश्याथ क्षौम वस्त्राभिसंवृताः
शुक्लांबरधरः स्रग्वी शुचिर्भूत्वा।
स्वलंकृतः अर्चयेत यथान्यायं गंधमा



षैः पृथक्पृथक् संहिता पुस्त
कान्यजन् प्रयतः सुसमाहितः भ
क्ष्यैर्माल्यैश्चापेयैश्च कामैश्च वि
विधैश्शुभैः हिरण्यं च सुवर्णं च द
क्षिणामथ दापयेत् देवताः की
र्त्तयेत् सर्वा नरनारायणौ तथा
ततो गन्धैश्च माल्यैश्च स्वलंकृत्य
द्विजोत्तमान् तर्पयेद्विविधैः का
मैर्दानैश्चोच्चावचैस्तथा अति
रात्रस्य यज्ञस्य फलं प्राप्नोति मा
नवः प्राप्नुयाच्च क्रतुफलं तथा
पर्वणि पर्वणि वाचको भरतश्रे
ष्ठ व्यक्ताक्षरपदस्वरः भविष्यश्चा
र्थवेद्विद्वान् भारतं भरतर्षभ भुक्त
वत्सु द्विजेन्द्रेषु यथावत् संप्रदाप
येत् वाचकं भरतश्रेष्ठ भोजयित्वा
स्वलंकृतं वाचके परितुष्टे तु शुभा
प्रीतिरनुत्तमा ब्राह्मणेषु तु तुष्टेषु
प्रसन्नाः सर्वदेवताः ततो हि
वरणं कार्यं द्विजानां भरतर्षभ ।
सर्वकामैर्यथान्यायं साधुभिश्च
पृथग्विधैः इत्येष विधिरुद्दिष्टो म
यानेद्विपृष्टो वा श्रद्दधानेन वै भा
व्यं यत्नात्त्वं परिपृच्छसि भारत ।
श्रवणे पाठने चापि पारणे च नृपोत्तम
सदा यत्नवता भाव्यं श्रेयस्तु पर
मिच्छता भारतं श्रृणुयान्नित्यं भा
रतं परिकीर्त्तयेत् भारतं भवने
यस्य तस्य हस्तगतो जयः भारते ।
परमं पुण्यं भारते विविधाः कथाः
भारतं सेव्यते देवैर्भारतं प
रमं पदं भारत सर्वशास्त्राणां ।
मुत्तमं भरतर्षभ भारतात् प्रा
प्यते मोक्षस्तत्त्वमेतद्ब्रवीमि ते ।
महाभारतमाख्यानं क्षितिं गां च
सरस्वतीं ब्राह्मणांश्च केशवं चैव ।
कीर्त्तयंनावसीदति वेदरामाय
णे पुण्ये भारते भरतर्षभ आदौ
चान्ते च मध्ये च हरिः सर्वत्र गीयते
यत्र विष्णुकथा दिव्याः श्रुतय
श्च सनातनाः तच्छ्रोतव्यं मनुष्ये
ण परं पदमिहेच्छता एतत्पवित्रं
परममेतद्धर्मनिदर्शनं एतत्
सर्वगुणोपेतं श्रोतव्यं भूतिमि
च्छता इति भारते हरिवंशे ।
सर्वपर्वानुकीर्त्तिनं त्रिषष्टिवर्णा
संयुक्तमिति त्रिषष्टिवर्णा अइउ
ऋ ऌ इति ह्रस्वपंचकं आईऊऋ
ॡ इति दीर्घपंचकं आईऊऋ
इति प्लुतपंचकं एओऐऔ [illegible]
स्वरेष्वनापरचतुष्टयं ग्रंथः क
प इति चत्वारः ऌ इति अव
संज्ञको द्वौ अनुनासिक[illegible]
तथा कादि मावसाना: पंचविंशति

वर्णा अंतस्थाश्चत्वारः उष्माणश्च
त्वार इति त्रिषष्टिः इति वर्णा
नां किलाष्टौ स्थानानि भवंति तानि
यथा उरः कंठः शिरस्तालुजिह्वा
दन्तौष्ठनासिकाः अष्टौ स्थानानि ।
वर्णानां ये विदुस्ते हि पाठकाः ।
इति पाणिनि यथा भारते ॥
शतपर्वात्मकं मुनिना तत्त्वदर्शिना
पर्वभिर्देशभिश्चैव पर्वाणां पा
रणं स्मृतं मिति विक्रमादित्यः ।
द्यूतांतं प्रथमं प्रोक्तं द्वितीयं ।
वनवासिकं उद्योगांतं तृतीयं तु
भीष्मांतं च चतुर्थकं पंचमं द्रो
णपर्वांते कर्णांते पारणं ततः
विशोकांतं सप्तमं तु शान्तिपर्वांत
मष्टमं नवमं स्वर्गपर्वांत माश्र
मांत मतः परं इति च भारत
टीकायां अर्जुनमिश्रः ॥
महाभीता स्त्री लज्जालुहस्तः य
था स्पर्शलज्जा महाभीता वशि
नीचमहौषधिः इति शब्दचन्द्रिका
अतिशयभययुक्ते त्रि ॥
महाभीमः पुं शान्तनुराजः इति
जटाधरः भृंगिनामकशिवद्वार ।
पालः इति त्रिकाण्डशेषः ॥
तिशयभयानके त्रि ॥
महाभीरुः पुं गोपालिकाख्यकीट
विशेषः इति हेमचन्द्रः । अति
भयशीले त्रि ॥
महाभीष्मः पुं शान्तनुराजः इति
त्रिकाण्डशेषः ॥
महाभूतं क्ली पृथिव्यादिपंचभूत
यथा महाभूतानि पंचैव खानि ।
लाग्न्यम्बुभूमिभिः इति शब्द ।
चन्द्रिका ॥
महाभृंगः पुं नीलभृंगराजः इति
राजनिर्घण्टः ॥
महाभैरवः पुं शरभरूपी हरः ।
यथा योऽसौ महाभैरवाख्यः ।
सकायः शारभो हरः भैरवः पृ
थगेवायं गणाध्यक्षो हरात्मजः ।
इति कालिकापुराणे ४६ अध्यायः
महाभोगा स्त्री दुर्गा यथा महार्थ
साधनी देवी महाभोगा ततः स्मृता
इति देवीपुराणे ४५ अध्यायः ।
महामंडूकः पुं पीतमंडूकः सो
नाबेङ इति भाषा इति राज
निर्घण्टः ॥
महामतिः पुं अतिबुद्धिमान् ॥
यथा किमेतन्नाभिजानामि जान
न्नपि महामते यत् प्रेमप्रवणं
चित्तं विगुणेष्वपि बंधुषु इति
मार्कण्डेयपुराणे देवीमाहात्म्यं म
हामदः पुं मत्तहस्ती इति शब्द

रत्नावली अतिशयहर्षः अति
शयमन्तनाच तद्युक्ते त्रि ॥
महामनाः त्रि महाशयः यथा।
महब्धे तद्धेतोदारोदन्तोदीर्णे।
महाशयाः महामनामहात्माचे।
ति हेमचंद्रः ॥
महामात्रः पुं प्रधानः इत्यमरः
सेनापत्यादिषु महती मात्रा यत्नं
परिच्छेदो वा येषां ते तथा
इति तट्टीकायां भरतः समृद्धः
अमात्यः हस्तिपकाधिपः।
इति मेदिनी ॥
महामात्री स्त्री आचार्य्यपत्नी इ
ति जटाधरः महामात्रपत्नी च
महामानसी स्त्री जिनानांविद्या
देवीभेदः इति हेमचंद्रः ॥
महामाया स्त्री दुर्गा इति शब्दर
त्नावली तस्याः स्वरूपयथा गर्भे
नर्ज्ञान संपन्नं प्रेरितं सूतिमा
रुतैः उत्पन्ने ज्ञान रहितं कु
रुतेया निरंतरं पूर्वाति पूर्व
संबद्ध संस्कारेण नियोज्य च
आहारादौ ततो मोहं ममत्वं
ज्ञान संशयं क्रोधो पशेध।
लोभेषु क्षिप्त्वा क्षिप्त्वा पुनः पुनः
पश्चात्कामेनियोज्याशु चिंताक्र
महर्निशं आमोदयुक्तं व्यस


नासक्तंजंतं करोतिया महामा
येति सा प्रोक्तानेनसा जगदी
श्वरी इति कालिकापुराणे ॥
अध्यायः महतीमायाच ॥
महामायी स्त्री दुर्गा इति शब्दर
त्नावली ॥
महामारी स्त्री महाकाली यथा
आपि तयैतत् सकलं ब्रह्मांडं
मनुजेश्वर महाकाल्यामहाकाले
महामारी स्वरूपया सैव काले
महामारी सैवसृष्टिर्भवत्यजा।
स्थितिं करोति भूतानां सैव
काले सनातनी इति मार्कंडेय
पुराणे अतिशयमरकश्च।
महामाषः पुं राजमाषः इति
शब्दचंद्रिका ॥
महामुखः पुं कुंभीरः इति हेम
चंद्रः बृहन्मुखी स्त्री तद्वति त्रि
महामुनिः पुं अगस्त्यः बुद्धः
इति शब्दरत्नावली कृपाचार्यः
कालः इत्यजयपालः व्यासः।
यथा धर्मः प्रोज्झितकैतवो ऽत्र
परमो निर्मत्सराणां सतां वेद्यं
वास्तवमत्र वस्तु शिवदं तापा
त्रयोन्मूलनं श्रीमद्भागवते महा
मुनिकृते किं वापरैरीश्वरः सद्यो
हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभि

स्तत् क्षणात् इति श्रीभागवते
१ स्कंधे १ अध्यायः तम्बुरुः इति
राजनिर्घंटः ॥
महामुनि क्ली औषधं इति शब्दर
त्नावली धन्याकं इति जटाधरः।
महामूर्द्धा पुं शिवः इति महाभा
रते तस्य सहस्रनाम स्तोत्रे।
बृहन्मस्तकयुक्ते त्रि ॥
महामूलः पुं राजपलांडुः इति
राजनिर्घंटः ॥
महामूल्यं क्ली महार्घे वज्रमूल्ये
महच्च तन्मूल्यं चेति कर्मधारय स
मास निष्पन्नं तद्युक्ते त्रि ॥
महामूषिकः पुं बृहदुंदुरुः तत्प
र्य्यायः मूषी २ विघ्नेशवाहनः ३ म
हांगः ४ शस्यमारी ५ भूफलः ६
भित्तिपातनः ७ इति राजनिर्घंटः
महामृगः पुं हस्ती इति हेमचं
द्रः शरभः इति राजनिर्घंटः ॥
महामृत्युंजयः पुं शिवस्य मंत्रवि
शेषः यथा देव्युवाच यदिमेमह
तीप्रीति स्तवास्ति कुलभैरव कथ
यस्व विशेषेण महामृत्युंजयाभि
धं भैरव उवाच शृणु देवि प्रवक्ष्या
मि महामृत्युंजयाभिधं आयुर्वृद्धि
करं पुंसां मृत्योर्दारुकरं परं ॥
यस्य विज्ञान मात्रेण चिर जीवी

निरामयः नित्यमष्टशतं जप्त्वा मृ
त्युं मृत्युपथं नयेत् इति मृत्यु
जयतंत्रे।
महामेचः पुं शिवः इति महा
भारते तस्य सहस्रनाम स्तोत्रे
अतिशयमेचके त्रि
महामेदः पुं अष्टवर्गप्रसिद्धौषध
विशेषः तत्पर्य्यायः प्रोद्भवः
२ इति रत्नमाला बृहन्मेदश्च।
महामेदा स्त्री अष्टवर्गप्रसिद्धौषध
विशेषः तत्पर्य्यायः वसुच्छिद्रा
२ जीवनी ३ पांडुरागिणी ४ देवे
ष्टा ५ सुरामेदा ६ दिव्या ७ देवम
णिः ८ देवगंधा ९ महाच्छिद्रा १०
वृत्ताढ्या ११ अस्या गुणाः हिमत्वं
स्तन्यत्वं कफशुक्रवृद्धिकारित्वं।
दाहास्रपित्त क्षय वातज्वर नाशि
त्वंच इति राजनिर्घंटः ॥
अथ मेद महामेदयोः तत् प्रति
लक्षण नाम गुणाः महामेदाभि
धः कंदो मोरंगादौ प्रजायते।
महामेदा वनोमेदा स्यादित्युक्तं।
मुनीश्वरैः शुक्लार्द्रकनिभः कंदो
लताजातः सपांडुरः महामेदा
भिधो ज्ञेयो मेदा लक्षण मु
च्यते शुक्लकंदो नखच्छेद्यो मेदो
धात्विरिवस्रवेत् ॥ यः समेदे।


ति विज्ञेया जितात्मना तस्यै रे जैनैः स्वल्पपर्णो मणिच्छिद्रा। मेदामेदोमवाधरा महामेदा वस्त्र च्छिद्रा विरंती देवतामणिः म हायुग्म गुरुस्वादु बृंहणस्तन्यकफा वहं बृंहणीशीतलं पित्तरक्तवात ज्वरप्रणुत् इतिभावप्रकाशः। महामेरुः पुं बुद्धभेदः इति हेमचंद्रः॥ महामोहः पुं भोगेच्छारूपाज्ञा ने इतिकेचित् संसारमूलकारण रागरूपमोहः महामोहजनक। कामराजबीजं इतिचंडी प्रथम माहात्म्यटीकायांनागोजीभट्टः अपिच ससर्जाग्रेंधतामिश्रमथ तामिश्र मादिकृत् महामोहंच मोहंच तमश्चाज्ञानवृत्तयः इति श्रीभागवते ३ स्कंधे १२ अध्यायः अत्र इति ब्रह्मा स्वसृष्टेः प्रथममवि द्या सृष्टीः ससर्ज तत्र तमोनाम स्वरूपाप्रकाशः मोहो देहा द्यहंबुद्धिः महामोहो भोगे च्छा तामिश्रः तद्विघाते क्रो धः अंधतामिश्रः तन्नाशे अह मेव मृतोस्मीति बुद्धिः तदेवो क्तं वैष्णवे तमो ऽविवेको मो हः स्यादंतःकरणविभ्रमः म हामोहस्तु विज्ञेयो ग्राम्यभोग सुखैषणा मरणं त्वंधतामिश्रं तामिश्रं क्रोध उच्यते अविद्या पंचपर्वैषा प्रादुर्भूता महात्मनः इति तट्टीकायां श्रीधरस्वामी। महाम्लं स्त्री तिंतिडीकं इतिजटा धरः॥ महायज्ञः पुं वेदपाठादिरूपपंच प्रकारयज्ञः यथा पाठो होम श्चातिथीनां सपर्या तर्पणं बलिः एते पंच महायज्ञाः ब्रह्मयज्ञा दिनामकैः इत्यमरः अपिच। हिंस्रो भोमस्तथा पैत्रो मानुषो। ब्राह्मएव च एते पंचमहायज्ञाः ब्रह्मणा निर्मिताः पुरा ब्राह्मणा नां हितार्थाय इतरेषां च तत्पुराः इतरेषां तु वर्णानां ब्राह्मणो कारि ताः शुभा एवं ह्यनेन भक्त्या ऽस्माद्धरिरि विष्णुध्यति अन्यथा श्रीहयोष्ये एकैकेन पति ताः मंतव्या तान् भोक्तणां महा मांसं तु तत्स्मृतं इति वाराह। पुराणं॥ महायशस्कः त्रि अतिशययशो विशिष्टः इतिपाणिनिव्याकरणं महायशाः पुं भूताईदिविशेषः इति हेमचंद्रः अतिशययशोयुक्ते त्रि।

महायक्षः पुं अर्हदुपासकविशेषः इति हेमचंद्रः॥ महारजतं क्ली सुवर्णं धुस्तूरः इत्यमरः हृदत्रीर्यं च। महारजनं क्ली कुसुंभपुष्पं इत्यमरः स्वर्णं इतिमेदिनी॥ महारण्यं क्ली बृहद्वनं तत्पर्यायः अरण्यानी २ इत्यमरः। महारथः पुं शिवः इति महा भारते तस्य सहस्रनाम स्तोत्रं। अयुतं धन्विभिः महास्त्रशास्त्रनिपु णो योद्धा यथा एकोदशसहस्रा णि योधयेद्यस्तु धन्विनां अस्त्रश स्त्रप्रवीणश्च महारथ इतिस्मृतः इति भगवद्गीताटीकायां श्रीधर स्वामी धृतवाक्यं॥ महारंभं क्ली गडुल्वणं इतिरा जनिर्घंटः॥ महारसं क्ली कांजिकं इतिजटा धरः॥ महारसः पुं खर्जूरः कोषकारः कशेरु इति मेदिनी इक्षुः इतिजटाधरः पारदः इति राजनिर्घंटः॥ महारसाष्टकं क्ली अष्टधातुविशे षः यथा दरदः पारदः सस्यो वैक्रां तं कांतं मभ्रकं माक्षिकं विमलं श्चेति स्मृतेनेऽष्टौ महारसाः॥ इति राजनिर्घंटः। महाराजः पुं पूर्वजिनविशेषः। तत्वः इति हेमचंद्रः अधिराजः यथा अर्थस्य पुरुषो दासो दास स्त्वर्थो न कस्यचित् इति सत्यं म हाराज बद्धोस्म्यर्थेन कौरवैः। इतिमहाभारते उद्योगपर्व॥ महाराजकः पुं महाराजिकगणः इत्यमरटीकायां रामाश्रमः। महाराजचूतः पुं उत्तमाम्रः तत्प र्यायः महाराजाम्रकः २ स्थूला म्रः ३ मन्मथानंदः ४ कंकः ५ नी लकपिच्छकः ६ कामायुधः ७ का मफलः ८ राजपुत्रः ९ नृपात्मजः १० महाराजफलः ११ कामः १२ महा चूतः १३ कोमलस्य तस्य गुणाः कटुत्वं अम्लत्वं पित्तदाह दात्वं च सुपक्कस्य तस्य गुणाः स्वादुत्वं मधुरत्वं पुष्टि वीर्यबलप्रदत्वंच इतिराजनिर्घंटः॥ महाराजद्रुमः पुं आरग्वधः इ तिराजनिर्घंटः॥ महाराजिकः पुं गणदेवताविशेषः स च विंशत्यधिकशतद्वयसंख्यकः इत्यमर भरतौ महाराजिः। स्त्री ब्रह्मलयोपलक्षिता॥



महाप्रलयरात्रिः इति चण्डीटीका
यां नागोजीभट्टः महत ईश्वर
स्य रात्रिः ब्रह्ममरणोपलक्षिता
रात्रि रित्यर्थः इति देवी माहा
त्म्यटीकायां विद्याविनोदः अ
पि च ब्रह्मणश्च निपातेन च महा
कल्पो भवेन्नृप प्रकीर्त्तिता महारा
त्रिः सा एव च पुरातनैः इति
ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५ अध्यायः
अर्द्धरात्रात् परं मुहूर्त्तद्वयं यथा
अर्द्धरात्रात् परं यच्च मुहू
र्त्तद्वयमुच्यते सा महारात्रिरुद्दि
ष्टा तद्दत्तमक्षयं भवेत् इति
तंत्रं आश्विन शुक्लाष्टमी
नवरात्रं यथा शुक्लाष्टमीचाश्वि
नस्य नवरात्रे तु तस्य वै महा
रात्रि र्महेशानि कालरात्रिः शु
भप्रिये इति शक्तिसंगमतंत्रं ।
महाराष्ट्रः पुं देशविशेषः मार
हाट्टा इति भाषा यथा नैर्ऋते
द्रविडानर्त्त महाराष्ट्राश्च रैवतः
जवनः पह्लवः सिंधुः पारसीकाद
योमताः इति ज्योतिषतत्त्वे ।
कूर्मचक्रं ॥
महाराष्ट्री स्त्री जलपिप्पली इति
राजनिर्घण्टः शाकभेदः माराटी
इति भाषा अस्यागुणाः कफ
वायुनाशित्वं इति राजवल्लभः ।
अष्टादशभाषान्तर्गत भाषाविशेषः
यथा आसामेव तु गाथासु
महाराष्ट्रीं प्रयोजयेत् अत्रो
क्तानामयी भाषा राज्ञोऽपि चा
रिणां इति साहित्यदर्पणे ६ ।
परिच्छेदः ॥
महारिष्टः पुं महानिम्बविशेषः
तत्पर्य्यायः कैटर्य्यः २ रामणः ३
रमणः ४ गिरिनिम्बः ५ शुक्रमा
लः ६ अस्य गुणाः कटुत्वं तिक्तत्वं
कषायत्वं शीतलत्वं लघुत्वं सं
तापशोषकुष्ठास्रकृमिभूतविषा
पहत्वं च इति राजनिर्घण्टः ।
महारुद्रः पुं महादेवः यथा म
हाकाल्या महाकालस्त्वणाकाका
रद्रूपतः मायया च्छादितात्मा च त
न्मध्ये समभागतः महारुद्रः स
एवात्मा महाविष्णुः स एव हि इति
निर्वाणतंत्रं ॥
महारूपः पुं शिवः इति महा
भारते तस्य सहस्रनाम स्तोत्रं ।
अतिशायद्रूपयुक्ते त्रि ॥
महारूपकं क्ली नाटकं इति त्रि
कांडशेषः ॥
महारोगः पुं पापरोगः स चाष्ट
विधो यथा उन्मादः १ त्वग्दोषः २

राजयक्ष्मा ३ श्वासः ४ मधुमेहः ५
भगंदरः ६ उदरः ७ अश्मरी ८
इति शुद्धितत्वे नारदः ॥
महारोगी पुं महारोगयुक्तः
यथा क्रियाहीनस्य मूर्खस्य महा
रोगिन एव च यथेष्टाचरणस्या
द्दूर्मरणांत मशौचकं इति शुद्धि
तत्त्वधृत कूर्मपुराणवचनं ।
महारोमा पुं शिवः इति महा
भारते तस्य सहस्रनामस्तोत्रं ।
दृहद्रोमयुक्ते त्रि ॥
महारौरवः पुं नरकविशेषः इ
त्यमरः महान् रौरो रवो ऽत्र
महारौरवः मनीषादित्वात् इत्ता
पः इति भरतः अपि च महा
रौरव संज्ञं तु अथोर्द्धं तान्त्र सं
पुटं मध्यतो वह्निगारे गृह।
दारापहारकः देवद्रव्यापहारी।
च पच्यते कालमक्षयं इति वह्नि
पुराणे पापनाशन हस्तानाध्या।
यः महार्च्चं त्रि महामूल्यं इति
मेदिनी ॥
महार्चिः पुं लावकपक्षी इति
विश्वः ॥
महार्णवः पुं महासमुद्रः यथा
आप्लाविते वा वातेन स्थितः पो
ते महार्णवे इति मार्कण्डेयपु ।
राणे देवीमाहात्म्यं शिवः इति
महाभारते तस्य सहस्रनामस्तोत्रं
महार्हः पुं वृत्तविशेषः महाना
इति भाषा इति शब्दचन्द्रिका ।
महार्हकः क्ली श्वेतार्हकं अस्य गु
णाः अग्निदीपनत्वं धारकत्वं रुक्ष
त्वं वातकफनाशित्वं च इति राज
वल्लभः ॥
महार्बुदं क्ली दशार्बुदं शतकोटि
संख्या इति ज्योतिषं ॥
महार्हं क्ली श्वेतचन्दनं इति राज
निर्घण्टः ॥
महालयः पुं विहारः तीर्थः
परमात्मा इति मेदिनी सौरा
श्विनीय कृष्णपक्षः यथा भविष्ये
ययं दीपान्विता राजन् ख्याता।
पंचदशी भुवि तस्यां दद्यात्र चेत् ॥
दत्तं पितॄणां वै महालये म
हालयेकन्यागतापरपक्षे इति
तिथ्यादितत्त्वं ॥
महालक्ष्मीः स्त्री यथा नारायणा
शक्तिः यथा यन्मायया मोहिता
अध्यक्ष विश्वशिवादयः देवदास्ता
महालक्ष्मीं परां राधा वदंति ते यद
क्षीणा महालक्ष्मीः प्रियानारायणस्य
च इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४१
अध्यायः अथ महा लक्ष्मी ।




मंत्रः तारो वाग्भवं माया रमा
कामः स्त्रीर्जगत् प्रसूत्यै नमः त
थाच वाग्भवं शंभुवनितारमाङ्क
ङ्केतनः तार्तीयंच जगत् पार्थ्यो
वह्निवीज समुज्ज्वलः श्रीशाख्यो
मृगस्ये ह्मंत्रोयं द्वादशाक्षरः
महालक्ष्म्याः समुद्दिष्ट स्तारयः
सर्व सिद्धिदः तस्या ध्यानं
यथा बालार्कद्युतिमिंदुखंड वि
लसत् कोटीर हारोज्ज्वलां रत्ना
कल्पविभूषितां कुचनतां शालेः
करैर्मंजरीं पद्मां कौस्तुभ रत्न
मप्यविरतं संविभ्रतीं सस्मितां
फुल्लांभोज विलोचन त्रययुतां
ध्यायेत् परां मम्बिकां इति तं
त्रसारः ॥
महालिकुटभी स्त्री स्वेनकिणि
हीहस्तः इतिराजनिर्घंटः ।
महालिंगः पुं शिवः इति महा
भारते तस्य सहस्रनामस्तोत्रं ।
बृहल्लिंगयुक्तस्य ॥
महालीलसरस्वती स्त्री तारावि
शेषः लीलया वाक्प्रदायिनीतिने
न लीलसरस्वती तारास्य रहिता
अर्था महालीलसरस्वती इति
तंत्रसारः ॥
महालोभः पुं लोभविशेषः

पाटियालोध इतिभाषा इति
रत्नमाला ॥
महालोलः पुं काकः इति राज
निर्घंटः अतिचंचले त्रि ।
महालोहं स्त्री अयस्कांतः इति
राजनिर्घंटः ॥
महावनं क्ली वृहद्वनं तत्पर्याय ः
अरण्यानी २ महारण्यं ३ महाट
वि इतिराजनिर्घंटः वृंदावनस्य
चत्वारिंशतिवनान्तर्गतवनविशेष
महावपः पुं महामेरुः इतिशब्द
चंद्रिका ॥
महावरा स्त्री दूर्वा इतिशब्दर
त्नावली ॥
महावराहः पुं वराहरूपीभगवा
न् यथा महावराहो गोविंदः स
सेनः कनकांगदी इतिमहाभार
तेतस्य सहस्रनामस्तोत्रं ॥
महावरोहः पुं सत्तकवृक्षः इति
राजनिर्घंटः ॥
महावल्ली स्त्री माधवीलता इ
तिशब्दचंद्रिका ॥
महावसः पुं शिशुमारः इतिहे
मचंद्रः ॥
महावक्ताः पुं शिवः इतिमहा
महाभारते तस्यसहस्रनामस्तो
त्रे बृहद्वक्ता युकेति ॥

महावाक्यं क्ली योगपताकोल्लास
नियुक्तवाक्यसमूहः इतिसारि
स्वर्ण्यणाः न्यायमते तु स्वघट
कोनेन नाम लभ्यतात्पर्थ्यकं
प्रकृत्यर्थ मात्रावच्छिन्नप्रमयार्थ
बोधं प्रत्यायोग्यवाक्यं वा इति
शब्दशक्तिप्रकाशिका तत्त्वमसी
त्यादिवाक्यं प्रतिज्ञादावुक्तस्वर्ग
वाक्यंच ॥
महाविद्या स्त्री देवीविशेषः सा
दशधा यथा चामुंडातंत्रे काली
तारा महाविद्याषोडशी भुवने
श्वरी भैरवीछिन्नमस्ता च विद्या
धूमावती तथा बगलासिद्धवि ।
द्याच मातंगीकमलात्मिकाएता
दश महाविद्याः सिद्धविद्याः प्र
कीर्तिताः नात्रसिद्धाद्यपेक्षास्ति
न नक्षत्र विचारणा कालादि ।
शोधनं नास्ति नचामित्रादिदूष
णं सिद्धविद्यातया नात्र युगसेवा
परिश्रमः नास्तिकिंचिन्महादेवि
दुःखसाध्यं कथंचन मालिनी
विजये अथ वक्ष्याम्यहं या या
महाविद्यामहेतले दोषजा ।
नैरसंस्पृष्टा स्ताःसर्वाह्निफलेः
सह कालीनीलामहादुर्गा त्वरि
ताछिन्नमस्तका वाग्वादिनी चान्न

पूर्णा तथा प्रत्यंगिरा पुनः का
माख्यावासली बाला मातंगी शै
लवासिनी इत्याद्याः सकला वि
द्याः कलौ पूर्णफलप्रदाः सिद्ध
मंत्रतया नात्र युगसेवापरिश्रमः
अप्यचेता महाविद्याः कलिरा ।
यत्र वापिताः इतितंत्रसारः ॥
तासां दशावतारत्वं यथा ।
प्रकृतिर्विस्तृत्पाच पुंरूपश्च म
हेश्वरः एवं प्रकृतिभेदेन भे
दास्तु प्रकृतेर्दश कृष्णरूपा का
लिकास्यात् रामरूपाच तारिणी
बगलाकूर्ममूर्तिः स्यात्मीनोधूमाव
ती भवेत् छिन्नमस्तानृसिंहःस्या
द्वाहूषैव भैरवी सुंदरी याम
दग्न्यःस्यात्वामनो भुवनेश्वरी क
मला बौद्धरूपास्यात् दुर्गा स्यात्
कल्किरूपिणी स्वयं भगवतीका ।
ली कृष्णस्तु भगवान्स्वयं स्वयंवभ
गवान्कृष्णः कालरूपा भवेद्युगे
इतिमुंडमालातंत्रे ॥
महाविराट् पुं महाविष्णुः यथा
मुनिरुवाच विश्वानांगोलकं राज
न् विस्तृतं च नभःसमं शश्वत्त्रि
तं डिम्बरूपं श्रीकृष्णेच्छासमुद्भवं
जले च परिपूर्णं च कृष्णस्यववि
डना स्पष्टतस्यादिसर्गे य




रिष्यांतस्य क्रीडतः प्रकृत्या सह
युक्तेन कलया निजयानृप तत्रा
यासेन महद्विलो विश्वाधारस्य विस्त
नः प्रकृती गर्भसंभूत डिम्बा
द्भूतस्य भूमिप सुविस्तृते जला
धारे यस्यानन्य महान् विराट्
राधेश्वरस्य कृष्णस्य षोडशांशः
प्रकीर्तितः दूर्वादलश्यामरूपः
सुस्मितश्च चतुर्भुजः वनमालाधरः
श्रीमान् शोभितः पीतवाससा
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ३ अ
ध्यायः ॥
महाबिलं क्ली आकाशं इति जा
टाधरः हृद्बिलेच ॥
महाविषः पुं द्विमुखसर्पः यथा
महाविषः कासर्पो राजाहिर्द्वि
मुखोरगः इति जटाधरः ।
महाविषुवं क्ली मेषसंक्रान्तिः य
था महाविषुवमाख्यातं कतिभिश्चै
त्रविक्रितं इति शब्दरत्नावली ।
तस्मिन्मसूरनिम्बपत्रद्वयभक्षणं
यथा कृष्णचिंतामणौ मसूरं निम्ब
पत्राभ्यां यो ऽत्तिमेषगते रवौ ।
अपि रोषान्वितस्तस्य तक्षकः किं
करिष्यति तत्र शाकादि दा
नं यथा मेषादौ शाकवा देया
वारिपूर्णाच गर्गरी वारिपूर्णाच

टदानमंत्रादिर्यथा एषधर्मघटो
दत्तो ब्रह्मविष्णुशिवात्मकः अस्य
प्रदानात्सफलाः सन्तु मनोर
थाः वैशाखे यो घटं पूर्णं स
भोज्यं वै द्विजन्मने ददाति स
राजेन्द्र स याति परमां गतिं
महार्णवे यो ददाति हि मे
षादौ शक्तुनश्च घटान्वितान् पितृ
नुद्दिश्य विप्रेभ्यः सर्वपापैः प्र
मुच्यते ॥ तत्र श्राद्धपादुका
दानं यथा विप्रेभ्यः पादुकाछत्रं
पितृभ्यो विषुवे शुभे पितृभ्यः
पितृनुद्दिश्य तत्पर्थ्यैः इति तिथ्या
दितत्वं ।
महाविषुवचक्रं क्ली नक्षत्रघटित
नराकारचक्रं यथा मूर्द्ध्नि समुखे
त्रीणि हृदये पंच विन्यसेत् त्रिन
यं हस्तपादेषु महाविषुवमङ्गल
मस्तके श्रुपने सौख्यं वदने ।
पट्टता स्वभो हृदये च धनाध्यतो
ऽध्वपापि दक्षिणकरे वामे क
रे महदुःखं सुखं पादे च दक्षिणे
भ्रमणं वामपादे च कथितं विषु
वत्फलं इति ज्योतिषतत्त्वं म
हाविष्णुः पुं महाविराट् यथा ।
यस्य जले कोटि कोटि ब्रह्मां
डानि महाविष्णु रोमकूप गतानि

तस्या विरजायाः परिखाभूतायाः
उपरि महावैकुण्ठलोकः तस्यो
र्द्ध्वभागे गोलोकः तस्य नाथः
कृष्णो देवलीलः सपरिवारेण व
र्त्तते इति भागवतामृतकणा ।
का सचश्री कृष्णस्य कलाविशेषः
यथा विश्वमहान् स्रष्टृरूपस्य क
लाविशेषा गोविन्दमादिपुरुषं त
महं भजामि इति भागवतामृ
तपूर्वखण्डः ॥
महावीचिः पुं नरकविशेषः य
थामनुः नरकं कालसूत्रंच महान
रकमेवच संजीवनं महावीचिं त
पनं संप्रतापनं यामीति पूर्ववचन
स्य मनुवचनेन महावीचि यंत्र म
हाकल्लोलेन नीयते इति प्राय
श्चित्तविवेकः ॥
महावीर्य्य क्ली विटपं तत्समु
च्छ्रावर्णयोरंतरं इति हेमचंद्रः
महावीरः पुं गरुडः सुरः सिंहः
मखानलः वज्रः श्वेततुरंगः ।
संचानपक्षी इति मेदिनी ।
अंतिमजिनः कोकिलः इति
हेमचंद्रः धनुर्धरः इति शब्द
रत्नावली एकवीरवृक्षः इति
राजनिर्घण्टः लक्ष्मणः यथा ल
क्ष्मणं च महावीरं पतितं रणभूतले

अंगदादिः यथा अंगदाद्यैर्महा
वीरैर्वेष्टितं रुद्ररूपिणं इति
तंत्रसारे हनुमत्कल्पः हनुमान्
स्वयमपि महावीरत्वेन प्रसिद्धः
महावीरा स्त्री क्षीरकाकोली इति
रत्नमाला ॥
महावीर्य्यः पुं ब्रह्मा इति शब्द
रत्नावली बुद्धभेदः इति त्रिकाण्ड
शेषः वाराहीकंदः इति राज
निर्घण्टः अतिशयबलयुक्ते त्रि
महावीर्य्या स्त्री संज्ञा साच सूर्य्य
पत्नी इति त्रिकाण्डशेषः वना
कार्पासी इति शब्दरत्नावली ॥
महाशतावरी इति राजनिर्घण्टः
महाहस्ती स्त्री वाकुची इति
त्रिकाण्डशेषः ॥
महावृक्षः पुं स्नुहीवृक्षः इति
हलायुधः वृहद्वृक्षश्च ॥
महावेगः पुं शिवः इति महा
भारते तस्य सहस्रनामस्तोत्रं ।
अतिजवः तद्युक्ते त्रि ॥
महाव्याधिः पुं महारोगः स तु
कुष्ठादिः यथा सर्वव्याधिविनि
र्मुक्तो महाव्याधिविशेषः पक्षा
न्तसे प्राणपेत्तु जीवन्मुक्तो भवेत्
इति ब्रह्मयामले गायत्रीकवचे ।
महाव्याहृतिः स्त्री प्रणवस्वाहायु
क्त



व्याहृतित्रयं यथा ओं भूः स्वाहा
ओं भुवः स्वाहा ओं स्वः स्वाहा इति
भवदेवभट्टः ॥
महाव्रनं क्ली इक्षुव्रणं नालीचा
इति भाषा यथा ज्योत्स्नसमदा
शाहतं तथाष्टादशाकं प्रिये महा
व्रणं विमोक्षाय विशाहतं पठेन्नरः
इति तिथ्यादितत्त्वधृत वाराही
तन्त्रवचनं ॥
महाव्रतं क्ली द्वादशवार्षिकव्रतं
यथा तेनवधकालाहृद्वे विंश
त्यधिकशतस्यावदवशिष्टं तावत्
परिमाणं महाव्रतानुरूपा येनवो
द्धानव्या इति प्रायश्चित्तविवेकभ
वदेव भट्टमतं शारत्कालीन
दुर्गापूजनं यथा महाव्रते महा
पुण्ये शंकराद्यैरनुष्ठिते कर्त्तव्यं
सुरराजेन्द्र देवी भक्तिसमन्वितैः
इति तिथ्यादितत्त्वधृत देवी
पुराणवचनं अरुणोदयकालीन
माघस्नानं यथा वासुदेवं हरिं
कृष्णं श्रीधरं च स्मरेन्नरः दिवा
करनगनाथप्रभाकरनमोऽस्तु
ते परिपूर्णं कुरुष्वेदं माघ
स्नानं महाव्रतं इति मलमास
तत्त्वधृतपद्मपुराणवचनं महा
व्रती पुं शिवः इति हेम


चंद्रः उत्कटः इति त्रिकांड
शेषः महाव्रत युक्ते त्रि ।
महाशक्तिः पुं कार्त्तिकेयः इति
शब्दमाला अतिशयपराक्रमः ।
तद्युक्ते त्रि ॥
महाशंखः पुं मानुषास्थि संख्या
विशेषः सच दशनिखर्वः ललाटं
इति मेदिनी निधिविशेषः ॥
इति विश्वः कर्णनेत्रयोर्मध्यगः
अस्थि यथा कर्णनेत्रान्तराला।
स्थि महाशंखः प्रकीर्तितः तस्य
मालया जपविधि यथा महाशं
खमयीमालानीलसारस्वते प्रियो
न्नूलतानास्थिखंडेन रचिता जप
मालिका महाशंखमयीमाला ता
राविद्याजपे प्रिये इति तंत्रसार।
धृतमुंडमालातंत्रं दरशंखः य
था पौंड्रं दध्मौ महाशंखं भीमकर्मा
वृकोदरः इति श्रीभगवद्गीता।
अध्यायः ॥
महाशठः पुं राजधत्तूरः इति
राजनिर्घंटः अतिधूर्ते त्रि ।
महाशणपुष्पिका स्त्री हस्वशण
पुष्पी तत्पर्यायः हस्तपर्णी २ स
नपुष्पा ३ महासिता ४ महास्वेत
घंटी ५ महाश्वेता ६ अस्या गुणाः
कषायत्वं उष्णत्वं शस्त्रत्वं रस

नियामकत्वं कुतूहल मोहन स्त
म्भनादिषु योक्तृत्वंच इति राज
निर्घंटः ॥
महाशना स्त्री महाशतावरी इति
राजनिर्घंटः ॥
महाशतावरी स्त्री हस्वशतावरीत
त्पर्यायः शतवीर्या २ सहस्रवी।
र्या ३ स्वरसा ४ महापुरुषदंतिका
५ वीरा ६ तुंगिनी ७ वक्रपत्रिका ८
ऊर्द्ध्वकंटी ९ महावीर्या १० फणि
जिह्वा ११ महाशना १२ सवीर्या १३
अस्या गुणाः वृष्यत्वं मधु।
रत्वं पित्तनाशित्वं ॥ हिमत्वं।
मेदकफ वातघ्नत्वं तिक्तत्वं ।
श्रेष्ठत्वं रसायनत्वंच इति राज
निर्घंटः ॥
महाशयः त्रि महानाशयोऽभि
प्रायो मनो वा यस्यसः इति
भरतः तत्पर्यायः महेच्छः २
उन्नमरः महानुभावः ३ इति
शब्दरत्नावली उदात्तः ४ महा
मनाः ५ इति जटाधरः उद्भटः
६ उदारः ७ उदीर्णः ८ महात्मा ९
इति हेमचंद्रः समुद्रे पुं इति
शब्दरत्नावली ॥
महाशय्या स्त्री राजशय्या इति
हेमचंद्रः हस्वशय्याच ॥

महाशारः पुं स्थूलशारः इति राज
निर्घंटः ॥
महाशल्कः पुं विंगटमत्स्यः इति
हारावली हस्वशल्कस्य तद्युक्ते
त्रि महाशाक क्ली हस्वशाकवि
शेषः इति केचित् ।
महाशाखा स्त्री नागवला इति
राजनिर्घंटः
महाशालिः पुं स्थूलशालिः इ
ति राजनिर्घंटः तत्पर्यायः सुग
धिकः २ इति हेमचंद्रः ॥
महाशिवः पुं महादेवः यथा
रत्नसिंहासनस्थंच महाभूषणभू
षितं महाशिवं शिवकरं शिवबी
जं शिवाश्रयं इति ब्रह्मवैवर्ते।
गणपतिखंडे २९ अध्यायः ॥
महाशीता स्त्री शतमूली इतिश
ब्दचंद्रिका अतिशीतवीर्ययुक्ते
त्रि महाशुक्तिः स्त्री मुक्तामाता सा
चशुक्तिः इतिराजनिर्घंटः हस्व
शुक्तिश्च ॥
महाशुक्ला स्त्री सरस्वती इतिभू
रिप्रयोगः अतिशुक्लवर्णयुक्ते त्रि
महाशुभ्रं क्ली रजतं इतिराज
निर्घंटः अतिशुभ्रवर्णयुक्ते त्रि
महाशूद्रः पुं आभीरः इतिमहा
शूद्री शब्ददर्शनात् ॥

महाश्वेडी स्त्री आभीरी इत्यमरः
महाशोंडी स्त्री श्वेतकिणिहीवृक्षः
इतिराजनिर्घंटः ॥
महाश्मशानं क्लीं काशी इतिका
शीखंडं ॥
महाश्यामा स्त्री श्यामालता इति
रत्नमाला शिंशपावृक्षः इति
राजनिर्घंटः ॥
महाश्रमणः पुं बुद्धविशेषः सर्व
शाक्यमुनिः तत्पर्य्यायः सर्वार्थ
सिद्धः २ कलिशासनः ३ गोमथः
४ इतिहेमचंद्रः ॥
महाश्रावणिका स्त्री क्षुपविशेषः
बडगुलकुडी इति भाषा तत्
पर्य्यायः महामुंडी २ लोचनी ३
कदम्बपुष्पी ४ विकचा ५ कोडा ६
वोडा ७ पलंकषा ८ नदीकदम्बः ९
मुंडाख्या १० महामुंडनिका ११ माला
१२ स्थविरा १३ लोतनी १४ भूक
दम्बः १५ अलम्बुषा १६ अस्या गुणाः
कुलत्वं तिक्तत्वं ईषन्मधुरत्वं ।
वायुशमनत्वं स्वादुत्वं रेचनत्वं ।
हेमकृत्वं रसायनत्वंच इति
राजनिर्घंटः ॥
महाश्रीः स्त्री बुद्धशक्तिविशेषः त
त्पर्य्यायः तारा २ ओंकारा ३ स्वाहा
४ श्रीः ५ मनोरमा ६ तारिणी ७
जया ८ अनंता ९ शिवा १० लोके
श्वरात्मजा ११ खदिरवासिनी १२ भद्रा
१३ वैश्या १४ नीलसरस्वती १५ शं
खिनी १६ महातारा १७ वसुधारा
१८ धनंददा १९ त्रिलोचना २० लो
चना २१ इति त्रिकांडशेषः ॥ म
हाश्वेता स्त्री सरस्वती इति त्रि
कांडशेषः कृष्णभूमिकुष्मांडः ।
तत्पर्य्यायः क्षीरविदारी २ ऋक्ष
गंधिका ३ इत्यमरः श्वेताप
राजिता इतिरत्नमाला ॥ सिता
तत्पर्य्यायः मधुजा २ इति त्रि
कांडशेषः श्वेतकिणिही वृक्षः
इतिराजनिर्घंटः दुर्गा यथा
श्वेतं शुक्लं शिवस्थानं यस्मात्त्वेह
समागता महाभाव समुत्पन्ना ।
महाश्वेता ततः स्मृता इति दे
वी पुराणे ४५ अध्यायः ॥
महाषष्ठी स्त्री दुर्गा यथा ओं दुं
दुं दुर्गे दुर्गनाशाय नाशय हन हन
दह दह मथ मथ बंध बंध सर्वहिं
स्नान्महा षष्ठी रूपेण बालकं रक्ष
रक्ष चिरजीविनं कुरु कुरु श्रीं क्लीं
हूं फट्स्वाहा इतियोगिनी तंत्रे ।
महाषष्ठीकवचं ॥
महाष्टमी स्त्री आश्विनशुक्लाष्टमी य
था आश्विने शुक्लपक्षस्य भवेद्या

अष्टमी तिथिः महाष्टमीति सा
प्रोक्ता देव्याः प्रीतिकरा परा
इतिकालिकापुराणे ५९ अध्यायः
तस्यांपूजाविधिः पुत्रवत ।
उपवासनिषेधश्च यथा अष्टम्यां
रुधिरै मांसैः महामांसैः सुगं
धिभिः पूजयेद्बहुजातीयै र्बल
भि र्भोजनैः शिवां ॥ सिंदूरैः ।
पट्टवासैश्च नाना विधविलेपनैः
पुष्पै रनेकजातीयैः फलै वैंडू
र्य्यैरपि उपवासं महाष्टम्यां पु
त्रवान्न समाचरेत् यथा तथैव
पूतात्मा व्रती देवीं प्रपूजयेत् ।
पूजयित्वा महाष्टम्यां नवम्यांवलि
भिस्तथा विसर्जयेद्दशम्यांतु श्र
वणे शावरोत्सवैः इति तत्रै
व ९० अध्यायः ॥ तत्राह्नो रात्र
पूजा यथा कन्या संस्थे रवावीशे
शुक्लाष्टम्यां प्रपूजयेत् सोपवा
सो निशार्द्धे तु महाविभववित्त
रैः पूजां समारभेद्देव्या तत
त्रे वाह्नणो ऽपिवा यष्टव्यातस्य
कर्तव्यो गवलाज वधस्तथा इति
देवीपुराणवचने वारुणापदेन पू
र्वाषाढोच्यते इति तिथ्यादि
तत्वं ॥
महासत्रः पुं कुवेरः इति शब्द
माला अतिनिकटश्च ॥
महासफरः पुं बृहत्प्रोष्ठी मत्स्यः
अस्य गुणाः महासफर संज्ञस्तु
तिक्तः पित्तकफापहः शिशिरो
मधुरोरुच्यो वात साधारणः स्मृतः
इति भावप्रकाशः ॥
महासमंगा स्त्री क्षुपविशेषः कंग
हिया इति हिंदीभाषा तत्प
र्य्यायः ओदनिका २ ओदनाह्वया ३
हस्त्रा ४ रुहा ५ बहुबला ६ तंडु
ला ७ भुजंगजिह्वा ८ शीतपाकिनी ९
शीतबला १० शीतावला ११ बलो
त्तरा १२ बला १३ खिरहिटी १४
व्यालजिह्वा १५ अस्या गुणाः
मधुरत्वं अम्लत्वं दोषत्रयनाशि
त्वं मूत्राघाताश्मयोगज्वर दाह
नाशित्वंच इतिराजनिर्घंटः ।
महासर्जः पुं पनसः असनवृक्षः
इतिराजनिर्घंटः ॥
महासहः पुं कुब्जकवृक्षः इति
राजनिर्घंटः ॥ अग्निदमने त्रि
महासहा स्त्री माषपर्णी अम्ला
नवृक्षः इत्यमरः ॥
महासांतपनं व्रतविशेषः यथा
अथमहासांतपनं तत्रैवाह साध्य
सांतपनमुक्तो याज्ञवल्क्यः पृथक
सांतपने द्रव्यैः षडहः सोपवा ।




मकः समाहेनैवकृच्छ्रोऽयंमहा
सांतपनः स्मृतः एतत्समाहसा
ध्यं जावालः गोमूत्रं गोमयं
क्षीरं दधि सर्पिः कुशोदकं ए
कैकं क्रमशोऽश्नीयादहोरात्र।
मभोजनं कृच्छ्रःसांतपनो नाम
सर्वपाप प्रणाशनः एकैक मेत
देवं हि त्रिरात्र मुपयोजयेत् ॥
अहंचोपवसेदंत्यं महासांतपने
विधिः एततसमाह साध्य सां
तपनमुक्तायकविंशतिदिनसाध्य
महासांतपनमुक्तं महासांतप।
नं पेनषट्कदानसमं जावालो
क्तमहासांतपनस्यएकविंशति
दिनसाध्यत्वेन समाह साध्यसांत
पनात् त्रिगुणत्वान्महासांतपनेपे
नुषट्कं देयं इतिप्रायश्चित्त वि
वेकः ॥
महासारः पुं दुष्खदिरः इतिराज
निर्घंटः ॥
महासाहसं क्ली अतिवलात्कार
कृतकार्यं अतिशयदंडः इति
साहसशब्दार्थे मेदिनी अति
दुष्कृतकर्म अतिशयद्देयः इति
साहस शब्दार्थे हेमचंद्रः।
महासाहसिकः त्रि चौरः इति
केचित् अतिसाहस युक्तस्य

महासिंहः पुं सरभः इति राज
निर्घंटः वृहत्सिंहः स च देवी
वाहनं यथा उत्थायच महासिंहं
देवीचंडमधावत इतिमार्कंडेय।
पुराणे देवीमाहात्म्य ॥
महासुखं क्ली शृंगारः इतित्रिकांड
शेषः अतिशयानंदः तद्वति त्रि
महासुखः पुं बुद्धः इतित्रिकांड
शेषः ॥
महासुगंधा स्त्री गंधनाकुली इति
राजनिर्घंटः अतिसुगंधयुक्ते त्रि
महासूक्ष्मा स्त्री वालुका इतिराज
निर्घंटः अतिशयसूक्ष्मे त्रि।
महासेनः पुं कार्त्तिकेयः इत्यमरः
शिवः इति महाभारतेतस्य
सहस्रनामस्तोत्रं महासेना।
पतिः इति मेदिनी हेम्ना।
ईत्विन्नविशेषः इतिहेमचंद्रः।
महास्कंधा स्त्री जम्बुवृक्षः इतिराज
निर्घंटः वृहत्स्कंधयुक्ते त्रि ॥
महास्थली स्त्री पृथिवी इतिशब्द
माला श्रेष्ठस्थानंच ॥
महास्नायुः पुं कंडरा इति हेम
चंद्रः ॥
महास्वनी पुं शिवः इतिमहाभा
रते तस्यसहस्रनाम स्तोत्रं महा
स्वनः पुं मल्लतूर्य्यं इति त्रिको

डशेषः वृहच्छब्दः तद्युक्तेत्रि।
महाह्रदः पुं शिवः इतिमहाभार
ते तस्यसहस्रनामस्तोत्रं वृह
द्ध्रदयुक्ते त्रि ॥
महाहविः क्ली गयाहुतं यथा
गयाया मध वा पिंडं खड्गमांसं।
महाहविः कालशाकं तिलाढ्यं
वा कृशरं मासतृप्तये इति मा
र्कंडेयपुराणे श्राद्धकल्पः विष्णुः
इति महाभारते तस्यसहस्रना
मस्तोत्रं ॥
महाहासः पुं अट्टहासः इति
शब्दरत्नावली ॥
महाहिगंधा स्त्री गंधनाकुली।
इतिराजनिर्घंटः ॥
महाह्रस्वा स्त्री कपिकच्छुः इति
शब्दमाला अतिखर्वे त्रि ॥
महिः स्त्री पृथिवी इतिशब्दमा।
ला महिका स्त्री हिमं इत्यमरः
महितं त्रि पूजितं यथा रण
पंडितोऽथ विद्युधारि पुरे कल।
हंसराम महितः कृतवान् ज्वल
दग्निरावणगृहंच बलात्कलहं स
राममहितःकृतवान् इतिभट्टि।
काव्ये ९ सर्गः ॥
महितं क्ली राज्यं इत्युणादिकोषः
महिमा पुं शिवस्याष्टैश्वर्य्यांतर्गतो।

स्वर्य्यविशेषः इतिहेमचंद्रः सच
महत्वेयेन चतुर्दश भुवनान्यस्या
दरे वर्तंते इत्यमरटीकायां भ
रतः उत्कर्षः यथा अयोयः।
पश्यतः कस्यमहिमानोपजायते।
उपर्युपरि पश्यंतः सर्व एव द
रिद्रति इतिपुराणं ॥
महिरः पुं सूर्य्यः इति त्रिकांड।
शेषः
महिला स्त्री स्त्रीमात्रं प्रियंगुलता
इत्यमरः रेणुकानामकगंधद्रव्यं
इतिराजनिर्घंटः मत्तमत्ता स्त्री
इति शब्दरत्नावली ॥
महिलाह्वया स्त्रीप्रियंगुलता
इत्यमरः ॥
महिषः पुं स्वनामख्यातपशुविशेषः
तत्पर्य्यायः लुलापः २ वाह
द्विषत् ३ कासरः ४ सैरिभः ५।
इत्यमरः यमवाहनः ६ विषस्वरन्
७ वंशाभीरुः ८ रजस्वलः ९ इति
शब्दरत्नावली आतपः १० रक्ता
क्षः ११ अश्वारि १२ इति जटा।
धरः कासी १३ कलुषः १४ मन्दः
१५ विषाणी १६ गवली १७ वली १८
वनमहिष मांसं गुणाः। दोष
कारित्वं लघुत्वं दीपनत्वं बल
दायकत्वंच ग्रामीणमहिषमांसं ॥



गुणाः स्निग्धत्वं मलिनकरत्वं । पित्तहरत्वंच इति राजनिर्घंटः तर्पणत्वं स्निग्धत्वं उष्णत्वं मधुरत्वं गुरुत्वं निद्रा पुंस्त्व स्तन्य वर्द्धनत्वं मांसदार्ढ्यकृत्वंच इति राजवल्लभः अपिच ॥ महिषो घोटकारिः स्यात् कासरस्त्व रजस्वलः पीनस्कंधः कृष्णकायो लुलायो यमवाहनः महिषस्यामिषं स्वादु स्निग्धोष्णंवातनाशनं निद्राशुक्रबलस्तन्यतन्द्रीदीर्घकरं गुरु बृंहणंच सष्टविन्मूलं वातपित्तास्र नाशनं इति भावप्रकाशः ॥ श्मश्रुधारी म्लेच्छजातिविशेषः सच पुरा क्षत्रिय आसीत् सगरराजेनास्य वेदयागादावनधिकारो वेवेषान्यत्वं धर्मनाशश्चकृतः यथा हरिवंशे सगर स्तां प्रतिज्ञांच। गुरोर्वाक्यं निशम्यच धर्मं जघान तेषां वै वेषान्यत्वं च कार ह। अर्द्धं शकानां शिरसो मुंडयित्वा व्यसर्जयेत् जवनानां शिरः सर्वं। काम्बोजानां तथैवच पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः निःस्वाध्याय वषट्काराः कृतास्तेनमहात्मना शकाजवनकाम्बोजाः पारदाः पह्लवास्तथा कोलिसर्पीः समहिषादार्वाश्चोलाः सकेरलाः वशिष्ठवचनाद्राजन् सगरेण महात्मना इति पायश्चित्तं नत्वं अर्हद्द्विजविशेषः इति। हेमचंद्रः महिषासुरः यथा ॥ महिषेऽसुराणामधिपे देवानांच। पुरंदरे तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितं जित्वाच । सकलान् देवानिंद्रो भून्महिषासुरः इति मार्कंडेयपुराणे देवी। माहात्म्यं ॥

महिषकंदः पुं महाकंदविशेषः तत्पर्यायः शुभ्रालुः २ ललायकंदः ३ शुक्लकंदः ४ महिषीकंदः ५ अस्य गुणाः कटुत्वं उष्णत्वं कफवातामयापहत्वं मुखजाड्यहरत्वं। रुच्यत्वं असितश्चेत् महासिद्धिकरत्वंच इति राजनिर्घंटः ॥

महिषघ्नी स्त्री दुर्गा यथा महिषघ्नि महामाये चामुंडे मुंड मालिनि । आयुरारोग्यविजयं देहि देवि। नमोस्तुते इति दुर्गोत्सवपद्धतिः अपिच सिंह मारुह्य कल्पांते निहतो महिषो यया। महिषघ्नी ततो देवी कन्या वै सिंहवाहिनी इति देवीपुराणं ॥


महिषध्वजः पुं मयः अर्हद्विशेषः इति हेमचंद्रः ॥

महिषमर्द्दिनी स्त्री दुर्गा इतिशब्दरत्नावली अस्यामंत्रो यथा शारदायां भांतं वियत् सनयनं श्वेतो मर्द्दिनि ठद्वयं अष्टाक्षरी। समाख्याता विद्यामहिषमर्द्दिनी। नारायणीतंत्रे विषं हि मज्जा कालोग्निरिडिरिस्थानि ठद्वयं विषंमकारः हिस्वरूपं मज्जा यकारः कालो मकारः अग्नी। रेफः अद्रि दकारः इस्थ इति वचनादिकार युक्तो दकारः अयं मंत्र स्तारादि मायादिः कामादिर्वाग्भवादि र्वधूबीजादिः कवचादिश्च नवाक्षरः तथाच विश्वसारे प्रणवाद्यां जपेद्विद्यां मायाद्यां वाजपेत् सुधीः वधूबीजादिकां वापि कवचाद्यां जपेत्तथा सर्वकालेषु सर्वत्र कामाद्यां प्रजपेत् सुधीः वाग्भवाद्यां जपेन्मंत्र देवी वाक्यविशुद्धये अस्या ध्यानं गारुडोपल सन्निभां। मणिमय कुंडल मंडितां नौमि भाल विलोचनां महिषोत्तमांग निषेदुषीं शंखचक्रकृपाण खेटक वाणकार्मुकशूलकान् तर्ज्जनीमपि विभ्रतीं निजबाहुभिः शशिशेखरां इति तंत्रसारः ॥

महिषवल्ली स्त्री लताविशेषः छिरहिटी इति हिंदीभाषा तत्पर्य्यायः सोम्या २ प्रतिसोमा ३। श्वेतवल्लिका ४ तुंडपाख्या ५ अस्यागुणाः रसवीर्य्य विपाके सोमवल्ली समत्वं इति राजनिर्घंटः


महिषवाहनः पुं यमः इति शब्दरत्नावली ॥

महिषासुरः पुं रंभासुरपुत्रः तस्य उत्पत्ति र्यथा श्रीऔर्व उवाच । आराधितो महादेवो रंभेण सरवैरिणा चिरेण सच सुप्रीतस्तपसा तस्य शंकरः अथ तुष्टो महादेवः प्रत्युवाच रंभ मुक्तवान् प्रीतोस्मि ते वरं रंभ वरयस्व यथेप्सितं एवमुक्तः प्रत्युवाच रंभस्तवं वृषाध्वज अपुत्रोहं महादेव । यदि तेमय्यनुग्रहः मम जन्मत्रये पुत्रो भवान् भवतु शंकर अवध्यः सर्वभूतानां जेता च त्रिदिवौकसां चिरायुश्च यशस्वी च लक्ष्मीवान् सत्यसंगरः एवमुक्तस्तदेशेन प्रत्युवाच वृषध्वजः भवेतद्धोष्यतेते भविष्यामि सुतस्तव इत्युक्तः सहमहादेवस्तत्रैवांतरधीयत रंभोपि मानसः स्वस्थानं हर्षेत्।



फुल्लविलोचनः पथि गच्छन्स रम्भो ।
यदृच्छयाश्रमहिषीं शुभां त्रिहाय
णीं चित्रवर्णां सुंदरीं यौवनशालिनीं
स तां दृष्ट्वाथ महिषीं रंभः कामेन
मोहितः दोर्भ्यां गृहीत्वा च तदा
चकार सुरतोत्सवं तयोः प्रव
र्त्ते सुरते सा तदा तस्य तेजसा ।
दधार महिषी गर्भं तदाभून्महिषा
सुरः तस्यां स्वांगेषु गिरिशोऽस्त
पुत्रत्व मवाप्तवान् बहुधर्म तदा
दिभिः स्वकृपयैतत्समभवत् तस्य
योविहद्यत्वं यथा तेन कात्यायन
मुनिः सम्मवान् महिषासुरं दुर्वा
यवीर्य शिष्यार्थं शिष्यानुग्रहका
रकः कात्यायनेन शप्तं ते विज्ञा ।
य महिषासुरं प्राह प्रणम्य पूर्वत
वेदिकां चन्द्रशेखरः ईश्वर उवाच ।
देवि कात्यायनेनापि शप्तो ऽयं
महिषासुरः योषिद्विनाशकर्त्रीति
भवितेति जगन्मयि निःसंशयस्त्व
देवीकार्यं भविष्यति न संशयः म
दीयो माहिषः कायस्त्वया देवि ज
गन्मयि हन्तव्यः सततं योगयुक्तः
पूर्वे परेऽपि च हरिं हरिस्त्वरूपया ।
त्वां वोढुं मतो ऽधुना ममायं
माहिषः कायस्तव वोढा भविष्यति
इति पूर्वं महादेवो देवी प्रा
र्थितवान् पुरा तेन देवी महा
देवं जग्राह महिषासुरं त्रिषु जन्म
सु पुत्रोऽभूत्तरंभस्य भगवान्शिवः ।
सह त्रयं स रंभोऽपि रंभ प्रवत्य ।
जायत असुरः स्वाहप्रास्तेपे तपः
परम दारुणं तथैवाराधितः शं
भुः पुत्रार्थं प्रददौ वरं तथैव म
हिषीं भेजे प्रथमं सुरतायसः ।
तस्यां तथा भवद्धीरो दानवो म
हिषासुरः तथैव शापे भगवान् ।
मुनिः कात्यायनस्तत्र इति प्रहृत्ते
पूर्वस्मिन्परस्मिंस्तत्र जन्मनि म
हिषः पूजयित्वा च देवीं वरं मया
चत तृतीये जन्मनि वरं प्राप्य कल्प
नशोषतः नेहजन्म भवि तेन्मवं ।
वर मयाचत तेन देवी पद तले ।
तिष्ठन्त्येषोऽसुरोऽधुना नात्र प
न्ति रपि तस्यास्ति सम्बन्धोऽस्माकं बहू
रूप एवं देवी प्रसादेन महादेवा
गसंभवः परमवाप सततं प्र
तिपत्ति महासुरः इति ते कथि
तं राजन्यथा स महिषासुरः दे
वी पादतलं प्राप्य यथा सो
ऽद्यापि मोदते इति कालिकापु
राणे ६९ अध्यायः अपि च नार
द उवाच कस्मात्सो महिषो नाम र
क्तबीजात्स्य कस्य के कास्तौ कान्ता ।

यन्ती नाम या जज्ञे महिषासुरं प
तावविस्तरतस्तात यथावद्वक्तुमर्ह
सि पुलस्त्य उवाच श्रूयतां स
प्रवक्ष्यामि कथां पापप्रणाशिनीं
सर्वदा वरदा दुर्गा सेयं कात्यायनी
मुने सुरासुरौ वीरौ रौद्रौ जगत्
क्षोभकरावुभौ रंभश्चैव करंभ
श्च द्वावास्तां सुमहाबलौ ताव
पुत्रौ च देवर्षे पुत्रार्थं तेपतुस्तपः
बहून्वर्षगणान्दैत्यौ स्थितौ पंचन
देजले तत्रैको जलमध्यस्थो द्वि
तीयोऽप्यग्निपंचमी करंभश्चैव ।
रंभश्च यक्षं मालवटं प्रति एकं
निमग्नं सलिले ग्राहरूपेण वासवः
चरणाभ्यां समादाय निजघान
यथेच्छया ततो भ्रातरि नष्टे च रंभः
कोपपरिप्लुतः वह्नौ स्वशीर्षं
संछिद्य होतुमैच्छन्महाबलः ।
ततः प्रगृह्य केशेषु खड्गं च रविसं
प्रभं छेत्तुकामो निजं शीर्षं व
ह्निना प्रतिषेधितः उक्तश्चासुरा
मा भैवं नाशयात्मानमात्मना दु
स्तरा परवध्यापि स्ववध्यापि तु
स्तरा यच्च प्रार्थयसे वीर तद्ददामि ।
यथेप्सितं मा म्रियस्व मृतस्येह नष्टा
भवति वै कथा ततोऽब्रवीद्वचो
रंभो वरं चेन्मे ददासि हि त्रैलो ।
क्यविजयी पुत्रः स्यान्मत्तेजसा
धिकः अजेयो दैवतैः सर्वैः पुं
भिर्दैत्यैश्च पावक महाबलो
वायुरिव कामरूपी कृतास्त्रवित् ते
प्रोवाच कविर्बाढमेवं भवि
ष्यति ततोऽसुर इत्युक्तवा सको ।
देवेन वह्निना दानवो ययौ यक्षैः
मुनिवृंदैस्तत् यक्षैश्च परिवारितं
तेषां पद्मनिधिस्तत्र वसते नान्य
चेतनः गजाश्च महिषाश्चाश्वा गा
वोऽजाविपरिप्लुताः तान्ददर्शैव ।
तदा चक्रे भावं दानव पार्थिवः
महिष्यां रूपयुक्तायां त्रिहायण्यां
तपोयुक्तः समागच्छन्दैत्येन्द्रं ।
कामयन्ती तरस्विनी स चाभिगमं
ने चक्रे भवितव्यप्रचोदितः तस्यां
समभवद्गर्भं तां प्रगृह्याथ दान
वः पाताले प्रविवेशाथ ततः स्वभ
वनं गतः दृष्टश्च दानवैः सर्वैः
परित्यक्तश्च बंधुभिः अकार्य
कारकस्त्वेवं भूयो मालवटं गतः
सापि तेनैव पतिना महिषी चा
रुदर्शिना समं जगाम तत्पुण्यं यत
मंडलं सुत्तमं ततस्तु वसतस्त
स्य श्यामा सा सुषुवे मुने अजी
जनत् सुतं शुभं महिषं का
मरूपिणं ॥




इतिवामनपुराणे १८ अध्यायः
अन्यच्च परणपुवाच या सा माया
शारीरात्तु ब्रह्मणोऽव्यक्तजन्मनः गा
यच्चष्टभुजा भूत्वा वैत्रासुरमयोध्य
यत् सैवनंदाभवद्देवी देवकार्य्यवि
कीर्षया महिषाख्यासुरवधं कुर्व
ती ब्रह्मणोदिता वैस्याच हतो देव
कण्यमेनहि संशयः वाराहउवाच
इयं जगद्धिता देवी गंगा शंकर
सप्रिया क्वचित् किंचित् भवेद्धत
सपदं देव सर्ववित् स्वायंभुवे ह
तो दैत्यो वैस्त्रव्या मंदरे गिरौ ।
महिषाख्योऽपरं पश्चात सवै ।
चैत्रासुरः पुनः नंदया निहतो
विंध्ये महाबल पराक्रमः अथवा
ज्ञानशक्तिः सा महिषोऽज्ञानमू
र्तिमान् अज्ञानं ज्ञानसाध्यंत ।
भवतीति न संशयः मूर्तिपत्ते वे
तिहासा मन्त्रै वेदकल्पानि ख्याः
यते वेदवाक्यैस्तु इहसा वेदवा
दिभिः इतिवराहपुराणं ॥
महिषासुरसंभवः पुं भूमिजगुग्गु
लः इतिराजनिर्घंटः ॥
महिषासुरहंत्री स्त्री दुर्गा यथा
महिषासुर हंत्र्याश्च प्रतिष्ठारक्ति
णायने इतिप्रतिष्ठातत्वधृत प
मपुराण वचनं ॥

महिषाक्षः } पुं गुग्गुलः इतिराज
महिषाक्षकः } निर्घंटः ॥
महिषी स्त्री कृताभिषेका राजप
त्नीत्यमरः सैरिंध्री ॥ औषधि ।
भेदः इति मेदिनी महिषयो ।
षित् तत्पर्य्यायः मंदगमना २
महाक्षीरा ३ पयस्विनी ४ लुलाप ।
कांता ५ कलुषा ६ तुरंगमहिषाणी ७
अस्याः क्षीरगुणाः मधुरत्वं वि
पाके शीतलत्वं गुरुत्वं बल
पुष्टिप्रदत्वं हृष्यत्वं पित्तदाहा ।
स्रनाशित्वंच तस्यादधिगुणाः
मधुरत्वं स्निग्धत्वं श्लेष्मकारित्वं ।
रक्तपित्त नाशित्वं बलासवर्द्धन ।
त्वं वस्त्रत्वं श्रमघ्नत्वं शोषणत्वंच
अस्यानवनीतगुणाः ॥ कषा ।
यत्वं बलत्वं ग्राहित्वं पित्तघ्नत्वं ।
तंदरत्वंच अस्याघृतगुणाः उ
त्तमत्वंच ॥ [illegible]ः ॥
प्रतिकारत्वं सुखदत्वं कांतिकृत्वं वा
तश्लेष्मनाशित्वं कलकारत्वं वर्णप्रद
त्वे समत्वं दुर्नाम ग्रहणीविकार श
मनत्वं मंदानलोद्दीपनत्वं बलप्रदत्वं ।
गव्यतो न श्रेष्ठत्वं हृद्यत्वं मनो ।
हारित्वंच अस्या मूत्र ॥
गुणाः आनाहशोफ गुल्मो ।
दोष नाशित्वं ॥


कटुत्वं उष्णत्वं रूक्ष कं इति ।
शूलोदररोग नाशित्वंच इति
राजनिर्घंटः ॥
महिषीप्रिया स्त्री शूलीतृणं इ
तिराजनिर्घंटः ॥
मही स्त्री पृथिवी इत्यमरः न
दीविशेषः साच मालवदेशे वर्त्तते
इतिमेदिनी तज्जलगुणाः म
हीजलंतु स्वादुबल्यं पित्तहृद्
गुरु इतिराजनिर्घंटः गौः ।
इतिजटाधरः हिलमोचिका ॥
इति त्रिकांडशेषः ॥
महीजं क्ली आर्द्रकं इतिरा ।
जनिर्घंटः भूमिजातेत्रि ।
महीजः पुं मंगलग्रहः यथा र
वौ रसाक्षी क्षितिगौहयाक्षीहयं
महीजे विधुजे शशाक्षी गुरौ शशाक्षी
भृगुजे तृतीयशनौ रसाद्येन मि
तिल्पाया इतिसमयप्रदीपः ।
महीध्रः पुं पर्वतः इत्यमरः ।
महीपालः पुं राजा यथा सप
पात महीपृष्ठे शस्त्रसंघसमाह
तः नीरक्तश्च महीपाल रक्तवी
जो महासुरः इतिमार्कंडेयपुरा
णे देवीमाहात्म्यं ॥
महीप्राचीरं क्ली समुद्रः इतित्रि
कांडशेषः ॥

महीभृत् पुं पर्वतः यथा महीभृतः
पुत्रवतोपि दृष्टिस्तस्मिन्नपत्येन ।
जगाम तृप्तिं अनंतपुष्पस्य मधो
र्हि चूते द्विरेफमालाः सविशेष
संगाः इतिकुमारसंभवे १ सर्गः ।
राजा यथा येमयानुगता नि
त्यं प्रसादधनभोजनैः अनुरा
गं प्रकुर्वंतेऽनुकुर्वंत्यन्य महीं ।
भृतां इतिमार्कंडेयपुराणे दे
वीमाहात्म्यं ॥
मही मयः त्रि मृत्तिकानिर्मितः
यथा तौ तस्मिन् पुलिने देव्याः कृ
त्वा मूर्तिं महीमयीं अर्हणां चक्रतु
स्तस्याः पुष्पधूपाग्नितर्पणैः इति
मार्कंडेयपुराणे देवीमाहात्म्ये ।
महीरुहः पुं वृक्षः इत्यमरः ।
शाकवृक्षः इति राजनिर्घंटः
महीलता स्त्री किंचुलकः इत्यम
रः महीसुतः पुं मंगलः इत्यमरः
महीक्षित् पुं राजा इत्यमरः
महेच्छः पुं महाशयः इत्यमरः
महेंद्रः पुं विष्णुः इतिमहाभारते
तस्य सहस्रनामस्तोत्रं शक्रः ।
जम्बुद्वीपस्य पर्वत विशेषः इति
मेदिनी ॥
महेंद्रकदली स्त्री कदलीभेदः इ
तिराजनिर्घंटः ॥



फलविलोचनः पथिगच्छन्नसरंभो
यदृच्छमहिषीं शुभां विहाय
तांविचित्रवर्णां सुंदरीं कृतशालि।
नीं सतां दृष्ट्वाथमहिषीरंभः कामेन
मोहितः दोर्भ्यांगृहीत्वाच तदा
चकार सरतो सवे तयोः शक्ते
त्रेसरते सा तदा तस्य तेजसा
दधार महिषी गर्भंतदाभून्महिषा
सुरः तस्यां स्वांगेषु गिरिषु स्वतः।
पुत्रत्वं मवाप्तवान् वहृये स तदा
वाग्भिः शुक्रपत्ते समुद्भवत् तस्य
योविहृष्यत्वं यथा तंतकात्यायन
मुनिः शापवान् महिषासुरं कुर्णा
येवीत्य शिष्यात् गृह्य कार।
कः कात्यायनेन शप्तं तं विज्ञा
य महिषासुरं प्राह प्रणयपूर्वता।
धंद्रिकां चंद्रशेखरः ईश्वर उवाच।
देविकात्यायनेनापि शप्तोऽयं।
महिषासुरः योषिद्धिनापाकर्त्री ति
भवितेति जगत्स्यपि निःसंशयम्
देवीवध्यं भविष्यति न संशयः म
हीयो माहिषः कायस्त्वयादेविजग
त्सापि हंतव्यः सततं योगयुक्तः
पूर्वे परेपिच हरिर्हरि स्वरूपेण
त्वां वोढुमहत्समोऽधुना ममाय
माहिषः कायस्तव वाच्या भविष्य
ति इति पूर्वं महादेवो देवीं प्रा
र्थितवान् पुरा तेन देवी महा
देवं जगाद महिषासुरं त्रिपुजन्म
स्वप्नेषोऽभूतरं भस्य भगवान् शिवः
सृष्टित्रयं स रंभोपिरंभ एव स
जायत असुरस्तादृशस्तेपे तपः
परमदारुणं तथैवाराधितः शं
भुः पुत्रार्थेप्रददौ वरं तथैवम
हिषीं भेजे प्रथमं सुरतायसः।
तस्यांतथा भवद्वीरो दानवो म
हिषासुरः तथैव शापे भगवान्
मुनिः कात्यायनस्त्वतं इतिप्रवृत्ते
पूर्वस्मिन् परस्मिन् सत्वजन्मनि मा।
हिषः पूजयित्वाथ देवीं वरमयाचत
तृतीये जन्मनि वरं प्राप्य कल्यान
शोभनः नेहमेजन्म भवितेत्येवं।
वरमयाचत तेन देवीपदतले
तिष्ठत्येषोऽसुरोऽधुना नोत प
त्रिरपि तस्यास्ति समवर्तीत्वान्वह
रूप एवं देवीप्रसादेनमहा दे
वांग संभवः परामवाप संततं।
प्रतिपत्तिं महासुरः इतिते क
थितं राजन् यथा समहिषासुरः
देवीपादतलं प्राप्य यथा सा
ऽद्यापि मोदते इतिकालिकापु
राणे ५९ अध्यायः ॥ अपिच
नारद उवाच कस्मात्सो महिषाना
मरक्तबीजादयश्चके कासौ कात्या

निर्घंटः ॥
महोटिका स्त्री बृहती इतिराज
निर्घंटः ॥
महोटी स्त्री बृहती इति भाव
प्रकाशः बृहज्जत्पलंच ॥
महोल्का स्त्री विद्युत् इतिकेचित्
महोत्पलं क्ली पद्मं सारसपत्री
इत्यमरः ॥
महोत्सवः पुं अतिशयसत्वजन
कर्मा यथा सर्वेषुजन्मादिवसे।
स्नाते मंगलपाणिभिः गुरुदेका
ग्निविप्राश्च पूजनीयाः प्रयत्नतः
स्वनक्षत्रंच पितरौ तथादेव प्रजाप
तिः प्रतिसम्वत्सरंचैवकर्तव्यश्च
महोत्सवः इतितिथ्यादितत्वे ब्र
ह्मपुराण वचनं अपिच दुर्गा
तंत्रेण मंत्रेण कुर्यादुर्गा महोत्
सवं महानवम्यां शारदि बलिदा
नंनृपादयः इतिकालिकापुराणे
६९ अध्यायः ॥
महोत्साहः त्रि अतिशयोत्साह
युक्तः तत्पर्यायः महोद्यमः २
इत्यमरः ॥
महोत्साहः पुं राज्यांगशासराज
पुरुषः यथा सम्पन्नस्य प्रकृति
भिर्महोत्साहः कृतश्रमः इति
शब्दमाला अतिशयोद्यमश्च ॥
महोदधिः पुं समुद्रः यथालंका
दग्ध्यावनं भग्नेलेचितश्च महोद
धिः यत्कृतंरामहतेन स रामः
किं करिष्यति इतिमहानाटके
महोदयं क्ली पुरविशेषः तत्
पर्यायः कान्यकुब्जं २ कन्याकुब्जं ३
गाधिपुरं ४ कौशं ५ कुशस्थलं ६
इति हेम चंद्रः ॥
महो दयः पु कान्यकुब्जदेशः आ
धिपत्यं अपवर्गः इतिमेदिनी।
स्वामी इतिहेमचंद्रः ॥
महोदया स्त्रीनागवला इतिराज
निर्घंटः ॥
महोदरी स्त्री महाशतावरी इति
भावप्रकाशः बृहद्दरयुक्ते त्रि
महोद्यमः त्रि महोत्साहः इत्य
मरः अतिशयोद्योगेपुं ॥
महोन्नतः पुं तालवृक्षः इति
भावप्रकाशः अत्युन्नतियुक्ते त्रि
महोन्नतिः स्त्री अतिशयवृद्धिः
यथा भूयात्ते महदैश्वर्यं पुत्रा
दीनां महोन्नतिः अव्याधिनाशरी
रेण चिरंजीव सुखीभव इत्यु
द्भटः ॥
महोन्मदः पुं मत्स्यविशेषः फलुई
इतिभाषा यथाराजग्रीवश्चित्रफलः
फलकीच महोन्मदः इति ॥




शब्दरत्नावली अत्युत्तमतेजि ।
महोरगं क्ली तगरमूलं इतिमेद
माला ॥
महोरगः पुं सर्पगणविशेषः इति
हेमचंद्रः बृहत्सर्पमात्रंच ॥
महोल्का स्त्री उल्काविशेषः य
थाविद्युत्स्तनितनिर्घातमहोल्का
नांचसंप्लवे आकालिकमनध्याय
मेतेषुमनुरब्रवीत् महोल्कानांच
संप्लवे इतस्ततो ऽनेक महोल्का
नां सन्निपाते उल्कालक्षणमाह
बृहद्बृहस्पतिः बृहच्छिरोच सूक्ष्मा
ग्रारक्त नीलशिखोज्ज्वला पौरुषी
च प्रमाणेन उल्कानानाविधास्मृ
ता इतितिथ्यादितत्त्वं ॥
महोक्षः पुं बृहद्वृषः इत्यमरः
तत्पर्यायः वृषभः २ वृष ३ पुं
गवः ४ बली ५ गोनाथः ६ ऋष
भः ७ गोप्रियः ८ उक्षा ९ गोपतिः १०
इति राजनिर्घंटः ॥
महौजाः त्रि अतितेजोयुक्तः
महदोजोयस्येति विग्रहे बहुव्री
हौ प्रथमैकवचने भूतसाध्या
त्वितनेन दीर्घत्वेनमहौजा इति
पदं सिध्यन्तं ॥
महौषधं क्ली शुण्ठ्याद्युत्सं शुण्ठी
लशुनं वाराहीकंदः वत्सना

भः इतिराजनिर्घंटः पिप्पली ॥
इति शब्दचंद्रिका अतिविषा ।
इत्यमरः ॥
महौषधिः स्त्री दूर्वा लज्जालुर्वा
इति शब्दचंद्रिका महास्नानी ।
यद्द्रव्यविशेषः यथा सहदेवी त
थाव्याघ्री बलावातिबलातथा श
खपुष्पीतथासिंही अष्टीचसुवर्च
ला महौषध्यष्टकं प्रोक्तमस्नानं स्ना
ने नियोजयेत् इति गोविंदा
नंद धृत मत्स्यपुराण वचनं ।
अपिच पृश्निपर्णी श्यामलता
भृंगराजः शतावरी गुडूची मह
देवाच महौषधिगणः स्मृतः इ
ति शब्दचंद्रिका श्वेतौषधिस्त्री ।
महौषधी स्त्री श्वेतकंटकारी ।
ब्राह्मी कटुका अतिविषा ।
इतिराजनिर्घंटः हिलमोचिका
इति त्रिकांडशेषः ॥
मक्ष रोषे संघाते इति कवि
कल्पद्रुमः मक्षति इतिदुर्गादा
सः मक्षः पुं स्वदोषाच्छादनं इति
हारावली क्रोधः समूहः
इति पूर्वोक्तधात्वर्थदर्शनात् ।
मक्षवीर्यः पुं प्रियालवृक्षः इति
राजनिर्घंटः ॥
मक्षिका स्त्री कीटविशेषः माछि

इति भाषा तत्पर्यायः मक्षी
का २ भंभवः माचिका ४ गंधलो
लुपा ५ पतंगिका ६ पत्रिका ७
इति शब्दरत्नावली अमृतोत्प
न्ना ८ वमनीया ९ पलंकषा १०
इति राजनिर्घंटः नीला मक्षिका
वर्वणा ११ इत्यमरः ॥ तन्नाशक
धूपो यथा त्रिफलार्जुनपुष्पाणि
भल्लातकशिरीषकं लाक्षा सर्ज
रसश्चैव विडंगश्चैव गुग्गुलुः
एतैर्धूपैर्मक्षिकाणांमशकानां ।
विनाशनं इति गारुडे १८८ अ
ध्यायः ॥
मक्षिकामलं क्ली सिक्थकं इति
राजनिर्घंटः ॥
मक्षीका स्त्री मक्षिका इतिराज
निर्घंटः ॥
मा ङ लि शब्दे माने इतिकवि
कल्पद्रुमः ङ. लि मिमीते अन्या
यमें मिमीतेयः इतिहलायुधः
इतितट्टीकायां दुर्गादासः ॥
मा ल माने इतिकविकल्पद्रुमः
ल माति भूमिं नलेन राज्ञा न
मांति मानिनो यस्ययशांसि भुव
नोदरे इति हलायुधः इति
दुर्गादासः ॥
मा ङ. य. माने इतिकविकल्पद्रुमः

ङ यमायते इति दुर्गादासः ।
मा व्य वारणे विकल्पः इति
मेदिनी ॥
मा स्त्री लक्ष्मीः इति मेदिनी
माता मानं इत्येकाक्षरकोषः ।
शब्दरत्नावलीच ॥
मा(त्रिमदीयाकमेला आमाके इति
मां(भाषा अस्मच्छब्दात्द्वितीयै
कवचननिष्पन्नंपदं इतिव्याकरणं
मांसं क्ली रक्तजयातुविशेषः मा
स इति भाषा स तु गर्भस्यबाल
कस्याष्टभिर्मासै र्भवति इतिस्मा
र्त्तबोधः भागवतमते चतुर्भिर्मा
सैर्भवति तत्पर्यायः पिशितं २
तरसं ३ पललं ४ क्रव्यं ५ आमि
षं ६ पलं ७ इत्यमरः ॥ अस्रजं
८ जांगलं ९ कीरं १० सर्व मांस
गुणाः वातनाशित्वं हृद्य त्वं
बल्यत्वं रुच्यत्वं बृंहणत्वं देश
शास्यान सात्म्य संस्या स्वभावैर्भे
दो नाना रूपत्वंच ॥ अस्रदा
भ्रष्टायान्तूपवारिज वारिवारि मां
सगुणाः गुरुत्वं उष्णत्वं मधुरत्वं
स्निग्धत्वं वातघ्नत्वं श्लेष्मवर्द्धनत्वं
च ॥ विष्किरप्रतुद जांगल ।
मांसगुणाः लघुत्वं शीतत्वं म
धुरत्वं कषायत्वं चक्षुष्यं हित




मंच अंगविशेष मांस
गुणाः एकदेहेपि पूर्वार्द्धं मृगाणां
पक्षिणांपरं सर्वेषांचाशिरःस्कंधः ।
सीहृ चर्मयकृत् गुदं पादद्वन्द्वा
नमस्तिष्कं शुष्कं क्रोडाञ्चमेहनाः
धातवः शोणितान्याभ्यगुरवःस्यु
र्यथोत्तरं प्रशस्ताप्रशस्त मां
संयथा वयस्थं निर्विषंसद्योहृ
तंमांसंप्रशस्यते मृतंचव्याधितं
शुष्कं वृद्धं वालविषैर्हतं अ
गोचर हतं ग्राडस्तूदितं मांस
मुत्सृजेत् अष्टविधा मांस
योनिर्यथा प्रसहा । प्रसहाभ
क्षणात् कुरर श्येनादयः भूश
याः२ विलशायित्वात् नकुलगोधा
दयः आनूपाः ३ रुरुमहिषवरा
हादयः जलजाः ४ कुंभीरादयः जा
लेचराः ५ हंसवकप्रभृतयः जांग
लाः६ हरिणछागादयः विष्किराः७
विकीर्य्यचरणात्तित्तिरमयूरकुक्कुटा
दयः प्रतुदाः८ प्रतुद्यचरणात्क
पोतपारावतादयः इति राज
निर्घण्टः अपिच मांसंवातहरं
सर्वंवृंहणंबलपुष्टिकृत् ।
प्रीणनं गुरुहृद्यंचमधुरंरसपाक
योः अथतत्तद्रसः मांसवर्गो
द्विधा ज्ञेयोजांगलानूप भे

दतः तत्र जांगलस्थलचराणां गु
णाश्च मांसवर्गोऽत्रजंघाला विल
स्थाश्च गुहाशयः तथापर्णमृगाश्च
विष्किराः प्रतुदाअपि प्रसहाश्च
वग्राम्याश्चेज्जांगलजातयः जां
गलामधुरारूक्षाः कषाय लघवस्त
था वल्याः स्नेहंहरणा दृष्यादीपना
दोषहारिणः मूकतांमिन्मिनत्वंच
गद्गदत्वार्दिते तथा वाधिर्य्यमरु
चिछर्दिं प्रमेहमुखजान्गदान् ।
श्लीपदं गलगंडंच नाशयंत्यनिला
मयान् अथानूपस्य लक्षणं ।
गुणाश्च कूले चराः लवाश्चापि
कोषस्थाः पादिनस्तथा मत्स्या एते
समाख्याताः पंचधानूपजातयः
आनूपा मधुराः स्निग्धागुरवोवह्नि
सादनाः श्लेष्म लाः पिच्छिलाश्चा
पिमांसपुष्टिप्र दाश्भृशं तथाभि
ष्यंदिनस्तेहिप्रायोऽपथ्यतमा ।।
स्मृताः अथ जांगलानां गणना
विशिष्टा गुणाश्च हरिणैनकुरंग
र्ष्यपृषतन्यंकुशम्बराः राजीवो
पिचमंडीचेत्याद्याजांगलसंज्ञकाः
हरिणस्ताम्रवर्णःस्यादेणः कृष्णः
प्रकीर्त्तितः कुरंगईषत्ताम्रःस्याद्ध
रिणाकृतिको महान् ऋष्योनी
लांडकोलोकेसरोरु इति की

र्त्तितः पृषतश्चंद्रविंदुः स्याद्धरि
णात्किंचिदल्पकः न्यंकुर्वहुविषा
णः स्यात् शाम्बरोगवयोमहान् राजी
वस्तु मृगोज्ञेयो राजीभिः परितो
वृतः याम्यगः शृंगहीनः स्यान्मा
सुद्दीतिनिगद्यते जंघालाः प्रायशः
सर्वेपित्तश्लेष्महराः स्मृताः किंचि
द्वातकराश्चापि लघवोवलवर्द्धनाः
अथविलेशयानां गणना गु
णाश्च गोधा शशभुजंगाखुशल्ल
क्यादयाविलेशयाः विलेशया वा
तहरामधुरारसपाकयोः वृंहणा
वद्धविन्मूत्रा वीर्य्योष्णा अपिकीर्त्ति
ताः ॥ अथगुहाशयानां गणना
गुणाश्च सिंहव्याघ्रवृकाऋक्षतर
क्षुद्वीपिनस्तथा वभ्रुजंवुकमार्जा
रा इत्याद्याः स्युर्गुहाशयाः स्यु
लघुश्चोरक्तनेत्रो वभ्रुर्भेदःसनाकु
लः गुहाशयावातहरागुरूष्णमधु
राश्चते स्निग्धावल्याहितानित्यं ने
त्ररुग्गुह्य विकारिणां ॥ अथपर्ण
मृगाणां गणनागुणाश्च वनौको
वृक्षमार्जार वृक्षमर्कटिकादयः प
र्णमृगाः प्रोक्ताःसूक्ष्माद्यैर्महा
र्षिभिः स्मृताः पर्णमृगा वृष्या श्च
क्षुष्याः शोषिणे हिताः श्वासार्शः
कासशमनाः सृष्टमूत्रपुरीषकाः ।

अथविष्किराणांगणना गुणाश्च
वर्त्तकालाव विकिर कपिंजलकति
त्तिराः कुलिंगकुक्कुटाद्याश्च विष्कि
राः समुदाहृताः विकीर्य्य भक्षयं
त्येते यस्मात्तस्माद्धि विष्किराः क
पिंजला इतिप्राज्ञैः कथिता गौ
रतित्तिराः विष्किरामधुराः शीताः
कषायाः कटुपाकिनः वल्या
वृष्यास्त्रिदोषघ्नाः पथ्यास्तेलघव :
स्मृताः अथप्रतुदानां गणना
गुणाश्च कालकंठकहारीतकपो
त शशपत्रकाः सारिका खंजरी
टश्च पिकाद्याः प्रतुदाः स्मृताः
प्रतुद्यभक्षयंत्येते तुंडेन प्रतुदा
स्ततः कायोलोपचलःपाडुः पात
पत्रोहृद्वच्छकः प्रतुदामधुराः पि
त्तकफघ्नास्तु वराह्निमाः लघवोव
द्धवर्च्चस्काः किंचिद्वातकराःस्मृता :
अथप्रसहानां गणना गुणा
श्च काको गृध्र उलूकश्च चिल्लश्च
शशघातकः चाषोभासश्च कुरर
इत्याद्याःप्रसहाः स्मृताः प्रसहाः
कीर्त्तिता एते प्रसह्य छित्वाभक्ष
णात् प्रसहाः खलवीर्य्योष्णाः प
णमांसंभक्षयंतिये तेशोष भस्मा
कोन्मादैः शुक्रक्षीभवंति हि ॥
शशघातकस्थानेघातचातकोपि ।



पाठः वाज इति लोके ॥
अथ ग्राम्याणां गणनागुणाश्च ।
गोमेष वृषाश्वाद्या ग्राम्याः प्रोक्ता म
हर्षिभिः ग्राम्या वातहराः सर्वे
दीपनाः कफपित्तलाः मधुरा रस
पाकाभ्यां बृंहणा बलवर्द्धनाः ।
अथ कूलेचराणां गणना गुणा
श्च लुलाय गण्डवाराह चमरीवारणा
दयः एते कूलेचराः प्रोक्ता यतः
कूले चरन्त्यमी कूलेचरा मरुत्
पित्तहरा वृष्या बलावहाः मधुराः
शीतलाः स्निग्धा मूत्रलाः श्लेष्मव
र्द्धनाः अथ प्लवानां गणना गुणा
श्च हंससारसकादम्ब बक क्रौ
च सारिकाः नन्दीमुखीसकादम्
मा बलाकाद्याः प्लवाः स्मृताः प्लव
न्ते सलिले यस्मादेते तस्मात् प्लवाः
स्मृताः स्थूलाकडोराह्वनावयस्या
श्चञ्चूपरिस्थिता गुटिका बन्धु स
दृश्यते ज्ञेया नन्दीमुखीति सा प्लवाः
पित्तहराः स्निग्धा मधुरा गुरवो हि
माः वातश्लेष्मप्रदाश्चापि बल
शुक्रकराः सराः अथ कोषस्था
नां गणना गुणाश्च शंखः शंखनख
श्चापि शुक्तिशम्बूककर्कटाः जीवा
एवंविधाश्चान्ये कोषस्थाः परिकीर्त्ति
ताः कोषस्थाः मधुराः स्निग्धाः पि

त्तघ्ना वातहरा हिमाः बृंहणा बहुव
र्च्चस्कादिनां गणना कुम्भीर कूर्म्मन
नक्राश्च गोधामकरशङ्कराः घटिर
वृष्याश्च बलवर्द्धनाः अथ पा ।
कः शिशुमार श्चेत्यादयः पादिनः स्
मृताः पादिनोपि च ये ते त
कोषस्थानां गुणैः समाः इति भाव
प्रकाशः अन्यच्च ॥ मांसं
वातहरं वृष्यं बृंहणं बलवर्द्धनं
प्रीणनं गुरु हृद्यञ्च मधुरं रस पा
कयोः तस्मात्तति स्थान ॥
महर्षिये यथा प्रसह्य भक्षयन्ते
ते प्रसहा स्तेन कीर्त्तिता भूशया
बिलशायिनोरानूपानूप संश्रया
न जले निवासाज्जलजा जलेचर्य्या
ज्जलेचराः स्थलजा जाङ्गलाः प्रोक्ता
मृगा जङ्गलचारिणः विकीर्य्य वि
ष्किराश्चैव प्रतुद्य प्रतुदा स्मृता
योनि रष्ट विधा त्वेषां मांसानां
संप्रकीर्त्तिता प्रसहा भूशया
नूपवारिजा वारिचारिणः गुरूस
मधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः
लावाद्यो वैष्किरो वर्गः प्रतुदा
जाङ्गला मृगाः लघवः शीतमधुराः
सकषाया हिता नृणां अथ मां
सस्य गुणाः रसो मांसस्य बल्यो
बृंहणः प्राण वर्द्धनः वृष्यो वात

विकारघ्नः स्मृत्योजः स्वरवर्द्धनः भ
ग्नविश्लिष्ट संधीनां क्षतानां क्षीणि
नां हितः अथ तैलपक्वमांसगु ।
णाः मांसं च तैलसंसिद्धं वीर्य्योष्णं
पित्तलं कटु अग्निसन्दीपनं रुच्यं
दृष्टिघ्नं पुष्टिकृद्गुरु घृतपक्व
मांसगुणाः मांसन्तु घृतसंसिद्धं
रुच्यं पुष्टिकृल्लघु प्रीणनं सर्व
धातूनां विशेषान्मुखशोषिणां ।
परिशुष्क प्रदिग्ध मांसयोर्लक्षणं
गुणाश्च मांसं बहुघृते भृष्टं सिक्तमु
ष्णाम्बुना मुहुः जीरकाद्यैः समा
युक्तं परिशुष्कं तदुच्यते परिशुष्कं
स्थिरं स्निग्धं हर्षणं प्रीणनं गुरु ।
पित्तघ्नं बलमेधाग्निमांसौजःशुक्र
वर्द्धनं तदेव च नतक्षोदशरिग्ध
सविज्ञानकं प्रदिग्धं बलमांसाग्नि
वर्द्धनं वात पित्तजित् शूलि
का पक्वमांसगुणाः मांसन्तु शू
लिका प्रोतमङ्गारेण विपाचितं ।
ज्ञेयं गुरुतरं वृष्यं शीमाग्नीना
मसाहितं वेशवार मांसस्य ।
लक्षणं गुणाश्च निरस्थिपिशि
तं पिष्टं सिद्धं गुडघृतान्वितं कृष्णा
मरिचसंयुक्तं वेशवार इति स्मृतं ।
वेशवारो गुरुः स्निग्धो बलोपचय
वर्द्धनः स्थापन पनयेनेहृद्व्यंजने

मत्स्यमांसयोः तस्यतस्य तयो
श्चैतद्गुणदोषं विभावयेत् ॥
एकत्र सर्वमांसभक्षणदोषा यथा
एकत्र सर्वमांसानि विरुध्यन्ते प
रस्परं मांसस्य गुरुत्वं यथा अ
न्नादष्टगुणं पिष्टं पिष्टादष्टगुणं
पयः पयसोष्टगुणं मांसं मांसा
दष्टगुणं घृतं घृतादष्टगुणं तैल
मर्द्दनाच्च भक्षणात् इति राज
वल्लभः वर्ज्जनीयमांसानि ॥
यथा कव्याद् पक्षि दात्यूह शुक
मांसानि वर्ज्जयेत् सारसैकशफान्
हंसान् बलाका चक्र टिट्टिभान् ।
कुरं जालपादं च खञ्जरीटमृग
द्विजान् वासान्मात्स्यान् रक्तपादां ।
न् जग्ध्वा वै कामतोनरः वेधुरका
मेता जग्ध्वा सोपवासस्त्र्यहं वसेत्
इति गारुडे ९९ अध्यायः ॥
मांस भक्षणे दोषो यथा लो
भान्मक्षनार्थाय जीविनं हन्ति यो
नरः मज्जाण्डे वसेत् सोपि त
द्रोजीलतवर्षकं ततो भवेत् स ।
शाशकोमीनश्च समजन्मसान्तरणा
दयश्च कर्म्मभ्यस्ततः शुद्धिं लभेत ।
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७
अध्यायः अपिच बलाके हंसरा
ष्ट्रे कलविङ्के शुके तथा क्रौ

रंचचकोरंच जालपादंचकोकि
लं चार्यंचखञ्जरीटंचश्येनं गृध्रं
तथैवच उलूकं चक्रवाकंचभासं
पारावतमेवापि कपोतं टिट्टिभं
चैव ग्रामटिट्टिभमेवच सिंह
व्याघ्रंच मार्जारं श्वानं कुक्कुरमे
वच शृगालंमर्कटंचैव गर्दभंचन
भक्षयेत् नभक्षयेत् सर्वमृगान्प
क्षिणोऽन्यान्वनेचरान् जलेचरान्
स्थलेचरान्प्राणिनश्चेतिधारणा
इतिकूर्मपुराणे उपरिभागे १८
अध्यायः ॥ अन्यच्च नाद्याद
विधिनामांसंविधिज्ञोनापदिद्वि
जः जग्ध्वाह्यविधिनामांसंप्रेत्य
तैरद्यतेऽवशः नतादृशं भ
वत्येनोमृगहन्तुर्धनार्थिनः याद
शंभवतिप्रेत्यवृथामांसानि खा
दतः कुर्याद्घृतपशुं संगे कु
र्यात्पिष्टपशुंतथा नत्वेवतु वृ
थाहन्तुं पशुमिच्छेत्कदाचन।
यावन्तिपशुरोमाणितावत्कृत्वो
हमारणं वृथापशुघ्नः प्राप्नोतिप्रे
त्यजन्मनि जन्मनि नाकृत्वाप्राणि
नांहिंसांमांसमुत्पद्यते क्व
चित् नचप्राणिवधः स्वर्ग्यस्तस्मा
न्मांसंविवर्जयेत् समुत्पत्तिंच मां
सस्यवधबन्धौचदेहिनां प्रसमी
क्ष्य निवर्त्तेत सर्वमांसस्य भक्षणात्
न भक्षयति यो मांसं विधिं हि
त्वा पिशाचवत् सलोके प्रियतां
याति व्याधिभिश्च नपीड्यते।
स्वमांसं परमांसेन यो वर्द्धयितु
मिच्छति अनभ्यर्च्य पितॄन्देवान्
ततोऽन्यो नास्त्यपुण्यकृत् वर्षे
वर्षेऽश्वमेधेन योयजेत शतं स
माः मांसानिच नखादेद्यस्तयोः
पुण्यफलं समं फलमूलाशनै
र्मेध्यैर्मुन्यन्नानांच भोजनैः न
तत्फलमवाप्नोति यन्मांस परि
वर्जनात् मांसभक्षयितामुत्र
यस्यमांसमिहाद्म्यहं एतन्मांसस्य
मांसत्वं प्रवदन्तिमनीषिणः यो
यस्यमांसमश्नातिसतन्मांसाद
उच्यते मत्स्यादः सर्वमांसादस्त
स्मान्मत्स्यान्विवर्जयेत् इतिमा
नवे ५ अध्यायः अन्यच्च श्री
भागवते पंचमस्कंधे२६ [?] येत्वि
ह वै पुरुषाः पुरुषमेधेन यजन्ते।
याश्चस्त्रियोनृपशून्खादन्तितां
श्चतान्ते पशवो इह निहता
यमसदने यातयन्तोरक्षोगणाः
शौनिका इव स्वधितिनावदाया
सृक्पिबन्तीति ब्रह्मपुराणे पशो
स्तुमार्य्यमाणस्य न मांसं ग्राहयेत्।

क्वचित् दृष्टमांसः गर्भशाप्योष्क [?]
मांसमश्चापिवा ॥ महाभारते
रोगार्त्तोऽप्यर्थिनो वापि यो मां
सं नात्तिलोलुपः फलमाप्नोति
यत्नेन सोऽश्वमेधशतस्य च ते
दिपुराणे यश्चोपदेशं कुरुते प
रस्यतुमहात्मनः मांसस्य वर्ज्ज
नफलं सोऽमांसादफलं [?] लभेत्
भविष्यपुराणे आमिषं रक्त
शाकंच यो भुंक्ते चरवेर्हिने [?] सम
जन्मभवेत् कुष्ठीदरिद्रश्चापजाय
ते विष्णुपुराणे चतुर्दश्यष्टमी चै
व अमावस्याथ पूर्णिमा पर्वाण्ये
तानिराजेन्द्र रविसंक्रान्तिरेवच।
स्त्रीतैलमांससंभोगी पर्वस्वे
तेषुवै पुमान् विण्मूत्रभोजनं
नाम प्रयाति नरकं मृतः इति
तिथ्यादितत्त्वं ॥ अथ मां
सभक्षणविधिः आहदेवान्पि
तॄन् श्राद्धे खादन् मांसंन दोष
भाक् वसेत् सनरकेघोरे दि
नानि पशुरोमभिः सम्मितानि
दुराचारो योहन्याद्विधिनापशून्
मांसं संत्यज्य संप्राप्य कामाते
याति ततोहरिं इतिगारुडे।
९९ अध्यायः अपिच गोधाकू
र्मः शशः खड्गीशल्यकश्चेतिसत्त
माः भक्ष्यान्पंचनखान्नित्यं मनु
राह प्रजापतिः मत्स्यान्सशल्कान्
भुंजीत मांसंरौरवमेवच निवे
द्य देवताभ्यश्च ब्राह्मणेभ्यश्च ना
न्यथा मायूरं तैत्तिरंचैव कपो
तंचकपिंजलं वार्द्धीनसंबकं भ
क्ष्यंनीलहंसं पराजिताः सफ
रं सिंहतुंडश्च तथा पाठीनरोहि
तो मत्स्याश्चैते समुद्दिष्टा भक्ष
णाय नरोत्तमैः प्रोक्षितं भक्ष
येदेषां मांसंच द्विजकाम्यया यथा
विधि नियुक्तं प्राणानामपिचात्य
ये भक्षयन्नपि मांसानि शेषभो
जी न लिप्यते औषधार्थमशक्तौ
वानियोगाद्यज्ञकारणात् आम
न्त्रितस्तु यः श्राद्धे दैवे वा मांसमुत्स
जेत् यावन्ति पशुरोमाणि ता
वतो नरकान्व्रजेत् इतिकूर्मपुरा
णे उपरिभागे १८ अध्यायः ॥
अपिच मांसस्यातः प्रवक्ष्यामि।
विधिंभक्षणवर्ज्जने प्रोक्षितं भ
क्षयेन्मांसं ब्राह्मणानांचकाम्य
या यथाविधि नियुक्तस्तु प्राणाना
मेव वात्यये प्राणस्यान्नमिदं सर्वं
प्रजापतिरकल्पयत् स्थावरं जंग
मंचैव सर्वं प्राणस्य भोजनं चरा
णामन्नमचरा दंष्ट्रिणामप्यदंष्ट्रिणः

अहत्वाश्च सहत्वानां स्वर्गोचैव भीरवः ॥ नात्ता दुष्यत्यदन्नाद्यान् । प्राणिनोऽहन्यहन्यपि धात्रैव सृष्टा ह्याद्याश्च प्राणिनोऽत्तार एव च ॥ यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः । अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते ॥ क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा । देवान् पितॄंश्चार्च्चयित्वा खादन् मांसं न दुष्यति ॥ नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः । स प्रेत्य पशुतां याति सम्भवानेकविंशतिं ॥ न मांसभक्षणे दोषो न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥ इति मानवे ५ अध्यायः ॥ देवीपुराणे अष्टमीसप्तम्योश्चैव नवम्यां मद्यरहृति मत्स्यमांसोपहारेण । दध्योदनपायसं तेनैव विधानेन स्वयं भुञ्जीत नान्यथा ॥ याज्ञवल्क्यः । प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया । देवान् पितॄन् समभ्यर्च्च्य खादन्मांसं न दोषभाक् ॥ यमः । भक्षयेत् प्रोक्षितं मांसं सकृत् ब्राह्मणकाम्यया । दैवे नियुक्तः श्राद्धे वा नियमे च विवर्ज्जयेत् ॥ इति तिथ्यादितत्त्वं ॥ भाक्तामिषं यथा । गोवर्ज्जमामिषं क्षीरं फलजम्बीरमामिषं । आमिषं रक्तशाकञ्च सर्व्वञ्च द्रव्यमामिषं । गोवर्ज्यामिषं क्षीरमित्यत्र पत्राणामामिषं पर्णमिति च पाठः ॥ इति कर्म्मलोचनः ॥

मांसः पुं कालः । कीटः ॥ इति शब्दरत्नावली ॥

मांसकारि क्ली रक्तं इति हेमचन्द्रः ॥

मांसच्छदा स्त्री मांसरोहिणीविशेषः तत्पर्य्यायः मांसी १ मांसरोहिणी २ रसायनी ३ सुलोमा ४ लोमकारिणी ५ इति राजनिर्घण्टः ॥

मांसजं क्ली मेदः इति हेमचन्द्रः ॥

मांसतेजः क्ली मेदः इति हेमचन्द्रः ॥


मांसदलनः पुं सीहुण्डवृक्षः इति शब्दचन्द्रिका ॥

मांसद्रावी पुं अम्लवेतसः इति राजनिर्घण्टः ॥

मांसपचनं क्ली मांसपाकः न स्यूपानं मांसपाकः इति व्याकरणं ॥

मांसपेशी स्त्री गर्भस्यावयवविशेषः यथा बुद्बुदः सप्तरात्रेणामांसपेशी ।

भवेत्ततः द्विसमाहात् भवेत् पेशी रक्तमांसचिताः ह्यण्डं बीजस्येवांकुराः पेश्यः पंचविंशतिरात्रतः इति सुखबोधः ॥ अथ मांसस्य पेशी आह यथार्थमुष्मणा युक्तो वायुः स्रोतांसि दारयेत् अनुप्रविश्य पिशितं पेशीर्विभजते तथा यथार्थं यथा प्रयोजनं मांसपेशीनां संख्यामाह । मांसपेश्यः समाख्याता नृणां पंचशतानि च । तासां शतानि चत्वारि शाखास्वकथितान्यथ कोष्ठे षट्नरा षष्टिः कथिताऽनि पुंगवैः । ग्रीवायाऊर्द्ध्वगाश्चैव चत्वारिंशत् प्रकीर्त्तिताः ताः शाखागताः आह एकैकस्यां पादांगुल्यां तिस्रस्तिस्रः पंचदश १५ पादाग्रे दश १० पादोपरि कूर्च्चे सन्निविष्टा दश १० गुल्फतलयोर्दश १० गुल्फजान्वनोरन्तरे विंशतिः २० जानुनि पंच ५ ऊरौ विंशतिः २० वंक्षणे दश १० एवमेकस्मिन् सक्थ्नि शतं १०० भवंति एतेनेतर शाखात्रयं व्याख्यातं ॥ अथ कोष्ठगताः आह गुदे तिस्रः ३ पायूपस्थका १ सेवन्यामेका १ वृषणयोर्द्वे २ स्फिचोः पंच पंच ५।५ वस्तिमूर्द्धनि द्वे २ उदरे पंच ५ नाभौ एका १ पृष्ठोर्द्ध्वे सन्निविष्टा अयनाः पंच पंच दीर्घाः ५।५ पार्श्वयोः षट् ६ वक्षसि दश १० अक्षकांसौ प्रतिसमन्तात् सप्त ७ अक्षकौ अंसस्था इति लोके अंसौ स्कंधौ हृदि द्वे २ यकृति द्वे २ प्लीह्नि द्वे २ उण्डुके द्वे २ ॥ अथ ग्रीवोर्द्ध्वगा आह ग्रीवायां चतस्रः ४ हन्वोरष्टौ ८ कंठमण्योश्चैका एकामिति यावत् एका १ गलएका १ तालुनि द्वे २ जिह्वायामेका १ ओष्ठयोर्द्वे २ नासायां द्वे २ ललाटे चतस्रः ४ शिरस्येका १ एवं मांसपेश्यः पंचशतानि भवंति ॥ स्त्रीणामपि भवन्त्येताः किन्तु विंशतिरुत्तमाः गर्भाशये गर्भमार्गे योनौ च स्तनयोरपि एताः पंचशतानि मांसपेश्यः अधिका विंशतिर्यथा गर्भाशये तिस्रः ३ गर्भच्छिद्रसंश्रिताः शुक्रार्त्तवप्रवेशिन्यास्तिस्रः ३ योनावभ्यन्तरतो मुखाश्रितप्रसृते द्वे २ योनावेव बहिर्निर्गतस्रोतः पार्श्वद्वयाश्रिते वर्त्तुले योनिकर्णिके इति यावत् द्वे २ स्तनयोः पंच पंच ५।५ यौवने तासां वृद्धिर्भवति इमाः पेश्यः प्रा ।



स्तनयोः प्रोक्ता मेहनवृषणजाः स्त्रीणामाहत्य तिष्ठन्ति फलमेतद्गते हि ताः अस्यायमर्थः पुंसां । मेहनवृषणयोश्च यास्तिस्रो मांसपेश्यः पूर्वमुक्तास्ताः स्त्रीणां मेहनवृषणाभावात् फलं गर्भाशये आहत्य तिष्ठन्ति गयदासस्त्वाह स्त्रीणां मांसपेश्यस्त्रिभिर्हीनानि पञ्चशतानि तथाच भोजः पञ्चपेशीशतान्येव स्त्रीवर्ज्जे विद्धि भूमिप अन्याश्च तिस्रो हीयन्ते स्त्रीणां शेफसि मुष्कयोः अथ मांसपेशीनां कर्म्माण्याह शिरास्नाय्वस्थिपर्व्वाणि सन्धयश्च शरीरिणां पेशीभिः संवृतान्यत्र बलवन्ति भवन्ति हि इति भावप्रकाशः

मांसफला स्त्री वार्त्ताकी इति राजनिर्घण्टः ॥

मांसभक्षः त्रि मांसभक्षणकर्त्ता मांसं भक्षयतीति व्युत्पत्तिकर्त्तरि अण्प्रत्ययेन निष्पन्नः

मांसमासा स्त्री माषपर्णी इति राजनिर्घण्टः ॥

मांसरोहिणी स्त्री सुगन्धिद्रव्यभेदः तत्पर्य्यायः अग्निरुहा २ वृत्ता ३ चर्म्मकषा ४ वसा ५ विकसा ६ मांसरोही ७ अस्या गुणाः वृष्यत्वं । सारकत्वं दोषत्रयनाशित्वञ्च इति राजनिर्घण्टः ॥

मांसलं क्ली काव्यस्य गौडीरीतेरङ्गं ओजोगुणस्याङ्गविशेषः यथा ओजः समासभूयस्त्वं मांसलं पदडम्बरं इति काव्यचन्द्रिका

मांसलः त्रि बलवान् इत्यमरः स्थूलः यथा निस्त्राणबद्धैर्मांसलाः स्तुनिर्द्व्याघ्रवृकैः कृशाः मांसलैश्चापनोपेतैः रवकैः रथैः । नृपाः इति गारुडे ९९ अध्यायः

मांसलफला स्त्री वृन्ताकी इति राजनिर्घण्टः ॥

मांसविक्रयी त्रि आमिषविक्रयकर्त्ता इति हलायुधः तत्पर्य्यायः वैतंसिकः २ कौटिकः ३ मांसिकः ४ इत्यमरः ॥

मांससारः पुं मेदः इति राजनिर्घण्टः ॥

मांसस्नेहः पुं मेदः इति राजनिर्घण्टः ॥

मांसहासा स्त्री चर्म्म इति शब्दरत्नावली ॥

मांसिकः पुं मांसविक्रयी इत्यमरः ॥

मांसिनी स्त्री जटामांसी इति राजनिर्घण्टः ॥


मांसी स्त्री जटामांसी कक्कोली इति मेदिनी मांसच्छदा इति राजनिर्घण्टः ॥

मांसेष्टा स्त्री वल्गुला इति राजनिर्घण्टः ॥

माकन्दः पुं आम्रवृक्षः इति मेदिनी ॥

माकन्दी स्त्री आमलकी नगरभेदः इति मेदिनी पीतचन्दनं इति शब्दमाला माडा इति मागधी इति च हिन्दीभाषा तत्पर्य्यायः बहुमूली २ मादनी ३ गन्धमूलिका ४ अस्या गुणाः कटुत्वं तिक्तत्वं मधुरत्वं दीपनत्वं रुच्यत्वं अस्रवातकारित्वं पथ्यत्वं वर्षासु तसितापिकत्वञ्च एका विशाला स्थूली च श्यामला चनथायरा इति राजनिर्घण्टः ॥

माकरी स्त्री माघशुक्लसप्तमी अत्र स्नानादिविधिर्य्यथा भविष्ये सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी अरुणोदयवेलायां तस्यां स्नानं महाफलं माघे मासि सिते पक्षे सप्तमी कोटिभास्करा दद्यात् स्नानार्घदानाभ्यामायुरारोग्यसंपदः अरुणोदयवेलायां शुक्ला माघस्य सप्तमी गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा कोटिः भास्करा का सप्तमी तस्यां सप्तम्यां भास्करदेवताकत्वात् सूर्य्यग्रहणकाले स्नाने मत्त्रिदिने बुद्धिरेतद्योगेतिव्याप्यातनेन बहुशत सूर्य्यग्रहणकालीन गङ्गास्नानजन्यफलसमफलमुक्तेयं स्नानपरिपाटी माहात्म्यकल्पलतायां विष्णुः सप्तवदरपत्राणि सप्तार्कपत्राणि च शिरसि निधाय ॐ यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी इत्युच्चार्य्य स्नायादिति शेषः रोकच्छिद्रं तिथिकृत्यस्य योगमास्थित मासांगत्वात् माकरीपदं मकरार्कोपलक्षितचान्द्रमासीयतिथिपरं तिथिकृत्ये च कर्म्मादिश्चैत्रशुक्लादिमेव च विवाहादौ च सौरादिमासः कृत्ये विनिर्द्दिशेदिति ब्रह्मपुराणात् मन्त्रेन वारिवेनतथा युक्तत्वाच यथा मत्स्यपुराणे यस्मान्मन्वन्तरादौ तु रथमापदिवाकराः माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी अरुणोदयवेलायां तस्यां स्नानं महाफलं अत एव नारसिंहेऽरुणोदयव्यापिता मितलं ॥ अर्क्कोदानपरिपाटी ।



यथा अर्कपत्रैः सबदरैः हिंवाल सचंदनैः अष्टांग विधिनाचार्घ्यं दद्यादादित्यतुष्टये अष्टांग मर्घ्यमापूर्य्यभानोर्मूर्द्ध्नि निवेदयेत् अर्घ्यमंत्रस्तु जननी सर्वभूतानां सप्तमी सप्तसप्तिके सप्तव्याहृतिके देवि नमस्ते रविमंडले प्रणाममंत्रस्तु सप्तसप्तिवहप्रीत सप्तलोकप्रदीपन सप्तम्यां च नमस्तुभ्यं नमोऽनंताय वेधसे । इति कृत्यादितत्त्वं ॥ तस्यां सूर्य्योद्देशपरथयात्राफलं यथा माघमासस्य सप्तम्यां देवेश मथुरां नराः रथयात्रां प्रकुर्वन्ति सर्वद्वंद्वविवर्जिताः गच्छन्ति तत्पदं शान्तं सूर्य्यमंडलभेदकं यतनेकथितं देविसाम्बशापसमुद्भवं पापप्रशमनाख्यानं । महापातकनाशनं इति वाराहपुराणं ॥


मागधः पुं पारिखनकः इति महाभारतं वंशक्रमेण महत्त्वे दिशानाय स्तुतिकारी तत्पर्य्यायः बन्धकः २ वंदी ३ स्तुतिपाठकः ४ इत्यमरभरतौ ॥ तस्योत्पत्तिर्यथा त्रेताऽस्य इतिरतां । हस्तेममत्रुक्तेनराद्विनाः मध्यामानेच तत्राभवत्पृथुर्वैण्यः प्रतापवान् तस्यैवे जात मात्रस्य यज्ञेपैतामहे शुभे सूतः सत्यां समुत्पन्नः सौत्येऽहनि । महामते तस्मिन्नेव महायज्ञे । यज्ञे प्राज्ञोऽथ मागधः ॥ प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ स्तूयतामेष नृपतिः पृथुर्वैण्यः प्रतापवान् स्तुत्या । मिति स्तुतिरभिश्रुतिः अभिष्टूयते कं रूपेसौमोऽस्यामिति स्तुतिः । सोमाभिषवभूमिस्तस्यां । सौत्येऽहनि तस्मिन्नेव दिने इति । विष्णुपुराणे १ अंशे १३ अध्यायस्तट्टीका च ॥ वर्णसंकरजातिविशेषः तत्तत्क्रियायां वैश्याज्जातः भाट इति ख्यातः मगधेषु भवो मागधः स्मृतः इत्यमरभरतौ जरासंधराजः यथा मागधो नच हंतव्यो भूयः कर्म्मबलोयमं इति श्रीभागवते ९ स्कंधः शुक्लजीरकः मगधदेशोद्भवे त्रि इति मेदिनी ॥

मागधादेवी स्त्री राधिका यथा तासांतु मागधादेवी तत्रवामीकरप्रभा वृंदावनेश्वरी राधानाम्ना आनंदकारणात् इति पाद्मे ।

पातालखंडे ९ अध्याय श्लोकाद्वयं ॥

मागधी स्त्री यूथिकापिप्पली इत्यमर मेदिनीकरौ शुंठिः । गुजराटी पलाचि इति भाषा इति शब्दचंद्रिका शर्करा इति जटाधरः भाषाविशेषः इति हेमचंद्रः ॥

माघः पुं श्रीदत्तकसूनुशिशुपालवधमहाकाव्यकर्त्ता इति तद्वंशवर्णनिका स्वनामख्यातमहाकाव्यं यथा पुष्पेषु जातीनगरेषु कांची नारीषु रंभा पुरुषेषु विष्णुः नदीषु गंगा नृपतौ च रामः काव्येषु माघः कविकालिदासः इति प्राचीनाः वैशाखादि द्वादशमासांतर्गत दशममासः मघायुक्ता पौर्णमासी यत्र मासे सः तत्पर्य्यायः तपाः २ इत्यमरः । स च त्रिविधः मकरस्थस्यारब्धशुक्लप्रतिपदादि दर्शान्तो मुख्यचान्द्रः १ कृष्णप्रतिपदादि पौर्णमास्यन्तो गौणचान्द्रः २ मकरस्थरविकः सौरः ३ इति मलमासतत्त्वं । लिखनस्वरसात् तत्स्नानफलं विद्याविनीतः स्वकुलप्रधानः सदा सदाचारगुणप्रवीणः यो गात्वरक्तो विषयेषु शक्तो माघेऽथमासे मघवा निवेशः इति कोष्ठीप्रदीपः ॥ अथ माघकृत्यं पाद्मे स्वर्गलोके चिरं वासो येषां मनसि वर्त्तते यत्र क्वापि जले तैस्तु स्नातव्यं मृगभास्करे मृगो मृगास्यत्वेन मकरः तस्य भास्करे तत्र संकल्पः अरुणोदयकाले जले मग्नं कृत्वा आचम्यऽनंतरामिमुखः ओं तत्सदित्युच्चार्य्य कुशतिलजलान्यादाय ओं मघ माघे मासि अमुकपक्षे अमुक तिथावारभ्य मकरस्थरवि यावत्प्रत्यह अमुकगोत्रोऽमुक देवशर्म्मा स्वर्गलोके चिरकालवासकामो विष्णुप्रीतिकामो वा प्रातः स्नानमहं करिष्ये इति संकल्प्य गंगाव्यतिरिक्त जलमात्रेपि स्नानं कर्त्तव्यं प्रतिदिनं संकल्पेन त्वारभ्य मकरस्थरविं यावत्प्रत्यहमिति तत्र कर्त्तव्यं किंतु मासेनेतरं मकरस्थ रवावित्यधिकं वक्तव्यं चाद्य स्नानं [illegible] [illegible] यथा क्त विधिना स्नाने तिकमेवास्तो विपापडोंडुःस्वप्नदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च प्रातः स्नान




करोम्यघमाघे पापप्रणाशनं
मकरस्थे रवौ माघे गोविन्दाच्युत
माधव स्नानेनानेन मे देव यथोक्त
फलदो भव इत्युच्चार्य स्नायात्
ततो वासुदेवं हरिं कृष्णं श्रीधरं च
स्मरेत् ततः ॐ दिवाकर जगन्नाथ
प्रभाकर नमोऽस्तु ते परिपूर्णं
कुरुष्वेदं माघस्नानं महाव्रतं वौ
इत्स्नाने मकरार्कस्पृष्टकाले मक
रस्थे रवौ विन्यस्य नृपाठः अस्म
वेनार्थयेत् तीर्थेत्तमाघमास
मिमं पुण्यं स्नाम्यहं देव माधव
तीर्थस्यास्य जले नित्यं प्रसीद भ
गवन् हरे इति पठित्वा दुःखदा
रिद्र्य नाशायेत्यादिकं पठितव्यं
गंगायां तु पद्मपुराणे दिने दिने
सहस्रं तु सुवर्णानां विप्रायस्यते।
नेन तद्धि गंगायां यो माघे स्ना
ति माधव मानव इत्युक्तविन्यादः
एकदा संकल्पस्तु प्रतिदिनसहस्र
सुवर्णदानजन्यफलसमफल
प्राप्तिकामः श्रीविष्णुप्रीतिकामो वा
ऽमाघमासं यावत् प्रत्यहं गंगायां
प्रातः स्नानमहं करिष्ये इति वाक्ये
विशेषः प्रतिदिनसंकल्पे तु सहस्र
सुवर्णदानजन्यफलसमफल।
प्राप्तिकामो विष्णुप्रीतिकामो वा गंगा

यां प्रातः स्नानमहं करिष्ये इति
यथो विधिना स्नानेतिकर्त्तव्यतां
विधाय ॐ माघमासमिमं पुण्यं
स्नाम्यहं देव माधव तीर्थस्यास्य
जले नित्यं प्रसीद भगवन् हरे।
दुःखदारिद्र्यनाशाय श्रीविष्णोस्तो
षणाय च प्रातः स्नानं करोम्यघा
माघे पापप्रणाशनं मकरस्थे
रवौ माघे गोविन्दाच्युत माधव
स्नानेनानेन मे देव यथोक्तफल
दो भव इति पठित्वा स्नायात् त
तो वासुदेवं हरिं कृष्णं श्रीधरं च स्म
रेत् ततः दिवाकर जगन्नाथ प्रभा
कर नमोऽस्तु ते परिपूर्णं कुरुष्वेदं
माघस्नानं महाव्रतं इति पठेत्
स्कन्दपुराणे सम्प्राप्ते मकरा
दित्ये पुण्ये पुण्यप्रदे शुभे।
कर्त्तव्यो नियमः कश्चिद्व्रतरूपेण
तोत्तमैः नक्तं पुण्यकामः श्री
विष्णुप्रीतिकामो वा इति वाक्ये विशे
षः पौष्याः पौर्णमास्या ऊर्द्ध्वं
माघपौर्णमासीपर्यन्तमेकदाने
त्वान्नं लवणं न भोक्तव्यं पौष्या
ऊर्द्ध्वं माघकृष्णाष्टम्यां त्वाममांसे
न श्राद्धं कर्त्तव्यं मांसाभावे पाय
सोपकरणेन तदभावे केवलान्नेन
वा श्राद्धं कर्त्तव्यं अथ रटन्ती।

चतुर्दशी माघे मास्यसितपक्षे र
टन्त्याख्या चतुर्दशी तस्यामुदय वे
लायां स्नानानां वक्तव्ये यम ३
दय वेलायां अरुणोदयवेलायां
अनर्काभ्युदितकाले माघकृष्ण
चतुर्दशी सतारव्योमकाले त
तस्यां स्नानं महाफलं स्नात्वा
संतर्प्य तु यमान् सर्वपापैः प्रमुच्य
ते अत्र तिथिकृत्यतत्त्वार्णवोद्धा
रः तत्रोभयदिने अरुणोदय
सतारकालमुहूर्त्तेन चतुर्दशी
लाभे पूर्वदिने स्नानं यमतर्पणं च प
रदिने माघे तु लाभे तद्दिने माघ
स्नानकालाभ्यन्तरे नाडिका चतुर्दशी
लाभे माघ प्रातः स्नायिना तत्रोभ
यं कार्यं तत्र ॐ तत् सद्य।
माघे मासि कृष्णपक्षे रटन्त्यां चतु
र्दश्यां तिथौ अरुणोदयवेलायां
अमुकगोत्रः श्रीअमुकदेवशर्मा
यमदर्शनकामो गंगायां स्नानमहं
करिष्ये इति संकल्प्य यथाविधि।
स्नानं प्रागुक्तं चतुर्दशयमतर्पणं
च कुर्यात् ॥ अथ श्रीपंचमी त
त्रोभयदिने पूर्वोक्त पंचमीलाभे
पूर्वदिने लक्ष्मी सरस्वत्योः पूजनं
कुर्यात् एकदिनप्राप्ते तद्दिने ए
वं पद्धेषु शुक्लपंचमीव्रते ऽपि

तत्र ॐ तत्सदित्युच्चार्य ॐ मद्य
त्यादि लक्ष्मीप्रीतिकामो लक्ष्मीपू
जनमहं करिष्ये इति संकल्प्य शा
लग्रामे जले वा पूजयेत् ॐ पाशा
क्षमालिकाम्भोज सृणिभिर्याम्य
सौम्ययोः पद्मासनस्थां ध्यायेच्च
श्रियं त्रैलोक्यमातरं गौरवर्णां।
स्वरूपां च सर्वालंकारभूषितां
रौक्मपद्म व्यग्रकरां वरदां दक्षि
णेन तु इत्यनेन ध्यात्वा पतन्या
घं ॐ लक्ष्म्यै नमः इत्यादिना नै
वेद्यान्तेन पूजयेत् ॐ नमस्ते स
र्वदेवानां वरदासि हरिप्रिये या
गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्व
दर्चनात् इत्यनेन पुष्पाञ्जलित्रये
ण प्रणमेत्। ॐ तत्सदित्युच्चार्य
ॐ मद्येत्यादि सरस्वतीप्रीतिकामः
सरस्वतीपूजनमहं करिष्ये इति
संकल्प्य शालग्रामे कलशादिस्थजले
वा पूजयेत् ॐ तरुणसकलमिन्दो
र्विभ्रती शुभ्रकान्तिः कुचभरनमि
ताङ्गी सन्निषण्णा सिताब्जे निजक
रकमलोद्यल्लेखनी पुस्तकश्रीः स
कलविभवसिद्ध्यै पातु वाग्देवता नः
इति ध्यात्वा वाद्यपतनपाद्यं ॐ
सरस्वत्यै नमः इत्यादिना नैवेद्यान्ते
न पूजयेत् ततः ॐ भद्रकाले ॥




नमो नित्यं सरस्वत्यै नमो नमः
वेद वेदांग वेदांत विद्यास्थानेभ्य
एव च स्वाहा इति ब्रह्मपुराणीयेन
पुष्पाञ्जलिना त्रिः पूजयेत् मत्स्य
सूक्ते सरस्वतीं संपूज्य ॐ यथा न
देवो भगवान्ब्रह्मा लोकपिता
महः त्वां परित्यज्य संतिष्ठे तथा
भव वरप्रदा वेदाः शास्त्राणि स
र्वाणि नृत्यगीतादिकं च यत् नवि
हीनं त्वया देवि तथा मे संतु सिद्ध
यः लक्ष्मीर्मेधा धरापुष्टिर्गौरी तुष्टिः
प्रभा धृतिः एताभिः पाहि तनु
भिरष्टाभिर्मां सरस्वति इति मत्
स्यपुराणीयैः प्रार्थ्य प्रणमेत् ।
बंधुजीवं च द्रोणं च सरस्वत्यै नदा
पयेत् आचारात् पुस्तकं च पूजये
त् ॐ मष्याधाराय नमः इति मष्या
धारं पूजयेत् ॐ लेखन्यै नमः
इति लेखनीं पूजयेत् अथ
माघसप्तमी तत्राभ्युदिने अरु
णोदयकाले सप्तमीलाभे पूर्वदिने
एकदिने न लाभे तद्दिने अरुणो
दयकाले सामान्यजले ॐ अद्ये
त्यादि सर्वग्रहणकालीन गंगास्ना
नजन्यफलसमफलप्राप्तिकाम अ
रुणोदयसंपत्कामो माघारुणोदयवे
लायां स्नानमहं करिष्ये इति

संकल्प्य यथाविधि स्नानेतिकर्त्त
व्यतां विधाय सप्तबदरपत्राणि स
मार्कपत्राणि च शिरसि निधाय ॐ
यद्यज्जन्मकृतं पापं मया सप्तसु जन्म
सु तन्मे रोगं च शोकं च माकरी हं
तु सप्तमी इत्युच्चार्य स्नायात् ततो
यथाकालं सप्तबदरीफलार्कप
त्रशालि तिलदूर्वाक्षत चंदनपुष्प
जलमादाय ॐ अद्येत्यादि आयुरा
रोग्यसंपत्कामः श्रीसूर्यायार्घ्य
महं ददे इति संकल्प्य ॐ नमो विव
स्वते ब्रह्मन् भास्वते विष्णुतेजसे ।
जगत्सवित्रे शुचये सवित्रे कर्मदा
यिने इत्यनेनार्घ्यं ॐ जननी सर्वभूता
नां सप्तमी सप्तसप्तिके सप्तव्याहृ
तिके देवि नमस्ते रविमंडले इति
पठित्वा इदमर्घ्यं श्रीसूर्याय नम इ
त्यर्घ्यं दत्वा ॐ सप्तसप्तिवह प्रीत सप्त
लोकप्रदीपन सप्तम्यां हि नम
स्तुभ्यं नमोऽनन्ताय वेधसे इत्य
नेन प्रणमेत् अद्येत्यादि स्नानीय
लौकिकानानं मंत्रं विना अर्घ्य
प्रणाममंत्राः पाठ्याः पौराणिकत्वा
त् गंगायां तु बहुशतसूर्यग्रहणका
लीनगंगास्नानजन्यफलसमफल
प्राप्तिकामो गंगायां स्नानमहं करि
ष्ये इति वाक्यविशेषः अत्रार्घदाना

मेगं पतत् स्नानादेव माघस्नानः
स्नानं तत्रैनेव सिध्यति ॥
अथ विधानसप्तमीव्रतं प्रथमतो
ब्राह्मणान् स्वस्ति वाच्य ॐ सूर्यः
सोम इत्यादि पठित्वा ताम्रादिपात्र
कुशतिलजलान्यादाय ॐ तत्सदि
त्युच्चार्य ॐ अद्य माघमासि शुक्ल
पक्षे सप्तम्यां तिथावारभ्य प्रतिमा
सीयशुक्लसप्तम्यां पौषसप्तमी या
वत् आरोग्यसंपत्कामो ऽभीष्ट त
त्फलकामो वा अर्काग्राहीतर
भोजन विच्छित्ति विधानेन सप्त
मीव्रतमहं करिष्ये इति संकल्प्य स
प्तम्याः पारणस्य दिने तत्तन्मासि तत्तन्नि
यमं कुर्यात् तत्र माघे अर्काग्र
मात्रं भुंजीत फाल्गुने अंतरीक्ष
गृहीतं कपिलाविड्यवमात्रप्रमा
णं तदभावे अन्यगोमयमपीति
चैत्रे मरीचमेकं । वैशाखे ।
किंचिज्जलं ज्येष्ठे अपक्वकदली
फलमध्यकणमात्रं आषाढे स
क्वाय द्विगुणसमयेयवप्रमाणं कु
शाम्लं श्रावणे नक्तंकालप्रस्र
विष्ठादनं भाद्रे स्तोकोपवासः आ
श्विने पंचमाहेयामे मयूरांड ।
प्रमाणं हविष्यान्नं कार्तिके अर्द्ध
प्रसृति माघे कपिलाक्षीरं तद

भावेत्तीरांतरं मार्गशीर्षे प्राश्न
त्वा वाम्रशनं पौषे स्वल्पं हुतं
तदनंतरं च ब्राह्मणान्भक्त्याल्प
क्ष्या गुडक्षीरनिरामिषैः विधाय
दक्षिणा देया विभवस्यानुरूपतः
अष्टम्यां पारणं कुर्यात् कटुक्षार
हीनेन च शुक्लमाषतिलादीनि ह्ये
तेचैव विवर्जयेत् एकस्मिंहमस
शक्तमर्केन ज्ञानसारतः षोडशमा
स विशेषोऽप्येवं वत् अनेनास्त्रि
नवत् मलमासेतरे तत्तकर्त्तव्य
अथारोग्यसप्तमी । तत्र पूर्व
वत्सप्तम्यां तिथावारभ्य ऐहिका
रोग्यधनधान्य पारलौकिकशुभ
स्थान प्राप्तिकामः संवत्सरं याव
त् आरोग्यसप्तमीव्रतमहं करिष्ये
इति संकल्प्य प्रतिमास शुक्लसप्त
म्यां शालग्रामे वटादिस्थजले वा अ
ग्नौ वा पूजयेत् रक्ताब्जासनमिति
ध्यात्वा एतत्साद्यं ॐ सूर्याय नमः इ
त्यादिभिः संपूज्य आदित्यभास्क
र रवेभानो सूर्यदिवाकर प्रभाकर
नमस्तेऽस्तु रोगात्मां मोचय ।
इति त्रिः पूजयेत् एवं संवत्सरे
पूर्णे दक्षिणादयात् ब्राह्मणांश्च
भोजयेत् विशेषमासादेहेपा द
मावास्यात्रतवत् मलमासेपि क




र्त्तव्यं अथ भीष्माष्टमी अष्ट
म्यां ब्राह्मणाः पितृतर्पणं कृत्वा
ऽवैयाघ्रपद्यगोत्राय सांकृतिप्रव
राय च पुत्रायदद्यामेतत् स
लिलं भीष्मवर्म्मणे इति पितृवत्
भीष्मं तर्पयेत् ततः कृतांजलिः
भीष्मः शान्तनवो वीरः सत्यवादी
जितेन्द्रियः आभिरद्भिरवाप्नोतु
पुत्रपौत्रोचितां क्रियां इत्यनेन
मार्घयेत् वसिष्ठादिभिः पितृत
र्पणात् पूर्व्वं एतत्कर्त्तव्यं ॥
भैम्यामेकादश्यामुपोष्य द्वाद
श्यां तिलोद्वर्त्तनमावपनं वस्त्र
स्नानं तर्पणं महादानभोजना
दि यथालाभं कुर्य्यात् माघपौर्ण
मास्यां युगाद्यात्वेन पार्व्वणविधिना
श्राद्धं कर्त्तव्यं अनेन फलकामेन
यास्नानदानं च कर्त्तव्यं तस्यां दान।
प्रमाणेन तिथितत्त्वेऽनुसंधेयं इ
तिकृत्यतत्त्वं ॥ अथ माघ।
स्नानफलं व्रतदानैस्तपोभिश्च।
न तथा प्रीयते हरिः माघमज्ज
नमात्रेण यथा प्रीणाति केशवः न
क्षमं विद्यते किंचित्तत्तेजः सौरेण
तेजसा तद्वत् स्नानेन माघस्य न
समाः कृतमाः क्रियाः प्रीतये सदा।
स्वेदक्षमं सर्व्वपापापहित्कृतये माघस्ना
ने

प्रकुर्व्वीत स्वर्गलाभाय मानवः किं
रक्षितेन देहेन सुपुष्टेन बलीयसा।
अध्रुवेणाप्यदेहेन माघस्नानं वि
नाभवत् मकरस्थे रवौ यो हि न
स्नात्यनुदिते रवौ कथं पापैः
प्रमुच्येत कथं स त्रिदिवं व्रजेत्
ब्रह्महा हेमहारी च सुरापो गु
रुतल्पगः माघस्नायी विपापः
स्यात्तत् संसर्गी च पञ्चमः उपपा
तकानि सर्व्वाणि पातकानि महा
न्ति च भस्मीभवन्ति सर्व्वाणि माघ
स्नायिनि मानवे पावकाद्वदीप्यते
माघस्नानरोत्तमाः विशुद्धाः सर्व्व
पापेभ्यो मेघमुक्ता इव चन्द्रमाः।
आर्द्रं शुष्कं लघुस्थूलं वाङ्मनः।
कर्म्मभिः कृतं माघस्नानं दहेत्तत् स
र्व्वं पावकः समिधो यथा प्रमादि
कं च यत्पापं ज्ञानाज्ञानकृतं च यत्
स्नानं मात्रेण तत्क्षयेत् मकर
स्थे दिवाकरे निष्पापास्त्रिदिवं यान्ति।
निष्पापिष्ठा यान्ति शुद्धता संदेहो
ऽत्र न कर्त्तव्यो माघस्नानात्तु पापिनः
सर्व्वेऽधिकारिणो ह्यत्र विष्णुभक्तौ
यथा नृप सर्व्वेषां स्वर्गतो माघः
सर्व्वेषां पापनाशनः एतद्वा।
परो मन्त्रो स्नानदेवपरं तपः प्र
यश्चितं पावनं माघस्नानं मता।

त्तमं नृणां जन्मान्तराभ्यासात् ॥
माघस्नान मतिर्भवेत् अभ्यासा
ज्ज्ञान कौशल्यं जन्माभ्यासाद्यथा।
नृप संसारकर्द्दमालेप प्रक्षाल
नविशारदं पावनं पावनानां च।
माघस्नानं परन्तप स्नानान्माघे च
ये राजन् सर्व्वकाम फलप्रदे ते
[illegible] सूर्य
गृहोपमान् इति श्रीपद्मपुराणे।
उत्तरखण्डे ४ अध्यायः ॥
माघवती स्त्री पूर्व्वदिक् इति रा
जनिर्घण्टः ॥
माघवन स्त्री इन्द्रसम्बन्धिन्यि म
घवन इदमित्यर्थे स प्रत्ययेन निष्प
न्नं इति मुग्धबोधव्याकरणं ॥
माघी स्त्री मघायुक्ता पौर्णमासी
यथा पुष्ययुक्ता पौर्णमासी पौषी
मासे तु यत्र सा तन्नाम्ना स पौषा
माघश्चैव मेकादशाद्यपरे।
इत्यमरः माघी पूर्णिमा यथा
अयोध्याकाण्डे भरत शपथे
आषाढी कार्त्तिकी माघी तिथ
यः पुण्यसंभवाः अप्रशान्तवतोऽप्या
तु यस्यार्थोऽनुमतो गतः विश्रम्भ
मीतरे पौर्णमासी तथा माघी
प्रावरीच नरोत्तम श्रेष्ठपद्याम
तीतायां तथा क्वचिता त्रयोदशी।

पतान्स्वस्याद्वकालात् वै निस्या
नाहप्रजापतिः साच कलियुगा
द्या यथा अथ भाद्रपदे कृष्ण
त्रयोदश्यां तु द्वापरं माघे च।
पौर्णमास्यां वै घोरं कलियुगं
स्मृतं अस्यां कर्म्मणाऽनेन फलं
यथा मात्स्ये श्रुतमिदं तथा ॥
पुण्यसहस्रेतु दिनक्षये विषुवे
शतमाहस्त्र मा काचेष्वनंतकं।
आकामावेषु आषाढीकार्त्तिकी
माघी वैशाखीषु इत्याद्यादि।
तत्र माघ्यां मघायोगाभावे।
सिंहस्थ गुरावकाल प्रतिप्रसवो
यथा शातातपः माघ्यां यदि
मघा नास्ति सिंहे गुरुरकारणं।
राजमार्त्तण्डे तत्त्वतः गुरौ हरिस्थे।
न विवाह माङ्गल्ये रीतगर्गप्रमुखा
मुनीन्द्राः यस्मा न माघीमघसंयु
तास्याऽसरा च कन्या हृह्रनेवदन्ति
इत्यञ्च माघ्यां मघायोगाभावेऽपि
स्मृतिवचनादि मघास्थेऽपि गुरौ
भवति विवाहस्तु गुरोर्मघापरि
त्यागादेव इति मलमासतत्त्वं।
माघोनी स्त्री पूर्व्वादिक् इति राज
निर्घण्टः ॥
माघ्यं क्ली कुन्दपुष्पं इत्यमरः।
मांगल्यं क्ली मंगलाय हितं यथा




राजमार्तंडे मांगल्येषु विवाहेषु
कन्यासंवरणेषु च दशमासाः प्र
शस्यंते चैत्र पौषविवर्जिताः ।
हेमाद्रौ हारलतायां अपि च भीमप
राक्रमे अधिमासे दिनपाते
पक्षषि वयोमासलंघिते मासि
चक्रिणि स्वपे कुर्यान्न मांगल्यं वि
वाहं च इति मलमासतत्त्वे ।
मंगल्याही स्त्री त्रायमाणालता ।
इति राजनिर्घंटः ।
माचः पुं पंथाः इति शब्दरत्नावली
माचलः पुं ग्रहः रोगः बंदी ।
चौरः इति शब्दरत्नावली मे
दिन्यां ग्रहस्थाने ग्राह इति पाठः
माक्षिका स्त्री मक्षिका इति त्रि
कांडशेषः अम्बष्ठा इति राजनिर्घं
टः माक्षिकं क्ली पीतं यथा अथा
ब्रवीन्नरा मत्स्यस्थानाच्चीन्महत्स्वश
नैः अस्मिन् हिमवतः शृंगे नावं ब
ध्नीत माचिरं इति बन्धपर्वणि मात्स
स्योपाख्यानं ॥
माचीपत्रं क्ली स्वर्णपत्री इति राज
निर्घंटः ॥
माजलः पुं चासपक्षी यथा माज
लश्चाषकः कुक्कुडो विद्रालो विड
रेलकः इति शब्दचंद्रिका मां
जिष्ठं क्ली लोहितवर्णः तद्विशि

इति हेमचंद्रः ॥
माटाष्ठकः पुं हस्तभेदः यथा
वस्त्रको कर्कटीबीजः सह माटाष्ठ
कासमो इति भूरिप्रयोगः ॥
माठरः पुं सूर्यपार्श्वपरिवर्तिवि
शेषः यथा माठरः पिंगलो
दंडश्चंडांशोः पारिपार्श्विकाः
इत्यमरः मठति निवसति सूर्य
समीपे माठरः मठवासमदयोः
नास्तीति अरणमठरस्यापत्यं मा
ठरः इति स्वामी पिंगलवर्णत्वात्
पिंगलः दंडकारित्वाद्दंडः इति
स्वामी परितः पार्श्ववर्तिते पा
रिपार्श्विकाः छत्रकारिनिसि
कः सूर्यः कारुणिकत्वाहैस्याने
वरं साधयतीति धियाइंद्रादयोऽष्टा
दश नामांतरेण प्रकृता अस्यापा
र्श्वस्थिताः अत्र माथामाठयोः
अभिहिताः अत्र माठरनामायमः
पिंगलनामा वह्निः दंडनामा
पाकः तथा वामाः तत्र शक्रो
वामपार्श्वे दंडाख्यो दंडनायकः
वह्निस्तु दक्षिणपार्श्वे पिंगलो
नामतश्च सः यमोपि दक्षिण
पार्श्वे ख्यातो माठर संज्ञकः ।
एव मपरे दश गरुडादयः कल्माष
पक्ष्यादि संज्ञकाः पूर्वद्वारादिषु ।

सुगंधिके यावन्मूल्यं समाख्यातं ।
वैश्यवर्णे च सूरिभिः तावन्मूल्य
वदर्धांशं हीयते शूद्रजन्मनि प
द्मरागः यत्र यस्य यत्ने लाक्षारस
प्रभः कार्षापण सहस्राणि त्रिंशन्मू
ल्यं लभेतसः इंद्रगोपक संका
शः कर्षत्रयस्तनो मणिः हा विंश ।
ति सहस्राणि तस्य मूल्यं विनिर्दि
शेत् एकोनो न्यूयते यस्य यवा
कुसुमसंनिभः कार्षापणसहस्रा
णि तस्य मूल्यं चतुर्दश बालादित्य
द्युति निभः कर्षं यस्य प्रकल्पते ।
कार्षापण शतानां तु मूल्यं सदि
प्रकीर्तितं यस्य दाडिमपुष्पाभः
कर्षार्द्धेन तु सम्मितः कार्षापण
शतानां तु विंशति मूल्यमादिशेत्
चत्वारो माषकायस्य रक्तोत्पल ।
दलप्रभः मूल्यं तस्य विधातव्यं ।
सूरिभिः शतपंचकं द्विमाषको ।
यस्तु गुणैः सर्वैरेव समन्वितः तस्य
मूल्यं विधातव्यं द्विशतं तत्र वेदि
भिः माषकैकमितो यस्तु पद्मरा
गो गुणान्वितः शतैकसम्मितं वा
पि मूल्यं रत्नविचक्षणैः ॥ अतो
न्यूनप्रमाणस्तु पद्मरागो गुणान्वितः
स्वर्णद्विगुणमूल्येन मूल्यं तेषां
प्रकल्पयेत् कार्षापणाः समाख्यातः

प्रमाणो हयसम्मितः अन्येकुसुंभ
पानीयमंजिष्ठारसकसन्निभाः का
काषाया इति विख्याता स्फटिक प्र
वाप्नुते तथा दोषा गुणा वापि
पद्मरागवदादिशेत् मूल्यमस्य तु ।
विज्ञेयं यावद्गुणस्यफलं तथा अक्ष
त्रियवैश्यानां अन्वयाये प्रकी
र्तिताः चतुर्विधैर्नृपतिभिः धी
यते सम्यक् त्रिहेतवे अतो ऽन्य
थाश्वतः कुर्याद्रोगशोकभयं त
यं इति युक्तिकल्पतरुः ।
माणिक्या स्त्री ज्येष्ठी तत्पर्यायः
मुषली १ गृहगोधिका २ गृहगो
लिका ३ भित्तिका ४ पल्ली ५ कुड्य
मत्स्यः ६ गृहालिका ७ इति
हेमचंद्रः ॥
माणिबंधं क्ली सैन्धवलवणं इ
त्यमरटीकायां स्वामी ॥
माणिमंथं क्ली सिंधुजलवणं
इत्यमरः ॥
मातंगः पुं हस्ती इत्यमरः अ
श्वत्थवृक्षः किरातजातिविशेषः
इति नदीकायां मथुरेशः श्व
पचः इति मेदिनी अर्हदुपासक
विशेषः इति हेमचंद्रः ॥
मातंगमकरः पुं महामत्स्यभेदः इ
इति राजनिर्घंटः ॥




मातंगी स्त्री दशमहाविद्यांतर्ग
तनवमविद्या अथमातंगी मंत्रः
वामकेश्वरतंत्रे अथ वक्ष्ये म
हादेवी मातंगी सर्वसिद्धिदां ।
अस्योपासनमात्रेणवाक् सिद्धिं
लभतेध्रुवं प्रणवंच ततो मा
यां कामबीजंवकूर्च्चकं मातंगी
ङे युता वोत्रंवह्निजायावधिर्मंत्रः
ऋषिः स्याद्दक्षिणामूर्त्ति विराट् ।
छंदः प्रकीर्त्तितं मातंगी देवता
देवी सर्वसिद्धिप्रदायिनी अंग
न्यासकरन्यासौ कुर्य्यान्मंत्रीसमा
हितः षड्दीर्घभाजाबीजेनप्रण
वाद्येनकल्पयेत् षट्कोणाष्टदले
पद्मं लिखेद्यंत्रं मनोरमं तत्र
पूजाप्रकर्त्तव्याजवापुष्पेणमंत्रवित् ।
अष्टशक्तीश्चाष्टदलपूजयेत् स
समाहितः रतिःप्रीतिमनोभवा
क्रियाश्शुद्धाव शाक्तयः अनंगकु
सुमानंगमदना मदनालसा इत्य
ष्टशक्तीः संपूज्यउपहारसमन्वितः
ततोदेवीं परां ध्यायेत् सा
धकः स्थिरमानसः श्यामांगींश
शिशेखरांत्रिनयनां रत्नसिंहासन
स्थितां वेदैर्बाहुदंडै रसिखे ।
टकपाशांकुशधरां एवं ध्यात्वा
महादेवीं गंधपुष्पै मनोरमैः ।

नैवेद्यंत महादेव्यै पायसं
शर्करान्वितं पुरश्चरणकाले तु
षट्सहस्रंमंत्रं जपेत् तद्दशां
शं हुनेदाज्यैः शर्करामधुभिः स
ह ब्रह्मवृक्षोद्भवैः काष्ठैः साध
कः शक्तिभिःसह एवं पुरश्क्रि
यांकृत्वा प्रयोगविधिमाचरेत् ।
चतुष्पथे श्मशानेवा कलामध्येव
मांत्रिकः मत्स्यं मांसं पाय ।
सं च दद्याद्धूपंच गुग्गुलं रात्रि
योगेषु कर्त्तव्यं सदापूर्णमसा
धकः एवंप्रयोग मात्रेणकविता
जायतेध्रुवं अग्निस्तंभं जलस्तंभं
वाक्स्तंभं कारयेत् ध्रुवं मैत्री
जयति शत्रुश्च तादृशो भोगि
कुलंयथा शास्त्रवादेकवित्वेव ।
बृहस्पतिरिवापरः ॥ अनेनैव
विधानेन मातंगीसिद्धिदायिनी ।
नूतनंकृष्णमागत्य कुवेरं दीर्घ
यतेवस विनामस्यैर्विना मा
से नीडयेत् परस्वकं इति
तंत्रसारः ॥
मातरपितरौ पुं मातृजनयित्र्यौ ।
नित्यद्विवचनांतौ इत्यमरः ॥
मातरिश्वा पुं वायुः इत्यमरः
मातलिः पुं इंद्रसारथि ॥
इत्यमरः ॥


माता स्त्री मान्यतेपूज्यतेया सा
मानङ् पूजायां नाप्त्रीति डातृः
इतिभरतः मा इति भाषा
तत्पर्य्यायः जनयित्री १ प्रसूः २
जननी ४ इत्यमरः सवित्री ५ ।
जनिः ६ जनीः ७ जनित्री ८ अक्का
९ अम्बा १० अम्बिका ११ अम्बालिका
१२ इति शब्दरत्नावली मातृका ।
१३ इतिजटाधरः षोडश प्र
कारा मातरो यथा स्तनदात्री ग
र्भधात्री भक्ष्यदात्री गुरुप्रिया अ
भीष्टदेवपत्नी च पितुःपत्नीचक
न्यका सगर्भजा याभगिनी पुत्र
पत्नीप्रियाप्रसूः मातुर्माता पि
तुर्माता सोदरस्य प्रिया तथा
मातुः पितुश्चभगिनी मातुला
नी तथैव च जनानां वेदविहिता ।
मातरः षोडश स्मृताः इति
ब्रह्मवैवर्त्ते गणपतिखंडे कार्त्तिके
यसंवादे १५ अध्यायः ॥ त
स्याःगौरवं यथा जनकोजन्मदा
तृत्वात् पालनाच्च पितास्मृतः ग
रीयान् जन्मदातुश्च योऽन्नदाताऽपि
तामतः विनान्नं नश्वरोदेहो न
त्यः पितुरुद्भवः तयोः शत
गुणैर्माता पूज्यामान्याचवंदिता ।
गर्भधारणपोषाभ्यां साच ता

भ्यां गरीयसी इतितत्रैव ४० अ
ध्यायः अपिच स गर्यः क्रि
याः कृत्वा वेदमस्मै प्रयच्छति उप
नीय ददद्वेद माचार्य्यः सप्रकीर्त्ति
तः एकादश उपाध्यायाश्चत्विग्य
ज्ञकृदुच्यते एतमान्यायथापूर्वमे
भ्योमाता गरीयसी इतिगारुडे ९ अ
अध्यायः ॥ अन्यच्च न पितु
र्वचनंकार्य्यंयथा मातुः स्तेनहि
पिताच पतितस्त्याज्यो न माता
सत्सुतेनहि गर्भधारणपोषाभ्यां ।
ततोमाता गरीयसी दशविप्रा
नुपाध्यायो गौरवेणातिरिच्यते
तेभ्यः पिता दशभ्यस्तुमाताचै
वगरीयसी मातृतोऽभ्यो नदेवो
स्तितस्मात् पूज्यासदास्तुतेः मा
तृश्चयद्धितं किंचित् कुरुतेभक्ति
तः प्रमात् तद्धर्म्मं हि विजानीया
देवं धर्म्मविदो विदुः इति वह्नि
पुराणे ॥ अपरंच गुरूणा ।
मपिसर्वेषां पूज्याः पंचविशेषतः
तेषामाद्यास्त्रयः श्रेष्ठा स्तेषां
माता सुपूजिता योभावयति या
सूते येन विद्योपदिश्यते ज्येष्ठ
भ्राता च भर्त्ता च पंचैते गुरवः स्मृ
ताः आत्मनः सर्वयत्नेन प्राणत्या
गेनवापुनः पूजनीया विशेषेण



पश्चैते भूतिमिच्छता यावत्पिता च माता च द्वावेतौ निर्विकारिणौ तावत्सर्व्वं परित्यज्य पुत्त्रः स्यात्तत्परायणः पिता माता च सुप्रीतौ स्यातां पुत्त्रगुणैर्यदि स पुत्त्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा नास्ति मातृसमं दैवं नास्ति पितृसमो गुरुः तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते। तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा न ताभ्यामननुज्ञातो धर्म्ममन्यं समाश्रयेत् इति कौर्म्मे उपरिभागे ११ अध्यायः। मातृशाहसम्भाष्या मातृत्वस्य यथा मातरिन्यवशाहनयाच सम्भाष्यतेनरः सा मातृत्वस्या सन्नेनधर्म्मः साध्वीसत्तामपि तया सहितस्त्वगारे कालस्त्वं मया निसः तत्रघोरे वसन्त्येव यावद्धे वत्सरान्वयः प्रायश्चित्तमपि न स्यात्तस्यैनं कस्त्रैलोक्यक्त इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे ९ अध्यायः शिवस्य परिवारविशेषः स च अष्टमातरो ब्रह्मादीनांस्वरूपिणी शक्तयात् श्रूयशाक्तिदेवतारूपाय था ब्राह्मी माहेश्वरी चैवैन्द्री वाराही तथा कौमारी चैव चामुण्डचण्डिकेत्यष्टमातरः सप्तविधापि। यथा ब्राह्मी च वैष्णवी चैन्द्री रौद्री वाराहिकी तथा कौवेरी चैव कौमारी मातरः सप्त कीर्त्तिताः इत्यमरटीकायां भरतः॥ गौर्य्यादिषोडशमातृकाः यथा गौरी पद्मा शची मेधा सावित्री। विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह आद्यौ विनायकः पूज्यो अन्ते च कुलदेवता इति श्राद्धतत्त्वे च्छन्दोगपरिशिष्टं चैव पूज्या मातृगणा यथा यत्र मातृगणाः पूज्यास्तत्रैताः प्रपूजयेत् सदा भागवती पौर्णमासी पद्मा तारं गिरिका गङ्गा कलिङ्गा तथा गोपी कुंरावती तथा गायत्री तुलसी वाणी षष्ठी गौरी च वैष्णवीः प्रीय शौरी देवहूती देवकी र......मुखाः श्री सीता द्रौपदी कुन्ताख्य परा या महर्षेयः हलिका पायाख्या चाष्टमहर्षी यो मता अपि इति पाद्मे उत्तरखण्डे ७८ अध्यायः॥ सप्तमातरो यथा आदौ माता गुरोः पत्नी ब्राह्मणी राजपत्निका गावी धात्री तथा पृथ्वी सप्तैता मातरः स्मृताः।

इति केचित्पठन्ति॥ मातृतुल्या यथा मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः इति दायभागः॥ गौः भूमिः इति मेदिनी विभूतिः इति शब्दरत्नावली। लक्ष्मीः इति हेमचन्द्रः रेवती इत्यजयपालः आखुकर्णी। इन्द्रवारुणी महाश्रावणी जटामांसी इति राजनिर्घण्टः परिमाणकर्त्तरि त्रि अस्मिन्नर्थे परिमाणार्थमा धातोः कर्त्तरि तृच्प्रत्ययेन निष्पन्नः॥ माता स्त्री जननी यथा विश्वेश्वरी विश्वमाता चण्डिका पञ्चमात्मका इति शिवरहस्ये दुर्गासावदर्शनात् आवर्त्तनोयं शब्दः॥ मातापितरौ पुं जननीजनकौ तत्पर्य्यायः पितरौ २ मातरपितरौ ३ मातापितरौ ४ इत्यमरः भरतो नित्यद्विवचनान्तोऽयं। मातामहः पुं मातुःपिता इत्यमरः दौहित्रस्य मातामहः साधर्म्मे यथा आसीद्रगोनृपश्रेष्ठ शायत्तशीलो ह्युद्धवनथ्यजनस्सम हर्तालाहेण एको ऽभवत्ततः मृत्यो कन्या सुनीथाया मातृदुःशीलकारणात् क्रूरबुद्धिरभूत्तस्य जगतोऽप्यपि पीडने तपस्विनो कुले जाता ऋषीणां वा यशस्विनां सगुणां निर्गुणां वापि याति मातामहीं तथा इत्यग्निपुराणं॥ तन्मरणे त्रिरात्रं शौचं यथा मातामहानां मरणे। त्रिरात्रं स्यादशौचकं इति शुद्धितत्त्वे कूर्मपुराणं उद्धितं पुत्त्रताभावे तस्य श्राद्धे दौहित्रस्याधिकारो यथा मातामहानां दौहित्राः कुर्व्वन्त्यहनि चापरे तेषां प्रकुर्व्वते द्वितीयेऽहनि सर्व्वदा इति शुद्धितत्त्वे उद्धितं। पुत्त्रताभावे तस्य धने दौहित्रस्याधिकारो यथा तदभावे दौहित्रः पौत्त्रदौहित्रयोर्लोके विशेषो नास्ति धर्म्मतः तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः इति मनुवचनेन पौत्त्रतुल्याभिधानेन यथा पुत्त्राभावे पौत्त्रस्तथा दुहित्रभावे दौहित्रः अत एव गोविन्दराजस्मृतो विप्रः अपुत्त्रपौत्त्रे संसारे दौहित्रा धनमाप्नुयुः पूर्व्वेषां हि स्वधाकारे पौत्त्रदौहित्रकाः समा॥ इति




दायत्वं ॥
मातामही स्त्री मातामहपत्नी मा
तुर्माता आइ इति भाषा । यथा
मातामही मातृमाता मातुलस्या
च पूजिता प्रमातामहीति वि
ज्ञाता प्रमातामह कामिनी वृद्ध
प्रमातामही ज्ञेया तत्पितुः का
मिनी तथा इति ब्रह्मवैवर्ते ब्रह्म
खण्डे १० अध्यायः तन्मरणे प
क्षिणीशौचं यथा मातुले श्वशुरे
मित्रे गुरौ गुर्वङ्गनासु च अशौचं
पक्षिणीं रात्रिं मृता मातामही
यदि इति शुद्धितत्त्वं दौहित्र
पर्य्यन्ताभावे तत्कन्यादौहित्रस्या
धिकारो यथा तदभावे दौहि
त्रः प्राग्धनं ब्रह्मपुराणे तथा दर्शि
तात् पौत्रदौहित्रयोर्लोके न
विशेषोऽस्ति धर्म्मतः तयोर्हि मा
तापितरौ सम्भूतौ तस्य देहतः
इत्यनेन यथा पुत्राभावे पौत्र
स्तथा दुहित्रभावे दौहित्रः इति
प्राग्वोक्तत्वात् मातुलो भा
गिनेयस्य स्वस्त्रीयो मातुलस्य च
श्वशुरस्य गुरोश्चैव सख्युर्मातामह
स्य च एतेषाञ्चैव भार्य्याभ्यः
स्वसुर्म्मातुः पितुस्तथा पिण्डदानं
तु कर्त्तव्यमिति वेदविदां स्थितिः

रिति वृद्धशातातपवचनेन माता
महस्य साक्षाद्दौहित्रेण पिण्ड
दानश्रुतेः पत्न्याद्यधिकारिणश्च इति
शुद्धितत्त्वं ॥ तस्य श्राद्धे तत्क
न्यैव पौत्रपर्य्यन्ताभावे दौहित्रा
धिकारः पौत्रकपत्नेतत्पुत्रपर्य्य
न्ताभावे दौहित्राधिकारो यथा
दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति
पौत्रवदिति मनुवचने दौहित्रे
पौत्रधर्म्मातिदेशात् पुत्रेण प
त्नीति दुहितृवीर्य्यानुबाधक पु
त्रेण बाध्य दुहितृपुत्रबाधस्या
नाय्यत्वात् इति दायतत्त्वं पुत्राभा
वे दौहित्रोऽधिकारी पुत्राधि
कारात् प्राक् दुहित्रधिकारश्रुतेः
तत्राधिकाया दुहितृ पुत्रेणाबाध्य
पुत्रबाधस्यैव न्याय्यत्वात् इति
दायक्रमसंग्रहश्च ॥ ॥
मातुली स्त्री मातुलपत्नी इति
शब्दमाला ॥
मातुलः पुं मातुर्भ्राता पितृश्या
लकः मामा इति भाषा इत्य
मरः तन्मरणे भागिनेयस्य प
क्षिणीशौचं यथा मातुले प
क्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च
इति शुद्धितत्त्वं स च मातामहप
र्य्यन्तदौहित्रस्य मृतस्य प्रेता।

क्रियाद्यधिकारी यथा मातुलो ।
भागिनेयस्य स्वस्त्रीयो मातुलस्य
च इति शातातपीय पाठक्रमात्
इति शुद्धितत्त्वं ॥ व्रीहिभे
दः मदनद्रुमः धत्तूरः इति
मेदिनी सर्पविशेषः ॥ इति
हेमचन्द्रः ॥
मातुलकः पुं धुस्तूरवृक्षः इति
राजनिर्घण्टः ॥
मातुलपुत्रकः पुं धुस्तूरफलं इ
त्यमरः मातुलतनयः इति मे
दिनी ॥
मातुला } स्त्री मातुलपत्नी मामी
मातुलानी } इति भाषा इत्यमर
भरतौ तन्मरणे भागिनेयस्य प
क्षिणीशौचं यथा श्वशुरयो र्भ
गिन्योश्च मातुलान्योश्च मातुलो।
पित्रोः स्वसरि तद्वच्च पक्षिणीं त
पयेन्निशां इति शुद्धितत्त्वं ॥
मातुलानी स्त्री कलायः भङ्गा
इति मेदिनी शणः इति हेम
चन्द्रः प्रियङ्गुवृक्षः इति शब्द
चन्द्रिका ॥
मातुलाहिः पुं सर्पविशेषः मा
लयासाप इति केचित् इति व
भाषा अयं वृहदाकृतिः आयत
देहः दीर्घलाङ्गुलः चतुष्पात् इति

मधुमाधवादयः तत्पर्य्यायः मा
तुलानः २ इत्यमरः ॥
मातुली स्त्री मातुलपत्नी इत्यम
रः भङ्गा इति शब्दचन्द्रिका ॥
मातुलुङ्गः पुं बीजपूरः इत्यमर
टीकायां भरतः ॥
मातुलुङ्गकः पुं छोलङ्गवृक्षः त
त्पर्य्यायः फलपूरः २ बीजपूरः ३
रुचकः ४ इत्यमरः मातुलुङ्गः
५ सुफलः ६ फलपूरकः ७ लुङ्ग
षः ८ पूरकः ९ पूरः १० बीजपूर्णः ११
अम्लकेशरः १२ छोलङ्गः १३ इ
ति रत्नमाला अस्य गुणाः हृद्यत्वं
अम्लत्वं लघुत्वं अग्निदीपनत्वं
आध्मानगुल्मप्लीहहृद्रोगादावर्त्त
नाशित्वं विबन्धहिक्काशूलच्छर्दि
रोगप्रशमत्वञ्च अस्य त्वग्गुणाः
तिक्तत्वं दुर्ज्जरत्वं कफवात
नाशित्वं विपाकरसत्वञ्च ॥ तन्मां
सगुणाः स्वादुत्वं शीतत्वं गुरु
त्वं वायुपित्तनाशित्वञ्च इति
राजवल्लभः ॥
मातुलुङ्गा स्त्री मधुकर्कटी यथा
मातुलुङ्गा सुगन्धाख्या गिरिजा पु
तिपुष्पिका अम्लिका देवदूती च म
धुविष्णुकर्क्कटी इति रत्नमाला
मातुलुङ्गिका स्त्री वनबीजपूरः इति




राजनिर्घण्टः ॥
मातृकच्छिरः पुं परशुरामः इति केचित् ॥
मातृका स्त्री मातृका माता देवी-
भेदः वर्णमाला इति मेदिनी
करणं स्वरः उपमाता इति
हेमचन्द्रः मातृकागणोत्-
पत्तिर्यथा तत्र देवो ऽप्यसौ दै-
त्यं त्रिशूलेनाहनद्भृशं तस्माद्ध-
तस्य यद्रक्तमपतद्भूतले किल।
तत्रान्धका असंख्याता बभूवुरपरे।
भृशं तद्दृष्ट्वा महदाश्चर्य्यं रुद्रः
शूली ऽन्धकं मृधे गृहीत्वा त्रिशि-
खाग्रेणाननर्त्त परमेश्वरः इतरे
ऽप्यन्धकाः सर्वे चक्रेणापरमेष्ठिना
नारायणेन निहतास्तत्र ये ऽन्ये
समुत्थिताः असृग्भ्यस्तस्य चोरस्क-
शूलप्रोतस्य चासकृत् अनारतं।
समुत्तस्थुः स्वेदाद्रुद्रा रुषान्विताः
तस्य क्रोधेन महता मुखाज्ज्वाला
विनिर्ययौ तद्रूपधारिणी देवी
योगी योगीश्वरी विभुः स्वरू-
पधारिणी चान्या विष्णुनापि विनि-
र्म्मिता ब्रह्मणा कार्त्तिकेयेन इन्द्रेण
यमेनैव वाराहेन च देवेन।
विष्णुना परमेष्ठिना पातालोद्धारणं
रूपं तस्या देव्या विनिर्म्ममे।

माहेश्वरी च माहेन्द्री इत्येता।
अष्टमातरः कारणं यस्य यस्यो-
क्तं तेन तेनावधारितं शरीर-
देव नानात्वतरिदं कीर्त्तितं मया
कामः क्रोधस्तथा लोभो मदो
मोहो ऽथ पंचमः मात्सर्य्यं
षष्ठमित्याहुः पैशुन्यं सप्तमं तथा
असूयाष्टमी ज्ञेया इत्येता अष्ट-
मातरः कामं योगीश्वरी विद्धि
क्रोधं माहेश्वरीं तथा लोभस्तु
वैष्णवी प्रोक्ता ब्रह्माणीमदएव च
मोहः स्वयम्भुः कौमारी मात्सर्य्यं
चैन्द्रजां विदुः यामीदण्डधरा देवी
पैशुन्यं स्वयमेव च असूयावारा-
ह्याख्या इत्येताः परिकीर्त्तिताः।
कामादिगणं एषोऽयं शरीरं परि-
कीर्त्तितं जगाद मूर्त्तिर्यथात-
थाते कीर्त्तितं मया एताभिर्देवा-
ताभिश्च तस्य रक्ते तु शोषिते।
क्षयं गतासुरो मायासच सिद्धो-
ऽन्धको ऽभवत् एतत्ते सर्वमाख्यातं
मातृविद्या मूर्त्तं मया य एत-
च्छृणुयान्नित्यं मातृणामुद्भवं शुभं
तस्यैताः सर्वदा तुष्टिं कुर्वन्त्यनुदिनं
नृप ये नैतत्पठ्यते जन्म मातृ-
णां पुरुषोत्तम सधन्यः सर्वदा लो-
के शिवलोकं च गच्छति तासा-


ञ्च शुभ्रगणादत्ता यमीति शिरुत्त-
मा एताः संपूजयेद्भक्त्या विस्तारा-
रो नरः सदा तस्यैताः परितुष्टा-
स्युः क्षेमारोग्यं ददन्ति च इत्यादि
वाराहपुराणे कामादिमातृगणो-
त्पत्तिर्नामाध्यायः अपि च ब्र-
ह्मेशगुहविष्णूनां तथेन्द्रस्य च श-
क्तयः शरीरेभ्यो विनिष्क्रम्य त-
द्रूपैश्चण्डिकां ययुः यस्य देवस्य
यद्रूपं यथाभूषणवाहनं तद्दे-
वहि तच्छक्तिरसुरान् योद्धुमा-
ययौ हंसयुक्तविमानाग्रे साक्षसूत्र-
कमण्डलुः आयाता ब्रह्मणः शक्ति-
र्ब्रह्माणी साभिधीयते माहेश्वरी
वृषारूढा त्रिशूलवरधारिणी म-
हाहिवलया प्राप्ता चन्द्ररेखाविभू-
षणा कौमारी शक्तिहस्ता च मयूर-
वरवाहना योद्धुमभ्याययौ दैत्यान-
म्बिकागुहरूपिणी तथैव वैष्णवी श-
क्तिर्गरुडोपरि संस्थिता शंखचक्र-
गदाशार्ङ्गखड्गहस्ताभ्युपाययौ।
यज्ञवाराहमतुलं रूपं या बिभ्रतो
हरेः शक्तिः साप्याययौ तत्र वा-
राही बिभ्रती तनुं नारसिंही नृ-
सिंहस्य बिभ्रती सदृशं वपुः प्रा-
प्ता तत्र सटाक्षेप क्षिप्तनक्षत्रसंह-
तिः वज्रहस्ता तथैवैन्द्री गज-

राजोपरि स्थिता प्राप्ता सहस्रनय-
ना यथा शक्रस्तथैव सा ततः प-
रिवृतस्ताभिरीशानो देवशक्तिभिः
हन्यन्तामसुराः शीघ्रं मम प्रीत्या-
ह चण्डिका ततो देवी शरीरात्तु
विनिष्क्रान्तातिभीषणा चण्डिका
शक्तिरत्युग्रा शिवाशतनिनादि-
नी इति मार्कण्डेयपुराणं मातृ-
वर्गो यथा गुरोः पत्नी राजप-
त्नी विप्रपत्नी च या सती पत्नी च
भ्रातृस्तनयो मित्रपत्नी च तत्प्रसूः
प्रसूः पितुस्तयोर्भ्रातुः पत्नी स्वसुः
स्वकन्यका जननी तस्य पत्नी च भ-
गिनी सा भीतया स्वाभीष्टस्य प-
त्नी च धात्री कान्ताप्रदायिका गर्भ-
धात्री स्वनाम्नी च भयात्त्रातृका-
मिनी एता वेदप्रणीताश्च सर्वेषां
मातरः स्मृताः एतास्वपि च सर्वास्व-
स्वनता नास्तिकाश्च इति ब्रह्मवैव-
र्त्ते श्रीकृष्णजन्मखण्डे ७५ अध्यायः
षोडशमातरो यथा गुरुपत्नी रा-
जपत्नी देवपत्नी तथा वधूः पितुः
स्वसा शिष्यपत्नी भृत्यपत्नी च मातु-
ली पितृपत्नी भ्रातृपत्नी स्वश्रू स्व
भगिनी सुता गर्भधात्री इष्टदेवी च पुं-
सः षोडशमातरः इति तत्रैव ५९
अध्यायः अथ मातृकान्यासः।



भगवानुवाच मातृका न्यासमथु
नाष्टुएवेतालभैरव येनदेवत्वमा
यातिनरोऽपिविहितेनवै वाग्ब्र
ह्माणी मुखादेव्यामातृकाः परि
कीर्तिताः तासांमंत्राणिसर्वाणि
व्यंजनानि स्वरास्तथा चंद्रबिंदुप्र
युक्तानि सर्वकामप्रदानिच ऋषि
स्तु मातृमंत्राणांब्रह्मैवपरिकीर्तितः
प्रोक्ताछंदस्तुगायत्री देवताच।
सरस्वती शरीरशुद्धिप्रभवसर्व
कामार्थ साधने विनियोगः समु
द्दिष्टा मंत्राणां न्यून पूरणे अ
कारेण समंकादि वर्गोयःप्रथमः
स्मृतः तेषुंद्रबिंदुसयुक्ते स्तत्रा
स्येरत्तैर्वह्निः आकारेच तथो
चार्यअंगुष्ठाभ्यांनमस्तथाप्रथमं
मातृकामंत्र मंगुष्ठद्वयतोन्यसेत
परेवर्गाः स्वरैः सार्द्धं ये वान्ये।
न्यासकर्मणि तेसर्वे चंद्र बिंदु
भ्यांयुक्ताः कार्यास्तत्सर्वतः ह्रस्व
कारस्य वर्गेण दीर्घेकारांतगेनतु
तर्जन्योर्विन्यसेत सम्यक्स्वाहांते
न्तुपूर्ववत् ह्रस्वोकारस्ववर्गेणादी
र्घोकारांतगेन तु मध्यमायुगले
सम्यक्चवषडंतेनविन्यसेत् एका
रादितवर्गेन ऐकारांतेनचैवहुं।
न्यसेदनामिकायुग्मेनियतंतत्रभै
रव ओकारादि पवर्गेन औकारां
तेन शोषितं वौषडंतं कनिष्ठयो।
विन्यसेत कार्य्य सिद्धये अंका
रादि यकारादि वर्गेण क्षांतकेनव
अः इत्येनेनतलयो विन्यसेत पा
णिपृष्ठयोः वषट्कारशेषभागो।
मंत्रन्यासे नियोजयेत हृदयादि
षडंगेषु पूर्ववत् क्रमतो न्यसेत।
अंगुष्ठायुक्तवर्गैस्तुक्रमात षड्भि
स्तथाविधैः पुनस्तथापादजानुश
क्थिगत्ये तु पार्श्वयोः वक्षोच विन्य
सेन्मंत्रान्क्रमात पूर्ववदत्तरैः।
वात्योः पार्श्वपार्श्वास्तथाकेदेनाभौव।
जठरेनथा स्तनयोरपि विन्यास
तथाषड्भिः समाचरेत वक्षेच विदु
केगंडे कर्णयोश्च ललाटके अं
शोकत्तेचषड्वर्गैः पूर्ववन्न्यास मा
चरेत् रोमकूपे ब्रह्मरंध्रे गुदे।
जंघायुगे तथा नखेषुपार पा
र्श्वयोश्च तथा पूर्ववदाचरेत एवं
मातृकान्यासं यःकुर्यान्नर सत्तमः
सर्धर्मयत्ते पूजास्तुवा योग्या
भ्यजापने नातःपरतरं मन्त्र
वियनेक्कचिद्देवहि यःसर्वकामदं
प्राप्य चतुर्वर्गफलप्रदं वाग्देवा
नां हृदिध्यात्वामहृद्धिसर्वात्मानिचा।
विद्याचमातृकामंत्रैः संक्रमेश्च।

पिवेज्जलं सवाग्मीपंडितो धी
मान् जायतेचवरःकविः चंद्रबिंदु
समायुक्तान्स्वरान्पूर्वान्यदेहुयः
व्यंजनानिचसर्वाणिकेवलानिप
ठेत्ततः अकारादिक्षकारान्तान्येवं
न्यासेस्तपूर्वकैः जलंकरतले।
गृह्य पठित्वात्तरसंचकं अभिम
न्त्रत्वन्तोयं प्रथमंपूरकैःपिवेत्
कुंभकेन द्वितीयंतत्तृतीयंतथारे
चकैः एवंसकृत्त्रिवारंतु पीत्वा
तोयं विचक्षणः हृच्छ्रोगःपंडितो
भूयात्पुत्रपौत्रसमन्वितः त्रिसं
ध्यमथ पीत्वेव मातृकामंत्रमंत्रि
तं तोयंकविमाप्नोतिसर्वान्।
कामांस्तथैवच सततं कुरुते।
यस्तु मातृकामंत्र मंत्रितं तोय
पानं महाभागःपूरककुंभ रेच
कैः ससर्वकामान्संप्राप्यपुत्र।
पौत्र समृद्धिमान् भूत्वामहाकवि
लोके वलवान् तस्य विक्रमः स
र्वत्र वलेभ्यो भूत्वाचांतेमोक्ष मवा।
प्नुयात् राजानमथवाराजभार्यां
पुत्रमथापिवा वशीकरोतितं वि
रात् मातृकामंत्रपालकः न्यास
क्रमेक्रमः प्रोक्तोवर्गोक्तद्रूहेव तु
अक्षराणांक्रमेनाथ तोयपाने
समाचरेत् ये ये मंत्रा देवताना
मृषीणामथराक्षसां ते मंत्रा मा
तृकामंत्रे नित्यमेवप्रतिष्ठिताः।
सर्वमंत्रमयस्यायं सर्ववेदमयस्त
चतुर्वर्गप्रदस्यायं मातृका मंत्र
उच्यते इतितेकथितः पुत्र मा
तृकान्यासउत्तमः इतिश्रीकालि
कापुराणेमातृकान्यासः ४६ अ
ध्यायः ॥ अथतस्यप्रयोगः।
अस्यमातृका मंत्रस्य ब्रह्माऋषि
र्गायत्रीछंदो मातृकासरस्वती
देवता हलोबीजानिस्वराःशक्तयो
मातृकान्यासे विनियोगः शिरसि
ॐब्रह्मणेऋषयेनमः मुखेॐगाय
त्रीछंदसेनमः हृदि ॐमातृकास
रस्वत्यै देवतायै नमः गुह्ये ॐ
व्यंजनेभ्योबीजेभ्यो नमः पादा
योः ॐस्वरेभ्यः शक्तिभ्यो नमः
तथा च ज्ञानार्णवे मातृकाकृण
देवेशि न्यसेत् प्राप्य निकृंतनी।
ऋषिब्रह्मास्य मंत्रस्य गायत्रीछंद
उच्यते देवतामातृकादेवी वी
जंव्यंजनसंचयं शक्तयस्तुस्वरा
देवि षडंगन्यास माचरेत् ॥
ततःषडंगन्यासे अं कं खं गं घं
ङं आं अंगुष्ठाभ्यां नमः इं चं छं
जं झं ञं ईं तर्जनीभ्यांस्वाहा उं
टं ठं डं ढं णं ऊं मध्यमाभ्यां।



वषट् पं तं थं दं धं नं पं अ
नामिकाभ्यां हूं ओं पं फं बं भं
मं औं कनिष्ठाभ्यां वौषट् अं यं
रं लं वं शं षं सं हं लं क्षं अः
करतल पृष्ठाभ्यां फट् एवं हृदयो
दिषु अं कं खं आं हृदयायनमः
इत्यादि तथाच ज्ञानार्णवे अ
आंमध्ये कवर्गं तु इं ईं मध्ये चव
र्गकं उं ऊं मध्ये टवर्गं तु एं ऐं
मध्ये तवर्गकं ओं औं मध्ये पव
र्गं तु विंदुयुक्तं न्यसेत्प्रिये अनु
स्वार विसर्गान्तर्यशावर्गोसलक्षकौ
हृदयेच शिरो देवि शिखाकवचकं
तथा नेत्रमंत्रं न्यसेत् हे तं नमः
स्वाहाक्रमेण तु वषट् हुं वौषडे।
त्रेच फडंत योजयेत् प्रिये षडं।
गोऽयं मातृकायाः सर्वपापहरः।
स्मृतः अथान्तर्मातृकान्यासः ॥
आकारादि षोडशस्वरान् सविंदून्
षोडशदल कमले कंठमूले न्य
सेत् ककारादि द्वादश वर्णान्
सविंदून् द्वादशदल कमलेहृदये
न्यसेत् डकारादि दशवर्णान् सविं
दून् दशदलकमलेनाभौन्यसेत्
बकारादि षड्वर्णान् सविंदून षड्द
लकमले लिंगमूलेन्यसेत् वकारा
दिवलसान्तवर्णान्सविंदूनचतुर्दलकमले

मूलाधारे न्यसेत् हक्ष वर्णौद्वयं
सविंदु द्विदल पद्म भ्रूमध्येन्यसेत्
तथाच ज्ञानार्णवे षोडशपत्राम्बुजे
कण्ठस्वरान् षोडश विन्यसेत् द्वा
दशाक्षरं हृत्पद्मे कादीन्द्वादश वि
न्यसेत् दशपत्राम्बुजे नाभौ डका
रादीन्न्यसेद्दश षट्पत्रामध्ये लिंग
स्यवकारादीन्न्यसेच्च षट् आधारा
चतुरो वर्णान्न्यसेद्वादीन् चतुर्दले
हक्षौ भ्रूमध्यगे पद्मे द्विदले विन्य
सेत्प्रिये आगमसंहितायां प
केवर्णमेकैक पत्रांते विन्य
सेत् प्रिये एवं मनः स्थिरं न्यस्य मन
सानोवह्निर्न्यसेत् ॥ वैसवेत।
एकैकवर्णमुच्चार्य मूलाधाराच्छिरोन्त
कं नमोन्तमितिविन्यास आंतरः।
परिकीर्तितः अथान्तर्मातृकान्यासो
मूलाधारे चतुर्दले सवर्णामेव
शाषसचतुवर्गविभूषिते षड्दले
वैद्युतनिभेस्वाधिष्ठाने नलविषि
वभ मै यवले युक्तं वर्णैः षड्भिःसम
न्विते मणिपूरे दशदलेनीलजीमूत
सन्निभे डादिफांतदलैर्युक्ते विंदू
ह्यषितमस्तकैः अनाहते द्वा
दशारे प्रवालरुचिसन्निभे कादि
ठांतदलै युक्ते योगिनां हृदयंगमे
विशुद्धे षोडशदले धूम्राभे ॥

स्वर भूषिते आज्ञाचक्रे तु चंद्रा
भे द्विदले हक्ष लांछिते सह
स्रारे हिमनिभे सर्ववर्णविभूषिते
अकथादि त्रिरेखात्म हलक्षत्रय
भूषिते तन्मध्ये परविंदुच सृष्टि
स्थिति लयात्मकं एवं समाहित
मना ध्यायेन्न्यासोऽयमांतरः ॥
ततोवाह्यमातृका ध्यानं पंचा
शल्लिपिभिर्विभक्तमुखदोःपन्मध्य
वक्षःस्थलां भास्वन्मौलि निबद्धचंद्र
सकलामापीनतुंगस्तनीं मुद्राम
क्षगुणां सुधाढ्यकलशं विद्यां च
हस्ताम्बुजे विभ्राणां विशदप्रभां
त्रिनयनांवाग्देवता माश्रये एवं।
ध्यात्वान्यसेत् तत्रांगुलिनियमस्तंत्रे
ललाटेऽनामिकामध्ये विन्यसेन्मुख
पंकजे तर्जनी मध्यमानामा वृद्धा
नामेचनेत्रयोः अंगुष्ठं कर्णयो
र्न्यस्य कनिष्ठांगुष्ठकौनसोः मध्या
नामिको गंडयोश्च मध्यमांचोष्ठयो
र्न्यसेत् अनामां दंतयोर्न्यस्य म
ध्यमां मुत्तमांगके मुखेऽनामां।
मध्यमांच हस्तपादेच पार्श्वयोः
कनिष्ठा नामिकामध्यास्ताश्चपृष्ठे
चविन्यसेत् नाः सांगुष्ठा नाभिदेश
सर्वाः कुक्षौ च विन्यसेत् हृदये च
तलं सर्वं अंशयोश्च ककुद्स्थले।


हृन्मुखे हस्तपत् कृतिमत्स्ये पुनल
मेवच एतास्तु मातृकामुद्राः क्र
मेण परिकीर्तिताः अस्तात्वाविन्य
सेयत्तु न्यासः स्यात्तस्य निष्फलः
गौतमीये ललाट मुखवृत्ताक्षि
श्रुति घ्राणेषु गंडयोः ओष्ठदंतो
त्तमांगास्येषु दोः पत्सध्यग्रकेषु च
पार्श्वयोः पृष्ठतो नाभौ जठरे हृद
येंऽशके ककुद्यंशे च हृत्पूर्वं
पाणिपादयुगे तथा जठराननयो
र्न्यसेन्मातृकार्णान् यथा क्रमात्
तद्यथा अं नमो ललाटे। आं
नमो मुखवृत्ते इं ईं चक्षुषोः ॥
उं ऊं कर्णयोः ऋं ॠं नसोः
लृं लॄं गंडयोः एं ओष्ठे ऐं अध
रो ओं ऊर्ध्वदंते औं अधोदंते अं
ब्रह्मरंध्रे अः मुखे कं दक्षवा
हुमूले खं कूर्परे गं मणिबंधा
घं अंगुलिमूले ङं अंगुल्यग्रे ॥
एवं चं ५ वामबाहुमूल संध्यग्रके
षु एवं टं ५ दक्षिणपादमूलसंध्य
ग्रकेषु एवं तं ५ वामपादमूल सं
ध्यग्रकेषु पं दक्षिणपार्श्वे फं वाम
पार्श्वे बं पृष्ठे भं नाभौ मं जठरे
यं हृदि रं दक्षबाहुमूले ॥ लं
ककुदि वं वामबाहुमूले शं हृदा
दिदक्षहस्ते षं हृदादि वाम

ह्स्लें सं ह्स्रादि दक्षपादे हूं
ह्स्रादिवामपादे लं ह्स्राधर
रे लं ह्स्रादि मुखे सर्वत्र नमो
ऽन्तेन न्यसेत् तथाच ओंमाद्यंतो
नमोन्तोवा सविंदु विंदु वर्जितः
पंचाशद्वर्णविन्यासः क्रमाङ्क्रो
मणीषिभिः इतिभट्टः अथ
संहारमातृकान्यासः तस्याध्याने
यथा अक्षस्रजं हरिणपोतमुद्
टंकविद्याः करैरविरतं दधती
त्रिनेत्रा अर्द्धेन्दुमौलिमरुणाम
रविंदरामां वर्णेश्वरीं प्रणमतस्त
नभारनम्रां न्यासस्तु लकारा
दि अकारान्तः यथा लं नमो ह्स्रा
दिमुखे इत्यादि अपरांच वर्त्तयो
मातृकाप्रोक्ता केवला विंदु सं यु
ता सविसर्गा सोभयाच रहस्यं।
श्रृण्वेकध्याने विद्याकरीकेवला च
सोभया भुक्तिदायिनी पुत्रदा स
विसर्गा तु सविंदु वित्तदायिनी वि
शुद्धेश्वरे वाग्भवाद्याच वाक् सि
द्ध्यै रमाद्या श्रीप्रहृदये ह्स्लेवा
द्या सर्वसिद्ध्यै कामाद्या लोक व
श्यदा श्रीकंठाद्यानिमाद्यस्यैत त्।
सर्वमंत्रः प्रसीदति श्रीविद्या वि
षये नवान्तेश्वरे वाग्भवाद्या नमो
ऽन्ताश्च न्यसनवा मातृकान्तराः।

श्रीविद्याविषये मंत्री वाग्भवाद्यस्य
सिद्धये इतितंत्रसारः।
मातृकेशटः पुं मातुलः इति
त्रिकांडशेषः ॥
मातृनंदनः पुं कार्त्तिकेयः यथा
कथं त्वं कृत्तिकापुत्रमुक्तवान् तं
स्वरं गृहं कथं वा यावकेरसौ कौ
न्तादिवाराहपुराणे स्कंदोत्पत्तिना
माध्यायः ॥
मातृमुखः पुं जडः इति हेम
चंद्रः ॥
मातृबंधुः पुं मातृबांधवः यथा
बंधवस्त्रिविधाः आत्मबंधवः पि
तृबंधवो मातृबंधवश्चेति यथो
क्तं आत्मपितृष्वसुः पुत्रा आत्म
मातृष्वसुः सुताः आत्ममातुल
पुत्राश्च विज्ञेयात्मबांधवाः।
पितुः पितृष्वसुः पुत्राः पितुर्मा
तृष्वसुः सुताः पितुर्मातुल पु
त्राश्च विज्ञेयाः पितृबांधवाः।
मातुः पितृष्वसुः पुत्रामातुर्मातृ
ष्वसुः सुताः मातुर्मातुलपुत्राश्च।
विज्ञेया मातृबांधवः इति मि
ताक्षरा ॥
मातृबांधवः पुं मातृबंधुः सव
मातामह भगिनीपुत्रः मातामही
॥ ॥ ॥ ॥

भगिनीपुत्रः मातृमातुलपुत्रश्च।
यथा मातुः पितृष्वसुः पुत्रा मा
तुर्मातृष्वसुः सुताः मातुर्मातुल
पुत्राश्च विज्ञेया मातृबांधवाः
इत्युद्वाहतत्त्वं ॥
मातृवाहिनी स्त्री वल्गुलापक्षी।
इतिराजनिर्घंटः ॥
मातृशासितः पुं मूर्खः इति हेम
चंद्रः ॥
मातृष्वसा स्त्री मातृभगिनी मासी
इतिभाषा सामातृष्वसा यथा
मातृष्वसा मातुलानी पितृव्यस्त्री
पितृष्वसा श्वश्रूः पूर्वज पत्नीच
मातृतुल्याः प्रकीर्त्तिताः इति
दायभागः ॥
मातृष्वसेयः पुं मातृष्वसृपुत्रः मा
सितुताभाइ इतिभाषा तत्प
र्यायः मातृष्वस्त्रीयः २ इति हेम
चंद्रः ॥
मातृष्वसेयी स्त्री मातृभगिनीक
न्यामासितुताभगिनी इति भाषा
इत्यमरः ॥
मातृष्वस्त्रीयः पुं मातृभगिनीपुत्रः
मासितुताभाइ इतिभाषा इ
त्यमरः ॥
मातृष्वस्त्रीया स्त्री मातृभगिनी
कन्यामासितुताभगिनी इति भाषा

इत्यमरः ॥
मातृसिंही स्त्री वासक इति शब्द
रत्नावली ॥
मात्रं क्ली कार्त्स्न्ये अवधारणे
इत्यमरः कार्त्स्न्ये यथा बीज
मात्रमहिंसेत अवधारणे यथा
पयो मात्रं भुंक्ते इति तट्टीका
यां भरतः ॥
मात्रा स्त्री परिच्छदः अल्पः परि
माणं इत्यमरः परिच्छदो वृत्त्य।
स्यादिः अल्पे यथा शाकमात्रा
परिमाणे यथा किंहस्ति मात्रो
ऽङ्कुशः इतितट्टीकायां भरतः
कर्णभूषा वित्तं अतीतावयवः।
इतिमेदिनी ॥ कालविशेषः।
यथा कालेन यावता पाणिः प
र्य्येतिजानुमंडले सा मात्राकवि
भिः प्रोक्ता ह्रस्वदीर्घप्लुते मता
इति प्राचीनाः अपिच वाम
जानुनिन हस्तभ्रमणं यावताभवेत्
कालेनमात्रा सा ज्ञेया मुनिभि
र्वेदपारगैः इति तंत्रसारः ॥
इंद्रियवृत्तिः यथा मात्रास्पर्शास्तु
कौन्तेय शीतोष्ण सुख दुःखदा
आगमापायिनो नित्यास्तां स्ति
तिक्षस्वभारत इतिभगवद्गीता मी
यंते आभिर्विषयाः मात्रा ॥



इंद्रिय वत्तयः इतितट्टीकायां । श्रीधरस्वामी इंद्रियं इति पू र्वोक्त श्लोक टीकायां मधुसूदन सरस्वती ग्रंथः यथा तयो वि प्राः पृथग्दधादवसान दिनाहते । स्वभर्तृ पिंड मात्रामपस्त्तमि या सांयतः स्मृताः इतिश्राद्ध तत्वे

मात्सर्य्य क्ली मत्सरस्यभावः पर शुभद्वेषः यथा मागाश्रितायै । कतरः प्रमादं वसन्नसंवाधशिवे ऽपिदेशे मात्सर्य्य रागो पद तान्मानां हिस्वलेनिसाधुष्वपिमा नसानि इतिभारवौ ३ अध्यायः

मात्स्यिकः त्रि जालिकः मत्स्य घातकः इतिसिद्धांतकौमुदी ।

माथ इ ऊंथे इतिकविकल्पद्रुमः इ मोथ्यते ऊंथो वध स्तेषो । इति दुर्गादासः ॥

माथः पुं पंथाः इतित्रिकांडा शेषः मंथनं इतिशद्दरत्नावली ।

माथुरः पुं मथुरायाआगतः इति मुग्धवोधव्याकरणं ॥

मादः पुं दर्पः इत्यमरः हर्षः इति तट्टीकायांभरतः मत्तता । इति शद्दरत्नावली ॥

मादकः पुं दात्यूहपक्षी इति शद्वमाला मदकारकद्रव्ये त्रि ॥

मादनं क्ली लवंग इतिशद्दचंद्रिका हर्षकारयितरि त्रि ॥

मादनः पुं कामदेवः मदनफलः धुस्तुरः इति केचित् ॥

मादनी स्त्री मार्कंदी इति राज निर्घंटः विजया इति भाव प्रकाशः ॥

मादृशः त्रि मत्सदृशः इति व्या करणं ॥

माद्री स्त्री पांडुराजपत्नीसा मृगीं भूतस्पस्वामिन आज्ञया अश्विनीकु माराभ्यां नकुलसहदेवौ जनया मास इति श्रीभागवतमतं ॥ अतिविषा इति राजनिर्घंटः ।

माद्रीपतिः पुं पांडराजः इति शद्द रत्नावली ॥

माधवः पुं विष्णुः तस्यव्युत्पत्ति र्यथा माच ब्रह्मस्वरूपायामूलप्र कृतिरीश्वरी नारायणीति विख्या ता विष्णुमाया सनातनी महाल क्ष्मीस्वरूपाच वेदमाता सरस्वती राधावसंधरा गंगातासांस्वामीव माधवः इतिब्रह्मवैवर्त्ते श्रीकृष्ण जन्मखंडे ११ अध्यायः तन्नाम माहात्म्यं यथा ऊंमित्येकाक्षरे मंत्रे स्थितः सर्वगतो हरिः । ॥ ॥। ॥ ॥

माधवायेति वैनाम धर्मकामार्थ मोक्षदं इति वह्नि पुराणं ।

वैशाखमासः इत्यमरः वसंतः इति विश्वः मधूकवृक्षः कुलस वृक्षः इति राजनिर्घंटः ॥

माधविका स्त्री माधवीलता इत्य मरटीकायां भरतः ॥

माधवी स्त्री स्वनामख्यातपुष्पला ता तत्पर्य्यायः अतिमुक्तः २ पुंड्र कः ३ वासंती ४ लता ५ इत्यमरः अतिमुक्तकः ६ माधविका ७ मा धवीलता ८ इतितट्टीकायांभरतः चंद्रवल्ली ९ सुगंधा १० भ्रम रोत्सवा ११ भृंगप्रिया १२ भद्र लता १३ भूमिमंडपभूषणा १४ अ स्यागुणाः कटुत्वं तिक्तत्वं क षायत्वं मदगंधित्वं पित्त कास व्रणदाह शोष नाशित्वंच इति राजनिर्घंटः मिसिः मधुशर्करा कुट्टनी मदिरा इतिमेदिनी । तुलसी इतिशद्दमाला दुर्गा इति शद्दरत्नावली माधवस्य पत्नीच ॥

माधवीलता स्त्री स्वनामख्यातपु ष्पलता इत्यमरटीकायां भरतः ।

माधवेष्टा स्त्री वाराहीकंदः इति राजनिर्घंटः ॥

माधवोचितं क्ली कंकोलकं इति राजनिर्घंटः ॥

माधवोद्भवः पुं राजादनी इति राजनिर्घंटः ॥


माधुकः पुं वर्णसंकरजातिविशे षः इतिजटाधरः ।

माधुमतः पुं काश्मीरदेशभरतः इति हेमचंद्रः ॥

माधुरं क्ली मल्लिका इतित्रिकांड शेषः मधुरसंभवे त्रि ।

माधुरी स्त्री मद्यं इतिभूरिप्रयोगः माधुर्य्य यथा तातिस्पर्शे स ख्यानितेचतरलाः स्निग्धादृशोवि भ्रमास्तद्वक्त्राम्बुजसौरभंसच सुधा स्यंदीगिरां वक्रिमा सा विम्बाधर माधुरीतिविषया संगेऽपि चेन्मा नसं तस्यांलग्नसमाधिहंतविरह व्याधिःकथं वर्द्धते इतिगीत गोविंदे ३ सर्गः ॥

माधुर्य्य क्ली मधुरस्यभावः मधुरत्वं इतिहेमचंद्रः लावण्यं यथा रूपं किमप्यनिर्वाच्यं तनो र्माधुर्य्य मुच्यते इत्युज्ज्वलनीलम णिः पांचालीरीति विशिष्टकाव्य गुणः यथा मधुरा सुकुमाराचा पांचालीकवयोविदुः इति साहि त्यदर्पणे ९ परिच्छेदः ॥ तस्य



लक्षणं यथा चित्तद्रवीभावमयो
ह्लादो माधुर्य्यमुच्यते संभोगे
करुणे विप्रलम्भे शान्तेऽधिकं क्र
मात् मूर्ध्नि वर्गान्त्यवर्णेन युक्ता
ट ठ ड ढान् विना रणौ लघू च
तद्व्यक्तौ वर्णाः कारणतां गताः
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना
तथा इति साहित्यदर्पणे ८ ।
परिच्छेदः ॥
माध्यंदि त्रि मध्यमं इति हेम
चन्द्रः ॥
माध्यमं त्रि मध्येभवं यथा म
ध्यमं माध्यमं मध्यमीयं माध्यं
दिनं च तत् इति हेमचन्द्रः ।
माध्यस्थ्य क्ली मध्यस्थस्य भावः म
ध्यस्थकरणं यथा अयाचितारं
नहि देवदेव मद्रिः सुतां ग्राह
यितुं शशाक अभ्यर्थना भङ्गभ
येन साधुर्माध्यस्थ्यमिष्टेऽप्यवल
म्बतेऽर्थे इति कुमारसंभवे ॥
सर्गः ॥
माध्वकं क्ली माध्वीकं इत्यमरटी
कायां भानुदीक्षितः ॥
माध्वी स्त्री मद्यं इति त्रिकाण्डशेषः
मद्यादिकृता सुरा इति राज
निर्घण्टः मधुरकण्टकामत्स्यः ।
इति शब्दरत्नावली ॥

माध्वीकं क्ली मधूकपुष्पकृतमद्यं त
त्पर्य्यायः मध्वासवः २ माधवकः ३
मधु ४ इत्यमरः मधुमाध्वीक मि
त्येकं नामेति केचित् ॥ पूर्वौ
द्वौ पुष्पमद्ये परौ द्वौ द्राक्षा
विकारे इति भरतः माध्वी क
मिति वा पाठः इति रमानाथः
माध्वीक स्थाने माधक मिति भानु
दीक्षितः ॥
माध्वीकफलः पुं मधुनारिकेरिकः
इति राजनिर्घण्टः ॥
माध्वी मधुरा स्त्री मधुरखर्जूरिका इ
ति राजनिर्घण्टः ॥
मान ङ. विचारे अर्थे इति कवि
कल्पद्रुमः ङ. मीमांसते शास्त्रं
धीरः अर्त्थीयां निबादयोनस्य इ
ति रमानाथः इति दुर्गादासः ।
मानकि अर्च्चे इति कविकल्पद्रुमः
कि मानयति मानति इति दुर्गा
दासः ॥
मानं क्ली परिमाणं तत्पर्य्यायः
पौतवं २ द्रुवयं ३ पाय्यं ४ पौ
तवं ५ तत्र तुलाङ्गुलिप्रस्थैः त्रि
विधं भवति तत्र तुलाग्रहणाना
न्मानाद्युपलक्ष्यते अङ्गुल्या हस्ता
दि प्रस्थेन द्रोणादि इत्यमरभरतौ
प्रमाणं इति मेदिनी

यत्र तालो विरमति तत्र नदे
वग्रहः मुच्यते तच्च त्रिविधं समं
विषमं अतीतं अनागतं च इति
संगीतशास्त्रं ॥ अथ मान
परिभाषा न मानेन विना युक्ति
र्द्रव्याणां जायते क्वचित् अतः
प्रयोगकार्य्यार्थं मानमत्रोच्यते
मया चरकस्यमतं वैद्यै राद्यै
र्यस्मान्मतं ततः विहाय सर्वमा
नानि मागधं मानमुच्यते त्रसरे
णुर्बुधैः प्रोक्तस्त्रिंशता परमा
णुभिः त्रसरेणुस्तु पर्य्यायनाम्ना
वंशीति गद्यते जालान्तरगतैः
सूर्य्यकरैर्वंशी विलोक्यते षड्
वंशीभिर्मरीचिः स्यात्ताभिः षड्भि
श्च राजिका तिसृभी राजिकाभि
श्च सर्षपः प्रोच्यते बुधैः यवो
ऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्त
च्चतुष्टयं षड्भिस्तु रक्तिकाभिः स्या
न्माषको हेमधान्यकौ माषैश्चतु
र्भिः शाणः स्याद्धरणः स निगद्य
ते टङ्कः स एव कथितस्तद्द्वयं कोल
उच्यते क्षुद्रमो वटकश्चैव द्रङ्क्षणः
स निगद्यते कोलद्वयं च कर्षः स्यात्
स प्रोक्तः पाणिमानिकः अक्षः
पिचुः पाणितलं किंचित्पाणिश्च
तिन्दुकं बिडालपदकं चैव तथा ।

षोडशिका मता करमध्यो हं
सपदं सुवर्णं कवलग्रहं उदुम्बरं च
पर्य्यायैः कर्ष एव निगद्यते स्यात्
कर्षाभ्यामर्द्धपलं शुक्तिरष्टमि
का तथा शुक्तिभ्यां च पलं ज्ञेयं
मुष्टिराम्रं चतुर्थिका प्रकुञ्चः षो
डशी बिल्वं पलमेवात्र कीर्त्यते ।
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतं च
निगद्यते प्रसृतिभ्यामञ्जलिः
स्यात् कुडवोऽर्द्धशरावकः अष्ट
मानं च संज्ञेयः कुडवाभ्यां च मा
निका शरावोऽष्टपलं तद्वज्ज्ञेयमत्र
विचक्षणैः शरावाभ्यां भवेत्प्रस्थ
श्चतुःप्रस्थैस्तथाढकः भाजनं
कांस्यपात्रं च चतुःषष्टिपलश्च सः
चतुर्भिराढकैर्द्रोणः कलशो नल्व
णोर्मणः उन्मानश्च घटो राशिर्द्रो
णपर्य्याय संज्ञितः द्रोणाभ्यां शूर्प
कुम्भौ च चतुःषष्टिशरावकः शूर्पा
भ्यां च भवेद्द्रोणः कलशो नल्वणो
र्मणः उन्मानश्च घटो राशिर्द्रोण
पर्य्याय संज्ञितः द्रोणाभ्यां शूर्पं
कुम्भौ च चतुःषष्टिशरावकः शूर्पा
भ्यां च भवेद्द्रोणी वाहो गोणी च सा
पलशतं ज्ञेया सर्वत्रैवैष निश्चयः
माषटङ्काक्षबिल्वानि कुडवः प्रस्थमा
ढकं राशिर्गोणीखारिकेति यथो

ष्टर चतुर्गुणाः मागधपरिभाषा
यां षड् रत्तिको माषस्तत्र विंशति ।
रत्तिकष्टंकः यस्तावतिरत्तिकः कर्षः
अयं चरकसम्मतः सुश्रुतमते ।
पंचरत्तिको माषो विंशति रत्ति
कष्टंको ऽशीतिरत्तिकः कर्षः अथ
मेव कलिंगपरिभाषायामपि यत
स्तत्राष्ट रत्तिको माषो द्वात्रिंशद्
रत्तिकष्टंकः सार्द्धटंकद्वयमितः कर्षः
गुंजादिमानमारभ्य यावत् स्यात्
कुडव स्थितिः द्रवार्द्रशुष्कद्रव्याणां
तावन्मानं समं मतं प्रस्थादिमान
मारभ्य द्विगुणस्तद्द्रवार्द्रयोः मा
नेतथा तुलायास्तु द्विगुणं न क्व
चित्स्मृतं मृद्वृक्षवेणुलोहादेर्भाण्ड
यच्चतुरंगुलं विस्तीर्णोच्चतथा सैवतन्
मानं कुडवं वदेत् इति मागधमा
नं अथ कालिंगमानं । यतो
मंदाग्नयो ह्रस्वा हीनसत्वा नराः क
लौ अतस्तु मात्रा तद्योग्या प्रो
च्यते सुज्ञसम्मता यवो द्वादश
भिर्गौरैः सर्षपैः प्रोच्यते बु
धैः यवद्वयेन गुंजास्यात्त्रिगुंजो
वल्ल उच्यते माषो गुंजाभि रष्टा
भिः सप्तभिर्वा भवेत्क्वचित् चतुर्भि
र्माषकैः शाणः स निष्कष्टंक एव च ।
गद्याणो माषकैः षड्भिः कर्षः स्याद्द
श माषिकः चतुःकर्षं पलं प्रो
क्तं दशशाणमितं बुधैः चतुःप
लैश्च कुडवः प्रस्थाद्याः पूर्ववन्म
ताः स्थितिर्नास्त्येव मात्रायाः
कालमग्निं वयो बलं प्रकृतिं
दोषदेशौ च दृष्ट्वा मात्रां प्रकल्प
येत् नाल्पं हन्त्यौषधं व्याधिं
यथाम्भो ऽल्पं महानले अति
मात्रं च दोषाय यथा शस्ये बहूद
कं इति मानपरिभाषा इति
भावप्रकाशः ॥

मानः पुं चित्तसमुन्नतिः इत्यमरः
चित्तस्य समुन्नति रवटुनामानः
सांजे यनाग्रतकर्षणात्मनि वि
ज्ञो नतिर्मान इति मत्समाना
स्त्री नितिमनने मानः इति नहीका ।
यांभरतः आत्मनि पूज्यता ।
बुद्धिः इति नीलकंठः अन्तरक्त
योर्दंपत्योर्भावविशेषः यथा
दंपत्योर्भाव एकत्रसतो रप्यनुर
क्तयोः स्वाभीष्टाश्लेष वीक्षणादि
निरोधी मान उच्यते इत्युज्ज्वलनी
लमणिः पूज्यते यथा अधमाः
कलिमिच्छन्ति सन्धिमिच्छन्ति म
ध्यमाः उत्तमा मानमिच्छन्ति मानो
हि महतां धनं मनो हि मूलमर्थस्य
माने म्लाने धनेन किं ॥

प्रवृद्धमानदर्पस्य किं धनेन किमा ।
युषा अधमा धनमिच्छन्ति धनमानौ
हि मध्यमाः उत्तमा मानमिच्छन्ति
मानो हि महतां धनं इति गा
रुडे ११५ अध्यायः प्रियापराध
सूचिका चेष्टा मानः सच लघुर्मध्य
मो गुरुश्चेति अल्पापनेयो ल
घुः कष्टापनेयो मध्यमः कष्टेन
मापनेयो गुरुः अस्याप्युक्त र
साभासः अपरस्त्री दर्शनादि ज
न्मा लघुः गोत्रस्खलनादि जन्मा
मध्यमः अपरस्त्री संभोग दर्शना
दिजन्मा गुरुः अन्यथासिद्ध कृत
हास्यापनेयो लघुः अन्यथा वाद
शपथाद्यपनेयो मध्यमः चरण ।
पातभूषणादानाद्यपनेयो गुरुः ।
अपरस्त्रीदर्शनादि जन्मा यथा स्वे
दाम्बुभिः क्वचनपिच्छिल मंगभूमौ
दामोदरीक्वचनकंठकितं चकास्ति
अन्यां विलोकयति भासयति ।
प्रियेपिमानः कथास्यति पदं तव
तत्र विभ्रमः गोत्रस्खलनादि जन्मा
यथा यद्गोत्रस्खलनं तत्र भ्रमो य
दिनमन्यतरामालिख्याल संस्प
र्शशपथं तत्किकारय अपरस्त्री ।
संभोगदर्शनादि जन्मा यथा दयि
तस्यनिरीतमालदेशं चरणाल ।
क्तकपिंजरं सपत्न्याः सदृशो ।
नयनस्य कोण भासः स्फुरितप्रकृ :
शिखरोपमा बभूवुः इति रस
मंजरी ग्रहः इति मेदिनी ॥


मानकं क्ली पुं माणकं मानकचु
इति भाषा यथा कश्चीत्व सिच्छि
ला प्रोक्ता विस्तीर्णपर्णा मानक
इति पृह्वंद्रिका ॥ स्थलकंदो
ग्राम्यकंदः स्थलपद्मस्तु मानकः
इति रत्नमाला अस्य गुणाः
मानकं स्वादुशीतंच गुरु शोथहृ
त् कटु इति राजवल्लभः अपि
च मानकः स्यान्महापत्रः कथ्य
ते तत्गुणा अथ मानकः शोथ
हृच्छीतः पित्तरक्तहरो लघुः इति
भावप्रकाशः ॥

मानग्रन्थिः पुं अपराधः इति
हारावली ॥

मानधानिका स्त्री कर्कटा इतिशब्द
माला ॥


माननीयं त्रि मान्यं यथा मान्यो
मान्योसि हृदोषु माननीयः सुरा
सुरैः स्नापयामि महादेवी मानं
देहि गृहे मम इति दुर्गोत्स व
पद्धतिः ॥

मानरंध्रा स्त्री नाडी नांडी इति
भाषा यथा यामघोषो ऽथ ना



स्त्रीस्यान्मानरंध्राविकालिका इति
त्रिकाण्डशेषः ॥
मानवः पुं मनोरपत्यं मनुष्यः
इत्यमरः बालः इतिशब्दरत्ना-
वली ॥
मानवर्जितः त्रि मानरहितः नीचः
इतिधरणिः ॥
मानवी स्त्री मनुष्यस्त्रीजातिः त-
त्पर्य्यायः मानुषी २ मानुषी ३
नारी ४ इतिशब्दरत्नावली शा-
स्त्रदेवताविशेषः इति हेम-
चन्द्रः स्वायंभुवमनुकन्या इति
महाभारतं ॥
मानवौघः पुं नाथविधायाः पी-
ठस्योत्तरे वायव्यामीशपर्य्यन्त।
पूज्यगुरुपंक्तिविशेषः यथा ता-
रावत्यम्ब भानुमत्यम्ब जयाम्ब वि-
द्याम्ब महोदर्य्यम्ब सुखानंदनाथ
परानंदनाथ पारिजातानंदनाथ।
कुलेश्वरानंदनाथ विरूपाक्षानंद-
नाथ फेरव्यम्बा पूजयेत् एते
मानवौघाः तथाच तंत्रे अथ
नाथगुरून् वक्ष्ये हृष्टहृष्ट फलप्र-
दान् कुर्द्दे केशो व्योमकेशो ।
नीलकण्ठो वृषध्वजः दिव्यौघाः।
सिद्धौघाश्च सिद्धौघानथ शृणु यत्न-
तः वशिष्ठः कूर्मनाथश्च मीननाथो
महेश्वरः हरिनाथो मानवौघान्
शृणु वक्ष्यामि तद्गुरून् तारावती
भानुमती जयाविद्या महोदरी।
सुखानंदः परानंदः पारिजातः
कुलेश्वरः विरूपाक्षः फेरवी च
कथितं तारिणीकुलं आनंद-
नाथ शब्दान्तागुरवः सर्व्वसिद्धिदाः
स्त्रियोपि गुरुरूपाश्च अम्बान्ताः
परिकीर्त्तिताः इतितंत्रसारः ॥
मानव्यं क्ली मानवसमूहः माण-
वानां समूहो माणव्यविकारसंघे
तिल्यः माणवो बालः मूर्द्धन्यमध्यः
दन्त्यमध्य इत्येके इत्यमरटीका।
यां भरतः ॥
मानसं क्ली मनः इत्यमरः तस्य
गुणाद्यथा परापरत्वं संख्याद्याः
पंचवेगश्च मानसे इति भाषा-
परिच्छेदः मानसतापो यथा
काम क्रोध भय द्वेष लोभ मोह
विषादजः शोकासूयावमानेर्ष्या।
मात्सर्य्यादि भयं तथा मानसो
ऽपि द्विजश्रेष्ठ तापो भवति नै-
कधा इतिविष्णुपुराणे ६ अंशे ५
अध्यायः त्रिविधमानस कर्म्म
यथा परद्रव्येष्वभिध्यानं मनसा
निष्ट चिंतनं वितथाभिनिवेशश्च।
त्रिविधं कर्म्म मानसं इति ति-

थ्यादितत्त्वं मानस रोगा
यथा काम क्रोध लोभ मोह भ-
याभिमान दैन्य पैशुन्य विषाद
र्ष्यासूया मात्सर्य्य प्रभृतयः अथ-
वा उन्मादापस्मार मूर्च्छाभ्रममतः
सन्यास प्रभृतयः इति भावप्र-
काशः सरोवरविशेषः ॥
इति मेदिनी सच कैलाशे ।
ब्रह्मणा निर्म्मितः यथा कैला-
शश्चापि डङ्कृपो दानवेन्द्रेण क-
म्पितः यक्षराक्षसगंधर्वैः नित्या-
सेवित कंदरः श्रीमान्मनोहर
श्चैव नित्यं पुष्पित पादपः।
हेमपुष्कर संछन्नं तेनवैख्यात-
संसरः कंपितं मानसंचैव रा-
जहंस निषेवितं इतिमहाभार-
ते हरिवंशे नारसिंहे २२२ अ-
ध्यायः अपिच कैलाशपर्वते ।
राम मनसा निर्म्मितंपरं ब्रह्मणा
नरसाद्दूल तेनेदं मानसं सरः
तस्मात् सुस्राव सरसः साऽयोध्या-
मुपगूहते सरः प्रवृत्ता सरयूः
पुण्याब्रह्मसरश्च्युता इति रामा-
यणे आदिकांडे २४ सर्गः ॥
मनो भवे त्रि यथासंकल्पः कर्म-
मानसं इत्यमरः विषयेष्विति सं-
रागो मानसो मल उच्यते।
इत्येकादशीतत्त्वं अन्तर्ध्यानेन ।
पीडेव मर्मणं मानसी व्यथा।
इतिप्राञ्चः ॥
मानसजपः पुं पियावर्णाद्युच्चा-
रणा यथा पियायदन्तरश्रेणीवर्ण-
स्वरपदात्मिका उच्चरेदर्थमुद्दिश्य
मानसः सजपः स्मृतः तज्जपा-
नियमो नास्त्येव तथाच अशु-
चिर्वाशुचिर्वापि गच्छंस्तिष्ठन्स्वप-
न्नपि मंत्रैकशरणो विद्वान् मन-
सैव समभ्यसेत् नदोषो मान-
से जाप्ये सर्वदेशे ऽपि सर्वदा।
इति तंत्रसारः ॥
मानसतीर्थं क्ली रागादिहीनंमनः
यथा स्कान्दउवाच तीर्थानिकथि-
तान्येवं भौमानि शृणु सत्तम।
मानसानीह तीर्थानि फलदानि
विशेषतः मनो निर्म्मल तीर्थं हि
रागादिभिरनाविलं इति नार-
सिंहपुराणे ४९ अध्यायः ॥
मानसपूजा स्त्री मनोरचितद्रव्यक-
रणकसपर्य्या यथा हृत्पद्ममध्ये
देवीं विभाव्य कुंडली पात्र सं-
स्थेन सहस्रारामृतेनपाद्यं देव्या-
श्चरणे दद्यात् ततो मनस्त्वाऽर्घ्यं।
देवा सहस्रदलपद्मभृंगारललित
परमामृतजलेनाचमनीयं मुखे



पंचविंशति तत्त्वेन गंधंच अहिं
सांविज्ञानं तमोदयां अलोभं।
अमादं अमात्सर्य्यममायां अन
हंकारं अरागं अद्वेषं इंद्रियाणि।
द्वादश पत्राणि पुष्पाणिवप्रदाप
येत् ततस्तेजोरूपं दीपं वायु
रूपं धूपं दद्यात् अम्बरं चामरं
दर्पणं सूर्य्यचंद्रं छत्रं पमेत्व मे
खलां आनंदं हारसूत्रं अनाहू
त ध्वनिमयीं घंटांनिवेदयेत् त
तः सपारसाम्बुधिं मांसपर्वतं व
ल्माड पूरितं पायसं चदन्नं मनो
नर्त्तनसत्तालैः श्रृंगारादिरसोद्भ
वैः नृत्यैः गीतस्य वाद्यैस्य ।
तोषयेत् परमेश्वरीं एवं स पू
ज्य क्रमेदेन जपः कार्य्यः इति
तंत्रसारे त्रिपुरा प्रकरणं ॥
मानसे गुरु पूजा यथा ततोमा
नसगंधाद्यैः पूजयेत् स्वस्वमुद्रया
कनिष्ठापृथिवीतत्त्वं तयोगात् गंध
योजनं अंगुष्ठागगणं तत्त्वं ते
नैवपुष्पयोजनं तर्जनीवायुतत्त्वं
स्माद्धूपं तेनैव योजयेत् अना
माजलतत्त्वं स्यात्तेनैव योजयेच्चरुं
ततस्तु वाग्भवं जप्यात् दशोत्तरशतं
सुधीः जपं समर्प्य भक्त्या च प्र
णमेदंडवद्भुवि इति नील तंत्रे

अपिच मिथुनं चिंतयित्वा।
तमानसैरुपचारकैः मौलिकैः
पूजयेद्विद्वान् मुद्रामंत्रसमन्वितैः
भूम्याकाश मरुद्वह्नि वारि मंत्रैः
सबिंदुकैः कनिष्ठांगुलितर्जन्यो
मध्यमानामिकेतथा अंगुष्ठेन स
मायोगान्मुद्राः पंच प्रकीर्त्तिताः
पृथिव्यात्मकं गंधः स्यादाकाशा
त्मकपुष्पकं धूपो वाय्वात्मकः प्रो
क्तोदीपोवह्न्यात्मकः परः रसात्म
कं च नैवेद्यं पूजापंचोपचारिका।
ततस्तु वाग्भवं जप्यादृशोत्तरश
तं सुधीः इत्यत्रदाकल्पः अन्यच्च
मानसे रूपसारेश्च संपूज्य कल्प
येत्सुदा गंधंभूम्यात्मकं दद्यात्
वपुष्पं ततःपरं धूपं वाय्वात्म।
कं देयं तेजसादीपमेवच नै
वेद्यममृतं दद्यात् पानीयवरुणा
त्मकं अम्बरं स्वकुरं दद्यार्द्धमेखल
त्रमेवच ततन्मुद्राविधानेन सं
पूज्यात्मगुरुंजपेत् यथाशक्ति
जपंकृत्वा समाप्यकंवचं पठेत्
इतिकंकालमालिनीतंत्रं ॥
पूजाक्रमस्तु निजगुरुध्यानात्मा।
कानंदनाथामुकशक्त्याम्बाश्रीपादु
कांपूजयामीति मानसैर्गंधाद्यैस्तत
उत्सुष्टे रखयेत् कनिष्ठाभ्यां सं

कौर्म्मे ॥ अध्यायेप्यवं ।
मान्या स्त्री मरुन्मालायथा अति
मीन्या तमान्याच मरुन्मालाच मो
हना इतिशब्दमाला पूज्या च
माधन्यः पुं कामः इति हला
युधः ॥
माधनः पुं तलः इतिशब्द चंद्रि
का परिमाणे स्त्री ॥
मामकं त्रि मदीयं इतिमेदिनी
ममताप्युक्तः इति शब्दमाला
मामकः पुं मातुलः इतिमेदिनी
कृपणः इतिशब्दमाला ॥
मामकीनं त्रि मदीयं ममेदं मि
त्यर्थेनीने कृते स्वंकिंचसम्ब एक
त्वान्ममादेशो अस्यच ममकादेशा
द्वहोमामकीनं इतिदुर्गादासः।
मायः पुं पीताम्बरः असुरः इति
मेदिनी ॥
माया स्त्री इंद्रजालादिः तत्पर्य्या
यः शाम्बरी २ इत्यमरः माति
विश्वमस्यां मनीषादिः शंवरस्य
दैत्यस्येयं शांवरी तेन प्राड्न्ति
र्म्मित्वान् इतिभरतः ॥
बुद्धिः इति मेदिनी कृपा ।
दंभः इतिनानार्थे हेमचंद्रः ॥
शठता यथा मायात्वशठतापशा
हंकुतस्तनिर्मिकृतिस्त्वसा राज्ञ


स्वहोपायविशेषः यथा मायो
पेतेंद्रजालानि स्वहोपाया इमे
त्रयः लक्ष्मीः इतिच हेमचंद्रः।
बुद्धमाता इत्यमरकोषे मायारे।
वीसुत शाह दर्शनात् दुर्गायथा
दुर्गे शिवे ऽभये माये नारायणि
सनातनि जये मे मंगलं देहि
नमस्ते सर्वमंगले राजन् श्रीवच
नोमाश्चयाश्च शापणवाचकः नो
मापयतियासधः सामाया परिकी
र्त्तिता माश्चमोहार्थवचनो याश्च
प्रापणवाचनः तंप्रापयतिया नि
त्यं सामाया परिकीर्त्तिता इति
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखंडे २७
अध्यायः अपिच विचित्र कार्य्य
कारणा अचिंतित फलप्रदा स्व
प्नेंद्रजाल वल्लोके मायातेनप्रकी
र्त्तिता इति देवीपुराणे ४५ अ
ध्यायः विसदृश प्रतीति सा
धनं माया इतिनागोजीभट्टः
अघटन घटन पटीयसी इति
केचित् ईश्वरशक्तिः तस्या ना
मांतरं यथा प्रकृतिः २ अविद्या
अज्ञानं ४ प्रधानं ५ शक्तिः ६
अजा ७ सृष्टिकाले भगवानआदौ
मायां प्रकाशयमास साइहदृश्य
स्वसंस्थानरूपा कार्य्यकारणरूपाच

सत्त्वरजस्तमोगुणमयी तस्याः श
क्तिद्वयं आवरणं विक्षेपश्च तस्या
मायाया महत्तत्त्वं जातं तस्मादह
ङ्कारः तस्मात् पञ्चभूतं तस्मात्
ब्रह्माण्डं इति श्रीभागवतेमतं ॥
विष्णुमाया स्वरूपं य मनो।
भास्यसे देव मम मायेति निस्पृहाः
कामायाकीदृशी विष्णो किंवा मायं
ति वोच्यते तात सिच्छामि मा
यार्थं रहस्यं परमन्तमं ततस्तस्या।
वचः श्रुत्वा विष्णुर्मायाकारकः प्र
हस्य मधुरं वाक्यमुत्तस्वाच वसंयु।
तं भूमे मा पृच्छ मायांमे यन्मां
पृच्छसि सादरं वृथा लोपोऽस्ति मा।
र्थं त्वं प्राप्स्यसे मद्विलोकनात् अ
यापि मां न जानन्ति रुद्रेन्द्राः स
पितामहाः मम माया विशाला।
त्ति किं पुनस्त्वं वसुधेरे पर्जन्यो वर्षे।
ते यत्र तज्जलेनापूर्यन्ते दे
शा निर्जलता यान्ति एषा माया
मम प्रिये सोमोऽपि हीयते प
क्षे पक्षे वापि विवर्द्धते । अमा
यां स नष्टरूपेण माययं मम सुन्दरि।
हेमन्ते सलिलं कूप उष्णं भवति।
ग्रीष्मतः भवेच्च शीतलं ग्रीष्मे मा
येयं मम सत्त्वतः पश्चिमां दिश
मास्थाय यदस्तं याति भास्करः उ

देति पूर्वतः प्रातर्मायेयं मम सुन्द
रि शोणितं चैव शुक्रं च उभे प्रा
णिषु संस्थिते जायते जन्त।
मम मायैव चोत्तमा जीवविषय
गर्भेन स्वेदजः वा नि विदति जा
नश्च विस्मरेत सर्वमेषा माया नो।
मोत्तमा आत्मकर्माश्रितो जीवो
नष्टसत्त्वागतस्पृहः कर्मणानीय
ते यत्र मायैषा मम चोत्तमा शुक्र
शोणितसंयोगाज्जायते यदि जं
तवः अङ्गुल्यश्चरणौ चैव भुजौ
शीर्षं कटिस्तथा पृष्ठं तथोदरं चै
व दन्ता ओष्ठपुटं नासिका कर्णौ नेत्रे
कपोलौ च ललाटं जिह्वया सदा
एतया मायया युक्ता जायन्ते यदि जं
तवः तस्यैव जीर्यते जन्तो भुङ्क्तं
पीतं च वह्निना अयं च स्रवते जं
तोरेषा माया ममोत्तमा शब्दः स्पर्शो।
रूपं च रसो गन्धश्च पञ्चमः ॥
अत्र प्रवर्तते जन्तोरेषा माया मम
प्रिये सर्वदेहेषु निराकारः स्थावरे
जङ्गमे तथा न दृश्यते तस्या।
मायैषा मम सुन्दरि आपो दिव्या।
स्तथा भौमा आपो येषु प्रतिष्ठिताः
न च तेहिं प्रयान्त्यत्र मायैषा परमा
मम हेमन्तेस्वल्पदकाः सर्वे पल्वलानि
सरांसि च ग्रीष्मे सर्वाणि शुष्यन्ति

एतन्माया बलं मम हिमवच्छि।
खरोत्पन्ना नाम्ना मन्दाकिनी नदी।
गाङ्गनाम्ना भवेद्गङ्गा मायैषा मम की
र्तिता मेघा शक्नुवन्ति सलिलं च।
णात् सलिलार्णवात् वर्षन्ति मधु
रं लोके सर्वं मायाबलं मम रोगार्त्ता
जनाः केचिन्म्रियन्ते महौषधैः।
तस्य वीर्यं समाश्रित्य मायां न वि
सृजाम्यहं औषधे दीयमाने न जं
तुः पञ्चत्वमेति यत् निर्वीर्यं मौ
षधं कृत्वा कालो भवति हराम्यहं
प्रथमं जायते गर्भः पश्चाज्जाये
त वै पुमान् जायते मध्यमे रूपं
ततोऽपि जरया पुनः तत इन्द्रियना
शश्च एतन्मायाबलं मम एक
बीजात् प्रकीर्णो हि जायन्ते नाना भू
रिशः तथा मृतं विसृजामि माया
योगेन मायया वि लोक एवं विजा
नाति गरुडो वहतेऽमृतं भूत्वा वे
गेन गरुडो वहाम्यात्मानमात्मना
या एता देवताः सर्वा यज्ञभागे
न तोषिताः मायामेतां महत्कृत्वा
तोषयामि दिवौकसः लोकाः
सर्वे विजानन्ति देवा नित्यं मखाशि
नः माया मेता महं कृत्वा यस्या
मि त्रिदशान्सदा सर्वोऽपि यज ते
लोको यष्टारं च बृहस्पतिं माया

मांगिरसीं कृत्वा याजयामि दिवौक
सः सर्वे लोका विजानन्ति वरुणः या
ति सागरं मायां तु वारुणीं कृत्वा
हं रक्षामि महोदधिं सर्वे लो
का विजानन्ति कुबेरोऽयं धनेश्वरः
कुबेर मायामादाय अहं रक्षा
मि तद्धनं एवं लोका विजानन्ति।
इन्द्रः शक्रोऽस्त्विति नः शाक्रीं मायां
समास्थाय मया इन्द्रो निसूदितः
एवं लोका विजानन्ति आदित्यश्च
भवो महान् मेरुमायामयं कृत्वा
वहाम्यादित्यमेव च एवं वाभा
षते लोकोऽजस्रं किं न पश्यते ऽति
लं वडवा मुखमास्थायापि वा मि
तदहं जलं वायुं मायामयं कृत्वा
मेघेषु विसृजाम्यहं यदिदं भाव
ते लोकः कुत्रैवं तिष्ठते जलं।
देवा अपि न जानन्ति अमृतं कुत्र
तिष्ठति सौषधं वने लोकाः सर्वे
विजानाति राजा पालयते प्रजाः
राजमायामहं कृत्वा पालयामि
वसुन्धरां ये त्वेवे द्वादशादित्या
उद्दिष्टा ति युगान्तयोः प्रविश्य तान्
हं भूमे मायां लोके सृजाम्यहं।
वर्षे च पांशुना भूमि लोकेषु यत
ते सदा मायां पांशुमयीं कृत्वा पु
॥ ॥ ॥ ॥




याम्याखिलं जगत् वर्षतेयत्र सं
वर्त्तो याभिर्मेघलाकृति मायां
सांवर्त्तकी गृह्य पूर्यामयाखिलं ज
गत् यत्त्वपामि वराहेहे शेष
स्यापरिवारिणि अनंतमाययावाह
धारयामिस्वपामिव वराह मायां।
माहाय भूमेर्जानामि किन्नवै देवा
यत्र निलीयंते सामायाममकीर्त्ति
ता त्वांवापिवेत्सवीमायांकृतात्राना
सिकिन्नतत् याविनासि वसस्त्वाणि
वारान् शामदर्शीवत्व मायात्वमम
देवीयं कृत्वा ह्यकारिणं महो
ममायया बलं ह्येतद्यनतिष्टाम्य
हंजले प्रजापतिंशतरुद्रं स्व
नामिव हरामिव नेपिमायां न
जानंति ममामायया विमोहिताः
अद्य पितृगणाश्चेव यपतस्त्वथ्वैव
र्षयः मायां पितृमयीं ल्येतां शका
मिहिव तत्वनः किंतमायैवस्य।
श्रोणिश्रस्यचव श्रुणुसुंदरिवासहे
मायाचक्रं यथ मायां स्तोत्रं।
शौनकउवाच शशिध्वजो महा
राजः स्तुत्वा मायांगतःकृतःका
वा मायास्तुतिस्तत्वरतन्वदिदा
मरं याव्रत् कथाविस्तकथावक्त
व्यासा विशुद्धये सूतउवाच श्र
णुध्वंमुनयःसर्वे मार्कंडेयाय पृच्छते

शुकः प्राह विशुद्धात्मामायास्त
व मनुत्तमं तत्स्तुणुष्व प्रवक्ष्यामि
यथाधीतं यथा श्रुतं सर्वकामप्रदं
नृणां पापताप विनाशनं शुक
उवाच भल्लाट नगरं त्यक्ता विष्णु
भक्तः शशिध्वजः आत्म संसार
मोक्षाय मायास्तवमलं जगौ।
शशिध्वजउवाच ॐ ह्रींकारासन
स्थां विशुद्धां ब्रह्मादीनांमातरं।
वेद बोध्यां तन्वीं स्वाहां भूत
तन्मात्र कृत्ताङ्गे वेद्यां वेद
गंधर्व सिद्धैः लोकातीतां है
तभातां समीडे भूतेभव्यां व्याम
सामासिकार्थैः नानारूपे देवा
तिर्य्यङ्मनुष्ये त्वामाधारांब्रह्मरूपां
नमामि यस्यां भासात्रिजगद्भाति।
भूते नैभान्येतत्तदभावे विधातुः
विहङ्गीनां कालकल्लोल लोलां
नालापांगी त्रिमसंसार दुर्गां।
पूर्णां प्राप्याहंतत्वभ्यां शरण्यां।
माघेमाघे मध्यतो या विभाति।
कालादैवं कर्म सोपाधयो ये
तस्यांतासां तां विशिष्टां नमा
मि भूमौ गंधो रसत्वाश्चप्रतिष्ठा
रूपंतेजस्येव वायोस्पर्शाने खे
शब्दो वै यच्चिदा भाति नाना ना
मायांतां विश्वरूपां नमामि।

सावित्री त्वं ब्रह्मरूपाभवानी भू
तेशस्य श्रीपतेः श्रीस्वरूपा शची
शक्रस्यापिनकेस्सरस्यपत्नी श्रेष्टा
भासिमाये जगत्सु ॥ बाल्ये
बालायुवती यौवनेत्वं वार्द्धके।
यास्थविरा कालकल्पा नानाकारे
र्योगयोगम्य धर्मो भक्ता वै त्वं
काम वन्या विभासि वेराण्या त्वं
वरदा लोक सिद्धा साक्षी यन्या
लोकमान्या सुकन्या चंडी दुर्गा
कालिका कालिकाख्या नाना देशे
रूप वेशा विभासि तवचरणं।
सरोजं देवि देवादि वंद्यं यदि
हृदय सरोजे भावयंतीह भक्त्या
शुक कृत मतिश्चहं हृत्सरोजे।
स्मरंति कृति युगकृद्ध्रे वा सं
कृतं धर्मसंपत् जनयति जगदा
घे सर्व सिद्धिंच तेषां माया
स्तवमिदं पुण्यं शुकदेवेन भा
षितं मार्कंडेयादय श्चापि सि
द्धिं लेभेशशिध्वजः कोकाम
खे तपस्तप्त्वा हरिं ध्यात्वा वना
तरे सुदर्शनेन निहतो वैकुंठ
शरणं ययौ इति कल्कि पुराणे
अनुभागवते भविष्ये मायास्तवा
कृतत्रिंशोध्यायः ॥
मायाकारः पुं ऐंद्रजालिकः बाजी

कर इति भाषा तत्पर्य्यायः
प्रातिहारिकः २ इत्यमरः मा
यांस्थलजलादौ जलस्थलादि ज्ञा
नं करोतीति मायाकारः यथा
प्रतिहरणं प्रतिहारो व्याजः भा
वे घञ स प्रयोजनमस्य प्राति
हारिकः लिकः णिनेश्चिरिति ठहिः
प्रतिहारक इत्यपिपाठः तत्र
प्रति प्रथमं स्पष्टमनोनयनेच ह
रति ज्ञातेन किंचिदिति प्रति
हारकः एकांतात्स्वार्थेले प्राति
हारकश्च वनिप्रतिहारश्च इति
तट्टीकायांभरतः ॥
मायाकृत् पुं मायाकारः यथा
शाम्बरी साम्बरी माया मायाकृत्व
भिक्षकेनटे इतिशब्दरत्नावली।
मायाजीवे पुं प्रातिहारिकः इति
हेमचंद्रः ॥
मायारः पुं कुंभीरः इतित्रिकांड
शेषः ॥
मायातिः पुं नरवलिः यथा
मायातीनांच निर्णीतं कथ्यतां मु
निसत्तम वक्ष्याम्यथर्व वेदोक्तं
फलहानिर्व्यतिक्रमे पितृमातृ
विहीनंच युवकं व्याधि वर्जितं
विवाहितं दीक्षितंचपरदार विहीं
नकं अजारिकं विशुद्धंच सत्




ग्रहं मूलकं वा तद्दंशभ्यो यत्नं
दत्त्वा क्रीतमूल्यातिरेकतः स्वा
पयित्वा च तं यमीसंपूज्य वस्त्रं चं
दनैः माल्यैः धूपैश्च सिन्दूरै ।
र्दधि गोरोचनादिभिः तं च वर्षं
भ्रामयित्वा चरहारेण यत्नतः
वर्षान्ते च समुत्सृज्य ब्राह्मणाय तं निवेद
येत् ग्रहमीन वमीसंख्यो दद्या
न्मायातिमेव च इत्येवं कथितं
सर्वं वलिदान प्रसंगतः वलिं
दत्त्वा च स्तुत्वा च प्रत्वा चक चकबुधः
प्रणम्य दंडवद्भूमौ दद्याद्विप्राय ।
दक्षिणां इति ब्रह्मवैवर्त्ते प्रकृति
खंडे ६९ अध्यायः ॥
मायादेवी सुतः पुं बुद्धः इत्यमरः
मायाफलं क्ली फलविशेषः मा
इफल इति भाषा तत्पर्य्यायः
मायिफलं २ मायिकं ३ छिद्राफलं
४ मायि ५ अस्य गुणाः धात ।
हरत्वं कटुत्वं उष्णत्वं शैथिल्य
संकोचक केशकार्ष्ण्य दातृत्वं च
इति राजनिर्घण्टः ॥
माया वती रतिः कामपत्नी
इति जटाधरः तस्या नामकारणं
यथा श्रीपराशर उवाच पतसि
न्नंतरे प्राप्तः सहस्रेन नारदः
प्रांतः पुरचारी देवीरुक्मिणीं प्राह

हर्षयन् पञ्चतेतनयः सद्य हत्वा
शंवर मागतः हत्वो यत्नाभवद्वालो
भवत्याः सूतिका गृहात् ।
इयं मायावती भार्य्या तनयस्या
स्यते सती शम्बरस्यत भार्य्ययं ।
श्रूयतां मत्र कारणं मन्मथेत ग
तेनाग्नौ तद्रूपधरायणा शम्बरं ।
मोहयामास मायारूपेण रूपिणी
व्यवायादुपभोगेषु रूपं माया
मयं शुभं दर्शयामास दैत्यस्या
तस्येयं मदिरेक्षणा इति विष्णु
पुराणे ५ अंशे २७ अध्यायः
मायावसिकः त्रि परप्रतारकः
इति शब्दमाला ॥
मायावान् पुं कंसराजः इति शब्द
रत्नावली मायायुक्ते त्रि
मायावी पुं मायाकारः तत्पर्य्या
यः अंसकः २ मायी ३ मायिकः
ऐन्द्रजालिकः ५ इति जटाधरः ।
बिडालः इति राजनिर्घण्टः ।
मायामोहः पुं विष्णुदेहनिर्गता
सुरमोहक पुरुषविशेषः यथा
श्रीपराशर उवाच इत्युक्तो भ
गवां स्तेभ्यो मोहं शरीरतः
तमुत्पाद्य ददौ विष्णुः
प्राहचेदं सुरोत्तमान् श्रीभगवा
नुवाच मायामोहो ऽयं सवि

लान् दैत्यांस्तान् मोह यिष्यति
ततोवध्याभविष्यंति वेदमार्ग व
हिष्कृताः स्थितो स्थितस्य मेवा
ध्यायावंतः परिपंथिनः ब्रह्मणो
ऽप्यधिकारस्य देव दैत्यादिकाः
सुराः तद्गच्छत न भीः कार्य्या
मायामोहो ऽयमग्रतः गच्छन्त्व
द्योपकाराय भवतां भविता सु
राः श्रीपराशर उवाच इत्यु
क्ता प्रणिपत्यैनं ययुर्देवा यथा ग
तं मायामोहोपि तैः सार्द्धं
ययौ यत्र महासुराः इति विष्णु
पुराणे ३ अंशे १७ अध्यायः
मायासीता स्त्री योगेन अग्निकृत
सीताप्रतिकृतिः यथा अग्निरु
वाच भगवन् श्रूयतां वाक्यं काले
न यदुपस्थितं सीताहरणकालो
ऽयं तत्रैव समुपस्थितः दैवं च
दुर्निवारं च न च दैवात्परं बलं
मत्प्रसूं मयि संन्यस्य छाया रक्षां
तिके ऽधुना दास्यामि सीतां त
भ्यं च परीक्षा समये मम दैवैः
प्रस्थापितो ऽहं न च विप्रो हुता
शनः राम स्तद्वचनं श्रुत्वान प्रका
श्य च लक्ष्मणं स्वीचकार व स्वच्छंद
हृदयेन विहृयता वह्नियोगेन सी
ताया मायासीतां चकार सः

तद्रूप गुणसर्वांगां ददौ रामाय
नारद सीतां गृहीत्वा स ययौ
गोप्यं वक्तुं निषिध्य च लक्ष्मणा
नैव बुबुधे गोप्यं मन्यस्य का कथा
लंकागमारघुश्रेष्ठो जघान शा
पकेनच सवांधवं रावणं च सीतां
संप्राप दुःखितां तां च वह्नि
परीक्षां च कारयामास सत्वरं ।
हुताशस्तत्र कालेच वास्तवीं जान
कीं ददौ उवाच छाया वह्निं च
रामं च विनयान्विता करिष्यामीति
किमहं तदुपायं वदस्व मे वह्नि
रुवाच त्वं गच्छ तपसे देवि पु
ष्करं च सुपुण्यदं कृत्वा तपस्यां
तत्रैव स्वर्गलक्ष्मी र्भविष्यसि सा
च तद्वचनं श्रुत्वा प्रतप्य पुष्करे तपः
दिव्यं त्रिलक्ष वर्षं च स्वर्गलक्ष्मी
र्बभूव ह साच कालेन तपसा ।
यज्ञ कुंडसमुद्भवा कामिनी पां
डवानां च द्रौपदी द्रुपदात्मजा ।
कृते युगे वेदवती कुशध्वजसुता
शुभा त्रेतायां रामपत्नी सा सी
तेति जनकात्मज तच्छाया द्रौप
दी देवी द्वापरे द्रुपदात्मजा ।
त्रिहायणीति सा प्रोक्ता विद्यमाना
युगत्रये इति ब्रह्मवैवर्त्ते प्रकृति
खंडे १२ अध्यायः ॥



मायास्वनः पुं वुद्धः इति हेम
चंद्रः ॥
मायिकं क्ली मायाफलं इति राज
निर्घंटः ग्रंथांतरे मायिका माइ
का इत्यपि पाठः ॥
मायिकः पुं मायाकारः इतिजटा
धरः ॥
मायी पुं मायाकारः तत्पर्यायः
धूर्त्तः २ वंचकः ३ व्यंसकः ४ उ
हूकः ५ दांडाजिनिकः ६ जालि
कः ७ इति हेमचंद्रः ।
मायुः पुं पित्तं इत्यमरः ॥
मायुराजः पुं कुवेरपुत्रः इति
त्रिकांडशेषः ॥
मायूरं क्ली मयूरसमूहः इत्यमरः
तत्संवेधिनि त्रि ॥
मायूरिकः पुं मयूरग्राही इति
सिद्धांतकौमुदी ॥
मायूरी स्त्री अजलोरा इतिराज
निर्घंटः ॥
मारः पुं मृतिः काम देवः
विघ्नः इति मेदिनी मारणं
इति हेमचंद्रः धुस्तूरः इति
शब्दचंद्रिका मारगणोत पति
र्यथा मार्कंडेय उवाच मनोभव
स्य वचनं श्रुत्वाथ चतुराननः क्षि
त्वापि नहाक्यं श्रुत्वानुत्साह का

एकं सर्वस्य मोहने ब्रह्मा विना
विष्णो ऽभवन्नाद्धि समर्थो मोहित
मिति निश्वासमङ्गसंभ्रमः निश्वास
मारुतात्तस्य नानारूपा महावलाः
जाताः गणालोलजिह्वालोलाश्वाति
भयंकराः तुरंगवदनाः केचित्
केचिद्गजमुखास्तथा सिंहव्याघ्र
मुखाश्चान्येश्ववराह खरा ननाः
ऋक्षमार्जार वदनाः शरभास्याः
शुकाननाः लवगोमायवक्राश्च
सरी सृप मुखाः परे गोरूपा गो
मुखाः केचित्तथा पक्षिमुखा परे
महादीर्घा महाह्रस्वामहास्थूलामा
हाकृशाः पिंगाक्षा विरलाक्षाश्च
अनेकाक्षा महोदराः एककर्णा
स्त्रिकर्णाश्च चतुष्कर्णास्तथापरे ।
स्थूलकर्णादीर्घकर्णावहुकर्णा ।
विकर्णकाः दीर्घोक्षा स्थूलनेत्राश्च
सूक्ष्मनेत्रा विहस्तकाः चतुष्पादाःपंचपा
दास्त्रिपादैकपदास्तथा ऊर्ध्वपादारी
र्घपादा स्थूलपादा महापदाः एकह
स्ताश्चतुर्हस्ता द्विहस्ताश्त्रिशयास्त
था विहस्ताश्च विरूपास्तागोपिकाकृत
यः परे मनुष्याकृतयः केचित् ।
शिशुमारमुखाः परे क्रौंचाकारा ।
वकाकारा हंससारसरूपिणः त
थैवमद्गुर वककंककाकमुखास्त

पृथिव्यात्मकं गंधं समर्पयामिन
मः अंगुष्ठाभ्यां हं आकाशात्मकं
पुष्पंसमर्पया मिनमः तर्ज्जनी
भ्यां यं वाय्वात्मकं धूपंसमर्पया
मिनमः मध्यमाभ्यां वं वह्न्या
त्मकं दीपं समर्पयामिनमः अ
नामिकाभ्यां वं अमृतात्मकं नै
वेद्यं समर्पयामिनमः इति ऊ
त्तमूलावतार कल्पसूत्रटीकायां
तृतीयकांडे ॥
मानसव्रतं क्ली अहिंसादि यथा
अहिंसा सत्य मस्तेयं ब्रह्मचर्य्य
मकल्पता एतानि मानसान्याहु
र्व्रतानि च धराधरे इति वराह ।
पुराणं ॥
मानसालयः पुं हंसः इतिराज
निर्घंटः ॥
मानसूत्रं क्ली स्वर्णादिनिर्मित
कसूत्रं गोट् इतिभाषा इतियथंज
यः मानसिकं त्रि मनोभवं मान
सशब्दात्स्निकप्रत्ययेन निष्पन्नं
मानसी स्त्री विद्यादेवीविशेषः
इति हेमचंद्रः मनो भवाच ।
मानसौकाः पुं हंसः इत्यमरः
मानिका स्त्री मद्यं इति रत्ना
वली शरावः शेर इति भाषा
इति वैद्यकपरिभाषा ॥

मानिनी स्त्री फलीवृक्षः इति मे
दिनी मानवतीच ॥
मानी त्रि मानविशिष्टः इतिमेदि
नी सिंहः इति राजनिर्घंटः ।
मानुषः पुं मनुष्यः इत्यमरः
मानुषिकं त्रि मनुष्यस्यकर्मादि ।
मनुष्यस्येदमितीदमर्थेस्निकप्रत्य
येननिष्पन्नं ॥
मानुषी स्त्री मनुष्यस्त्रीजातिः य
थामनुष्यीमानुषी नारीमानवीमा
नुषास्त्रियां इतिशब्दरत्नावली चि
कित्साविशेषः यथा आसुरी
मानुषीदैवी चिकित्सा त्रिधा
मता इति शब्द चंद्रिका ।
मानुष्यं क्ली मनुष्यस्वभावः मनु
ष्यत्वं मनुष्यशरीरं यथा मानुष्ये
कदलीस्तंभे निःसारेसारमार्गणं
यः करोति ससंमूढो जलवुद्बुद
सन्निभे इतिशुद्धितत्त्वे याज्ञ व
ल्क्यवचनं ॥
मानुष्यकं क्ली मनुष्यसमूहः इत्य
मरः ॥
मानोज्ञकं क्ली मनोज्ञता मनो
ज्ञस्य भाव इत्यर्थे कञ् प्रत्यये
न निष्पन्नं ॥
मान्द्यं क्ली रोगः इतिहेमचंद्रः
मंदताच ॥

मांधाता पुं युवनाश्वराज पुत्रः तत्पर्य्यायः युवनाश्वजः २ इति हेमचंद्रः तद्विवरणं यथा तस्मात् प्रसेनजित् ततोयुवनाश्वोऽभवत् तस्यच पुत्रस्याति निर्वेदान्मुनीनामाश्रममंडले निवसतः कृपालुभि स्तै र्मुनिभि स्तत्पुत्रोत्पादनायेष्टिः कृता तस्यां वार्द्ध रात्रे निवृत्तायां मंत्र पूत जलपूर्णकलसं वेदीमध्ये निवेश्यते मुनयः सुषुपुः सुप्तेषु च तेष्वतीव तृट् परीतः स भूपाल स्तमाश्रम मंडलं विवेश सुप्तेषु च तान्नृषीन्नैवोत्थापयामास तच्च कलसजलमपरिमेयमाहात्म्यं मंत्रपूतं पपौ प्रबुद्धाश्च ऋषयः पप्रच्छुः केनैतन्मंत्र पूतं वारि पीतं अत्र हि पीते राज्ञोऽस्य युवनाश्वस्य पत्नीमहाबल पराक्रमं पुत्रं जनयिष्यति इत्याकर्ण्यसराजा अज्ञानतामया पीतमित्याह गर्भश्च युवनाश्वोदरेऽभवत् क्रमेणाच ववृधे प्राप्त। तसमयश्च दक्षिणं कुक्षिमवनीपते र्निर्भिद्यनिश्चक्राम नचासौ राजा ममार जातो नामैष कं धास्यतीतितं मुनयः प्रोचुः अथागत्यदेवराडब्रवीत् मामयं धास्यति ततोसौ मांधाता नामतोऽभवत् वक्रेचास्यप्रदेशिनी देवेंद्रेणन्यस्ता तां पपौ तांचामृत स्राविणी मास्वाद्याह्नैवैकेन व्यवर्द्धत सतु मांधाता चक्रवर्त्ती सप्तद्वीपां महीं बुभुजे भवति चात्र श्लोकः यावत्सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्र मुच्यते। मांधाता शशबिंदो र्दुहितरं बिंदुमतीमुपयेमे पुरुकुत्स मम्बरीषं मुचुकुंदंच तस्यां पुत्र मुत्पादयामास पंचाशच्च दुहि तर स्तस्या मेव तस्मात्पत्ने र्बभूवुः। इति विष्णुपुराणे ४ अंशे २ अध्यायः ॥

मान्यः त्रि अर्ह्यः तत्पर्य्यायः पूज्यः २ प्रतीक्ष्यः ३ भगवान् ४ भट्टारकः ५ इति जटाधरः।

मान्यस्थानं स्त्री. पूज्यत्वकारणं। यथा वित्तं बंधुर्वयः कर्म विद्याभवति पंचमी एतानि मान्यस्थानानि गरीयो यद्यदुत्तरं पंचानां त्रिषु वर्णेषु भूयांसि गुणवंतिच यत्रस्युः सोत्र मानार्हः शूद्रोपि दशमीं गतः इति मानवे २ अध्यायः।

घा अर्द्धनीला अर्द्धरक्ताकपिलाः पिंगला स्तथा नीलाः शुक्लास्तथा पीता हरिता श्चित्ररूपिणः अवादयंतते शंखान् पटहानपरिवादिनः मृदंगान् डिंडिमांश्चैव गोमुखान् पणवांस्तथा सर्वपत्राभिः। पिंगाभि स्तुंगाभिश्चकराचिताः। निरंतराभिविप्रेंद्रागणाः स्पंदन। गामिनः शूलहस्ताः पाशहस्ताः खड्गहस्ता धनुर्धरा शक्त्यंकुशगदाबाणपट्टिस प्रासपाणयः नानायुधामहानादं कुर्वंतस्तेमहाबलाः मारयच्छेदयेत्युच्चुर्ब्रह्माणं पुरस्तो गणाः तेषांतद्वदतांतत्रमारय छेदयेत्युत योगनिद्रा प्रभावात् स विधिर्वक्तुं प्रचक्रमे अथ ब्रह्माणमाभाषमाणान् दृष्ट्वा मदनो गणान् उवाचवारयन् वक्तुं गणानामग्रतः स्मरः। मदन उवाच किं कर्म्मैते करिष्यंति कुत्रस्थास्यंति वा विधे किंनामधेयायतेषां तत्रैतान् विनियोजय निरूप्यैतान् निजे कृत्येस्थानं दत्वाच नामच कृत्वा पश्चान्महामायाप्रभावंकथयस्वमे मार्कंडेय उवाच अथ तद्वाक्यमाकर्ण्यसर्वलोकपितामहः गणान् मदनानाह तेषां कर्मादिकं दिशन् ब्रह्मोवाच यतेतत्पन्न मात्रा हि मारयेति यदब्रुवन् मुहुर्मुहुरतोऽमीषां नाम मारेति जायतां मारात्मकत्वाद्यथैते माराः संतुच नामतः सदैव विघ्नं जतूनां करिष्यंति विनार्चनं तवानुगमनं कर्मसुखमेषां मनो भव यत्र यत्र भवान्याता स्वकर्म्मार्थं। यदा यदा गंतारस्तत्र तत्रैते साहाय्याय तदा तदा चिंताकुर्वंति। करिष्यंति त्वदस्त्र वशवर्त्तिनां ज्ञानिनां ज्ञानमार्गे च विघ्नयिष्यंति सर्वदा यथा सांसारिकं कर्म सर्वे कुर्वंति जंतवः तथा चैते करिष्यंति सविघ्नमपि सर्वतः इमेस्थास्यंति सर्वत्र वेगिनः कामरूपिणः त्वमेवैषां गणाध्यक्षः पंचयज्ञांग भोगिनः नित्य क्रियावतां तोय भोगिनोपि भवंत्विमे इति कालिकापुराणे ९। अध्यायः ॥

मारकः पुं मरकः तत्पर्य्यायः मारिः ३ उत्पातः ४ इति त्रिकांडशेषः पक्षिविशेषः बाज इति भाषा तत्पर्य्यायः चातिपक्षी २ ग्राहकः ३ इतिभूरि प्रयोगः मारणकर्तरि त्रि ॥

मारजित् पुं बुद्धः इत्यमरः ॥
मारणं क्ली वधः इत्यमरः अभि
चारविशेषः यथा एवंतु मारणं
देवि विशेषात्कथयामि ते सा
ते वह्नि समायुक्तं वामनेत्रविभू
षितं कूर्चयुग्मं ततोदेवि अप्र
कं मारय मारय चतुर्दशाक्षरो ।
मंत्रो स्वाहान्तः शत्रुनाशकः खदि
रांगार मादाय कृत्वाष्टम्यां विशे
षतः लेखयेत् पुत्तलीशत्रुस्व रू
पां लौह पत्रके निशायां मस्त
के नेत्रे ललाटे हृदये करो नाभौ
गुह्ये कटौ पृष्ठे कर्माकेनपदहृदये
मंत्रवर्णान् समालिख्य प्रतिष्ठां
तत्र कारयेत् संहारमुद्रावघा त
ध्यायेद्देवीं जयप्रदां दीर्घां का
रां हृत्स्वर्णां सदार्हस्तनमस्तको
त्तमुंडयुगलं हस्तद्वयं तीदिगम्ब
रीं शत्रुनाशकरीं देवीं ध्यायेत्शत्रु
शान्तयेच एवं ध्यात्वा ह्निकाचूर्णैर्वा
महस्तेन शंकरि ओं शत्रुनाशकर्यै
नमः इति दत्वा महेश्वरि हरिद्रा
चूर्णसहितांधारां दद्यादनेन तु
अमुकस्य शोणितं पिब पिबेति
तस्यं मांसंखादयखादय क्रीं
नमइतिमंत्रं मध्याह्ने मध्यरात्रौ
तु पूजयित्वाशतनाष्टकं जपेदेका ।
दशाहेचयोगः स्यान्नात्रसंशयः ।
दंडाधिकेकविंशाहे मृत्युरेव रि
पो र्भवेत् अथवान्य प्रका
रेण शत्रुघाय महे वदेपुंगोश
कृत् समादाय पूजयेदुत्तरारिणा
विपरीत क्रमेणैव जप पूजादिकं
चरेत् महादेवायनम इति पुं
गोशकृत् समाहरेत् शिवायनम
इति मंत्रेण चटनेच समाचरेत्
पशुपतये नम इतिप्राणान्संस्था
पयेत्ततः लौहपात्रे महे शानि
खदिरांगार योगतः शत्रु प्रति
कृतं लिख्यतत्र संस्थापयेत् शिवं
ततो ध्यायेन्महारुद्रं ध्यानेन तु
समाहितः शत्रोर्वक्षःस्थितं रुद्रं
ज्वलदग्नि समप्रभं वामहस्तपरं
केश दक्षिणं प्राणकर्षणं तरच
मीमांसं देवं महाज्वालादि वेष्टि
तं पिनाकधृक् इहागच्छागच्छ इ
त्यादिनावाहयत्ततः शूलपाणये
नम इति स्थापयेत् स्थायकोत्नमः ।
महेश्वराय नम इतिपाद्यादिना ।
प्रपूजयेत् ईशानादिक्रमा मूर्ति
कीलकमेण प्रपूजयेत् अग्निकोणा
दि पर्यन्ते पूर्वदिग्मा महेश्वरि
नमः शिवायेति मूलमष्टाविंशति ।
संजपेत् ॐ हमस्वेति वामेन ।

करेण तु विसर्जयेत् अजित
केशव विष्णो हरेसत्यजनार्दन
हंसनारायण स्वाहा मंत्रमेव स
कृज्जपेत् ॐनमो भगवते वा
सुदेवाय स्वाहा नम इत्यपि सकृ
ज्जपेत् एवमेकादशाहेन शत्रु
च्चाटन मंजसा अवश्यं जायते
देवि सत्यं सत्यं त्रिलोचने ।
इति योगिनीतंत्रे पूर्वखंडे ष
टलः ॥ अपिच अश्वास्थिं च
गवास्थिं च सूत्रनिर्माल्य मेवच
अरेर्यो निखनेत् द्वारे पंचत्व मु
पयाति सः इतिगारुडे १८९
अध्यायः ॥
मारिः स्त्रीमारणं वधः इतिमे
दिनी जनतयः ततपर्यायः
मारकः २ मरकः ३ उत्पातः ४
इति त्रिकांडशेषः ॥
मारिचिकं त्रि मरीचेनसंस्कृतं ।
इति सिद्धांतकौमुदी ॥
मारितः पुं नष्टीकृतः भस्मीकृतः
यथा असम्यङ्मारितंस्वर्णं बल
वीर्यंच नाशयेत् करोति रो
गान्मृत्युंच तद्धन्यात् यत्नतस्ततः
इति भावप्रकाशः अपिच ।
पूर्ववंग समं ताले द्विमासेन
विमर्द्दयेत् ततोजगपुटे पक्का
पुनरम्लेन मर्द्दयेत् तालेन दशा
मांशेन याम मेकं ततः पठेत
एवं दशपुटैः पक्कं वंगं भवति
मारितं अपरंच ॥ आद्दत्वंच ।
चेतनत्वंच तेजो गौरव चापलं य
स्यैतानिनदृश्यंते तं विद्यान्मृत
सूतकं अन्यच्च शुद्धोरसो भवे
न्मृत्वा मूर्च्छितस्तु जनार्दनः मारि
तोरुद्ररूपीस्यात् बद्धः साक्षात्
सदाशिवः इतिवैद्यदर्पणः ॥
मारिव्यसनवारकः पुं राजर्षिवि
शेषः यथा कुमारपाल श्चौलु
क्यो राजर्षिः परमार्हतः मृत स्व
मोक्षार्थमोक्ता मारिव्यसनवारकः ।
इति हेमचंद्रः ॥
मारिषः पुं नाट्योक्तौ श्रेष्ठः इत्य
मरः तंडुलीयशाकविशेषः म
रसा हिंदीभाषा तत् तर्या
यः कंथरः १ मार्षिकः २ अस्य
गुणाः मधुरत्वं शीतत्वं विष्टं
भित्वं पित्तनाशित्वं गुरुत्वंच ।
रक्तनाडादयश्चान्येतज्जातीयाश्च ।
तद्गुणाः इतिराजनिर्घंटः ।
मारिषा स्त्री दक्षमाता इतिमे
दिनी ॥
मारी स्त्री चंडी जनतयः इति
मेदिनी माहेश्वरीशक्तिः यथा


मारी विशूलेन जघान चान्यान्
खट्वाङ्गपाणिस्त्वपवांश्च कौशिकी ।
इति वामने ५२ अध्यायः ।
मारीचः पुं राक्षसविशेषः स च
ताडकाराक्षसीपुत्रः रावणस्यानु
चरः सीताहरणकाले मायामृग
रूपोऽसौ श्रीरामेण हतश्च ।
इति रामायणं अस्य विवरणं ।
यथा एतस्मिन्नन्तरे रामो ददर्श क
नकं मृगं सीतायै प्रेरयामास ॥
तदर्थे यत्नपूर्वकं संन्यस्य लक्ष्मणं
रामो जानक्या रक्षणे वने स्वयं
जगाम तूर्णं तं विव्याध शायकेन व
हालक्ष्मणेति प्राह बहुलायाथमा
यथा मृगः प्राणांस्तत्याज सहसा
पुरो दृष्ट्वा हरिं स्मरन् मृगदे ।
हं परित्यज्य दिव्यं देहं विधाय
च रत्ननिर्म्माणयानेन वैकुण्ठं स
जगाम ह वैकुण्ठे हरेर्द्वार्य्या
सीत् किंकरो द्वारपालयोः ज
यश्च विजयश्चैव बलवांश्चाजिता
त्मनः शापेन शनकादीनां सं
प्राप्य राक्षसीं तनुं पुनर्जगाम ।
बहारमारी च द्वारपालयोः ।
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १२
अध्यायः कश्यपः यथा इति
संचिन्त्य भगवान् मारीचः कु

रुनन्दन उवाच किंचित् अपि त
आत्मानं च विगर्हयन् इति श्री
भागवते ६ स्कंधे १८ अध्यायः
कक्कोलके याजकशालिनः इति
मेदिनी राजहस्ती इति जटा
धरः ॥
मारीची स्त्री देवताभेदः इति
मेदिनी सा तु मायादेवी तत्
पर्य्यायः त्रिमुखा २ वज्रकालिका
विकटा ४ वज्रवाराही ५ गौरी ६
पोत्रिरथा ७ इति त्रिकाण्डशेषः ।
मारुण्डः पुं सर्पाण्डः पंथाः
गोमयमण्डलं इति मेदिनी ।
मारुतः पुं वायुः इत्यमरः म्रिय
तेऽनेन ऊर्ध्वेन नाम्नीति मृङ्उत
मरुत्मरुदेव मारुतः स्वार्थेऽण्
इति तट्टीकायां भरतः ॥ अस्यो
त्पत्तिर्यथा कश्यप उवाच ।
पुत्रस्ते भविता भद्रे इन्द्रहा देव
बान्धवः संवत्सरं व्रतमिदं य
द्यञ्जो धारयिष्यसि अंजो यथा
वत् संवत्सरं पुंसवनं व्रत
मेतदविप्लुतं धारयिष्यसि ते त
स्यां पाकहा भविता सुतः वाढ
मित्यभ्युपेत्याथ दिती राजन् म
हामनाः कश्यपाद्गर्भमाधत्त ।
अन्तर्वत्नी दधार सा मातृस्व स

२

रभिप्राय मिंद्र आज्ञाय मानद
शुश्रूषणेनाश्रमस्था दितिं पर्य्यच
रत्कविः एवं तस्या व्रतस्थाया
व्रतच्छिद्रं हरिर्नृप प्रेप्सुः पर्य्य
चरत् जिह्मो मृगस्येव मृगहाकृतिः
नाध्यगच्छद्व्रतच्छिद्रं तत्परोऽथ
महीपते चिन्तां तीव्रां गतः
शक्रः केन मे स्याच्छिवं त्विह ए
कदा सा तु संध्यायामुच्छिष्टा व्रत
कर्षिता अस्पृष्टवार्य्यधौताङ्घ्रिः
सुष्वाप विधिमोहिता लब्ध्वा
तदन्तरं शक्रो निद्रापहृतचेतसः
दितेः प्रविष्ट उदरं योगेशो ॥
योगमायया चकर्त्त सप्तधा गर्भं
वज्रेण कनकप्रभं रुदन्तं सप्तधै
कैकं मारोदीरिति तान् पुनः
तमूचुः पाट्यमानास्ते सर्वे प्रा
ञ्जलयो नृप किं न इन्द्र जिघांसि
त्वसि भ्रातरो मरुतस्तव मा भैष्ट
भ्रातरो मह्यं यूयमित्याह कौशि
कः अनन्यभावान् पार्षदानात्मा
नो मरुतां गणान् न ममार दिते
र्गर्भः श्रीनिवासानुकम्पया स च
छिन्नः पञ्चाशद्देवास्ते मरुतो
ऽभवन् अपोह्य मातृदोषं ते
हरिणा सोमपाः कृताः दितिरु
त्थाय ददृशे कुमारानतलप्रभान्

इन्द्रेण सहितान् देवी पर्य्यतुष्यद
निन्दिता अथेन्द्रमाह तातह
मादित्यानां भयावहं अपत्य
मिच्छन्त्यचरं व्रतमेतत्सुदुष्करं
एकः संकल्पितः पुत्रः सप्त सप्ता
भवन् कथं यदि ते विदितं पुत्र
सत्यं कथय मा मृषा इन्द्र उवाच ।
अम्ब तेऽहं व्यवसितमुपधार्य्याग
तोऽन्तिकं लब्धान्तरोऽच्छिनं ।
गर्भमर्थे बुद्धिर्न धर्म्मदर्शिनो
मे सप्तधा गर्भ आसन्नतः कुमारकाः
ते पि चैकैकशो वृक्णाः सप्तधा
नापि मम्रिरे ततस्तत् परमा ।
श्चर्य्यं वीक्ष्य व्यवसितं मया
महापुरुष पूजायाः सिद्धिः का
प्यानुषङ्गिकी तदिदं मम दौ
र्जन्यं बालिशस्य महीयसि क्षन्त
मर्हसि मातस्त्वं दिष्ट्या गर्भो मृतो
त्थितः श्रीशुक उवाच इन्द्रस्तया
ऽभ्यनुज्ञातः शुद्धभावेन तुष्टया
मरुद्भिः सह तां नत्वा जगाम त्रि
दिवं प्रभुः इति श्रीभागवते ६
स्कंधे १८ अध्यायः ॥
मारुतव्रतं क्ली राजधर्म्मविशेषः
यथा प्रविश्य सर्वभूतानि यथा च
रति मारुतः तथा चारैः प्रवेष्टव्यं
व्रतमेतद्धि मारुतं ॥ इति




मात्स्ये २०० अध्यायः ॥
मारुतात्मजः पुं हनूमान् इति
जटाधरः ॥
मारुतापहः पुं वरुणवृक्षः इति
राजनिर्घण्टः वायुनाशके त्रि
मारुताशनः पुं सर्पः पवनाशन
इत्यमर दर्शनात् वायुमात्र
भक्षके त्रि ॥
मारुतिः पुं हनूमान् इति शब्द
रत्नावली भीमसेनः इति
जटाधरः ॥
मार्कण्डः पुं मार्कण्डेयमुनिः इति
शब्दरत्नावली ॥
मार्कण्डिका स्त्री लताविशेषः भू
इखखसा इति हिन्दीभाषा सात
काकरोलभेदः तत्पर्य्यायः
भूमिचरी २ मार्कण्डी ३ मृडरवा
नी ४ अस्या गुणाः [illegible]
यः कायशोधनत्वं विषदुर्गन्धका
सकुष्ठोदर नाशित्वञ्च इति भाव
प्रकाशः ॥
मार्कण्डीयं क्ली भूम्याहुल्यं इति
राजनिर्घण्टः ॥
मार्कण्डेयः पुं मृकण्डुमुनिपुत्रः ।
जन्मतिथ्यादौ पूजायां तस्य ध्या
नं यथा द्विभुजं जटिलं सौम्यं
सुवृद्धं चिरजीविनं मार्कण्डेया

नरो भक्त्या पूजयेच्च चिरायुषा ।
तस्य प्रार्थनामन्त्रः चिरजीवी यथा
त्वं भो भविष्यामि तथा मुने ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व
दा मार्कण्डेय महाभाग सप्तक
ल्पान्तजीवन आयुरिष्टार्थसिद्ध्य
र्थमस्माकं वरदो भव इति तिथ्या
दितत्त्वं तस्योत्पत्त्यादिर्यथा ।
मार्कण्डेय उवाच देवौ धातृ
विधातारौ भृगोः ख्यातिरसूयत ।
श्रियञ्च देवदेवस्य पत्नी नारायणस्य
या आयतिर्नियतिश्चैव मेरोः
कन्ये महात्मनः भार्य्ये धातृ वि
धात्रोस्ते तयोर्जातौ सुतावुभौ
प्राणश्चैव मृकण्डुश्च पिता मम महा
यशाः मनस्विन्यां महं तस्मात्पुत्रो
वेदशिरा मम धूम्रवत्यां समभ
वत् प्राणस्यापि निबोध मे इति
श्रीमार्कण्डेयपुराणे रुद्रसर्गाध्याः ।
यः अपिच पुलस्त्य उवाच अथ
ते सम्प्रवक्ष्यामि मार्कण्डोत्पत्तिं मु
त्तमां पुराकल्पे मुनिः पूर्वं मृकण्ड
र्नाम विश्रुतः भृगोः पुत्रो महा
भागः सभार्य्यस्तप्तवांस्तपः तस्य
पुत्रस्तदा जातो वयसस्तस्य वर्त्ततो ।
सपंचवर्षको जातो बालएव गुणा
न्वितः तानि तानि तदा दृष्टो भ्रमिता

लक्षणांगेन स्थित्वासत्सचिरंकालं
जीवनं च ततोदिनं वीक्ष्य चिन्ताप
रोऽत्ताभी किं वर्षो बालकस्तव दि
नं खण्डितं संख्यया षाण्मासिकानि
ज्ञातानीति न्यवेदयत् मृकण्डुनैवा
मुक्तस्तस्य तस्यानीवाक्यमब्रवीत् मास्म
मायुष्यपुत्रस्य तेऽवशिष्टं मनीश्वर ।
नैव शोकस्त्वया कार्य्यः सत्य मेत
दुदाहृतं एतत् श्रुत्वा वचो भीष्म
ज्ञातिनायदुदाहृतं ब्रतोपनयनं
तत्कृ बालकस्य पिता तदा आह
चैनं पिता पुत्रमृषिं त्वमभिवादय
एवमुक्तः सवैपित्रा ऋषिं भक्त्या
ननाम सः एतस्मिन्नन्तरे तत्र प्र
दीमाः पावकोपमाः मार्गेणापि ।
समायातास्तेन सप्तर्षयोऽमलाः ।
बालेन तेन दृष्टास्ते सर्वसमभिवा
दिताः आयुष्मान्भवते रुक्तः स
जहौ दंडमेखलां उक्ता स्तेवा ।
पुन र्वीक्ष्य पश्यन्तः दीर्घजीवि
तं दिनानि पंचतेचायुस्तस्याभी
तामवन्मुनः तमुत्क्षिप्य ब्राह्मणा
वेगतास्ते ब्रह्मलोकं निकं प्रतिष्ठ
च्यवनं बालं प्रणिपत्य पितामहं ।
आयुष्मान् भवइत्याह तेनब्रह्माभि
वादितः चिरायुर्ब्रह्मणा बालः प्रो
क्तः सऋषिसन्निधौ तत ते मुन

यः प्रीताः श्रुत्वा वाक्यं पितामहात्
पितामहस्तस्मऋषीन्दृष्ट्वा प्रोवाच
विस्मितान् कार्य्येण येनवायाताः
कोऽयं बालो निवेद्यतां । ततः
सप्तर्षयो राजन्सर्वं तस्मै न्यवेदयन्
भृगोः सुतमृकण्डुस्तस्याणायुस्तस्य
बालकः अल्पायुषस्ततस्तस्य वृद्धा
स्तेनास्यमेखला ॥ यज्ञोपवीतं
दंडं च दत्वा तेन प्रबोधितः ये कं
चित् पश्यसे लोकं भूमौ तं मतलो ।
त्वं तस्याभिवादनं कार्य्यमेव
माह पितामह तावत् द्वयमनेनाद्य
त्वितो हृष्टाः परिभ्रमन् एकस्त्वमार्ष
तीर्थे यत्रा प्रसंगेनदेव यागात्
पितामह चिरायुर्भवत्वै विप्र वा
लेत्यस्माभिरीरितं कथं चिरायुः ।
स्याद्विप्र बालकः सोऽप्यतं प्रभो ।
कथं तान्नितातेव भवामोऽभवता ।
वयं एवमुक्तस्तदा तैस्तु ब्रह्मालोक
पितामहः अनृतवाचो भविष्यामः
सर्वेएववयंस्थिताः मत्सम आ
युषा बालो मार्कण्डेयो भविष्यति
ऋषीणां सुख्यातस्त्वासौ मत्सहायो
भविष्यति कल्पस्यादौ तथावाते ।
हृतो मुनिभिरुक्तस्तं एवंते मुन
योबालं ब्रह्मालोक पितामहः स
म्प्रेषयामास भूयः स्वेव ।



पर्यंतं तीर्थयात्रां गत्वा विप्र मा
र्कंडेयो निजं गृहं जगाम गत्वा
तं विप्रं पितरं स तथाब्रवीत्।
इति पाद्मे सृष्टिखंडे २ अध्यायः
अथ२च व्यास उवाच।
मार्कंडेयेन मुनिना यथा मृत्युः प
राजितः तथा ते कथयिष्यामि शृ
णु वत्स महामते भृगोः पो
त्रो महाभागे बालत्वे च महायु
तिः वर्षपे बलभो बालः पिता
त्वस्य कृतक्रियः सत्वस्मिन्वै जात
मात्रे आदेशी कश्चिदब्रवीत् वर्षे
द्वादशमे पूर्णे मृत्युरस्य भविष्यति
श्रुत्वा तन्माता पितरौ दुःखितौ
तौ बभूवतुः तौ दृष्ट्वा दुःखसंपन्नौ
मार्कंडेयो महामतिः उवाच वच
नं तत्र किमर्थं दुःखमीदृशं वक्तु
मर्हसि दुःखस्य कारणं मम हृच्छतः
कथयामास तत्सर्वमादेशीय द्विवा
च हत तत् श्रुत्वा तौ मुनि प्राह
मातरं पितरं पुनः पित्रा सार्धं
त्वया मात्र न कार्यं दुःखमनर्हं प्र
यत्नेष्यामि मे मृत्युं तपसा नाशमे
यशः यथा चाहं चिरायुस्यां तथा
कर्ष्ये महं तपः सूत उवाच इ
त्युक्त्वा तौ समाश्वास्य पितरौ वनम
भ्यगात् तत्र विल्वं प्रतिष्ठाप्य ग
न्धपुष्पादिभिः क्रमात् पूजयामास
देवेशं मार्कंडेयो महामुनिः प्र
जपित्वा हरिं तत्र तपस्तेपे सुदुष्क
रं निराहारो मुनिस्तत्र वर्षमेकं।
मतेंद्रितः मा ग्रामे मरणे सन्निहिते
तत्र महामतिः स्नात्वा यथोक्तं वि
धिना कृत्वा तिलो स्तयार्द्रेन हरि
क्षेन्द्रियग्रामं विष्णुदेनांतरात्मना
आसन् स्वस्तिकं बद्धा कृत्वा सो
प्राणसंयमं ओंकारोच्चारणाद्धी।
मान्हृत्पद्मं विकाशयन् तन्मध्ये
रविसोमाग्निमंडलानि यथा क्रमं
कल्पयित्वा हरेः पीठं तस्मिन्नेवम
नानतं पीताम्बरधरं विष्णुं शंख
चक्रगदाधरं ब्रह्मरूपं हरिं ध्या
ये त्तन्मनुमुदीरयन् इत्येवं
ध्यायतस्तस्य मार्कंडेयस्य धीमतः
मनस्तत्रैव संलग्नं देव देव जगत्
पतौ ततो यमालयात्तत्र आग
ता यमकिंकराः पाशहस्तास्ते
तेन विष्णुदूतैस्तत्र हताः मुसलैः।
हन्यमाना ते दूरमुक्त्वा पुनः पुन
वयं निहता गत्वा मोमृत्युरेवाग
मिष्यति आगत्य स्वयमेवात्र मृत्यु
पार्श्वे महात्मनः मार्कंडेयस्य व
भ्राम विष्णुकिंकरशंकया तदा
मृत्युस्य मुशलाभ्यां विष्णु कि

कराः विष्णात्तया हनिष्यामो मृ
त्युमस्येति संस्थिताः ततो वि
त्वपितमना मार्कंडेयो महामतिः
तुष्टाव प्रणतो भूत्वा देवदेवं जना
र्दनं विष्णुनैवोपदिष्टेन स्तोत्रं
कर्णे महात्मनः स्वभाविते न मन
सा तेन तुष्टाव माधवं ॐ नमो भ
गवते वासुदेवाय नारायणं सह
स्राक्षं पद्मनाभं पुरातनं प्रणतो
ऽस्मि हृषीकेशं किं नो मृत्युः करि
ष्यति गोविंदं पुंडरीकाक्षं म
नंतमजमव्ययं केशवं च प्रपन्नो
स्मि किं नो मृत्युः करिष्यति वासु
देवं जगद्योनिं भानुमंतमतींद्रियं
दामोदरं प्रपन्नोस्मि किं मे मृत्युः
करिष्यति शंख चक्र धरं।
देवं छन्नरूपिणमव्ययं अधोक्ष
जं प्रपन्नोस्मि किं मे मृत्युः करि।
ष्यति वाराहं वामनं विष्णुं नार
सिंहं जनार्दनं माधवं च प्रपन्नो।
स्मि किं मे मृत्युः करिष्यति पुरु
षं पुष्करं बीजं लोमबीजं जगत्प
तिं लोकनाथं प्रपन्नोस्मि किं।
मे मृत्युः करिष्यति भूतात्मानं।
महात्मानं यज्ञयोनिमयोनिजं
विश्वरूपं प्रपन्नोस्मि किं मे मृत्युः
करिष्यति सहस्रशिरसं देवं व्य
क्ताव्यक्तं सनातनं महायोगं प्र
इत्युदीरितमाकर्ण्य स्तोत्रं ॥२
पन्नोस्मि किं मे मृत्युः करिष्यति ॥२
तत्र महात्मनः अपयातस्ततो २
मृत्युर्विष्णुदूतैश्च पीडितः इति
तेन जितो मृत्युर्मार्कंडेयेन धी
मता प्रसन्ने पुंडरीकाक्षे नृसिं
हे नास्ति दुर्लभं मृत्युष्टकमिदं
पुण्यं मृत्युप्रशमनं शुभं मार्कं
डेय हितार्थाय स्वयं विष्णुरुवाच
ह श्रीभगवानुवाच य इदं पठ
ते भक्त्या त्रिकाले नियतः शुचिः
नाकाले तस्य मृत्युः स्यान्नरस्य।
च्युतचेतसः व्यास उवाच हृत्
पद्ममध्ये पुरुषं पुराणं नाराय।
णं शाश्वतमादिदेवं संचिंत्य
सूर्यादपि राजमानो मृत्युं सयो
गी जितवांस्तदैव इति नार
सिंहपुराणे मार्कंडेय मृत्युंजयो
नाम ७ अध्यायः ॥

मार्ग क संस्कारे सर्पणे इति
कविकल्पद्रुमः क मार्गयति इ
ति दुर्गादासः ॥

मार्ग किं अन्वेषे इति कविक
ल्पद्रुमः अन्वेषः प्रतिसंधानं कि
मार्गयति मार्गति गुणं गुणी मार्गि
तो हे देहभावानित्यात्मनेपदं।

गणाकृता नित्यनात् इतिदुर्गा
दासः ॥
मार्गः पुं पंथाः इत्यमरः तत्त
परिमाणं यथा त्रिंशद्दंडाविवि
स्तीर्णो देशमार्गस्तु नेः कृतः
विंशद्दंडग्रीममार्गः सीमामार्गो
दशैवतु यद्वेषि दशाविस्तीर्णाः
श्रीमान्राजपथः कृतः स्वराजि
रथनागानामसम्बाधः ससंचरः
धनूंषि वैवचनाति शाखारथ्यास्तु
निर्मिताः त्रिकराद्याघरथ्यास्तु हि
कराष्षुपरत्तिका जंघापथस्तत्त
प्याद त्रिपादस्य गृहान्तरं व्रती
पाद स्वार्द्धपादः प्राग्वंशः पारकः
स्तुतः अवकरः परीवारः पाद
मात्रः समंततः श्राद्धकाले तु
श्राहती कर्त्तव्या अन्यथा नहि
इति देवीपुराणे त्रैलोक्याभ्युद
ये गोपुरद्वारलक्षणाध्यायः ॥
गुदं तत्पर्य्यायः पायुः २ तत्तु
कदः २ इतित्रिकांडशेषः अ
पानं ३ इत्यमरः मृगमदः ॥
मार्गशीर्षमासः अन्वेषणं इति
मेदिनी मृगशिरोनक्षत्रं इति
हेमचंद्रः विष्णुः इतितस्य सह
स्रनामस्तोत्रं ॥
मार्गकः पुं अग्रहायणमासः इति

शब्द माला ॥
मार्गणं क्ली अन्वेषणं तत्पर्य्यायः
सम्बीक्षणं २ विचयनं ३ मृगणा ४
मृगः ५ इत्यमरः याञ्चा इति
मेदिनी प्रणयः इति जटाधरः
याचकेपि इत्यमरः ॥
मार्गणः पुं शरः इत्यमरः याचकः
इति मेदिनी ॥
मार्गणकः पुं याचकः इतिहला
युधः ॥
मार्गधेनुः पुं योजनपरिमाणं इति
शब्दमाला ॥
मार्गधेनुकं क्ली योजनं इति त्रि
कांडशेषः ॥
मार्गशिरः पुं मार्गशीर्षमासः इ
तिशब्दरत्नावली ॥
मार्गशीर्षः पुं अग्रहायणमासः
मृगशीर्षेण युक्ता पौर्णमासी मार्ग
शीर्षी सास्मिन्मासे भवति
मार्गशीर्षः सः इत्यमरटीकायां
भरतः तत्पर्य्यायः सहाः २
मार्गः ३ आग्रहायणिकः ४ इत्य
मरः मार्गशिरः ५ सहः ६ इति
शब्दरत्नावली वृश्चिकस्थरविप्रार
ब्धशुक्लप्रतिपदादि दर्शान्तोऽयं
चान्द्रः पञ्चादशशुक्लचान्द्रमासी
यपौर्णमास्यन्तोऽयं गौणचान्द्रः ॥

वृश्चिकराशिरविको ऽयं सौरः
इतिस्मृतिः तत्रजात फलं
यस्यप्रसूतिः खलुमार्गमासे ती
र्थे प्रवासे सततं मतिः स्यात्
परोपकारी सुतसाधुवृत्तिः सद्वृत्ति
युक्तो ललनाभिलाषी इति को
ष्ठीप्रदीपः ॥ अथ मार्ग शीर्ष
कृत्यं आश्विनशुक्लपक्षे नवान्नश्रा
द्धाकरणेमार्गशीर्षस्यविंशति दंडा
धिकत्रयोविंशतिदिनाभ्यंतरे शुक्ल
पक्षे तत्श्राद्धकर्त्तव्यं तत्र मार्ग
शीर्षस्यविंशतिदंडाधिक प्रथमा
दिनत्रयेतरेषु ऊनशनिशुक्लबोन
देषुनंदा रिक्ता त्रयोदशीतरतिथिषु
जन्माष्टम चंद्रजन्मतिथिजन्मना
क्षत्रत्रय पंचमताराः त्रयेतरेषुपू
र्वात्रयमघा भरण्यश्लेषार्द्रेतरेषु
नक्षत्रेषुश्राद्धं नवान्नभोजनंवकु
र्य्यात् श्राद्धानधिकारिणात्साग्नि
कृकाले देवादिभ्योनवान्नंदत्वाभो
क्तव्यं किंतस्याश्लेषाकृत्तिकाज्येष्ठा
मूलापूर्वभाद्रपदकेऽपिनवान्नभो
जनं नकर्त्तव्यं चंद्रताराधृषद्धा
नीकारमाह देवलः कर्मकुर्य्यात्
फलावाप्त्यैचंद्रादि शोभने बुधः
ससकाले निरं सर्वं नानेःकाल
मपेक्षते चंद्रेचशांवे लवणं च

तारे तिथावभद्रेसितेतंदुलांश्च ।
धान्यंचरघात् करणेहि वारे योगे
तिलान् हेममणिंच लग्ने राजमा
षेडे ताराभेदाच्चलवणं परिमाणमाह
एकत्रिपंच सप्तच दिनायदघात
पलानिलवणस्याक्रमशोजन्मविप
त्प्रत्यरि मरणाख्यताराम पलंतो
लौकिकेमानेः साष्टत्रिंशन्माषा
क तोलकत्रितयं ज्ञेयं ज्योति
र्वैः स्मृतिसम्मतं तत्तएवं दध्या
ज्यसंयुक्तं नवविप्राभिमंत्रितं ।
मंत्रानादेशे गायत्रीति गायत्र्यभि
मंत्रितं नवमन्नं ब्राह्मणानुक्तो ।
गृहीत्वा प्राश्नीयात् नूतनधान्या
संभवे पुरातनेनापि श्राद्धं कर्त्त
व्यं वृश्चिके शुक्लपक्षेतदकरणे
हरिशयनात् पूर्वं मीनधनुस्थरवौ
नतत्र माचारो कर्त्तव्यं ॥
वृश्चिकस्थरवौ शुक्ल चतुर्दश्यां
सौभाग्यकामः पाषाणाकारपिष्टके
र्देवी पूजयेत् तदपिभक्षयेत्नक्तं ।
अग्रहायण्यां पौर्णमास्यां ।
पार्वण विधिना श्राद्धमावश्यकं ।
भविष्यपुराणे ॥ रोहिण्यां ।
प्रतिपद्युक्ता मार्गमासिसिते नरा
गंगायांयदिलभ्येत सूर्य्यग्रहसा
तेः समा इति कृत्यतत्त्वं ।



मार्गिकः त्रि मृगहन्ता पथिकः
इतिसिद्धान्तकौमुदी ॥
मार्गितं त्रि अन्वेषितं इत्यमरः
मार्ग्यं त्रि मार्जनीयं इतिसिद्धा
न्तकौमुदी अन्वेषणीयंच ।
मार्जि क मार्जने श्वनौ इति
कविकल्पद्रुमः क मार्जयति
इति दुर्गादासः ॥
मार्जः पुं विष्णुः इतिहेमचन्द्रः
रजकः इतिशब्दमाला मार्जनं
इत्यमरटीकायां भरतः ॥
मार्जनं क्ली प्रोञ्छनादिनाङ्ग
निर्मलीकरणं माजा इतिभाषा
तत्पर्यायः मार्ष्टिः २ मार्ष्टी ३ मा
र्जना ४ मृजा ५ इतिशब्दरत्नाव
ली मार्जः ६ मार्जा ७ इत्यमरटी
कायां भरतः स्नानकालेशरीर
मार्जनगुणाः दौर्गन्ध्यगौरवकं
ण्डूकच्छमलमरोचकं स्वेदबीभत्स
हन्ति शरीरपरिमार्जनं इ
ति राजवल्लभः देवीगृहमार्ज
नफलं यथा देव्यागृहन्तुयः शु
द्धसम्मार्जयति नित्यशः सभवे
द्बलवान् सौख्यः सर्वसम्पत्ति सं
युतः देव्यागृहन्तुयःशुद्धं गोम
येनानुलेपयेत् स्त्रियोवायदि वा
पुंसः षण्मासेन निरन्तरं मल

मेदीस्थितानकामान्देव्या लोके
वगच्छति इति देवीपुराणे ५२
अध्यायः अथ भगवन्मन्दिरमा
र्जनमाहात्म्यं नरसिंह गृहे
नित्यं यः संमार्जन माचरेत् स
मस्त पापनिर्मुक्तो विष्णुलोके स
मोदते इति नृसिंहपुराणं ।
संमार्जनेन यः कुर्यात् प्रकृष्टे
शालेवे रजस्तमाभ्यां निर्मुक्तः
सभवेमाप्तसंशयः पांशुना या
वन्तीराजन्कुर्यात्संमार्जनेनरः
तावन्त्यब्दानि सत्स्वीनाकमास्ना
यमोदते इतिविष्णुधर्मोत्तरं ॥
यावत्कानिप्रवाहानि भूमिसंमा
र्जनेतदुः तावद्वर्षसहस्राणिशा
कद्वीपमहीयते जायतेममभक्त
श्चसर्वधर्मसमन्वितः श्रुतिर्भाग
वतः शुद्धो लयपापविवर्जितः त
तो भुक्त्वा सर्वभोगान्वीन्वासंसारा
गरं शाकद्वीपात् परिभ्रष्टः स्वर्ग
लोकंसगच्छति नेद्रनेवनमाश्चि
त्यमोदते वाससैःसह नेदनाश्च
परिभ्रष्टो मम कर्मव्यवस्थितः सर्व
संगान्परित्यज्य म म लोकन्तु ग
च्छति इतिवराहपुराणं स्ना
नविशेषः यथा आतुराणांतु अ
शिरस्कं भवेत्स्नानं स्नानाशक्तो ।

त्वकर्म्मिणां आर्द्रेणवाससावा
पिमार्जनं दैहिकं विदुः इति
जावालवचनाच्छिरोविहायगा
त्रक्षालनं तदशक्तौसर्वगात्र ।
मार्जनं आर्द्रेणवाससाकुर्यात् ।
इत्याह्निकाचारतत्वं वैदिक
संध्यापासनांतर्गतमार्जनं यथा
छन्दोगपरिशिष्टं शिरसो मा
र्जनं कुर्यात्कुशैः सोदकविन्दु
भिः प्रणवोभूर्भुवः स्वश्चगायत्री ।
तृतीयिका अद्दैवत्यं श्रुचो ।
दैवचतस्र इति मार्जनं ओंका
रो भूरादि व्याहृतित्रयं तृतीया
चगायत्री चतुर्थ्यापोहिष्ठेति ऋ
कत्रयं इति दंमार्जनेमार्जनक्रि
याकरणमित्यर्थः रामायणं ऋ
गंते मार्जनं कुर्यात्पादान्तेवासमा
हितः आपोहिष्ठेत्युचा कार्यं ।
मार्जनंतु कुशोदकैः प्रतिप्रणा
वसंयुक्तं क्षिपेद्वारि पदे पदे
अवसाने ऽथवा कुर्यादृषी
तो मनसीदृषा आपोहिष्ठेति
सूक्तस्य सिन्धुद्वीप ऋषिः स्मृतः आ
पोवैदेवता छन्दोगायत्री मा
र्जनेस्मृतं इत्याह्निकाचारतत्वं ।
मार्जनः पुं लोध्रवृक्षः इत्यमरः ।
श्वेतलोध्रः इति सुभूतिः

रक्तलोध्रः इति स्वामी ।
मार्जना स्त्री मार्जनं इत्यमरः
मुरजध्वनिः इति हेमचन्द्रः ।
मार्जनी स्त्री सम्मार्जनी कांटा
इतिभाषा यथा नमानिशीतला
देवीवासभस्था दिगम्बरी मा
र्जनी कलसोपेता शूर्पालंकृत
मस्तका इतिस्कान्दे शीतला
स्तोत्रं ॥
मार्जनीयः त्रि मार्जनयोग्यः मा
र्ग्यः इतिमृजधातोः कर्मण्यनी
यप्रत्ययेननिष्पन्नः अग्निः शाय
ने इति मल्लिमसारोणादिवृत्तिः
मार्जारः पुं रक्तचित्रकः इतिरा
जनिर्घण्टः विडालः इत्यमरः
खट्टासः इतिहेमचन्द्रः ॥
मार्जारस्पर्शने दोषो यथा अ
भोज्यन्नतिकापिण्डमार्जाराखुप्र
कुक्कुटैः पतितात्यविद्धं चण्डाल
मृतदृष्टांश्च धर्मवित् संस्पृष्ठा ।
श्चाप्यते स्वानाडूदकायामसूक
रे इति मार्कण्डेयपुराणं सदाचारा
ध्यायः पारिभाषिक मार्जारो ।
यथा दंभार्थं जपतेयश्च तप्य
ते यजते तथा न परार्थं मु
क्तो मार्जारः परिकीर्तितः
तस्याननमभोज्यं यथा अभोज्याः ।




सूतिका षण्ड मार्ज्जारावेष्टकुक्कु
टाः इतिवामनपुराणे ५५ अध्यायः
मार्ज्जारकः पुं मयूरः इतित्रिकाण्ड
शेषः ॥
मार्ज्जारकण्ठः पुं मयूरः इतिशब्द
रत्नावली ॥
मार्ज्जारकर्णिका स्त्री चामुण्डा य
था चामुण्डा चर्च्चिका चर्म्ममुण्डा मा
र्ज्जारकर्णिका इति हेमचन्द्रः
मार्ज्जारकर्णी स्त्री चामुण्डा यथा
मार्ज्जारकर्णी चामुण्डा कर्णमोटि
श्च चर्च्चिका इतित्रिकाण्डशेषः ।
मार्ज्जारगन्धा स्त्री मुद्गपर्णीविशे
षः इतिरत्नमाला ।
मार्ज्जारगन्धिका स्त्री मुद्गपर्णी
इति राजनिर्घण्टः ॥
मार्ज्जारी स्त्री कस्तूरी गन्धवि
शेषः गन्धगकुला इतिख्याता सी
इतिच भाषा तत्पर्यायः पूति
का २ पूतिकजः ३ गन्धचेलिकाथ
स्या गुणाः शान्तिधारकत्वं वक्त्र
शैत्यकफवातनाशित्वं च इतिरा
जनिर्घण्टः ॥
मार्ज्जारीयः पुं बिडालः शूद्रः
कायशोधनं इति मेदिनी
मार्ज्जालः पुं मार्ज्जारः रलयोरे
कत्वात् ॥

मार्ज्जालीयः पुं बिडालः शूद्रः
कायशोधनं इति हेमचन्द्रः
मार्ज्जिता स्त्री रसाला इत्यमरः
सतदधिखण्डमधुसर्पिर्मरिचादि
कृतकर्पूरादिवासितमद्रव्यवि
शेषः इत्यमरटीकायां भरतः
शोधितेति ॥
मार्त्तण्डः पुं सूर्य्यः शूकरः
इत्यमरः शूकरः इति मेदिनी
मार्त्तण्डोत्पत्तिर्यथा श्रीमार्क
ण्डेयउवाच एवं सा नियता देवी
चक्रे स्तोत्रमहर्निशं निराहारा
विवस्वन्तं मारिराधयिषुर्मुने त
तः कालेन महता भगवांस्तपनो
मुने प्रत्यक्षतामगात्तस्या दा
क्षायण्या द्विजोत्तम सा ददर्श म
हाकूटं तेजसोऽम्बरसंस्थितं भू
मौ च संस्थितं भास्वज्ज्वाला मा
लातिदुर्दृशं तं च दृष्ट्वा ततो
देवी साध्वसं परमं गता जगा
द च प्रसीदेति न त्वां पश्यामि
गोपते यथा दृष्टवती पूर्वं ममा
स्तं सुदुर्दृशं सन्धाने तेजस स्त
स्मादिदृपश्यामिभूतले प्रसादं
कुरुपश्येयं यद्रूपं तपभाकरः ।
भक्तानुकम्पनविभो भक्ताहं पा
हि मे सुतान् श्रीमार्कण्डेयउवाच ।


ततः स तेजस स्तस्मादाविर्भूतो ।
विभावसुः प्रत्यदृश्यत तदादित्य
स्तप्तताम्रोपमप्रभः प्रणता
न्तां देवी तस्य संदर्शनान्मुने ।
प्राह भास्वान्वृणुष्वेष्टं वरं मत्तो य
मिच्छसि प्रणताशिरसा सा च जानु
पीडित मेदिनी प्रत्युवाच विवस्व
न्तं वरदं समुपस्थितं देव प्रसीद
पुत्राणां हृतं त्रिभुवनं मम यज्ञ
भागाश्च देवतैः दैत्यैश्च बलाधि
कैः तन्निमित्तं प्रसादं त्वं कुरुष्व
मम गोपते अंशेन तेषां भ्रा
तृत्वं गत्वा नाशाय तद्रिपूनस्यथा
मे तनया भूयो यज्ञभागभुजः प्र
भो भवेयुरधिपाश्चैव त्रैलोक्य ।
स्य दिवाकर तथानुकम्पां पुत्रा
णां स्वप्रसन्नो रवे मम कुरु प्रसन्ना
र्त्तिहर स्थितिकर्त्ता त्वमुच्यसे मार्क
ण्डेयउवाच ततस्तामाह भगवान्
भास्करो वारितस्करः प्रणतां म
दितिं विप्र प्रसादसुमुखो विभुः
सहस्रांशेन ते गर्भे सम्भूयाहमशे
षतः त्वत्पुत्रशत्रून् दितिजे नाशयामि
म्याशु निर्वृता इत्युक्त्वा भगवान्
भास्वानन्तर्धानमुपागमत् निवृ
त्ता सापि तपसः संप्राप्ताखिलवा
ञ्छिता ततो रश्मिसहस्रान्तः सुषुम्ना
ख्यो

रवेः करः विप्रावतारं संचक्रे
देवमातुरथोदरे कृच्छ्रचान्द्रायणा
दीनि सा चक्रे सुसमाहिता शुचिः
संधारयाम्यहं दिव्यं गर्भमिति द्वि
ज ततस्तां कश्यपः प्राह किंचित्
कोपप्लुताक्षरं किं मारयसि ग
र्भाण्डमिति नित्योपवासिनी सा
चतं प्राह गर्भाण्डमेतत्पश्यत ॥
कोपिता न मारितं विपक्षाणां ।
मृत्युरेव भविष्यति इत्युक्त्वा तं
तदा गर्भं मुत्ससर्ज सुरारणिः ।
जाज्वल्यमानं तेजोभिः प्रत्युवाच ।
तं कोपिता तं दृष्ट्वा कश्यपो गर्भ
मुद्यद्भास्करवर्चसं तुष्टाव प्रणतो
भूत्वा ऋग्भिराद्याभिरादरात् सं
स्तूयमानः स तदा गर्भाण्डात्प्रकटो
ऽभवत् पद्मपत्रसवर्णाभः तेजसा
व्याप्तदिङ्मुखः अथान्तरीक्षादा
भाष्य कश्यपं मुनिसत्तमं सतो
यमेघगम्भीरा वागुवाचाशरीरिणी
मारितं च यतः प्रोक्तमेतदण्डं ।
त्वयादितिः तस्मान्मुने सुतस्तेऽयं
मार्त्तण्डाख्यो भविष्यति सूर्य्या
धिकारं च विभुर्जगत्येष करिष्य
ति हनिष्यत्यसुरांश्चायं यज्ञ
भाग हरानरीन् देवा निशम्येति
वचो गगनात्समुपागतं प्रहर्ष



मण्डलं याता दानवाश्च हतौजसः
ततो गृहीत्वा दैतेया नाकं ह्याव
प्तानक्रतुः सह देवैर्मुदायुक्तो
दानवाश्च तमाश्रमुः तेषां युद्ध
मभूद्घोरं देवानां असुरैः सह
शस्त्रास्त्रदीप्तिसंदीप्तसमस्तभुव
नान्तरं तस्मिन् युद्धे भगवता मार्त्त
ण्डेन निरीक्षिताः तेजसा दह्य
मानास्ते भस्मीभूता महासुराः त
तः प्रहर्षमतुलं प्रापुः सर्वे दि
वौकसः तुष्टुवुः स्तेजसा योनिं
मार्त्तण्डमदितिं तथा स्वाधिकारं
ततः प्राप्य यज्ञभागांश्च पूर्ववत्
भगवानपि मार्त्तण्डः स्वाधिकार
मथाकरोत् कदम्बपुष्पवच्चाशा
न्यः स्फोरिद्भिश्चरश्मिभिः हुतो मि
पिण्डसदृशा स्वभेनातिस्फुटं वपुः
इति मार्कण्डेयपुराणे सूर्य्य माहा
त्म्ये मार्त्तण्डोत्पत्ति नामाध्यायः
मार्त्तण्डवल्लभा स्त्री आदित्यभक्ता
इति राजनिर्घण्टः सूर्य्यपत्नी च
मार्त्तिकः पुं शरावः इति शब्द
रत्नावली मृत्तिकानिर्मिते त्रि
मार्दङ्गं क्ली पत्तनं इति हारा
वली मृदङ्गवादके त्रि
मार्दङ्गिकः त्रि मृदङ्गवादकः त
त्पर्यायः मौरजिकः इत्यमरः
मार्द्धिकः २ ओड्रिकः ४ इति
शब्दरत्नावली ॥
मार्दवं क्ली परदुःखदर्शनात्
पीडावृद्धिः मृदुता यथा मार्दवं
कोमलस्यापि संस्पर्शासहत्वाख्य
ते उत्तमं मध्यमं प्रोक्तं कनिष्ठ
ञ्चेति तत्त्रिधा उत्तमं यथा प्र
भिनवमालिकाप्रियं साशयन्त्व
वंशिराधिकाविशिष्य नकुसमप
ट्लं हृदापि तन्वीनदनुभवान्नेत्र
मव्रणासीत् मध्यमं यथा चित्र
य निहितनवबाससोपिचीनस्यापि
नस्त्वनि संगमेन लिमेनन स्नाहि
न चंदनेन मूर्त्तिविहिता सलिला
हितासीत् कनिष्ठं यथा रस
सुधाकरे आमोद मोमोदन मा
द्यान्तं निलीन नीलालकबरीकं
लितेन पद्मामुखपद्मभासीत् वि
घा रवेः कोमलयापि तात्रं इ
त्युज्ज्वलनीलमणिः ॥
मार्दवः पुं वर्णसंकरजातिविशे
षः माधुकोमार्दवश्चेवुकारुषा
हिण्डिकादयः इति जटाधरः।
मार्षः पुं नाट्योक्तौ श्रेष्ठः इति
हेमचन्द्रः मारिषशाकः इत्य
मरटीकायां भरतः ॥
मार्षिकः पुं मारिषशाकः इति

राजनिर्घण्टः ॥
मार्ष्टिः स्त्री मार्जनं इत्यमरः
तैलमर्दनं यथा तैलमस्य प
दाङ्गेषु न भवेत् वाङ्गसंगतं सा
मार्ष्टिः स्पष्टगन्धगोमस्तकादौ प्र
कीर्त्तितः इत्याह्निकतत्त्वं ॥
मालं क्ली क्षेत्रं इति मेदिनी।
कपटं वनं इति हेमचन्द्रः ॥
मालः पुं जातिविशेषः इति
मेदिनी सच म्लेच्छजातिः यथा
माला भिल्लाः किरातास्च सर्वेपि
म्लेच्छजातयः इति जनः इति च
हेमचन्द्रः देशविशेषः स च
मेदिनीपुर प्रदेशे मालभूमिस्तेन
ख्यातः विष्णुः यथा मां ल
क्ष्मीं लातीति मलो विष्णुः ते
जतीति मालती इति मालती।
शब्दटीकायां भरतः ॥
मालकं क्ली स्थलपद्मं इति जटा
धरः ॥
मालकः पुं निम्बवृक्षः इत्यमरः
मालका स्त्री माल्यं इति शब्दर
त्नावली ॥
मालकोशः पुं रागविशेषः तस्य
नामान्तरं कौशिकः सच हनुम
न्मतेषड्रागाणांमध्ये द्वितीय रा
गः हरस्य हरवी कण्ठान्निर्गतः
अस्य जातिः संपूर्णा तत्रसप्त स्वर
क्रमः स ऋ ग म प ध नि अस्य
ग्रहं षड्जस्वरः शरहेता रात्रि
शेष गानसमयः रागमालायाम्
अस्य स्वरूपं पाटलवर्णपुरुषः।
नीलपरिच्छदः यष्टिहस्तः यौवन
मदमत्तः स्त्रीभिः सहहास्यकौतु
कान्वितः शत्रुमस्तकमालागलो।
ऽथवा हरकण्ठमालागलः अस्य
रागिण्यः पंचयथा टोडी १ गौरी।
२ गुणकरी ३ खम्भावती ४ कोक
भा ५ अस्याष्टौ पुत्राः यथा मारुः १
मेवाडः २ बडुहंसः ३ प्रबलः ४
चन्द्रकः ५ नंदः ६ भ्रमरः ७ खुखरः ८
अत्र मिष्टांगापिपाठः भर
तमते तस्य रागिण्यः पंच यथा
गौरी १ दयावती २ देवदाली ३
खंभावती ४ ककुभा ५ तन्मते
अष्टौ पुत्राः यथा गान्धारः १ शुद्धः २
मरकः ३ विलनः ४ सदानः ५
शक्रवल्लभः ६ मालीगौरः ७ का
मोदः ८ अष्टपुत्रभार्य्याः यथा
धनाश्रीः १ मालश्रीः २ जयन्तश्रीः ३
सवोरायी ४ दुर्गा ५ गान्धारी ६
भीमपलाशी ७ कामोदी ८ इति
संगीतशास्त्रं ॥
मालचक्रकं क्ली सक्थ्यूरुपर्वसंधिः




मालाइचाकि इति भाषा इति
शब्दचन्द्रिका ॥
मालती स्त्री स्वनामख्यातपुष्पलता।
तत्पर्य्यायः सुमना २ जातिः ३
इत्यमरः सुमनाः ४ जाती ५
इति भरतः अस्या गुणाः कफ
पित्तमुखरोगव्रणक्रिमिकुष्ठना
शित्वं इति राजवल्लभः तस्या
उत्पत्तिर्यथा आद्याशक्तिरुवाच
अहं मन्त्रत्रियाभिन्ना तिष्ठामि त्रि
विधैर्गुणैः गौरीलक्ष्मीः स्वधा
चेति रजःसत्त्वतमोगुणैः तत्र
गत्वा तथा कार्य्यं विधास्यन्ते च ताः
सुराः नारद उवाच शृणु तन्नामि
भिन्नां वाच मन्त्रहीन मगात्महः
देवानां विस्मयोत्फुल्ल नेत्राणां च
नराधिप ततः सर्व्वेऽपि ते देवा
गत्वा तदाकाशवादिताः गौरी
लक्ष्मी स्वधां चैव प्रणामुर्भक्तित
त्पराः तासां धाम्नां तु सत्त्वान् दृष्ट्वा
प्रणतान् भक्तवत्सलाः बीजानि
प्रददुस्तेभ्यो वाक्यानि जगदुस्तथा
देव्य ऊचुः इमानि देवा बीजा
नि निक्षिप्यध्वं यत्र तिष्ठति निर्व्वपस्तत
तः कार्य्यं भवतां सिद्धिमेष्यति
नारद उवाच ततः प्रहृष्टाः सुर
सिद्धसङ्घाः प्रगृह्य बीजानि दिवि

क्षितिपस्य विदारिका भूमितले
स यत्र विष्णुः सदामिष्टति सोऽस्य
हन्तिः नारद उवाच तिसृभ्य
स्तत्र बीजेभ्यो रतस्यत्सस्तयो ३
भवन् धात्री च मालती चैव तुलसी
च नृपोत्तम धात्र्युद्भवा स्मृता
धात्री माभवा मालती स्मृता गौ
रीभवा च तुलसी रजःसत्त्वतमो
गुणाः इति पाद्मे उत्तरखण्डे ७४
७५ अध्यायौ ॥ युवती
कावमाली शिवल्या ज्योत्स्ना
स्त्री निशा नदीविशेषः इति
हेमचन्द्रः ॥
मालतीतीरजः पुं टङ्कणः इति
हेमचन्द्रः ॥
मालतीतीरसंभवं क्ली सोहटङ्कणं
इति राजनिर्घण्टः ॥
मालतीपत्रिका स्त्री जाती पत्री
इति राजनिर्घण्टः ॥
मालतीफलं क्ली जातीफलं इति
राजनिर्घण्टः ॥
मालयः पुं चन्दनवृक्षः इति त्रि
काण्डशेषः मलयसम्बन्धिनि त्रि
मालवः पुं अवन्तिदेशः मालवे
या इति हिन्दीभाषा इति हेमचन्द्रः
रागविशेषः स च षड्रागाणां म
ध्ये प्रथमरागः मतान्तरे भैरव ।

रागोऽयं यथा आदौ मालव
रागेन्द्रस्ततो मल्लारः संज्ञितः
श्रीरागस्तस्य पश्चाद्वै वसन्तस्तद
नन्तरं हिन्दोलश्चाथ कर्णाट ए
ते रागाः प्रकीर्त्तिताः तस्य स्व रू
पं यथा नितम्बिनी चुम्बित वक्त्र
पद्मः शुकद्युतिः कुण्डलवान् प्रम
त्तः संगीतशाली प्रविशन् प्र
दोषे मालाधरो मालवरागराजः
इति संगीतदामोदरः ॥
मालविका स्त्री त्रिवृत् इति राज
निर्घण्टः ॥
मालसी स्त्री केशपुष्पवृन्दः य
था मालसीडगपुष्पी च चोलाली के
शधारिणी इति शब्दचन्द्रिका
रागिणीविशेषः सा तु मालव रा
गस्य पत्नी यथा धान्नसी मालसी
रामकिरी च सिन्धुडा तथा आस
वारी भैरवी च मालवस्य प्रिया
इमाः इति हारीतः मतान्तरे मे
घरागस्य पत्नी यथा ललिता
मालसी गौडी नाटी देवकिरी
तथा मेघरागस्य रागिण्यो भव
न्तीमाः समध्यमाः तस्याः स्व रूपं
यथा नीलारविन्दमास्तलानि बाला
विधारयन्ती तनु देहयष्टिः माल
रहद्वस्पनले निषण्णा शोणाम्बुजे

मालसिका प्रदिष्टा तस्यागान
समयो यथा इन्द्रोत्थानात् समा
रभ्य यावद्दुर्गामहोत्सवं गेया
भवेद्धुये नित्यं मालसी सामना।
इत्य अपि च गान्धारी दीपिका।
चैव कल्याणी पूरवी तथा अस
वारी कानडा च गौरी केदार पा
हिडा माधवी मालसी नाटी भू
पाली सिन्धुडा तथा सायाह्ने
रागिण्य एताः प्रगायन्ति चतुर्दश
इति संगीतदामोदरः ॥
माला स्त्री श्रेणी तत्पर्य्यायः रा
जिः २ लेखा ३ तती ४ वीचीः ५ आ
ली ६ आवलिः ७ पंक्तिः ८ धारा
ली ९ इति हेमचन्द्रः मूर्द्धिन्यस्त
पुष्पदाम अन्यत्रापुष्पदामानि त
तत्पर्य्यायः माल्यं २ स्रक् ३ इत्य
मरः मालिका ४ मालाका ५ मा
लकं ६ इति शब्दरत्नावली गण
निका ७ गुणान्तिका ८ इति वराहा
पुराणं मात्रि विधा यथा मालास्त्रि
विधा देवि वर्णोत्थापर्व भेदतः इति
मन्त्रमहोदधिवचनं अथ माला
निर्णयः तत्र करमाला सनत्कुमार
संहितायां तर्जनी मध्यमा नामा
कनिष्ठा चेति ताः क्रमात् तिस्रो
गुल्फास्थिपर्वाणो मध्यमा चैक




पर्विका पर्वद्वयं मध्यमायामेरु
त्वेनोपकल्पयेत् क्रममाह अ
नामा मध्यमारभ्य कनिष्ठादित्रिप
र्व तर्जनी मूलपर्य्यन्त दशपर्व
स्वसंजपेत् तथा अनामा मूलमा
रभ्य कनिष्ठादित पर्व च तर्जनी
मध्यपर्य्यन्त मष्टपर्वस्व संजपेत्
एतद्वचनेन अष्टोत्तरशतादिवि
षयं शक्ति विषये पुनः श्रीक्रम
अनामिकात्रय पर्वकनिष्ठादि त्रि
पर्विका मध्यमायाश्च त्रितयं त
र्जनीमूल पर्वाणि तर्जन्यग्रेतथा
मध्ये यो जपेत् स तु पापकृत्।
हंसपारमेश्वरे पर्वद्वय मनामा
याः परिवर्त्तनेन वैक्रमात् पर्वत्र
यं मध्यमाया स्तर्जन्येकस्माद्द्वे
त् पर्वद्वयंत्व तर्जन्या मेरुंतद्विद्धि
पार्वति शक्तिमाला समाख्याता
सर्वतंत्रप्रदीपिका तथा अना
मामूलमारभ्य प्रादक्षिण्यक्रमेणव
मध्यमा मूलपर्य्यन्तमष्टपर्वस्व संज
जपेत् श्रीविद्यायामयं विशे
षः अनामाया मध्यमायाश्चलाग्र
पर्वद्वयं द्वयं कनिष्ठायाश्च तर्जन्या
स्त्रयंपर्व साक्षी अनामा मध्य
मायाश्च मेरुः स्याद्धितयं शुभं
प्रदक्षिण क्रमाद्देवि जपेत्त्रिपुरसु

न्दरी इति जामल वचनात् मु
ण्डमालातंत्रे अनामिकाद्वयं पर्व
प्रादक्षिण्यक्रमेण त तर्जनीमूल
पर्य्यन्त करमाला प्रकीर्त्तिता क
निष्ठामूलमारभ्य प्रादक्षिण्यक्रमे
णव तर्जनीमूलपर्य्यन्तमष्टपर्व
स्व संजपेत् इदमपि अष्टोत्तरशता
दिविषयं अंगुलीर्न वियुंजी।
तकिंचिदाकुंचितेतले अंगुली
नांवियोगाच्च छिद्रेषुस्रवते जपः
अन्यत्रापि अंगुल्यग्रेषु यज्जप्तं
यज्जप्तं मेरु लंघने पर्वसंधिषु
यज्जप्तं तत्सर्वं निष्फलं भवेत्।
गणनाविधि मुल्लंघ्य याजपेत्तज्ज
पं यतः गृह्णंति राक्षसा स्तेन
गणयेत् सर्वथा बुधः तत्रांगुलि
जपं कुर्वन् सांगुष्ठांगुलिभिर्जपेत्
सांगुष्ठेन विनाकर्म्मकृतं तद्फलं
भवेत् विश्वसारे जपसंख्या त
कर्तव्या नासंख्यातं जपेत् सुधीः
तसंख्याकारकस्यास्य सर्वं भवति
निष्फलं तंत्रे हृदयेहस्तमारो
प्यतिर्य्यक्कृत्वाकरांगुलीः आ
च्छाद्यवाससा हस्तौ दक्षिणेन स
दाजपेत् इतिकरमाला जपसं
ख्याया निषिद्धद्रव्यमाह यामले
नाक्षैर्हस्त पर्वैर्वा न धान्यै।

र्न च पुष्पैः न चंदनै र्मृत्तिका।
याजप संख्यां नकारयेत् विहित
द्रव्यमाह लाक्षाकुशीद सिंदूरगो
मयंच करीषकं एभिर्निर्म्मायग
टिकां जपसंख्यान्तुकारयेत् ।
अथवर्णमाला सनत्कुमारे क
मोत्क्रमगतैर्माला मातृकार्णैः ल
मेरुकैः सबिन्दुकैः साष्टवर्गैरं त।
र्य्यजन कर्म्मणि आदिक्षांतत्वपु
युक्ताचाष्टावर्गाः प्रकीर्त्तिताः तथ
था अकारादिवर्णान् सविन्दूनुच्चा
कहुत्वा शतंसंजप्य अकारादीनां
वर्णानां कवर्गादीनांतिमवर्णमा
नुस्वारं कृत्वा पूर्वं वाद्य शेषाष्टवार।
मंत्रजपः कार्य्यः अनेनप्रकारेण
अष्टोत्तरशतसंख्याजपो भवति
अंतर्यजनेत्वपलक्षणं तथा सवि
दुंवर्णं मुच्चार्य्य पश्चान्मंत्रं जपेद्बुधः
अकारादि लकारांतं विंदुयुक्तं
विभाव्य च वर्णमालासमाख्याता।
ता अनुलोम विलोमतः इतितन्त्र
दवचनात् विश्वसारे अनुलो
मविलोमेन वर्णाष्टक विभेदतः
मंत्रेणांतरितान्वर्णान्वर्णैर्नांत
रितान्मंत्रान् कुर्य्याद्वर्णमयीमा।
लां सर्वतंत्र प्रकाशिनी मालिनी वि
जयेस्तत्र नियमः अंतर्विक्रमभास्या
ने

भ्रजगीस्तत्रोनवर्णांत्मालां आरो
हयति रोहतः शतमयी वर्णाष्टका
ष्टोत्तरां इति वर्णमाला ॥
अथाक्षमाला तत्रमालायां मणि
निर्णयः पद्मबीजानि भिर्माला व
हियोगश्रुतलक्षणाः रुद्राक्षशांवप
श्चात्त पुत्रजीवकमौक्तिकैः स्फटि
के र्मणिरत्नैश्च सुवर्णैर्विद्रुमैस्तथा
राजतैः कुशमूलैश्च गृहस्थस्यात्त
मालिका अंगुली गणनादेकं।
पर्वणष्टगुणं भवेत् पुत्रजीवे द
शगुणं शतं शंखैः सहस्रकं प्रवा
लैर्मणिरत्नैश्च दशसाहस्रकं मतं
तदेव स्फाटिकैः प्रोक्तं मौक्तिके।
लक्षमुच्यते पद्माक्षैर्दश लक्षं
स्यात् सौवर्णैः कोटिरुच्यते कु
शग्रंथ्याकोटि शतं रुद्राक्षैः स्या
दनंतकं सर्वे विरचिता माला
नृणां शक्तिफलप्रदा कालिका
पुराणे रुद्राक्षैर्यदि जपेत्
इंद्राक्षैः स्फाटिकैस्तथा नान्यन्म
ध्ये प्रयोक्तव्यं पुत्रजीवादिकं चयत्
यद्यन्यत प्रयुंजीत मालायां जप्य
कर्म्मणि तस्य कामं च मोक्षं च न
ददाति प्रियंकरी मुण्डमालायां।
श्मशानधुस्तूरे मीलास्तयाभूमावनी
विधौ नरांगुलास्थिभिर्माला ग्रथिता



सर्व्वकामदा नाडासंग्रथनं कार्य्यं
रक्तेन वाससा प्रिये सदा गोप्या ।
प्रयत्नेन जनन्या जारवत् प्रिये ॥
कामनाविशेषे तु पद्माक्षै विहि
ता माला शत्रुनाशकरी मता कु
शग्रन्थिमयी माला सर्व्वपापप्रणा
शिनी पुत्रजीवफलैः कृता कुरु
ते पुत्रसम्पदं निर्म्मिता रूप्यमणिभि
र्जपमाले प्सितप्रदा प्रवालै र्वि
हिता माला प्रयच्छेत् विपुलं धनं
भैरवी विद्यायान्तु वाराही ।
तन्त्रे स्वर्णमणिभि र्म्मालां स्फाटि
कीं शङ्खनिर्म्मितां प्रवालैरेव वा
कुर्य्यात् पुत्रजीवं विवर्ज्जयेत् प
द्माक्षं चैव रुद्राक्षमिन्द्राक्षं च विशे
षतः त्रिपुरामन्त्रजपादौ तु
रक्तचन्दनबीजादिभि रतिशाक्ता
नन्दाच तन्त्रराजे रक्तचन्दनमाला
तु भोगदा मोक्षदा भवेत् त
था वैष्णवे तुलसी माला गजदन्तै
र्गजानने त्रिपुरायाजपे शस्ता रु
द्राक्षै रक्तचन्दनैः कुमारीकल्पे
रुद्राक्षे शक्तिमन्त्रं च मन्त्रीयः प्र
जपेत् प्रिये स दुर्गतिमवाप्नोति ।
निष्फलं तस्य तज्जपः कालिका ।
छिन्नमस्ता च त्रिपुरा तारिणी तथा
एताः सर्व्वाः न कुर्व्वन्ति जपे रुद्राक्ष

मालया दिवा नैव प्रजप्तव्यं रु
द्राक्षमालयापि च पुरश्चर्य्या सु
चात्र हस्तमाणे वरानने महाशङ्ख
मयी माला नीलसारस्वते प्रिये नृ
ललास्थिखण्डेन रचिता जपमालि
का महाशङ्खमयी माला तारावि
द्याजपे प्रिये कर्णनेत्रान्तरालास्थि
महाशङ्खः प्रकीर्त्तितः मणिनिय
मस्तु मुण्डमालायां अन्यान्यसमरूपा
णिभिर्नातिस्थूलकृशानि च कीटादि
भिरदुष्टानि न जीर्णानि नवानि वै ।
तथा गौतमीये पञ्चाशल्लिपिभि
र्माला विहिता सर्व्वकर्म्मसु आ
काशादि लकारान्ता वर्णमाला प्रकीर्त्ति
ता क्षार्णमेरुमुखं तत्र कल्पयेन्मु
निसत्तम अनया सर्व्वमन्त्राणां जपः
सर्व्वसमृद्धिदः चामुण्डातन्त्रे नि
त्यं जपं करे कुर्य्यात् न तु काम्यं म
बोधनात् काम्यमपि करे कुर्य्यात्
मालाभावेपि सुन्दरि तत्र मा
लायाः प्राधान्यं कामनाभेदे
तु गौतमीये समासेनाक्षसूत्रस्य
विधानमिह कथ्यते पञ्चविंश
तिभिर्मोक्षं त्रिंशद्भिर्धनसिद्धये ।
सर्व्वार्थाः सप्तविंशत्या पञ्चदशाभि
चारके पञ्चाशद्भिः काम्यसिद्धिः ।
स्यात्तथा चन्तरैः अष्टोत्तर ।

शतैः सर्व्वसिद्धिरुक्ता मनीषिभिः
अथ मालासंस्कारः तत्र
सनत्कुमारीये कार्पाससम्भवं
सूत्रं धर्म्मकामार्थमोक्षदं तत्तु
विप्रेन्द्रकन्याभिर्निर्म्मितं च सुशो
भनं यद्वा शुक्लं रक्तं तथा कृष्णं
पट्टसूत्रमथापि वा शान्तिवश्या
भिचारेषु मोक्षैश्वर्य्यजयेषु च शु
क्लं रक्तं तथा पीतं कृष्णवर्णेषु वक्र
मात् सर्व्वेषामेव वर्णानां रक्तं
सर्व्वेष्विनप्रदं आश्रमेषु तथा
चैवं रक्तं सर्व्वसिद्धिदं त्रिगुणं ।
त्रिगुणीकृत्य ग्रथयेत् शिल्पशास्त्र
तः एकैकं मातृकावर्णं सतारं प्रज
पन्सुधीः मणिमादाय सूत्रेण ग्रथ
येन्मध्यमध्यतः ब्रह्मग्रन्थिं विधाय
यं मेरुं च ग्रन्थिसंयुतं ग्रथयि ।
त्वाथो मालां ततः संस्कारमार
भेत् कस्यचिन्मते मूलविद्यया ।
ग्रथयेत् तथा च एकवीराकल्पे
मातृकामन्त्रतो ग्रन्थिं विद्याया वा
प्रकारयेत् सुवर्णादिगुणैर्व्वापि
ग्रथयेत् साधकोत्तमः ब्रह्मग्रन्थिं
ततो दद्यान्नागपाशमथापि वा क
वचेनाववध्नीयान्मालां ध्यानपरा
णः सर्व्वशैवं ततो मेरुं सूत्रद्वय
समन्वितं ग्रथयेन्नारयोगेन वध्नी

यात् साधकोत्तमः एवं निष्पाद
देवेशि प्रतिष्ठां च समाचरेत् ।
गौतमीये मुखे मुखं च संयोज्य
पुच्छे पुच्छं नियोजयेत् गोपुच्छ
सदृशी माला यद्वा सर्पाकृतिः शु
भा एवं निर्म्माय मालां वै शोधये
त्नतः सत्तमः अश्वत्थपत्रनवकैः
पद्माकारं तु कारयेत् तन्मध्ये ।
स्थापयेन्मालां मातृकां मूलमुच्चरन् ।
क्षालयेत् पञ्चगव्येन सद्योजा
तेन सज्जलैः सद्योजातस्य ॐ
सद्योजातं प्रपद्यामि सद्योजा
ताय वै नमः भवे भवे नादि
भवे भजस्व मां भवोद्भवाय नमः
चन्दनागुरुकर्पूरैर्वामदेवेन घ
र्षयेत् वामदेवमन्त्रस्य ॐ वामदे
वाय नमो ज्येष्ठाय नमो रुद्राय न
मः कालाय नमः कलविकरणा
य नमो बलविकरणाय नमो बलप्र
मथनाय नमः सर्व्वभूतदमनाय नमो
नमो मनोन्मनाय नमः धूपयेत् अघोरेण
अघोरमन्त्रस्य अघोरेभ्योऽथ घोरेभ्यो
घोरघोरतरेभ्यः सर्व्वतः सर्व्व स
र्व्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः
लेपयेत् तत्पुरुषेण तु तत्पुरुष
मन्त्रस्य ॐ तत्पुरुषाय विद्महे महा
देवाय धीमहि तन्नो रुद्रः प्रचो

दद्यात् मंत्रयेत् पंचमेनैव प्र
त्येकंतु शतं शतं मेरुंच मंत्र
येत्तेव मतुनाच शतं शतं मंत्रस्तु
ॐ ईशानः सर्व विद्यानामीश्वरः
सर्वभूतानांब्रह्माधिपतिर्ब्रह्मणो
धिपतिः शिवो मेऽस्तु सदाशिवों।
प्रत्येकंतु सकृत्सकृत् इति वा
तथाच तंत्रेवाप्रत्येकंमंत्रयेन्मंत्री
पंचमेन सकृत्सकृत् तथाच गौ
तमीये समुदाय मालामथिक्रा।
त्यपंचमेनैव सूक्तेन शतान्मूलेन
मंत्रयेत् इतिदर्शनामालायाश्चाश
तजपः तत्रावाह्य यजेद्देवं यथा
विभवविस्तरैः मालायाः प्राण प्र
तिष्ठानंतरं देवतां पूजयेत् तथा
सनत्कुमारे संस्कृत्यैवं बुधो
मालां तत्प्राणांस्तत्र स्थापयेत्।
मूलमंत्रेणतां मालां पूजयद्विज
सत्तम वाराहीतंत्रे माले माले
महामाले सर्वतत्त्वस्वरूपिणि चतु
र्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदाभव
मासादीनादिकां कृत्वारक्तपुष्पैः
समर्चयेत् इतिशक्तिविषये ॥
विष्णु विषये तु यामले वाग्भवंच
तथा लक्ष्मी मन्त्रादि मालिकांता
ङे त्वा हृदय वर्णांतां मंत्रेणानेन
पूजयेत् मंत्रयेन्मूल मंत्रेण क्र

मेणोत्क्रमयोगतः तथैव मा
तृकावर्णैर्मंत्रयेन्मंत्रवित्
योगिनीतंत्रे होम कर्म ततः कु
र्यात्देवता भावसिद्धये अष्टोत्तर
शतं हुत्वा संपातान्ताभिः सि
येत् होमकर्मण्यशक्तश्चेत् द्वि
गुणं जपमाचरेत् नान्य मंत्रा
ज्जपेन्मंत्री कंपयेन्न विधूनयेत्क
म्पनात् सिद्धिहानिः स्याद्धूनने व
हुदुःखदं शब्दे जाते भवेद्रोगः कर
भ्रष्टा विनाशिका छिन्नेसूत्रेभवे
न्मृत्यु स्तस्माद्यत्नपरोभवेत् जपां
ते कर्णदेशेवा उच्चदेशे तथा न्य
सेत् त्वंमालेसर्वभूतानां सर्व
सिद्धि प्रदामता तेन सत्येन मे
सिद्धिं देहि मातर्नमोऽस्तु ते।
इत्युक्त्वा परिगृह्याथ गोपयेत्तु
ताः गृही मालासंस्कारस्य नित्य
तामाह रुद्रयामले अप्रतिष्ठित
मालाभिर्मंत्रं जपति यो नरः
सर्वं तद्विफलं विद्यात् क्रुद्धाभव
ति देवता कामनाभेदे तु अं
गुलि नियमः गौतमीये तर्जं
न्यंगुष्ठ योगेन शत्रूच्चाटन मुत्तमं
अंगुष्ठ मध्यमा योगान्मंत्र सिद्धिः
प्रकीर्तिता अंगुष्ठानामिका यो
गादुच्चाटोऽस्मात्तने मेत ज्येष्ठा

कनिष्ठा योगेन शत्रूणां नाशनं म
तं वैशम्पायन संहितायां ॥
अंगुष्ठ मध्यमाभ्यांच चालयेन्मध्य
मध्यतः तर्जन्याः तस्पर्शेदेनां मु
क्तिदो गणनक्रमः जीर्णे सूत्रे
पुनः सूत्रं ग्रथयित्वा शतं जपेत्
प्रमादात् पतिताद्धस्तात् शतमष्टो
त्तरं जपेत् जपेन्निषिद्ध संस्पर्शे
क्षालयित्वा यथोदितं छिन्ने घ
ष्टोत्तरशत जपः कार्यः करभ्रष्ट
छिन्नयोस्तत्सत्वात् प्रकारान्तरं।
आगमकल्पक्रमे भूतशुद्ध्यादिकां
पूजां समाप्य तत्र पूजयेत् गणेश
सूर्यविष्णुशिवान् दुर्गां मायाबीजमंत्रवि
त् पंचगव्येन ततः क्षालयेत्ता मंत्रेण
मंत्रवित् तस्मादुद्धृत्य तां मा
लां स्वर्णपात्रे विधायचपयोदाय
हृत लोहपात्रेघे रक्तमात्
तोयभूपात्रैः कृत्वापंचामृत वि
धिं बुधः क्रमादेव स्थापयेत्स्था
पयेच्छीतले जले ततश्चन्दनसौ
गंधि कस्तूरी कुंकुमादिभिः ता
मालिप्य स्वेष्टमंत्र मष्टोत्तरशतं ज
पेत् तस्यां नवग्रहां श्चैव दिक्
पालांश्च प्रपूजयेत् ततः संपूज्य
वगुरुं शक्तीयान्मालिकां स्वभो
अक्षमालां च मुद्रां च गुरो रपि न


दर्शयेत् भूतराक्षसवेतालाः सिद्ध
गंधर्वचारणाः हरंतिप्रकटं यस्मा
त्तस्माद्गुप्तं समाचरेत् इतिअक्षमा
ला इतितंत्रसारः ॥ अपिच
विद्याधराप्सरो यक्षा विबुधासुर
राक्षसाः भूतानि किन्नराः सिद्धाः
प्रेताश्चचारणादयः हरंति जपफ
लान्येते यानि तानिच नारद अ
त्तसी वेदद्विजान्तु चार्द्रवासादिभि
र्जपेत् हंदारुवीन्थनमयी तुल
सी काष्ठसंभवा हस्तांगुलिमयी हे
मी दर्भग्रंथिमयी तथा भद्राक्षेंद्रो
त्तरुद्राक्ष पद्मबीजभवा ऽथधा
त्री पुत्रजीवफले र्मालाया परि
कीर्तिता मुक्ता माणमयी रौप्या
स्फाटिकी वैद्रुमी तथा जपकर्म
स्वसर्वेषु चाक्षमाला प्रकीर्तिता
हंसमंत्र जपेमाला हंदारणसमु
द्भवा नान्या माला अनन्यानां ह
स्तांगुलिमयी विना हेमीमणिमा
यीमाला प्रशस्ता कमलाजपेत्।
सरस्वत्या मंत्रजपे रौप्याख्याका वि
निर्मिता प्रजापति जपेमालापुत्र
जीव समुद्भवा पुत्रकामनयाणांच
सदापुत्रप्रदात्मसा राम मंत्र जपे
माला पद्मबीजसमुद्भवा धात्रीफ
लमयी माला विष्णोः कामनयाजपे

रुद्राक्षैश्च भद्राक्ष ह्लवीज स
म्भवा महेशान मंत्रजपे त्वेता
मालाः फलप्रदाः स्फाटिकी सर्व्वदे
वानामथवानरत्न जपे कुशाग्र
ग्रन्थिमयी शुद्धा गायत्री वैष्णवे जपे
श्रीहरेरंगुलिमयी जपे माला हि
जन्मनां इति मायातन्त्रे खंडे ९ ८
अध्यायः अपरञ्च जपादौ
पूजयेन्मालां तोयैरभ्युक्ष्य यत्नतः
निधाय मण्डलस्यान्तः सद्यो हृल्लगा
ताञ्चवा ओं माले महामाये सर्व्व
शक्तिस्वरूपिणि चतुर्व्वर्गस्त्वयिन्य
स्तस्तस्मान्मे सिद्धिदा भव पूजयि
त्वा ततो मालां गृहीत्वा दक्षिणक
रे मध्यमाया मध्यभागे वर्ज्जयि ।
त्वा तर्ज्जनीं अनामिका कनिष्ठा
भ्यांयुताया नम्रभावतः स्थापयि ।
त्वा तत्र मालां अङ्गुष्ठाग्रेण तद्गते
प्रत्येकं वीजमादाय जपं कुर्य्यात्
भैरव प्रतिवारं पठेन्मन्त्रं शनैः
शनैः न चालयेत् माला वीजेन
नमयोः स्पर्शयेन्नहि परस्परं पूर्व्व
जाप अङ्गुष्ठेनैवांगुष्ठाग्रेण भैरव
पूर्व्ववीजं जपन्यस्तु मि
पवीजं तु संस्पृशेत् अंगुष्ठेन भवेत्तस्य ।
निष्फलस्तस्य तज्जपः मालां सहृद
यासन्ने स्थाप्य दक्षिण पाणिना देवी

विचिन्तयन् जप्यं कुर्य्यात् होमेन स्फ
शान् स्फाटिकैर्द्राक्षैः रुद्राक्षैः ।
पुत्रजीव समुद्भवैः स्वर्णमणिभिः
सम्यक्प्रवालैरथ वाञ्जकैः अत्र
मालान्तु कर्त्तव्या देवी प्रीतिकरा
परा जपेद्र्यांश्च सततं कुश
ग्रन्थ्याथ पाणिना नानावीजेषु स
र्वेषु रुद्राक्षो मतिमान् प्रियः
रुद्रप्रीतिकरो यस्मात् तस्माद्रुद्राक्षको
वली प्रवालैरथवा कुर्य्यात् दष्टावि ।
शति वीजकैः पंचपंचशता वापि
नक्षत्रैर्नाधिकैरथवा रुद्राक्षैर्यदि
जपेत् इन्द्राक्षैः स्फाटिकैस्तथा
नान्य मध्ये प्रयोक्तव्यं पुत्रजीवा
दिकं चयत् यदन्यत्तु प्रयुज्येत मा
लायां जपकर्म्मणि तस्य कामं च
मोक्षं च नददाति प्रियंकरी ज
न्मान्तरे जायेत सर्वदा वैराग पा
रगः मित्रीभावं नदाप्नोति वान्ध
वैः पापकर्म्मभिः एको मेरुस्त
त्रदेयः सर्व्वेभ्यः स्थलसंभवः अ
ग्रमूले ततस्तस्मात् सूत्रं सूत्रेनतं
तथा विन्यसेत् क्रमतस्तस्मात् ।
सर्पाकारा हि सा यतः ब्रह्मग्रन्थियु
तं कुर्य्यात् प्रतिवीजं यथा स्थिते ।
अथवा ग्रन्थिरहितं दृढरज्जु सम
न्वितं त्रिराहूमाथ्य मध्यैनैवाही ।

हृत्प्रोत देशतः ग्रन्थिः प्रदत्ति ।
णवर्त्तेः स ब्रह्मग्रन्थिसंज्ञकः मा
लमनायोजयेन्मालां नामंत्रो योजयेत्
द्रुयः हृदमन्त्रं नियुञ्जीत जपेत्तुस
ति तो यथा यथा हस्तानस्थवेत
जपतः स्वकृतः तथा चरेत् हस्ताच्च्युता
यां विघ्नः स्याच्छिन्नायां मरणं भवेत् एवं
यः कुरुते मालां जप्यं च मयैकोदितं
सप्राप्नोति ईप्सितं कामं हीने
स्याद्विपर्य्ययः अन्यत्रापि जपे
मालां जप्यं देवमनोहरं ई
दृशीं साधकः कुर्य्यात् नान्यथा
तु कदाचन यथाशक्ति जपं कु
र्य्यात् सेव्य यैव प्रयत्नतः अमो
घ्योनेन यज्जपं तत्सर्वं निष्फलं भ
वेत् जपमालां शिरोदेशे संस्थाप्या
नेऽथवान्यसेत् इति कालिका पु
राणे ७४ अध्यायः ॥ अथ धा
मालादिधारणं तन्त्रसारधृता ।
माला धारयेत्तुलसीदलैः पद्मा
हे तु तुलसीकाष्ठैः फलैर्धात्र्याश्च
निर्म्मिता धारयेत्तुलसीकाष्ठभूष
णानि च वैष्णवः मस्तके कर्णयोर्वा
होः करयोश्च यथारुचि अथ मा
लाधारणविधिः स्कान्दे संनिवेद्यै
व हरये तुलसीकाष्ठ संभवां मा
लां पश्चात् स्वयं धत्ते सवै भागव

तोत्तमः हरये नार्पयेद्यस्तु तुल
सीकाष्ठ संभवां मालां धत्ते स्वयं
मूढः सयाति नरकं ध्रुवं ताति
तां पंचगव्येन मूलमन्त्रेण मन्त्रितां
गायत्र्या चाष्टकृत्वो वै मन्त्रितां ।
धूपयेच्च तां विधिवत् परया भ
क्त्या सद्योजातेन पूजयेत् तुल
सीकाष्ठ संभूते मालेकृष्णजनप्रि
ये विभर्म्मि त्वा महंकण्ठे कुरुमां
कृष्णवल्लभं यथा त्वं वल्लभा विष्णो
र्नित्यं विष्णुजनप्रिया तथा मां
कुरु देवेशि नित्यं विष्णुजनप्रियं
दाने मा धात्रहृद्द्विष्टो लासि मां
हरि वल्लभे मन्त्रेणनेन समंनेभ्य
स्तेन माला निगद्यते एवं
संप्रार्थ्य विधिवन्मालां कृष्णगले
र्पितां धारयेद्वैष्णवो यो वै स
गच्छेद्वैष्णवं पदं अथ माला
धारणनित्यता तत्रैव स्कान्दे कार्त्ति
कप्रसंगे धात्रीफलकृतां मालां
कंठस्थां यो वहेत्तहि वैष्णवो न स
विज्ञेयो विष्णुपूजा रतो यदि गा
रुडे धारयन्ति न ये मालां हैतु
काः पापबुद्धयः नरकान्न निवर्त्तन्ते
दग्धाः कोपाग्निना हरेः अत एव
स्कान्दे तत्रैव तत्रस्था तुलसी मा
लां धात्री मालां विशेषतः महा



पातकसंहन्त्री धर्मकामार्थदायि
नी अथमाला माहात्म्यं।
अगस्त्यसंहितायां निर्म्माल्य तु
लसी माला युक्तो यश्चार्चयेद्धरिं
यद्यत्करोति तत्सर्वमनन्तफलदं
भवेत् यः कुर्य्यात्तुलसीकाष्ठैरक्ष
माला स्वरूपिणीं कण्ठमालां च य
त्नेन कृतं तस्याक्षयं भवेत् नार
दीये यः कण्ठलग्नतुलसी नलिना
क्षमाला यद्वा ललाटफलके लस
दूर्द्ध्वपुण्ड्रः ये बाहुमूलपरिचिह्नि
तशङ्खचक्रा स्ते वैष्णवा भुवनमा
शुपवित्रयन्ति किञ्च भुजयुगम
पि चिह्नै रङ्कितं यस्य विष्णोः पर
मपुरुष नाम्नां कीर्त्तनं यस्य वाचि
ऋजुतरमपि पुण्ड्रं मस्तके यस्य कण्
ठे सरसिज मणिमाला यस्य तस्या
स्मि दासः विष्णुधर्मोत्तरे श्रीभगव
दुक्तौ तुलसीकाष्ठ मालां च कण्ठ
स्थां वहते त्वयः अप्यशौचोऽप्यना
चारो मामेवैति न संशयः।
स्कान्दे धात्रीफलकृता मालातुल
सीकाष्ठसम्भवा दृश्यते यस्य दे
हे तु स वै भागवतो नरः तुलसी
दलजां मालां कण्ठस्थां वहते तुयः
विष्णूत्तीर्णां विशेषेण स नमस्यो
दिवौकसां तुलसीदलजा माला
धात्रीफलकृताप्यथवा ददाति
पापिनां मुक्तिं किम्पुन विष्णुसेवि
नां तत्रैव कार्त्तिकप्रसंगे यः
पुनस्तुलसीमालां कृत्वा कण्ठे जना
र्द्दनं पूजयेत् पुण्यमाप्नोति प्रति
पुष्पं गवां युतं अयुत संख्यया।
दानफलमित्यर्थः यावद्दिनानि कं
ठस्था धात्रीमाला नरस्य हि तावत्त
स्वशरीरत्व प्रीत्या लभति केशवः
स्पर्शाच्च यानि लोमानि धात्रीमा
लाकलौ नृणां तावद्वर्षसहस्राणि
वसते केशवालये यावद्दिनानि
वहते धात्रीमालां कलौ नरः ता
वद्युगसहस्राणि वैकुण्ठवसतिर्भ
वेत् माला युग्मं च यो नित्यं
धात्री तुलसि सम्भवं वहते कण्ठ
देशे च कल्पकोटिं दिवं वसेत्
तुलसिसम्भवमिति कृत्वा तु माघे
गारुडे च मार्कण्डेयोक्तौ तुलसी
दलजां मालां कृत्वा नीर्णां वहेत्तु
यः पदे पदेऽश्वमेधानां दशा
नां लभते फलं ॥ तुलसी
काष्ठ सम्भूतां यो मालां वहते न
रः फलं यच्छति दैत्यारिः प्रत्यहं
द्वारकोद्भवं निवेद्य केशवे मा
लां तुलसीकाष्ठसम्भवां वहते
यो नरो भक्त्या तस्यवै नास्ति पा


तकं सदा प्रीतमनास्तस्य कृष्णो
देवकीनन्दनः तुलसीकाष्ठ सम्भू
तां यो मालां वहते नरः प्राय
श्चित्तं न तस्यास्ति नाशौचं तस्य
विग्रहे तुलसीकाष्ठ सम्भूतां यो
मालां वहते नरः तुलसीकाष्ठ
सम्भूतं शिरसो वह्नभूषणं बा
ह्वोः करे च मर्त्यस्य देहे तस्य स
दा हरिः तुलसीकाष्ठ मालाभि
र्भूषितः पुण्य माचरेत् पितॄणां
देवतानां च कृतं कोटिगुणं कलौ
तुलसीकाष्ठमालां तु प्रेतराजस्य
दूतकाः दृष्ट्वा नश्यन्ति दूरेण वातो
द्धूतं यथा दलं तुलसीकाष्ठ मा
लाभि र्भूषितो भ्रमते यदि दुःस्व
प्नं दुर्निमित्तं च न भयं शस्त्रजं।
क्वचित् गौतमीयेऽपुरश्चरणप्रसं
गे तथामलक सम्भूतैस्तुलसीका
ष्ठनिर्म्मितैः इत्यादि तत्रैव पु
ण्डरीक भवा माला गोपालमन्त्र
सिद्धिदा आमलकीभवा माला सा
र्वसिद्धिप्रदा मता तुलसीसम्भवा या
तु मोक्षं वितनुते ऽचिरात् इति
श्रीहरिभक्तिविलासः अथ
रुद्राक्षमालाधारणफलादि लिङ्ग
पुराणे विना भस्म त्रिपुण्ड्रेण विना
रुद्राक्षमालया पूजितोऽपि म
हादेवो न स्यात्तस्य फलप्रदः सं
वत्सरप्रदीपे त्रिपुरस्य वधे का
लरुद्रस्याक्ष्णोऽपतंस्तये अश्रु
णो बिन्दव स्तेभ्यो रुद्राक्षा अभवन्
भुवि यद्यप्येकादिचतुर्द्दश मुख
रुद्राक्षेषु मन्त्रफलविशेषाः सन्ति
तथापि सुलभत्वात् पञ्चवक्त्रस्य फ
लमन्त्रावभिधीयेते यथा स्कान्दे
पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्ना
म नामतः अगम्यागमनाच्चैव अभ
क्ष्यस्य भक्षणात् मुच्यते सर्व पा
पेभ्यः पञ्चवक्त्रस्य धारणात्।
इति तिथ्यादितत्त्वं ॥

मालाकण्टः पुं अपामार्गः इति
राजनिर्घण्टः ॥

मालाकन्दः पुं मूलविशेषः त
त्पर्य्यायः आविलकन्दः २ त्रिशि
खिदला ३ ग्रन्थिदला ४ यादिकन्दः
५ ग्रन्थिदला ६ कन्दलता ७ अस्य
गुणाः तीक्ष्णत्वं गण्डमालाना
शित्वं दीपनत्वं गुल्महारित्वं।
वातश्लेष्मापकर्षकारित्वं च इति
राजनिर्घण्टः ॥

मालाकाली माला इति शब्दर
त्नावली ॥

मालाकारः पुं वर्णसङ्करजातिवि
शेषः माली इति ख्यातः तत्।




पर्य्यायः मालिकः २ इत्यमरः
मालाकारः ३ पुष्पाजीवी ४ स्रजा
जीवकः ५ पुष्पलावः ६ इति जटाध
रः पुष्पलावकः ७ इति शब्दरत्ना
वली सच शूद्रायां विश्वकर्म्मणो
जातः इति ब्रह्मवैवर्त्तपुराणं ।
अपिच तैलिक्यां कर्म्मकाराच्च
मालाकारस्य संभवः इति परा
शरपद्धतिः ॥
मालाग्रंथिः पुं मालादूर्वा इति
राजनिर्घंटः ॥
मालातृणं क्ली भूतृणं इति रा
जनिर्घंटः ॥
मालातृणकं क्ली भूस्तृणं इ
त्यमरः हेगेयखड इति ख्याते मा
लारूपं तृणं मालातृणं स्वार्थे कः
भूवस्तृणं मूलमवात् भूस्तृणं म
नीषादित्वात् साधुः मालातृणकभू
स्तृणे इति क्लीवे इति स्वभूमादयः
मालातृणक भूस्तृणाविति पुंसि
पठंति केचित् स्वामीतु च्छत्राति
च्छत्रादि भूस्तृणांतं पर्य्यायमाह
यथा भूस्तृणो रौहिषो भूतिर्भूमि
कोऽथ च्छत्रकः मालातृणाख्य
पालघ्नातिच्छत्रकस्येति रा
मकपूर्वं वङ्गपत्रकाडं कर्पूरस्तगं
धि इदंतु शातपुष्पिकावदुत्कटगंधं

मूलग्रंथ चभवतीत्यनयोर्भेदः इति
तट्टीकायां भरतः ॥
मालादूर्वा स्त्री दूर्वाविशेषः गांडि
याढूर्वा इति भाषा तत्पर्य्या
यः वल्लिदूर्वा २ अलिदूर्वा ३ माला
ग्रंथिः ४ ग्रंथिला ५ ग्रंथिदूर्वा ६ मूल
ग्रंथिः ७ वेल्लनी ८ ग्रंथिमूला ९ रोहत्
पर्वा १० पर्ववल्ली ११ शिवाख्या १२
अस्याः गुणाः समधुरत्वं तिक्त
त्वं शिशिरत्वं पित्त दोष प्रश
मनत्वं कफवांतितृषापहत्वंच ।
इति राजनिर्घंटः ।
मालारिष्टा स्त्री पाठी इति राज
निर्घंटः ॥
मालालिका स्त्री स्पृक्का इति राज
निर्घंटः ॥
मालाली स्त्री स्पृक्का इति राज
निर्घंटः ॥
मालिः पुं सुकेशराक्षसपुत्रः
यथा ग्रामणी नाम गंधर्वो विश्वा
वसुसमप्रभः तस्यदेववतीनाम
द्वितीया श्रीरिवात्मजा त्रिषुलो
केषु विख्याता रूप यौवनशालि
नी तां सुकेशाय धर्म्मात्मा ददौ
रक्षः श्रियं यथा वरदान कृते
श्वर्यं संप्राप्तं प्राप्यपतिं प्रियं आसी
द्देववती तुष्टा धनं प्राप्येव ।

निर्द्धनः सतया सह संयुक्तो रा
जा रजनीचरः ततः कालेन सुकेश
स्त्व जनयामास राघव त्रीन्पुत्रान्
जनयामास त्रेताग्निसमविग्रहा
न् माल्यवंतं सुमालिंच मालिंच
बलिनांवरं इति रामायणे उत्त
रकांडे ५ सर्गः ॥
मालिकः पुं मालाकारः इत्य
मरः पक्षि भेदः इति मेदिनी
रंजकः इति शब्दरत्नावली ॥
मालिका स्त्री सप्तला पुत्री ग्री
वालंकारणं पुष्पमाल्यं नदी
विशेषः इति मेदिनी ॥ स्रगा
इति हारावली क्षमा इति
शब्दचंद्रिका ॥
मालिनी स्त्री मातृकाभेदः छंद
भेदः मालिकपत्नी ॥ गौरी
चंपानगरी मंदाकिनी नदी
भेदः इति मेदिनी अग्निशि
खावृक्षः उपलभा इति शब्दचंद्रि
का सच छंदोभेदः पंचदशाक्षर
पादच्छंदः यथा ननमयययुतेयं
मालिनी भोगिलोकैः मृग मद
कृतचर्च्चा पीनकौशेयवासा रुचिर
शिखिशिखंडाबद्ध धम्मिल्ल पाशा
अनुजनि हिमसेवं शाश्वत कोशा
यंती हृत मधुरिपुलीला मालिनी

पातुराधा इतिच्छंदोमंजरी ॥
मालिन्यं क्ली मलिनत्वं मलिनस्य
भाव इत्यर्थे ष्यप्रत्ययेन निष्पन्नः
माली पुं मालाकारः इति मा
लिनी शब्ददर्शनात् सुकेशराक्ष
सपुत्रः यथा सुकेशपुत्रे भग
वन्पितामह वरोद्धतेः अहं
विष्णुर्हरोब्रह्माहं देवराड् हं
अहं यमश्च वरुणश्चंद्रोऽहं रवि
रप्यहं इति माली सुमाली च
माल्यवांश्च राक्षसः बाधंते
समरोद्धर्षा येच तेषां पुरःसराः
इति रामायणे उत्तरकांडे ६ ।
सर्गः ॥
मालुः पुं पत्रलता नारी इति
मेदिनी ॥
मालुधानः पुं मातुलाहिः माल
धासाप इति भाषा इत्यमरः
अष्टनागांतर्गतनागविशेषः यथा
मालुधानश्चित्रसर्पे महापद्मो
ऽपि हृष्यते इति हारावली ।
मालुधानी स्त्री लताभेदः इति
मेदिनी ॥
मालूकः पुं कृष्णार्जकः इति रा
जनिर्घंटः ॥
मालूरः पुं बिल्ववृक्षः इत्यमरः
कपित्थवृक्षः इति राजनिर्घंटः



मालेया स्त्री स्थूलैला इति रत्न
माला ॥
माल्यं क्ली पुष्पं पुष्पस्रक् इति
मेदिनी पुष्पार्थक माल्यशब्दस्य
प्रयोगो यथा यथावाल्पेन माल्ये
न वासितं तिलसर्षपं न मुंचति
स्वकं गंधं तद्वत् सत्सम्पर्शनं
इति महाभारते मोक्षधर्मे १०५
अध्यायः मूर्द्ध्नि म्लानपुष्पदामा
इत्यमरः अस्य पर्यायादि माला
शब्दे द्रष्टव्यः माल्यदानं फलं
यथा गंधमाल्यै रलंकारै स्नेहा
द्दृष्टाश्च निम्नगाः गंधमाल्यप्रदा
येन दाननिश्चयतत्पराः य
मेत्ताः सत्यशीलाश्च सर्वदुःखवि
वर्जिताः सुचिरं दैवतैः सार्द्धं
क्रीडंति दिवि महामुने इति वह्नि
पुराणं अपिच नारसिंहे।
जातीपुष्पसहस्रेण यश्चेन्मालां
सुशोभनां वैष्णवो विधिवत्कृत्वा
तस्य पुण्यफलं शृणु कल्पकोटि
सहस्राणि कल्पकोटिशतानि च
सविष्णुपुरे श्रीमान् विष्णुतुल्यप
राक्रमः जातीपुष्पकृतां मालां
कर्पूरपटवासितां निवेद्य दे
वदेवाय यत्फलं शृणु पार्थिवः
नतद्वर्णयितुं शक्यमपि वर्षशतै

रपि स्कांदे मालती कलिका
माला मौलिहिकस्थिताद्धरे यस्य
शिरसि विप्रेंद्र वाजिमेध फलं
लभेत् स्कांदे मालती माल्य या
विष्णुः पूजितो येन कार्त्तिके पा
पात्तरकृता मालापदात् शौ
रिः प्रमार्ज्जति शौरिर्यमः ॥ वि
ष्णुरहस्ये स्वर्णलक्षाधिकं पुष्पं
मालाकोटिगुणाधिका इति श्रीह
रिभक्तिविलासे ७ विलासः ।
माल्यगलस्य वहिर्गमननिषेधो य
था वहिर्माल्यं वहिर्गंधं भार्य्य
या सह भोजनं विसृज्य वादं
कृत्वा वा प्रवेशंच विवर्जयेत्
इति कूर्मपुराणे उपरिभागे १५
अध्यायः स्वयं माल्यापकर्ष
ण निषेधो यथा नाश्नीयात् सं
धिवेलायां न गच्छेन्नापि संवि
शेत् नैव प्रलिखेद्भूमिं ना
त्मनोपहरेत् स्रजं इति मान
वे ४ अध्यायः न च मालां स्वतां
स्वयमेवापनयेत् अर्थात् तस्य ना
पनयेदित्युक्तं इति कुल्लूकभट्टः
केशवाह्ये माल्य धारण नि
षेधो यथा नहि गर्हीकर्णा।
कुर्य्यात् वहिर्माल्यं न धारयेत्
गवांच यानं पृष्ठेन सर्वथैव वि

गर्हितं इति च मानवे ४ अध्या
यः केश कलापाद्वहिर्माल्यं न
धारयेदिति कुल्लूकभट्टः ॥
स्वयं माल्यधारण निषेधो यथा
स्वयं माल्यं स्वयं पुष्पं स्वयंहृष्टं
च चंदनं नापितस्य गृहे क्षौरं
शक्रादपि हरेत् श्रियं इति
कर्म्मलोचनं माल्य चंदन
दान विधिर्यथा आमंत्रयित्वाया
विप्रान् गंधमाल्यैश्च मानवः त
र्पयेच्छ्रद्धया युक्तः सम्मामोदयते
सदा इति वह्निपुराणं ॥
माल्यपुष्पः पुं शणवृक्षः इति
राजनिर्घण्टः ॥
माल्यपुष्पिका स्त्री शणपुष्पी इ
ति राजनिर्घण्टः ॥
माल्यवान् पुं पर्वतविशेषः इत्य
मरः माल्यमालाकारता विद्य
ते ऽत्र माल्यवान् मतः इति
तट्टीकायां भरतः सच केत
मालेलावृत्तवर्षयोः सीमापर्वतः
नील निषधपर्वतपर्य्यन्तविस्ता
रः इति सिद्धांतशिरोमणिः राक्ष
सविशेषः सचसुकेशराक्षसात्
ग्रामणी नामक गंधर्वस्य कन्या
यां देववत्यां जातः अस्य भ्राता
सुमाली तस्यकन्यायां कैकस्यां ॥

पुलस्त्यपुत्रविश्रवसो रावणो जा
तः इति रामायणे उत्तरकांडे ५
सर्गः ॥
माल्लः पुं वर्णसंकरजातिविशेषः
स च लेटात्तीवरकन्यायां जातः
इति ब्रह्मवैवर्त्तपुराणं ॥
माह्लवी स्त्री मल्लयात्रा इति हा
रावली ॥
माशब्दिकः त्रि निषेधकर्त्ता त
त्पर्य्यायः प्रतिषेद्धा २ इति त्रि
कांडशेषः ॥
माषः पुं व्रीहिभेदः माषकलाइ
इति उरिद् इतिच भाषा तत्
पर्य्यायः कुरुविंदः २ धान्यवीरः
३ वृषाकरः ४ मांसलः ५ वला
ढ्यः ६ पित्र्यः ७ पितृभोजनः ८ अ
स्य गुणाः स्निग्धत्वं वहुमलकरत्वं
शोषणत्वं श्लेष्मकारित्वं अत्य
र्थवीर्य्यत्वं कटित्वं रक्तपित्त प्र
कोपनत्वं वातहरत्वं गुरुत्वं ।
वलकरत्वं रोचकत्वं स्वादुत्वं
श्रमसत्त्ववतां नराणां नित्यं सेव
नीयत्वं इति राजनिर्घण्टः अ
पिच माषो गुरुः स्वादुपाकः स्नि
ग्धो रुच्यो ऽनिलापहः स्रंसनः
संतर्पणो वल्यः शुक्रलो वृंहणः पराः
भिन्नमूत्र मलस्तन्यमेद पित्त

कफप्रदः गुदकीलार्द्दितश्वास
पंक्तिशूलानि नाशयेत् इति
कफपित्तकरा माषाः इति च
भावप्रकाशः अन्यच्च माषो वृ
ष्यो बलो हृद्यः स्निग्धोष्णो मधुरो गु
रुः वातघ्नो वृंहणो बल्यो मेदो मां
सकफप्रदः इति राजवल्लभः
माषसूपमूलक भक्षणनिषिद्धं
यथा मूलकं माषसूपेन मधुना च
न भक्षयेत् इति च राजवल्लभः
चतुर्दश्यां रविवारे च माषभक्षण
निषेधो यथा विरोगी च माष
के इति माषमामिषं मांसे च
मसूरं निम्बपत्रकं भक्षयेद्यो र
वेर्वारे स जन्मन्यपुत्रकः इति
च तिथ्यादितत्त्वं । परिमाण
विशेषः माषा इति भाषा तत्
पर्य्यायः माषकः २ माषः ३ मासः
४ इत्यमरभरतौ हेमः ५ धान
कः ६ स च मागधमानेन कृतम
ते ५ गुञ्जा चरकमते ६।८ गुञ्जा
परिमाणं कालिङ्गमानेन कृतम
ते ५।६।८ गुञ्जापरिमाणं इति
भावप्रकाशः वैद्यकान्तरे १० गुं
जापरिमाणं यथा गुञ्जाभिर्द
शभिर्माषः शाणो माषचतुष्टयं
इति वैद्यकपरिभाषा ज्योतिः

स्मृतिमते १२ गुञ्जापरिमाणं ।
यथा पलं तु लौकिकैर्मानैः सा
र्द्धरत्तिद्विमाषकं तोलकत्रितयं
ज्ञेयं ज्योतिर्ज्ञैः स्मृतिसम्मतं
इति तिथ्यादितत्त्वधृतवचनेन
पलं अष्टरत्तिकाधिकमाषद्वया
धिकतोलकत्रयं एतेन माषकप
रिमाणं द्वादशरत्तिकं भवति ।
मूर्खः त्वग्दोषभेदः इति मेदिनी
माषकः पुं मासकः पञ्चरत्तिकप
रिमाणं यथा गुञ्जाः पञ्चाद्य मा
षकः इत्यमरः दशार्द्धगुञ्जं प्र
वदन्ति माषं माषाह्वयैः षोडश
भिश्च कर्षं इति लीलावती च
षड्भिश्च रत्तिकाभिः स्यान्माषको
हेमधान्यको माषो गुञ्जाभिर
ष्टाभिः सप्तभिर्वा भवेत् क्वचित्
इति भावप्रकाशः ॥
माषकलायः पुं स्वनामख्यातश
स्यं यथा कलायशब्दो विशेषसामा
न्ये च अत एव माषकलाय इत्यादि
प्रयोगः इत्यमरटीकायां भरतः
माषपर्णी स्त्री वनमाषः माषाणी
इति भाषा तत्पर्य्यायः हयपुच्छी
२ काम्बोजी ३ महासहा ४ इत्य
मरः सिंहपुच्छी ५ ऋषिप्रोक्ता ६
कृष्णवृन्ता ७ पाण्डुलोमशपर्णिनी ८

इति रत्नमाला आर्द्रमाषा ९ मां
समाषा १० मङ्गल्या ११ हयपुच्छि
का १२ हंसमाषा १३ अश्वपुच्छा १४
पाण्डुरा १५ माषपर्णिका १६ कल्या
णी १७ वज्रमूली १८ शालिपर्णी १९
विसारिणी २० आत्मोद्भवा २१ व
ज्रफला २२ स्वयंभूः २३ सुलभा २४
चना २५ सिंहविन्ना २६ विशाखि
का २७ अस्या गुणाः तिक्तरसत्वं
वृष्यत्वं दाहज्वरापहत्वं शुक्र
वृद्धिकारित्वं बल्यत्वं शीतलत्वं
पुष्टिवर्द्धनत्वं च इति राजनिर्घण्टः
अपि च माषपर्णी सूर्य्यपर्णी
काम्बोजी हयपुच्छिका पाण्डुलो
मशपर्णी च कृष्णवृन्ता महासहा
माषपर्णी हिमा तिक्ता रूक्षा शुक्र
बलाशकृत् मधुरा ग्राहिणी शो
थवातपित्तज्वरास्रजित् इति ।
भावप्रकाशः ॥
माषभक्तिबलिः पुं माषतण्डुल
दधिमिश्रितपूजोपहारविशेषः
अत्र केचित् हरिद्राहतमपि मि
श्रयन्ति यथा एष माषभक्तबलिः
ॐ नयने कालि सर्वेशे सर्वभूतसमा
वृते रहस्या निजभूतेभ्यो बलिं
गृह्ण शिवप्रिये ॐ कालि नमः
प्रार्थनामन्त्रो यथा ॐ भूतप्रेत


वीरे दुर्गे कामाख्ये साधिनि ।
अनेन बलिदानेन सर्व्वान् कामान्
प्रयच्छ मे इति कृत्यतत्त्वं भैर
व्याद्यं बलिदेयः ॥
माषवर्द्धकः पुं स्वर्णकारः इति श
ब्दमाला ॥
माषशः ब्य प्रतिमाषं माषं माष
ददाति इत्यर्थे शसप्रत्ययेन नि
ष्पन्नं इति सिद्धान्तकौमुदी ।
माषादः पुं कच्छपः इति शब्दर
त्नावली माषभक्तकेति ॥
माषीणं / माष्यं क्ली माषक्षेत्रं यथा ति
लस्य तैलीनवन्माषीमा
णभङ्गादिरूपता इत्यमरः यथा
तिलस्य क्षेत्रं तिल्यं तैलीनञ्च
भवति तथा माषादीनामपि द्वि
रूपता द्वैरूप्यं भवति इति तट्टी
कायां भरतः ॥
मास पुं चन्द्रः मासः इति मेदिनी
अस्य प्रथमैकवचनान्तरूपं माः ।
मासः पुं माषपरिमाणं माषा
इति भाषा इत्यमरटीकायां भरतः
शुक्लकृष्णपक्षद्वयात्मकः कालः
स च पौषमाघादिद्वादशसंज्ञकः
इत्यमरः मासे इत्यस्यायं मासः
सः चान्द्रमासस्येयं अन्यत्ति ।
सौरादिषु तु मस्यते परिमाणेन ।

ऽनेनासौ वा मासः मसि यै इ
परिमाणे घञ् माः सांतोऽपि
मास्त्वमासोऽपिदृश्यते इति
हट्टः इतिभरतः ॥ स्मृतिम
तेपि पौषादि द्वादश संज्ञकः
यथा वक्रवत् परिवर्त्तनस्सूर्य्यः
कालवशाघतः अतःसांवत्सरं श्रा
द्धं कर्त्तव्यं मास विच्छिते मास
विच्छिन्नकर्त्तव्यं पौष माघादयमेव
हि यतस्तत्र विधानेनसमासःप
रिकीर्त्तितः इतिलघुहारीतः ।
कार्त्तिकादिद्वादश संज्ञकोऽपि
यथा अन्त्यो पान्त्यौ विभौ ज्ञेयौ।
फाल्गुनश्च विभो मतः शेषामा
सा हि भा ज्ञेयाः कार्त्तिकादिर्ब्बवा
स्यायाः सचचैत्रादिद्वादशसंज्ञक
श्च यथाव्यक्तं वत्सरारम्भे चैत्रमा
सि जगद्ब्रह्मा ससर्ज्ज प्रथमेऽहनि
शुक्लपक्षे समग्रं तु तदा सूर्य्योदये
सति प्रवर्त्तयामास तदा कालस्य ग
णनामपि ग्रहान्नागानृतून् मासा
न् वत्सरान् वत्सराधिपान् इत्येते
न मासत्वे वत्सरारम्भत्वं च श्रुतं
ब्रह्मसिद्धान्तेपि चैत्रसितादेरुद
याद्भानो र्दिनमासयुगकल्पाः सृ
ष्ट्यादौ लंकायामिह प्रवृत्ता दिने
शस्य चैत्र सितादेश्चैव शुक्ल प

तिपद स्तामारभ्य तन्मध्ये: अपिच
मीनादिस्थो रविर्येषामारंभप्रथम
क्षणे भवेत्तेऽ चान्द्रमासाः चै
त्राद्या द्वादशस्मृताः चान्द्र सा
वनसौरं नाक्षत्रभेदेन भवचतु
र्विधः शुक्लप्रतिपदादि दर्शान्ता
श्चान्द्रः तत्र चान्द्रोऽपि द्विविधः शु
क्लप्रतिपदादि दर्शान्तो मुख्यः कृष्ण
प्रतिपदादि पौर्णमास्यन्तो गौणः
यत्किं त्रिंशत्तिथ्यात्मकस्येति ।
द्विविधो गौणः त्रिंशाद्दिनात्म
कः सावनः आदित्यैकराशि भो
गावच्छिन्नः सौरः सप्तविंशतिनक्ष
त्रावच्छिन्न स्त्रिंशाद्धात्मकदिनात्मक
श्चान्द्र चन्द्रस्तत्रः तथा च ब्रह्मसिद्धा
न्ते चान्द्रः शुक्लादि दर्शान्तः सावन
स्त्रिंशतादिनैः एकराशौ रविर्य्याव
त्कालं मासः स भास्करः सर्व्वक्षप
रिवर्त्तस्तु नाक्षत्र इति चोक्तं सू
र्य्यसिद्धान्ते नाडीषष्ट्यात्तु नाक्षत्र
महोरात्रं प्रचक्षते तत्त्रिंशता भ
वेन्मासः सावनोऽर्क्कोदयैस्तथा।
ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौ
र उच्यते तत्त्रिंशतानाक्षत्रदिन
त्रिंशता मासो नाक्षत्रमासः त
त्त्रिंशता स्यात्तिथ्या पालिमानेतु
ल्याचांद्रपवमासपद शकाः जीम

तवाहनमते सौरएवशकाः चां
द्रप्रमाणं प्राग्उक्तं सौरप्रमाणंत
सौरास्तु माघादयो द्वादशएव।
यथा: तथाचश्रुतिः तपस्तप
स्यौ शैशिरावृतुः मधुश्चमाधवश्च
वासंतिकावृतुः शुक्रश्च शुचिश्च
ग्रैष्मावृतुः अथैतदुदगयनं देवा
नां दिनं नभाश्चनभस्यश्चवार्षिका
वृतुः इषश्चऊर्जश्चशारदावृतुः
सहाश्च सहस्यश्चहैमंतिका
वृतुः अथैतद्दक्षिणायनं देवानां
रात्रिरिति अत्रायनस्य सौरत्वेन त
द्घटक तपस्यादीनामपि सौर
परतेति अतो भूयसा मनुर्यो ।
येनवैशाखादयः सौरवाचिनोऽव
धार्य्यंते इतिमलमासतत्त्वं ॥
अपिच मेषस्थिते रवेर्मासो वै
शाखोऽद्रमुखः स्मृतः इतिसंके
तकौमुदी ॥ अथकर्मविशेषे
मासविशेषादिः तत्रपितामहः
आह्निके पितृकृत्ये च मासश्चां
द्रमसः स्मृतः विवाहादौ स्मृतः
सौरो यज्ञादौ सावनो मतः अथ
मादिपदं याज्ञग्रहचारपरं यत्क
र्मस्वर्य्यभोगवशप्रस्तावनयज्ञ।
शिष्याद्रगयनादिविहितं तत्सर्वं
अयनस्य सौरमास घटितत्वात्

तच्च चूडोपनयनादि द्वितीयादि
पदं सत्र भूतिहद्धि प्रायश्चित्ताय
तोयाशौचं गर्भाधान पुंसवनसीमं
तोन्नयन नामकरणान्नप्राशन नि
ष्क्रमणचूडादिपरं तथा च विलय
मात्तेर अध्यायनंच ग्रहचारकर्म।
सौरेण मासेन सदाख्यवश्यन स
त्रायणपार्श्याद्य सावनेनलोकांच
यत्स्याद्व्यवहारकर्म अध्यायनं अ
ध्वगमनं यात्रेतियावत् अथ
सौरादि मास विहित कर्माणि
विवाहोत्सव यज्ञेषु सौरं मानं
प्रशस्यते पार्वणे त्वष्टका श्राद्धे
चान्द्रमिष्टं तथाह्निके अत्र यज्ञ
पदमुदगयनादि विहित पशुया
गाभिप्रायं पितामहोक्तेत्वविलय
मौनैरोक्त सत्रपरं गर्गः आयु
र्दायविभागश्च प्रायश्चित्तक्रिया
तथा सावनेन तु कर्त्तव्या शत्रू
णामप्युपासना सूर्य्यसिद्धांते सूत
कादिपरिच्छेदो दिनमासाब्दपा
स्तथा मध्यमग्रह भुक्तिश्च सावनेन
तु कीर्त्तिता मध्यमग्रहभुक्तिर्योगि
गणाभाप्रसिद्धा नाक्षत्रमासप्र
योजनं विस्पष्टं तोरे नक्षत्र
सत्रायणयतानि चेंद्रोमीसेन कर्य्या
द्रगणात्मकेन नक्षत्रसत्राणिमास




साध्य याग विशेषरूपाणि यानि।
कर्मसिद्धानि इंद्रोरयनानि सोमाय
नाव्यसत्राणि इति समयप्रकाशः
एवं जन्मनक्षत्रे शनिभौमवारे फ
लं नास्त्रमासेन योग्यत्वात् यथा
जन्मनक्षत्रे यदि स्यातां वारौ भौम
शनैश्चरौ स मासः कर्मसोनाम
नमोदुःखप्रदायकः इति मलमा
सतत्त्वे मलमासविवरणं मलमास
शब्देद्रष्टव्यं अथ मासकृत्यं आ
षाढशुक्लैकादश्यां कुर्यात्स्वापं।
महोत्सवं आषाढेचरथं कुर्यात्
श्रावणे श्रवणाविधिं भाद्रेचजन्म
दिवस उपवासपरो भवेत् प
क्षमंच पारिवर्त्तं माश्विनेमासिका
रयेत् उत्थानं श्रीहरेः कुर्याद्दन्य
था विलद्रोहकृत् शुभेचैवाश्विने
मासि महामायाव पूजयेत् का
र्तिकेमासि यत्कृत्यं शृणु देवि व
दामि सप्तवर्ग्याः प्रमाणेन दीपः
स्यात्स्वरांगुलः पक्षांतेचप्रकर्त्त
व्यादीपमालावलिःशुभाः मार्ग
शीर्षे सितेपक्षे षष्ठ्यांच सितवस्त्रकैः
पूजयेज्जगदीशंवस्त्रलवस्त्रैर्विशा।
षतः पौषेपुष्पाभिषेकंच वर्जये
दंदनं तथा संक्रान्त्यां माघमासे
त साथियामित तंडुलान् निवे

घ विलवे भक्त्या इमं मंत्र मुदीर
येत् जीवनं सर्वभूतानां जनक
स्त्वं जगद्गुरो त्वन्मायालीनता पा
मात्वयैव जनिता प्रभो कर्पूराक्त
नि द्रव्याणि हुताक्तानि निवेदयेत्
ब्राह्मणान् भोजयेद्भक्त्या देवदेव
पुरस्थितान् अभ्यर्च्य भगवद्भक्त्या
द्विजांश्चभगवद्धिया एकस्मिन्भो
जिते भक्ते कोटि भवति भक्तितः
विप्रभोजन मात्रेणाव्य सांगो।
भवेद्भुव पंचम्यां शुक्लपक्षे त
स्नापयित्वाच केशवं पूजयेद्भग
वद्भक्त्या वृतपल्लव संमितैः फ
लपूर्णैश्च विविधैर्वासितैःपटवा
सितैः काननं रमणीयंच प्रदीप्तदी
प दीपितं डालेद्रे रंभा जम्बीर
नागरंगक पूगकं नारिकेलंच
धात्रीच बेपानाल हरीतकी श्रीम
श्च हस्तकैश्च सर्वैर्ऋतुसमावितं
पुष्पैश्च विविधैश्चैव फल पुष्पा
समन्वितं वितानैःकुसुमोद्यानैर्वा
दित्रैर्णकैस्तथा वृतशालोप।
शाखाभिः शोभितच्छत्रचामरैः
विशेषतः कलियुगे दोलोत्सवो।
विधीयते फाल्गुने व चतुर्दश्यां।
मष्टम्यां मासमंसके अथवा पौर्ण
मास्यांतु प्रतिपत्संधि संमिते

पूजयेद्विधि वद्भक्त्या फलपूर्णैश्च
विविधैः सित रक्तैर्गौर पीतैः
कर्पूरादि विमिश्रितैः ॥ हरिद्रा
दर्यागाद्य रंगरम्यैर्मनोहरैः।
अन्यैर्वारंगरम्यैश्च प्रीणयेत् प
रमेश्वरं एकादश्यां समारभ्य
पंचम्यंतं समापयेत् पंचाहानि।
अहानि सप्त हीलोत्सवा विधीयते
दक्षिणाभिमुखं कृत्वं दोलयान
सकृन्नराः दृष्ट्वा पापविनिचयैर्मुक्ता
स्तेनात्र संशयः निक्षिप्य जलमा
त्रेतमासमाप वसक्तिने सौवर्णे
पात्रेताम्रेवा रौप्ये वा मृन्मये।
ऽपिवा तोयस्थयोऽर्च्चयेद्देवं शा
लग्रामसमुद्भवं अत्यहं मां म
हाभागे तस्य पुण्यं न गण्यते।
दमनारोपणं कृत्वा श्रीविष्णोव
समर्पयेत् वैशाखो श्रावणो भा
द्रे कर्त्तव्यं वनदर्पणं वैशाखेचतु
तीयायां जलमध्ये विशेषतः अ
थवा मंडपे कुर्यात् मंडले वा गृह
ध्वजे सगंधचंदनेनांग सपुष्पांगो
दिने दिने यथा प्रयत्नतः कार्य्यः
कृशांगो नैवपूजितः चंदना गुरु
कस्तूरी कुष्ठ कुंकुम रोचना जटामां
सी वचाचैव विलोर्गंधाष्टकं तथा
यते गंधयुतेनापि हरे रंगानि

लेपयेत् हरेंव तुलसीकाष्टक
र्पूरागुरु योगतः अथवाकेशरे।
योज्य हरिचंदनमुच्यते अस्मिन
काले कृतभक्त्या येप्रपश्यंति मा
नवाः नतेषां पुनरावृत्तिः कल्पको
टिशतैरपि सुगंधि मिश्रितैस्ता
यैः स्नापयित्वा जगद्गुरुं अथवा
पुष्पमध्येच स्थापयेज्जगदीश्वरं।
वृंदावनं तत्र कृत्वा उपहृतफला
निच विलभक्तेन योग्येन भोजये
त्तद्विशेषतः नारिकेल फलं नीरं
कोषंवा हृत्य दापयेत्। कंदा
फलेच पनसं कोषकुहृत्य दीयते
यथा पचेत्तथा दद्याद्यथाशक्ति
नियोगतः दभा विमिश्रितंवान्न
कृतेनान्नेन दापयेत्। पाचितं
पिष्टकं यात्वस्थादश द्रोणेन च
तिलैश्च तिलसंमिश्रैः फलं शु
द्धं च दापयेत् यद्देवात्मनः प्रि
यस्तत्तदीशाय कल्पयेत् दत्वा नै
वेद्य वस्त्रादी नादद्दीत कथंचन
त्यक्तव्यं विश्वमुद्दिश्य तद्भक्ते
भ्यो विशेषतः इति ते कथितो।
किंचित् समासेन महेश्वरि गो
प्यंच प्रयत्नेन स्वयोनिरिव पार्व
ति इति पाद्मे पातालखंडे १२
अध्यायः ॥




मासकः पुं माषकपरिमाणं यथा
गुंजाः पंचाद्य मासकः इत्यमरः
पंच गुंजाः कललाः आद्यः प्र
थमो मासकः दशगुंजापेक्षया।
आद्यत्वं प्राशस्त्यं तात मुख्यो
मास इत्यर्थो वा मस्यते परि
मीयते ऽनेन मासः मसिपरि प
रिमाणे परीणामे च स्वार्थेकः
मासोऽयं दंत्यांतः मष हिंसा
र्थो मूर्द्धन्यांत स्तस्मात्तु नतेनमा
षो मूर्द्धन्यांत इति जिनेंद्रप्रभृतयः
इत्यमरटीकायां भरतः ॥
मासज्ञः पुं दात्यूहपक्षी इति
शब्दरत्नावली मासज्ञानरि त्रि
मासनं क्ली सोमराजी इति शब्द
चंद्रिका ॥
मासमानः पुं वत्सरः इति त्रि
कांडशेषः मासपरिमाणे क्ली
मासरः पुं भक्तसमुद्भवमंडः तत्
पर्यायः आचामः २ निस्रावः ३
इत्यमरः ॥
मासवर्त्तिका स्त्री सर्षपीपक्षिविशेषः
इति शब्दमाला ॥
मासांतः पुं अमावस्या यथा
पक्षांते निष्फला यात्रा मासांते
मरणं ध्रुवं इति समयप्रदीपः सं
क्रांतिदिनं यथा मासांते सि

यते कन्या तिथ्यंते स्याद्गुर्विणी
नक्षत्रांते च वैधव्यं विप्राणां मृत्यु
दयो भवेत् मासांते दिनमेकं
तु तिथ्यंते घटिकाद्वयं घटिका
त्रितयं भांते विवाहे परिवर्जयेत्
इति रत्नमाला ॥
मासिकं क्ली प्रेतस्य संवत्सराभ्यं
तरे प्रतिमासीयमृतसजातीयति
थिकर्त्तव्यश्राद्धं प्रतिमासकर्त्तव्य
कृष्णपक्ष निमित्तकश्राद्धं तत्प
र्यायः अन्वाहार्य्यं २ इत्यमरः
मासिभवं मासिकं पार्वणश्राद्धं
तत्र अन्वाहार्य्यं वर्त्तते पक्षशेषे
अमावास्यायां देयत्वात् अनु प
श्चात् क्रियते अन्वाहार्य्यं हस्तया
सो रितिव्यणस्वार्थेके अन्वाहा
र्य्यकं च अकृत सपिंडीकरणस्य
वत्सराभ्यंतरे प्रतिमासं यत्श्रा
द्धं तच्चान्वाहार्य्य मिति केचित्।
इत्यमरटीकायां भरतः तयोः
प्रमाणं षाण्मासिकाद्दिके श्राद्धे
स्यांशं पूर्वेषु देवेत ॥ मासि
कानि स्वकीयेनदिवसे द्वादशा
पि च इति पैठीनसिः पिंडानां
मासिकं श्राद्धं अन्वाहार्य्यं विदुर्बु
धाः तच्चामिषेण कर्त्तव्यं प्रशस्तेन
प्रयत्नतः इति मनुः ॥ मासिक

करणस्य व्यवस्था यथा पीठच्छत्रो
पानह रहितानि इहलोकं परि
त्य इत्यादि सर्वःसंगंथ इत्यादि
श्रियादेव्या इत्यादि वनस्पतिरा
स इत्यादि मंत्र च तुष्टय रहितानि
च आद्ये कोद्दिष्टवत् मृताह मृता
हे द्वादश मासिकानि कार्य्याणि
एकादशमासाभ्यंतरे मलमासा
पाते त्रयोदश मासिकानि षष्ठ
मासाभ्यंतरे मलमासपातेऽपि ष
ड्मासिक पूर्वतिथ्यामेव प्रथमषा
ण्मासिकं तथा त्रयोदशमासिकस्य
पूर्वतिथौ द्वितीयषाण्मासिकं एवं ष
ण्मासिकोल्लेखे प्रथमषाण्मासिका
द्वितीय षाण्मासिकत्वेनोल्लेखः प
क्षं मध्येयत् पतितं तत्क्रमकादशपा
अमावस्यायां मासिकांतर तिथौ
वा कृत्वा प्रकृतं कर्त्तव्यं अशौच
पतिते च तदशौचांते कर्त्तव्यं ए
कादशाहादिश्राद्धानि कर्त्तिचित्
कृत्वा यदि स्यात्तदा शेषाण्यन्येना
थिकारिणा समाप्यानि प्रथमा
सिके कोद्दिष्ट श्राद्ध प्रयोगः पूर्व
दिने निरामिषैकभक्तः परदिने
स्नानादिकं कृत्वा एकोद्दिष्टश्राद्ध
विहितकाले भोज्यमुत्सृज्य कुशत्रा
ह्मणं स्थापयित्वा वास्तुपुरुषादिपूज
यि

त्वा भूस्वामि पितृभ्यः श्राद्धाग्रभा
गं दत्वा दक्षिणामुखः अनुज्ञाकृ
र्य्यात् यथा अद्यामुकेमासि अमुक
पक्षे अमुकतिथौ अमुकगोत्रस्य प्रे
तस्य अमुकदेवशर्म्मणः प्रथममा
सिकैकोद्दिष्टश्राद्धं दर्भमयब्राह्मणेः
हं करिष्ये ओं कुरुष्वेत्युत्तरं ततो
गायत्रीं जपेत् देवताभ्य इत्यादि
त्रिधा पठेत् ततः पुंडरीकाक्षं
स्मृत्वा मृज्जलेनश्राद्धीयद्रव्यं प्रोक्ष
येत् रक्ताघ्यं मुक्तकं पूर्णपात्रमेकं दे
शे स्थापयेत् ततः ओं अमुकगोत्र
प्रेत अमुकदेवशर्म्मन्नेतत्ते दर्भा
सनं स्वधा इत्यनेन ब्राह्मणवामपा
र्श्वे दद्यात् अपहतेत्यादिना ति
लान् विकीर्य्य जलं स्पृष्ट्वा ब्राह्मणा
ग्रभूमौ कुशापत्रमेकं पातयित्वा
तदुपरि अर्घ्यपात्रं संस्थाप्य ओं पवि
त्रा सि वैष्णवीत्यनेनानखच्छिन्ने ओं
सोमं नमा पूतमसीत्यनेन प्रोक्षि
ते मेकदलं पवित्रं तत्पात्रे नि
धाय ओं शन्नोदेवी रित्यादि मंत्रेण
जलं दद्यात् ततः ओं तिलोसि
सोम देवत्यो गोसवो देव नि
र्मितः प्रत्नमद्भिः पृक्तः स्वधया
प्रेतान्लोकान्प्रीणाहिनः स्वाहा
इत्यनेन तिलंदत्वा गंधपुष्पादिना




अर्घ्यनिर्मीय कुशांतरेणाच्छाद्य
तत्कुशमुत्सृज्य ब्राह्मणोपवित्रं द
त्वा जलांतरं च दत्वा पुष्पांतरेण
शिरः प्रभृतिसर्वगात्रेभ्यो इति सं
पूज्य तत्पात्रं वामहस्तेन ले वि
न्यस्य दक्षिणहस्तेनाच्छाद्य ॐ
यादिव्या इतिपठित्वा ॐअमुकगो
त्रप्रेतामुक देव शर्मन्नेतत्ते ऽर्घ्यं
स्वधा ततः ॐअमुकगोत्र प्रेता
मुक देवशर्मन्नेतानि गंधपुष्प
धूपदीपाच्छादनानि स्वधा इत्युत
सृज्य पठते गंधः पतत्वेष पुष्पं प्र
ते धूप पठतेदीपः पतत्व आच्छा
दनं ततो ब्राह्मणाग्रभूमौ कुशा
दिक्मप्यनीयनैर्ऋत्यमारभ्य दक्षि
णाग्रांतरेखया वामावर्तेन जलेन
चतुष्कोणमंडलं कृत्वा तत्रभोज
नपात्रं निदध्यात् तत्रसामिषं सर्व
मन्नादिकं परिवेष्य ॐइदं विष्णु
रित्यादि मंत्रेण अन्नादावंगुष्ठ
हं निक्षिप्य ॐअपहतेत्यादिना ति
लान् विकीर्य ब्राह्मणे जलगंडू
षं दत्वा गायत्री व्याहृतिमधुव
तालदभावे गुडं दत्वाहुतं दत्वा ॐ
मधुवातेत्यादि मधु मधु मध्विति च
पठित्वा अन्नमभिमंत्र्य प्रेता ब्राह्म
णो जलगंडूषं दत्वा वामहस्तेनान्न

पात्रं स्पृष्ट्वा ॐअमुकगोत्रप्रेतामुक
देव शर्मन्नेतत्ते सामिषान्नं सोप
करणं स्वधेत्युत्सृजेत् इदं सा
मिषान्नं इदं हविः इमा गंगाया
आपः पतान्युपकरणानि यथास्
त्वं वाग्यतः सह इत्यनेन जलगंडूषं
दद्यात् ततो गायत्रीं त्रिः सकृद्वा ॐ
मधुवाता इत्यादि मधु मधु मध्विति
ॐ अन्नहीनमित्यादि च पठेत् ॐ
आब्रह्मणपठेत् पुन गायत्र्यादि प
ठेत् ॐयज्ञेश्वरो हव्य इत्यादि।
ॐ योगीश्वरमित्यादि याज्ञवल्क्य
श्लोकत्रयं ॐ नहिल्लोभिस्तादि ॐ
दुर्योधन इत्यादि ॐयुधिष्ठिर इत्या
दि सर्वं पठेत् ततो दक्षिणाग्रान्
कुशान्भूमौ संस्थाप्य भूमिं प्रो
क्ष्य सर्व प्रकार मन्नमुद्धृत्य सतिल
मेकीकृत्य वारिणाप्लुत्य ॐअग्निद
ग्धाश्चेत्यादि मंत्रद्वयेन कुशोपरि
विकरेत् ततो हस्तौ प्रक्षाल्य।
चक्षुद दक्षिणकर्णौ स्पृष्ट्वा हरिं स्मृत्वा
ब्राह्मणाय जलगंडूषं दत्वा पूर्ववद्
गायत्री मधुवाता इत्यादिकं मधु
मधु मध्विति च जप्त्वा ॐशेषमन्नं
केनमित्युक्त्वा ॐ इष्टाय दीयतामि
त्युक्तो गृहीत्वा ॐ पिंडदानं महं क
रिष्ये ॐकुरुष्वेत्युक्ते ब्राह्मणा।

संमुखे ॐहस्मीत्यादिना नैर्ऋति
मारभ्य दक्षिणाग्ररेखया जलेनवा
मावर्तेन चतुष्कोण मंडलं कृत्वा
पवित्रे वामहस्ताद्दक्षिणहस्तेन गृ
हीत्वा वामहस्तात्खुरं दक्षिण।
पाणिना दक्षिणाग्रां रेखां मंडलमध्य
स्थाने ॐअपहतेत्यादि निहन्मीत्या
दि मंत्राभ्यां कुर्यात् तदुभमन्तरा।
स्यां दिशि क्षिपेत् रेखोपरि समू
लाग्रायान् कुशानास्तीर्य ॐदेव
ताभ्य इतिपठित्वा ॐ पहि प्रेत
सोम्य गंभीरेभिः पथिभिः पूर्विणे
भिर्देह्यस्मभ्यं द्रविणेह भद्रं रयिं
च नः सर्ववीरं नियच्छ इत्यावाह्य
तिलांश्चास्तीर्य कुशेषु विकिरेत्
ततो वामहस्तेन सतिलजलं गृ
हीत्वा वामहस्ताद्दक्षिणहस्तेन सं
गृह्य ॐअमुकगोत्रप्रेतामुक देव
शर्मन्नवने निक्ष्व स्वधा इत्यनेन द
द्यात् ततः श्राद्धशेष मन्नं सव्यं
जनं मध्वाज्य तिल संयुक्तं सामि
षं गृहीत्वा पिंडं कृत्वा ॐमधुवा
तेत्या दिऋक्त्रयं ततनमीत्या।
दि च पठित्वा बिल्वप्रमाणं पिंडं स
तिलं दक्षिणाग्रकुशत्रयसहितं
वामहस्तस्थितपात्राद्दक्षिणहस्तेन गृ
हीत्वा ॐअमुकगोत्रप्रेतामुकदेवशर्म

न्नेषते सामिषपिंडः स्वधा इत्यवा
नजनस्थाने वाम हस्तात्खुरदक्षि
णहस्तेन दद्यात् ततः आचम्य हरिं
स्मृत्वा पिंड पात्रं प्रक्षाल्य वामह
स्ताद्दक्षिण हस्तेन गृहीत्वा प्रक्षा
लित जलं ॐअमुकगोत्रप्रेतामुक
देव शर्मन्नवने निक्ष्व स्वधा इति पिं
डोपरि दद्यात् ततः ॐअत्र प्रेत
मादयस्व यथा भागमा वृषायस्व
इति जप्त्वा वामावर्तेनोदङ्मुखोभूत्वा
आगमनाच्छ्वासं धृत्वा तेनैव पथा
पुनः वर्तमानः प्रेतं भास्वर मूर्तिं
ध्यायन् ॐअमी मदन्त प्रेत यथा
भागमावृषायिषत इति दक्षिणाभि
मुखो भवन् जपेत् ततः श्वासंत्य
जेत् ॐ नमस्ते प्रेत प्रेत नमस्ते
इति कृतांजलिर्जपेत् ॐगृहान्नः
प्रेत देहि इति गृहिणो पश्येत्
ॐ सद स्ते प्रेत देष्म इति पिंडं
पश्येत् ततो नव मनवं वा शुक्ल
वस्त्रदशाभवं सूत्रं वामहस्ताद्दक्षि
ण हस्तेन गृहीत्वा ॐएतद्वः प्रेत
वास इति पठित्वा पिंडोपरि निद
ध्यात् ततः ॐअमुकगोत्र प्रेता
मुक देव शर्मन्नेतत्ते वासः स्वधा
इत्यनेनोत्सृजेत् ततस्तस्मिन् पिंडं
संपूज्य ॐ वसंताये त्यादि ॥



मंत्रेण सकृन्नमस्कुर्य्यात् ततः ॐ
स्वस्तयोस्त्विनमस्त इतिब्राह्मणाग्रभू
मि मासिंचेत् ॐ शिवा आपः सन्त्व
इति ब्राह्मणे जलं दद्यात् ॐ सं
त्विति प्रतिवचनं ॐ सौमनस्य
मस्त्विति पुष्पं ॐ अक्षितिप्रति व
चनं ॐ अक्षतं चारिष्टं चास्त्विति या
वान्दद्यात् ॐ अस्त्विस्तुत्रं तत
स्तिलाज्य मधुयुक्तं जलंगृहीत्वा ।
ॐ अमुक गोत्रस्य प्रेतस्यामुक देव
शर्म्मणो दत्त मिदं मन्न पानादिकमु
पतिष्ठतां ॐ उपतिष्ठता मिति
प्रतिवचनं ॐ अघोरः प्रेतो
ऽस्त्विति वदेत् ॐ अस्त्विति प्रति
वचनं ॐ गोत्रं नो वर्द्धता मिति
वदेत् ॐ वर्द्धता मिति प्रति
वचनं ततः पिंडोपरि सपवित्रा ।
कुशानास्तीर्य्य ॐ ऊर्ज्जं वहन्तीरमृतं
घृतं पयः कीलालं परिस्रुतं स्वधा
स्थ तर्पयत मे प्रेत मित्यनेन वा
रिधारया सिंचेत् ततः ॐ अघो
स्यादि अमुक गोत्रस्य प्रेतस्यामुक
देवशर्म्मणः कृतैतत् प्रथममासि
केकोद्दिष्टश्राद्धकर्म्मणः प्रतिष्ठार्थं
दक्षिणामिदं रजतं तन्मूल्यं वा विष्णु
दैवतं यथा नाम गोत्राय ब्राह्मणा
याहं ददानीति दद्यात् ततो द
क्षिणां दिशं पश्यन्वरं याचेत ।
नात्र पात्र मालभ्य जपेत् नाशि
षः प्रार्थयेदिति प्रचेतो वचना
दाशिषं न प्रार्थयेत् ततः ॐ दे
वताभ्य इति त्रिः पठेत् ॐ अ
भिरम्यता मिति विसर्जनं ॐ अ
भिरतोस्मीति प्रतिवचनं ॐ आ
मा वाजस्येति प्रदक्षिणं वारि धारया
वेष्टयेत् पिंडास्तु गोऽज विप्रे
भ्योदद्यादग्नौ जले पिवेति क्षि
पेत् आघ्राय इव्यं ब्राह्मणाय द
द्यात् जले वा क्षिपेत् ततो
वामदेव्यं गायेत् अच्छिद्रावधारणं
दीपाच्छादनं विष्णुस्मरणञ्च कुर्य्या
त् एवंप्रकारेण द्वितीयादिमासि
कं कर्त्तव्यं इति स्मार्त्तभट्टाचार्य्य
कृत श्राद्धप्रयोगतत्त्वं अन्यत्
श्राद्धशब्दे द्रष्टव्यं ॥

मासिकः त्रि माससम्बन्धी मासि
भव इत्यर्थे ठिक प्रत्ययेन निष्पन्नः
मासरी स्त्री पमक्षः इति हेमचन्द्रः
मास्म अ वारणं तत्पर्य्यायः
मा २ अलं ३ इत्यमरः ।

माह अ भ माने इति कविकल्पद्रु
मः अ अममाहत् ऋदनुबंधत्वा
ने सकसत्वानुबंध इत्येके भ माह
ति माहते इति दुर्गादासः ॥

माहाकुलः त्रि महाकुलोद्भवः
माहाकुलीनः इत्यमरटीकायां
रायमुकुटः ॥

माहात्म्यं क्ली महात्मता महिमे
त्यावत् यथा माहात्म्यं भगव
त्याश्च पुराणादिषु कीर्त्तितं पाठ
स्तस्य जयः प्रोक्तः पठेद्देवीमना
स्ततः इति तिथ्यादितत्त्वं ॥

माहानामिकः (पुं माहानाम्नीऋ
चामाहानाम्निकः) वेदाध्ययनः इ
ति केचित् ॥

माहिन क्ली राज्यं इत्युणादि
कोषः ॥

माहिरः पुं इंद्रः इति त्रिकांड ।
शेषः ॥

माहिषिकः पुं महिषीपतिः व्य
भिचारिण्णनरकपतिः यथा म
हिषीत्युच्यते नारी या च स्याद्व्य
भिचारिणी तां दुष्टां कामयति
यः सैव माहिषिकः स्मृतः इति
स्कान्दे काशीखण्डे महि षोप
जीवी भगद्वारोपार्जित स्वीय
धनोपजीवी यथा महिषीत्युच्यते
नार्य्या भगेनोपार्ज्जितं धनं उ
पजीवति यस्तस्याः सैव माहिषि
कः स्मृतः इति विष्णुपुराणे २
अंशे ६ अध्याये १५ श्लोकस्य
टीकायां श्रीधरस्वामी ॥

माहिष्यः पुं वर्णसंकरजातिवि ।
शेषः स च क्षत्रियाद्वैश्यायां जातः
इत्यमरः ॥

माहेन्द्रः पुं शुभदंडविशेषः र
व्यादि सप्तवारेषु वायु वरुण यम
माहेन्द्राणा मेकैकदंडा भवंति
तत्र वरुणमाहेन्द्रयोर्दंडौ शुभौ
वायु यमयोर्दंडावशुभौ यथा
ध्यानं वा वयमा सूर्य्यमावावय
कलानिधौ व य मावाकुजे तथा
मावा व य स्तथांबुजे गुरौ ।
वा व य मा चैव सौ वा व य तथा
भृगौ सूर्य्यपुरे य मा वाव घटी
युग्मे शुभाशुभं माहेन्द्रे विज
यो नित्यं वारुणे च यता वामः
वायौ च भ्रमते नित्यं यमे ऽपि
मरणं ध्रुवं इति सारसंग्रहः ।


माहेन्द्रसम्बन्धिनि त्रि ॥

माहेन्द्री स्त्री इंद्राणी इतिशब्दर
त्नावली गोः इतिराजनिर्घंटः

माहेयः त्रि मह्या अपत्यं इति
मुग्धबोधव्याकरणं ॥

माहेयी स्त्री गौः इत्यमरः

माहेशी स्त्री दुर्गा यथा महादे
वास्तुतत्पत्नी महेशानेरितानेयतः
माहेश्यप्यानत्वर्थसा माहेशी




तेन सास्मृता इतिदेवीपुराणे।
५४ अध्यायः ॥
माहेश्वरी स्त्री यवनिका इतिरा
जनिर्घण्टः दुर्गा मातृभेदः इति
शब्दरत्नावली विष्णुः यथा
कन्याकुब्जः कस्त्वं विभ्राजसे कां
स्याकेयं वा नव विप्रभाकोत्व
यंभाति वपुषा पंकजायतलोच
नः निशाम्यतास्तांव वनेहुषद्भ्वा
वाहनः व्याजहार महायोगीश्व
मुखात् जंतवः कृमयः मूर्छंतिव
र्द्धंते मुखाङ्गभयतःसृक्कणोः ।
मेदोजमाह सर्पिर्मंडप्रतीकाशौ
मेदसा कंडुरौ गुरू स्वच्छ स्फ
टिकसंकाशमास्रावंस्रवतोभृशं ।
अभिघातजमाह क्षतजाभौ
विदीर्येते पीड्येते चाभिघाततः
मथितौच समाख्यातौ चोष्ठौ
कंडूसमन्वितौ मथितौ मृदि
ताविव अतएवक्षतजाभौरुधिरा
भाविति संगतं ॥ अथोष्ठ
रोगाणां चिकित्सा गलदंतमूल
दशनच्छदेषु रोगाः कफास्रसं
भविष्ठाः तस्मात्तेषुसदा रुधिरं वि
स्राव्य दुष्टं चतद्विधेनस्वेदनमपू
क्लिष्टपूतनच वातजः भोजनेकु
र्यात्साडीस्वेदंच बुद्धिमान तद्विधे
न स्नेहेन तैलघृतवसा मज्जरूपेणा
वेपं शिराणां वमनं विरेकं
तिक्तास्यपानं रस भोजनंच
शीताः प्रदेहाः परिषेचनंच पि
त्तोपसृष्टेष्वधरोष्ठकुर्यात शिरो
विरेचनं धूमः स्वेदः कवलएवच
हत्वा रक्तं प्रयोक्तव्यं ओष्ठकोपा
कफात्मके मेदोजस्वेदिते भि




न्ते शोधिते कवलो हितः प्रियंगु
त्रिफला लोध्र सक्षौद्रं प्रतिसार
णं प्रतिसारस्य विधिमाह
दंत निःक्राथमुखानां यच्चूर्णकल्का
वलेहनैः शनैः घर्षणमंगुल्यानड
कं प्रतिसारणं अथ रोगेषु शोधेषु
क्षुद्रेषु समुपाचरेत् तेषु ब्रणाने
यानेषु ब्रणवत् समुपाचरेत् ।
अथ दंतवेष्ट रोगाः तत्र दंतवेष्ट
रोगाणां नामानि संख्यां चाह ।
शीतादो गदितः पूर्वं दंतपुप्पुट ।
कस्तथा दंतवेष्टः शौषिरस्तु महा ।
शौषिर एव च ततः परिदरः प्रोक्त
स्तथैवोपकुशः स्मृतः वैदर्भस्त्व
तः प्रोक्तः खलिवर्द्धन एव च अ
धिमांसकनामा च दंतनाड्यश्च पंच
च दंतविद्रधिरप्यत्र दंतवेष्टेषु षोड
श तत्र शीतादस्य लक्षणमाह
शोणितं दंतवेष्टेभ्यो यस्याकस्मात्
प्रवर्तते दुर्गंधीनि सकृष्णानि प्र
क्लेदीनि मृदूनि च दंतमांसानि
शीर्यंते पचंति च परस्परं शी
तादो नाम स व्याधिः कफशोणि
तसंभवः दंतवेष्टेभ्यः दंतवेष्टमां
सेभ्यः अकस्मात् अविघातेन विना
शीर्यंते पतंति पचंति च परस्प
रं पाकेष्मणा मांसानि शोणितं

पचंति शोणितं मांसानि पचति
दंतपुप्पुटमाह दंतयोस्त्रिषु
वा यस्य श्वयथुर्जायते महान् दंत
पुप्पुटको नाम स व्याधिः कफर
क्तजः दंतवेष्टमाह स्रवंति पूयं
रुधिरं चला दंता भवंति दंतवेष्टः
स विज्ञेयो दुष्टशोणितसंभवः
अत्र दंतमूलानीति कर्तृपदम
ध्याहृत्य शौषिरमाह श्वयथु
र्दंतमूले रुजावान् कफवातजः
लालास्रावी कंडूरश्च विज्ञेयः शौषि
रोगदः महाशौषिरमाह दं
ताश्चलंति वेष्टेभ्यस्तालुचाप्य
वदीर्यते यस्मिन्स सर्वजो व्याधि
महाशौषिर संज्ञकः तालु चाप्य
वदीर्यते चकारात् दंतवेष्टो वाप्य
वदीर्यते सप्तरात्रान्मारकश्चायं
यत आह भोजः महाशौषिर
इत्येष सप्तरात्रान्निहंत्यसून् प
रिदरमाह दंतमांसानि शीर्यंते
यस्मिन्ष्ठीवति चाप्यसृक् पित्तासृ
क्कफजो व्याधिर्ज्ञेयः परिदरो हि
सः उपकुशमाह वेष्टेषु दा
हः पाकश्च ताभ्यां दंताश्चलंति
हि आघट्टिताः प्रस्रवंति शोणितं
मंदवेदनं आध्मायंते स्रुते रक्ते मु
खे पूतिश्च जायते यस्मिन्नुपकुशः

स स्मात् पित्तरक्तसमुद्भवः आघ
ट्टिताः हि सः वैदर्भमाह घृष्टेषु
दंतमूलेषु संरम्भो जायते महा
न् चलंति च रदा यस्मिन्स वैदर्भोऽभि
घातजः संरंभः शोथः चलंति च
ति चकारात् हेतुना दाहपाकाः ।
खलिवर्द्धनमाह मारुतेनाधिको
दंतो जायते तीव्रवेदनः खलिव
र्द्धनसंज्ञोऽसौ संजाते रुक् प्र
शाम्यति संजाते दंते ॥ अ
धिमांसकमाह हन्वये पश्चिमे
दंते महान् शोथो महारुजः ला
लास्रावी कफकृतो विज्ञेयः सो
ऽधिमांसकः हन्वये हनुभवे प
श्चिमे दंते पंच दंतनाडीराह
दंतमूलगतानाड्यः पंच ज्ञेया य
थेरिताः यथेरिता यथा नाडी
ब्रणो वातपित्तकफसन्निपातागंतु
निमित्ताः पंचनाड्यः कथितास्त
था चापीमाः दंतविद्रधिमाह
दंतमांसमलैः सास्रैर्बाह्यांतः श्वय
थुर्महान् सदाहरुक् स्रवेद्भिन्नः पू
यास्रं दंतविद्रधिः दंतमांसमलैः
दंतवेष्टगतदोषैः सास्रैः सरक्तै
र्हेतुभिः अथ दंतवेष्टरोगा
णां चिकित्सा शीतादे हृतर
क्ते तु तोये नागर सर्षपान् ॥

निःक्वाथ्य त्रिफलां चापि कुर्याद्गं
डूषधारणं कासीस लोध्रकृष्णाम
नःशिलासप्रियंगुतेजोह्वाः पथा
चूर्णं मधुयुक् शीतादे प्रतिसार
हरं तेजोह्वा तेजवल्कल इति
लोके तैलं हरेद्वा वातघ्नं शी
तादे संप्रशाम्यति दंतपुप्पुटके
कार्यं तरुणे रक्तमोक्षणं सपं
चलवणः क्षारः सक्षौद्रः प्रति
सारणं स्निग्धविरेककवलहितो नस्य
स्निग्धं च भोजनं विस्रावितो
दंतवेष्टव्रणांस्तु प्रतिसारयेत् लोध्र
पत्तंगमधुक लाक्षाचूर्णैर्मधुप्लुतैः
प्रतिसारयेत् अंगुल्या घर्षयेत् ।
पत्तंगो वाचक इति लोके गंडू
षे क्षीरिणो योज्याः सक्षौद्र घृत
शर्कराः चलदंतस्थैर्यकरं कार्यं ।
बकुल चर्वणं भद्रमुस्ताभयाव्योष
विडंगारिष्ट पल्लवैः गोमूत्र पिष्ट
गुटिकाश्छाया शुष्काः प्रकल्पयेत्
तां निधाय मुखे शोथ शूल दंता
दुरोगनरः नातः परतरं किंचिच्चल
दंतस्य भेषजं भद्रमुस्तारिष्टवल्कि
तेला हृते नीलसहाचरस्य द्रोणा
म्भसा संश्रपयेद्यथावत् तत्स्मृत
भीगरसेन तैलं पचेत्कल्कैरष्टपल
प्रमाणैः कल्केरनंतारविदारिमेद



जंवाम्र पृष्ठी मधुकोत्पलानां
तत्तैल माक्षिव एतं मुखेनस्थैर्य्यं
द्विजानां विदधाति सद्यः नील
सहाचरः नीलपुष्पकटुरेण्या श्र
वेना कुरण्टा तस्याभेयवासो
ग्राह्यः अरिमेदो दुर्गन्धखदिरः
सहाचराद्यैस्तैलं शोधिरे हत
रक्तं च लोध्र मुस्ता रसाञ्जनैः स
क्षौद्रैः शस्यते लेपो गण्डूषः।
क्षीरिणो हिताः क्रियां परि
दरे कुर्य्याच्छीतादोक्तां विचक्षणः
संशोध्योभयतः कायं शिर
श्चोपकुशे तथा काकोदुम्बरिका
पत्रैर्व्रणं विस्रावयेद्भिषक् लव
णक्षौद्र युक्तैश्च सव्योषैः परिसार
येत् शस्त्रेणोत्कृत्य वैदर्भे।
दन्तमूलानि शोधयेत् ततः क्षारं
प्रयुञ्जीत क्रियाः सर्वाश्च शीतलाः
उद्धृत्याधिकदन्तन्तु ततो ऽग्निं स
मावारयेत् कृमिदन्तकवच्चात्र वि
धिः कार्य्यो विजानता श्यवलिव
दन्तस्य चिकित्सा छित्वाधिमांसंस
क्षौद्रै रेतैः चूर्णै रुपाचरेत्।
वचा तेजोवती पाठासर्जिकाया
वशूकजैः तेजोवती तेजवल्कले
स्वर्णजीवन्तीति च क्षौद्रद्वितीया
पिप्पल्यः कवले चात्र कीर्त्तिताः

पटोल निम्बत्रिफला कषायश्चात्र
धावनः नाडीव्रणहरं कर्म दन्त
नाडीषु कारयेत् यद्दन्त मध्ये जा
येत नाडीदन्तं तदुद्धरेत् छित्वा
मांसानि शस्त्रेण यदि नोपरिगो
भवेत् उद्धृत्य च दहेद्वापि क्षा
रेण ज्वलनेन वा भिन्नमुपतिते
दन्ते हनुकास्थिगतिर्भवेत् समूले
दशने तस्मादुद्धरेद्भग्न मस्थि च
उद्धृते तूत्तरे दन्ते शोणितं प्रस्र
वेदति रक्ताभिषकात्पूर्वोक्ता।
घोरा रोगा भवन्ति हि काणः सं
जायते जन्तु र्हिन तस्यजायते
चल मप्युत्तरं दन्तं मतो नैवा
हरे भिषक् धावनं जाति मदन
स्वादु कंटक खादिरैः कषाये ति
निशोषैः कषाये जाति मदन कं
टकी स्वादुकंटकैः मंजिष्ठालोध्र
खदिर यष्ट्याह्वैश्चापि यत्कृते।
तैलं तस्यापिनं तत्र हन्यात
दन्तगतं गतिं जात्यादि वल्कला
द्यस्य कषायेण मंजिष्ठादिवत्कष्ठ
यस्य च कषायेण तैलमिद्धपचेत
जातिः चमेली इति लोके तस्याः
पत्रं ग्राह्यं मदनो धुत्तूर स्तस्यापि
पत्रं मत्रग्राह्यं कंटकी हृत्कटा
इ तस्य मूलं ग्राह्यं स्वादुकंटको

गोक्षुर स्तस्य पंचांगं ग्राह्यं जा
त्यादि तैलं विशुद्धं विधि
युक्तं विदध्याद्दन्तविद्रधौ शस्त्रक
र्म तत्र तु पालेनैव कारयेत्।
अथ दन्तरोगाः तत्र रो
गाणां नामानि संख्या चाह दाल
नः कथितः पूर्वं कृमिदन्तकश्च
शोक्तो भंजनको दन्तहर्षो वै दन्त
शर्करा कपालिका त्रकथिता श्या
वदन्तक एव च करालसंज्ञ इत्य
ष्टौ दन्तरोगाः प्रकीर्त्तिताः ॥
तत्र दालनस्य लक्षणमाह दीर्य्यमा
णाविव रुजा यत्र दन्तेषु जायते।
दालनो नाम स व्याधिः सदाग
तिनिमित्तजः कृमिदन्तकमाह
कृष्णच्छिद्रश्चलस्रावी ससंरंभो म
हारुजः अनिमित्तरुजो वातात् स
ज्ञेयः कृमिदन्तकः ससंरंभः दन्त
मूलशोथयुक्तः तत्रैवस्रावो वा
हव्यः अनिमित्तरुजः अव्यवटना
दिनिमित्तं विनैव महारुजावान्
भंजनकमाह वक्त्रं वक्रं भवेद्य
त्र दन्तभंगश्च जायते कफवातकृ
तो व्याधिः स भंजनक संज्ञकः
दन्तहर्षमाह शीत रूक्ष
प्रवातानाम्लस्पर्शानामसहा द्विजाः
यत्रस्युर्वात पित्ताभ्यां दन्तहर्षः स


कीर्त्तितः दन्तशर्करा माह
मलो दन्तगतो यस्तु कफवातानिल
शोषितः शर्करेव खरस्पर्शा सा
ज्ञेया दन्तशर्करा शर्करासिकता
कपालिकामाह कपालेष्विव
दीर्य्यत्सु दन्तेषु सम्लेषुच क
पालिकेति विज्ञेया दन्तच्छिन्नदन्त
शर्करा कपालानि स्फुटयचटादि
चटकानि तेष्विव समलेषु दन्तेषु
मलसहित दन्तावयवेषु दीर्यत्स्वया
दन्तशर्करा साकपालिकेति विज्ञे
या सा कलिका दन्तच्छिद्रदन्तना
शिनी श्यावदन्तकमाह योऽसृङ्मि
श्रेण पित्तेन दग्धो दन्तस्त्वशेषतः
श्यावतां नीलतां वापि गतः स
श्यावदन्तकः दग्धः दग्ध इव
करालमाह शनैः शनैः प्रकुरुते
यत्र दन्तास्थितोऽनिलः करालान्
विकटान् दन्तान् स करालो न सिध्य
ति करालान् भयानकान् अथो
स्थकृते नोक्तः संग्रहकारणगुष्ठी
तस्य अथ दन्तरोगाणां वि
कित्सा तैलं लाक्षारसं क्षीरं ष
ड्गुणस्य मितं पचेत् द्रव्यैः प
लमितैरेतैः क्वाथ्यैश्चापि चतुर्गु
णैः लोध्रकट्फल मंजिष्ठाप
द्मकेशर पद्मकैः चन्दनोत्पल य

घ्राक्षैस्तैलं वदनेऽन्तं कटुफ
लस्थाने पूतंग इति च पाठः दाल
ने दंतचाले च दंतमोक्षे कपालिकां
शीतादे पूतिवक्रे च विरुचि विर
स्यास्यतां हन्यादाशु गदानेतान्।
कुर्याद्दंतानपि स्थिरान् लालादि
कमिदं तैलं दंतरोगेषु पूजितं।
लाक्षाद्यं तैलं जयेद्धि स्रावपोः।
शितमवलं कृमिदंतकं तथापवी
डे वीतह्नैः स्नेहगंडूषधारणैः
भद्रदार्वादि वर्षाभू लेपैः स्निग्ध
स्य भोजनैः कृमिदंतापहं कोसं
हिंगु दंतांतरे स्थितं हंद्रती भूमि
कदंबी पंचांगुलकंटकारिका क्वा
थः गंडूषस्तैलयुतः कृमिदंतकवे
दनापामनः नीलीवायसजंघाकटु
तुंबी मूलमेकैकं संचूर्ण्य दशनवि
पूतं दशनकृमिपातनं प्राहुः स्नेहा
नां कवलाः कोष्णाः सर्पिषस्त्रैवृता
स्य च निर्गुह्य श्चानिलघ्ना नादनह
र्षप्रमर्दनाः तैलस्य सर्पिषः त्रि
वृतापक्कस्य सर्पिषः कवलस्तथा
स्नैहिकोऽत्र हितो धूमो नस्य
स्नैहिकमेव च पेयाः स्याग्रकाम्ब
स्य क्षीरसन्तानिका हृत शिरोबस्ति
हितस्थापिकमेवं यस्मान्निलापहः
अग्रदंतदर्षे अवेलिहं दंतहृ

लम्बनि शर्करा मुद्धरेत्तु भिषक्तु ला
लाचूर्णैर्मधुयुतैस्ततस्तां प्रतिसार
येत् दंतहर्षक्रियां चात्र कुर्यान्नि
रवशेषतः कपालिका कृच्छ्रतमा
तत्राप्येषा क्रिया हिता अग्रदंत
शर्करायां एषा क्रिया दंतहर्षक्रियः
फलान्यम्लानि शीताम्बु रूक्षान्नं
दंतधावनं तथाति कठिनं भक्ष्यं
दंतरोगी विवर्जयेत् ॥
अथ जिह्वारोगाः तत्र जिह्वा रो
गाणां निदान नाम संख्याः प्राह
वातजः पित्तजश्चापि कफजो ऽ
लास संज्ञकः उपजिह्विका च ग
दा जिह्वायां पंचकीर्तिताः त
त्र वातजस्य लक्षणमाह जिह्वा
निलेन स्फुटिता प्रसुप्ता भवेच्च शा
कच्छदनप्रकाशा स्फुटिता मता
भिन्ना प्रसुप्ता रसानभिज्ञत
या स्वमेव शाकच्छदनप्रकाशा शाका
मरुभूमिजो द्रुमस्तस्य दलकंटकवितापि
त्तजमाह पित्तात्सदाहैरुपची
यतेच दीर्घैः सरक्तैरपि कंटकैश्च।
अयं रोगो लोके जली इति
ख्यातः कफजमाह कफेन
गुर्वी बहला चिता च मांसोद्भवैः
शाल्मलिकंटकाभैः बहलाः स्थू
लाः मांसोद्भवैः मांसजकंटकैः

अलासमाह । जिह्वातलेऽ
यः श्वयथुः प्रगाढः सोऽलाससंज्ञः
कफरक्तमूर्तिः जिह्वां स तु स्त
म्भयति प्रवृद्धो मूले च जिह्वा भृश
मेति पाकं प्रगाढः प्रकर्षेण गाढा
दारुणः कफरक्तमूर्तिः कफरक्ता
भ्यां मूर्तिर्यस्य कफरक्तज इत्यर्थः
जिह्वास्तंभेन वायुरप्यत्र बोद्धव्यः
भृशपाकेन पित्तं च अत्र त्रि
दोषाय मसाध्यत्वं चास्य ॥ उ
पजिह्विकामाह जिह्वाग्ररूपः श्व
यथुर्हि जिह्वा मुन्नाम्य जातः क
फपित्तयोनिः प्रसेककंडूपरिदाह
युक्तः प्रकथ्यते ऽसावुपजिह्वि
केति जिह्वाग्ररूपो जिह्वाग्राकृतिः
अथ जिह्वारोगाणां चिकित्
सा जिह्वागतविकाराणां शा
न्त्यै शोणितमोक्षणं गुडूची पिप्प
ली निम्ब कवलः कटुभिः स्रवः
ओष्ठप्रकोपे ऽनिलजे यदुक्तं प्राक्
चिकित्सितं कंटकेष्वनिलोत्थेषु
तत्कार्यं भिषजा क्लेषु पित्तजे।
परिघृष्टेषु निःस्रुते दुष्टशोणि
ते प्रतिसारणं गंडूषं नस्यानि मधु
रहितं कंटकेषु कफोत्थेषु लि
खिते ष्वसृजः क्षये पिप्पल्यादिर्म
धुयुतः कार्यस्तु प्रतिसारणे उप

जिह्वां तु संलिख्य क्षारेण प्रतिसा
रयेत् शिरो विरेकं गंडूष धूमैः
श्चैनां उपाचरेत् व्योष क्षार
भया वह्निचूर्णमेतत् प्रचर्षणं उप
जिह्वा प्रशान्त्यर्थमेभिस्तैलं च पा
चयेत् ॥ अथ तालुरोगाः ।
तत्र तालुरोगाणां नामानि सं
ख्यां चाह गलशुंडी तुंडिकेर्यध्रु
षः कच्छप एव च तालुवुर्दमां
सकथितो मांससंघात एव च तालुपु
प्पुट नामा च तालुशोषस्तथैव च ता
लपाकश्च कथिता स्तालुरोगा न
वैव तु तत्र गलशुंडीलक्षणमा
ह श्लेष्मासृग्भ्यां तालुमूलात्प्रव
द्धो दीर्घः शोथो ध्मातवस्तिप्रका
शः तृष्णा कासश्वासकृत्तं वदंति
वैद्याव्याधिं कंठशुंडीति नाम्ना
ध्मातवस्तिप्रकाशः वातपूरित
चर्मपुटतुल्यः तुंडिकेरी माह
शोथः स्थूलस्तोददाहप्रपाकी।
प्रागुक्ताभ्यां तुंडिकेरी मता तु
प्रागुक्ताभ्यां श्लेष्मासृग्भ्यां तुंडि
केरी वनकार्पासीफलं तत्तुल्येति
अध्रुषमाह शोथस्तब्धो लो
हितः शोणितोत्थो ज्ञेयोऽध्रुषः
सज्वरस्तीव्ररुक्च कच्छप
माह कूर्मोत्सन्नो वेदनो शी




ऽसृग्जन्मा रोगो ज्ञेयः कच्छपः श्लेष्म
णास्यात् कूर्मोन्नतः मध्ये प्रा
वं प्रोन्नतः ताल्वर्बुदमाह
पद्माकारं तालुमध्ये तु शोथं
विद्याद्रक्तादर्बुदं पित्तलिंगं प
द्माकारं पद्मकर्णिका केशरैरिव
पार्श्वतो दीर्घमांसांकुरैर्वेष्टितं ।
मांससंघातमाह ॥ दुष्टं
मांसं श्लेष्मणा नीरुजं च ताल्वन्ता
स्थं मांससंघात माह तालु
पुप्पुटमाह नीरुकस्थायीकोल
मात्राः कफात्मा मेदोयुक्तः पुप्पु
टस्तालुदेशे तालुशोषमाह
शोषो ऽत्यर्थं दीर्य्यते चापि
तालुः श्वासो वातात्तालुशोषः
प्रयुक्तः तालुपाकमाह पि
त्तं कुर्य्यात् पाकमत्यर्थघोरं ता
लुन्येनं तालुपाकं वदंति अ
थ तालुरोगाणां चिकित्सा कु
ष्ठोषणा वचासिंधु कणाभ्याक्षा स
वैः सह सक्षौद्रैर्भिषजा कार्य्यगा
लशुंडी प्रघर्षणं सवः केचवीमा
घगुडूचवी इतिचलोके अंगुष्ठाग्र
लिसंदंशेनाकृष्य गलशुंडिकां
छेदयेन्मंडलाग्रेण जिह्वोपरि
संस्थितां मंडलाग्रेण शस्त्रविशेष
ण प्रतिच्छेदात्ववेदकं ततो

हेतो म्रियेतच हीनच्छेदाद्भवे ।
च्छोथो लालास्रावो भ्रमेन तथा त
स्मात्तद्वैद्यः प्रयत्नेन दृष्टकर्मा वि
शारदः गलशुंडीं तु संछिद्य कुर्य्या
त्त्वामा मिमां क्रियां पिप्पल्यति
विषाकुष्ठवचामरिचनागरैः क्षौ
द्रयुक्तैः सलवणैस्तत स्तां प्रतिसा
रयेत् वचामतिविषा पाठारास्ना
कटुकरोहिणीः निष्क्वाथ्य पिचुम
र्द्दं च कवलं तत्र कारयेत् तुंडिके
ऽध्रुषे कूर्मे संघाते तालुपुप्पुटे एष
एव विधिः कार्य्यो विशेषः शस्त्रक
र्मणि तालुपाके तु कुर्व्वीत विधा
नं पित्तनाशनं स्नेह स्वेदौ तालु
शोषे विधिश्चानिलनाशनः ।
अथ गलरोगाः तत्र गल
रोगाणां नामानि संख्यां चाह ।
रोहिणी पंचधा प्रोक्ता कंठशालू
क एव च अधिजिह्वस्त्वलयोऽलास
नामैकवृंदकः ततो वृंदः शतघ्नी
च गिलायुः कंठविद्रधिः गलौघः
स्वरघ्नश्च मांसतानस्तथैव च विदा
री कंठदेशे तु रोगा अष्टादश
स्मृताः तत्र पंचानामपि रोहि
णीनां सामान्य संप्राप्तिमाह
गलेऽनिलः पित्तकफौ च मूर्छितौ
प्रदूष्य मांसं च तथैव शोणितं ।

गलोपसंरोधकरैस्तथांकुरैर् नि
हंत्यसून् व्याधिरयं स रोहिणी
अनिलः मूर्छितः प्रवृद्धः पित्तक
फौ च मूर्छितौ पित्तं वा मूर्छितं क
फो वा मूर्छितः तत्रत्रयोपि मूर्छि
ताः इत्यष्टधा जाया अविविक्तमोक्षा
वात् तत्र वातजायालक्षणमाह
जिह्वा समंताद्भृश वेदनास्तु मां
सांकुराः कंठनिरोधनाऽसुः सा
रोहिणी वातकृता प्रदिष्टा वाता
त्मकोपद्रव गाढयुक्ता समंतात्
जिह्वायाः सर्वतः वातात्मकोपद्र
वगाढ युक्तास्तंभादिभिरतिशये
न युक्ता पित्तजामाह क्षिप्रो
द्गमा क्षिप्रविदाहपाकातीव्रज्वरा
पित्तनिमित्त जाता ॥ श्लेष्मजा
माह स्रोतो निरोधिन्यपि मंद
पाका गुर्वी स्थिरा सा कफसंभवा तु
स्रोतोऽत्र कंठस्रोतः ॥
सन्निपातजामाह गंभीरपाकिन्य
निवार्य्य वीर्य्या त्रिदोषलिंगा त्रिभ
वा भवेत् सा ॥ रक्तजामाह
स्फोटैश्चिता पित्तसमानलिंगा
साध्या प्रदिष्टा रुधिरात्मिका तु
रक्तजेतरा संहारकत्वावपिमाह
सद्यस्त्रिदोषजा हंति त्र्यहात् कफ
समुद्भवा पंचाहात् पित्त संभूता

समाह्वात् पवनोत्थिता कंठ
शालूकमाह कोलास्थिमात्रः कफ
संभवो यो ग्रंथिर्गले कंटकशूक
भूतः खरः स्थिरः शस्त्रनिपातसा
ध्यस्तं कंठशालूकमिति ब्रुवंति ।
कंटकशूकभूतः कंटकवच्छूकव
च्च वेदनाजनकः अधिजिह्वमाह
जिह्वाग्ररूपः श्वयथुः कफात्तु जि
ह्वोपरिष्टादपि रक्तमिश्रात् ज्ञेयो
ऽधिजिह्वः खलु रोग एष विवर्जये
दागतपाकमेनं असृजा मिश्रा
देवेत्यन्वयः वलयमाह वला
शयवायत मुन्नतं च शोफं करोत्य
न्नगतिं निवार्य्य तं सर्वथैवा-
प्रतिवार्य्य वीर्य्यं विवर्जनीयं वलयं
वदंति अलासमाह गले तु
शोफं कुरुतः प्रवृद्धौ श्लेष्मानिलौ
श्वासरुजोपपन्नं मर्मच्छिदं दुस्त
रमेतदाहुरलासं संज्ञं भिषजो
विकारं मर्मच्छिदं हृदयमर्मनिच्छे
देनेव वेदनाजनकं एकवृंद
माह वृत्तोन्नतोऽन्तः श्वयथुः सदा
हः सकंडूरो पाक्यमृदुर्गुरुश्च ।
नाम्नैकवृंदः परिकीर्त्तितोऽसौ व्या
धि र्बलासः क्षतजप्रसूतः अंतः
गलमध्ये अपाकी ईषत्पाकी अम
दुः ईषन्मृदुः ॥ वृंदमाह




समुत्थनं वृंद ममंदरादंतीवज्वरं
वृंद मुरादूरंति तत्रापि पित्त
तत्र प्रकोपादिघात् सतोदं प
वनात्मकेन शतघ्नामाह वर्त्ति
र्येना कंठनिरोधिनी त्वचितानिमा
त्रंपिशितं प्ररोहैः अनेकरुक्।
प्राणहरी त्रिदोषा ज्ञेया शतघ्नी
सदृशी शतघ्नी वनाकठिना अने
करुकुवान पित्तकफजतोदराहु
केह्रादि युक्ता शतघ्नीसदृशीलो
हकंटक संछन्ना शतघ्नीमहनी
शिला तत्नैस्यायतःप्राणहरी गि
लायुमाह अंधीगलेत्वामलका।
स्थिमात्रः स्थिरोऽल्परुक्स्यात्कफ
रक्तमूर्त्तिः संलक्ष्यते सक्तमिवा
सितंव सशस्त्रसाध्यस्तागिलायु
संज्ञः गलविद्रधिमाह सर्वं
गलं व्याप्यसमुत्थितोयः शोथो
रुजः संतिव यत्रसर्वाः स सर्वदो
षैर्गल विद्रधिस्तु तस्यैवतस्यःख
लसर्वजस्य गलौघमाह शोथो
महान् यस्तु गलावरोधी तीव्रज्व
रो वायुगते र्निहंता कफेन जातो
रुधिरान्वितेन गले गलौघः परि
कीर्त्यतेऽसौ वायुगते निहंता
ऽन्नानवायुगतिरोधकः स्वरघ्न
माह य स्ताम्यमानः श्वसिति

प्रसक्तं भिन्नस्वरः शुष्कविमुक्तकं
ठः कफोपदिग्धे ष्वनिलायनेषु से
यः सरोगः श्वसनात्स्वरघ्नः ताम्य
मानस्तमः प्रपश्यन् शुष्कविमुक्तकं
ठः शुष्का विमुक्तोऽस्वाधीनः कंठ यस्य
सः अस्वाधीनत्वामुक्तं गिलितमश
क्यवान् अनिलायनेषु वायुवर्त्मसु श्व
सनात्वानात् मांसतानमाह प्र
तानवान्यः श्वयथुः स्तकंठागलोप
रोधं करुते क्रमेण समांसतानः।
कथितावलम्बी प्राणप्रणुत्सर्वकृतो
विकारः प्रतानवान्विस्तारवान्।
सकष्टः अतिशयितं कष्टं यत्रसः
विदारीमाह सदाहतोदं श्व
यथुं सताम्रमंतर्गले पूतिविशीर्ण
मांसं पित्तेन विद्यादधने विद
रीं पार्श्वे विशेषात्ससत्तुयेन शेते
पार्श्वे विशेषात् सतु येन
शेते स पुरुषो येन पार्श्वेन वि
शेषाढ्राऽल्पनशेतेन तस्मिन्पार्श्वे
सा विदारी भवति इत्यर्थः।
अथ गलरोगाणां चिकित्सा रो
हिणीनां च साध्यानां हितं शोणित
मोक्षणं वमनं धूमपानंच गंडूषो
नस्यकर्म वा वातजातं हनेरक्ते
लवणैः प्रतिसारयेत् सुखोष्णान्
स्नेहगंडूषान् धारयेच्चाप्यभीक्ष्णशः

विस्राव्य पि त्तसंभूतां सिताक्षौद्र
प्रियंगुभिः घर्षयेत्त कवलोद्राता
पत्रूषैः क्वथितैर्हितः आगार
धूमकटुकैः कफजां प्रतिसारयेत्
आगारधूमः ज्झोल इति लोके
कटुकानि शुंठी पिप्पलीमरिचा
नि श्वेता विडंग दंतीयुतैतैलसिद्धं
ससैंधवं नस्यकर्मणि दातव्यं क
वलेच कफोदये स्वता अपरा।
जिता पित्तवत्साधयेद्वैद्यो रोहि
णीं रक्तसंभवां विस्राव्य कं
ठशाल्रुकं साधयेत्तुंडिकेरिवत्।
एककालं यवान्नं वा भुंजीत स्निग्ध
मल्पशः उपजिह्वकवच्चापि साध
येदधिजिह्वकं एकवृंदं तु विस्रा
व्यविधिं शोधन माचरेत् एकवृंद
मिवप्रायो वृंदेच समुपाचरेत् गि
लायुश्चापि यो व्याधिस्तंच श
स्त्रेण साधयेत् अमर्मस्थस्थसंप
क्वं भेदयेत् गलविद्रधिं अथ
सामान्यानां कंठरोगाणां चिकित
सा कंठरोगे ष्वसृङ्मोक्षस्तीक्ष्णै
र्नस्यादिकर्मभिः चिकित्सा कथि
तिस्तांच्च कूपालोऽत्र समाचरेत्
क्वाथं दद्याच्च दार्वीत्वङ्निम्बता
र्क्ष्य कलिंगजं हरीतकी कषायो
वा हितो माक्षिकसंयुतः कटुका

तिविषा दारुपाठामुस्ता कलिंगकाः
गोमूत्रक्वथिता पीताः कंठरोग।
विनाशनाः मृद्वीका कटुका व्योषि
दार्वी त्वक् त्रिफलाघनं पाठा।
रसांजनं दारु तेजोह्वा तिस्तचूर्णि
तं क्षौद्रयुक्तं विधातव्यं गल
रोगमहौषधं रोगास्तेन त्रयः।
शान्ता वात पित्तकफापहाः ॥
यवाग्रजं तेजवती च पाठां रसांज
नं दारुनिशांसकृष्णां क्षौद्रेण क
ल्कीन गुटिकां मुखेन तां धारयेत्
सर्वगलामयेषु ॥ अथ स
मस्तमुखरोगाः तत्रतेषां निदा
नं संख्यां चाह दृष्ट्यदोषै सर्वयो
गाः समस्तमुखजाः स्मृता तत्र
वातिकस्य लक्षणं चाह स्फोटैः स
तोदैर्वदनं समंता यस्याचितं सर्व
सरः सवातात् पैत्तिकमाह रक्तैः
ससादैः पिडकैः सपीतैर्यस्याचि
तं चापि स पित्त कोपात्।
श्लैष्मिकमाह अवेदनैः कं
डुयुतैः सवर्णैर्यस्याचितं चापि सवै
कफेन अवेदनैः ईषद्वेदनैः यत
उक्तं सुश्रुतेन अल्पवेदनैरिति
मुखरोगेषु साध्यानाह ओष्ठप्र
कोपे वर्ज्याः स्युर्मांसरक्तत्रिदोष
जाः दंतवेष्टेषु वर्ज्यो त




त्रिलिंगगति शौषिरो त्रिलिंग
गतिः त्रिदोषजा नाडी महा
शौषिरश्च दंतेषु चत सिध्यंति
स्रावबालन मंजनाः जिह्वारोगे
ष्वालसस्तु तालव्येष्वर्बुदं तथा स्व
रघ्नो वलयो वृंदो वलाशः सहि
तारुण्यः गलौघो मांसतानश्च शा
तघ्नी रोहिणी गले असाध्याः की
र्त्तिताश्चैते रोगाद्दृश्यनचोत्तराः ।
तेषु वापि क्रियां वैद्यः प्रत्या
ख्याय समाचरेत् अथ समस्त
मुखरोगाणां चिकित्सा वातात्
सर्वसरं चूर्णैर्लवणैः प्रतिसारयेत्
तैलं वातहरैः सिद्धं हितं कवल
नस्ययोः पित्तात्मके सर्व
सरे शुद्धकायस्य देहिनः सर्वपि
त्तहरः कार्यो विधिर्मधुरशीतलः
लः प्रतिसारणगंडूष धूम सं
शोधनानि च कफात्मके सर्वसरे
क्रमं कुर्यात् कफापहं मुख
पाके सिरावेधः शिरसश्च विरेच
नं मधुमूत्रतैलक्षीरैः शीतैश्च ।
कवलग्रहः १ जाती पत्रा मृता
द्राक्षा यासदार्वी फलत्रिकैः
क्वाथः क्षौद्रयुतः शीतो गंडूषो
मुखपाकजित् २ कार्यंच बहुधा
क्षिप्रं जातीपत्रस्य चर्वणं तथा ।
जीरककुष्ठेन्द्रयवचर्वणात्स्नात्
मुखपाकव्रण दौर्गंध्यमुपशा ।
म्यति ३ पटोलनिम्बजम्ब्वाम्र मा
लती नवपल्लवैः पंचपल्लवजः
श्रेष्ठः कषायो मुखधावने ४ पंच
पल्लवजः क्वाथस्त्रिफलासंभवोऽ
थवा मुखपाके प्रयोक्तव्यः सक्षौ
द्रो मुखधावने ५ स्वरसः कथितो
दार्व्या घनीभूतो रसक्रिया सक्षौ
द्रा मुखरोगास्रदोष नाडीव्रणाप
हा ६ समङ्गाशीर पटोलमुस्तह
रीतकी तिक्तकरोहिणीभिः य
ष्ट्याकराजद्रुमचंदनैश्च क्वाथं पिबे
त् पाकहरं मुखस्य ७ राजद्रुमः
धनवहेरा इति लोके तिला नी
लोत्पलं सर्पिः शर्करा क्षीर मे
व च क्षौद्रान्वितस्य कल्कस्य गंडूषो
मुखपाकजित् ८ आस्वादितो म
हदपि मुखगंधं सकल मपनयति
त्वग्बीजपूरफलजा पवनमवश्यं च
नाशयति ९ हरिद्रां निम्बपत्राणि
मधुकं नीलमुत्पलं तैलमेति
र्विपक्वं मुखपाकहरं परं १० ।
यष्टीमधुपलमेकं त्रिशाणी लोध्रा
लस्य तैलस्य प्रस्थं तत्रिगुणपयो
विधिना पक्वं तन्नस्येन निशि वद
नस्य स्रावं स्तपयति गात्रस्य दोषा ।

संधानं कचरवैवंत्वमवश्यं क्रमा
शोऽभ्यंगेन जंतुना ११ ॥
इति मुखरोगाधिकारः इति भा
वप्रकाशः ५ अपिच ते
ङ्गुलीयक गोक्षुर मूलं पीतं प
योऽन्वितं कामलादिहरं प्रोक्तं
मुखरोगहरं तथा १२ शुष्कमूल
कखण्डानां क्षारो हिंगुल नागरं ।
शुक्तं चतुर्गुणं दत्त्वा तैलमेतै
र्विपाचयेत् बाधिर्य्य कर्णशूलंच
पूयस्रावश्च कर्णयोः पूरणादस्य
तैलस्य कृमयः कर्णयोः विलाः
क्षिप्रं विनाशमायांति शशांक
कृतशेखर क्षारतैलमिदं श्रेष्ठं
मुख दंतामयापहं १३ इति
गारुडे १८८ । १९६ अध्यायौ
मुखलांगलः पुं शूकरः इति जटा
धरः ॥
मुखवल्लभः पुं दाडिमवृक्षः इति
शब्दमाला मुखप्रिये त्रि ॥
मुखवासिका स्त्री अम्बष्ठा इति रा
जनिर्घंटः ॥
मुखवाद्यं क्ली वक्त्रतालवाद्यं बौ
क इति भाषा इति त्रिकांडशेषः ।
मुखस्य शब्देनच वाद्यंच ॥
मुखवासः पुं गंधतृणं इति राज
निर्घंटः ॥
मुखवासनः पुं मुखसुगंधकार
कद्रव्यं तत्पर्यायः आमोदी २
इत्यमरः हेमुखवासनवटिका ।
दी आमोदपूरकः कर्पूरादि रा
मोदी इति मुखं वासयतीति मुखवा
सनः तेषामादिर्वासनः नाना द्रव्य
रचित एकैकश एव वा कर्पूरादि
भिर्मुखोपयोग्य मुखवासन व
टिकादि रामोदीति सर्वस्वं शुभ
वासन इति पाठः शुभं मनोहरं ।
वासनं वासो यस्य केशादेः स
आमोदीत्याहुरिति सुभूतिः
क्षीरस्वामिना तु समाकर्षीदिवत्त
प्येन इत्यंगधादिवत्तृप्ये च प
र्याय इव माख्यातं शब्दार्णवे तु
कस्तूरिकाया आमोदः कर्पूरे मु
खवासनः वकुलेस्यात्परिमलस्त्व
माके स्वरभिस्तथा गंधा हि
षष्टि रघ्राणे गुणिहन्तो त्रिलिंग ।
का इति इति भरतः ॥
मुखविलुंठिका स्त्री छागी इति
शब्दरत्नावली ॥
मुखविष्ठा स्त्री तैलपायिका यथा
वल्गुलिका मुखविष्ठापरोष्णी तैल
पायिका इति हेमचंद्रः ॥
मुखशफः पुं दुर्मुखः इति शब्द
माला ॥

मुखशुद्धिः स्त्री वक्त्रशोधनं य
था अभावे दन्तकाष्ठानां प्रति
षिद्धदिने तथा अपां द्वादशगण्डू
षैर्मुखशुद्धि र्विधीयते इत्याह्नि
कतत्त्वं ॥
मुखशोधनं क्ली त्वचं इति रा
जनिर्घण्टः ॥
मुखशोधनः पुं कटुरसः इति
हेमचन्द्रः ॥
मुखशोधी पुं जम्बीरः इति रा
जनिर्घण्टः ॥
मुखशीलः त्रि दुर्मुखः इति श
ब्दमाला ॥
मुखसम्भवः पुं ब्राह्मणः इति हे
मचन्द्रः ॥
मुखसरं क्ली तालस्था नाडी इ
ति भाषा इति त्रिकाण्डशेषः ।
मुखस्रावः पुं लाला इति राज
निर्घण्टः ॥
मुखाग्निः पुं दावाग्निः यथा हेम
केलिर्द्धयोः स्थाप्यवृक्षाङ्कः स्याद्दवा
नलः मुखोल्का भूतसंचारी मुखा
ग्नि र्भरवस्मरः इति शब्दमाला
शवमुखेन्नवह्निः इति लोके
शावस्तनशिरःस्थाने यथा देवा
श्चाग्निमुखाः सर्वे गृहीत्वा तत्कृता
पानं गृहीत्वा पाणिभ्यां चैव मंत्र
मेतदुदीरयेत् कृत्वा तु दुष्कृतं ।
कर्मजानता वाप्यजानता मृत्यु
कालवशं प्राप्य नरं पंचत्व मा
गतं धर्माधर्मसमायुक्तं लोभ
मोह समावृतं दहेयं सर्वगा
त्राणि दिव्यान् लोकान्स गच्छतु
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव
प्रदक्षिणं ज्वलमानं तथा वह्निं
शिरःस्थाने प्रदापयेत् चातुर्व
र्ण्येषु संस्थानमेवं भवति पुत्रिके
इति स्मृतितत्त्वं ॥
मुखामयः पुं मुखरोगः इति राज
निर्घण्टः ॥
मुखाजेकः पुं अजेकः इति रा
जनिर्घण्टः ॥
मुखासः पुं कर्कोटः इति त्रिका
ण्डशेषः ॥
मुखोल्का स्त्री दावानलः इति
शब्दमाला ॥
मुख्यः पुं प्रथमः कल्पः इत्यमरः
यागादिषु शास्त्रोक्तः प्रथमः कल्पो
मुख्यः स्यात् यथा व्रीहिभिर्यजे
तेत्यादिना उक्तम् तत्स्थलेमिव
मुख्यः विकासः संवेत्यादिना इवार्थे
यः इति टीकायां भरतः ।
मुख्यः त्रि श्रेष्ठः इत्यमरः
मुख्यसर्गः पुं स्थावरसृष्टिः यथा

मुख्यसर्गः स्मृतः षष्ठस्तन्मुख्या वै
स्थावराः स्मृताः इति वराहपुराणं
मुगूहः पुं दात्यूहपक्षी इति भूरि
प्रयोगः ॥
मुग्धः त्रि मूढः सेरः इति
विश्वः ॥
मुग्धबोधं क्ली बोपदेवकृतव्याक
रणविशेषः यथा मुकुन्दसच्चिदा
नन्दं प्रणिपत्यप्रणीयते मुग्ध
बोधं व्याकरणं परोपकृतये म
या इति तस्याद्यश्लोकः मु
ग्धा स्त्री नायिकाविशेषः य
थास्वीयापि त्रिविधा मुग्धामध्या
प्रगल्भा च तत्राङ्कुरितयौवना मु
ग्धा साच ज्ञातयौवना अज्ञातयौ
वना च सैव क्रमशो लज्जाभय
पराधीनरतिर्नवोढा सैव जात
प्रश्रया विश्रब्धनवोढा अस्या
श्चेष्टा क्रियामनोहरा कोपमार्द
वं नवविभूषणे समीहा च मु
ग्धा यथा आज्ञासंकिलकामदेव
धनुषीपालेन काले श्रभेवस्तं
वास्त्वविधिं विधास्यति तनौ ना
रूपमेणीदृशः हस्तावर्जनवा
तरी मुखरुचा सौधाकरीमाधुरी
वाचा किंच सयासमं कुलहरीलाव
ण्यमामंभ्यते अज्ञातयौवना।
यथा नीराक्षीरमुपागता श्रवणा
योः सीमनि स्फुरनेत्रयोः श्रोत्रेलग्न
मिदं किमुत्फलमिति ज्ञात्वे कर
न्यस्यति शैवालाङ्कुर शङ्कया
शशिमुखी रोमावलीं प्रोञ्छति
स्नानास्मीति मुहुः सखीमविदि
तस्त्राणी भरा पृच्छति ज्ञात
यौवना यथा स्वयंभूः शम्भुरम्भो
जलोचने त्वत्पयोधरः नखेनक
स्य धन्यस्य चन्द्रचूडो भविष्यति
नवोढा यथा हस्ते धृता ।
पि शयने विनिवेशितापि क्रोडे
कृतापि यतते बहिरेव गन्तुं
जानीमहे नववधूरथ तस्य व
श्यायः पारं दृश्यिरपितु हत्मनो
करणा द्वितीया यथा वला
ल्लीना पार्श्वमुखेन तन्मुखे न्यक्कृ
तेन पुनाना मूर्द्धानं द्रापति वट
ने चुम्बनविधौ हृदि न्यस्ते हस्ते
क्षिपति गमनारोपित मना न
वोढा वोढारं रमयतिवसेना पय
ति च विश्रब्धनवोढा यथा
दरमुकुलितनेत्रपालिनीवीनि
यमितं× कुचस्थलं नवोढास्वपि
ति समीपमुपेत्यकस्य यूनः
इति रसमञ्जरी ॥
॥ ॥ ॥

बाहूकृतोरुयुग्म
र्वधे करकलित




मुच ङ. (कल्कने दम्भे शाठ्ये
मुच ३ उ. २ इतिकविकल्पद्रुमः
ह्रौपंचमस्वरिणौ ङ. मोचते इत्ये
वते ङ. मुंचते इतिदुर्गादासः
मुचक मोक्षे इतिकविकल्पद्रु
मः क मोचयति मोक्षस्यागः इ
तिदुर्गादासः ॥
मुच लृ श प न औ मोक्षे इ
कविकल्पद्रुमः मोक्षस्यागः ई
अमुचत् श प न मुचतिमुंचते
यनं दाना वंधनरहितेभावे
अकर्मकोऽयं आलानान्मुक्तो
गजः कर्तरिक्तः एवं पापान्मु
क्त इत्यादौ पापवंधनान्मुक्तइत्य
र्थः इतिदुर्गादासः ।
मुचिरः त्रि दाता इतित्रिकांड
शेषः ॥
मुचिरः पुं धर्मः वायुः देवता
इतिसंक्षिप्तसारणादिवृत्तिः ।
मुचुकुंदः पुं पुष्पवृक्षविशेषः म
कचंद इतिहिंदीभाषा तत्त
पर्यायः छत्रवृक्षः २ वित्रकः
३ प्रतिविष्णुकः ४ इतिभावप्रका
शः बहुपत्रः ५ सुदलः ६ हरिव
लभः ७ सुपुष्पः ८ अर्घ्यार्हः ९ ल
क्षणकः १० रक्तप्रसवः ११ अस्यगुणाः ।
कटुत्वंतिक्तत्वं कफ वात ना

शित्वं कंठकरत्वं त्वग्दोषशोफ
शामनत्वं जीर्णज्वरविनाशत्वंच
इतिराजनिर्घंटः शिरः पीड़ा
पित्तास्रविष नाशित्वं भाव
प्रकाशः मांधातृराजपुत्रः ।
इतिश्रीभागवतं
मुचुटी स्त्री अंगुलिमोटनं अंगु
लमटकान इतिभाषा यथा मुचु
टी मुकुटी चैव भवेदंगुलिमोट
ने इतिशब्दरत्नावली मुष्टिः
मुट्ठा इतिभाषा यथा सस्पिंडि
तांगुलिः पाणि मुष्टिर्मुस्त मुचु
ष्टपि इतिहेमचंद्रः ।
मुज्ज क मृजाध्वन्योः इतिक
विकल्पद्रुम इक् द्रुमः ह्रौपंचा
मस्वरिणौ इक मुज्जयति मोजय
ति इतिदुर्गादासः ॥
मुंचकः पुं मुष्ककवृक्षः इतिरा
जनिर्घंटः ॥
मुंजः पुं तृणविशेषः मूंज इ
तिभाषा तत्पर्यायः मौंजीतृणा
ख्यः २ ब्रह्मण्यः ३ तेजनाह्वयः ४
वाणीरकः ५ मुंजनकः ६ शीरी ७
दूर्भाह्वयः ८ दूरमूलः ९ दृढत्व
णः १० दृढमूलः ११ बहुप्रजः १२ रं
जनः १३ शतुभंगः १४ अस्यगुणाः मधु
रत्वं शीतत्वं कफ पित्तदोष ॥

नाशित्वं ग्रहरक्षास्रदीक्षासंच
पावनत्वं भूतनाशित्वंच इतिराज
निर्घंटः अपिच मुंजो मुंजात
कोवाणः स्थूलदर्भः सुमेधसः
मुंजद्वयंतु मधुरं तुवरंशिशिरं
तथा दाह तृष्णाविसर्पास्रमूत्र
वस्त्यक्षिरोगजित् दोषत्रयहरंवृ
ष्यं मेखलासूपयुज्यते इतिभा
वप्रकाशः शरः इतिरत्नमाला
उपनयनकाले मुंजमेखलाधा
रणविधिर्यथा अथैनंमाणवक
माचार्य स्त्रि प्रदक्षिणं विहृतं
मुंजमेखलां परिधापयन्नेतद्वय
वाचति इतिभवदेवभट्टः ।
मुंजकेशी पुं विष्णुः इतिहेम
चंद्रः ॥
मुंजरं स्त्री शालूकं इतिशब्द
माला ॥
मुंजातकः पुं पुष्पशाकभेदः अ
स्यगुणाः परे स्वादुत्वं हृष्यत्वं
पित्तानिलापहत्वंच इतिरा
जवल्लभः ॥
मुट इ मर्दे इतिकविकल्पद्रुमः
पंचमस्वरी इ मुंटते मर्दो
मर्दनं इतिदुर्गादासः ॥
मुट कि छादि इतिकविकल्पद्रु
मः छादिचूर्णीकरणे कि मोटयति

तंडुलं शिला यस्त्वङ्गैंच मोट
तीतिहलायुधः ॥
मुट शि आक्षेपेच इतिकविक
ल्पद्रुमः पवर्गशेषादिः शिमुट
ति अमुटीत् मुमोट वक्षास्त्वदि
च मुटतिद्विषां दर्पं य इतिहला
युधः इतिदुर्गादासः ॥
मुड इ ङ. पलाये इतिकविक
ल्पद्रुमः पवर्गशेषादिः पंचमस्व
री मुण्डते ङ. मुंडते चौरः
इतिदुर्गादासः ॥
मुड इ खिदि मर्दे इति कवि
कल्पद्रुमः पंचमस्वरी इ मुंडते
खेद इह लोमच्छेदएव मुंडति
मुंडं नापितः लोमरहितं क
रोतीत्यर्थः इतिदुर्गादासः ।
मुड इ ङ. मज्जे इतिकविकल्पद्रु
मः पवर्गशेषादिः पंचमस्वरी मज्ज
मिति मज्जधातोः क्ते रूपं म
ज्जनमित्यर्थः इ मुंडते ङ. मुंडु
ते प्रस्तरो जले चलभंजस्त्व मा
र्जेन इति पठित्वा मार्जनेशुद्धि
रितिव्याख्याय मुंडते जलेनगा
त्रंलोक इत्युदाहृतवान् इति
दुर्गादासः ।
मुण श प्रतिज्ञाने इतिकविक
ल्पद्रुमः श मुणतिवृतं लोकः




प्रतिज्ञानानीत्यर्थः मोगिना
इतिदुर्गादासः ॥
मुंडं क्ली शिरः इतिनपुंसकलिं
गसंग्रहे अमरः बोलं मुंडा
यसं इतिराजनिर्घंटः ।
मुंडः पुं दैत्यविशेषः राहुग्रहः
इतिमेदिनी नापितः इति
जटाधरः स्थाणुहतः इति
केचित् ॥
मुंडः पुं क्ली मूर्द्धा इतिमेदिनी
मुंडः त्रि मुंडितः इत्यमरः है
मुंडित मुंड मुडि खंडने भावे
च क्ति मुंडो मुंडनं केशापन
यनं तद्योगात् अर्श आद्यजिति
डः पुमान् स्त्रियां मुंडा इत्यमर
टीकायांभरतः ॥
मुंडकं क्ली मस्तकं इतिहेमचं
द्रः मुंडकः पुं नापितः इति हे
मचंद्रः ॥
मुंडचणकः पुं कलायः इतिरा
जनिर्घंटः ॥
मुंडनं क्ली केशच्छेदनं तत्प
र्यायः भद्राकरणं २ वपनं ३ प
रिवापनं ४ क्षौरं ५ इतिहेमचंद्रः
मुंडफलः पुं नारिकेलवृक्षः य
था तथा मुंडफलस्यापिविज्ञामिह
प्रियोऽपिच इतिशब्दरत्नावली।

मुंडशालिः पुं शालिभेदः तत्
पर्य्यायः मुंडनकः २ निःशूकः ३
अशूककः ४ अस्यगुणाः त्रिदोष
नाशित्वं मधुराम्लत्वं बलप्रदत्वं
रुचिकारित्वं दीपनत्वं पथ्यत्वं
सुखजाड्य रुजापहत्वं च इति
राजनिर्घंटः ॥
मुंडा स्त्री मुंडीरिका इतिमेदि
नी मुंडिताख्यी इत्यमरटीकायां
भरतः ॥
मुंडाख्या स्त्री महाश्रावणिका
इतिराजनिर्घंटः ॥
मुंडायसं क्ली लोहं इतिराज
निर्घंटः ॥
मुंडितं क्ली लोहं इति राज
निर्घंटः वापितमुंडे त्रि इत्य
मरः ॥
मुंडितिका स्त्री क्षुद्रविशेषः मुं
डीरी इतिभाषा तत्पर्यायः श्राव
णाह्वा २ श्रावणी ३ पलंकसाधक
दम्बपुष्पा ५ अरुणा ६ श्वेतघ्नी ७
कुंभला ८ अरुणा ९ इतिरत्नमा
ला मुंडी पुं नापितः इत्यमरः
मुंडीरिका स्त्री मुंडितिका इति
जटाधरः ॥
मुत् स्त्री हद्विनामौषधं इति
राजनिर्घंटः ॥

मुत् स्त्री हर्षः इत्यमरः ॥
मुत्क सं सर्गे इतिकविकल्पद्रुमः
कमोदयति हनेनात्र लोकः
इतिदुर्गादासः ॥
मुद त्रि ङ हर्षे इतिकविकल्पद्रु
मः हर्षस्मितोत्साहः त्रि मुदितो
ऽस्ति ङ मादने यती इति
दुर्गादासः ॥
मुदा स्त्री हर्षः यथाश्रुत्वेमानंद
थुर्मुदा इतिशब्दरत्नावली ॥
मुदितः त्रि आनंदितः यथा
आर्त्तार्त्ते मुदिताहृष्टे पोषितेम
लिनाकृशा मृते म्रियेत या प
त्यौ साध्वीज्ञाया पतिव्रता इति
मुदितत्वं आलिंगनविशेषः
तस्यलक्षणं यथा नायिकयाना
यकस्य वा मपार्श्वे उषित्वा वामपा
दं तस्योरु द्वय मध्ये स्थापयित्वा
उभौमिलितौ गाढवस्थाने इति
कामशास्त्रं ॥
मुदिता स्त्री मुदा हर्षः इत्यमर।
टीकायां मथुरेशः ॥
मदिरः पुं मेघः इत्यमरः का
मुकः इति मेदिनी भेकः
इतिसंक्षिप्तसारोणादिवृत्तिः ।
मुद्गः पुं पक्षिविशेषः तत्पर्य्या
यः जलवायसः २ इतिहेमचंद्रः ॥


शमीधान्यभेदः मुग इति भाषा।
तत्पर्य्यायः सूपश्रेष्ठः २ वर्णार्हः
३ रसोत्तमः ४ भुक्तिप्रदः ५ हया
नंदः ६ सफलः ७ वाजिभोजनः ८
अस्यगुणाः कषायत्वं मधुरत्वं।
कफपित्तास्रजित्वं लघुत्वं ग्रा
हित्वं शीतत्वं नातिवातलत्वं च
तद्यूषगुणाः पित्तश्रमाग्निशमन
त्वं लघुत्वं संतापहारित्वं श्रोतच
कल्याणित्वं तत्सैंधवयुक्तं चेत् ।
रक्तप्रसादनत्वं सर्वरुजापहारि
त्वंच इतिराजनिर्घंटः अपिच
तुवरत्वं स्वादुत्वं अल्पानिलत्वं रु
क्षत्वंच इतिभावप्रकाशः ॥
वनमुद्गगुणाः मधुरः शीतलो
ग्राही कफपित्तज्वरापहः तद्वि
शेषाः यथा प्रधाना हरितास्तत्र
वन्यमुद्गास्तमुद्गवत् कृष्णमुद्गाम
हामुद्गा गौरहरितपीतकाः श्वे
ता रक्ताश्च निर्द्दिष्टा लघवः पूर्व
पूर्वतः इतिराजवल्लभः ।
मुद्गपर्णी स्त्री वनमुद्गः मुगानी
इतिभाषा तत्पर्य्यायः काकमुद्गा २
सहा ३ इत्यमरः क्षुद्रसहा ४
शिम्बी ५ मार्जारगंधिका ६ वनजा
७ रिंगिणी ८ कृष्णा ९ सर्पपर्णी १०
॥ ॥ ॥ ॥

पाककटुत्वं चक्षुष्यत्वं



अरंगिका ११ कोशिला १२ वनो
द्भवा १३ वनमुद्गा १४ अरण्यमुद्गा
१५ वन्या १६ अरंगिकास्थाने करे
णिका इति च पाठः अस्यागुणाः
हिमत्वं कास वात रक्त क्षय
पित्त दाह ज्वर नाशित्वं चक्षु
ष्यत्वं शुक्रवृद्धिकारित्वंच इति
राजनिर्घंटः अपि च मुद्गपर्णी
काकपर्णी सूर्य्यपर्ण्यल्पपर्णिका
काकमुद्गा च सा प्रोक्ता तथा मार्जा
रगंधिका मुद्गपर्णी हिमा रूक्षा ति
क्ता स्वादुश्च शुक्रला चक्षुष्या क्षय
शोथघ्नी
दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽति
सारहृत् इति भावप्रकाशः ।
मुद्गभुक् पुं घोटकः इति ज
टाधरः ॥
मुद्गभोजी पुं अश्वः इति राज
निर्घंटः ।
मुद्गमोदकः पुं मोदकविशेषः
मतिहर इति भाषा यथा मुद्गा
नां धूमसीं सम्यग्घोलयेन्निर्मला
म्बुना कटाहस्थं हुतं सोऽव फेणं
स्थापयेत्ततः धूमसीं तद्द्रवीभूतां
प्रक्षिपेत् कर्जरोपरि पतंति
बिंदवस्तस्मात्तान्पक्वान्समुद्धरेत्
सितापाकेन संयोज्य कुर्य्यात्
मुक्तेन मोदकान् अस्य गुणाः ।
लघु ग्राही त्रिदोषघ्नः स्वादुः शीतो
रुचिप्रदः चक्षुष्यो ज्वरहृत् बल्य
स्तर्पणो मुद्गमोदकः इति भाव
प्रकाशः ॥
मुद्गरं क्ली मल्लिकाभेदः लोष्टा
दिभेदने पुं इति मेदिनी ।
मुद्गरः पुं कर्मारहस्तः पुष्पवृक्ष
विशेषः तत्पर्य्यायः गंधसारः १
सप्तपत्रः २ अतिगंधः ३ गंधराजः ४
स्मिटप्रियः ५ प्रियः ६ जनेष्टः ७
मृगेष्टः ८ अस्य गुणाः मधुरत्वं
शीतत्वं सुरभित्वं सौख्यदायि
त्वं मनोजकारित्वं मधुपानंदा
कारित्वं पित्तप्रकोप नाशित्वंच ।
इति राजनिर्घंटः अस्त्रविशेषः
मुगुर इति भाषा तत्पर्य्यायः ।
द्रुघणः २ घनः ३ इत्यमरः
द्रुघनः ४ इति भरतः मुद्गरः
कोरकाख्यो इति हेमचंद्रः ।
मुद्गरकः पुं कर्मारः कामरांगा
इति भाषा इति राज निर्घंटः ।
मुद्गलं क्ली रोहिषतृणं इति राज
निर्घंटः ॥
मुद्गलः पुं हर्य्यश्वराजपुत्रः यथा
स्वपाते: पुरुजानुः न स्वाबद्रीः त
तस्य हर्य्यश्वः हर्य्यश्वान्मुद्गलसंजय

बृहदिषु यवीनर काम्पिल्यसंज्ञाः
पंचानामेतेषां विषयाणां रक्ष
णायालमेते मत्पुत्रा इति पित्रा
भिहिता इति पंचालाः इति
विष्णुपुराणे ४ अंशे १९ अध्यायः
गोत्रकारक मुनिविशेषः तस्य
भार्य्या इंद्रसेना इति पुराणं
मुद्गष्टः पुं वनमुद्गः इति शब्दर
त्नावली ॥
मुद्गष्टकः पुं वनमुद्गः इत्यमरः
मुद्गाईवटः पुं वटकविशेषः मा
दावडा इति भाषा यथा मुद्गपिष्टी
विरचितान् वटकांस्तैलपाचितान्
हस्तेन चूर्णयेत्सम्यक् तस्मिंश्चूर्णे
विनिःक्षिपेत् भृष्टं हिंग्वार्द्रकं
लवणं मरिचं जीरकं तथा निम्बूर
सं यवानीं च युक्त्या सर्वं विमिश्रयेत्
मुद्गपिष्टी पचेत्सम्यक् स्थाल्या
मंगारकोपरि तस्याश्च गोलकं
कुर्य्यात्तन्मध्ये पूरणं क्षिपेत् ।
तैलेनाथ गोलकान्सम्यक् कथि
तायां निमज्जयेत् गोलकाः पा
चकैः प्रोक्ता मुद्गाईकवटाश्च पि
अस्य गुणाः मुद्गाईकवटा रुच्या
लघवो बलकारकाः दीपनास्तर्प
णाः पथ्याः त्रिदोषघ्नाः प्रकीर्तिताः
इति भावप्रकाशः ॥
मुद्रा स्त्री प्रत्ययकारिणी नामेर
मोहर इति भाषा इति त्रि
कांडशेषः अंगुलि मुद्रा छाप ।
ऽ अंगुटी इति भाषा इति शब्द
रत्नावली स्वर्णरौप्यादि मुद्रिका
च मोहरटाका इत्यादि भाषा
इति लोकप्रसिद्धिः ॥ पंचया
त्रिपंचांगेन लिपिविशेषः छापा
र अक्षर इति भाषा यथा मुद्रा
लिपिः शिल्पलिपिर्लिपिर्लेखनि
संभवा गुंडिका घुणसंभूता लि
पयः पंचधा स्मृताः एताभिर्लि
पिभि र्यो मायचित्री अभदा द्व
र इति वाराहीतंत्रं लेख्य
न्यालिखितं विप्रे मुद्राभिरंकितं
चेयत् शिल्पादि निर्मितं यच्च
पार्थ्ये च सर्वदा इति रुद्र
यामलतंत्रे पंचमकारांतर्गत
भृष्टद्रव्यविशेषः यथा इक्षुका
लिङ्गा भृष्टा गोधूमचणकादयः
तस्य नाम भवेद्देवि मुद्रा मुक्ति प्र
दायिनी इति निर्वाणतंत्रे ११ प
टलः तस्याः शोधनं यथा
ओंतद्विष्णोः परमं पदं सदा पश्य
ति सूरयः दिवीव चक्षुराततं
ओंतद्विप्रासो विपन्यवो जागृवां
सः समिंधते विष्णोर्यत्परमं ।




पदं इति मंत्राभ्यां शोधनं
इति स्मृतितत्त्वं शरीरे धार्य
भगवदायुधादिचिह्नं छाप इति
भाषा यथा ततो नारायणीमुद्रा
धारयेत् प्रीतये हरेः मत्स्य कू
र्मादि चिह्नानि चक्रादीन्यायुधा
नि च अथ मुद्राधारणनित्यतामा
तो अंकितः शंखचक्राभ्यामुभयो
र्बाहुमूलयोः समर्च्चयेद्धरिं नित्यं
नान्यथा पूजनं भवेत् आदिपुराणे।
शंखचक्राद्यैः मुद्रादिरहिते ब्राह्म
णाधमं गर्द्दभं तं समारोप्य राजा
राष्ट्रात् प्रवासयेत् गारुडे श्री
भगवदुक्तौ सर्वकर्माधिकारश्च
शुचीनामेव चोदितः शुचित्वं च वि
जानीयान्मदीयायुधधारणात्।
पामवानरवेडे शंखचक्रादिभिश्चि
ह्नैर्विप्रः प्रियतमैर्हरेः रहितः सर्व
धर्मेभ्यः प्रच्युतो नरकं व्रजेत्।
स्कान्दे च पुनः कठशाखायामू
र्ध्वपुंड्रः शंखचक्रधारी विष्णुं परं
ध्यायति यो महात्मा स्वरेण मंत्रे
णसदा हृदिस्थितं परात्परं यन्म
हतो महान्तं अथर्वशिरसि यथैवे
य मुद्राकमस्थासिके अंकिता लो
के शुभगा भवेयुः तद्विष्णोः परमं
पदं ये गच्छन्ति लांछिता इत्या

दि अतएव ब्रह्मपुराणे कृष्णमु
द्राङ्कितं दृष्ट्वा सम्मानं न करोति यः
द्वादशाब्दार्जितं पुण्यं चाफलतां प
गच्छति अथ मुद्राधारणमाहा
त्म्यं स्कान्दे श्रीसनत्कुमार मार्क
ण्डेयसंवादे यो विष्णुभक्तो वि
प्रेन्द्र शंखचक्रादिचिह्नितः स या
ति विष्णुलोकं वै दाहप्रलय वर्जि
तं तत्रैवान्यत्र नारायणायुधै।
र्नित्यं चिह्नितं यस्य विग्रहं पाप
कोटिप्रयुक्तस्य तस्य किं कुरुते।
यमः शंखोद्धारस्य पद्माङ्कं वस
नोपधकोटिभिः तत्फलं लि
खिते शंखे प्रत्यहं द्विजो भुजे
यत्फलं पुष्करे नित्यं पुंडरीकाक्ष
दर्शने शंखोपरि कृते पद्मे तत्फ
लं समवाप्नुयात् वामे भुजे गदा
यस्य लिखिता दृश्यते कलौ
गदाधरो गयापुण्यं प्रत्यहं तस्य
यच्छति पञ्चानन्दपुरे प्रोक्तं चक्र
स्वामि समीपतः गदायां लिखिते
चक्रे तत्फलं कृष्णदर्शने श्रीभग
वदुक्तौ च यः पुनः कलिकाले
तु मत्सूरी संभवान्तरे मत्स्य कू
र्मादिकं चिह्नं गृहीत्वा कुरुते नरः
देहे तस्य प्रविष्टोऽहं जानन्तवि
दशोत्तमाः तस्य मे नांतरं।

किंचित्कर्मैवं श्रेयः इच्छता मम
अवतारचिह्नानि दृश्यन्ते यस्य वि
ग्रहे मर्त्यैर्मर्त्यो विज्ञेयः सततेन
मामकीन तनुः पापसहस्रेण तु पत
जायते न सन्देहः ममायुधानि
यस्यांगे लिखितानि कलौ युग
उभाभ्यामपि चिह्नाभ्यां योंकि
तो मत्स्यरूपया कूर्मयापि स्वकं
ते मोनि तिमं तस्य विग्रहे शं
खं च पद्मं च गदां रथांगं मत्स्यं च।
कूर्मं रचितं स्वदेहे करोति नि
त्यं सहकृतं स्यहहि पापत्रयं जन्म
शतार्जितं स्य तत्रैव श्रीब्रह्मनार
द संवादे कृष्णशस्त्राङ्कितं चेद्
मेघं वेद दानैः अशेषैः सर्व
भूतानाश तृणं रत्नमपि
लक्ष्मीसरस्वती दुर्गासावित्री हर
वल्लभा तिष्ठन्ति सततं देहे यस्य
शंखांकितानतः गंगा गया कुरु
क्षेत्रे प्रयागं पुष्करादि च नित्यं
तस्य सदा तिष्ठ यस्य पद्मांकितं
वपुः यस्य कौमोदकी चिह्नं भु
जे वाथ कलिप्रिय प्रत्यहं तत्र
द्रष्टव्यो गंगासागरसंगमः सव्य
करे गदा यस्य स्यांगे लिखिते यदि
हस्तेन सहितं तत्र त्रैलोक्य सच
राचरं त्रयोग्नयस्तथा देवा वि

सो सौ निपवानि च निवसंति स
दा तस्य यस्य देहे सुदर्शनं किंच
कृष्णायुधांकिता मुद्रा यस्य नारा
यणीकरे कर्मलोकाधिकारी च स
ज्ञेय स्वर्गयोः पतिः कृष्णमुद्रा
प्रयुक्तस्य देवं पित्र्यं करोति यः
नित्यं नैमित्तिकं काम्यं प्रत्यहं वा
क्षयं भवेत् पीयंते नन्त्रैव गृ
हा कृतात्मिराशयः अद्याङ्क
किता मुद्रा यस्य धातुमयी करे।
वाराही श्रीसनत्कुमारोक्तौ कृष्णा
युधांकितं देहं गोपीचन्दनमृत्
स्नया प्रयागादिषु तीर्थेषु स्नात्वा
किं करिष्यति यदा यस्य प्रप
श्यन देहं शंखादि चिह्नितं नरा
नरा जगत्स्वामीत्रोहरति पा
तकं भवनं यस्य देहेषु अष्टो।
त्तरे दिने दिने शंखचक्रगदाप
द्मे लिखिते सोऽच्युतः स्वयं
नारायणायुधैर्वक्रे कृत्वात्मानं क
लौ युगे कुरुते पुण्यकर्माणि मो
हत्स्थानस्य वै शंखादिनाङ्कितो
भक्त्याश्राद्धं यः कुरुते द्विजः।
विधिहीनं तु संपूर्णं पितृणां तु ग
यासमं यथाग्निर्दहते कक्षं वायुना
प्रेरितो भृशं तथा दहन्ति पापा
नि दृष्ट्वा कृष्णायुधानि वै ब्राह्म




श्रीब्रह्मनारदसम्वादे विष्णुनामाङ्कि-
तां मुद्रामष्टाक्षरसमन्वितं शङ्खा-
दिकायुधैर्युक्तां स्वर्णरूप्यमयीमपि
धत्ते भागवतो यस्तु कलिकाले
विशेषतः प्रह्लादस्य समो ज्ञेयो
नान्यथा कलिवल्लभ किञ्च शङ्खा-
ङ्कितनुर्विप्रो भुङ्क्ते यस्य च वेश्म-
नि तदन्नं स्वयमश्नाति पितृभिः स-
ह केशवः कृष्णायुधाङ्कितो यस्तु
श्मशाने म्रियते यदि प्रयागे या
गतिः प्रोक्ता सा गतिस्तस्य नारद ।
कृष्णायुधैः कलौ नित्यं मण्डितं यस्य
विग्रहं तत्राश्रयं प्रकुर्वन्ति विबुधा
वासवादयः यः करोति हरेः
पूजां कृष्णशस्त्राङ्कितो नरः अप-
राधसहस्राणि नित्यं हरति केशवः
कृत्वा काष्ठमयं बिम्बं कृष्णशस्त्रेण
चिह्नितं यो लाञ्छयति चात्मानं
तत्समो नास्ति वैष्णवः पाषण्ड-
पतितव्रात्यैर्नास्तिकालापपात-
कैः न लिप्यते कलिकृतैः कृष्णश-
स्त्राङ्कितो नरः किञ्च अष्टाक्षरा-
ङ्किता मुद्रा यस्य धातुमयी भवेत्
शङ्खपद्मादिभिर्युक्ता पूज्यतेऽसौ
सुरासुरैः धृता नारायणी मुद्रा प्र-
ह्लादेन पुरा कृता विभीषणेन बलि-
ना अङ्केण शुकेन च मान्धातृणा-

म्बरीषेण मार्कण्डप्रमुखैर्द्विजैः ।
शङ्खादिचिह्नितैः शस्त्रैर्देहे कृत्वा
कलिप्रिय श्राव... केशवात् प्रा-
प्तं समीहितफलं महत् । किञ्च ।
गोपीचन्दनमृत्स्नया लिखितं
यस्य विग्रहे शङ्खपद्मादिचक्रं वा
तस्य देहे वसेद्धरिः तत्रैव श्री-
सनत्कुमारोक्तौ यस्य नारायणी
मुद्रा देहे शङ्खादिचिह्निते धात्री-
फलकृता माला तुलसीकाष्ठसम्भवा
द्वादशाक्षरमन्त्रैस्तु नियुक्तानि क-
लेवरे आयुधानि च विप्रस्य मत् ।
समः स च वैष्णवः किञ्च यस्य ना-
रायणी मुद्रा देहे शङ्खादिचिह्निता
सर्वाङ्गं चिह्नितं यस्य शस्त्रैर्ना-
रायणोद्भवैः प्रवेशो नास्ति पा-
पस्य कवचं तस्य वैष्णवं अन्यत्र च ।
एभिर्भागवतैश्चिह्नैः कलिका-
ले द्विजातयः भवन्ति मर्त्यलोके
ते शापानुग्रहकारकाः ॥ अथ
मुद्राधारणविधिः गौतमीये ल-
लाटे च गदा कार्या मूर्द्ध्नि चापं शरं
तथा नन्दकं चैव हृन्मध्ये शङ्खचक्रं
भुजद्वये शङ्खचक्राङ्कितो विप्रः
श्मशाने म्रियते यदि प्रयागे या
गतिः प्रोक्ता सा गतिस्तस्य गौतम
चक्रं च दक्षिणे बाहौ शङ्खं वामे

ऽपि दक्षिणे गदां वामे गदाध-
स्तात् पुनश्चक्रं च धारयेत् शङ्खो-
परि तथा पद्मं पुनः पद्मं च दक्षि-
णे शङ्खं वक्षसि चापं च शरं शि-
रसि धारयेत् इति पञ्चायुधान्या-
दौ धारयेद्वैष्णवो जनः मत्स्यं च
दक्षिणहस्ते कूर्मं वामकरे तथा
तथा चोक्तं दक्षिणे तु भुजे विप्रो
बिभृयाद्वै सुदर्शनं मत्स्यं पद्मं
वापरे च शङ्खं कूर्मं गदां तथेति ।
साम्प्रदायिकशिष्टाचाराच्च
यथारुचि शङ्खचक्रादिचिह्नानि स-
र्वेष्वेव धारयेत् भक्त्या निजेष्ट-
देवस्य धारयेल्लक्षणान्यपि चक्र-
शङ्खौ च धार्येते संमिश्रावेव के-
वलं यतः उक्तं ब्रह्मवैवर्ते के-
वलं नो हरेश्चक्रं शङ्खं वाप्यथ विग्र-
हे अतश्चक्रविमिश्रं तं बिभृया-
द्वैष्णवः सदा श्रीगोपीचन्दनेन ।
वै चक्रादीनि बुधोऽन्वहं धारयेद्वै
यतो हेतोः नमामि किल तानि हि ।
अथ चक्रादीनां लक्षणानि द्वा-
दशारं तु षट्कोणं वलयत्रय-
संयुतं चक्रं स्याद्दक्षिणावर्तः शङ्ख-
श्च श्रीहरेः स्मृतः गदापद्मादिकं
लोकसिद्धमेवमनन्तबुधैः मुद्राश्च ।
भगवन्नामाङ्कितायाश्चाद्यादिभिः

इति श्रीहरिभक्तिविलासः ॥
अपि च यथा मुद्राधीनलाघ्वान-
धानमानसंशयः तथा याधीनता
याश्च विभेदो नैव वर्त्तते नाम-
चिह्नादिना देहे चिह्निता वास्त्रटङ्कने
मादीनां प्रोच्यते भूप वात्यानां ता-
नि तानपि वैष्णवैर्विष्णुभक्तैश्च ।
ब्राह्मणैर्वेदपारगैः संधार्या
सततं मुद्रा गोपीचन्दनसंयुता
इति नारदपञ्चरात्रे । कृष्णनामा-
क्षरैर्गात्रमङ्कयेच्चन्दनादिना स
लोकपावनो भूत्वा विष्णुलोकम-
वाप्नुयात् अग्निना तप्तेन चक्रेण ब्रा-
ह्मणो बाहुमूलयोः अङ्कयित्वा ज-
पेन्मन्त्रं संसारान्मोक्षमाप्नुयात् ।
इति पद्मपुराणं तन्मात्रा चाङ्कि-
तं सर्वं वसनं भाजनादिकं इति
हारीतस्मृतिः ॥ देवता-
विशेषप्रीतिजनिकाङ्गुलिरचना
यथा मुद्रा परमुत्पत्तिमाह तन्त्रे
मोदनात् सर्वदेवानां द्रावणात्
पापसन्ततेः तस्मान्मुद्रेति सा
ख्याता सर्वकामार्थसाधनी अ-
थ मुद्राः प्रवक्ष्यामि सर्वतन्त्रेषु क-
ल्पिताः याभिर्विरचिताभिश्च मो-
दन्ते मन्त्रदेवताः अर्च्चने जप-
काले च ध्याने काम्ये च कर्मणि ।




स्थाने चावाहने शंखे प्रतिष्ठायां
चरणे नैवेद्य च तथान्यत्र त
न्त्र कल्पप्रकाशिते स्थानेमुद्राः
प्रदष्टव्याः स्व स्वलक्षणलक्षिताः
आवाहनादिका मुद्रा नव साधारणा
णा मताः तथा षडङ्गमुद्राश्च सर्व
मन्त्रेषु योजयेत् एकोनविंशति
मुद्रा विष्णोरुक्ता मणीषिभिः श
ङ्खचक्र गदा पद्म वेणु श्रीवत्स
कौस्तुभाः वनमाला तथा ज्ञानमु
द्रा बिल्वाकृया तथा गरुडाख्या प
रा मुद्रा विष्णोः संतोषवर्द्धिनी नार
सिंही च वाराही हायग्रीवी धनु
स्तथा बाणमुद्रा ततः परशुर्जग
न्मोहनिकापरा काममुद्रापराख्या
ता शिवस्य दशमुद्रिकाः लिङ्गयो
नि त्रिशूलाख्या मालेष्टाभीमृगाकृ
याः खट्वाङ्ग च कपालाख्या डम
रुः शिव तोषदाः सूर्यस्यैकैव प
द्माख्या सप्तमुद्रा गणेशितुः दन्त
पाशांकुशा विघ्न परशु लड्डुका
संज्ञिता बीजपूराकृया मुद्रा विघ्ने
विघ्नपूजने पाशांकुश वराभीति
खड्गचर्म धनुः शराः मौषली मु
द्रिकादौर्गी मुद्राः शक्तेः प्रियंक
राः लक्ष्मीमुद्रार्चने लक्ष्म्या वा
ग्वादिन्याश्च पूजने अक्षमाला तथा

वाणी व्याख्या पुस्तकमुद्रिकाः सम
जिकाकृया मुद्रा विज्ञेया वह्नि
पूजने मत्स्यमुद्रा च कूर्माख्या
लेलिहा मुण्ड संज्ञिका महायो
निरिति ख्याता सर्वसिद्धिसमृद्धि
दा शक्त्यर्च्चने महायोनिः श्यामा
दौ मुण्डमुद्रिका मत्स्यकूर्म ले
लिलिहाख्या मुद्रा साधारणी म
ता तारार्च्चने विशाषास्तु कथ्यन्ते
पंचमुद्रिकाः योनिश्च भूतिनी चैव
वीजाख्या दैत्यधूमिनी लेलिहाने
ति संप्रोक्ताः पंचमुद्राः प्रकाशि
ताः दशकामुद्रिका ज्ञेयास्त्रिपुरा
याः प्रपूजने संक्षोभद्रावणाकर्ष
वश्योन्मादमहांकुशाः खेचरी
वीजयोन्याख्या त्रिखण्डा परिकी
र्त्तिताः कुम्भमुद्राभिषेके स्यात्पद्म
मुद्रासनेनथा कालकर्णीप्रयो
कृया विघ्नप्रशमकर्म्मणि गालि
नीच प्रयोक्तव्या जलशोधनकर्म
णि श्रीगोपालार्च्चने वेणुर्नृहरेर्ना
रसिंहिका वराहस्य च पूजायां वा
राहाख्यां प्रयोजयेत् हयग्रीवा
र्च्चने चैव हायग्रीवीं प्रदर्शयेत्
रामार्च्चने धनुर्वाणमुद्रे परशुस्त
पार्च्चने परशुरामस्य विज्ञेयाज
गन्मोहनसंज्ञिका वासुदेवाकृया

ध्यानेऽकेन मुद्रान्तरतोऽपि सर्वत्र प्रा
र्थने चैव प्रार्थनाख्यां प्रयोजयेत्
उद्देशास्तु कमादासां मुच्यन्ते ।
लक्षणान्यथा हस्ताभ्यामञ्जलिं ब
द्ध्वानामिकामूलपर्व्वणोः अंगुष्ठौ नि
क्षिपेत्सेयं मुद्रा त्वावाहनी स्मृता
॥१॥ अधोमुखी त्वियं चेत् स्यात्
स्थापनी मुद्रिका स्मृता २ उच्छ्रि
तांगुष्ठ मुष्ट्योस्तु संयोगात्सन्निधा
पनी ३ अन्तः प्रवेशितांगुष्ठा सैव
संरोधनी मता ४ उत्तान मुष्टि
युगला संमुखी करणी मता ५ ।
देवतांगे षडंगानां न्यासः स्यात् ।
सकलीकृतिः ६ सव्यहस्त कृता
मुष्टि दीर्घाधोमुख तर्ज्जनी अवगु
ण्ठन मुद्रेयमभितो भ्रामिता मता
७ अन्योन्याभिमुखाश्लिष्टा कनि
ष्ठानामिका पुनः तथैव तर्ज्जनी
मध्या धेनुमुद्रा प्रकीर्त्तिता अमृती
करणं कुर्य्यात्तया साधकसत्तमः ८
अन्योन्यग्रथितांगुष्ठा प्रसारित प
रांगुली महामुद्रेयमुदिता परमी
करणे बुधैः प्रयोजयेदिमा मुद्रा
देवताह्वान कर्म्मणि ॥ ९ ॥
वैष्णवीनान्तु मुद्राणां कथ्यन्ते लक्ष
णान्यथ वामांगुष्ठन्तु संगृह्य दक्षि
णेन तु मुष्टिना कृत्वोत्तानं ततो

मुष्टिमंगुष्ठन्तु प्रसारयेत् वामांगु
ल्यस्तथा श्लिष्टाः संयुक्ताः सुप्र
सारिताः दक्षिणांगुष्ठसंस्पृष्टा
ज्ञेयैषा शंखमुद्रिका १ हस्तौ तु
संमुखौ कृत्वा सन्नतप्रोथितांगुली
तलान्त मिलितांगुष्ठौ सुभुग्नौ सु
प्रसारितौ कनिष्ठांगुष्ठकौ लग्नौ
मुद्रैषा चक्रसंज्ञिका २ अन्यो
न्याभिमुखौ हस्तौ कृत्वा तु ग्रथितां
गुली अंगुल्यौ मध्यमे भूयः संलग्ने
सुप्रसारिते गदामुद्रेयमुदिता
विष्णोः संतोषवर्द्धिनी ३ हस्तौ
तु संमुखौ कृत्वा सन्नतप्रोथितांगुली
तलान्त मिलितांगुष्ठौ कृत्वैषा ।
पद्ममुद्रिका ४ ऊर्द्ध्वे वाम करांगु
ष्ठोऽलग्नस्य कनिष्ठिका दक्षिणांगु
ष्ठसंयुक्ता तत्कनिष्ठा प्रसारिता
तर्ज्जनी मध्यमानामाः किञ्चित्संकु
च्य चालिताः वेणुमुद्रा भवत्येषा
सुगुप्ता प्रेयसी हरेः ५ अन्योन्या
पृष्ठ करयो. मध्यमानामिकांगुली
अंगुष्ठेन तु बध्नीयात् कनिष्ठामूल
संस्थिते तर्ज्जन्यौ कारयेदेषा मु
द्रा श्रीवत्ससंज्ञिका ६ अनामा
पृष्ठसंलग्ना दक्षिणस्य कनिष्ठिका
कनिष्ठयान्यया बद्धा तर्ज्जन्या दक्षया
तथा वामानामां च बध्नीयात् दक्षि



णांगुष्ठ मूलके अंगुष्ठमध्यमे वामे
संयोज्य सा ता पुनः वनस्था
ऽप्यग्रसंलग्ना मुद्राकौस्तुभ संज्ञि
का ७ स्पर्शेनकंठादि पादांतं
तर्जन्यांगुष्ठयातथा करद्वयेनमा
लावत्मुद्रेयं वनमालिका ८ त
र्जन्यंगुष्ठकौ प्राक्वग्रतो विन्यसेत्
हृदि वामहस्ताम्बुजं वाम जानुमू
र्द्धनि विन्यसेत् ज्ञानमुद्रा भवेदे
षा रामचंद्रस्यप्रेयसी ९ अंगुष्ठं
वामहस्तस्य मिलितं करांगुष्ठकेना पि
बद्धा तस्याग्रं पीडयित्वांगुलि भि
रपि च ता वामहस्तांगुलीभिः ॥
बद्धागाढं हृदिस्थापयेत् विमलं
श्रीवांहरन् मारबीजं बिल्वाख्यामुद्रि
केषा स्फुटमिह गदिता गोपनीया
विविक्तैः १० हस्तौ तु विमुखौ
कृत्वा ग्रथयित्वा कनिष्ठिके मिथस्त
र्जनिके श्लिष्टश्लिष्टावंगुष्ठकौ तथा
मध्यमा नामिके हेत्व होपक्षाविव
चालयेत् एषा गरुडमुद्रास्याद्वि
ष्णोः संतोष वर्द्धिनी ॥ जानु
मध्येकरौकृत्वा चिबुकौष्ठौ समावु
भौ हस्तौ तु भूमिसंलग्नौ कम्प
मानः पुनःपुनः मुखंविनतकं कु
र्यात् लेलिहानांच जिह्विकांना।
रसिंही भवेदेषा मुद्रा तत्प्रीति।

वर्द्धिनी १२ अथवा अंगुष्ठाभ्यां ता
करयो स्तथाक्रम्य कनिष्ठिके अथो
मुखीभिः सर्वाभिर्मुद्रेयं नृहरे
र्मता १२ देवोपरि करं वामं
कृत्वोत्तान मथः सर्पीः नमयेदरि
सप्रोक्ता मुद्रावाराह संज्ञिका
१३ यद्वा दक्षहस्तेवाङ्गुमुख वाम
हस्तमधोमुखं अंगुष्ठाग्रेतुसंयुक्तं
मुद्रावाराहसंज्ञिका १३ वाम
हस्ततलेदत्वा अंगुलीस्तास्तथोन्न
ताः संरोप्य मध्यमां तासां मन्त्र
न्यायो विकुंचयेत् हयग्रीव प्रिया
मुद्रानन्तेतुकारिणी १४ वा
मस्य मध्यमाग्रेतु तर्जन्यग्रेण योज
येत् अनामिकांकनिष्ठांच तस्यां
गुष्ठेन पीडयेत् दर्शयेद्वामके स्कं
धे धनुर्मुद्रेयमीरिता १५ द
क्षमुष्टेस्तु तर्जन्या दीर्घैषा बाण मु
द्रिका १६ यद्वा ज्ञानार्णवे यथा
हस्तगतं वापं तथा हस्तं कुरु
प्रिये वापमुद्रेयमाख्याता वाम
हस्तेस्तु वस्थिता १७ यथा हस्त
गता बाणस्तथा हस्तं कुरु प्रिये
बाणमुद्रेय माख्याता रिपुवर्गनिकृं
तनी १८ तलेतलंतु करयो स्ति
र्यक्संयोज्य चांगुलीः संहृताः
प्रसृताः कुर्यान्मुद्रापरशु संज्ञि

का १९ इच्छितांगुष्ठ मुष्टिर्हि मुद्रा
त्रैलोक्यमोहिनी २० हस्तौ तु
संपुटौ कृत्वा प्रसृतांगुलिकौ त
थानर्जन्यौमध्यमा पृष्ठेअंगुष्ठौमध्य
माश्रितौ काममुद्रेय मीरिता सर्व
देवप्रियकरी २१ ॥ महादेव
प्रियाणांतु कथ्यंते लक्षणान्यथ उ
च्छ्रितं दक्षिणांगुष्ठं वामांगुष्ठेनवे
ष्टयेत् वामांगुलीर्हि दक्षिणाभिरंगु
लीभिश्च वेष्टयेत् लिंगमुद्रेयमा
ख्याता शिवसान्निध्यकारिणी १
मिथः कनिष्ठिके बद्धा तर्जनीभ्या
मनामिके अनामिकोर्द्धसंश्लिष्टदी।
र्घमध्यमयोरथः अंगुष्ठाग्रद्वयं न्य
सेत् योनि मुद्रेय मीरिता २ ।
अंगुष्ठेन कनिष्ठांतुबद्धाशिष्टांगुलि
त्रयं प्रसारयेत् त्रिशूलाख्या मु
द्रैषा परिकीर्तिता ३ अंगुष्ठ त
र्जन्यग्रे तु ग्रथयित्वांगुलि त्रयं
प्रसारयेदक्षमाला मुद्रेयं परिकी
र्तिता ४ अथः स्थितोदक्षहस्तः
प्रसृतोवरमुद्रिका ५ ऊर्द्धीकृतो
वामहस्तः प्रसृतोऽभयमुद्रिका
६ मिलितानामिकांगुष्ठं मध्यमा
ग्रेनियोजयेत् शिष्टांगुल्युच्छ्रिते
कुर्यात् मृगमुद्रेय मीरिता ७
पंचांगुल्या दक्षिणास्तु मिलितास्त

र्द्ध मुन्नताः खट्वांग मुद्रा विख्याता
शिवस्यातिप्रियामता ८ पात्रवा
द्वाम हस्तेतु कृत्वाग्रे वामकेतथा
निधायोच्छ्रितवत् कुर्यात् मुद्रा
कालिकीमता ९ मुष्टिंच शिथि
लांबद्धा ईशदुच्छ्रि मध्यमां द
क्षिणामर्द्धं मुन्नम्य कर्णदेशप्रचा
लयेत् एषा डमरुका सर्ववि
घ्नविनाशिनी १० तथा गणेश
मुद्राणां कथ्यंते लक्षणान्यथ उ
त्तानोर्द्धमुखीमध्यासरलावद्धमुष्टि
का दंतमुद्रासमाख्याता सर्वागमवि
शारदैः १ वाममुष्टेस्तु तर्जन्या
दक्षमुष्टेस्तु तर्जनी संयोज्यांगु
ष्ठकाग्राभ्यां तर्जन्यग्रे स्वके क्षि
पेत् एषा पाशाकृया मुद्रा विद्व
द्भिः परिकीर्तिता २ ऋज्वींच म
ध्यमां कृत्वा तर्जनीमध्यपर्वणि
संयोज्याकुंचयेत् किंचिन्मुद्रैषांकु
शसंज्ञिका ३ तर्जनी मध्य
मानामा कनिष्ठांगुष्ठमुष्टिका अथो
मुखी दीर्घरूपा मध्यमा विघ्नमुद्रि
का ४ परशुमुद्रा ५ निगदिता प्र
सिद्धा लड्डुमुद्रिका ६ बीजपूराख्या
मुद्रा प्रसिद्धत्वादुपेक्षिता ७ ॥
शाक्तेयीनां च मुद्राणां कथ्यंते लक्ष
णान्यथा पाशां १ अंकुश २ वरा ३ भीति ४

यत्र ५ वीणाः समीरिताः ६ कनि
ष्ठानामिके हृद्यास्यांगुष्ठेनैव दत्ता
नः शिष्टांगुली तु प्रसृतेन सम्श्लिष्टा
स्त्वङ्कमुद्रिका ७ वामहस्तं तथा तिर्य्य
क्कृत्वा चैव प्रसार्य्य च आकुञ्चितां
गुलीः कुर्य्यात् धर्म्ममुद्रेयमीरिता ८
मुष्टिं कृत्वा तु हस्ताभ्यां वामस्यो
परि दक्षिणं कुर्य्यान्मुषलमुद्रेयं
सर्व्वविघ्नविनाशिनी ९ मुष्टिं कृत्वा
कराभ्याञ्च वामस्योपरि दक्षिणं
कृत्वा शिरसि संयोज्य दुर्गामुद्रेय
मीरिता १० चक्रमुद्रां तथा
बद्धा मध्यमे द्वे प्रसार्य्य च कनि
ष्ठिके तथानीय तदग्रेऽङ्गुष्ठकौ
क्षिपेत् लक्ष्मीमुद्रा परा ह्येषा सर्व्व
सम्पत्प्रदायिनी ११ वीणावाद
न वत्कृत्वा संचालयेच्छिरः
वीणामुद्रेयमाख्याता सरस्वत्याः प्रि
यंकरी १२ वामबाहुं स्वाभिमुखी
कृत्वा पुस्तकमुद्रिका १३ दक्षिणाङ्ग
ष्ठतर्जन्यौ वृत्तलग्ने परांगुलीः प्र
सार्य्य संहृतौ ज्ञाना यथा व्याख्यान
मुद्रिका १४ श्रीरामस्य सरस्वत्याः
अन्यन्त्रेयसी मता मणिबन्ध
स्थितौ कृत्वा प्रसृतांगुलिकौ करौ ।
कनिष्ठांगुष्ठयुगले मिलितान्तः प्र
सारयेत् समनिद्राख्यमुद्रेयं वैष्णा

नर प्रियंकरी १५ कनिष्ठांगुष्ठकौ
शक्तौ करयो रितरेतर त
र्ज्जनी मध्यमानामा संहताभुग्नव
र्ज्जिता मुद्रैषा गालिनी प्रोक्ता
शंखस्योपरि चालिता दक्षा
गुष्ठं परागुष्ठे त्वितरहस्तद्वयेन त
सावकाशा मेकमुष्टिं कुर्य्यात्स्या
त्कुम्भमुद्रिका मत्स्योर्द्धं ह
तांगुष्ठौ तर्ज्जन्यग्रे तु विन्यसेत्
सर्व्वरक्षाकरी ह्येषासंत मुद्रा प्र
कीर्त्तिता प्रसृतांगुलिकौ ह
स्तौ मिथः श्लिष्टौ च संमुखौ कुर्य्यात्
स्वहृदये सेयं मुद्रा प्रार्थने संज्ञि
का अंजलिस्तु जलिमुद्रा स्याद्धासरे
वाकृया च मा अंगुष्ठाङ्गुलतोक्त
त्वा मुष्ट्याः संलग्नयो हृयोः १६
तावेवाभिमुखौ कुर्य्यात् मुद्रैषा का
लकर्णिका दक्षिणानिविडा मुष्टि
नीषिकार्पित तर्ज्जनी मुद्रा विस्मय
संज्ञा स्यात् विस्मयावेश कारिणी
मुष्टिरुर्द्धीकृतांगुष्ठा दक्षिणा
नारमुद्रिका तर्ज्जन्यंगुष्ठ संयो
गादग्रतो विन्दुमुद्रिका अधो
मुखे वामहस्ते ऊर्द्ध्वास्यं दक्षहस्त
कं क्षिप्त्वांगुलीरंगुलीभिः संग्रथ्य
परिवर्त्तयेत् एषा संहार मुद्रा
स्यात् विसर्ज्जनविधौ स्मृता ॥

दक्षपाणि पृष्ठदेशे वामपाणित
लं न्यसेत् अंगुष्ठौ चालयेत् स
म्यक् मुद्रेयं मत्स्यरूपिणी ॥
वामहस्तस्य तर्ज्जन्यां दक्षिणस्य क
निष्ठया तथा दक्षिणतर्ज्जन्यां वा
मांगुष्ठेन योजयेत् उन्नतं दक्षि
णांगुष्ठं वामस्य मध्यमादिकाः अं
गुली र्योजयेत् पृष्ठे दक्षिणस्य कर
स्य च वामस्य पितृतीर्थेन मध्य
मानामिके तथा अधोमुखे च ते
कुर्य्यात् दक्षिणस्य करस्य च कूर्म्म
पृष्ठ समं कुर्य्यात् दक्षपाणिं च सर्व्व
तः कूर्म्ममुद्रेयमाख्याता देवता
ध्यानकर्म्मणि पृष्ठ क्रोडे ॥
अन्तरांगुष्ठमुष्टिं तु कृत्वा वामकरस्य च
मध्यमाग्रे दक्षिणस्य तथा लग्ना प्र
यत्नतः मध्यमानामयोस्तर्ज्जन्यामंगुष्ठा
ग्रेण योजयेत् दक्षिणं योजयेत्
पाणिं वामपृष्ठे तु साधकः दर्शये
दक्षिणभागे भेडमुद्रेय मुच्यते
तर्ज्जनीमध्यमानामाः समं कु
र्य्याद्धोमुखं अनामायां क्षिपे
द्वृद्धां ऋज्वीकृत्वा कनिष्ठिकां ले
लिहानाम मुद्रेयं जीवन्यासे प्रकी
र्त्तिता तर्ज्जन्यनामिका मध्याकनि
ष्ठाक्रमयोगतः करयोर्योजयेद्व
कनिष्ठामूलयोगतः अंगुष्ठाग्रे तु


निःक्षिप्य महायोनिः प्रकीर्त्तिता
तारायाः योन्यादि मुद्रा यथा
योनिमुद्रा च वक्त्वा भूतिनीवक्त्र
व्या वीजाख्यापि परिवर्त्य करौ
स्पृष्टौ कनिष्ठाकृष्ट मध्यमे अना
मायुगलं चाथ तर्ज्जनीयुगलं पृथक्
अन्योन्यं निविडं बद्ध्वा ऽङ्गुष्ठाग्रा
ऽनामिके ततः दानवधमकेत्वा
ख्यामुद्रैषा कथिता प्रिये अस्या
स्त्ववेधनाम्नेत्री वेधनान्नुच्यतेऽप्र
वं वक्रे विस्तारितं कृत्वाप्ययोनि
क्रांच चालयेत् पार्श्वस्थ मुष्टि
युगले लेलिहानेति कीर्त्तिता ।
एषान्तरासायनेऽन्या लेलिहाना व
कृत्वा योनिर्म्मायाथरः सेंदु
वैधः कूर्चः कमाद्धिडः बीजानिचा
स्थरत्तीमुद्रावेधनमाचरेत् तर्ज्ज
न्यंगुष्ठसंयोगादग्रतो विन्दुमुद्रिका
वामकेश्वर तन्त्रोक्ताः प्रकाश्यन्ते ।
ऽथ मुद्रिकाः शृणु देवि प्रवक्ष्यामि
मुद्राः सर्व्वार्थसिद्धिदाः याभिर्वि
रचिताभिस्तु सान्निध्यं त्रैपुरं भ
वेत् परिवर्त्य करौ स्पृष्टौ वंगुष्ठौ ।
कारयेत् समौ अनामान्तर्गते कृ
त्वा तर्ज्जन्यौ कुटिलाकृती कनिष्ठि
के नियुञ्जीत निजस्थाने महेश्वरि
त्रिखण्डेयं समाख्याता त्रिपुराध्याना

कर्म्माणि मध्यमा मध्यगे कृत्वा
कनिष्ठेऽङ्गुष्ठ रोधिते तर्ज्जन्यौ
दंडवं कृत्वामध्यमोपर्य्यनामिके ।
एषाच प्रथममुद्रा सर्व्वसंक्षोभ
कारिणी एतस्यएवमुद्रायामध्य
मेसरले यदा क्रियेत परमेश्वरि
नि सर्व्वविद्राविनी तदा मध्य
मातर्ज्जनीभ्यांच कनिष्ठानामिकेस
मे अंकुशाकाररूपाभ्यां मध्यमे
स्थिरि अंगुष्ठौ तु निर्युञ्जी
त कनिष्ठानामिकोपरि इयमाक
र्षिणी मुद्रा त्रैलोक्याकर्षिणीपरा
पुटाकारौ करौ कृत्वा तर्ज्ज
न्यावंकुशाकृती परिवर्त्तक्रमेणै
वमध्यमे तदयोगते क्रमेणदेवि
तेनैव कनिष्ठानामिकेतथा सं
योज्यनिबिडाः सर्व्वा अंगुष्ठावग्रदे
शतः मुद्रेयं परमेशानि सर्व्वव
शकरीमता सम्मुखौ तु करौ
कृत्वा मध्यमा मध्यगेऽनुजे अ
नामिकेत्वसरले तदहिस्तर्ज्जनीद्वयं
दंडाकारौ तदंगुष्ठौ मध्यमा नख
देशगौ मुद्रैषोन्मादिनी नाम्ना
कर्षिणीसर्व्वयोषितां अस्याश्त्व
नामिकायुग्ममध्यः कृत्वांकुशाकृती
तर्ज्जन्यावपि तेनैवक्रमेणविनियो
जयेत इयंमहांकुशा मुद्रा सर्व्व

कामार्थसाधिनी सव्यं दक्षि
णादेशे तु सव्यदेशे तु दक्षिणं
बाहुं कृत्वामहादेवि हस्तौ संपरि
वर्त्यच कनिष्ठानामिके देवि युक्ते
तेनक्रमेण च तर्ज्जनीभ्यां समा
क्रांतेसर्व्वोर्द्धमपि मध्यमे अंगु
ष्ठौत्वमहेशानि सरलावपि कार
येत इयंसा खेचरीनाम्ना पार्थिव
स्थानयोजिता ॥ परिवर्त्यक
रौस्पष्टावर्द्धचंद्राकृतीप्रिये तर्ज्ज
न्यंगुष्ठयुगलंयुगपत कारयेत्ततः
अधः कनिष्ठावष्टब्धे मध्यमे विनि
योजयेत तथैवकुटिले योज्य
सर्व्वापश्चादनामिके बीजमुद्रेय
मचिरात सर्व्वसिद्धिविवर्द्धिनी ॥
मध्यमेकुटिले कृत्वातर्ज्जन्युपरिसं
स्थिते अनामिके मध्यगेत तथै
वहि कनिष्ठिके सर्व्वा एकत्रसंयो
ज्याअंगुष्ठ परिपीडिताः एषा तु
परमामुद्रा योनिमुद्रेय मीरिता
एता मुद्रा महेशानि त्रिपुरायाम
योदिताः पूजाकाले प्रयोक्त
व्या यथातत्क्रमयोगतः वामहस्ते
तमुष्टिंत बद्धाकर्णप्रदेशके तर्ज्ज
नीसरलांकृत्वा भ्रामयेन्मन्त्रविन्मः
सौभाग्यदंडिनी मुद्रा न्यासकाले
पिस्त्विता(?) अंतरंगुष्ठमुष्टी(?) त


निरुध्य तर्ज्जनीमिमां रिपुजिह्वा।
ग्रहा मुद्रा न्यासकालेत्वस्त्विता
बद्धात्व योनिमुद्रांवै मध्य
मे कुटिले कृत्वा अंगुष्ठेनतदग्र
तु मुद्रेयं भूतिनीमता वामम
ष्टिं विधायाथतर्ज्जनी मध्यमेततः
प्रसार्य्य तर्ज्जनीमुद्रा निर्द्दिष्टावज्र
णिना इतितंत्रसारेमुद्राप्रकरणं
समाप्तं ॥ अपिच उक्ताः
स्तवनमस्काराः मृगेतत्पुरतोयुवां
मुद्राणां परिसंख्यानंस्वरूपं यथा
क्रमं येतु अस्मसमुद्रस्यैव मांज
लि बिल्वपद्मकौ नागवो मुंड
दंडौ च योनिरद्धं तथैवच व
ह्नीचमहामुद्रा महायोनिस्तथै
वच भगश्च पुटकश्चैवनिःशको
ऽप्यार्द्धचंद्रकः अंगेचह्रिमुखंचैव
शंखमुद्राच मुष्टिकः वज्रंचैवतु
थाबद्धं सयोनिर्विमलस्तथा चटः
शिखरिणीतगः मुंडोऽप्यर्द्धये
नूकः संमीलनी च कुंडंच चक्रं
मूलंतथैवच सिंहवक्रं गोमु
खंच प्रोन्नामोन्नमनं तथा विंब
पाश्रयत मुद्रान्यायोऽथसाधनी।
तथा प्रसाधनीवाग्मुद्राकुंडली।
(?)ह्न मेवच त्रिमुखंचासिवलीव
योगाभेदोऽप्यमोहनं । वाणा

यत्नश्चतर्ण्णीरं मुद्रा एतास्त्वसन्नमाः
अष्टोत्तरशतं मुद्राश्वलक्षणायाः प्र
कीर्त्तिताः नासांतु पंचपंचाश ।
देताः शास्तास्तपूजने शेषास्त
या त्रिपंचाशन्मुद्रास्ताः समयेषुच
ह्वानयन संकेत नटनादिषुताः
स्मृताः देवानांचित्तनेयोग ध्या
नेजप्यविसर्ज्जने आद्यास्त्व प
चपंचाशन्मुद्रा भैरव कीर्त्तिताः
मुद्रां विनातु यज्जप्यं प्राणायामः
सुरार्च्चनं योगाध्यानासने चापि
निष्फलानिच भैरव ॥ प्रत्येकं
लक्षणंतेषां शृणुत्वेनत्वयोयुवा।
दक्षिणामध्यमाग्रेणसव्यहस्तस्य
तर्ज्जनीं योजयेत सव्यमध्यांतत
र्ज्जन्यादक्षिणेनवै । तथा दक्षा
नामिकया वामहस्तकनिष्ठिकां अ
नामिकांतुवामस्य दक्षिणस्यकनिष्ठ
या योजयेद्व क्रिमात्मस्यकरवि(?)
णावन्नेनत्व येतुमुद्रासमाख्याता
सर्व्वदेवस्यतत्प्रिया । संयोज्य हो
तलौ सर्व्वाण्येगुह्याग्राणिहस्तयोः सं
योज्य पार्श्वतोअंगुष्ठौसंपुटः प्रो
च्यतेस्वरैः सर्व्वेषां मम देवानां सं
पुटः शस्यतेसदा ध्यानसंपुट यो
गादौ सम्पुटः शस्यते सदा २।
निकुञ्जयुगलं पाणयोः संयोज्याद्धेन



एवञ्च मध्यमे स्यातः मुद्राकारः प्राञ्ज
लिः परिकीर्त्तितः २ अङ्गुष्ठमन्तरं
कृत्वा पाण्योर्मुष्टिं विधाय च सं
योज्य विल्ववत्ते तु विल्वमुद्राप्रकी
र्त्तिता ४ मणिवंधाद्वाकरभे संयो
ज्य करयो र्द्वयोः अङ्गुष्ठे चापि
संयोज्य तथैव च कनिष्ठके ति
स्रस्तिस्रो र्द्वयोः पाण्योरङ्गुलीर्वि
रलास्ततः पद्ममुद्रा समाख्याताच
तुर्वर्गप्रदा नृणां ५ अङ्गुष्ठाग्रेण त
र्ज्जन्याः संयोज्याग्राद्दूरेखया ।
अन्याङ्गुलीस्तथा तन्वन्नाराचः स्या
त्प्रसार्य्यते मम चैव शिवायाश्च प्री
तिदेयं प्रियंकरी नाराचमुद्रा सं
तनं प्रीत्यै वेतालभैरवा ६ अ
नरांगुष्ठमुष्टिं च कृत्वा वामकरस्य त
मध्यमाभ्यां दक्षिणस्य तथानम्य प्र
यत्नतः मध्यांकनाग्य तर्ज्जन्या अ
गुष्ठाग्रान्नियोज्य च दक्षिण योज
येत्पाणिं वामपृष्ठे तु साधकः ।
दर्शयेद्दक्षिणे भागे दण्डमुद्रेयमि
ष्यते इयं तु गणनाथस्य प्रीतिदा
मुद्रिकोत्तमा सर्वेषामपि देवा
नां तुष्टिदा सर्वकर्मसु ७ अङ्गुष्ठम
ध्यमानामा सम्यगानम्य तर्ज्जनी
प्रसार्य्येदंडमुद्रेति दक्षिणस्य करस्य
तु ८ सर्वाङ्गुलीस्तु संयोज्य कर
योरुभयोरपि संवेष्ट्य रज्ज्व
द्वे तु पाण्योरपि कनिष्ठिके वाम
स्य वाममूलेन तदग्रे विनियोजयेत्
दक्षस्य मध्यमूलेन तथाग्रे वाम
मेव च योजयेत् योजनात् पश्चा
द्वावर्ज्ज्य करशाखिको योन्या का
रं तत्तन्मध्ये योनिमुद्राप्रकीर्त्तिता ।
कामाख्यायाः पंचमूर्त्तेर्दुर्गायाश्चापि
भैरव प्रीतिदा योनिमुद्रेयं मम
कामस्य च प्रिया ९ संयुक्ताङ्गु
लीः सर्वाः प्रसार्य्याङ्गुष्ठ पर्वणा
अग्रेण च कनिष्ठाया अग्रेणापि
च योजयेत् करस्य दक्षिणस्येयमर्द्ध
योनिः प्रकीर्त्तिता १० ॥ संपुटं
प्राञ्जलिं वापि यदि शीर्षे नियोज
येत् वंदनीया समाख्याता मुद्रा
विघ्नप्रमोदिनी ११ सैव चेत् अव
णाश्लाका महामुद्रा प्रकीर्त्तिता १२
दक्षिणाङ्गेन साश्लाका वैष्णवी परि
कीर्त्तिता १३ महायोनिस्तु कथिता
वैष्णवीतन्त्र गोचरे द्वयोर्मूले त्वङ्गु
ष्ठाग्र मङ्गुलीश्च कनिष्ठयोः नियो
ज्य प्रसृती कृत्य द्वयाणी योजयेत्
पुनः भगमुद्रा च समाख्याता लक्ष्मी
वाणीशिवाप्रिया १४ सर्वाङ्गुली
नामग्रे च दक्षिणस्य करस्य च सं
योज्यैकत्र प्रयतो निर्देशाः पुटकः

स्मृतः १५ कनिष्ठानामिकाङ्गुष्ठाङ्गु
लीनां योजयेत्तु यः प्रयाण्येकत्र म
ध्यां तर्ज्जनीं च प्रसार्य्यैव कुञ्ची
कृत्य करद्वंद्वं पृथगग्रे नियोजयेत्
निःशंको नाम मुद्रेयं नरसिंहव
राहयोः १६ कनिष्ठानामिका म
ध्या माकुञ्च्य दक्षिणस्य च करस्य
तर्ज्जन्यङ्गुष्ठे प्रसार्य्य क्रियते तया
सा मुद्रा त्वर्द्धचन्द्राख्या ग्रहाणां प्री
तिदायिनी १७ ऊर्द्धीकृत्य तथा
गुष्ठं दक्षिणस्य करस्य च कृत्वा म
ध्यां तदङ्गुष्ठे वाममुष्टिं तथोर्द्धतः
ऊर्द्धाङ्गुष्ठं तथा कुर्य्याल्लिङ्गमुद्रा प्र
कीर्त्तिता १८ एतस्या एव मुद्रा
याः कनिष्ठादि विमोचनः षष्ठो
मुद्राः समाख्याता नामतस्ताः प्र
थक् पृथक् हिमवंश्चैव १९ मुष्टि
श्च २० वज्र २१ मावज्र २२ मेव च वि
मलश्च २३ चटश्चैव २४ लङ्गः २५ पु
द्र २६ स्तथैव च तत्वानां विघ्नमूर्त्ती
नां साद्धमङ्गेन मुद्रिकाः कुम्भनव
समाख्याता नायिकानां तथैव च
संयोज्य करयोः पृष्ठे तथावर्द्धित
वैसमं प्रसार्य्य तर्ज्जनीयुग्मं सं
युक्तं सर्वतः पुनः अङ्गुष्ठौ च तथा
शङ्खो शङ्खमुद्राप्रकीर्त्तिता २७
उत्तानमञ्जलिं कृत्वा अङ्गुष्ठे द्वे क
निष्ठयोः मूले निःक्षिप्य तु करौ
संयोज्याथ प्रदर्शयेत् सयोनि
रिति सा ख्याता मुद्रा देवीच तु
ष्टिदा २८ मुष्टिं दक्षिणहस्तस्य
यत्रोर्द्धाङ्गुष्ठिका भवेत् सा स्यात्
शिवलिङ्गमुद्राख्या लक्ष्मीप्रियाच
सा २९ अनामिके कनिष्ठे तु
संयोज्य कुञ्चनात्पुनः मध्यमात
र्ज्जनीनां तु येन मुद्रेव वंधने सा
हि धेनुरिति ख्याता चेदप्रीति वि
वर्द्धिनी ३० करयोरङ्गुलीः सर्वाः
सर्वाग्राण्येकतः स्थिताः नियोज्य
हृत्तले चैव तदग्रोऽपि वियुज्य चा
प्यग्रैरग्रं योजयेत्तु मुद्रा सम्मील
नी तु सा ३१ भौम भूमिमुनीशा
नां प्रियं प्रीति विवर्द्धिनी सर्वाङ्गु
लीस्तु संसक्ता दक्षिणस्य करस्य च
कियद्भागं तथाम्यस्य तले कुर्य्यात्तु
कुंडवत् समाख्याता कुंडमुद्रा च भू
वाणी शिवाप्रिया ३२ सर्वाङ्गुली
नां मध्ये तु वामहस्तस्य चाङ्गुलीः प्र
सार्य्याङ्गुष्ठ युगलं संयोज्याग्रेण
भैरव तदङ्गुष्ठ द्वयं कार्य्यं संमुखं
वितदन्ततः चक्रमुद्रा समाख्याता
गुरु विघ्न शिवप्रिया ३३ अ
ङ्गुष्ठे मध्यमां चैव नामयित्वा करस्य
च दक्षिणस्याथ प्रसारितस्तो योज



येदग्रतः पुनः शूलमुद्रासमा
ख्याता मम शक्रू गृहप्रिया ३४ नि
कुञ्चीकृत्यत करौ वामांगुलिगण
स्यत अग्राणि योजयेन्मध्यतल
स्यासव्यस्ततः अयः कृत्वा वामह
स्तं मुद्रा सिंहमुखी स्मृता ३५ इयं
प्रीत्यै त दुर्गायाः सूर्यपुत्रस्य व
क्रिणः भगमुद्रा करौ मूले गोमु
खो ख्या प्रकीर्त्तिता मम विसीस्तथा
रोदोः सर्वदा प्रीतिदायिनी ३६
मुष्टि हय मध्यमानं कृत्वा संयो
ज्यपार्श्वतः दक्षिणस्य कनिष्ठादी
न्यसार्थ्य क्रमतः पुनः तथा वामा
कनिष्ठाभ्याम मेकैकेन प्रसारये
त् अष्टौ मुद्राः समाख्याता नामतः
क्रमतः शृणु योषामां ३७ नमन
३८ मेव विम्बं ३९ पाश्चपतं ४० तथा
मुद्गं ४१ त्यागः ४२ सायनी ४३ च
तथा चैव प्रसायनी ४४ आकुञ्च्य
करशाखास्तु दक्षिणा सानव
ट्टिका उग्रमुद्रा समाख्याता स्वह
स्तस्य विपर्य्ययात् ४५ इंडादि लो
कपालानां दशमुद्राः प्रकीर्त्तिताः
सर्वेषामपि देवानां परमप्रीति
वर्द्धनाः अंगुष्ठाग्रेण तर्ज्जन्या अ
ग्रभागेन योजयेत् आकुञ्च्य मध्य
माम्यांच दक्षहस्तस्यचांगुलीः ।


दर्शयेत् कुण्डलाकारं कुण्डलीशक्ति
तुष्टिदं सर्वेषामपि देवानां
तथा तुष्टिकरं महत् ४६ अंगुष्ठ
तर्ज्जनी मध्या अग्रभागनियोजन
मध्यमांच कनिष्ठांच आकुञ्च्य द
क्षिणे करे त्रिमुखाख्या समाख्याता
विश्वेदेव प्रियासदा केतोः प्रि
येयं सततं मातृणामपि तुष्टिदा
४७ तर्ज्जन्यंगुष्ठयो रग्रभागौ सं
योज्य चांगुलीः अन्या आकुञ्चा
येत्तिस्रः सा स्रिवली प्रकीर्त्तिता।
पितृणां मग्नसाध्यानां रुद्राणां वि
श्वकर्मणः सर्वदा प्रीतिजननी स्र
सिवली प्रकीर्त्तिता ४८ पार्श्वे
तलाभ्यां संयोज्य तदंगुष्ठद्वये
ततः ऊर्द्ध संयोजयेत्ताभो अ
स्योपरि तथाञ्जलिः योगमुद्रा।
समाख्याता योगिनां तत्त्वदायिनी
सर्वेषामपि देवानां पूजने चिन्त
ने तथा योगमुद्रा समाख्याता
तुष्टिप्रीतिकरी सदा ४९ प्राञ्जलि
र्नाममुद्रा च ऊर्द्धाधो भाव यो
जितां विभिद्य दर्शयेद्धस्तौ ऊर्द्ध
धः प्रकृती कृतौ भेदमुद्रा स
माख्याता मम विष्णोर्विधेः प्रिया
५० अंगुष्ठे हस्त निःक्षिप्य करयो
रुभयोस्तले अग्रेण योज

येत् पश्चात्कनिष्ठा युगले ततः
उभयोर्हस्तयोश्चान्यास्तर्ज्जन्याद्याश्च
योजयेत् अग्रायैस्तु पृथक् कृत्वा
दर्शयेत्तत् कनिष्ठिकाः मुद्रासम्मो
हनं नाम कामदंगं रमाप्रिया स
र्वेषामपि देवानां मोहनं प्रीति
दस्मृतं ५१ आनम्यसव्य हस्तस्या
मध्यमा नामिके तथा तयोः पृष्ठे
तु संयोज्य अंगुष्ठाग्रं ततः परे
कनिष्ठां तर्ज्जनीं चैव अग्रेण योज
येत्ततः बाणमुद्रा समाख्याता मस
र्वदेस्य तुष्टिदा ५२ सर्वांगुलीस्तु
संकोच्य अंगुष्ठं मध्य तर्ज्जनी प्र
सार्य्य करयोः पश्चादंगुष्ठाग्रेण यो
जयेत् अंगुष्ठाग्रेण तर्ज्जन्या अग्रे
णापि च तर्ज्जनीं यथाशक्ति प्रसा
र्य्यापि धनुर्मुद्रा प्रकीर्त्तिता ५३
सर्वांगुलीनामग्राणि आस्यनीयैनि
योजयेत् अनामिकायाः पृष्ठे तु
अंगुष्ठाग्रं नियोजयेत् अन्यत्तर्ण
रबत् कृत्वा नेषा मंतस्तु भैरव
तुर्म्मीर मुद्रा चाख्याता सर्वेषां प्री
तिवर्द्धिनी ५४ मुद्रास्तु संस्थि
ता पूजा मुद्रास्तु परिचिन्तनं मुद्रा
सु संस्थिता योगा मुद्रा मोदकरा।
स्ततः यदा यदा पूजने पुचिंतने
ध्यान कर्म्मणि यत्नादोस्तवने वापि

हस्तकल्पे न विद्यते तदा मुद्राया
ने कुर्य्यादिष्टापूर्त्ते करद्वयं य
त्तत्कल्पेषु चेत्यक्ता हस्तो मुद्रास्तु च
त्तमः तदा विधायैव तत्तु
कल्प समाचरेत् मुद्रा विमुक्ते।
हस्तेन क्रियते कर्म दैवकं कृत्वा
यन्निष्फलं यस्मात्तस्मान्मुद्रा विना भ
वेत् विसर्ज्जने तु देवानां यस्य
या परिकीर्त्तिता मुद्रां तां पूजना
दौ तु तस्य नैव प्रयोजयेत् वि
सर्ज्जिता मतेमुद्रा मुद्रायुक्तः स
माचरेत् पूजनादि समस्तंच कर्म
दृष्टो विचक्षणः अतो मुद्रा पर
याम मुद्रा पुण्यप्रदायिनी देवानां
मोदका मुद्रा तस्मात्तां यत्नतश्चरेत्
अर्द्धयोनि महायोनि योनि श्री
लीच वैमवी मुद्रा विसर्ज्जने प्रो
क्ता शिवा त्रिपुरयोः सदा दुर्गायाः
सर्वरूपस्य मुद्राः एताः प्रकीर्त्तिताः
योनिंच संपुटंचैव महायोनि
स्तथैव च वर्ज्जयित्वा व्यस्त भावाद
क्तादन्यत्र योजयेत् भवेयुस्तु त्रि
पंचाशद्वन्यामुद्राः समंततः ताश्च
स्तभावाह्वानाः स्युर्मुद्रा मोदकराः
पराः एवं वा कथिता मुद्राः पू
जने पूज्य तुष्टिदाः इति कालिका
पुराणे ६५ अध्यायः ॥

मुद्रांकितः त्रि मुद्रयाचिह्नितः
छापाकरा मोहरकरा इत्यादि
भाषा यथा याता विश्व विसृष्टि
मात्र निरतो देवो ऽपि गौरी
भुजा श्लेषानंद विघूर्णमाननयनो
वक्ताधर श्मसकृत दैत्यारिः कम
ला कपोल मकरी मुद्रांकितोरः
स्थलः पातेऽश्वा वितरंतु जेतवु
पुनः कानाम पातेः कथा इति
प्रबोधचंद्रोदयनाटके १ शंकः
मुद्रालिपिः स्त्री पंचयालिप्यंतर्गत
लिपिविशेषः छापारअक्षर इ
ति भाषा यथा मुद्रालिपिः।
शिरस्लिपि लिपि लैखनीसंभवा
गुंठिका घुणसंभूता लिपयः पंच
धास्मृताः एताभिर्लिपिभि र्या
मा धरित्रीमभराहर इति वा
राहीतंत्रं तस्याः पाठ्यत्वं य
थैतेव यथा लेखन्या लिखिते
विप्रे मुद्राभि रंकितेवयत शि
ल्पादि निर्मितं यच्चपाठ्यपाठ्यंच
सर्वदा इति खड्गमालातंत्रं ॥
मुद्रिका स्त्री स्वर्णरूप्यादिनिर्मित
मुद्रा मोहर टाका इत्यादि भाषा
यथा सौवर्णी राजती नाम्नी
आयसी वा सशोभिता सलिलो
न सह होतां प्रक्षिपेत्तत्र मु
द्रिकां इतिमिताक्षरायां व्यव
हाराध्यायः ॥
मुद्रितं त्रि अप्रफुल्लं मोदा इति
भाषा तत्पर्यायः संकुचितं २
निद्राणं ३ मीलितं ४ इति हेम
चंद्रः मुद्रांकितश्च ॥
मुधा अ व्यर्थकं इत्यमरः।
मुनिः पुं मननात् ज्ञानादितिः मौन
व्रती इत्यन्ये इति भरतः
तत्पर्यायः वाचंयमः २ इत्य
मरः मौनी २ व्रती ४ ऋषिः ५
तापसः ६ सत्यवाक् ७ इति
जटाधरः तस्य लक्षणं यथा।
दुःखेष्वनुद्विग्नमनाः सुखेषु विग
तस्पृहः वीतरागभयक्रोधः स्थितधी
र्मुनिरुच्यते इति श्रीभगवद्गीता
तस्य धर्मो यथा ब्रह्मोवाच।
मुनिभिश्चरितो धर्मो उक्ता
व्यास मया तव येविप्र सत्य
ते देवः सत्वादि परिभाविकः
तर्पणेन च होमेन संध्यया वंद
नेनव सांख्ने भगवान् विष्णु
धर्मकामार्थ मोक्षदः धर्मो विष्णु
श्चैतो विष्णुः पूजा विष्णुस्तर्पणं
होमः संख्या तथाध्याने धारणा
सकलं हरिः इति गारुडे २२८
अध्यायः । तस्याश्रमे वर्णानी

यानियथा अतिथिपूजा १ हरण
विश्वासः २ हिंसवर्जनपानलता ३ य
स्त्रभ्रमः ४ मुनिसत्तः ५ इमसेकः ६
वल्कलः ७ हलस्य ८ इतिकविकल्प
लता मुनिविशेषाणां ब्रह्मणः हृवि
शेषाद्युत्पत्तिर्यथा पुलस्त्यादत्तक
र्णाच्च पुलहो वामकर्णतः दक्षने
त्रान्तथात्रिश्च वामनेत्रात्क्रतुः स्वयं
अरणीनासिकारंध्रात अंगिराश्च
मुखाद्रुचिः भृगुश्च वामपार्श्वाद्दक्ष
दक्षिणपार्श्वतः छायायाः क
र्दमो जातो नाभेः पंचशिखस्तथा
वक्षसश्चैव वोढुश्च कंठदेशाद्धि
नारदः मरीचिः स्कंधदेशाद्या
पकश्चसत्थागलात् वसिष्ठोरस
नादेशात् प्रचेता अधरोष्ठतः हं
सश्च वामकुक्षेश्च दक्षकुक्षेर्यतिः
स्वयं सृष्टि विधानेवविधिश्चका
रात्मसतानपि इति ब्रह्मवैवर्त्ते।
ब्रह्मखंडे ८ अध्यायः गया
स्वरशरीरे यत्ताश्च ब्रह्मणोमान
साः स्मृता मुनयो यथा ब्रह्मा स
भृतसंभारो मानसान्सृतिजो ऽस
जत् अग्निशर्माणं मुमुक्षंशौनकं
जाजलिं भृगुं कुशलिवेदकौशि
त्वंहारीतंकश्यपं क्रतुं गर्गं।
कौशिक वासिष्ठे मुनिभार्गवमव्य
यं हृष्टं पाराशरं कण्वं मांडव्यं।
ऋतिं केवलं श्वेतं सतालं दमनं
सहोत्रं कृतमेव च नौगालिं च।
महावाहं जैगीषव्यं तथैव च द
धिपंचमुखं विश्वऋषभंकर्कमेव च
कामायनं गोभिलं च मुनिं मुग्र
महाव्रतं जटामालिनमग्रं चा
ट्टहासं च दारुणं आत्रेयं चाथ्यां।
गिरस मोपमन्युं महाव्रतं गोक
र्णं च गुहावासं शिखंडिनमथाव्रतं
सपालकं गौतममेव तथा वेद
शिरो व्रतं एतानन्यांश्च विप्रेः।
द्रान्ब्रह्मा लोकपितामहः परि
कल्पकैरोयागं गयासुरशरीरके
इतिवायुपुराणे गयामाहात्म्यं ॥
मुनिविशेष नाम्नां युत्पत्तिर्यथा।
कतिकल्पान्तरे नीते स्रष्टुः सृष्टिवि
धौ पुनः मरीचि मिश्रैर्मुनिभिः सा
र्द्धं कंठाद्बभूव सः विधेर्नारदनाम्न
श्च कंठदेशाद्बभूव सः नारस्चेति
विख्यातो मुनीन्द्रेण दत्तवान् यः
पुत्रश्चेतसोपात्तवै भूवमुनिपुंगवः
तेन प्रचेता इतितन्नामचक्रे पि
तामहः बभूवधात्रयः पुत्रः सह
सा दक्षपार्श्वतः सर्वकर्मणि दक्षश्च
तेन दक्षः प्रकीर्त्तितः वेदेषु कर्द
मः प्रोह्छायायां वर्त्तते स्फुटः बभू
व



कर्द्दमाह्वः कर्द्दमस्तेन कीर्त्तितः
तेजो भेदे मरीचिश्च वेदेषु वर्त्त
ते स्फुटं जातः सद्योऽतितेज
स्वी मरीचिस्तेन कीर्त्तितः क्रतु
संघश्च बालेन कृतो जन्मान्तरेषु
तावत्स्यपुत्रोऽपि तत्रावाक्रतुरित्य
भिधीयते यथानां गसर्वेषाङ्ग
तो जातश्च बालकः इत्स्तेजस्विव
नोऽङ्गिरास्तेन प्रकीर्त्तितः श्रुति
तेजस्विनि भृगुर्वर्त्तते नाभिशोन
कज्जातः सद्योऽतितेजस्वी भृगु
स्तेन प्रकीर्त्तितः वशीभूतस्य शि
ष्यस्य जातः सद्यो हि बालकः अ
ति प्रियस्य यावस्य वशिष्ठस्तेन
कीर्त्तितः बालोऽप्यरुणवर्णस्य जा
तः सद्यो हि तेजसा प्रज्वलन् पू
र्व्वतपसा वारुणस्तेन कीर्त्तितः हं
स आत्मा वशो यस्य योगेन यो
गिनो ध्रुवं बालः परमयोगीन्द्र
स्तेन हंसः प्रकीर्त्तितः सततंय
स्य यत्नञ्च तपः स बालकस्य च प्र
कीर्त्तितो यतिस्तेन संयतः सर्व्व
कर्म्मसु पुलस्त्यपः स वेदेषु वर्त्तते
हृस्फुटेऽपि च स्फुटं तपः स्वरूपा
स्य पुलहस्तेन कीर्त्तितः पुलस्त्यः
समूहस्य यस्यास्ति पूर्व्वजन्मनो त
पः संघः समूहस्य पुलस्त्यस्तेन बा
लकः

त्रिगुणायां प्रकृत्यां त्रिर्विला व
श्च प्रवर्त्तते तया भेकेः समाजो
ऽस्यानेन बालोऽत्रिरुच्यते ज
टाश्चाग्निशिखारूपाः पंचसंति च
मस्तके तपस्तेजोभवा यस्य स च
पंचशिखः स्मृतः अपान्तरतमो
देशे तपस्तेपेऽन्यजन्मनि अ
पान्तरतमा नामशिशो स्तेन प्र
कीर्त्तितं स्वयं तपः समाप्तिवा
हुयत्नाप्पयेत्परात् ॥ ऊढः
समर्थस्तपसि वोढुस्तेन प्रकीर्त्ति
तः तपसस्तेजसा बालो दीप्ति
मान्वर्त्ततोऽमुने तपः स्वरोचनेति
तं रुचिस्तेन प्रकीर्त्तितः इति
ब्रह्मवैवर्त्ते ब्रह्मखंडे २२ अध्यायः

मुनिः पुं वंगसेनतरुः जिनः
इति मेदिनी पियालवृक्षः
पलाशवृक्षः इति हेमचन्द्रः
दमनकवृक्षः इति राजनिर्घण्टः

मुनिखर्ज्जूरिका स्त्री खर्ज्जूरीप्रभेदः
यथा मुनिखर्ज्जूरिका त्वन्या राजस्थ
ल्लसंसिता इति राजनिर्घण्टः

मुनिच्छदः पुं सप्तच्छदवृक्षः इ
ति राजनिर्घण्टः ॥

मुनितरुः पुं वकवृक्षः इति र
त्नमाला ॥

मुनिद्रुमः पुं श्योनाकवृक्षः इति

रत्नमाला श्योणाकप्रभेदः ॥
वकवृक्षः इति राजनिर्घण्टः ॥

मुनिनिर्म्मितः पुं डिण्डिशः यथा
डिण्डिशो रोमशफलो मुनिनि
र्म्मित इत्यपि डिण्डिशो रुचिकृत्
भेदी पित्तश्लेष्मापहः स्मृतः।
सशीतो वातलो रूक्षो मूत्रलश्चा
श्मरीहरः इति भावप्रकाशः ॥

मुनिपित्तलं क्ली ताम्रं इति त्रि
काण्डशेषः ॥

मुनिपुंगवः पुं मुनिश्रेष्ठः इत्य
मरटीका ॥

मुनिपुत्रः पुं दमनकवृक्षः इति
भावप्रकाशः ऋषिपुत्रश्च ॥

मुनिपुत्रकः पुं खञ्जनः इति त्रि
काण्डशेषः ॥

मुनिपुष्पं क्ली वकपुष्पं यथा यो
गिनीतन्त्रे बिल्वपत्रञ्च माध्यञ्च त
मालामलकीदलं कह्लारं तुलसी
चैव पद्मञ्च मुनिपुष्पकं एतत्
पर्युषितं न स्यात् यच्चान्यत्क
लिकात्मकं इत्येकादशीतत्त्वं।

मुनिपूगः पुं गुवाकविशेषः त
त्पर्य्यायः रामपूगः १ कालीनः २
सरवटः ४ इति त्रिकाण्डशेषः

मुनिभेषजं क्ली अगस्त्यः हरी
तकी लंघनं इति मेदिनी ॥

मुनिसुव्रतः पुं वृत्तार्हन्मत वृद्ध
विशेषः इति हेमचन्द्रः ॥


मुनिस्थानं क्ली आश्रमः इति हेम
चन्द्रः ॥

मुनीन्द्रः पुं बुद्धः इत्यमरः ऋषि
श्रेष्ठश्च ॥

मुन्व उ गत्यां इति कविकल्पद्रुमः
पंचमस्वरी ओष्ठवर्गशेषादिः ।
तोपधः उ मुविन्वा मुत्वा इति
दुर्गादासः

मुमुचानः पुं मेघः इति संक्षिप्त
सारोणादिवृत्तिः ॥

मुमुक्षुः पुं मुक्तिमिच्छुः तत्पर्य्या
यः श्रमनः २ यतिः ३ वाचंयमः
व्रती ५ साधुः ६ अनगारः ७ ऋ
षिः ८ मुनिः ९ निर्ग्रन्थः १० भिक्षुः ११
इति हेमचन्द्रः अथ मुमुक्षुकृत्य
मत्र इह चामुत्र वा काम्यं प्रवृ
त्तं कर्म कीर्त्त्यते निष्कामं ज्ञान
पूर्व्वन्तु निवृत्तमुपदिश्यते प्रवृ
त्तं कर्म संसेव्य देवानामेति सा
र्ष्टितां निवृत्तं सेवमानस्तु भूता
न्यत्येति पंच वै कामनापूर्व्वकं
कर्म शरीर प्रवृत्तिहेतुत्वात् प्रवृ
त्तं तदेव कर्म कामनारहितं पुन
र्ब्रह्म ज्ञानाभ्यासपूर्व्वकं संसार
निवृत्तिहेतुत्वात् निवृत्तमुच्यते




साष्टिनां समान गतिनां ऋषेर्गत्व
र्थत्वात् पंचभूतान्यत्येति अतिक्रा
मति मोक्षं प्राप्नोतीत्यर्थः विस्र
पुराणोक्त विशिष्टफलवाक्यानि
कामानीव शक्तिका भगवद्गीतापि
युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नो
ति नैष्ठिकीं अयुक्तः कामकारेण
फलेसक्तो निबध्यते युक्तः ईश्व
रायकर्माणि न फलाय इत्येवंसमा
हितः फलंत्यक्त्वा कर्माणि कुर्वन्नि
तिशेषः शान्तिं मोक्षाख्यां नै
ष्ठिकीं निष्ठायां भवां सत्वशुद्धिः
ज्ञान निष्ठा क्रमेणेति वाक्यशेषः
अयुक्त स्त्वबहिर्मुखः कामकारेण
काम प्रवर्तितया कामतः प्रवृत्ते
रितियावत् फलेसक्तः सन्फला।
येदं कर्मकरोमीत्येवं फले स
क्तो नितरां बंधं प्राप्नोति न
ध्याव अर्थेन प्रतिभगवद्वाक्यं।
मपि सर्वाणिकर्माणिसंन्यस्याध्या
त्म चेतसा निराशी र्निर्ममोभूत्वा
युध्यस्व विगतज्वरः संन्यस्य नि
क्षिप्य समर्प्य इतियावत् अध्या
त्म चेतसा विवेकबुद्ध्या ईश्वराय
भृत्यवत्करोमि इत्यनया बुद्ध्या
निराशी त्यक्त कामसंकल्पः प्रत
॥ ॥ , ॥ ॥

ज्ञान प्राप्तिः सर्वकर्मसंन्यासः

एवन्निर्ममः ममतारहितः विगत
ज्वरः विगत संतापः युक्त माह
मेव यत्करोसि यदश्नासि यज्जु
होसि ददासि यत् यत्तपस्यसि कौ
न्तेय तत्कुरुष्व मदर्पणं विष्णु पु
राणे कर्माण्यसंकल्पित तत्फला
नि संन्यस्य विष्णौ परमात्मरूपे।
अवाप्नोति कर्ममही मनंते तस्मि
न्लयं येनमला प्रयांति कर्ममा
ही भारतवर्षेनृणां एकादशस्कंधे
दोक्तमेव कुर्वाणो निःसंगो
ऽर्पितमीश्वरे नैष्कर्म्यां लभते
सिद्धिं रोचनार्थो फलश्रुतिः वे
दोक्तमेव कुर्वाणो नत्वनिषिद्धं
न तु कर्मनिक्रियमाणेन सिद्धाम
क्तिनस्तत्फलं स्यादेव ननु नैष्का
र्म्यरूपा फलसिद्धि रत्नएवाह निःसं
गोऽनभिनिवेशवान् ईश्वरेऽर्पितं
नतु फलोद्देशेन अथ फलस्य
श्रुतत्वात् कर्मणि कृते फलंभवत्ये
व इत्याह रोचनार्थेतिकर्मणि फ
लश्रुतिस्तु रोचनार्थो अतएव नैव फ
लश्रुतिरियं नृणां न श्रेयोरोचनं
परं श्रेयो विवक्षया प्रोक्ता यथा
भैषज्य रोचनं उक्तमेव हि
कामेषु प्राणेषु स्वजनेषु च आस
क्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु

नतानविदुषः स्वार्थं आत्मनो वृ
जिनाध्वनि कथं युंज्यात्पुनस्ते
षुतां स्तमो विशतो बुधः एवं
व्यवसितं केचिदविज्ञायकुबुद्धयः
फलश्रुतिं कुसुमितां वेदज्ञा व
दंतिहि इयंफलश्रुतिर्नश्रेयः पर
म पुरुषार्थं परा नभवति किंतु व
हिर्मुखानां नृणां मोक्षविवक्षया।
आवांतरकर्मफलैः कर्मसु रुच्युत्पा
दनमात्रं यथा भैषज्ये औषधे रु
च्युत्पादनं यथा पिबनिंबरसं।
स्यामि खलु ते खंड लड्डुकान् पि
त्रैव प्रयुक्तः पिबति नफलं तावदेव
न तत्रागदपानस्य न खलु खंडादि
लाभ एव प्रयोजनं किंतु आरोग्यं त
थावेदोऽप्यवांतर फलैः प्रलोभयन्
मोक्षमेव कर्माणि विधत्ते न तु क
र्मकांडे मोक्षस्य नामापि न श्रूयते
कथमेवं व्याख्यायते यथाश्रुतमे
व घटनात् इत्याह उत्पत्त्येति द्वा
भ्यां उत्पत्त्या स्वभावत एव का
मेषु पश्वादिषु प्राणेषु आयुरिंद्रि
यबल वीर्यादिषु स्वजनेषु पुत्रदा
रादिषु अनर्थहेतुषु परिपाकतो
दुःखहेतुषु आसक्तमनसो अप्यस
त्वमविदुषः अज्ञानतः प्रतीतानात्
प्रत्यक्षीभूतान् तथा देहा यदाथयति

तदेव श्रेयः इति विश्वसितानृत्य
र्थः तान् एवंभूतान् वृजिनाध्वनि
कामवर्त्मनि देवादि योनौ आम्यतः
ततः पुनस्तमोभूत वृक्षादियोनिं
विशत इति पशुकाम इतिच सा
र्वपुत्रादिकाम इतिच कथं पुनस्ते
ष्वेव कामेषु अयं बुधो वेदो युंज्या
त्प्रवर्तते तथा सत्यनाशः स्यात्
इति भावः कथं तर्हि कर्मजीमां
सकाः फलपरतां वदंति तत्राह
एवमिति व्यवसितं वेदस्याभिप्रा
यं अविज्ञाय कुसुमितां अवांतरफ
लरोचनया रमणीयां परमफल
श्रुतिं वदंति कुतस्ते कुबुद्धयस्तत्रा
ह हि यस्मात् वेदज्ञा व्यासादयःत
थावदंति इति अतएव निष्कामक
र्मणा आत्मज्ञानार्थेनोक्ता यथा अय
मेव क्रियायोगो ज्ञान योगस्य।
साधकः कर्मयोगं विना ज्ञानं क
स्यचिन्नेह दृश्यते सोपि इति
तत्वद्वारा नसाक्षात् तथाच श्रु
तं सत्त्वघनेषु संसाद्यात् पापस्य
कर्मणः तथा श्रुतिः तमेतं वेदा
नुवचनेन ब्राह्मणा विविदिषंति
ब्रह्मचर्येण तपसा श्रद्धया दानेन।
यज्ञेन अनाशकेन चेति तं आत्मतत्त्व
साक्षात्कारं अतएव यज्ञादीनां



ज्ञानेशेषनां चाव यार्थ्यनिष्कामेषु
कर्मसु प्रवर्त्तते. पंडितेनापि मूर्खैः
काम्यकर्मणि न प्रवर्त्तयितव्य इ
त्याह षष्ठस्कंधे स्वयं निःश्रेयसं वि
द्वान्नवक्त्यज्ञाय कर्महि न रातिरो
गिणोऽपथ्यं वांछतोपि भिषक्तमः
राति ददाति इति समयप्रदीपे।
श्रीदत्तः दासीदासमलंकारमन्नं
गृहस्य संभवं पुरुषान्नम तथैव
प्रदेयं सार्वकालिकं यद्यदिष्टं त
मं लोके यच्चाप्यस्ति गृहेष्वपि न
त्तद्धि देयं प्रीत्यर्थं देवदेवस्य च
क्रिणः इदं दानं ब्राह्मणसंप्रदान
कमेव विष्णुप्रीति उद्देश्यपूर्वं
सर्वत्र दाने विष्णुप्रीतेः समान्य
तः फलत्वात् अथ विष्णुप्रीतो दे
वताधिकरणन्याय विरोध इति।
चेन्नस्वर्गवदेयकारि विशेषणत्वे
न तस्य प्रसाधनात् इत्याहुः ब्रा
ह्मणसंप्रदानकत्वे किं मानमिति।
चेत्वामनपुराणे तत्न्यासमेदेन
तद्दान मभिधाय विष्णुप्रीत्यर्थं
मेतानि देयानि ब्राह्मणेभ्य इत्यादि
विप्रमुख्येभ्यो मधुसूदन तथैवे इ
त्यभिधाय दासी दास मित्यादि व
चनद्वयाभिधानात् तथाच विष्णु
मोत्तरादिपुराणयोः यत्र यत्र भ

वेत् प्रीति विषयेभ्यो महात्मने।
तमुद्दिश्य न उद्दिश्य विप्रेभ्यः प्र
तिपादयेत् विष्णुधर्मोत्तर तृती
यकांडे न विष्णु संप्रदानक मेव
दानं यथा विष्णोः शंख प्रदानेन
वारुणंलोक माप्नुयात् इत्यादि
नादौ रपल्लव संयुक्तान्कलशा
न्विभूषितान् दत्वा वै देवदेवाय
वाजिमेधफलं लभेत् इत्यनेना।
नन्तफलं तद्दान मभिधायो
क्तं अकामः सात्विको लोके
यत्किंचिद्धि निवेदयेत् तेनैव
स्थानमाप्नोति यत्र गत्वा न शोचति
धर्मवाणिज्यिका मूढाः फलका
मा नराधमाः अर्चयन्ति जगन्नाथं
ते कामा नाप्नुवन्त्युत येन वत्फ
लं तेषां तद्वदस्त्यमथसां तथा
पश्यो प्रतीच्छते देवः सकामेन
निवेदितं सूक्ष्मी प्रतीच्छते दत्त
मकामेन द्विजोत्तमाः इत्युक्त
वामनपुराणवचने सार्वकालिक
मित्यनेन मलमासादावपि विष्णु
प्रीत्यर्थं देय मिति इति मल
मासतत्त्वं ॥
शूद्रान्नं त्रि आसन्नशूद्रः अपसंभु
क्तान्यपि हारीतः शूद्राणामेनत भ
क्तेन उदरस्थेन यो मृतः स

वै खरत्व मुष्ट्वं शूद्रत्वं वाधिगच्छ
ति शूद्रान्नं शूद्रस्वामिकान्नं तदन्न
मपि भोजनकाले तद्गृहा वस्थि
तं यत्तदपि शूद्रान्नं । तदाहांगि
राः शूद्रवेश्मनि विप्रेण क्षीरंवा
यदि वा दधि निहत्तेन न भोक्त
व्यं शूद्रान्नं तदपि स्मृतं अपि
शक्यात् सात्वात् तदन्नं चेत्तं इला
दि न तं तदन्नं कपर्दकादिना क्री
तमपि स्वगृहागते पुन रंगिराः
यथायत स्तेनो ह्यापः शुद्धियाति
नदीगताः शूद्राद्विप्र गृहेष्वन्नं
प्रविष्टंतु सदा शुचि प्रविष्टत्वा
पादक प्रतिग्रहादिना इतिशेषः
अत एव पराशरः तावद्भवति शू
द्रान्नं यावत् स्पृशति द्विजः द्विजा
तिकरसंस्पृष्टं सर्वं तद्धवि रुच्य
ते स्पृशति प्रतिगृह्णाति इति
कल्पतरुः तत्र संशयग्रस्तमाह
विष्णुपुराणं संशोधयित्वा गृह्णी
याच्छूद्रान्नं गृहमागतं तत्रपात्रा
न्तरेणास्य माह अंगिरा स्वपात्रे।
यत्तु विन्यस्तं शूद्रो यच्छति नित्य
शः पात्रान्तरगतं ग्राह्यं दुग्धं स्वगृ
हमागतं यतेन स्वगृहमागतस्यैव
शुद्धत्वं तद्गृह गतस्य शूद्रान्नं।
दोषभागित्वं प्रतीयते तत्रस्येना।

हगापि मुमुक्षुणा सर्वथा शूद्रान्नं
न भोक्तव्यं ॥ पूजारत्नाकरे।
शालग्रामशिला यत्र तत्र सन्निहितो
हरिः तत्सन्निधौ त्यजेत् प्राणान्
याति विष्णोः परं पदं लिंग
पुराणे शालग्राम समीपेतु क्रो
श मात्रं समन्ततः कीकटेपि मृ
तो याति वैकुंठ भवनं नरः की
कटो मगधः वैष्णवामृते व्यासः
तुलसी कानने जन्तो यदि मृत्यु
र्भवेत् क्वचित् स निर्भर्त्स्य यमं पा
पी लीलयैव हरिं विशेत् प्रयाण
काले यस्यास्ये दीयते तुलसीदलं
निर्वाणं याति पक्षीन्द्र पापकोटि।
युतोपि सः ॥ कूर्मपुराणे।
गंगायां च जले मोक्षो वाराणस्यां
जले स्थले जले स्थले चान्तरीक्षे
गंगासागरसंगमे स्कान्दे गं
गायां त्यजतः प्राणान् कथयामि व
रानने कर्णे तत्परमं ब्रह्म ददामि
मामकं पदं तथा तीरात्कमति
ति मात्रं तु परितः क्षेत्र मुच्यते
अत्र दानं जपो होमो गंगायां
नात्र संशयः अत्रस्थास्त्रिदिवं या
न्ति ये मृता स्तेऽपुनर्भवाः गच्छन्ति
केशपुष्करे तीर्थचिन्तामणौ ब्रह्म
पुराणे अत्रहरे समीपेष सहस्रा

योजनद्वयं गंगायां मरणेनेह
नात्र कार्य्या विचारणा एवं
गंगादि मरणेन धाम ब्रह्मलोकं
स्याप्याहुर्देहिकी क्रियानरयिका
रिणा कर्त्तव्यानित्यत्वात् तथाचश्री
भागवते कृत्स्नं भगवति मनोवाक्
दृष्टिवृत्तिभिः आत्मन्यात्मान मावे
श्य सोऽन्तःश्वास उपारमत् सप
द्यमान माज्ञाय भीष्मं ब्रह्मणि
निष्कले सर्व्वे बभूवुस्तूष्णीं वयां
सीव दिनात्यये तस्य निर्हरणादी
नि संपरेतस्य भार्गव युधिष्ठिरः
कारयित्वा मुहूर्त्तं दुःखितोऽभवत्
कृष्णे आत्मनि परमात्मनि आत्मा
नं स्वीयात्मानं निवेश्य एकीकृत्य स
भीष्मः उपारमत् किं गतवान् नि
ष्कले निरुपाधौ ब्रह्मणि संपद्यमा
नं मिलितं आज्ञाय आलक्ष्य त
स्य भीष्मस्य निर्हरणादीनि संस्का
रादीनि संपरेतस्य सम्यक् परेतस्य
मुक्तस्यापि भार्गवेति शौनकस्य
संबोधनं एवंच एतेषा मपि त
त्तत्कर्म्मणि तत्तद्वचनोपात्त प्रेत
पदस्य पितृपदस्यच मंत्रादिषु य
थायथं वाचनिकत्वात् प्रयोगः संग
च्छते आसन्नमृत्युना देया गौः सव
त्साच पूर्व्ववत् तदभावेच गौरेका
नरकोद्धारणाय वै तदा यदि
न शक्नोति दातुं वैतरणींच गां
शक्तोऽन्यो ऽनुकृतस्तदा दद्यात् प्र
यो दद्यान्मृतस्यच पूर्व्ववद्धेम शृं
गादिना अत्र मृतस्य चेति श्र
वणात् एकादशाहेऽपि वैतरणी दा
नाचारः वनपर्व्वणि साध्यः प्रव
सतो मित्रं भार्य्या मित्रं गृहे सतः
आतुरस्य भिषङ्मित्रं दानं मि
त्रं मरिष्यतः ॥ वराहपुराणे
व्यतीपाते ऽथ संक्रान्तौ तथैवा
ग्रहणे रवेः पुण्यकालास्तदा सर्व्वे
यदा मृत्युरुपस्थितः गो भूतिल
हिरण्यादि दत्तमत्र नामियात्
निरवकाशत्वादत्र मलमासादि दो
षो नास्ति सूतकमपि न तथाच
शुद्धिरत्नाकरे दक्षः सत्यकाले
त्विदं सर्व्वं सूतकं परिकीर्त्तितं।
आपद्गतस्य सर्व्वस्य सूतकेऽपि न
सूतक इति शुद्धितत्वं ॥
मुर श वेष्टने इति कविकल्पद्रुमः
पवर्गशेषादिः श मुरति वेष्टितं ल
ता मोरिता इति दुर्गादासः मु
रं स्त्री वेष्टनं इत्यमरटीकायां।
मथुरेशः ॥
मुरः पुं दैत्यविशेषः इति मेदिनी
यं हत्वा विष्णुर्मुरारिनामाभूत्।

मुरगंडः पुं वरंडः वरौक इति
भाषा इति जटाधरः ॥
मुरजः पुं मृदंगः इत्यमरः।
मुरजफलः पुं पनसवृक्षः इति
त्रिकांडशेषः ॥
मुरंडः पुं लम्पाकदेशः तद्देशस्थे
पुं भूम्नि इति हेमचंद्रः।
मुरंदला स्त्री नर्म्मदानदी इति
त्रिकांडशेषः ॥
मुरमर्द्दनः पुं विष्णुः इति पुराणं
मुररिपुः पुं विष्णुः इति शब्दर
त्नावली ॥
मुरला स्त्री नर्म्मदानदी इति त्रि
कांडशेषः ॥
मुरली स्त्री स्वनामख्यातसुषिरवा
द्यं तत्पर्य्यायः वंशी २ वंशिका ३
वंशनालिका ४ स्वानेषिका ५ स्वाने
यी ६ स्वानिका ७ स्वरनासिका ८ शे
षचतुष्टयं स्वानादि इति शब्दरत्ना
वली मुरलीधरः पुं श्रीकृष्णः।
इति शब्दरत्नावली ॥
मुरहा पुं विष्णुः इति हेमचंद्रः।
मुरा स्त्री स्वनामख्यातगंधद्रव्यं त
त्पर्य्यायः तालपर्णी २ दैत्या ३
गंधकुटी ४ गंधिनी ५ इत्यमरः
अस्या अनुलेपनगुणाः शैत्यमीर
दोषज्वरनाशित्वं इति राज
वल्लभः राजनिर्घंटोक्तगुणाः प
र्य्यायो मुराशब्दे द्रष्टव्यौ ॥
मुरारिः पुं श्रीकृष्णः अस्यव्युत्प
त्तिर्यथा मुरः क्लेशेच संतापे
कर्म्मभोगे च कर्म्मिणां दैत्यभेदे।
ऽप्यरिस्तेषां मुरारिस्तेन कीर्त्तितः
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखंडे ११०
अध्यायः ॥ अस्य स्वरूपे ।
यथा श्रीनारद उवाच कोऽसौ मु
रारिर्देवेषु देवो यत्तोऽत्र किं न
रः दैत्यो वा राक्षसो वापि पा
र्थिवो वात कथ्यतां पुलस्त्य उवाच
योऽसौ सारजः सत्व माया गुणा।
वोऽप्यनामयः निर्गुणः सर्व्वगो
व्यापी मुरारि र्मधुसूदनः श्रीनार
द उवाच योऽसौ मुर इति ख्या
तः कस्य पुत्रश्च गीयते कथंच
निहतः संख्ये विष्णुना तद्वदस्वमे
पुलस्त्य उवाच श्रूयतां कथयिष्या
मि मुरासुर विवर्द्धितां विचित्र मि
दमाख्यानं पुण्यं पापप्रणाशनं
कश्यपस्यौरसः पुत्रो मुरोनाम
महाबलः स ददर्श रणे शंभो।
रिति पुत्राः सुरोत्तमः ततः स
मरणाद्भीतस्तप्त्वा वर्षगणानव
ह्वन् आराधयामास विधिं ब्रह्मा।
णमपराजितं ततोऽस्य तुष्टो

वरदः प्राह वत्स वरं वृणु स च
वव्रे तदा देव्यो वरमेतं पिता
महान् यं यं करतलेनाहं स्पृ
शेयं समरे विभो स स मद्धस्ता
संस्पृष्टस्त्वमरोऽपि म्रियतां जवाद
युक्तः स भगवान् ब्रह्मा लोकपिता
महः ततोऽभ्यगान्महातेजा मु
रः सुरगिरिं बली जगाम यम
राजानं विजेतुं दण्डपाणिनं
मुरउवाच यम प्रजा संयमनात्ति
वृत्तिं कर्त्तुमर्हसि नो चेत्तवाद्य ।
छित्वाहं मूर्द्धानं पातये भुवि
तमाह धर्मराड् वाक्यं यदि मां
संयमेद्भवान् गोपितास्मि सुरा
सत्यं करिष्ये वचनं तव मुरस्त
माह भवतः कः यन्तावदस्व मो
ऽहं तं पराजित्य वारयामि न
संशयः यम स्तं प्राह मां विसृ
देव चक्रगदाधरः श्वेतद्वीप नि
वासी यः स मां संयमतेऽव्ययः
इत्येव मुक्तो वचनं दृष्ट्वाश्रिमप
मत्सुरः तमागते प्राह मुनेऽमयुक्तः
प्राप्तोऽसि केनास्मत्कारणेन स
प्राह युद्धं सहस्रैव त्वयाद्य प्राह
भूयः स्वशत्रुर्हन्तारं [illegible]
यदीत्थं भो वा तु भुवागतोऽसि तत्कंपते
ने हृदयं किमर्थं ज्वरातिरस्येव ।

मृद्वृद्धं तत्रैव योऽस्य महा
कातरेण इत्येवमुक्तोऽमरसूदनेन
न मुरस्तस्य हृदये सहस्त्रकं
कथं नु कंपेति मुरः स्तेनास्त्रानि
पातयामास विपन्नबुद्धिः हरिश्च
चक्रं मुरं लाघवेन मुमोच तत्तस्य
शिरस्तु शत्रोः विच्छेद देवास्तु ।
गतव्यथाभवन् देवं प्रशंसन्ति च
पद्मनाभं इतः प्रसिद्धः सम्प्रा
जगाम मुरारि रित्येव हरिर्म
हात्मा इति वामने ५७ । ५८
अध्यायः अनर्घराघवग्रन्थ क
र्त्ता यथा असिमो ह्यत्यगोत्र स
मुद्भवस्य महाकवेः भट्ट श्रीवर्द्ध
मानात्मजस्य तन्तुमतीहृदयनन्द
नस्य मुरारि नामधेयस्य कवेः कृति
तनर्घराघवं नाम नाटकं तत्रयु
ज्ञानामासामाजिकास्तपास्महे इति
तत्कृतनाटकग्रन्थे ॥
मूर्च्छ आ मोहे उच्छ्राये इति
कविकल्पद्रुमः पवर्गशेषादिः
ऊष्मी तेन क्विपि राह्लोपः मूः
मुरौ मुरः आ मूर्च्छितं मूर्त्तं तेन
मोहो ज्ञानरहितीभावः उच्छ्रा
यो हृद्धिः मूर्च्छति रोगी मूर्च्छे
सत्वं रामस्य समानवसने हरा
वितिरच्छः इतिदुर्गादासः ॥


मुर्भिणी स्त्री अंगारधानिका इ
ति शब्दचन्द्रिका ॥
मुर्म्मरः पुं तुषाग्निः मन्मथः ।
रविवाजिः इति मेदिनी ॥
मुर्व ई नहे इतिकविकल्पद्रुमः
आद्यः पंचमस्वरी मूः मुरौ मुरः
नद्धो बंधनं ई मूर्णः इति दु
र्गादासः ॥
मूल क रोपणे इतिकविकल्प
द्रुमः रोपणं आरोपणं क मोल
यति हस्तं लोकः गोविन्द भट्ट
स्तु रोहणे इति पठित्वा रोहणं
जन्म इतिव्याख्याति इतिदुर्गा
दासः ॥
मुषाटी स्त्री सितकंगुः इति हेम
चन्द्रः ॥
मुषालिका स्त्री पली इतिहला
युधः ॥
मुषाली स्त्री पली तालमूली ।
तत्पर्यायः स्ववहा १ तालपत्रि
का ३ गोधापदी ४ हेमपुष्पी ५
भूताली ६ दीर्घकन्दिका ७ अस्याः
गुणाः मधुरत्वं वृष्यत्वं हृद्य
त्वं पुष्टि बलप्रदत्वं पिच्छिलत्वंच
२ मुषालीच द्विधा प्रोक्ता श्वेता
२ कृष्णदलं पित्त दाह श्रमहरत्वंच
वाधक संज्ञका तस्या गुणा

पेता अपरा च रसायनी इति
राजनिर्घण्टः ॥
मुष वधे इति कविकल्पद्रुमः
मोषति इति दुर्गादासः ॥
मुष शु इर छिदि इतिकविकल्प
द्रुमः छेद इह खंडन य मुष्यतिवि
पदं तवतरः इर अमुषत् अमो
षीत् अस्मात् पृषोदरादि त्वान्ति
त्य उ इत्यन्ये इतिदुर्गादासः ।
मुष ग लुंठने इतिकविकल्पद्रुमः
गमुष्णाति इति दुर्गादासः ।
मुषलः पुं क्ली अयोग्र इत्यमर
टीकायां भरतः इत्यमध्यापि ॥
मुषलामुषलि ब्य मुषलैश्च मुषलै
श्च प्रहृत्य युद्धं हृतं इति सिद्धा
न्तकौमुदी ॥
मुषली स्त्री तालमूलिका गृहगो
धिका इति शब्दरत्नावली ॥
मुषल्यः त्रि मुषलवध्यः इत्यमर
टीकायां भरतः ॥
मुषा स्त्री मूषा मुची इति भाषा
इत्यमरटीकायां रायमुकुटः ॥
मुषितं त्रि चोरितद्रव्यं तत्
पर्यायः मूषितं २ इत्यमरः ।
मुष्कः पुं अंडकोषः इत्यमरः ।
मोक्षकवृक्षः संहातः इति ।
मेदिनी तस्करः ॥ मांसलः

इतिहेमचंद्रः ॥
मुष्ककः पुं वृक्षविशेषः घंटा पारुल इति बंगभाषा मोखा इति हिंदी भाषा तत्पर्य्यायः गोलीढः २ झाटलः ३ घंटापाटलिः ४ मोक्षः ५ इत्यमरः । मोक्षकः ६ मुष्कः ७ मोचकः ८ मुष्कः ९ गोलिकः १० मेहनः ११ क्षारश्रेष्ठः १२ पाटली १३ विषापहः १४ जटालः १५ वनवासी १६ शनीलकः १७ इतिराजनिर्घंटः गोलिहः १८ क्षारश्रेष्ठः १९ स च पलाशवत् पर्वतवृक्षः श्वेतकृष्ण भेदेन द्विविधः तस्य गुणाः कटुत्वं तिक्तत्वं ग्राहित्वं उष्णत्वं कफ वात कारित्वं विष मेदो गुल्म कंडुव्रणरोगकृमिशुक्र नाशित्वंच इतिभावप्रकाशः । रेचनत्वं पाचनत्वं प्लीहोदरा । र्शोनाशित्वंच इतिराजनिर्घंटः ।
मुष्करः पुं प्रलंबांडः इति हेमचंद्रः ॥
मुष्कशून्यः पुं वृषणरहितः सत [illegible] गतो ऽन्तःपुररक्षकः खोजा इतिभाषा तत्पर्य्यायः षण्ढः २ स्त्रीस्वभावः ३ महल्लिकः ४ इतिशब्दमाला ॥


मुष्टिः पुं स्त्री पलपरिमाणं चारि तोला इति भाषा बद्धपाणिः मुठा इति भाषा तत्पर्य्यायः संपिंडितांगुलिपाणिः २ मुस्तुः ३ मुकुटी ४ इति हेमचंद्रः त्सरुः बेंट्रमुठ् इतिभाषा इतिमेदिनी कुब्जपृष्ठभागः खटाक इति भाषा यथा मुष्टिमहि भवेत् ऊर्ध्व कुंचयोश्चैव मुष्कलः इति प्रायश्चित्ततत्त्वं मोषणं इति मुषधात्वर्थदर्शनात् प्रहारविशेषः कील इति भाषा यथा विच्छेदापनतत्स्य मुद्गरं निशितैः शरैः तथापि सो ऽभ्यथावत्तां मुष्टिमुद्यम्य वेगवान् स मुष्टिं पातयामास हृदये दैत्यपुंगवः देव्या स्तचापि सा देवी तलेनोरस्यताडयत् इति मार्कंडेयपुराणं ॥ पर्य्यस्तयान्नेषु तिलादीनां मुष्टिग्रहणादेवोपभोग्याभावः यथा तिलमुद्ग यवादीनां मुष्टिर्ग्राह्या पथिस्थितैः क्षुधार्त्तै र्नान्यथा विप्र विधिविद्भि रिति स्थितिः इति कार्मे उपरिभागे १५ अध्यायः ॥
मुष्टिकः पुं कंसराजमल्लविशेषः इति श्रीभागवतं स्वर्णकारः

इतिहेम चंद्रः ॥
मुष्टिकांतकः पुं बलदेवः इति शब्दरत्नावली ॥
मुष्टिद्यूतं क्ली द्यूतक्रीडाविशेषः पुरमुठ् खेला इतिभाषा तत्पर्य्यायः [illegible] २ इति शब्दमाला ॥
मुष्टिन्धयः पुं बालकः इतित्रिकांडशेषः ॥
मुष्टिबन्धः पुं मुष्टिबन्धनक्रिया मुटावांधा इति भाषा तत्पर्य्यायः संग्राहः २ इत्यमरः मुष्टेर्बंधो ऽङ्गुलि विन्यासो मुष्टिबंधः मुष्टिना बंधो दृढ ग्रहणं संग्राह इत्यपरे मुष्ट्यामेव संग्रह इत्यन्ये। मुष्टिः स्त्रियांच संग्रह इति बोपालितः इति भरतः ॥
मुष्टी मुष्टि व्य मुष्टामुष्टि मुष्टिभिर्मुष्टिभिः प्रहृत्य यद्युद्धं वर्त्तते तत् किलाकिलि इति भाषा इति मुग्धबोधव्याकरणं ॥
मुष्टकः पुं राजसर्षपः इतिरत्नमाला मष्टक इति वा पाठः ॥
मुसः य रर खिदि खंडने इति कविकल्पद्रुमः मुसस्यति विपक्षं चलरः रर अमुसत् अमोसीत् अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये इति दुर्गादासः ॥
मुसलः पुं क्ली स्वनामख्याततंडुलकंडनार्थं निर्मित लौहाग्रयष्टिः तत्पर्य्यायः अयोग्रं २ इत्यमरः मुषलं ३ कंडनीदंडः ४ इतिशब्दरत्नावली मुसति मुसलः मुस खिंडिदि नाम्नीति कलः मुसलो दंत्यसकारः एवं मुष्य इखिंदीति मूर्द्धन्योन्तात् कलः मूर्द्धन्य षकारश्च इत्यमरटीकायां भरतः ॥
मुसली स्त्री तालमूलिका गृहगोधिका इत्यमरः ॥
मुसली पुं बलदेवः इत्यमरः ॥
मुसल्यः त्रि मुसलेनवध्यः इत्यमरः ॥
मुस्तक संहतौ इतिकविकल्पद्रुमः पवर्गशेषादिः क मुस्तयति ॥ इति दुर्गादासः ॥
मुस्तः पु मुस्तकं इतिहारावली ॥
मुस्तकः पुं क्ली तृणमूलविशेषः मुता इति भाषा तत्पर्य्यायः । कुरुविंदः २ मेघनामा ३ मुस्ता ४ इत्यमरः मुस्तः ५ राजकसेरुः ६ इति हारावली मेघाख्यं ७ गांगेयं ८ भद्रमुस्तकं ९ इति रत्नमाला अस्य गुणाः तिक्तत्वं



कटुत्वं वायुनाशित्वं ग्राहित्वं।
दीपनत्वंच इतिराजवल्लभः ॥
अपिच मुस्तकं नस्त्रियांमुस्तं त्रि
षु वारिद नामकः कुरुविंदस्य स
ख्यातो ऽपरः कोरकसेरुकः ॥
भद्रमुस्तस्य गुन्द्रा च तथानागर
मुस्तकः मुस्तं कटु हिमंग्राहिति
क्तं दीपन पाचनं कषायं कफ
पित्तास्र तृड् ज्वरारुचि जंतुहृत्
अनूपदेशे यज्जातं मुस्तकं तत्
प्रशस्यते तत्रापि मुनिभिः प्रो
क्तंवरं नागरमुस्तकं इति भाव
प्रकाशः ॥
मुस्तकः पुं स्थावरविषभेदः इति
हेमचंद्रः ॥
मुस्ता स्त्री मुस्तकः इत्यमरः
मुस्तादः पुं सूकरः इतिजटाध
रः मुस्ताभं क्ली मुस्तकविशेषः ना
गरमुस्ता इति भाषा तत्पर्य्यायः
कुटन्नटं २ पूरं ३ वन्यं ४ परि
पेलवं ५ इतिरत्नमाला ॥
मुस्तः पुं मुष्टिः इतिहेमचंद्रः।
मुसलं क्ली मुसलं मुसधातोरौणा
दिक कलप्रत्ययेन निष्पन्नं इति
सिद्धांतकौमुद्यामुणादिवृत्तिः।
मुह य ल कु भि वैचित्ये इतिक
विकल्पद्रुमः वैचित्यं ज्ञानर
हितीभावः य तेन मुह्यति वि
गय मे मनः इतिमुग्धबोधः उ
मोहिष्यति मोग्धा ४ अमुहत्
जिघुग्षः मूढो ऽस्ति इति दुर्गा
दासः ॥
मुहिरः पुं कामः मूर्खः इति
मेदिनी ॥
मुहुः व्य पुनः पुनः इत्यमरः
मुहुर्भाषा स्त्री पुनः पुनः कथनं
तत्पर्य्यायः अनुलापः १ इत्य
मरः ॥
मुहूर्तः पुं क्ली द्वादशक्षणपरिमि
तकालः इत्यमरः घटिकाद्वयो
इति राजनिर्घंटः दिनपंचदश
भागैकभागः यथा प्रातःका
लो मुहूर्तो स्त्रीन्संगवस्तावदेव
तु मध्याह्नस्त्रिमुहूर्तः स्यादपरा
ह्णस्ततः परं सायाह्नस्त्रिमुहूर्तः
स्यात् श्राद्धं तत्र न कारयेत् रा
क्षसीनाम सा वेला गर्हिता सर्व
कर्मसु इतितिथ्यादितत्त्वधृतवच
नं कर्मविशेषे तस्य परिमाणं य
था नक्तव्रतोपवासस्नानादौ घटि
कैकापि या भवेत्तिथिस्तत्र कटिका
द्वयं दंडयुग्मं मुहूर्त यंवा स्मृता
वारइत्न चतुर्दंडात्मकालोपय
ह्यापके वत्सो कटिकाः प्रात


दद्गणोद य उक्त इत्यादौ प्रभा
ते घटि कायुग्मं प्रदोष घटिका
द्वयं दिन वत्सवैकार्य्याणि कारयेत्
विचारये दिति हलायुधधृतलि
खिष्यमाणा त्रियामामितिवचनयो
रेकमूलयोश्च उभयत्र प्रयोग दर्श
नादिति संशयः अत्रोच्यते श्रा
द्धादावस्तगामिनीति घटिका नि
यामक वचन चतुर्थ्यंवरोगे या
गपतया घटिकाया मुहूर्तात्मकत्व
स्याव्यप मंगीकारात् तात्पर्य्येलाघ
वेन अनादावपि तथात्वं घटि
केकाप्यमात्रस्या प्रतिपत्सन चे
घटा सर्वे तदाश्र दानं दैवे
कर्माणि चोदित इति घटिका
स्थने निदामभिधाय घटिकालाभे
कर्माहेति वक्तव्ये मुहूर्त मप्यमा
वास्या प्रतिपत्स भवेद्यदा न
दान मज्ञमं तेयं शेषं पूर्वे हि
पूर्व वादित्यनेन मुहूर्तलाभे कर्मा
र्हत्व शाप्यनाद्य तत्रापि मुहूर्तैः
किं तन्नहि वा रात्रि पंचदशांश
रूप दंडद्वय नाद्यः प्रतिदिन
दिवारात्र्योर्ह्रास वृद्धिभ्यां तदा
नामपि न्यूनाधिक्यादिविभेदा
पत्तेः नापि द्वितीयः दंडद्वयस्य
त्रिंशद्दंडात्मक दिवारात्रि पंचद
शांशस्य मुहूर्तत्वंच दंडद्वयाधिक
न्यूनकालानामपि त्रिंशद्दंडाधिका
न्यूनदिवारात्रि पंचदशांशानां मुहू
र्त्तत्वप्रतिपादनेन विनिगमनाविर
हात् किंत्वरंगतया कर्मार्हदिवारा
त्र्यन्तर पंचदशांशस्य ग्रहणं प्रश
क्तौ श्रयनाश्च क्रमेणोत्तरायणे पु
र्वाह्न दिनमान सपाद घटिद्वितिदं
डानां पंचदशांशस्य पादोन दंड
द्वयस्य मुहूर्तत्वात्तद्दिन विहित क्रि
यायां तावन्न्यून कालस्यापि ग्रह
णात् सर्वत्र न्यूनकालस्य वक्ष्ये दश
वश्यकतया तस्यैव पादोन दंडद्व
यात्मकस्य मुहूर्तस्य ग्रहणं लाघ
वात् परा चतुर्दशी यामंत्वरीयमत्र
पूरयेत् श्राद्धमिष्यते इतिकात्याय
नोक्तस्य चतुर्दशी संवर्धिदिनचतुर्थ
याममात्र व्याप मावास्या श्राद्ध वि
धानस्य मत्स्यपुराणोक्त मुख्याय
राक्षीय मुहूर्तावायेन विषय ला
भापपादेन दंडद्वयात्मक मुहूर्तो
ग्रहणस्यावश्यकत्वात्तु ताद्दशामा
वास्यायां तदधिक मुख्यापराह्णासं
भवात् तपव मुख्याय राक्षीय पा
दोनदंड द्वयात्मक दर्शाबाभक्त
चत्वारिंशत् पलाधिक त्रयस्त्रि
शदंडात्मक दिवस ॥



एव अत एव स्मार्त्तभट्टाचार्य्यैरपि
यदा चतुर्द्दशी याम त्रितयमव्या-
ख्याने निष्पादितत्वे तथा लिखितं
न च निरूढलक्षणातो रूढशक्तेर्व
लवत्त्वात् नाम्नत्रिंशत्क्षणस्तैव मु
हूर्त्तो द्वादशास्त्रियां नेव त्रिंश
दहोरात्र इत्यमरोक्तो द्वादश क्ष
णात्मकः अहोरात्र त्रिंशांशो दे
ण्डद्वयरूप मुहूर्त्तो लाघवतः सर्वत्रा
नुगततया न्यूनकालव्यवच्छेदको
वक्तव्य इति वाच्यं निरूढलक्षणा
पि शक्तित्वस्येति शाब्दिकस्मरणा
त्स्यान्त्वेनोतरंगेति सन्निहितेबुद्धि
रंतरंगेति न्यायाच्च निरूढलक्ष
णाया एव बलवत्त्वात् इति चेत् सप
वित्रक इत्यत्र पवित्र पदस्य कुशगत
कोशोक्त रूढिमाकृष्य तया विशिष्टा
कुशपत्र द्वयगतकात्यायनोक्त निरू
ढलक्षणाया इव निरूढलक्षणायाः
शक्तितुल्यत्वं न रूढशक्तेरिव प्रकार्य्थे
बाधकत्वं न शक्यस्वत्वं पस्तानेव विनाप
दतात्पर्यं तात्पर्यपद मेव पदा
र्थोपस्थापकत्वात् सा च निरूढ
लक्षणा क्वचित्तात्पर्य्यबोधकशा
स्त्रान्तविशेषप्रयोगतो ऽनुमाना
दपि निर्णीयते वक्तव्यस्युनि शेषः
पंचदशांशात्मिक मुहूर्त्तक निरूढ

मुहूर्त्त पर लक्षणा वि निगमना
विरह गौरवाभ्यामेव कुं किन्तु ते
यत्नन्यूनपादोन दंडद्वयात्मक मुहू
र्त्तग्रहणमशक्यमेव अथापि न्यू
नतया सर्वानुगमाय तद्ग्रहणमि
ति चेत् अत्यंताधिकतया सपाददंड
द्वयात्मक मुहूर्त्तस्यैव कुतो नग्रहणं
स्यात् तस्मात् प्रभाते च घटिकायुग्मं
प्रदोषे घटिकाद्वयं दिनवत्सर्वकार्य्या
णि कारयेत् विचारयेदिति ।
लघुहारीत वचने त्रियामं रजनी
प्राहुस्त्यक्त्वाद्यन्तचतुष्टयं नाडीनां
तदुभेसंध्ये दिवसाद्यन्तसंज्ञिते इति
ब्रह्मवैवर्त्त वचनयोरेकवाक्यत
या दंडद्वयात्मक काले घटिकाप
द निरूढलक्षणासिद्धेन यापर्य्याय
द्वारको शोक्त रूढ्याव समेन मनःपा
वेण योगपदं दंडद्वयात्मककालएव घ
टिकापदादुपस्थाप्यते अतः सर्व
साधारण्येन न्यूनकाल व्यवच्छेदा
य सैव ग्राह्या लाघवात् अत एव य
दा चतुर्द्दशी यामं तुरीयमनुपूरयेत्
दिनत्र यदा यत्र दिने अमावास्याक्ष
य्यापराक्रीय दंडद्वयात्मकाला
अपरं यथा स्यात्तथैव चतुर्द्दशीया
मं लघुक तृतीययाम मवुलक्षीकृ
त्य तत्र प्रहरस्य चतुर्थयामं पूरयेत्।

प्राप्नोतीत्यन्वयः अन्यथा चतुर्द्द
शी मुहूर्त्तात्मिक प्रमाणाभिधानं व्यर्थं
स्यात् एतेनैव दर्शश्राद्धेपि अ
प्यपराह्णादयः कार्य्याः प्रातः
कालादि पंचधा विभागे कुतपा
दि संज्ञायाश्च दिनमान पंचद
शांश मुहूर्त्तस्यैव ग्रहणं तद्बो
धक शास्त्र संवादात् अत एको
द्दिष्टे दिनमान पंचदशांश मुहू
र्त्तो योग्यतया चन्यूनकाल व्यव
च्छेदको ग्राह्यः कुतपो रौहिणाश्च
तत्र स्यात् ग्राहक युक्तेः एवं वि
शेषाभिधानात् सत्वरात्रो दंडस्मा
र्त्तं जन्माष्टम्येकादशी द्वादशीषु
च कला काष्ठा द्वयोपि प्रतिष्ठादौ
शुक्र शुक्ल संयोगकालएवन्यून
काल व्यवच्छेदको ग्राह्यः ततश्च
विशेषकाल प्राप्तकर्मेतरकर्मणः
प्रशस्तादिकाले स्योग्यदंडद्व
यान्यूनक तिथिरेव ग्राह्येत्यनुग
तविधिः सर्वसाम्येन्यादिनितत्वे
इति चंद्रशेखर वाचस्पति कृत
द्वैतनिर्णयः ॥
मुहेरः पुं मूर्खः इति संक्षिप्तसारो
णादिवृत्तिः ॥
मू ऊ बंधे इति कविकल्पद्रुमः प
वर्गीयपंचमादिः ऊ मवते इति
दुर्गादासः ॥
मूः स्त्री मूर्च्छा इति मूर्च्छयानो भा
वेक्विपा निष्पन्नं इति मुग्धबोधव्या
करणं ॥
मूः स्त्री बंधनं इति सिद्धांतकौ ।
मुदी ॥
मूकः त्रि वाक्यरहितः बोवा इति
भाषा तत्पर्य्यायः अवाक् २
इत्यमरः ॥
मूकः पुं मत्स्यः इति त्रिकांड
शेषः दैत्यः इति मेदिनी ।
दीनः इति हेमचंद्रः ॥
मूढः त्रि मूर्खः इत्यमरः बालः
तंद्रितः इति मेदिनी जडः
इति हेमचंद्रः ॥
मूतः त्रि बद्धः इत्यमरः ॥
मूत्र तक प्रस्रावे इति कविकल्प
द्रुमः दीर्घी मूत्रयति मूत्रापय
ति इति दुर्गादासः ॥
मूत्रं क्ली उपस्थनिर्गतजलं तत्
पर्य्यायः प्रस्रावः २ इत्यमरः
मेहनत् ३ इति जटाधरः गुह्य
निस्पंदः ४ स्रवणं ५ स्रवः ६ इति
राजनिर्घंटः तस्योत्सर्ग विधि ।
यथा दिवासंध्यासु कर्णस्थब्रह्म
सूत्र उदङ्मुखः कुर्यान्मूत्र पुरीषे तु
रात्रौ च दक्षिणामुखः इति




गारुडे ९४ अध्यायः ॥ अपिच
मूत्रोच्चार समुत्सर्गं दिवा कुर्य्यादुदङ्मुखः ।
दक्षिणाभिमुखो रात्रौ
सन्ध्ययोश्च यथा दिवा इति मनुः ॥
कृत्वा यज्ञोपवीतन्तु पृष्ठतः क
ण्ठलम्बितं विण्मूत्रे तु गृही कुर्य्या
द्यद्वा कर्णे समाहितः इति यमः ॥
यद्येक वस्त्रो यज्ञोपवीतं कर्णे
कृत्वा अवगुण्ठित इति कर्णे द
क्षिणे कर्णे इति सांख्यायनः ।
छायायामन्धकारे रात्रावहनि
वा द्विजः यथासुखमुखः कुर्य्या
त्प्राणबाधभयेषु च नमूत्रं प
थि कुर्वीत न भस्मनि न गोव्रजे
न फालकृष्टे न जले न चित्यां न च
पर्वते न जीर्णदेवायतने न व
ल्मीके कदाचन न ससत्त्वेषु गर्तेषु
न गच्छन्नापि संस्थितः न नदीतीर
मासाद्य न च पर्वतमस्तके वाय्वग्नि
विप्रानादित्यमपः पश्यं स्तथैव च
न कदाचन कुर्वीत विण्मूत्रस्य
विसर्जनं इति मनुः ॥ आहार
निर्हार विहार योगाः सुसंवृता ।
धर्म्मविदा तु कार्य्याः वाग्बुद्धि
कार्य्याणि तपस्तथैव धनायुषी गु
प्ततमे तु कार्य्ये इति वशिष्ठः ।
निर्हारो मूत्र पुरीषोत्सर्गः ॥

सोमाग्न्यर्काम्बु वायूनां पूज्यानां च
न संमुखे कुर्य्यान्निष्ठीवनं विण्मूत्र
समुत्सर्गं च पंडितः इति विष्णु
पुराणं नच सोपानत्को मूत्र
समुत्सर्गं च पंडितः इति विष्णु
पुराणं नच सोपानत्को मूत्र
पुरीषे कुर्य्यादिति आपस्तम्बः
करगृहीत पात्रेण कृत्वा मूत्रपु
रीषके मूत्रमुत्सृज्य पानीयं पी
त्वा चान्द्रायणं चरेत् इति हह
स्मनुः ॥ गृहीत जलपात्रस्य
मूत्रोत्सर्गे दोषो यथा वारिपात्रं करे धृ
त्वा मूत्रं त्यजति यो नरः स्वर्णपात्रसमं
पात्रं न जलं मदिरा समं इति कर्मलो
चनं सशब्द मूत्रस्य दोषो यथा निःश
ब्द शब्दमूत्राः स्वल्पा निःशब्दधारया
भोगाढ्याः समजवा निम्बाः सुखेत्व
सत्त्विभाः इति गारुडे ९३ अध्यायः
विस्त्रको नाजमूत्रेण व्याप्तादि
दूषणं इति तन्त्रैव ९८ अध्या
यः । अथ गोमूत्रगुणाः तीक्ष्णत्वं
उष्णत्वं लवणत्वं पित्तका
रित्वं कटुत्वं लघुत्वं रूक्षत्वं ।
कृमि दरानाह शोथाशो विषकुष्ठ
नाशित्वंच इति राजवल्लभः ।
मूत्रकृच्छ्रं क्ली रोगविशेषः तस्य
पर्य्यायः मूत्रदोषः २ अश्मरी ३

कृच्छ्रं ४ इति राजनिर्घण्टः अथ
मूत्रकृच्छ्राधिकारः तत्र मूत्रकृच्छ्र
स्य विप्रकृष्टं निदानमाह व्यायाम
तीक्ष्णौषध रूक्षमद्यप्रसंगनृत्यद्रु
त पृष्ठयानात् आनूप मत्स्याध्य
शनादजीर्णात् स्युर्मूत्रकृच्छ्राणि नृ
णां तथाष्टौ तीक्ष्णौषध राजिकां
अम्लणादिप्रकं रूक्षेति मद्य वि
शेषणं प्रसंगः सततं सेवा
नृत्यं नर्त्तनं निष्पाति द्वितीयः
पाठः द्रुत पृष्ठयानात् अश्वादि
नागमनात् आनूप प्रचुरजलदेश
भवं मत्स्य अष्टौ वातिक पै
त्तिक श्लैष्मिक सान्निपातिकशल्य
जपुरीषज शुक्रजाश्मरीजानि त
स्य संप्राप्ति पूर्वकं लक्षणमाह पृ
थक्मलाः स्वैः कुपिता निदानैः सर्वे
ऽथवा कोपमुपेत्य वस्तौ मूत्रस्य
मार्गं परिपीडयन्ति यदा तदा मूत्रय
तीह कृच्छ्रात् तेषु वातिकमाह
तीव्रारुजो वंक्षणबस्तिमेढ्रस्व
ल्पं मुहुर्मूत्रयतीह वातात् तीव्रा
मारुणमिका वङ्क्षणाभ्रुमेढ्रा
णामंतरालसंधी पैत्तिकमाह पी
तं सरक्तं सरुजं सदाहं कृच्छ्रेण मु
ञ्चयतीह पित्तात् कृच्छ्रमिति क्रि
या विशेषणं श्लैष्मिकमाह

बस्तेः सलिंगस्य गुरुत्वशोथौ मूत्रं
सपिच्छं कफमूत्रकृच्छ्रे सपिच्छं पि
च्छिलं सान्निपातिकमाह स
र्वाणि रूपाणि च सन्निपातात्भवन्ति
तत्कृच्छ्रतमं हि कृच्छ्रं कृच्छ्रं मूत्रकृ
च्छ्रं शल्यजमाह मूत्रवाहिषु श
ल्येन क्षतेष्वभिहतेषु मूत्रकृच्छ्रं
तदाघातात् जायते भृश दारुणं
वातकृच्छ्रेण तुल्यानि तस्य लिंगा
नि निर्दिशेत् मूत्रवाहिषु स्रोतःसु
शल्येन कंटकेन क्षतेषु सक्षतीकृ
तेषु अथवा अभिहतेषु मुद्गरादि
भिरभिहतेषु तदाघातात् मूत्रमार्ग
घातात् मूत्रकृच्छ्रं जायते भृशादा
रुणं मारकं तस्य शल्यजस्य ।
पुरीषजमाह शकृतस्तु प्रतीघा
ताद्वायुर्विगुणतांगतः आध्मानं
वातशूलंच मूत्रकृच्छ्रं करोति च प्र
तीघातात् निरोधात् विगुणतां उ
त्तमां शुक्रजमाह शुक्रदोषैरु
पहते मूत्रमार्गे विधारिते स
शुक्रं मूत्रयेत् कृच्छ्राद्वस्तिमेहने
शूलवान् उपहते दूषिते अश्म
रीजमाह अश्मरी हेतुकं चापि
मूत्रकृच्छ्रं प्रशान्तेन स्फुरते शर्क
राजमपि मूत्रकृच्छ्रमुक्तमत्र तस्य
नवसंख्यानिरासार्थं अश्मरी शर्करा



योः साम्यमाह अश्मरी शर्करा
चैव तुल्यसंभवलक्षणे विशेषणं
शर्करायाः शृणु कीर्त्तयतो मम स
म्भवः कारणं पच्यमानाश्मरी पित्ता
च्छोष्यमाणा च वायुना विमुक्तकफ
संधाना क्षरंती शर्करा मता पि
त्तेन पच्यमाना मूत्रशुक्रश्लेष्मस
हतिः प्रथमं पित्तेन बंधनकर्म
णा पच्यमाना पश्चाद्वातेन शोषिता
कफेन त्यक्ता अश्मरी सैव विमुक्त
कफसंधाना त्यक्तकफाश्लेषा सती
शर्करारूपा मूत्रमार्गान्निःसरंती श
र्करा मता एतावता किंचिदेव भे
दः शर्करया उपद्रवानाह ।
हृत्पीडा वेपथुः शूलं कुक्षावग्नि
श्च दुर्बलः तया भवति मूर्च्छा च मू
त्रकृच्छ्रं च दारुणं शूलं कुक्षाविन्त्यन्व
यः तया शर्करया ॥ अथ मूत्रकृ
च्छ्रस्य चिकित्सा त्रिकंटकारग्वधद
र्भकाश यवास धात्री गिरिभेद पथ्या
विहन्ति पीता मधुनाश्मरीं च समीप
मृत्योरपि मूत्रकृच्छ्रं त्रिकंटकादि
क्वाथः १ एलाश्मभेदकशिलाज
तु गोक्षुराणां मेर्व्वारुबीजत्रपुषेणा
न्नसमकं कृतानां चूर्णानि तंदुलजले
लुलितानि पीत्वा प्रत्यासन्नमृत्युरपि
जीवति मूत्रकृच्छ्री एलादिचूर्णं २

अथ योरजः मूत्रपिष्टं मधुनासहयो
जितं मूत्रकृच्छ्रं निहन्त्याशु सलीलं
दिवसत्रयात् ३ गुडेन मिश्रितं
क्षीरं कदुष्णं कामतः पिबेत् मूत्र
कृच्छ्रेषु सर्वेषु शर्करायां च नित्यशः
४ धात्रीरसं चेक्षुरसं पिबेद्वा कु
क्षेसरकं मधुना विमिश्रं शाल्माभि
वातोत्थिते मूत्रकृच्छ्रे कार्या क्रिया
मारुतकृच्छ्रनुत्या ५ क्वाथो गो
क्षुरबीजस्य यवक्षारसमन्वितः पी
तः प्रशमयत्येव कृच्छ्रं विडूधारा
तोत्थितं ६ त्रिफलायाः सपिष्टायाः
कल्कं कोलसमन्वितं वारिणा ल
वणीकृत्य पिबेन्मूत्रकृच्छ्रापहं ७।
कोलं बदरं गुडमामलकं हृद्यं
श्रमघ्नं तर्पणं प्रियं पित्तास्रदाह
शूलघ्नं मूत्रकृच्छ्रहरं परं ८ स
मादशाणा त्वलिना यवक्षारः सिता
कृतः भक्षितो नाशयत्येव मूत्रकृच्छ्रं
नसंशयः ९ द्राक्षा सितोपला।
कल्कः पीतः कर्षमितो नरैः।
मस्तुना पलमात्रेण मूत्रकृच्छ्रं व्य
पोहति १० समूलगोक्षुर क्वाथः
सिता माक्षिकसंयुतः नाशयेन्मूत्र
कृच्छ्राणि तथैवास्रसमीरणं ॥
उक्तसमीरणं उत्कटवातं मूत्राघात
विशेषं इति भावप्रकाशः ॥

मूत्रदोषः पुं प्रमेहः इति राज
निर्घण्टः ॥
मूत्रनिरोधः पुं मूत्रप्रतिबंधकरो
गविशेषः यथा पिष्टं वै मालती
मूलं ग्रीष्मकाले समाहृतं सा
धितं छागदुग्धेन पीतं शर्करया
न्वितं हरेन्मूत्रनिरोधं च हरेद्धै
पांडुशर्करां इति गारुडे १९१
अध्यायः ॥
मूत्रपतनः पुं गंधमार्जारः इति
राजनिर्घण्टः ॥
मूत्रपुटं क्ली नाभेरधोभागः यथा
नाभेरधो मूत्रपुटं वस्तिर्मूत्राश
योऽपि च इति हेमचंद्रः ॥
मूत्रफला स्त्री कर्कटी त्रपुषी इति
राजनिर्घण्टः ॥
मूत्रलं क्ली त्रपुषं इति शब्द
चंद्रिका मूत्रवर्द्धके त्रि ॥
मूत्रला स्त्री कर्कटी इति त्रिकांड
शेषः वालकी इति राज
निर्घण्टः ॥
मूत्राघातः पुं प्रस्रावरोधकरोग
विशेषः अथ मूत्राघातस्य विप्र
कृष्टं सन्निकृष्टं च निदानं संख्यां
चाह प्रायो मूत्रविघाताद्यैर्वा
तकुंडलिकादयः जायंते कुपितै
र्दोषैर्मूत्राघाताः त्रयोदश ॥

मूत्रविघाताद्यैरित्याद्यशब्देन पु
रीषशुक्रादि वेगविघातानां रूक्षा
शनादीनां च ग्रहणं मूत्रविघाता
द्यैः कुपितैर्दोषैरित्यन्वयः ननु
मूत्रकृच्छ्रमूत्राघातयोः को भेदः
उच्यते मूत्रकृच्छ्रे कृच्छ्रमधिकं वि
बंधोऽल्पः मूत्राघाते तु विबंधो
बलवान् कृच्छ्रमल्पं इत्यनयोर्भेदः
वातकुंडलिकाया निदानं सं
प्राप्तिं लक्षणं चाह रौक्ष्याद्वेगा
विघाताद्वा वायुर्वस्तौ सवेदनः मू
त्रमाविश्य चरति विगुणः कुंडलीकृ
तः मूत्रमल्पाल्पमथवा सरुजं संप्रव
र्त्तते वातकुंडलिकां तं तु व्याधिं
विद्यात्सुदारुणं रौक्ष्यात् काय
स्य वेगविघातात् मूत्रादिवेग
निरोधात् आविश्य प्राप्य रौ
क्ष्यादिभिर्वेगविघातादिभिश्च वि
गुणो दुष्टः कुंडलीकृतो वायुर्वस्तौ
मूत्राशये चरति प्रतिष्ठति आव
ृत्याद्यमं तिष्ठति इत्यर्थः वा
त्यावत् मूत्रमिति तस्मान्मूत्रमल्प
मल्पं सरुजं प्रवर्त्तते तदाधिं
वातकुंडलिका माहुः सुदारुणां
मारणात्मकत्वात् १ ॥ अष्ठीला
माह आध्मापयन् वस्तिगुदं रुद्ध्वा
वातश्चलोन्नतां कुर्य्याती आर्त्तिं

मष्ठीलां मूत्रविण्मार्गरोधिनीं वा तः वस्तिगुदं रुद्ध्वा अष्ठीलान्तर्गतः मूत्रं मलं च निरुध्य वस्तिगुदस्वस्ति गुदं च आध्मापयन् आध्मानं कुर्वन् अष्ठीला इति तस्या व्याधिं कुर्यात् चलोन्नता वलोन्नता च । २ ॥ वातवस्तिमाह ॥ वेगं विधारयेद्यस्तु मूत्रस्याकुशलो नरः निरुणद्धि मुखं तस्य वस्तेर्वस्तिगतोऽनिलः मूत्रसङ्गो भवेत्तेन । वस्ति कुक्षि निपीडितः वातवस्तिः स विज्ञेयो व्याधिः कष्टप्रसाधनः अकुशलो मूर्खः तस्य पुरुषस्य वस्तिमुखं निरुणद्धि वस्तिगतो वायुः तेन वायुना मूत्रसङ्गो मूत्रविघातो भवति वस्ति कुक्षि निपीडित इति वस्तौ कुक्षौ च निपीडितो संपीडितो वायुरिति संबन्धः ३ ॥ मूत्रातीतमाह चिरं धारयतो मूत्रं त्वरया न प्रवर्त्तते मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते मेहमानस्य मूत्रमुत्सृजतः मन्दं वा अल्पं वा ४ मूत्रजठरमाह मूत्रस्य वेगेऽभिहते तदुदावर्त्तहेतुकः अपानः कुपितो वायुः उदरं पूरयेद्भृशं नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनं तं मूत्रजठरं विघातयो ।

वस्तिनिरोधनं तदुदावर्त्तहेतुक इति मूत्रवेगधारणं गृहीतोदावर्त्तनिदानमाध्मानं कुर्यात् अधो वस्तिनिरोधनं वस्तेरधोदेशे विबन्धकारकं ५ मूत्रोत्सङ्गमाह । वस्तौ वाप्यथवा नाले मणौ वा यस्य देहिनः मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः स्रवेच्छनैरल्पमल्पं सरुजं वाथ नीरुजं विगुणानिलजो व्याधिः स मूत्रोत्सङ्गसंज्ञितः नाले मेढ्रे मणौ मेढ्राग्रग्रन्थौ सज्जेत निरुद्धं स्यात् सरक्तं सत्वा प्रवर्त्तते प्रवाहतः इति कण्ठहृद्दलेन सपाठ मूत्रपुरीषवातानामधःप्रेरणं प्रवाहणं तेन कुपितेन वायुना वस्त्यादिभेदात् सरक्तं मूत्रं स्रवेदित्यर्थः ६ ॥ मूत्रक्षयमाह रूक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयं क्लान्तदेहस्य म्लानदेहस्य तदाह्वयं मूत्रक्षयसंज्ञं ७ मूत्रग्रन्थिमाह ॥ अन्तर्वस्तिमुखे वृत्तः स्थिरोऽल्पः सहसा भवेत् अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रग्रन्थिः स उच्यते अन्तर्वस्तिमुखे वस्तिमुखस्याभ्यन्तरे अल्पः ह्रस्वामलकप्रमाणः तत्त्वस्य अश्मर्या

सहको भेदः उच्यते अश्मरी क्रमशः संचयेन स्यादयं तु सहसा भवेदिति भेदः अपरो भेदः अश्मर्यां पित्तादिकं संहत्येन अत्र तु रक्तमेव यत उक्तं तन्त्रान्तरे रक्तं वातकफादुष्टं वस्तिद्वारे सुदारुणं ग्रन्थिं कुर्यात्स कृच्छ्रेण सृजेन्मूत्रं तदाहतमिति ८ मूत्रशुक्रमाह मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतं स्थानच्युतमूत्र्यतः प्राक्पश्चाद्वा प्रवर्त्तते भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते मूत्रितस्य मूत्रवेगयुक्तस्य शुक्रं स्थानात् च्युतं पश्चाद्वायुना उद्धतं ऊर्द्ध्वनीतं भस्मोदकप्रतीकाशं भस्मसहितजलसदृशं ९ उष्णवातमाह ॥ व्यायामाध्वातपैः पित्तं वस्तिं प्राप्यानिलावृतं वस्तिं मेढ्रं गुदं चैव प्रदहन् स्रावयेदधः मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा कृच्छ्रात् पुनः पुनर्जन्तोरुष्णवातं वदन्ति तं व्यायामादि विरोधकेन सौम्यधातुक्षयात्तेजो वृद्ध्या पित्तवृद्धिः स्यात्तत्कुपितं पित्तं अंसं युतं वस्तिं प्राप्य वस्त्यादिकं प्रदहत् अथ स्रावयेत् कीदृशं हारिद्रं अथवा


सरक्तं ईषल्लोहितं १० ॥ मूत्रसादमाह पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत् कृच्छ्रान्मूत्रं तदा पीतं रक्तं श्वेतं घनं सृजेत् सरक्तं रोचनाशङ्खचूर्णवर्णं भवेत्ततः शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति संहन्येते घनीक्रियेते शुष्कं अल्पं समस्तवर्णं उक्तसकलवर्णयुक्तं ११ ॥ विड्विघातमाह रूक्षदुर्बलयोर्वातेनोदावर्त्तं शकृद्यदा मूत्रस्रोतोऽनुपद्येत विट् संसृष्टं तदा नरः विड्गन्धं मूत्रयेत् कृच्छ्राद्विड्विघातं तमादिशेत् उदावर्त्तं उर्द्ध्वनीतं । विड्गन्धं वा शास्त्रेऽत्र योजनीयः १२ वस्तिकुण्डलमाह द्रुताध्वलंघनायासैरभिघातात् प्रपीडनात् स्वस्थानाद्वस्तिरुद्वृत्तः स्थूलस्तिष्ठति गर्भवत् शूलस्पन्दनदाहार्त्तो विन्दुं विन्दुं स्रवत्यपि पीडितस्तस्तेद्धारां संस्तम्भोद्वेष्टनार्त्तिमान् । वस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमं पवनप्रबलं प्रायो दुर्निवारमबुद्धिभिः तस्मिन् पित्तान्विते दाहः शूलं मूत्रविवर्णता श्लेष्मणा गौरवं शोथो मूत्रे स्निग्धं घनं सितं दुरामलचनं पीडं

मार्गे वलनं उद्धृत्तः उत्थितः स्य
न्दनं किंचिच्चलनं घोरं मारकं ।
शास्त्र विषायमं शास्त्रं वेङ्कपदिनहत्री
चूमारकं विषमज्वरः तद्धत विल
स्वमारकं एतावतामारकं मवष्प
शीघ्रं विलम्बेन वा १३ ॥ तस्य
वासाध्यस्य च लक्षणमाह श्लेष्म
णुद्ध विलो वस्तिः पित्तोदीर्णो न
सिध्यति अविभ्रांतविलः साध्योन
चयः कुण्डलीकृतः स्याद्बस्ती कुण्ड
लीभूते तस्योद्रः साध्य एवच विल
वस्ति गुखरंध्रे पित्तोदीर्णः पित्ते
नोद्धतः अविभ्रान्तविलः कफेनाद्व
तविलः पश्चात् कुण्डलीकृतः स सा
ध्यः एतेन कुण्डलीभूतस्य लक्षणमा
ह तद्डिन्यादि कुण्डलीभूतस्यायमर्थः
कफेन विलावरोधात्तत्र वातः कु
ण्डलाकारेण तिष्ठतीत्यर्थः ॥
अथ मूत्राघातस्य चिकित्सा तत्र
कुशकाशेक्षु बलाकाथपानः स्व
शीतलं सलिलं पिवेतः न श्या
ति नियतं मूत्रग्रहः इत्युवाच कविः
कविः स्वक्रः कर्पूररजसा युक्ता
वस्त्रवर्त्तिः शनैः शनैः मेद्रमार्ग
नीरे न्यस्ता मूत्राघातं व्यपोहति
धान्यगोक्षुरकः क्वाथः कल्क-
सिद्धे ॥

हितं हितं मूत्राघाते मूत्रकृच्छ्रे
शुक्रदोषे च दारुणे धान्यका
ष्टारकं हितं मूत्रकृच्छ्रेऽश्मरी ।
योगे भेषजं यत् प्रकीर्त्तितं ॥
मूत्राघातेषु सर्वेषु तत्कुर्य्याद्देश
कालवित् इति मूत्राघाताधिकारः
इति भावप्रकाशः ॥ गरुड़
पुराणोक्तनिदानं तस्य ५८३ अ
ध्याये द्रष्टव्यं ॥
मूत्राशयः पुं नाभेरधोदेशः तत्
पर्य्यायः मूत्रपुटं २ वस्ति २
इति हेमचंद्रः
मूत्रितः त्रि कृतमूत्रोत्सर्गः तत्
पर्य्यायः मीढः २ इत्यमरः ।
मूर्खः पुं माषः इति त्रिकाण्डशेषः
गायत्री रहितः यथा क्रियाही
नस्य मूर्खस्य महारोगिण एव च
यथेष्टाचरणस्याहुर्मरणान्तमशौ
चकं क्रियाहीनस्य नित्य नैमि
त्तिक क्रियानुष्ठायिनः मूर्खस्य गा
यत्रीरहितस्य सार्थगायत्रीरहि
तस्येति तद्वयः महारोगिणः
पाप रोगाक्रान्तस्य रोगवतः
तेच उन्माद त्वग्दोष राजयक्ष्मा
श्वासो मधुमेहो भगन्दरः उदरो
ऽश्मरीत्यष्टौ पाप रोगा मा र
दोक्ताः यथेष्टाचरणस्य यत


वेश्याद्याशक्तस्य इति शुद्धितत्वे
मूर्खः त्रि मूढमतियः तत्पर्य्यायः
अज्ञः २ मूढः ३ यथाजातः ४ वै
धेयः ५ बालिशः ६ इत्यमरः ।
तस्य वशीकरणोपायो यथा मि
त्रं स्वच्छतया रिपुं नयबलैर्लुब्धं
धनैरीश्वरं कार्य्येण द्विजमादरेण
युवतीं प्रेम्णा गुणैर्बान्धवान् अ
त्युग्रं स्तुतिभिर्गुरुं प्रणतिभि र्मू
र्खं कथाभिर्बुधं विद्याभी रसिकं
रसेन सकलं शीलेन कुर्य्याद्वशं
इति नवरत्नानि ॥ पयः पानं
भुजंगानां केवलं विषवर्द्धनं ।
उपदेशो हि मूर्खानां प्रकोपाय
न शान्तये इति हितोपदेशः ।
मूर्छना स्त्री मूर्छनं यथा श्रद्धा
ना वंशदोषेण कर्मदोषाद्दरिद्रता
उन्मादो मातृदोषेण पितृदो
षेण मूर्खता इति चाणक्यं अ
द्धम्पां नारिकेल भल्लातो मूर्खवं
यथा कलंकी जायते विल्वभैते
निर्धको विम्ब निम्बके तालेश
रीरनाशः स्यान्नारिकेलेच मूर्ख
ता इति तिथ्यादितत्वं ॥
मूर्खभ्रातृकः पुं मूर्खभ्रातायस्य
सः इति सिद्धान्तकौमुदी मूर्छ
ना स्त्री गीताङ्गविशेषः सा तु

ग्रामस्य सप्तमभागः तस्या लक्षणं ।
एकविंशति नामानि च यथा स्वरः
संमूर्छितो यत्र रागतां प्रतिप
द्यते मूर्छनामिति तामाहुः कव
यो ग्रामसंभवां ललिता मध्य
मा चित्रा रोहिणी च मतंगजा
सौवीरी षाडवमध्या च षड्जमध्य
म पंचमाः मत्सरी मृदुमध्या च
शुद्धान्ता च कलावती तीव्रा रौद्री ।
तथा ब्राह्मी वैष्णवी खेदरी सुरा
नादावती विशाला च त्रिषु ग्रामेषु
विश्रुताः एकविंशति रित्युक्ता
मूर्छना चंद्रमौलिना मूर्छनाक
लयन्मा सुरशाखा वैशिकाधनिवि
शेष विताने मूर्छनां यशुरते
गन्धारोचे रंगना रतिपते रिवसे
नाः इति संगीतदामोदरः ॥
हनुमन्मते षड्जादि स्वरेतक्रम
भादि स्वरोत्थाने यत्र स्वरो विरमति
सा मूर्छना भरत मते वाद्यस्या
गानस्य वा समये पद्धतस्य ग
लस्य वा कंपनं सा मूर्छना सा एक
विंशति प्रकारा तत्र षड्जग्रा ।
मस्य मूर्छना ललिता १ मध्यमा २
चित्रा ३ रोहिणी ४ मतंगजा ५
सौवीरी ६ षाडवमध्या ७ मध्यम
ग्रामस्य मूर्छना पंचमा १ मत्सरी



२ मृदुमध्या ३ मन्दा ४ अन्ता ५ क
लावती ६ तीव्रा च ७ गान्धारग्रामस्य
मूर्च्छना रौद्री १ ब्राह्मी २ वैष्णवी ३
खेचरी ४ सुरा ५ नादावती ६ वि
शाला च ७ इति संगीतशास्त्रं ॥
मूर्च्छा स्त्री संमोहः तत्पर्य्यायः
कश्मलं २ मोहः ३ इत्यमरः ।
मूर्च्छनं ४ इति शब्दरत्नावली मूर्च्छा
यः ५ अथ मूर्च्छाधिकारः तत्र मूर्च्छा
या निदानपूर्व्विकां संप्राप्तिमाह ।
क्षीणस्य बहुदोषस्य विरुद्धाहार
सेविनः वेगाघातादभिघाताद्धी
नसत्त्वस्य वा पुनः करणायतनेषू
ग्रा वाह्येष्वभ्यन्तरेषु च निविशन्ते ।
यदा दोषास्तदा मूर्च्छन्ति मानवाः
बहुदोषस्य अधिकदोषस्य तत्र
नैकदोषस्य तदा मूर्च्छा त्रिदोष
जैव स्यात् तथैवास्त को दोषः
तत्र पृथग्दोषजानां मूर्च्छानां व
क्ष्यमाणत्वात् वेगाघातान्मला
दीनामभिघाताल्लगुडादिना हीन
सत्त्वस्य स्वल्पसत्त्वगुणस्य अर्थाद
धिकतमोगुणस्य यत उक्तं मूर्च्छापि
तत्तमः प्रायेति करणायतनेषु करा
णां मनस्तस्यायतनेषु स्थानेषु वाह्ये
षु कर्म्मेन्द्रियेषु अभ्यन्तरेषु बुद्धीन्द्रिये
षु सामान्यलक्षणमाह
संज्ञावहासु नाडीषु पिहितास्व
निलादिभिः तमोऽभ्युपैति सह
सा सुखदुःखव्यपोहकृत् सुख
दुःखव्यपोहाच्च नरः पतति काष्ठव
त् मोहो मूर्च्छेति तां प्राहुः षड्विधा
सा प्रकीर्त्तिता तमोगुण अज्ञान
हेतुः अभ्युपैति आगच्छति सुख
दुःखव्यपोहकृत् सुखदुःखज्ञान
नाशकरं नष्टसुखदुःखज्ञानो नरः
काष्ठवत् पतति तां मोहो मूर्च्छे
ति प्राहुरित्यन्वयः मूर्च्छायां मूर्च्छा
ऽपि पर्य्यायः यत उक्तं संज्ञापा
याते मूर्च्छा मूर्च्छा स्यान्मूर्च्छने
तथा कश्मलं प्रलयो मोहः संमास
स्त्व मृतोपम इति षडपि मूर्च्छा वि
वृणोति वातादिभिः शोणितेन म
द्येन च विषेण च षट्स्वप्येतास्वपि
तं प्रभूत्वेनावतिष्ठते यत उक्तं
मूर्च्छापित्ततमःप्रायेति ॥
पूर्व्वरूपमाह हृत्पीडा जृम्भणं
ग्लानिः संज्ञादौर्व्वल्यमेव च स
र्व्वासां पूर्व्वरूपाणि यथास्वं ता वि
भावयेत् तत्र वातिकं मूर्च्छा
यमाह नीलं वा यदि वा कृष्णमा
काशमथवारुणं पश्यंस्तमः
प्रविशति शीघ्रं च प्रतिबुध्यते
वेपथुश्चाङ्गमर्दश्च प्रपीडा हृदयस्य

स्य च कार्श्यं श्यावारुणा छाया
मूर्च्छाये वातसम्भवे नीलेनीलव
र्णेः कृष्णे कज्जलाभे अरुणे अ
व्यक्तरागे तमः प्रविशति मूर्च्छेति
श्यावारुणा छाया गात्रस्य पै
त्तिकमाह रक्तं हरितवर्णं
वा वियत् पीतमथापि वा पश्यं
स्तमः प्रविशति सस्वेदः प्रतिबुध्य
ते सपिपासः ससन्तापो रक्तपी
ताकुलेक्षणः संभिन्नवर्च्चाः पीता
भो मूर्च्छाये पित्तसंभवे ॥
श्लैष्मिकमाह मेघसंकाशमा
काशं तमो भिर्व्वा घनैर्हतं पश्यं
स्तमः प्रविशति चिराच्च प्रतिबुध्य
ते गुरुभिः प्रावृतै रङ्गैर्यथैवा
र्द्रेण चर्म्मणा सप्रसेकः सहृल्ला
सो मूर्च्छाये कफसम्भवे मेघसंका
शं अभ्रमेघ शंकाशमित्यर्थः यत
आह सञ्छन्नः कफेनय श्लेष्मणा याति
स्तेनाश्च प्रतिभाति यथैनैर्व्विडे
स्तमोभिः गुरुभिरङ्गैः रुपलक्षि
तः श्लक्ष्ण तेन मूर्च्छायः षड्विध
उक्तः चरकस्तु सान्निपातिकम
पि मूर्च्छायमाह सर्व्वाकृतिः स
न्निपातादपस्मार इवागतः सजन्तु
पातयत्याशु विना बीभत्सचेष्टि
तैः अपस्मार इव तेन महता
भिघातेन पतति विरेण प्रतिबु
ध्यते तर्हि तयोः को भेद इत्यत
आह स सान्निपातिको मूर्च्छायः
विना बीभत्सचेष्टितैः फेनवम
नदन्तचर्व्वणादिविकृत्यादिभिर्व्वि
ना पातयति रक्तजाया मूर्च्छाया
निदानमाह पृथिव्यम्बुतमो रूपं
रक्तगन्धस्तदन्वयः तस्माद्रक्तस्य
गन्धेन मूर्च्छन्ति भुवि मानवाः तमो
रूपं तमोबहुलं मानवाश्च य
तामसाः तत्स्वभावा राजसाश्च
अत्रैके वदन्ति नैषा युक्तिः समीची
ना तर्हि चंपकादिगन्धेनापि मूर्च्छा
प्रसङ्गेन तत्रापि गन्धस्य पार्थिव
त्वात् अत आह द्रव्यस्वभाव इ
त्येके यह दृष्ट्वापि विमुह्यति अत्राह
भोजः दर्शनात्मनजलज्जाङ्कया स्ये
व प्रमुह्यति रक्तेन मूर्च्छितस्य
लक्षणमाह स्तब्धाङ्गदृष्टिस्त्वसृजा
गूढोच्छ्वासश्च मूर्च्छितः मद्यज
विषजयोर्न्निदानमाह गुणास्तीव्र
तरत्वेन स्थितास्तु विषमद्ययोः ता
एव तस्मात्तज्जाभ्यां तु मोहौ स्यातां य
थेरितौ ये गुणा लघुरूक्षाश्च वि
शदव्यवायितीक्ष्णविकाशिसूक्ष्मो
ष्णानिर्द्देश्यरसत्वादयः तेऽप्येव
अम्लाः तीव्रास्ते सन्तितया गुणाः वि



व मद्ययोस्तु तीव्रतरत्वेनस्थिताः
तत्रापिभेदः तएव मद्येहर्षयंते
विषे न बलवत्तरा इति मद्य
जाया मूर्च्छाया लक्षणमाह मद्ये
नप्रलपन् शेतेनष्ट विभ्रांतमानः
सः गात्राणि विक्षिपन् भूमौजरा
यावन्नयातितत् नष्टविभ्रांतमा
सः तद्वं सर्वथास्मृतिहीनं विभ्रां
तं रजोसर्वज्ञानयुक्तमानसंयस्य
सः जरां जीर्णतां नयेत् ॥
विषजाया लक्षणमाह वेपथुस्व
नतृष्णाः स्युस्तमश्च विषमूर्च्छिते
वेदितव्यांतीव्रतरं यथास्वं विलक्षणं
विषस्य मूलकंदफलपत्रलीना
दिभेद भिन्नस्य यथास्वकेवकल
क्षणमुक्तं सोभ्कृतेकत्पस्थानेतल
क्षणंमद्यापेक्षया तीव्रतरं वेदि
तव्यं नतु संज्ञानाशेन साधर्म्या
मूर्च्छा भ्रम तंद्रादीनांकोभेद इ
त्यत आह मूर्च्छा पित्ततमःप्राया
रजः पित्तानिलाद्भ्रमः तमोवात
कफात्तंद्रा निद्राश्लेष्मतमोभवा
रजः पित्तानिलाद्भ्रम इति नात्र
समुच्चयः केवलपित्तमरे भ्रम
स्योक्तत्वात् भ्रम चक्रारूढस्येव
भ्रमहरुत्सृष्टानेस्वदेहस्यभ्रमनमिव
ज्ञानंवा तंद्राया लक्षण
माह इंद्रियार्थेष्वसंवित्तिर्गौरवं
जृम्भणं क्लमः निद्रार्त्तस्येव य
स्येहा तस्य तंद्रां विनिर्दिशेत् इं
द्रियाणामर्थः प्रयोजनं येषुतेषु
अर्थादिविषयेषु असंवित्तिः असम्य
क् ज्ञानं इति इंद्रियार्थासम्यक्
ज्ञानादि निद्राया प्रवृद्धस्य क्ल
माभाव स्तंद्रायां तु प्रबोधितस्या
पि क्लम इत्यनयो र्भेदः क्लमस्य
लक्षणमाह योऽनायासःश्रमो
देहे प्रवृद्धः श्वासवर्जितः क्लमः
स इति विज्ञेय इंद्रियार्थप्रबाधकः
इंद्रियार्थे प्रबाधकः इंद्रियाणां
बुद्धींद्रियाणां कर्मेंद्रियाणांच अ
र्थः प्रयोजनं विषय ग्रहणं तस्य
प्रबाधकः आवल्येन निद्रालक्ष
णमाह यदातु मनसिक्लांतेकर्मा
त्मानः क्लमान्विताः विषयेभ्यो नि
वर्त्तंते तदा स्वपिति मानवः क्लां
ते ग्लाने श्रांत इतियावत् कर्मात्मा
नः कर्मेंद्रियाणि ज्ञानेंद्रियाणिच
क्लमान्विताः श्रांताः संन्यासस्य
संप्राप्ति पूर्वकं लक्षणमाह वा
ग्देह मनसां चेष्टामाक्षिप्यातिब
ला मलाः संन्यस्यंत्यबलं जंतुं
प्राणायतनमाश्रिताः ससासं
न्यास संन्यस्तः काष्ठीभूतो मृतोपमः


प्राणे विमुच्यते शीघ्रं मुक्तासद्यः
फला क्रियां आलिप्य विनाश्य
संन्यस्यति मूर्च्छयति प्राणायतनं
हृदयं संन्यस्तः मूर्च्छितः काष्ठी
भूतः क्रियारहितः मृतएव मृ
तोपम इति सद्यः फला क्रिया।
सूचीव्यधन नखावपीडनकपिक
च्छुचर्षण वृश्चिकादिदंशनादिरूपा
संन्यासस्य मूर्च्छातो भेदमाह।
दोषेषु मदमूर्च्छाया गतवेगेषु दे
हिनः स्वयमेवोपशाम्यंति संन्या
सो नौषधै र्विना मदमूर्च्छायाः
मदः अथ ह उन्मादः मूर्च्छायाः मू
र्च्छा अथ मूर्च्छायाश्चिकित्सा
सेकावगाहामणयः सहाराः शी
ताः प्रदेहा व्यजनानिलाश्च शीता
नि पानानिच गंधवंतिसर्वासुमूर्च्छा
स्वनिवारितानि मणयश्चंद्रकांताद
यः हाराः मुक्तादिहाराः शीताः प्र
देहाः सकर्पूरचंदनाद्यनुलेपना
नि शीतानि पानानि शिलामल
कादिपानकानि गंधवंतिकर्पूरा
दि सगंधवंति सर्वासु मूर्च्छास्व नि
वारितानि अस्यायमभिप्रायः से
कादीन्यासु मूर्च्छासहितान्यवलि
तवानश्लेष्मजास्वपि मूर्च्छास्वनि।
वारितानि तत्रापिपित्तस्य प्राधा
न्यात् सिद्धानि वर्गेमधुरे यथोस
सता हिमा जांगलजा रसाश्च
तथा यवा लोहितशालयश्चमूर्च्छा
सु पथ्याः ससतीनमुद्गाः सतीनः
कलायः कोलमज्जोषणोशीरं।
केशरं शीतवारिणा पीतं मूर्च्छां
जयत्लीढा कृष्णावामधुसंयुता शी
तेन तोयेनभृशं मृणालं कृष्णांच
पथ्यां मधुनावलिह्यात् कृष्णोक्ष
नासा वदनावशोषे तीरं पिबे
हाथवा मानुषीणां द्राक्षा सिता
दाडिम लाजवंति कह्लार नीलोत्
पल पद्मवंति पिबेत् कषायाणिच
शीतलानि पित्तज्वरे यानिच याप
यंति शिरीषबीज मोमूत्र कृष्णा
मरिच सैंधवैः अंजनं स्यात् प्र
बोधाय ससोनशिलाः वचैः अ
न्यच्च अंजनं सम्यगारब्धंमधुसिंधु
शिलोषणैः प्रमोहद्राहि भवति
भाषितं भिषजांवरैः शिला म
नःशिला उषणं मरीचं मधुकसार
सिंधुत्थं वचोषणकणाः समाः स्ल
क्ष्णं पिष्टाभसा नस्यं कुर्यात् संज्ञा
प्रबोधनं ॥ अथ रक्तजादी
नां मूर्च्छानां चिकित्सा रक्तजा
यांतु मूर्च्छायां हितः शीतक्रियावि
धिः मद्यजायां पिबेन्मद्यं निद्रा

सेवेत वा सत्वं विषजानां विष
घ्नानि भेषजानि प्रयोजयेत् ॥
अथ सन्न्यासस्य चिकित्सा प्रभूत
दोषस्तमसोऽतिरेकात् संमू
र्च्छितो नैव विबुध्यते यः सन्न्या
स संज्ञः सहि दुश्चिकित्स्यो नरो
भिषग्भिः परिकीर्त्तितोऽसौ अ
ञ्जनान्यवपीडश्च धूमाः प्रधमना
नि च सूचीभिस्तोदनं शस्तं दाहः पी
डा नखान्तरे लुञ्चनं केशलोम्नां च दं
तैर्दशनमेव च आत्मगुप्तावघर्षश्च
हितं तस्य प्रबोधने ॥ अवपीडः
कल्कीकृतौषधरसस्य नासापुटे
दानं तस्य संन्यासस्य अथ मूर्च्छा
यां रसः कृष्णामधुयुतं मूर्च्छा
यां पाययेत् भिषक् शीतसेका
वगाहादि सर्वाङ्गपीडनं हठात्।
सूतं मारितं ताम्रचूर्णं समो शीरं
केशरं शीतवारिणा पीतं मूर्च्छा
द्रुतं हन्यात्सहृत पित्तदाहानि यथा
ताम्रचूर्णं मारितं ताम्रचूर्णं ।
अथ भ्रमस्य चिकित्सा पिबेद्दुरा
लभाक्वाथं सघृतं भ्रमशान्तये
पथ्याक्वाथेन संसिद्धं घृतं धात्रीर
सेन वा शुण्ठीकृष्णाशताह्वाना सा
भयानां पलं पलं गुडस्य षट्पला।
तेषां गुटिका भ्रमनाशिनी तासां

दुरालभाक्वाथैः पीतं तन्दुलसंयु
तं निवारयेद्भ्रमं शीघ्रं तं यथा
शम्भुभाषितं ॥ अथ तन्द्रा
या अतिनिद्रायाश्च चिकित्सा न
रग लालालवणान्नमेतु मनःशिला
मागधिकामधूनि निर्याजिताम्र
हिम विनिश्चयेन तन्द्रां सनिद्रां
विनिवारयन्ति इन्दुः कर्पूरं ॥
सैन्धवं श्वेतमरिचं सर्षपः कुष्ठ
मेव च बस्तमूत्रेण संपिष्टं नस्यं
तन्द्रा निवारणं श्वेतमरिचं शि
ग्रुबीजं शुण्ठीकृष्णागजिरसावा
णानि नस्येन तन्द्रा विजयोल्वणा
नि हस्ताभ्रता पौष्कर नागराणि
भार्गीशिवाभ्यां क्वथितानि पाना
त् शिवाहरीतकी इति मूर्च्छा भ्र
म तन्द्रातिनिद्रा संन्यासाधिकारः
इति भावप्रकाशः ॥
मूर्च्छालः त्रि मूर्च्छितः इत्यमरः
मूर्च्छितः त्रि मूर्च्छायुक्तः तत्प
र्यायः मूर्त्तः २ मूर्च्छालः ३ इत्य
मरः उच्छ्रायः मूढः इति मेदिनी
वृद्धः इत्यजयः ॥
मूर्णः त्रि बद्धः इति मूलशब्दौ
कापीरायमुकुटः ॥
मूर्त्तः त्रि मूर्च्छितः इत्यमरः कठि
नः मूर्त्तिमान् इति मेदिनी न्याय

मते पृथिवी जलं तेजः वायुः म
नश्च एषां गुणाः रूपं रसः गन्धः
स्पर्शः परत्वं अपरत्वं गुरुत्वं स्ने
हः वेगश्च मूर्त्तवृत्ति साधारण
गुणाः संख्या परिमितिः पृथक्
त्वं संयोगः विभागश्च इति
भाषापरिच्छेदः ॥
मूर्त्तिः स्त्री काठिन्यं शरीरं इत्य
मरः प्रतिमा इति हेमचन्द्रः ।
मूर्त्तिमत् क्ली शरीरं इति हेम
चन्द्रः ॥
मूर्त्तिमान् त्रि मूर्त्तिविशिष्टः यथा
मल्लानामशनिर्नृणां नरवरः स्त्रीणां
स्मरो मूर्त्तिमान् इत्यादि श्रीभा
गवतं ॥
मूर्द्धकः पुं क्षत्रियः इति शब्दर
त्नावली ॥
मूर्द्धकर्णी स्त्री छत्रं इति हा
रावली ॥
मूर्द्धखोलं क्ली छत्रं इति त्रिकाण्ड
शेषः ॥
मूर्द्धजः पुं केशः इति जटाधरः
मूर्द्धिजाते त्रि ॥
मूर्द्धन्यः त्रि मूर्द्धनि भवः यथा ऋ
टठडढणरषा मूर्द्धन्या इ
ति मुग्धबोधव्याकरणं ॥
मूर्द्धपुष्पः पुं शिरीषवृक्षः इति
शब्दमाला ॥
मूर्द्धरसः पुं भक्तफेनः इति शब्द
चन्द्रिका ॥
मूर्द्धवेष्टनं क्ली उष्णीषः इति हे
मचन्द्रः ।
मूर्द्धा पुं मस्तकः इत्यमरः ।
मूर्द्धाभिषिक्तः पुं क्षत्रियः राजा
इत्यमरः मूर्द्धन्यभिषिक्तो समये
प्रथमः क्षत्रियो मूर्द्धाभिषिक्तः
तत्सम्भवत्वात् योग्यतयाऽन
भिषिक्तोऽपि मूर्द्धाभिषिक्तः ॥
वर्णसङ्करविशेषः स तु विप्रात्
क्षत्रियायां जातः प्रधानः इति
भरतः मन्त्री इति मेदिनी ॥
मूर्द्धा पुं शिरः यथा मूर्द्धा मूर्द्धा
शिरोदेशे पुंसि स्यान्नामिमौ स
मौ इत्युणादिकोषः मूर्द्धा
नेह मूर्द्धा मूर्द्धा च अस्य धडधडौ
इति तट्टीका ॥
मूर्वा स्त्री लताविशेषः चतुर्गुणा
पञ्चकः मुरगा इति ख्याता तत्
पर्य्यायः देवी २ मधुरसा ३ मो
रटा ४ तेजनी ५ स्रवा ६ मधुलिका
७ धनुःश्रेणी ८ गोकर्णी ९ पीलुप
र्णी १० इत्यमरः स्रुवा ११ मूर्वी
१२ मधुश्रेणी १३ पृथुः १४

मूर्द्धाभिषिक्तः राज रोपणा




श्रेणी १५ इति नदीकायां भर
नः सारंगिका १६ देवश्रेणी १७
पृथक्त्वचा १८ मधुस्रवा १९ अति
रसा २० पीलुपर्णिका २१ दिव्यल
२२ ज्वलिनी २३ गोपवल्ली २४
अस्या गुणाः अतितिक्तत्वं क
षायत्वं उष्णत्वं हृद्रोग कफ
वात वमि प्रमेह कुष्ठ विषमज्वर
नाशित्वञ्च इति राजनिर्घण्टः।
अपि च मूर्वा सरा गुरुः स्वाद्वी तिक्ता
पित्तास्र मेह ज्वर त्रिदोष तृष्णा
हृद्रोग कण्डू कुष्ठज्वरापहा इति
भावप्रकाशः ॥

मूल न प्रतिष्ठायां इति कविक
ल्पद्रुमः पवर्गप्रोष्ठादि दीर्घी प्र
तिष्ठा स्थिति रिति गोविन्दभट्टः
अ मूलति मूलनेयशाः अयं
परस्मैपदी सन्ध्य इति दुर्गा
दासः ॥

मूल क रोपणे इतिकविकल्पद्रु
मः दीर्घी रोपण मारोपणं क
मूलयति हस्तं लोकः गोविंद
भट्टस्तु मूलं रोपणं इति पठित्वा रो
हणं जन्मेति व्याख्याति इति
दुर्गादासः ॥


मूलं क्ली शिफा शिकड इतिभा
षा तत्पर्य्यायः अङ्घ्रिनाम
कः २ इत्यमरः कंदः ३ पादः ४
इतिशब्दरत्नावली जटा ५ इति
जटाधरः आद्ये नक्षत्रविशेषः
निकुञ्जः अन्तिकं ॥ इति
विश्वः मूलविन्ने इतिभरत।
प्रान्त मेदिनी निजं इत्यजयपा
लः चरणं इत्यमरादिकोषः ॥
टीकाग्रन्थः यथा समान वेले
त्यादि मूलं इति सम्प्रति प
दे गदाधरभट्टाचार्य्यः मूरण
इति शब्दचन्द्रिका पिप्पलीमूलं।
पुष्करमूलं इति राजनिर्घण्टः।
विषमूलस्य अन्वेषणे निषेधो
यथा नदीनां मग्निहोत्राणां भार
तस्य कुलस्य च मूलान्वेषो न क
र्त्तव्यो मूलाद्दोषो न हीयते ॥
इति गारुडे ११६ अध्यायः।
मूलः त्रि अश्विन्यादिसप्तविंशति
नक्षत्रान्तर्गतोनविंशनक्षत्र यथा
हस्ता स्वाती श्रवणा अश्लेषे मृग
शिरो नपुंसि स्यात् पुंसि पुनर्वसु
पुष्यो मूलं तथा स्त्रियां शेषाः
इति लिङ्गादितन्त्रे मूलमाघे।
शिफायाञ्च निकटे भेत्ववा स्त्रियां
इति शब्दरत्नावली च सप्तविंशति
देवताकः इति ज्योतिस्तत्त्वं सिं
हपुच्छाकारः इति महत्तं ॥

चिन्तामणिः शालमूर्त्तिर्नवताराम
यस्य अस्मिन् मूलकोपगते दिने
मीनलग्नस्याष्टौ पलानि गतानि भ
वन्ति यथा मौलि माजिन् वना
द्रकाकिते मूलभे सन्तप्तशालमूर्त्ति
ति लिपिकाष्टक मरालङ्गनेले
निर्जगाम पृथुरोमलग्नतः इति
काशिदासकृत रात्रिलग्ननिरूपणे
अस्मिन्नक्षत्रे जातस्य फलं ॥
मूले विरूढावयवः समूलं कुलं द
हत्येव वदन्ति सन्तः चेद्रमणा
तः पुरुषा विशेषात् सौभाग्यमा
युश्च कुलानुवृद्धिः इति कोष्ठीप्र
दीपः अस्मिन् मासभत्वाणि ।
देयो यथा चित्रा स्वहस्ताश्रवणा
स्वैतेलं चौरं विशाखा प्रति
पत्त्ववर्ज्यं मूलमघे भाद्रप।
दाश्व मांसं योषित् स्वाद्या कृत्तिक
सोत्तराश्व इतितिथ्यादितत्त्वे।
मूलकं क्ली पुं कन्दविशेषः मूला
इति भाषा तत्पर्य्यायः। राजा
लुकः २ महाकन्दः ३ हस्तिदन्त
कः ४ इतिहारावली नीलकण्ठः ५
मूलाकं ६ दीर्घमूलकं ७ अत्रदीर्घ
पत्रकमपिपाठः ७ मृत्स्नारं ८
कन्दमूलं ९ हस्तिदन्तं १० सितं ११
शाखमूलं १२ हरित्पर्णं १३
रुचिरं १४ दीर्घकन्दकं १५ कुञ्ज
रक्षारमूलं १६ अस्य गुणाः।
तीक्ष्णत्वं उष्णत्वं कटुत्वं अग्नि।
दीपनत्वं दुर्नाम गुल्महृद्रोगवात
नाशित्वं रुचिदत्वं। गुरुत्वञ्च
इति राजनिर्घण्टः ॥ अपि च
बालं मूलकपत्री तु रोचनी वह्नि
दीपनी मूलकं गुरु विष्टम्भिनी
ह्लासमामं त्रिदोषकृत् तदेव स्निग्ध
सिद्धं तु पित्तलं कफवातनुत्
शुष्कं त्रिदोष शमनं शोषघ्नं गर
जिल्लघु तत्पुष्पं कफपित्तघ्नं
तत्फलं कफवातजित् ॥ इति
राजवल्लभः अन्यच्च मूलकं।
द्विविधं प्रोक्तं तत्रैकं लघुमूल
कं शालामर्कटकं विस्रं शाले
यं मरुसम्भवं चाणक्यमूलकं।
तीक्ष्णं तथा मूलकपोतिका ते
पाल मूलकं चान्यत्तद्वेव हस्तिदन्तव
त् लघुमूलकमुष्णं स्यात् रुच्यं लघु च
पाचनं दोषत्रयहरं स्वर्य्यं ज्वरश्वा
स विनाशनं ॥ नासिकाकण्ठ
रोगघ्नं नयनामयनाशनं महत्त
देव रूक्षोष्णं गुरुदोषत्रयप्रदं ॥
स्नेह सिद्धं तदेवस्याद्दोषत्रय वि
नाशनं इतिभावप्रकाशः सौर
माघे तद्भक्षणे दोषा यथा।



मकरे मूलकञ्चैव सिंहे वालाबुकं
तथा कार्त्तिके सूरणञ्चैव सन्ध्या
गोमांसभक्षणं इति कर्म्मलोच
नं । पौर्णमास्यां तु माघस्य ।
कृष्णपित्रणां देवतानाञ्च मूल
कं नैव दापयेत् दद्नरक मा
प्नोति भुञ्जीत ब्राह्मणो यदि ब्रा
ह्मणो मूलकं भुक्त्वा चरेच्चान्द्राय
णं व्रतं अन्यथा याति नरकं तत्र
विट्सूद्र एव च तथा वै । भ
क्ष्यमभक्ष्यञ्च पितॄणां गर्हितञ्च
यत् वर्जनीयं प्रयत्नेन मूलकं म
दिरासमं इति मलमासतत्त्व ।
मूलकः पुं वत्सनाभस्थावर
विषजातीयं तत्र नाविषभेदः इति
हेमचन्द्रः ॥
मूलकपर्णी स्त्री शोभाञ्जनः इति
रत्नमाला ॥
मूलकर्म्म क्ली औषध्यादिमूलेन स
न्तापनोच्चाटन जृम्भन वशीकर
णादिकर्म्म तो इति ख्याते इति भरत
टीका इति मुकुटः तत्पर्य्यायः
कार्म्मणं २ इत्यमरः ३ नपुंसका ।
शाङ्गपयानकोनगनोपपान क
विशेषः यथा सर्वाकरेष्वधीकारो
महायन्त्रप्रवर्त्तनं हिंसौषधीनां
स्त्र्याजीवोऽभिचारो मूल
कर्म्म च इति मनुः ॥ मन्त्रौषधा
दिना वशीकरणं इति कल्लूकभट्टः
मूलकमूला स्त्री क्षीरकञ्चुकी वृ
क्षः इति रत्नमाला ॥
मूलकारः पुं मूलग्रन्थकर्त्ता यथा
न्याये गणकारः किन्तु मूलकारः
इति संक्षिप्तसार टीकायां गो
यीचन्द्रः ॥
मूलकारिका स्त्री चुल्ली इति हारा
वली मूलग्रन्थार्थप्रकाशकपद्यं
मूलयन्तस्य वृद्धि विशेषश्च ॥
मूलकृच्छ्रं क्ली एकादशाविधर्णा
कृच्छ्र व्रतान्तर्गत व्रतविशेषः यत्र
कथितानि हरितमूलानि मासं पीयं
ते नत्त मूलकृच्छ्रमपदेश लभते
यथाह मार्कण्डेयः फलैर्मासेन
कथितः फलकृच्छ्रो मनीषिभिः
श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्मा
रपरस्तथा मासेनामलकैः एवं
श्रीकृच्छ्रमपरं स्मृतं पत्रैर्मतः ।
पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते ।
मूलकृच्छ्रः स्मृतो मूलैस्तोयकृ
च्छ्रो जलेन तु इति मिताक्षरायां
प्रायश्चित्ताध्यायः ॥
मूलजं क्ली आर्द्रकं इति राज
निर्घण्टः ॥
मूलजः पुं उत्पलादिः इति हेम

चन्द्रः मूलोद्भवेति ॥
मूलत्रिकोणं क्ली अर्कादिग्रहा
णां राशिरूपग्रहविशेषः सत्र रवेः
सिंहः चन्द्रस्य वृषः कुजस्य मेषः
बुधस्य कन्या गुरो धनुः । भृगो
स्तुला शनेः कुम्भः यथा सिंहो
वृषश्च मेषश्च कन्याधन्वीघटोधरः
अर्कादीनां त्रिकोणानि मूलानि
राशयः क्रमात् अथ मूलत्रिको
णांशावस्था रवि भौम जीव
भार्गव शनेश्चराणां त्रिकोणभा
गाः स्युः नख रवि दिक् तिथि न
खराः तेहे दिग्भागाकाः स्यात्
इति ज्योतिस्तत्त्वं ॥
मूलदेवः पुं कंसराजः इति
त्रिकाण्डशेषः ॥
मूलद्रव्यं क्ली मूलधनं इति हेम
चन्द्रः ॥
मूलधनं क्ली आदिद्रव्ये पुंजी इ
ति भाषा तत्पर्य्यायः परिपणं २
नीवी ३ इत्यमरः ॥
मूलपर्णी स्त्री मण्डूकपर्णी इति
रत्नमाला ॥
मूलपुष्करं क्ली पुष्करमूलं इ
ति राजनिर्घण्टः ॥
मूलपोती स्त्री क्षुद्रकाशाकभेदः
तत्पर्य्यायः ह्रस्वकली २ पोति
का ३ क्षुद्रपोतिकः ४ क्षुपोपोद
कनाम्नी ५ वलिशाकरपोतिका
अस्या गुणाः त्रिदोषघ्नत्वं । रुच्य
त्वं वस्त्रत्वं लघुत्वं बल पुष्टि
कारित्वं रुच्यत्वं जठरानलदी
पनत्वञ्च इति राजनिर्घण्टः ॥
मूलप्रकृतिः स्त्री आद्याशक्तिः यथा
सर्वप्रसूता प्रकृतिः श्रीकृष्णः प्र
कृतेः परः नशक्तः परमेशोपि
तां शक्तिं प्रकृतिं विना सृष्टिं
विधातुं मायेशो न सृष्टिमाय
या विना साच कृष्णे तिरोभूतास
हि संहारकारके आविर्भूता सृष्टि
कालेसा च नित्या यथेश्वरः कु
लालश्च घटं कर्त्तुं यथाऽशक्तो मृ
दं विना स्वर्णं विनास्वर्णकारः कुण्ड
लं कर्त्तुमक्षमः सा शक्तिः सृष्टि
काले च पञ्चधा चेश्वरेच्छया रा
धा पद्मा च सावित्री दुर्गा देवी सरस्व
ती प्राणाधिष्ठातृदेवी या कृष्ण
स्य परमात्मनः प्राणाधिकप्रियतमा
सा राधा परिकीर्त्तिता ऐश्वर्य्या
धिष्ठातृदेवी सर्वमङ्गलकारिणी
परमानन्दरूपा च सा लक्ष्मीः परि
कीर्त्तिता विद्याधिष्ठातृदेवी या प
रमेशस्य दुर्लभा वेदशास्त्रयोग
माता सा सावित्री प्रकीर्त्तिता ।



बुद्ध्यधिष्ठातृदेवी या सर्वशक्तिस्व
रूपिणी सर्वज्ञानात्मिका सर्वा सा
दुर्गा दुर्गनाशिनी वागधिष्ठातृदे
वी या शास्त्रज्ञानप्रदा सदा ब्रह्मक
ण्ठोद्भवा या च सा च देवी सरस्वती
पञ्चधादौ स्वयं देवी मूलप्रकृति।
रीश्वरी ततः सृष्टिक्रमेणैव बह्व
या कलया च सा योषितः प्रकृ
तेरंशाः पुमांसः पुरुषस्य च मा
यया सृष्टिकाले च तद्विना न भ
वेद्भवः सृष्टिस्थ प्रतिबिम्बे च
ब्रह्मन् ब्रह्मोद्भवा सदा। पाता
विष्णुः संहर्त्ता शिवः शश्वच्छि
वप्रदः इति ब्रह्मवैवर्त्ते पुराणे गण
तिखण्डे ४ अध्यायः ॥

मूलफलदः पुं पनसवृक्षः इति
राजनिर्घण्टः ॥

मूलभद्रः पुं कंसराजः इति त्रि
काण्डशेषः ॥

मूलरसः पुं मोरटलता इति
रत्नमाला ॥

मूलशाकटः त्रि मूलक्षेत्रं इति
मूलशाकिनः देवकाण्डे शाकटशा
किन प्रत्ययाभ्यां निष्पन्नं ॥

मूला स्त्री शतावरी इति राज
निर्घण्टः नक्षत्रं इति शब्द
रत्नावली ॥

मूलाधारः पुं गुह्यलिङ्गयोर्मध्ये।
अङ्गुलिद्वयमितस्थानः तत्र शरी
रस्य सकलनाडीनां मूलस्थानं
अत्र वशषसान्तरक्तवर्णचतु
र्द्दल पद्ममस्ति तन्मध्ये इच्छाज्ञा
नक्रियास्वरूप त्रिकोणं वर्त्तते।
तन्मध्ये कोटिसूर्य्यसमप्रभस्वयम्भु
लिङ्गमस्ति अत्र पृथिवी वर्त्तते।
तत्रैव मृणालसूत्रवत् सूक्ष्मसा
र्द्धत्रिवलयाकारस्वयम्भुलिङ्गवेष्टि
तविद्युल्लताप्रभकुलकुण्डलिनी वर्त्त
ते यथा मूलाधारे त्रिकोणा।
ख्ये इच्छाज्ञानक्रियात्मके मध्ये
स्वयम्भुलिङ्गं तत् कोटिसूर्य्यसमप्रभ
तदूर्द्ध्वे हेमवर्णाभं वसवर्णं चतु
र्द्दलं इति तन्त्रसारः अथाधारप
द्मं सुषुम्नास्यलग्नं ध्वजाधो गु
दोर्द्ध्वं चतुःशोणपत्रं अधोव।
क्त्रमुद्यत् सुवर्णाभवर्णैर्वकारादि
सान्तैर्युतं वेदवर्णैः अमुष्मिन्।
धरायाश्चतुष्कोणचक्रं समुद्भासि
शूलाष्टकैरावृतं तत् लसत्पीनव
र्णं तडित्कोमलाङ्गं तदन्तः स
मास्ते धरायाः स्वबीजं वज्राख्या।
वक्त्रदेशे विलसति सततं कर्णि।
कामध्यसंस्थं कोणं तत्त्रैपुराख्यं तडि
दिव विलसत्कोमलं काम।

रूपं कन्दर्पो नाम वायुर्विलसति
सततं तस्य मध्ये समन्तात् जीवे
शो बन्धुजीवप्रकरमभिहसन्
कोटिसूर्य्यप्रकाशः तन्मध्ये लि
ङ्गरूपी द्रुतकनककलाकोमलः
पश्चिमास्यो ज्ञानध्यानप्रकाशः
प्रथमकिशलयाकाररूपः स्वयं
भूः विद्युत्पूर्णेन्दुबिम्बप्रकरकर
चयस्निग्धसन्तानहासी काशीवा
सी विलासी विलसति सरिदावर्त्त
रूपप्रकारः अस्योर्द्ध्वे विसतन्तुसो
दरलसत्सूक्ष्मा जगन्मोहिनी ब्रह्म
द्वारमुखं मुखेन मधुरं संछादयं
ती स्वयं शंखावर्त्तनिभा नवीनचप
ला माला विलासास्पदा सुप्ता सर्प्पस
मा शिवोपरि लसत्सार्द्धत्रिवृत्ताकृ।
तिः इति श्रीतत्त्वचिन्तामणौ षट्च
क्रभेदः तत्रस्थत्रिवेणी यथा इ
डा मूलस्थाननिवासिनी या सृष्ट्या
त्मिका या यमुना प्रवाहिका तथा
सुषुम्ना मलदेशगामिनी सर
स्वती रहति मज्जनात्मके मनोभान
स्नानपरो मनुष्योऽमन्त्रक्रिया यो
गविशिष्ट तत्ववित् महीस्थतीर्थे
विमले गते सुरा मूलाङ्कुरे स्ना
तिस्वभक्तिभावभावेन सर्वाणि तीर्थे
सतीर्थपावनी गंगा महासन वि
निर्गता सती करोति पापतय
मेव मुक्तिं ददाति साक्षात्समलार्थ
पुण्यदा इतिरुद्रयामलं ॥

मूलाकं क्ली मूलकं इति राज
निर्घण्टः ॥

मूली पुं हस्तः इति शब्दचन्द्रिका

मूली स्त्री ज्येष्ठी इति त्रिकाण्ड
शेषः ॥

मूलेरः पुं नेता इत्युणादिकोषः

मूल्य क्ली पदादीनामुत्पत्तिकार
णं मूल मूलेन क्रयविक्रयार्थमि
दं टंकैकादिरितियः इति भरतः।
दर इति दाम इति च भाषा तत्
पर्य्यायः वस्नः २ अवक्रयः ३ इत्य
मरः मूल्यते अर्प्यते इदं मा
हिना इति भाडा इति च भाषा
तत्पर्य्यायः कर्मण्या २ विधा ३
भृत्या ४ भृतिः ५ भर्म ६ वेतनं ७
भरण्यं ८ भरणं ९ निर्वेशः १०
पणः ११ इति च अमरः ॥

मूल्यं त्रि प्रतिष्ठायोग्यः रोपण
योग्यः इति मूलशब्दात् यत्प्रत्ययात्


मूष लुंठने इति कविकल्पद्रुमः
पसस्वरी यो मूषति परद्रव्यं।
इति हलायुधः कृशीत्येके मा
षति इति दुर्गादासः ॥

मूषः पुं स्त्री मूषिकः तैजसाव

ष्णी इति शब्दरत्नावली ॥
मूषकः पुं स्त्री उन्दुरुः इति शब्दरत्नावली ॥
मूषककर्णी स्त्री आखुकर्णी इति राजनिर्घण्टः ॥
मूषकमारी स्त्री स्तनश्रेणीवृक्षः इति राजनिर्घण्टः ॥
मूषका स्त्री मूषिका इति शब्दरत्नावली ॥
मूषकारातिः पुं बिडालः इति राजनिर्घण्टः मूषिकाराति इति च पाठः ॥
मूषा स्त्री स्वर्णाद्यावर्त्तनपात्रं मुषी इति भाषा तत्पर्य्यायः तैजसावर्त्तनी २ इत्यमरः ॥ मुषा ३ मुषी ४ आवर्त्तनी ५ मूषी ६ इति भरतः मूषिका ७ इति रमानाथः देवताडकः इति शब्दचन्द्रिका मूषिकस्त्रीजातिः इति शब्दरत्नावली गवाक्षः यथा एक हि त्र्यादि मूषावदनमिति मिहो ब्रूहि मे भूमिभर्त्तुर्हर्म्ये रम्येऽहमूषे चत्वर विरचिते सहसांशालाविले इत्यादि लीलावत्यां व्यवहारः ॥
मूषाकर्णी स्त्री आखुकर्णी इति रत्नावली ॥

मूषातुत्थं क्ली नीलतुत्थं तत्पर्य्यायः कांस्यनीलं २ हेमतारं ३ वितुन्नकं ४ इति हेमचन्द्रः ॥
मूषिकः पुं जन्तुविशेषः इंदुर इति भाषा तत्पर्य्यायः उन्दुरुः २ आखुः ३ इत्यमरः ॥ मूषः ४ मूषीकः ५ उन्दूरुः ६ वज्रकः [?] ७ वृषः ८ आखनिकः ९ वृषः [?] १० इति शब्दरत्नावली मूषकः ११ [illegible] १२ उन्दुरुकः १३ नखी १४ खनकः १५ बिलकारी १६ धान्यारिः १७ व्रजजः [?] १८ अस्य मांसगुणाः । अहिनकुलशल्यगोधामूषकमुख्या बिलेशयाः कथिताः । श्वासानिलकासहरं तन्मांसं पित्तदाहकरं अन्ये बिलशायिनस्तु केकिडोन्दुरुकादयः गर्हितं तस्य मांसं च मद्य गौरव दुर्जरं ॥ इति राजनिर्घण्टः अपि च मूषिको मधुरः स्निग्धो व्यवायी बलवर्द्धनः इति राजवल्लभः ॥ पारिभाषिकमूषिको यथा विमेषन्ति नैवात्ति न ददाति जुहोति च तन्मात्र रावण तस्यान्नं भक्षा कुलेन भ्रश्यति इति मार्कण्डेयपुराणे आचाराध्यायः ॥
मूषिकपर्णी स्त्री जलजन्तुविशेषः

इंदुरकानीपाना इति भाषा तत्पर्य्यायः चित्रा २ उपचित्रा ३ न्यग्रोधी ४ द्रवन्ती ५ सम्बरी ६ वृषा ७ प्रत्यक्श्रेणी ८ सुतश्रेणी ९ रण्डा १० इत्यमरः पुत्रश्रेणी ११ आखुपर्णिका १२ वृषपर्णी १३ आखुपर्णी १४ मूषिका १५ फञ्जिपत्रिका १६ इति रत्नमाला मूषिपर्णिका १७ संचित्रा १८ मूषीकर्णी १९ सकर्णिका २० इति शब्दरत्नावली ॥
मूषिका स्त्री मूषिकपर्णी इति रत्नमाला उन्दुरुः इति शब्दरत्नावली मूषा इत्यमरटीकायां रमानाथः ॥
मूषिकांकः पुं गणेशः इति जटाधरः ॥
मूषिकाञ्चनः पुं गणेशः इति त्रिकाण्डशेषः ॥
मूषिकारातिः पुं बिडालः इति राजनिर्घण्टः ॥
मूषिकाह्वयः पुं मूषिकपर्णी इति जटाधरः ॥
मूषिपर्णिका स्त्री मूषिकपर्णी इति शब्दरत्नावली ॥
मूषी स्त्री मूषा स्वर्णाद्यावर्त्तनपात्रं इत्यमरटीकायां भरतः महामूषिकः यथा अम्बा महामूषिकः स्यान्मूषो विघ्नेशवाहनः महाङ्गः [?] आखुमारी च भूफलो अतिपातनः इति राजनिर्घण्टः ॥
मूषीकः पुं स्त्री मूषिकः इति शब्दरत्नावली ॥
मूषीककर्णी स्त्री मूषिकपर्णी इति शब्दरत्नावली ॥
मूषीका स्त्री उन्दुरुः यथा दीना मूषीका मूषा च मूषीका मूषिकेऽपि इति शब्दरत्नावली ॥
मूष्यायणः त्रि अज्ञातपितृकः गूढोत्पन्नः इति केचित् ।
मृ ङ. श. मृतौ इति कविकल्पद्रुमः मृतिः प्राणत्यागः ङ. श. म्रियते प्राणी ङि. म्रियस्य मृङ् शीघ्रामिति नियमेन अन्यत्र परस्मैपदं ममार मर्त्ता मरिष्यति अमरिष्यत् इति दुर्गादासः ॥
मृकण्डकः पुं मृकण्डुमुनिः इति शब्दरत्नावली ॥
मृकण्डुः पुं मुनिविशेषः तस्य पुत्रो मार्कण्डेयः यथा मार्कण्डेयोऽपि मार्कण्डो मृकण्डुश्च मृकण्डकः । इति शब्दरत्नावली ॥
मृग त् कण्ड. मार्गणे ङ. रामो मृगं मृगयते वनवीथिकासु इति महानाटकं कान्तत्रादौ मृगय अन्वेष ।



ते इति दिवादिपरस्मैपदी धातु
रूप हरणे इति शिवोचनयो रस्य
मतत्वादनेनापेक्षितः । मृग्यन्ते
एतद्वि तथा व्याकरणा बाधा न
मुञ्चन्ति मां इति तस्मात्कारान्तस्य ।
वभावे क्विपि अकारलोपे मृगं
करोतीति कण्ड्वादित्वात् क्ये
साध्यं इति दुर्गादासः ॥
मृगः पुं पशुमात्र हस्तिविशेषः
नक्षत्रभेदः अन्वेषणं याचना
इति मेदिनी । मार्गशीर्षमासः ।
यज्ञविशेषः इत्यजयपालः । मृग
नाभि इत्यमरटीकायां भरतः ।
मकरराशिः यथा मृगकर्कट
संक्रान्ती द्वे तदक्षिणायने वि
षुवती तुला मेषे गोलमध्ये तथा
परा इति तिथ्यादितत्वं ॥
स्वनामख्यात पशुविशेषः मृग्य
ते अन्विष्यतेऽसौ व्याधैः तत्प
र्यायः कुरङ्गः २ वातायुः ३ हरि
णः ४ अजिनयोनिः ५ इत्यमरः
सारङ्गः ६ चारुलोचनः ७ जिनयो
निः ८ कुरङ्गमः ९ ऋष्यः १० ऋष्यः
११ रिष्यः १२ रिशपः १३ पृषतः १४
पृषाकः १५ इति शब्दरत्नावली । स
नवविधः यथा सम्बरो रोहितो
न्यङ्कुः कुरङ्गस्तद्रूपो रुरुः पृषतश्च

हरिणश्चेति मृगा नवविधा मताः
पाठान्तरं यथा समूरु रोहितो
न्यङ्कुः सम्बरो वभ्रुर्गोरुरुः एणो
हरिणश्चेति मृगा नवविधा मता
हरिणश्चापि विज्ञेयः पञ्चभेदो
ऽत्र भैरव ऋष्यः खड्गो रुरुश्चैव
पृषतश्च मृगस्तथा एते बलि
प्रदाने च चर्मदाने च कीर्त्तिताः
इति कालिकापुराणे ६७ अध्यायः
अपि च अथ जाङ्गलानां ग
णाना हरिणैणकुरङ्गर्ष्य पृषता
न्यङ्कुशम्बराः राजीवोऽपि च मुण्डी
चेत्याद्या जाङ्गल संज्ञकाः ॥ ह
रिणस्ताम्रवर्णः स्यादेणः कृष्णः प्र
कीर्त्तितः कुरङ्ग ईषत्ताम्रः स्याद्धरि
णाकृतिको महान् ऋष्यो नीलो
ड्को लोके स रोझ इति कीर्त्तितः
पृषत स्त्वेङ्कविन्दुः स्याद्धरिणात्
किंचिदल्पकः न्यङ्कुर्बहुविषाणो
घ पृषाश्वरो गवयो महान् राजीव
स्तु मृगो ज्ञेयो राजीभिः परिवेष्टितः
यो मृगः शृङ्गहीनः स्यात्स मुण्डी
ति निगद्यते अथ तेषां गुणाः
जाङ्गलाः प्रायशः सर्वे पित्तश्ले
ष्महराः स्मृताः किंचिद्वातकरा
स्तथापि लघवो बलवर्द्धनाः इति
भावप्रकाशः अथ मृगपरीक्षा ।

मृगाधिं समासाद्य कौलकार्य्य ।
तथा पुत्रः मृगाः पोष्या मही[illegible]
णां तेषां वस्याखिलत्वं इष्टि
वायु वायु गगनान्तिज्ञोऽपि कालस्य
पञ्चधा भिद्यन्ते नैकभेदास्तु सु
मस्त्रा मृगजातयः तद्यथा यग
र्भिः स्त्रीणां शरीरकर्त्ता नेष्टा ।
थिवा गेयमृगाः प्रदिष्टाः सर्वे गम्भ
वो सरभि प्रकामं पुण्यप्रदेशे प्रभ
वन्ति नेत्रे ऽप्येवं विशाला गुरु
दीर्घशृङ्गा अम्भोमसत्वात्तीव्र[illegible]
प्रदेशाः आप्यास्तन्नेव प्रसरन्ति ।
भूरि सर्वत्र देशे प्रभवन्ति नैव
धावन्ति ये वात स्पितान्तीक्ष्णगी
स्तनेः वातमृगाः प्रदिष्टाः ते यत्र
यत्रैव भवन्ति शाखास्तत्रैव सर्वो
[illegible]ति सेति लघुप्रमाणा ल
घुशीर्षस्तथा निर्गदेहा लघवः ।
अमाणाः तेजोगताः तेजकराः स्मा
त्स्वप्ना तेनापि निरीक्षणीया वे
कपिलवर्णा रक्तदेहा मृगाः तेजसा
भृशं यान्ति वायुवेगाः नभस्या
गः स्थलेन जलेन स्थलप्रदेशे प्रभवे
न्ति न भोगोत्पादक पार्थिवा
द्विमृगः सर्वस्त्रानन्तो निर्भवेत ।
पृथक् सम्यगामनन्त्यागमेनोक्ता
नामृगजातयः कृत्वाः पशवस्त्रियः ।


ऊत्स तथियाः खरलोमभागाः आ
वर्त्तशृङ्गा स्तनवो हरिणा वंशजा
तयः कुशृङ्गा वा द्व्यशृङ्गा वा प्रदाः
खरतनुरुहाः अस्थानां ये गणादो
आस्ते तेषां हरिणोऽपि तथापि ।
दोषाः पञ्चामी वर्ज्यने हरिणश्च
याः नेत्रयो रेतरे यस्य लोमाव
र्त्तः सव्यापकृत विषमो विकृतो
शृङ्गो यस्य स तेन नाशनः आव
र्त्तः पृष्ठतो पुच्छमूलनाभिमभिवि
दति पश्चार्द्धे यस्य वावर्त्त लो
न्यायो भयकारको वर्णितेत्र पदा
दीनां विकृता हननाशनः गार्ग्यः
सोपवन्मृगजातीनां द्विजातीनां
मध्याधिका दर्शनात्तस्य शोभा स्वेतरं
धारानानुपोषणात् भवेदुर्विपदः
सर्वास्तथा वैवायपोषणात् श्री
लोऽपि हरिणपोषणानो यतः सौ
भुञ्जा न हि भवन्मरुद्रव पीडने
न पविषद्धिकरा विपुजं भयेनत्व
ते हरिणां गृहीतं ऽन्वय इति मृग
परीक्षा इति युक्तिकल्पतरुः मृ
गादि विकारोपशमो यथा गतो
ऽध्वान अविशन्ति यदा ग्राममरण्य
मृगपक्षिणः अरण्यं यान्ति वा ग्रा
म्याः स्थलं यान्ति जलोद्भवाः स्थ
लजाश्च जलं यान्ति घोरं वा सेति

निर्भयाः गृहं कपोतः प्रविशेत्
क्रव्यादो मूर्द्ध्नि नीयते मधुवा म
क्षिकाः कुर्य्युर्मृत्युं गृह्णपते र्वदेत्।
मृग पति विकारेषु कुर्य्याद्धोमं ॥
स दक्षिणां देवाः कपोते इति च
जमव्याः पंचभिर्द्विजैः गावश्च
देया विधिवत् द्विजानां सकांचना
वस्त्रयुगोत्तरीयाः एवं कृते शांति
मुपैति पापं मृगैर्द्विजै र्वा वि
निवेदितं यत् इति मात्स्ये।
२११ अध्यायः चतुर्विध पुरुष।
मध्ये पुरुष विशेषः तस्य लक्ष
णं यथा वदति मधुरवाणीं दीर्घ
नेत्रो ऽतिभीरु श्चपलमति स्सु
देहः शीघ्रवेगो मृगो ऽयं। श
शके पद्मिनी तुष्टा मृगे तुष्टा च चि
त्रिणी वृषभे शंखिनी तुष्टा हये
तुष्टा च हस्तिनी पद्मिनी शशयो
यौनि मेढ्रको चतुरंगुलो चित्रि
णीमृगयो यौनि मेढ्रकौ तथा
विधौ इति रतिमंजरी ॥
मृग गामिनी स्त्री विडंगा इति रा
जनिर्घंटः मृगसहगमनशीला
च मृगचर्मजं स्त्री जवादिनामकगं
धद्रव्यं इति राजनिर्घंटः मृगचर्म
जो नेत्रि मृगचेटकः पुं खट्टासः इ
ति शब्दमाला ॥

मृगजालिका स्त्री मृगबंधनार्थजा
लं तत्पर्य्यायः वागुरा २ इति हे
मचंद्रः ॥
मृगजीवनः पुं व्याधः इति शब्द
रत्नावली ॥
मृगणा स्त्री अपहृतद्रव्यस्यान्वे
षणं यथा संवीक्षणं विचयनं।
मार्गणं मृगणा मृगः इत्यमरः
मृगतृट् स्त्री मृगतृष्णा इति शब्द
रत्नावली ॥
मृगतृषा स्त्री मृगतृष्णा इति श
ब्दरत्नावली ॥
मृगतृष्णा स्त्री जलाभासत्वान्मृगा
णां तृष्णा विद्यते ऽस्यां ग्रीष्मे
मरुदेशे सिकतादावर्ककराः प्रति
फलिताः ह्रस्वानां जलत्वेनाभां
ति तद्वाचिका इति टीकाकाराः।
अर्कतृट् रविरश्मिजन्य तिमिरा
म्बुजालं मरीचिका इत्यन्ये य
त्पृथैर्जल मिव दृश्यते इत्यप
रे इति भरतः तत्पर्य्यायः ॥
मरीचिका २ इत्यमरः मृगतृष्णि
का ३ इति भरतः। मृगतृट् ४
मृगतृषा ५ इति शब्दरत्नावली।
मृगतृष्णिका स्त्री मृगतृष्णा इत्य
मरटीकायां भरतः ॥ मृगदं
शकः पुं कुक्कुरः इत्यमरः ॥

मृगधूर्त्तः पुं शृगालः इति सिद्धा
न्तसारे समासपादः ॥
मृगधूर्त्तकः पुं शृगालः इत्यमरः
मृगनाभिः पुं कस्तूरी तत्पर्य्या
यः मृगनाभिर्मृगमदः कथितस्तु
सहस्रभित् कस्तूरिका च कस्तूरी
वेधमुख्या च सा स्मृता सा त्रिविधा
यथा कामरूपोद्भवा कृष्णा नेपा
ली नीलवर्णयुक् काश्मीरी कपि
लच्छाया कस्तूरी त्रिविधा स्मृता
कामरूपोद्भवा श्रेष्ठा नेपाली म
ध्यमा भवेत् काश्मीरदेश सं
भूता कस्तूरी त्वधमा स्मृता ॥
अस्या गुणाः कस्तूरिका कटुस्ति
क्ता क्षारोष्णा शुक्रला गुरुः कफवा
तविषच्छर्दि शीत दौर्गन्ध्यशोषहृत्
इति भावप्रकाशः अन्यत् क
स्तूरीशब्दे द्रष्टव्यं ॥
मृगनाभिजा स्त्री कस्तूरी यथा।
चन्द्रसारः सितांशुश्चन्द्रो ऽथ मृग
नाभिजा मृगनाभिर्मृगमदः कस्तू
री गंधधूल्यपि इति हेमचंद्रः।
मृगनेत्रा स्त्री मृगो मृगशिरा नेत्रा
प्रापयित्री यस्याः रात्रेः सा रात्रिः
इति मुग्धबोधटीकायां दुर्गादासः
सा अग्रहायणस्य विंशतिदिनात्मि
कत्रयोविंशदिनात्मकानि ॥

पर्य्यन्तं प्रायः संभवति तत्र नवान्न
श्राद्धनिषेधो यथा अल्पशेषो
वृश्चिके शुक्लपक्षे तु नवान्नं शस्य
ते बुधैः अपरे क्रियमाणं हि
पतुष्येव कृते भवेत् पतुषि यत्।
कृतं श्राद्धं मृगनेत्रासु रात्रिषु।
पितरस्तत्र गृह्णंति नवान्नामिषकां
क्षिणः अपरे कृष्णपक्षे मृगो
नेत्रा प्रापयित्री यासां रात्रीणां
मिति कृत्यतत्त्वे नक्षत्रेण दि
नेन तिथ्यान्तरपदे सिद्धं।
ततश्च मृगशिरः पूर्वार्द्धेन वृश्चि
कशेषभागे राश्यारंभात् त्र्यादि श
हंडाधिक षड्रात्रो मृगनेत्राः।
इति मलमासतत्त्वं ॥
मृगपतिः पुं सिंहः इति हेम
चंद्रः ॥
मृगपिप्लुः पुं चंद्रः इति त्रिकांड
शेषः ॥
मृगप्रियं स्त्री पर्वततृणं इति राज
निर्घंटः
मृगवधाजीवः पुं व्याधः इत्यमरः
मृगबंधिनी स्त्री मृगबंधनार्थजालं
तत्पर्य्यायः वागुरा २ इत्यमरः
मृगभक्षा स्त्री जटामांसी इति
राजनिर्घंटः ॥
मृगमदः पुं कस्तूरी इत्यमरः ॥



मृगमदवासा स्त्री कस्तूरीमल्लिका
इतिराजनिर्घंटः ॥
मृगया स्त्री मृगयंते अन्विष्यंते ऽस्यां
शिकार इति भाषा । तत्पर्य्यायः
आच्छोदनं २ मृगव्यं ३ आखेटः ४
इत्यमरः सा राज्ञां पापाय न
स्यात् यथा अवलस्कंधाशिनो
ऽसौनि जनीडङ्म पीडिनः दे
गान् अनवघ्नताहिंस्रो मृगान्मृग
याचायन भूभुजां ज्ञातं इतिनैषधे २
सर्गः सा च कामजव्यसनविशेषः
यथा मृगयाक्षो दिवास्वप्नः परी
वादः स्त्रियो मदः तौर्य्यत्रिकं वृ
थाट्या च कामजो दशको गणः
इति मलमासतत्त्वं ॥
मृगधूः पुं वृक्ता शृगालः व्याधः
इति मेदिनी ॥
मृगरसा स्त्री सहदेवी इतिराज
निर्घंटः ॥
मृगराजः पुं सिंहः इतिशब्दरत्ना
वली ॥
मृगराट् पुं सिंहः इतिशब्दरत्ना
वली ॥
मृगराटिका स्त्री जीवंती इतिराज
निर्घंटः ॥
मृगरिपुः पुं सिंहः इतिहला
युधः ॥

षा

मृगरोमजं त्रि पशुलोमजातवस्त्रा
दि तत्पर्य्यायः ॥ रांकवं २
इत्यमरः ॥ ॥
मृगलांछनः पुं चंद्रः इतिशब्द
रत्नावली ॥
मृगवल्लभः पुं कुंदरुतृणं इति
राजनिर्घंटः ॥
मृगवाहनः पुं वायुः इतिजटाधरः
मृगव्यं क्ली मृगया इत्यमरः ।
मृगशिरः क्ली सप्तविंशतिनक्षत्रा
न्तर्गतपंचमनक्षत्रं । तत्पर्य्यायः
मृगशीर्षं २ आग्रहायणी ३ इत्य
मरः तन्नक्षत्रविडालपदाकृति तारा
त्रयात्मकं चंद्राधिदैवतं इति
ज्योतिषं गगनमध्ये तस्योदय ।
ये कन्यालग्नस्य त्रिंशदंशलाभि
गतानि भवंति यथा मृगशिराजन
पुराहुतो विद्यो व्योम मध्यं नि
लिने त्रिनायक शारदेन्दुरुचिक
सकारधारी तणनलकलाः क
लावति इतिकालिदासकृतज्यो
तिर्लग्न निरूपणे दत्तजातफले
यथा ग्रासनाभ्यासरतो विनी
तः सदानुरक्तो गुणिनां गुणेषु
भक्तान्वय स्नेहभेषा पूर्णः स्मा
र्तो नरो मृगजन्मभागी इतिकोष्ठी
प्रदीपः ॥

मृगशिरा स्त्री मृगशिरोनक्षत्रं ॥
इति शब्दरत्नावली ॥
मृगशिराः पुं मृगशिरोनक्षत्रं इ
त्यमरटीकायां रायमुकुटः ॥
मृगशीर्षं क्ली मृगशिरोनक्षत्रं ।
इत्यमरः ॥
मृगशीर्षः पुं मृगशिरोनक्षत्रं ।
इति केचित् इत्यमरटीकायां ।
भरतः ॥
मृगशीर्षा स्त्री मृगशिरोनक्षत्रं
इति त्रिकांडशेषापालितः इत्य
मरटीकायां भरतः ॥
मृगशीर्षा पुं मृगशिरोनक्षत्रं ।
इति केचित् इत्यमरटीकायां
भरतः ॥
मृगक्षीरं क्ली मृगीदुग्धं नराद्यौ
वेति बकारस्यान्वैकल्पिकत्वाच्च
बालमृग्याः क्षीरं मृगक्षीरं
पदं मृगपदं इत्यादिष्वपि पुंस्
त्वः इति मुग्धबोधटीकायां ।
दुर्गादासः ॥
मृगा स्त्री सहदेवीलता इतिरा
जनिर्घंटः ॥
मृगांकः पुं चंद्रः कर्पूरः इत्य
मरः वायुः इति विश्वः ॥ मृग
शिरः चंद्रेनशिरः कांतानां यथा ।
लोकस्याग्रामरं लक्ष्मणांके भाग


संस्थितं तु विदुः सोम देवापि ।
मृचनक्षत्रयोगिनः इति महाभा
रते हरिवंशः यथा रथिनां प्राप्य
पताकेन आनयन रथस्य ग्रीवास्थमेव
मुखं दर्शयागत मिव पश्यंति एव
चंद्रमंडलं प्राप्य पताकेन से
हान्व दोषान् पृथिवी मध्यकरूपा
मिव चंद्रमंडल गतां पश्यंति स
एव चंद्रे कलंक इत्युपचर्य्यते ।
इति तट्टीका यन्नेगगम्य ओष
धविशेषः यथा स्यादुक्तेन समं
हेममौक्तिकं द्विगुणं भवेत् गं
धकस्तत्समस्तेन रसपाशस्तटंकणः
सर्वं तद्गोलकं कृत्वा कांजिके ।
न विशोषयेत् भांडे लवणापूर्णे ।
ऽस्य पचेद्याम चतुष्टयं मृगांक
संज्ञको ज्ञेयो रोगराज निकृंतनः
अपिवरसस्य भस्मनो हेमपि
ष्टीकृत्य प्रयोजयेत् गुंजा च
तुष्टयमाज्य मरिचैः संचयेत्तरः ।
इति मधुमती ॥
मृगाजीवः पुं व्याधः इत्यमरः ।
मृगांडजा स्त्री कस्तूरी इतिराज
निर्घंटः ॥
मृगात् पुं स्त्री व्याघ्रः इतिकेचित्
मृगादनः पुं लघुव्याघ्रः तत्पर्य्या
यः तरक्षुः २ ॥ इत्यमरः ।

नर्त्तः २ नरूत्तः ४ नरत्तकः ५
इति शब्दरत्नावली कुक्कुरालका
रे कुम्भरेखा त्रिनेनकेतुरा इति
ख्याते इतिभरतः बीना इति
ख्याते इत्यच्युतः ॥
मृगादनी स्त्री इंद्रवारुणी महदे
वी मृगेर्वारु इतिराजनिर्घण्टः ।
तद्दुव्याघ्री च ॥
मृगानकः पुं चित्रव्याघ्रः इति
राजनिर्घण्टः ॥
मृगारातिः पुं कुक्कुरः इति शब्द
माला मृगशत्रुः यथा मार्गे
मार्गे मृगयति मृगारातिरामे वि
रामे शोकं प्रोक्तं गतवति म
ते लक्ष्मणे लक्ष्मणेन इतिमहा
नाटकं ॥
मृगारिः पुं सिंहः व्याघ्रः इति
मेदिनी कुक्कुरः रक्तशिग्रुः ॥
इति राजनिर्घण्टः ॥
मृगावित् पुं व्याधः इतिजटाधरः
मृगाक्षी स्त्री विशाला मृगलोच
न तत्सेन्द्रवारुणी इतिमेदिनी ।
मृगितः त्रि अन्वेषितः इत्यमरः
मृगी स्त्री मृगजाति स्त्री इतिव्या
करणं अस्या [illegible]
णाव्याः यथा मृगीणां आंगलो
म्यानां अजा क्षीर गुणं पयः

इतिभावप्रकाशः पुलहभार्य्या
सा कश्यपकन्या तस्याःअपत्यं ॥
हरिणादि यथा क्रोधायाजज्ञिरे
कन्या द्वादशात्मसम्भवाः ता
भार्य्याः पुलहस्यस्य मृगी मृग
इरावती भूताच कपिला दंष्ट्रा
कषा तिष्ठा नथैवच श्वेताचस
रमाचैव सरसा चेति विश्रुताः
मृग्यास्तु हरिणाः पुत्रामृगाश्चा
न्ये शशास्तथा न्यंकवः शरभायेच
पृषवः हषभाश्च ये इतिवन्हिपु
पुराणं [illegible]विशेषः ॥
यथा ये मृगी सा मृगीलोचना
नायिका श्रीपतेः हंसमध्या इति
छन्दोमञ्जरी अपस्माररोगः ॥
इति लोकेख्यातः ॥
मृगेन्द्रः पुं सिंहः इत्यमरः ।
मृगेन्द्रचटकः पुं श्येनपक्षी इ
ति जटाधरः ॥
मृगेन्द्राणी स्त्री वासकः इतिरा
जनिर्घण्टः ॥
मृगेर्वारुः स्त्री श्वेतेन्द्रवारुणी मे
थिनी इति हिंदीभाषा तत्पर्य्या
यः मृगाक्षी २ श्वेत पुष्पा ३
मृगादनी ४ चित्रवल्ली ५ बहुफली ६
कपिलाक्षी ७ मृगेर्वारु ८ चित्रा ९
चित्रफला १० पृष्पा ११ विचित्रा

१२ मृगचिर्भिटा १३ मरुजा १४ कु
म्भिनी १५ देवी १६ कटुफला १७
लघुचिर्भिटा १८ अस्या गुणाः
कुजरत्वं गुरुत्वं मन्दानलकारि
त्वं रक्तपित्तहारित्वंच इति
राजनिर्घण्टः ॥
मृगोष्टः पुं शुकरहस्तः इति राज
निर्घण्टः ॥
मृगोत्तमा स्त्री मृगेर्वारुः । इति
राजनिर्घण्टः मृगनयनाक्षी च
मृग्य त्रि मृगितव्यः अन्वेषणीयः
इतिव्याकरणं ॥
मृज लङ ष शुद्धौ इतिकविक
ल्पद्रुमः शुद्धिरिह शुद्धीभावः शु
द्धीकरणंच न माष्टि नीर्थादकै
र्नित्य मिति हलायुधः कु अमा
र्जीत्मसमलो मल ॥ अमार्ज्जी
न्नासियज्ञादीनिति महिः ष मृजा
इतिदुर्गादासः ॥
मृज कु ष कि शुचे शुद्धौ इति
कविकल्पद्रुमः कु अमार्जीत् अ
मार्जीत ष मृजा कि मार्जयाले
पेन द्विजान यो मार्जयति पा
त्रार्थी मिति हलायुधः इति
दुर्गादासः ॥
मृजः पुं वाद्य विशेषः मादल इति
भाषा यथा नर्दलो दारजोमृजः ।

इतिशब्दरत्नावली ॥
मृजा स्त्री मार्जनं इत्यमरः ॥
मृज्य त्रि मार्ग्य मार्जनीयं इति
मुग्धबोधव्याकरणं ॥
मृड ग श मोदे इतिकविकल्प
द्रुमः मोद इह हर्षीकरणं गम्
ज्ञाति सरस्वत्या चयः सदेति ह
लायुधः श मृडति दीनं दया
अमृडिना सहसा तिमिमहिः
मर्डिना इतिदुर्गादासः ॥
मृडः पुं शिवः इत्यमरः ॥
मृडंकणः पुं बालकः इत्युणादि
कोषः ॥
मृडा, मृडी स्त्री दुर्गा इतिहलायुधः ॥
मृडीकः पुं हरिणः इतिमृड्या
तोरीकारिकीकमप्रत्ययेन नि
ष्पन्नं ॥
मृण श हिंसे इतिकविकल्पद्रुमः
मर्णिता इतिदुर्गादासः ॥
मृणालं क्ली पुं मृणपने हिंस्यते ।
भक्तणापर्थ्यपत्र भोलाम इति
ख्यातं इतिभरतः तत्पर्य्यायः
बिसं २ इत्यमरः ॥ ष्ठीवं ३
इतिद्विरूपकोषः पद्मनालं ४ ।
मृणाली ५ मृणालिनी ६ पद्मतन्तुः ७
बिसिनी ८ नलिनीरुहं ९ अस्य



गुणाः शिशिरत्वं तिक्तत्वं कषा
यत्वं पित्त दाहमूत्रकृच्छ्रविकार
रक्त वांति हरत्वंच इति राज
निर्घंटः ॥
मृणालं क्ली वीरणमूलं इतिमेदि
नी मृणालिनी स्त्री पद्मिनी इति
जटाधरः स्यात् पद्मयुक्तदेशः पद्म
समूहः पद्मलताच ॥
मृणाली स्त्री मृणालं इति राज
निर्घंटः स्वल्पमृणाल इतिः यथा
सांद्रं चंदन मंगके वलयितः ।
पाणौ मृणालीलताः इतिराज
शेखरः इत्यमरटीकायांभरतः ।
मृणाली पुं पद्मः इतिकेचित ।
मृत स्त्री मृत्तिका इत्यमरः तव
री इतिराजनिर्घंटः मृत्तिका
शौचं यथा दिवा संध्यासुकर्ण
स्थ ब्रह्मसूत्र उदङ्मुखः कुर्यान्मू
त्र पुरीषे तु रात्रौ वै दक्षिणामुखः
गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युः ।
द्धृतै जलैः गंधलेपक्षयकरं ।
शौचं कुर्यान्महाव्रताः इति गा
रुडे १९४ अध्यायः ॥
मृतं क्ली याचितं इत्यमरः ॥ या
चनवृत्ति मरणमिव दुःखजनकत्वा
न्मृतं भावे कर्मणि वा क्तः इति
भरतः मृत्युः इति हेमचंद्रः ॥

मृतं त्रि याचितवस्तु गतप्राणः
मरा इति भाषा तत्पर्यायः १
परासुः २ प्राप्तपंचत्वः ३ परेतः
४ प्रेतः ५ संस्थितः ६ प्रमीतः ७
इत्यमरः कलौ मृतस्य धन्यत्वं
यथा धर्मः प्रव्रजितस्तपः प्रव
सितं सत्यंच हरंगतं दृष्टो मंदा
फला जनाः कपटिनो लोभस्थिा
ता ब्राह्मणाः मर्त्याः स्त्री वशगाः
स्त्रियश्च चपला नीचा जनाउन्न
ताहा कष्टं खलुजीवितंकलियुगे
धन्या नराये मृताः इतिगारुडे ।
११५ अध्यायः ॥
मृतकं क्ली शवः इतिहेमचंद्रः
मरणाशौचं यथा यदि स्यात् ।
सूतके सूतिर्मृतके च मृतिस्तथा
शेषेणैव भवेच्छुद्धि रहः शेषे ।
द्विरात्रकं इति शुद्धितत्वं ॥
मृतकल्पः त्रि मृतप्रायः ईषदूनो
मृतः इतिमृतशब्दादीषदूनार्थे ।
कल्पप्रत्ययेन निष्पन्नं ॥
मृतकांतकः पुं शृगालः इति
हारावली ॥
मृतजीवः पुं तिलकवृक्षः इ
ति राजनिर्घंटः ॥
मृतंडः पुं सूर्यपिता इतिमार्क
ण्डेयपुराणटीकायां भरतः ॥

मृतमनाः पुं शृगालः इतित्रिकांड
शेषः ॥
मृतमत्तकः पुं शृगालः इतिशब्द
रत्नावली ॥
मृतवत्सा स्त्री मृतापत्या स्त्री
वत्संताना अस्या दोष शांति
र्यथा सप्तमी स्नपनं वक्ष्ये सर्व
लोक हितायवै जातस्य मृत
वत्सायाः सप्तमे मासि नारद
अथवा शुक्ल सप्तम्यामेतत्कार्यंच
शोभने ग्रह नारा बलं लब्धा
कृत्वा वा विप्रवाचनं बालस्य जन्म
नक्षत्र तिथि देवान् यजेद्बुधः ।
तदद्व्रताणांतकृत्य स्थापित रे
खुच गोमयेनानुलिप्तायां भूमा
वेकाभिवर्त्तना तंडुले रक्त
शालीये स्थन गौरीर संयुते ।
निर्वपेत् स्वर्णे रुद्राभ्यां तन्मंत्रो
क्ता विधानतः कौवेर्यत्वत्ये ।
वत्ते समर्चेच्चकुमाङ्गलीः श्रद्धया
इदमुत्केन तद्दुद्राय नारद हो
तव्याः समिधस्तदृत्वार्क पला
शयोः यवकृष्णतिलै होमः क
र्त्तव्यो ऽष्टशतं पुनः ब्राह्मनिभि
रघोरेण तथैवाष्टशतं द्विज ।
कृत्वा स्नानेचकर्तव्यमंगलेनवधी
मता विशेषा वेदविद्या विविध

दर्भ पाणिना स्थापयित्वा तु चतुरः
कुम्भान् कोणेषु शोभनान् पंच
मंच पुनर्मध्ये दध्यक्षत विभूषिते
स्थापयेदव्रणं कुम्भं सप्तम्भनाभिमं
त्रितं सौरेण तीर्थतोयेन पंच
रत्न समन्वितं सर्वान् सर्वौषधैः ।
युक्तान् पंचगव्य समन्वितान् । पं
चरत्नफलै युक्तान्वासोभिरभिवे
ष्टयेत् गजाश्वरथ्या वल्मीकस्मं ।
गमात् कृदगोकुलात् राजद्वारप्र
देशाश्च मृदमानीय निःक्षिपेत् ।
चतुर्ष्वपि च कुम्भेषु रत्नगर्भेषुमध्य
मं गृहीत्वा ब्राह्मणास्तेतसौवाम्भज्ञान
दीरयेत् समभिषिंचि नारीभि र
तांगाभि रथापलं । पूजिताभि
र्यथा शक्त्या मात्सवस्त्रविभूषणैः
स विप्राभिषेक कर्तव्यं मृतवत्सा
भिषेचनं दीर्घायुरस्तुबालो ऽयं
जीवपुत्रा च भाविनी आदित्य
श्चंद्रमाः सार्द्धं ग्रहनक्षत्र मंडलैः
शक्रः सलोकपालोवै ब्रह्मविष्णु
महेश्वराः एते चान्येच देवौघाः
सदा पांतु कुमारकं मित्रोऽग्निः
भीजन भुक्त्वा च बालग्रहाः क
चित् पीडांकुर्वंतु बालस्य मामा
तुर्जनकस्य वै ततः शुक्लाम्बरधरा
कुमारी पतिसंयुता ॥ सूतकं ।

पूजयेद्भक्त्या स्त्रीणां मधुपर्कं पुनः
कांचनीं च ततः कृत्वा तिलपात्रो
परिस्थितां प्रतिमां कूर्मराजस्य।
गुरवे विनिवेदयेत् वस्त्रकांचन
रत्नौघैश्च भक्ष्यैः सह्लन पायसैः।
पूजयेद्ब्राह्मणान् तद्वद्वित्तशाठ्य वि
वर्जितः भुक्त्वा च गुरुणा चैव मु
श्राव्या मंत्र संततिः दीर्घायुरस्त्व
वालोऽयं यावद्वर्षं शतंसमं। यत्
किंचिदस्य दुरितं तत्क्षिप्तं वड
वानले ब्रह्मा रुद्रो वसुः स्कंदो।
विष्णुः शक्रो हुताशनः रक्षंतु स
र्वदुष्टेभ्यो वरदाः संतु सर्वदा।
एवमादीनि वाक्यानि वदंतः पूज
येद्गुरुं शक्तितः कपिलां द
द्यात् प्रणिपत्य विसर्जयेत् गु
रुं च पुत्रसहितां प्रणम्य रविशंक
रौ कृतशेषं तदाश्रीयादादि॥
त्याय नमोऽस्त्वेतत् इदमेवाद्भुतो
ह्यत दुःख शमेषु शास्यते के
ह्नजन्मदिनादीनां देवानां पूज
येत्सदा प्रांतर्वर्षमुक्तं सम्यक्
मेतत् कुर्वन् सीदति स वा ने नः
विधानेन दीर्घायुरभवत्ततः - स
वत्सरात्तमतुलं प्रशाम्य हृषितो
मिमां इति मात्स्ये ६४ अ
ध्यायः ॥

मृतसंजीवनी स्त्री गोरक्षदुग्धा इ
तिराजनिर्घंटः मृतजीवनार्थिका वि
द्या यथा अथ मृतसंजिवनीविद्या
आदौ प्रासाद बीजं तदनु ॥
मृतिहरं तारकं व्याहृतीश्च प्रो
च्चार्य त्र्यम्बकं योजयित्वा सततं
संपुटं चानुलोमं मृतिहरं अप
र मृत्युंजय मंत्रं संपुटितमि
ति अनुलोम क्रमेणैव संपुट
मित्यर्थः तेन हौं ततः प्रणवः
ततो जूं सः ततः सप्रणव व्याहृ
तिः मध्ये त्र्यम्बकमंत्रः । ततो
ह्रौं प्रणवः जूं सः ततः सप्रणव
व्याहृतिः अस्य जपात् सर्वसिद्धि
र्भवति ॥ अथ शुक्रोपासिता मृ
तसंजीवनी विद्या गायत्र्याएकैक
पादानंतरं त्र्यम्बकमंत्रस्य एकैक
पादं च ततश्च गायत्र्याः प्रथम
पादानंतरं सुगंधिं पुष्टिवर्द्धनं ।
द्वितीय पादानंतरं उर्वारुकमिव बं
धनात् तृतीयपादानंतरं मृत्योर्मु
क्षीय माऽमृतात् अस्य ध्यानं ॥
हस्तांबुजयुगादविरस्थितमुभयकेसं
स्थितौ पूर्णकुंभौ द्वाभ्यां मेनावमा
ले जिनकरकमले द्वौ वधौ नित्य
पूर्णौ द्वाभ्यां दौ च स्रवंतौ शिरसि
शशिकलां चामृतैः प्लाव ॥

यंतं देहं देवो दयालुः प्रदिशतु।
विशदा कल्पजालः श्रियं वः
एवं ध्यात्वा वाच्य प्रणवादि त्र्यम्ब
काय रुद्राय नमः इत्यनेन पूज
येत् अस्य जपात् सर्वसिद्धिः॥
इत्यागमतत्त्वविलासः ॥
मृतस्नानः त्रि मृतोद्देशेन स्नानः
तत्पर्य्यायः अपस्नानः २ इत्य
मरः मृतमुद्दिश्य स्नानस्नाने जने
संस्कारार्थं स्नापिते मृते । इति
स्वामी इति तट्टीकायां भरतः।
मृतस्नानं क्ली मृतोद्देशेन स्नानं।
तत्पर्य्यायः अपस्नानं २ इति
हेमचंद्रः ॥
मृतस्वामोक्ता पुं राजर्षिः इति हे
मचंद्रः ॥
मृतामदं क्ली तुत्थं। इति शब्द
चंद्रिका ॥
मृतालकं क्ली आढकी इत्यमरः
मृतिः स्त्री मरणं इतिहेमचंद्रः
मृत् स्त्री मृत्तिका इत्यमरः तुवरी
इति राजनिर्घंटः ॥
मृत्करः पुं कुंभकारः इति त्रि
कांडशेषः ॥
मृत्कांस्यं क्ली शरावः इति त्रि
कांडशेषः ॥
मृत्किरा स्त्री कुकुंदी कुकुरिया इ
ति

भाषा इतित्रिकांडशेषः ॥
मृत्वलिनी स्त्री चर्मकषा इत्यतः इति
शब्दचंद्रिका ॥
मृत्तालं क्ली आढकी इतिशब्द
रत्नावली ॥
मृत्तालकं क्ली तुवरिका तुवरिक
लाय इति अड़र इतिच ख्यातं।
इत्यमरटीकायां भरतः सौरा
ष्ट्रमृत्तिका इतिराजनिर्घंटः ॥
मृत्तिका स्त्री तुवरी इति राज
निर्घंटः मृत् माटी इति भाषा
इत्यमरः तत्पर्य्यायः । मृदा २
मृत्तिः ३ इतिभरतः स्नानकाले
मृत्तिकालेपन विधिर्यथा। मृदा
प्रक्षाल्य लिंगं तु द्वाभ्यां नाभे
स्तथोपरि अधश्च तिसृभिः काय
षड्भिः पादौ तथैव च कविंचति
सप्तभिस्त्वापि हस्तयोर्द्विश्च मृत्तिकाः
प्रक्षालयकाय हस्तौ च द्विराच
म्य यथा विधि ततः संमार्जनं
कृत्वा मृदमेवाभिमंत्रयेत् अश्व
क्रांते रथक्रांते विष्णुक्रांते वसुंधरे
उद्धृतासि वराहेण कृष्णेनासि
शतबाहुना मृत्तिके हर मे पापं
यन्मया पूर्वसंचितं मृत्तिके ब्रह्म
दत्तासि प्रजयाच अनेनच मृत्ति
केनांच गृह्णामिकाश्यपेनाभि।

मंत्रितां मृत्तिकेजहि मे पापं
यन्मया दुष्कृतं कृतं त्वयाहृतेन
पापेन ब्रह्मलोकं ब्रजाम्यहं।
इति वह्निपुराणे ॥ शौचार्थ
मृत्तिका ग्रहण विधि यथाऽऽह
न्यमृत्तिकां कूलात् गंधापकर्ष
णं कुर्यादतन्द्रितः शौचं विशुद्धैरु
द्धृतोदकैः नाहरेत् मृत्तिकां
विप्रः पांशुलाच्च कर्दमात् नमा
र्गान्नोषराद्देशाच्छौच शिष्टां पर
स्यच नदेवायतनात् कूपात् गेहा
न्नच जलात्तथा उपस्पृशेत्ततोनि
त्यं पूर्वोक्तेन विधानतः इति
कौर्मे उपरिभागे १२ अध्यायः
तस्यपरीत्ता मंदिरयाहे दृष्टव्या
मृत्फली स्त्री कुष्ठौषधं इतिहारा
वली ॥
मृत्युः पुं यमः इति हेमचंद्रः
कंसः यथा प्रत्यर्प्य मृत्यवे पु
त्रान्मोचये कृपणामिमां। सुता
मे यदि जायेरन् मृत्युर्वा न म्रियेत
तवेत् इति श्रीभागवते १० स्कं
धे १ अध्यायः ॥
मृत्युः त्रि प्राणवियोगः तत्पर्
यायः पंचता २ कालधर्मः ३ दि
ष्टांतः ४ प्रलयः ५ अत्ययः ६ अंतः
७ नाशः ८ मरणं ९ निधनः १०
इत्यमरः पंचत्वं ११ मृतं १२
मृतिः १३ इति तट्टीकायां रमा
नाथः मृत्युः १४ नैधनं १५ इति
तट्टीका सारसुंदरी संस्था १६
कालः १७ परलोकगमः १८ दीर्घ
निद्रा १९ निमीलनं २० अस्तं २१
अवसानं २२ इति हेमचंद्रः।
भूमिलाभः २३ निपातः २४ निलयः
२५ आत्ययिकं २६ इति शब्दरत्ना
वली सत्तुब्रह्मणो गृहतो जातः
यथा पाद यमस्य मित्रस्य परि
मोचस्य नारद हिंसाया निर्ऋते
मृत्यो निरयस्य गृहं स्मृतं ॥ इति
श्रीभागवते २ स्कंधे ५ अध्यायः
कल्पान्तरे भयात् मायाये जातः
यथा हिंसा भार्य्या त्वधर्मस्य तयो
र्जज्ञे तथानृतं। कन्याचनिर्ऋति
स्ताभ्यां भयं नरक मेवच। माया
च वेदनाचैव मिथुनं त्विदमेतयोः
भयाज्जज्ञेऽथ वै माया मृत्युं।
भूतापहारिणं वेदनाच सुतंचा
पि दुःखं जज्ञेऽथ रौरवात् ॥
अस्यान्तपादि यथा मृत्योर्व्याधिर्ज
रा शोक तृष्णा क्रोधाश्च जज्ञिरे।
दुःखोत्तराः स्मृता ह्येते सर्वे चा
धर्म लक्षणाः तेषां भार्य्यास्ति पु
त्रो वा सर्वेते ह्यूर्द्ध रेतसः ॥

निर्ऋतिश्च तथा चान्यामृत्योर्भार्य्या
भवत् सुते अलक्ष्मी नाम तस्यां च
मृत्योः पुत्रा श्चतुर्दश। अलक्ष्मी
सुचका ह्येते मृत्यो रादेशकारि
णः विनाश कालेच तरान् भजं
त्येते शृणुष्व तान् इंद्रियेषु दश
स्वेते तथा मनसिच स्थिताः। स्व
स्व नरं स्त्रियं वापि विषये योज
यंतिच तथेन्द्रियाणि चाक्रम्य राग
लोभादिभिर्नरान्। योजयंति त
था हानिं यांति धर्मादिभि र्द्विज
अहंकार गतास्त्वान्ये तथान्ये बुद्धि
संस्थिता विनाशाय नर स्त्रीणां
यतंते मोह संश्रयाः एवं तव
मेणोन्यमाः सर्वे चापि भयंकराः
इति मार्कंडपुराणे दुःसहानु।
शासनं नामाध्यायः विष्णुपुराणे
प्रथमेंशे सप्तमोध्यायश्च ॥
मृत्यु ज्ञापकारिष्टानि यथा दत्ता
त्रेय उवाच अरिष्टानि महाराजश्च
णु वक्ष्यामि तानि ते येषा मा
लोकनान्मृत्युं निजं जानाति यो
गवित् देवमार्गं ध्रुवं शुक्रं सोम
च्छाया मरुन्धती यो न पश्यत्त जी
वेत् सनरः संवत्सरान्परं ॥ अ
रश्मिबिंबं सूर्य्यस्य वह्निं चैवांशुमा
लिनं दृष्ट्वैकादश मासेभ्यो नरो
नोर्द्धं स जीवति वान्तं मूत्रे
पुरीषे वा सुवर्णं रजतं तथा प्र
त्यत्त मथवा स्वप्ने जीवितं दशमा
सिकं दृष्ट्वा प्रेत पिशाचादीन् ग
धर्व नगराणिच। सुवर्ण वर्णान्
वृक्षांश्च नवमासान्सजीवति स्थू
लः कृशः कृशः स्थूलो योऽकस्मा
देव जायते प्रकृतेश्च निवर्त्तेत।
तस्यायु श्चाष्ट मासिकं खंडं यस्य
पदं पार्ष्ण्योः पादस्याग्रे ऽथवा।
भवेत् पांशु कर्दमयो र्मध्येसप्त
मासान् स जीवति कपोत गृध्र
काकोला वायसो वापि मूर्द्धनि।
क्रव्यादोवा खगो लीनः षण्मासा
युः प्रदर्शकः हन्यते काकपंक्ती
भिः पांशु वर्षेणवापुनः स्वच्छा
यां चान्यथा दृष्ट्वा पंचमासान्सजी
वति अनभ्रे विद्युतं दृष्ट्वा दक्षिणां
दिशमाश्रितां पयसीन्द्रधनुर्वापि जी
वितं द्वित्रिमासिकं घृते तैले।
तथादर्शे तोये वा चात्मनः स्तनुं।
यः पश्यदशिरस्कां वा मासार्द्धं
न जीवति यस्यवस्त समो गंधो
गात्रे शव समोपिवा तस्यार्द्धमा
सिकं ज्ञेयं योगिनोन्द्यजीवितं।
यस्यवै स्नात मात्रस्य हृत्पादमथ
शुष्यति पिवतश्च जलं शोषो।

दशाहं सोपि जीवति स्तंभितो
मारुतो यस्य मर्मस्थानानि कृंतति
न कृच्छ्रस्य तु संस्पर्शात्तस्य मृत्यु रु
पस्थितः ऋक्ष वानर युग्मस्था गा
यन् यो दक्षिणां दिशं स्वप्ने प्र
याति तस्यापि न मृत्युः कालमृ
च्छति रक्तकृष्णाम्बरधरा गायंती हृ
सती च यं दक्षिणाशां नयेन्नारी स्वप्ने
सोपि न जीवति ॥ नग्नं क्षपणकं
स्वप्ने हसमानं महाबलं एवं वा
वीक्ष्य वल्गंतं विद्यान्मृत्युमुपस्थितं
आमस्तक तलाग्रस्तु निमग्नं पंके
सागरे स्वप्ने पश्येत्तथात्मानं नरः
सद्यो म्रियेत सः ॥ केशांगारां ।
स्तथा भस्म भुजगं निर्जलां मही
दृष्ट्वा स्वप्ने दशाहेन मृत्युरेकादशे
हनि करालैर्विकटैः कृष्णैः पुरु
षैरुद्यतायुधैः पाषाणैस्ताडितः ।
स्वप्ने सद्यो मृत्युं समाश्रयात् ।
सूर्योदये यस्य शिवा क्रोशंती या
ति सन्मुखं विपरीतं परीतं वा
स सद्यो मृत्युमृच्छति यस्य वै
भुक्तमात्रेपि हृदयं पीड्यते क्षुधा
जायते दंतसंघर्षः स गतायु र
संशयं दीपादि गंधं नो वेत्ति
वमत्यग्निं तथा निशि नात्मानं पर
नेत्रस्थं वीक्षते न स जीवति षा

कायुधं चार्द्धरात्रे दिवा ग्रहगणं तथा
दृष्ट्वा मन्येत संक्षीण मात्मजीवित
मात्मवान् नासिका वक्रता मेति
कर्णयोर्नम्रतोन्नती नेत्रं च वामं
स्रवति यस्य तस्यायुरुद्गतं आर
क्तता मेति शुक्लं जिह्वा चापि सिता
तथा नरः प्राज्ञो विजानीयान्मृत्यु
मासन्नमात्मनः उष्ट्र रासभ यानेन
यः स्वप्ने दक्षिणां दिशं प्रयाति तं
विजानीयात् सद्यो मृत्युं नरेश्वर ।
पिधाय कर्णौ निर्घोषं न शृणोत्या
त्म संभवं नश्यते चक्षुषो ज्योति
र्यस्य सोपि न जीवति ॥ पततो ।
यस्य वै गर्त्ते स्वप्ने द्वारं पिधीयते ।
न चोत्तिष्ठति यः श्वभ्रांतदंतं तस्य
जीवितं ऊर्ध्वा च दृष्टिर्नैव संप्र
तिष्ठा रक्ता पुनः संपरिवर्त्तमाना ।
मुखस्य चोष्मा शिशिरा च नाभिः
शंसंति पुंसामपरं शरीरं स्वप्ने
ऽग्निं प्रविश्य तत्र न च निष्क्रमते न
रः जलप्रवेशादपि वा तदंतं तस्य
जीवितं यश्चाभिहन्यते दुष्टै
र्भूतै रात्रावथो दिवा स मृत्युं स
प्तरात्रांतात् प्राप्नोत्यात्मसंशयं ।
स्ववस्त्रममलं शुक्लं रक्तं पश्य
त्यथो ऽसितं यः पुमान्मृत्युमापन्नं
तस्यापि हि विनिर्दिशेत् ॥

स्वभाव वैपरीत्यं तु प्रकृतेश्च विप
र्ययः कथयंति मनुष्याणां समासन्नौ
यमांतकौ । येषां विनीतः सततं
यस्य पूज्यतमा मताः तानेव चाव
जानाति तानेव च विनिंदति दे
वतानार्चयेत् वृद्धान् गुरून् विप्रांश्च
निंदति माता पित्रो रसत्कारं ।
जामातृणां करोति यः । योगिनां
ज्ञानविदुषा मन्येषां च महात्मनां
प्राप्ते तु कालः पुरुषस्तद्विज्ञेयं वि
चक्षणैः योगिना सततं यत्नाद
रिष्टान्यवनीपते संवत्सरांत स्व
प्नेन फलदानि दिवानिशं ॥ वि
लोक्यानि सदा चैव फलपंक्तिषु भी
षणा इति मार्कंडेयपुराणे मृत्यु
कालोपाख्यानं ॥ कर्मविपाकान्मृत्यु
विशेषा यथा येनाकृतानि । नो
क्तानि प्रीतिभेदः कृतो नव स्था
सिकः श्रद्दधानश्च स सर्वं मृत्यु
मृच्छति आगारदाहिनो दाहं स्व
यं च्यान नरोपिनः प्राप्नुवंति नराः
काले तस्मिन्नन्यापयुपस्थिते देव
ब्राह्मण पूजायां ये रतास्त्वानसूय
वः क्षमावदान्या श्रीमंतस्ते नराः स
त्वमृत्यवः योन कामान्न संरंभान्न द्वेषा
त् धर्ममुत्सृजेत् ॥ यथोक्तचारी
सौम्यश्च सुखं मृत्युमृच्छति शी

तं जयंतीन्यनरा स्तापं चोदकराशि
नः प्राणजीविनां कष्टं ये चान्ये
द्वेषकारिणः मोहात्तान प्रवा
नाः प्राप्नुवंति महत्तमां कूटसा
क्षी मृषावादी यश्चासत्यानुशासितैः
ते मोहमृत्यवः सर्वे तथान्ये वेद
निंदकाः इति मार्कंडेयपुराणे पि
ता पुत्रसंवादः ॥ मृत्युकाला ।
कर्त्तव्य तद्वज्जनस्य प्रायश्चित्तं य
थाविधेपि तद्वज्जंतूनां हिंसकानां च
पंडितः कार्षापणं समुत्सृज्य मृ
त्युकाल प्रमुच्यते ॥ अहिंसका
नां तद्वाणां वधे पातकं एवं
प्रायश्चित्तं मृत्युकालकथितं यम
योनिना इति ब्रह्मवैवर्ते श्रीकृष्ण
जन्मखंडे १ अध्यायः ॥ मृत्यु
समये गंगागमन माहात्म्यं यथा
अहो सगरवंशेभ्यो निर्वाणमुक्ति
दायिनी वैकुंठगामिनो मार्गं सो
पान रूपिणी वरा ॥ अतोपि मृत्यु
समये सतां पुण्यस्वरूपिणां ॥ आ
दौ पादौ च विन्यस्य श्रद्धे तोयं
प्रदीयते गंगा सोपान मारुह्य
सतो याति ममालयं इति तत्रैव ।
२४ अध्यायः ॥ जन्मवतां मृ
त्यो रपरिहार्यत्वं यथा मृत्युर्जन्म
वतां वीर देहेन सह जायते ।

अथवाब्द शतान्ते वा मृत्युर्वै प्रा
णिनां ध्रुवः ॥ इति श्रीभागवते १०।
स्कंधे १ अध्यायः ॥ अपि च जातस्य
हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितु
मर्हसि ॥ इति श्रीभगवद्गीता
। अकालमृत्युप्रशमनं स्तोत्रं
यथा सूत उवाच स्तोत्रं तत् सं
प्रवक्ष्यामि मार्कण्डेयेन भाषितं
नारायणं सहस्राक्षं पद्मनाभं पुरा
तनं प्रणतोऽस्मि हृषीकेश किं
मे मृत्युः करिष्यति १ गोविन्दं पु
ण्डरीकाक्ष मनन्त मज मव्ययं
केशवं च प्रपन्नोऽस्मि किं मे मृत्युः
करिष्यति २ वासुदेवं जगद्यो
निं भानुमन्त मतीन्द्रियं दामोदरं
प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति
३ शंखचक्रधरं देवं छन्नरूपिण
मव्ययं अधोक्षजं प्रपन्नोऽस्मि ।
किं मे मृत्युः करिष्यति ४ वारा
हं वामनं विष्णुं नारसिंहं जना
र्दनं माधवं च प्रपन्नोऽस्मि किं मे ।
मृत्युः करिष्यति ५ पुरुषं पुष्करं पु
ण्यं क्षेत्र बीजं जगत्पतिं लो
कनाथं प्रपन्नोऽस्मि किं मे मृत्युः क
रिष्यति ६ सहस्रशीर्षं देवेशं व्य
क्ताव्यक्तं सनातनं महायोग ॥
प्रपन्नोऽस्मि किं नो मृत्युः करिष्यति
७ भूतात्मानं महात्मानं यज्ञ
योनि मयोनिजं विश्वरूपं प्रप
न्नोऽस्मि किं मे मृत्युः करिष्यति
। ८ । इत्युदीरित माकर्ण्य स्तोत्रं
तस्य महात्मनः अपयात स्ततो
मृत्यु र्विष्णुदूतैः प्रपीडितः इति
तेन जितो मृत्यु र्मार्कण्डेयेन धीम
ता प्रसन्ने पुण्डरीकाक्षे नृसिंहे ना
स्ति दुर्लभं ॥ मृत्यष्टकमिदं पुण्यं
मृत्युप्रशमनं शुभं मार्कण्डेय हि
तार्थाय स्वयं विष्णुरुवाच य इदं
पठति स्तोत्रं त्रिकालं नियतः शु
चिः नाकाले तस्य मृत्युः स्यान्नर
स्याच्युतचेतसः हृत्पद्म मध्ये
पुरुषं पुराणं नारायणं शाश्वत मा
दिदेवं विचिन्त्य सूर्यादतिराज मा
नं मृत्युं स योगी जितवां स्तदैव ।
इति गारुडे २३८ अध्यायः ॥
शुभकर्मप्रतिबंधक मृत्युदायोगा
यथा आदित्यभौमयो र्नन्दा भद्रा
शुक्र शशांकयोः बुधे जया गुरौ
रिक्ता शनौ पूर्णा च मृत्युदा अपि
च रव्यादि दिवसे शुक्रा विशाखा
दि चतुष्कतः अनुराधा मृत्यवः काल
अमृतानि यथा क्रमात् इति ज्योति
स्तत्त्व ॥

मृत्युंजयः पुं शिवः ॥ इत्यमरः
तन्नाम कारणं यथा स्कन्दउवाच
शिवो लीनो निर्गुणो ह्यन्ते श्रीकल्पे
प्राकृते लये । कथं तव गुरो
नाम मृत्युंजय इति स्मृतौ । सन्त
पाउवाच ब्रह्मणोऽन्ते मृत्युकन्या प्र
णष्टा जले विड्वत् संहर्त्री स
र्वलोकानां ब्रह्मादीनां तथापि प्र
कृतिस्था मृत्युकन्यानां ब्रह्मणां
कोटिशो लये कालेन लीनः
शंभुश्च सत्वरूपीव निर्गुणः । मृ
त्युकन्या जिता शश्वत् शिवेन गु
रुणा मम तन्मृत्युना जितः शंभुः
कल्पे कल्पे कृतो कृतं इति ब्रह्म
वैवर्ते प्रकृतिखंडे ५५ अध्यायः
रोगशान्त्यर्थं तस्य पूजा विधि
र्यथा मृत्युंजयं समापूज्य लिंगं
त्रिभुवनेश्वरं ॥ रोगात्तो
मुच्यते रोगाद्बद्धो मुच्येत बंध
नात् यस्तु संपूजयेद्भक्त्या लिंगं मृ
त्युंजयाभिधं यमोऽपि प्रणमे ।
द्भक्त्या किं करिष्यन्ति चामयः ।
तस्य पूजा विधिं वक्ष्ये शृणुष्व मत्
प्राणवल्लभे जातिभेदे मृत्तिका
तु गृहीत्वा शीति तोलकं । नि
र्माय पार्थिवं लिंगं कांस्यपात्रेति
वेशयेत् पौराणिकेन मंत्रेण ।
ऊर्ध्वाच्च गहनं बुधः स्थापयेत्तच्च
गन्धेन प्रत्येकस्याष्ट तोलकं ।
स्व स्व मंत्रैश्च प्रत्येक द्रव्येणास्थाप
येत् सुधीः रोग क्षय कामनया
नाम गोत्रादि पूर्वकं । उपविश्या
सने विप्रश्चात्र धौते च वाससी ॥
रुद्राक्ष माला कण्ठे तु धृत्वा भस्म
त्रिपुण्ड्रकं उपचारं षोडशकं ॥
देयं भक्त्या प्रयत्नतः स्वर्णस्या ।
स्वर्णं देयं तथावा भूषणानि वस्त्र
युग्म प्रदद्याच्च परिधेयं यथा भ
वेत् मधुपर्कं कांस्य पात्रे द
द्यात् भोजन योग्यकं । बिल्वपत्रं स
हस्रं च अभग्नं विनिवेदयेत् । एवं
संपूज्य लिंगं के जपेन्मंत्रं हि स
हस्रकं ततो होमं प्रकुर्याच्च द
क्षिणां शास्त्रचोदितां स्वर्णं वा
तदर्द्धं वा देविविभवसान्ततः श्रु
गहीना न कर्त्तव्या पूजा वा फलदाय
नः एकलिंगे समाराध्य फलं स्याद
न्यके युगे तत्फलं लभते देवि ।
कलौ संख्या चतुर्गुणा तस्मात्
त्व संस्थाप्य अशीति तोलकं जलं
तज्जलेनैव देवेशि कृपोः संमार्ज्य
रोगिणं तिपदीप शिवाया च
मंत्र मुच्चार्य मामकं एवं वि
धि विधानेन पूजयन्मम लिंगकं ।

याहृग्याहृग्भवेद्रोगो नाशमेति म
योदितः सांगेन पूजयित्वाच ल
भते वांछितं फलं ॥ श्रंग बा
तिक्रमेणैव हृष्या भवति वासना
रोगी प्रमुच्यते सद्यो भीगीव।
कंचुकोज्जितः ॥ यदि मद्वचनेभ
क्ति स्तदाशुको भवेन्नरः इति
मृत्युंजयतंत्रं ॥
मृत्युनाशकः पुं पारदः इति
इति राजनिर्घंटः मरणाहारके त्रि
मृत्युपुष्पः पुं इक्षुः इति रत्न
माला ॥
मृत्युफलः पुं महाकालफलं इति
मेदिनी ॥
मृत्युफला स्त्री कदली इतिमेदि
नी मृत्युभंगुरकः पुं मरणकालवाद
नीयपटहः यथा भवकृत्स्नेतपट
हो मृत्युभंगुरकस्मृतः इति त्रि
कांडशेषः ॥
मृत्युभृत्यः पुं रोगः इति राज
निर्घंटः ॥
मृत्युवंचनः पुं शिवः बिल्ववृक्षः
द्रोणकाकः इति मेदिनी ॥
मृत्युबीजः पुं वंशः इतित्रिकांड
शेषः ॥
मृत्युसूतिः स्त्री कर्कटी मृत्युरेव
सूतिः प्रसवो यस्याः सा यथायथा
कर्कटकी गर्भमाधत्ते मृत्युमात्म
नः इतिमहाभारते विराट्पर्व ॥
मृत्सा स्त्री प्रशस्तमृत्तिका इत्य
मरः ॥
मृत्स्ना स्त्री प्रशस्त मृत्तिका काशी
इत्यमरः ॥
मृत्स्नाभांडकः पुं भांडविशेषः ।
तत्पर्य्यायः शुक्तिका २ इति त्रि
कांडशेषः ॥
मृद ग क्षोदि इतिकविकल्पद्रुमः
ग मृद्नाति ममर्द क्षोदि चूर्णी कर
णे इतिदुर्गादासः ॥
मृद् स्त्री मृत मृत्तिका इत्यमरः
मृदंकुरः पुं हारीतपक्षी इति
हेमचंद्रः ॥
मृदंगः पुं स्वनामख्यातवाद्यं तत
पर्य्यायः मुरजः २ । इत्यमरः
पटहः । घोषः इतिमेदिनी।
वंशः इति शब्दमाला ॥
अथ मृदंगादि विवरणं मर्दलः
खोदिरः श्रेष्ठो हीनः स्यादन्य दा
रुजः रक्तचंदनजो वाद्यो गभीर।
ध्वनि रुच्चकैः सार्द्ध हस्त प्रमा
णोत्र दैर्घ्यमस्य विधीयते त्रयोद
शांगुलं वाम मथवा द्वादशांगुलं
तुरितोभव भवेत्तेन मेकेनहीनगु
लेनवा करणा नद्ध वदनो मध्ये
श्चैवपृथु र्भवेत् षण्मासीयो भ
वेद्धस्त स्तच्चर्म करणं मतं मृत्ति
का निर्मितश्चैवमृदंगः परिकीर्त्ति
तः पातयेत् खरलिंबाद्य वादना
र्थंच मर्दले बिभृति गैरिकं भक्तं
केंडुकेनच संयुतं यद्वा विपीट
कं देयं जीवनी सत्व मिश्रितं सर्व
मेकत्र पिष्ठतद्वेपः खरलिरुच्यते
वामास्य पूरिका कृत्वा लेपं
दद्याद्य दक्षिणे एवं मर्दलकः
प्रोक्तः सर्व वाद्योत्तमोमतः ॥
अस्यसंयोगमासाद्य सर्व वाद्यं
च शोभते पतरंगे वीजकाष्टे।
दल मह्लंगुलं विदुः ॥ तथि
योने मिति तेयाः पाठवर्णा मृ
दंगजा थों दं ढें थिकट कद्दी
ताकं दं दं थोगं थिथि खर्फकिं
नं गद दंथाकट पाटाश्रुता श्रमी
तथिं थों ढें-तकृथी दों दं दं
थिगणां ततं तथि तकृतंथं थि
दों ताथिपाठखंडे तथं क्रमः।
तथाच यतिमाने पाठखंडः इग
तथेग्गां इगतथेज्ञां थो थो थिक
ता थिका थोजां थोजां तक तता
थिका थोता इग तता थिथिथिथि
कड्डताकड ताथेथिक थोजो यो
ताड्डग ततागगत ताडगत ताथि
इति यतिमाने पाठखंडः ॥
यदि रोढोप्यवच्छेदो गजरो रू
पकं ध्रुवं गलपः सारिगोणी च
नादस्य कथितं तथा प्रहरणं ह
स्तेनेव प्रवेया हादशास्मृताः यथा
दं थात इत्येक तालप्रयतिः ॥
डाढवाद्यं यथा दों तथो तत्तिका
तथिक दं थादं था थोथि थोथि
तत तत्तथ विथ विदिश्या दिश्या
टट् तक्ति टट् तक्ति तदट टऊतदट
ऊखेवटऊ खेवटऊ तगि तगि तथि
तगि दों दों दं दं हीं हीं दं ता
तथा इत्याढवाद्यं ॥ अवच्छेद
वाद्यं यथा दं थातः दं थातः
थिक्कि थिक्कि दिगणं दं थातः इ
त्यवच्छेदवाद्यं ॥ गजर वाद्यं।
यथा थोक देञ तेञ ढें ड्रें
गथो गथोंक टेक थोगतक्ति थिक
तक्ति थिक टेकत थिथिकटतक
थोक तथिकट तक्कूकतथोगतड्डी
इत्येकतालो गजरः ॥
रूपकवाद्यं यथा तकथिक तक
थिक्का थविततक्ति थविततक्ति थिक्का
दंथातः इति रूपकवाद्यं ॥
ध्रुवक वाद्यं यथा तक्कु तक्कुटथि
कुथिकट इति निसारताले ध्रुवकः
गलपो यथा तथिद्दि थिका

तक तथि गलकं था थाद्देंतथा
ढेमत इत्येकताल्या गलपः
सारिगोगाी यथा । थोंग
टेम तक्कथिक्क तकथिकतक
थोद्दटंगन द्दटंग थोगक्थोः इति
प्रथमखंडः टेम थोः थि खोद्दः
टेम टेम्र दक्क तगद्क्का थिक्कन
दि द्दक्करे गरे गखोगखोकतक्त
कथिक तथिक्त थोढमथोटेमपटे
गल खोगगल खोग खोद्दट गों
टेंग खोद्दटम इत्यस्य छंदनं ॥
इति सारीगाणी ॥ नादो यथा
दांकार त्रितयं पूर्वं दां थि गिति
ततस्त्रयं दां दां थिकत्रयं यत्र
इति नादः शचीप्रियः इति नादः
द्रुतं मानं समारब्धं शुद्धं कूट
विनिर्मितं सप्तखंड मयं बाद्यं
कथितं तदिहोच्यते ॥ द्रुत
मानत्वात् प्रतिताले यथा तत्त
तत्तत तक्कि तक्कि दिदं थिगन थो
थिगन थो थिक्क थिक्क थिक्क थिक्क
थिकतगि तगथि थो थिथि थिः दां
दां थिक्क थो थो थो द्दथो द्दतगि
थो तगिथो थोद्द थोद्द डेढि
डेढि थोद्द थोद्द तटि तटि तडक
गीं गीं थगि थगि तत तथे तत
तथे ततत गिडी थोग . थो
गथों थोगगथोगथो तन्नतो ।
इति सप्तपदान्याडुः कथितं वा
घपेड्रिताः प्रतिताले न ताले ।
न पाटवर्णा समासतः गंधर्व य
त्निना पूर्वं मुर्वंशी लास्य नर्तने
सप्तमी रंजनार्थैव कथितं प्रकी
र्णकं प्रहरणं यथा । थो
गक्का तद्दिका थाग कट गगों दं
थोग दिद्दिक थिक्क थिकटेम । इ
त्येकताल्या प्रहरणं ॥ वा
द्यं विमुच्यते येन छेदनं तत्रि
गद्यते यथा तद्दिथा दि म
टेम तन्नः इति छेदनं ॥
मर्द्दल स्यादर्द्धांगुल वाममुखो
द्वादशांगुल दक्षिणमुखः मुरज
स्त्वष्टादशांगुल वाममुखः सप्त
शांगुल दक्षिणमुखः मर्द्दलमुरज
योरयंभेदः इति संगीतदामोदरः
मृदंगफलः पुं पनसवृक्षः इति
शब्दरत्नावली ॥
मृदंगफलिनी स्त्री कोषातकी इति
राजनिर्घंटः ॥
मृदंगी स्त्री घोषातकी श्वेतघोषा
इति भाषा इति रत्नमाला ॥
मृदा स्त्री मृत्तिका इति द्विरूपकोषः
मृदाकरः पुं वज्रे इति शब्दमाला
मृदितः त्रि चूर्णीकृतः इति मृद


धातोक्तमतिक्तप्रत्ययेन निष्पन्नं ।
मृदिनी स्त्री प्रशस्तमृत्तिका इति
शब्दचंद्रिका ॥
मृदुः त्रि अतीक्ष्णः कोमलः इत्य
मरः गृहकन्यायां स्त्री इति रा
जनिर्घंटः ॥
मृदुकृष्णायसं क्ली शीषकं इति
राजनिर्घंटः ॥
मृदुगणाः पुं चित्रानुराधामृगशिरो
रेवती नक्षत्राणि यथा । चित्रा मि
त्र मृगांत्यभं मृदुगणाः इति ज्यो
तिस्तत्वं ॥
मृदुगमना स्त्री हंसी इति राज
निर्घंटः मंदगमना स्त्री च
मृदुचर्मी पुं भूर्जवृक्षः इति राज
निर्घंटः कोमलत्वग्विशिष्टे त्रि
मृदुच्छदः पुं भूर्जवृक्षः इति हेम
चंद्रः गिरिजपीलुवृक्षः इति
जटाधरः क्रकुरद्रुः श्रीतालः
इति राजनिर्घंटः ॥
मृदुता स्त्री मृदुत्वं मृदोर्भावः इति
व्याकरणं ॥
मृदुतालः पुं श्रीतालवृक्षः इति
राजनिर्घंटः कोमलतालश्च ॥
मृदुत्वक् पुं भूर्जवृक्षः इत्यमरः
मृदुत्वचः मृदव त्वचोऽस्य मृदुत्व
क्वांतः भूर्जोपि भूर्जपत्रः स्यात् ।
मृदुत्वक पत्रपुष्पकः इति कोषां
तर मिति मधुः अदंत नपुंसक त्व
च शाटेन श्वावेत त्वचा शाटेन वा
विग्रहे मृदुत्वचो ऽदंतोपि । भू
र्जो भुजो बहुपटो बहुत्वक्को मृदु
त्वचः इति स्वामी इत्यमरटीकायां
भरतः ॥
मृदुत्वकं क्ली सुवर्णं इति शब्दचंद्रि
का मृदुपत्रः पुं नलः इति राजनिर्घं
टः कोमलपर्णे क्ली नद्धति त्रि
मृदुपत्री स्त्री चिल्लीशाकं इति राज
निर्घंटः ॥
मृदुपर्वकः पुं वेत्रः इति राज
निर्घंटः कोमलपर्वविशिष्टे त्रि
मृदुपुष्पः पुं शिरीषवृक्षः इति रत्न
माला कोमलकुसुमयुक्ते त्रि ॥
मृदुफलः पुं विकंकतः मधुनालि
केरिकः विकंटकवृक्षः इति
राजनिर्घंटः कोमलफलवति त्रि
मृदुलं क्ली जलं इति शब्दचंद्रिका
कोमले त्रि इत्यमरः ॥
मृदुलोमकः पुं शशकः इति हेम
चंद्रः कोमललोमविशिष्टे त्रि
मृदूत्पलं क्ली नीलपद्मं इति शब्द
चंद्रिका ॥
मृद्गुः पुं मत्स्यभेदः इति संक्षिप्त
साराणादिवृत्तिः ॥

मृद्वंगं क्ली वंगं इतिहेम चंद्रः कोमलावयवश्च ॥
मृद्वी स्त्री कोमलांगी इति मुग्ध वोधव्याकरणं । अपिच मघः पुरी परिसरेषु शिरीष मृद्वी सी ता ययावित्रि चतुराणि पदानिगत्वा गंतव्य मस्ति कियदित्यसकृद्ब्रुवा णा रामाश्रुणः कृतवती प्रथमवता रं इतिमहानाटकं कपिलद्राक्षा । इति राजनिर्घंटः ॥
मृद्वीका स्त्री द्राक्षा । इत्यमरः कपिलद्राक्षा इति राजनिर्घंटः
मृष उ न क्लिदि इतिकविकल्पद्रु मः उ मर्षित्वा मृष्ट्वा न मर्षतिमर्ष ते क्लिदि आर्द्रभावे इति दुर्गा दासः ॥
मृधं क्ली युद्धं । इत्यमरः ॥
मृधा यं मृषा इत्यमरटीकासार सुन्दरी ॥
मृन्मरुः पुं पाषाणः इतित्रिकांड शेषः ॥
मृश श डो मृशि इतिकविकल्प द्रुमः श मृशति औ अम्राक्षीत अमार्क्षीत अमृक्षत मृशी इति तालव्यांतस्यैव क्विपिरूपं । नेन अनिर्दिष्टार्थत्वात स्पर्शनं प्रणिधा नंच अस्यार्थः स्पर्शने परामृशत

दर्भं नखेन पाणिना नदीप मंगं कुलिश व्रणांकितं । इति रघुः प्रणिधाने रामश्वासे कामृषा दोषं जनापवादे सनरेन्द्र मृष्टे केकयीति भट्टिः विमर्शो परा मर्शः मृषि इति मूर्द्धन्यांतपाटो हेयः नहि तत्रैव वार्थः स्यात ॥ इति दुर्गादासः ॥
मृष न क (त्तानो इतिकविकल्प मृषत् न (द्रुमः मूर्द्धन्योपधो । न मृषते मृषति क मृषयति । इति दुर्गादासः ॥
मृष उ सेचने इतिकविकल्पद्रुमः । उ मर्षित्वा मृष्ट्वा इतिदुर्गादासः ।
मृष क त्तानौ इतिकविकल्पद्रुमः क मर्षयति अयमात्मनेपदीत्येके इति दुर्गादासः ॥
मृष न ङ उ त्तानौ इति कवि कल्पद्रुमः न मृषति मर्षते ङ म र्षते उ मर्षित्वा मृष्ट्वा अपि गुरु मपराधं मर्षति ब्राह्मणाना मिति हलायुधः इतिदुर्गादासः ॥
मृष य न त्तानौ इतिकविकल्प द्रुमः य न मृष्यतिमृष्यते ममर्ष इति दुर्गादासः ॥
मृषा यं मिथ्या इत्यमरः वृथा इतितट्टीकासारसुंदरी ॥

मृषार्थकं क्ली असंतासंभवार्थवा क्यं तत्पर्यायः आहतं २ इत्य मरः हे असंतासंभवार्थे वचसि आहन्यनेस्म आहतं क्तः मृषा मिथ्या अर्थो ऽस्य मृषार्थकं इह मृषार्थो यत्सवंध्या न चटते यथा एष वंध्या सुतो यातिखपुष्पकृत शेखरः कूर्मलोम नत्राणः शश शृंग धनुर्द्धर इति वायजीव मह मौनी ब्रह्मचारी पिता ममेति । अस्यचायं भेदः मौनित्वं ब्रह्मचा रित्वं अन्यत्रसिद्धमेव वंध्या स तत्वं खपुष्पत्वंचान्यत्रासिद्ध मिति इतिभरतः ॥
मृषाध्यायी पुं वकः यथा कंको बकोवकोटश्च तीर्थसेवी च तापसः मीनघाती मृषाध्यायीनिश्च लांगश्च दांभिकः इति राज निर्घंटः ॥
मृषालकः पुं आम्रवृक्षः इतिश ब्दचंद्रिका ॥
मृषावादः पुं मिथ्यावाक्यं तत्त पर्यायः वहरी २ इति जटा धरः ॥
मृषावादी त्रि मिथ्यावादकः तत्त पर्यायः मृषोद्यः इति शब्दमा ला मिथ्याभियोक्ताच ॥

मृषोद्यं क्ली मिथ्यावाक्यं इति मुग्धवोधव्याकरणं ॥
मृषोद्यः त्रि मिथ्यावादी इति शब्दमाला ॥
मृष्टं क्ली मरिचं । इति राज निर्घंटः ॥
मृष्टः त्रि शोधितं । इत्यमरः
मृष्टरुकः पुं वदान्यः मिष्टाशी । अतिपिच्छिट इति मेदिनी ॥
मृ गि वधे इति कविकल्पद्रुमः गि मृणाति मूर्णः मूर्णिः इति दुर्गादासः ॥
मे ङ प्रतीदाने इतिकविकल्पद्रु मः प्रतीदानं परिवर्त्तः । ङ मयते धान्येन माषं लोकः इति दुर्गादासः ॥
मे त्रि मह्यं आमाके इति भाषा मम आमार इति भाषा एते अस्मत शब्दस्य चतुर्थी षष्ठ्येकव चनाभ्यां निष्पन्ने इतिव्याकरणं ।
मेकः पुं छागः इति राज निर्घंटः ॥
मेकलकन्यका स्त्री नर्मदानदी इ त्यमरः ॥
मेकलाद्रिजा स्त्री नर्मदानदीयथा रेवेंद्रजा पूर्वगंगा नर्मदा मेक लाद्रिजा ॥ इतिहेमचंद्रः ॥




मेखला स्त्री स्त्रीकट्याभरणं । चंद्रहार गोट इत्यादि भाषा ॥ तत्पर्य्यायः कांची २ सप्तकी ३ रसना ४ सारसनं ५ इत्यमरः ॥ कांचिः ६ रशना ७ सारसनं स्त्रीकट्यां वस्त्रग्रंथनं । इति स्वामी केचित्तु एकयष्टि भवेत् कांची मेखलात्वष्टयष्टिका रसना षोडश ज्ञेया कलापः पंचविंशकः इति पठंति इह त्वभेदात् पर्य्यायता । इति भरतः खड्गादिनिबंधनं । इत्यमरः शिक्कनिका चर्मरज्वादि मुष्टिदार्ढ्यार्थं उपर्य्यधो लोहवेष्टः इत्येके इत्यपि भरतः ॥ शैलनितम्बः इति मेदिनी नर्मदा नदी इति शब्दरत्नावली प्रश्निपर्णी इति राजनिर्घंटः ॥ उपनयनकाले धारणीयमुंजनिर्मितसूत्रत्रयं यथा अथैनं माणवकमाचार्य्यस्त्रिः प्रदक्षिणं त्रिवृतं मुंजमेखलां परिधापयन् मंत्रद्वयं वाचयति इति भवदेवभट्टः । अपि च गोभिलः मुंजकाशताम्न्यो रसनाः मुंजः शरः ताम्नः शनस्तद्वा तासनी रसना मेखला तथा च मनुः मौंजी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ॥

क्षत्रियस्य च मौर्वी ज्या वैश्यस्य शणतांतवी । मुंजालाभे तु कर्त्तव्या कुशाश्मन्तकवल्वजैः त्रिवृता ग्रंथिनैकेन त्रिभिः पंचभिरेव वा ॥ इति संस्कारतत्त्वं ॥ अन्यच्च गर्भाष्टमेऽष्टमे वाब्दे स्वसूत्रोक्तविधानतः दंडी च मेखली सूत्री कृष्णाजिनधरो मुनिः मौंजी त्रिवृत् समा श्लक्ष्णा कार्य्या विप्रस्य मेखला मौंज्यभावे कुशेनाहुर्ग्रंथिनैकेन वा त्रिभिः इति कौर्म्मे उपरिभागे ॥ अध्यायः ॥ होमकुंडोपरि मृद्रचित वेष्टनविशेषः यथा वशिष्ठपंचरात्रे यावान् कुंडस्य विस्तारः खननं तावदिष्यते । हस्तैके मेखला श्लिष्टा वेदाग्निनयनांगुलाः कुंडे द्विहस्ते ता ज्ञेया रस वेद गुणांगुलाः चतुर्हस्ते तु कुंडे ता वसुतर्कगुणांगुलाः मेखला ब्रह्मचारि मेखलावत्कुंडवेष्टिता मृद्रचिता ताम्रवत देशाद्ध्ये एकांगुलिरूपं कंठं परित्यज्य उच्छ्रायेण विस्तारेण चैषा दिक्क्रमेणावेसा षडंगुला । एतद्विपरीतास्तंत्रान्तरोक्ता व्यवहारविरुद्धाः वेदाः चत्वारः अग्नयस्त्रयः नयने द्वे रसाः षट् गुणास्त्रयः वसु तर्क युगानि अष्ट

षट् ब्रह्मचारि पिंगलामते अपि त्वेनात्रेकांगुलं त्यक्त्वा मेखला तां विधिमेचन् इति तिथ्यादितत्त्वे गौतमवचनं ॥ मेखलकन्यका स्त्री नर्म्मदानदी इत्यमरटीकायां भरतः ॥ मेघः पुं मुस्तकः राक्षसः इति शब्दरत्नावली स्वनामख्यातद्रव्यपदार्थः मेहति सिंचति यः तत्पर्य्यायः । अभ्रं २ वारिवाहः ३ स्तनयित्नुः ४ बलाहकः ५ धाराधरः ६ जलधरः ७ तडित्वान् ८ वारिदः ९ अम्बुभृत् १० घनः ११ जीमूतः १२ मुदिरः १३ जलमुक् १४ धूमयोनिः १५ इत्यमरः अब्दः १६ पयोधरः १७ अम्भोधरः १८ व्योमधूमः १९ घनाघनः २० वायुदारुः २१ नभश्चरः २२ कंधरः २३ कंधः २४ नीरदः २५ गगनध्वजः २६ वारिमुक् २७ वार्मुक् २८ वनमुक् २९ अब्दः ३० पर्य्यण्यः ३१ नभोगजः ३२ मदयित्नुः ३३ कदः ३४ कंदः ३५ गवेडुः ३६ गदामरः ३७ खतमालः ३८ वातरथः ३९ श्येननीलः ४० नागः ४१ जलकरंकः ४२ पेचकः ४३ भेकः ४४ दर्दुरः ४५ इति शब्दरत्नावली अम्बुदः ४६ तोयदः

४७ अम्बुवाहः ४८ इति रत्नमाला पयोदः ४९ गदाम्बरः ५० गाडवः ५१ वारिमसिः ५२ । इति त्रिकांडशेषः ॥ मेघनायकाः यथा त्रियुते शाकवर्षे च वसुभिः शोधिते क्रमात् आवर्त्तो विदिता संवर्त्तः पुष्करं द्रोणमम्बुदं ॥ एषां फलानि आवर्त्तो निर्जलो । मेघः संवर्त्तश्च बहूदकः पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः इति ज्योतिस्तत्त्वं ॥ त्रेतायुग तस्योत्पत्तिर्यथा । अर्पासिद्धे प्रतिगते तदा मेघाम्बुना तवै मेघेभ्यस्तनयित्नुभ्यः प्रवृत्तं वृष्टिसर्जनं सकृदेव तथा वृष्ट्या संयुक्ते पृथिवीतले प्रादुरासंस्तदा तासां वृक्षास्ते गृहसंज्ञिताः सर्वे प्रत्युपभोगस्तु तासां तेभ्यः प्रजायते । वर्त्तयंति स्म तेभ्यस्तास्त्रेतायुगमुखे प्रजाः इति कौर्म्मे २९ अध्यायः ॥ प्रलयकालीन मेघा यथा नागजकुलोद्भवाः स्तनितैः समलंकृताः उत्तिष्ठंति सदा घोरा घोराः संवर्त्तकाः घनाः केचिन्नीलोत्पलश्यामाः केचित् कुसुमसन्निभाः धूम्रवर्णास्तथा केचित् पीताः पयोधराः ॥ केचिद्रासभवर्णाभ



स्थला व्यारनिभा स्तथा शंखकुंद
निभा श्चान्ये जात्यांजननिभाः प
रे मनः शिला निभास्त्वन्ये कपोत
सदृशाः परे केचिद्गुद्गलवर्णाभा
स्तथान्ये क्षीरसन्निभाः तथा केचि
द् वर्णाभा भिन्नांजननिभा स्तथा
इंद्रगोपनिभाः केचित् हरिताल
निभा स्तथा काकांडकनिभाः के
चित्तिष्ठन्ति घनादिवि केचित्पर्वत
संकाशाः केचिद्गजकुलोपमाः
कूटागारनिभा श्चान्ये केचिन्मीन
कुलोद्भवाः बहुरूपा घोररूपा ।
घोरस्वर निनादिनः तडाजलधराः
सर्वे पूरयंति नभस्थलं तत स्तेज
लदा धारा वारिणा भास्करात्मजाः
समथा संहतात्मान स्तमग्नि शमयं
त्यत ततस्ते जलदा वर्षं वर्षतीह
महौघवत् स्वघोर मशिवं सर्वे
नाशयंतीव पावकं प्रहतेन नदा
त्यर्थं मम्भसा पूर्यते किल ब्रह्मि
स्तेजाषा भूतत्वानदापि प्रविश्य
त्यपि नष्टे चाग्नौ वर्षमानैः पयो
दाजल संभवाः श्लावयंतोथ भूव
नं महाजल परिस्रवैः धाराभिः
पूरयंतीदं चोद्यमानाः स्वयंभुवा।
उदधिं सलिलौघैश्च वेला इव म
होदधेः ॥ साद्रि द्वीपा तथा पृथ्वी
जलै संछाद्यते शनैः आदित्य।
रश्मिभिः पीतं जलमभ्रेषु तिष्ठति
पुनः पतति तद्भूमौ पूर्यते तेन
वार्णवाः इति कोम्मे उपरिभागे।
५२ अध्यायः ॥ मेघस्य उत्पत्ति
र्यथा तेजो हि सर्वभूतेभ्य आदत्ते
रश्मि गेले समुद्राद्वेमसौ योगा
द्रश्मयः प्रवहंत्यपः ततोऽयनवश
तकाल परिहृतो दिवाकरः निय
च्छति पयो मेघे शुक्लाभ्रकैर्गभस्ति
भिः अभ्रस्थाः प्रपतंत्यापो वायुना स
मुदीरिताः सर्वभूतहितार्थाय वायु
भूताः समंततः ततो वर्षति सो
म्भांसि सर्वभूत विवृद्धये वायवो
स्तनितं चैव विद्युदग्निसमप्रभं मे
हसात् मिह त्यांता मेघत्वे व्यंज
यंतिच अभिषांति यथा वापस्तेन ते
कवयो विदुः ॥ अपिच। मेघा
नां पुनरुत्पत्तौ त्रिविधा योनि रु
च्यते आग्नेया ब्रह्मजाश्चैव पक्ष
जाश्च पृथग्विधाः त्रिधा त्रिपयना।
तेषां वक्ष्यामि वित्त संभवं । आ
ग्नेयाः श्वसनजाः प्रोक्तास्तेषां प्रभः प
वर्तनं जानाडर्दिन वातायस ग
णाले व्यवस्थिताः महिषाश्च वराह
श्च मत्तमातंग रूपिणः भूतधाति
मभ्येत्य रमंते विचरंति च जीमूता।

नामते मेघा ये तेभ्यो जीवसम्भ
वाः विद्युद्गुण विहीनाश्च जलधा
रावलम्बिनः मूकमेका महाकाया
या आवहस्यच सानुगाः क्रोशमा
त्राच्च वर्षंति क्रोशार्द्धादपिवा पुनः
पर्वताग्र नितम्बेषु वर्षंति विपिने
षुच बलाका गर्भभाश्चैव बलाका
गर्भधारिणः ब्रह्मजा नामते मेघा
ब्रह्म निश्वास संभवः द्वितीयं प्र
वहस्थायु मेघा स्तेत्र समाश्रिताः
इतो योजन मात्राच्च सार्द्धाद्धानहि
कृतादपि वृष्टिसर्गाद्दिव स्तेषां
धारासाराः प्रकीर्तिताः शक्रेणाप
हृता यच्छिमाः पर्वतानां महौजसां
कामगानां प्रवृद्धानां प्रजानां।
शिव मिच्छता पुष्करावर्तका स्ते
न कारणेनेह विश्रुताः नानारूप
धराश्चैव महाघोरस्वनाश्चते क
ल्पांत वृष्टेः स्रष्टारः सम्वर्तोग्नेर्नि
यामकाः वर्षंतिते युगांतेषु तृती
यास्ते प्रकीर्तिताः । अनेकरूप।
संस्थानाः पूरयंतो महीं जलैः
वायुं परि वहंतेस्य राश्रिताः क
ल्पसाधकाः योप्यस्यांडस्याभिन्नस्य
प्राकृत प्रभवस्तदा यस्माद्ब्रह्मा।
समुत्पन्न श्चतुर्वक्त्रः स्वयंभुवः त
स्यैवांडस्य पाला हि सर्वे मेघाः
प्रकीर्तिताः तेषा मध्ययनं भूमः
सर्वेषा मविशेषतः तेषां श्रेष्ठ
स्तु पर्जन्य श्चत्वारश्चैव दिग्गजाः
गजानांच पर्वतानांच मेघानां भो
गिभिः सह कुलमेकं पृथग्भूतं।
योनिरेका जलंस्मृतं पर्जन्या।
दिग्गजाश्चैव हेमंते शीतसंभवाः।
तुषार वृष्टिं वर्षंति हिमशस्यविवृ
द्धये इतिब्रह्मांड ५८ अध्यायः
षड्रागांतर्गत राग विशेषः ॥
यथा भैरवोऽथ वसंत श्च नटो ना
रायणस्तथा श्रीरागो मेघरागश्च
षडेते पुरुषाकृत्याः तस्य रागि।
ण्यो यथा ललिता मालसी गौडी
नाटी देवकिरी तथा मेघरागस्य
रागिण्यो भवंतीमाः क्रमशमाः
अयं हनुमन्मते षड्रागो ब्रह्मणो
मस्तकान्निर्गतः । आकाशाज्जात
इतिच वदंति अस्य जातिः औडवः
अर्थात् ध नि स रे ग इति पंचस्वर
मिलितः अस्य ग्रहः धैवतस्वरः।
वर्षर्तौ रात्रिशेषे गानसमयः अ
स्याकारः सुंदरपुरुषः श्यामवर्णः
उष्णीषवद्धकेशः शान्तिनवकः।
हस्तः हनुमन्मते अस्य पंचभार्या
यथा टंकः १ मलारी २ गुर्जरी ३ भूपाली ४
देशकारीच ५ अस्याष्टपुत्रा यथा

जालंधरः १ सारः २ नटनारायणः
३ शंकराभरणः ४ कल्याणः ५ गजध
रः ६ गांधारः ७ सहाना ८ कुलानाथ
मते अस्य रागिण्यः षट् यथा बंगा
ली १ मधुरा २ कामोदा ३ धनाश्रीः
४ तीर्थकी ५ देवाली ६ एतन्मतेपि
अष्टौ पुत्राः किंतु नटनारायणशं
कराभरणकल्याणस्थानेकेदारा।
मारु जलधरना तेषाः सोमेश्वरम
ते अस्य षड्रागिण्यः यथा मलारी
१ सोरठी २ सावेरी ३ कौशिकी ४
गांधारी ५ हरशृंगारी ६ एतन्म
तेपि पुत्राः पूर्ववत् रागिणी स
हि तस्यैतद्रागस्य वर्षतौ गान
समयः भरतमते तस्य पंच रागि
ण्यो यथा मलारः १ मूलतानी २
देशी ३ रतिवल्लभा ४ कावेरी ५
तन्मते अष्टौ पुत्रा यथा कलाय
रः १ वागेश्वरी २ सहाना ३ पूरीया
४ कानरा ५ तिलकः ६ स्तंभः ७ शंक
राभरणः ८ तन्मते अष्टपुत्राणां भा
र्या यथा करणाटी १ कादंबी २ क
मनाटः ३ पाहारी ४ कौंजः ५ परजः
६ नटमंजरी ७ मुद्रानटः ८ इति
संगीतशास्त्रं ॥
मेघकफः पुं करका इतिहारा।
वली ॥


मेघाकालः पुं वर्षर्तुः इतिजटाधरः
मेघचिंतः पुं चातकपक्षी । इति
शब्दचंद्रिका ॥
मेघजं त्रि मेघभवं वस्तु मेघाज्जा
यते इति व्युत्पत्त्या ड प्रत्ययेन।
निष्पन्नं ॥
मेघजालं क्ली अभ्रियं इति शब्द
चंद्रिका ॥
मेघजीवनः पुं चातकपक्षी इति
राजनिर्घंटः ॥
मेघज्योतिः पुं वज्राग्निः तत्
पर्यायः इरम्मदः २ इत्यमरः
मेघस्य ज्योतिरग्निर्मेघज्योतिः
ज्योतिरग्नौ समाख्याते ज्योति
श्चंद्रो निराघने इति रंतिः।
इरया जलेन माद्यति दीप्यते
इति इरम्मदः मेघाग्निर्हि जले
नैव दीप्यते मरीचिभिर्यथा हर्ष
न्ते [illegible] जीतिखेः खिमवाजिति
मनसौ अन्योन्यसंघट्टेन मेघा
ग्निः सत्यत्यज्योति र्हताशे एत
ति स इरम्मदः मेघस्य पललतां
तेन वानजोऽपीरम्मदः सोपि
हि इरया जलेन माद्यतीति कौ
मुदी मेघाग्न्यादिरिरम्मद इति शा
[illegible] इति नदीकायां भरतः मे
घडम्बरः पुं मेघस्याडम्बरः मेघ

गर्जनं यथा अजायुद्धे ऋषिश्रा
द्धे प्रभाते मेघडम्बरे । दंप
त्योः कलहे चैव बह्वारंभे लघु
क्रिया इत्युद्भटः ॥
मेघतिमिरं क्ली मेघाच्छन्नदिनं
इति हलायुधः ॥
मेघदीपः पुं विद्युत् इति शब्द
माला ॥
मेघनादः पुं वरुणः रावणपुत्रः
इति मेदिनी मेघशब्दः । इति
हेमचंद्रः पलाशवृक्षः । इति
शब्दचंद्रिका तंडुलीयशाकः ॥
इति राजनिर्घंटः ॥
मेघनादजित् पुं लक्ष्मणः इति
त्रिकांडशेषः ॥
मेघनादानुलासकः पुं मयूरः
इति राजनिर्घंटः ॥
मेघनादानुलासी पुं मयूरः इत्य
मरः ॥
मेघनामा पुं मुस्तकः । इत्यमरः
मेघनिर्घोषः पुं मेघशब्दः तत्
पर्यायः स्तनितं २ गर्जितं ३
रसितं ४ इत्यमरः ध्वनितं ५
स्फारितं ६ इति भरतः ॥
मेघपुष्पं क्ली जलं इत्यमरः
पिंडाभ्रे नदीजले ॥ इति मेदि
नी ॥ ॥

मेघपुष्पः पुं शाकद्वयः इति शब्द
रत्नावली ॥
मेघप्रसवः पुं जलं इति राज
निर्घंटः ॥
मेघभूतिं पुं वज्रं इति शब्द
रत्नावली ॥
मेघमालः पुं रमागर्भजात कल्कि
देवपुत्रः यथा तथा रमा सिते।
पद्रे इत्युपक्रम्य सा पुत्रं सुषुवे।
साध्वी मेघमाल बलाहकौ । म
होत्साहौ महावीर्यौ सुभगो।
कल्किसम्मतौ इति कल्किपुराणे ३।
अध्यायः ॥
मेघमाला स्त्री मेघश्रेणी तत्
पर्यायः कादंबिनी २ इत्यमरः
मेघयोनिः पुं धूमः इति शब्द
रत्नावली ॥
मेघरागः पुं षड्रागांतर्गतराग
विशेषः इति हलायुधः अस्य
विवरणं मेघशब्दे द्रष्टव्यं ॥
मेघवर्णा स्त्री नीलीवृक्षः इति
शब्दचंद्रिका ॥
मेघवर्त्म क्ली आकाशं इति त्रि
कांडशेषः ॥
मेघवह्निः पुं वज्राग्निः तत्पर्या
यः इरम्मदः २ इति हेमचंद्रः।
मेघवाहनः पुं इन्द्रः इत्यमरः

मेघवेश्म क्ली आकाशं इति जटाधरः ॥
मेघसारः पुं चीनकर्पूरः ॥ इति राजनिर्घण्टः ॥
मेघसुहृत् पुं मयूरः इति हेमचन्द्रः ॥
मेघस्तनितोद्भवः विकंटकद्रुमः इति राजनिर्घण्टः ॥
मेघाख्यं क्ली मुस्तकं इतिरत्नमाला ॥
मेघागमः पुं वर्षाकालः इति शब्दरत्नावली मेघस्यागमनंच ।
मेघानन्दा स्त्री बलाका इति राजनिर्घण्टः ॥
मेघानन्दी पुं मयूरः इति राजनिर्घण्टः ॥
मेघान्तः पुं शरत्कालः ॥ इति राजनिर्घण्टः ॥
मेघास्थि क्ली करका इतित्रिकाण्डशेषः ॥
मेघास्पदं क्ली आकाशं इतिधनञ्जयः ॥
मेघोदरः पुं अर्हत्पिता इति हेमचन्द्रः ॥
मेचकं क्ली स्रोतोऽञ्जनं । अन्धकारः इति मेदिनी नीलाञ्जनं । इतिराजनिर्घण्टः ॥
मेचकः पुं मयूरचन्द्रकः श्यामलः इति मेदिनी धूमः ॥ मेघः शोभाञ्जनः इति शब्दरत्नावली ॥ श्यामल गुणयुक्ते त्रि इत्यमरः ॥
मेचकाभिधा स्त्री पातालगरुडीलता इति राजनिर्घण्टः ॥
मेट ऋ उन्मादे इतिकविकल्पद्रुमः ॥ ऋ अमिमेटत् । मेटति लोकः उन्मादयतीत्यर्थः । इति दुर्गादासः ॥
मेटुला स्त्री आमलकी इतिशब्दचन्द्रिका ॥
मेठः पुं हस्तिपकः इतित्रिकाण्डशेषः ॥
मेड ऋ उन्मादे इतिकविकल्पद्रुमः । ऋ अमिमेडत् । मेडति उन्मादयतीत्यर्थः इतिदुर्गादासः
मेढ्रः पुं शिश्नः मूत्र गर्भस्थस्य सप्तमि मासे भवति इति सव बोधः मेषः । इत्यमरः ॥
मेढ्रशृंगी स्त्री मेषशृंगीवृक्षः इतिरत्नमाला ॥
मेंटः पुं हस्तिपकः इति हारावली ॥
मेंडः पुं हस्तिपकः इतित्रिकाण्डशेषः ॥
मेण्ढः पुं मेषः इतिशब्दरत्नावली

मेथ ऋ ञ संगे वधे मेधायां । इति कविकल्पद्रुमः ञ मेथतिमेथते धीरो गुणिना संगत इत्यर्थः ऋ अमिमेथत् मिमेथ इति दुर्गादासः ॥
मेथिः पुं खलेपशुबन्धनार्थंन्यस्तदारु मेहकाठ इतिभाषा यथा मेथि मेथिः खलेवाली खले गोबन्धदारु यत् इति हेमचन्द्रः ॥
मेथिका स्त्री क्षुपविशेषः मेथिशाक इति भाषा तत्पर्यायः ॥ मेथिनी २ मेथी ३ दीपनी ४ बहुपत्रिका ५ बोधिनी ६ गन्धबीजा ७ ज्योतिः ८ गन्धफला ९ वल्लरी १० चन्द्रिका ११ मन्था १२ मिश्रपुष्पा १३ कैरवी १४ कुञ्चिका १५ बहुपर्णी १६ पीतबीजा १७ अस्या गुणाः । कटुत्वं उष्णत्वं रक्तपित्तप्रकोपनत्वं अरोचकहरत्वं । दीप्तिकारित्वं वातघ्नत्वं दीपनत्वंच । इतिराजनिर्घण्टः ॥
मेदिनी स्त्री मेथिका इति राजनिर्घण्टः ॥
मेथी स्त्री मेथिका इति राजनिर्घण्टः ॥
मेद ऋ ञ वधमेधयोः । इति कविकल्पद्रुमः ऋ अमिमेदत् । ञ मेदति मेदते शास्त्रार्थं शिष्यः धारयतीत्यर्थः मिमेद । इति दुर्गादासः ॥
मेदः क्ली मांसप्रभवधातुविशेषः तत्पर्यायः वपा २ वसा ३ इत्यमरः मेदः ४ अकारान्त इति भरतः अस्य गुणाः वातनाशित्वं बल पित्त कफदातृत्वंच इति राजवल्लभः अथ मेदसः स्वरूपमाह यन्मांसं स्वाग्निना पक्वं तन्मेद इति कथ्यते । तद्गतीव गुरु स्निग्धं बलकार्य्यति बृंहणं अथ मेदसः स्थानमाह । मेदो हि सर्वभूतानां उदरस्थास्थिषु स्थितं अत एवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् इतिभावप्रकाशः रोगविशेषः तत्र मेदसो विप्रकृष्टं निदानमाह अव्यायामदिवास्वप्न श्लेष्मलाहारसेविनः मधुरो ऽन्नरसः प्रायः स्नेहान्मेदो विवर्द्धयेत् अन्नरसः आमद्रवः तथाच सुश्रुतः आमद्रवान्नरसो मधुरश्च भवतीति मेदसोऽति । प्रवृद्धो वेगाप माह मेदसावृत मार्गत्वात् पुष्यन्त्यन्ये न धातवः मेदस्तु चीयते तस्मादशक्तः सर्वकर्मसु अन्ये धातवः अस्थ्यादयः



शुक्रान्ताः नपुष्यंति नपुष्टा भवंति
चीयते संचितं भवति वर्द्धन इति
यावत् तस्मात् मेदस्वी सर्वकर्मस्व
शक्तः स्यात् मेदसः सो ऽ
मार्थ्यात् अपरानपि दोषानाह।
क्षुद्रश्वास तृषामोह स्वप्नक्रथनसा
दनैः युक्तः क्षुत्स्वेद दौर्गन्ध्यै रल्प
प्राणो ऽल्पमैथुनः मेदसः स्वेद
दौर्गंध्यात् जायेते जंतवो नरः क्र
थनं उच्छ्वासावरोधः कंठेन घुर्घुर
इत्यन्ये जंतवः कृमयः मेदसः
स्थानमाह मेदस्तु सर्वभूतानामुद
रेष्वस्थिषु स्थितं अत एवोदरे वृ
द्धिः प्रायो मेदस्विनो भवेत् ॥
मेदस्विनोऽपि वृद्धौ हेतु माह
मेदसावृत मार्गत्वाद्वायुः कोष्ठवि
शेषतः चरन् संधुक्षयत्यग्नि मा
हारं शोषयत्यपि ॥ तस्मात्
शीघ्रं जरयत्याहारं चापिकांक्षति
विकारान् सोऽश्नुते घोरान् कां
श्चित् कालव्यतिक्रमात् संधुक्षय
ति प्रदीपयति स मेदस्वी आहारं
शीघ्रं जरयति पुनर्भोक्तुं कांक्षति
सतीमाग्निः कालव्यतिक्रमात् भो
जनकालातिक्रमात् कांश्चिद्विका।
रान् वातपित्त करान् घोरान् अ
श्नुते प्राप्नोति एतेवा पित्ते।

मेदसावरुद्धे विशेषादुपद्रवकरे ॥
इत्याह एतावुपद्रवकरौ विशे
षात् पित्तमारुतौ एतौहि दह
नः स्थलं वनं दावानलं यथा ॥
एतौ पित्तमारुतौ मेदसा रुद्ध
मार्गत्वात् कोष्ठमध्ये प्रवृद्धौ सन्तौ
विशेषादुपद्रवकरौ दहनः नाशये
तां मेदसोतिवृद्धे विनाशमाह त
त्रमाह मेदस्यतीव संवृद्धे सहसै।
वानिलादयः विकारान् दारुणान्
कृत्वा नाशयन्त्याशु जीवितं विका
रान् प्रमेह पिडका ज्वर भगंदर।
विद्रधि वातरोगाणामन्यतमान्।
अतिस्थूलतया वैरूप्य माहअति
स्थूलेषु संदृष्टा विसर्पाः सभगंद
राः ज्वरातीसार मेहार्शः श्लीपदा
पचिकादयः अतिस्थूलस्थूलतया
माह मेदो मांसातिवृद्धत्वाच्चल।
स्फिगुदरस्तनः अयथोपचयोत्साहो
नरोऽतिस्थूल उच्यते अयथोप।
चयोत्साहः न यथा उपचयो मा
सोपचयः उत्साहो बलंच यस्य सः
अथ मेदस्य चिकित्सा ॥
पुराणाः शालयो मुद्गाः कुलत्थोद्दाल
कोद्रवाः लेखनावस्तयश्चापि सेव्या
मेदस्विना सदा श्रमचिन्ता व्यवाया
ध्व क्षौद्र जागरण प्रियः हंत्य

वषप मति स्थौल्यं यव श्यामाक
भोजनः द्वारं वानारिपत्रस्य ।
हिंगुयुक्तं पिबन्नरः सहितं भक्त
मंडेन मेदो वृद्धि निहत्नय गुडूची
त्रिफलाक्काथः पीतो मेदोहरः स्म
तः गुडूची त्रिफलाक्काथस्तथाल्लो
हरजोयुतं क्षौद्रेण त्रिफलाक्काथः
पीतो मेदहरः परः प्रातं मधु।
युतं वारि सेवितं स्थौल्य नाशनं
उष्ण मन्नस्य मंडं वा पिबन् कृ
शतनुर्भवेत् व्योषाग्नि त्रिफला
मुस्त विडंग गुग्गुलं समं खादेत्
सर्वान् जयोद्रोगान्मेद श्लेष्मामवा
तजान् पिप्पली मधुना सेव्या
मेदः कफ विनाशिनी पत्तूरपत्र
स्वरसेन गाढमुद्वर्त्तनं स्थौल्यहरं
प्रदिष्टं वासादलरसो लेपाच्छ
ङ्खचूर्णेन संयुतः बिल्वपत्ररसो वा
पिदेह दौर्गंध्य नाशनः । निम्ब
पत्र स्वरसः प्रलिप्त कक्षादियोजि
तं जयति दुःखहरिद्रोद्वर्त्तनमपि
रात्रिर देह दौर्गंध्यं शिरीषला
मज्जक हेमलोध्रै स्त्वग्दोष संस्वेद
हरः प्रघर्षः शरीर दौर्गंध्यहरः
प्रदेहः पत्राम्बु लोध्राभय चंदना
नां शिरीषस्याङ्ग पत्रं ग्राह्यं यवा।
हारात् लामज्जकं स्वर्गपित्तम् ॥

विशेषस्तदलाभे उशीरं ग्राह्यं।
हेम नागकेशरं अम्बु बालकं।
अभय मुशीरं हरीतकी त्व से
पिष्य देह मुद्वर्त्तनं नरः पश्चात्
स्नानं प्रकुर्वीत देह स्वेदोपशां
तये वकुलस्य दलैः सम्य
ग्वारिणा परिपेषितैः देह मुद्व
र्त्तयेत् पश्चाद्धरीतक्याश्च पिष्टया।
भूय उद्वर्त्तनं कुर्यात्तपश्चात्स्नानं
समाचरेत् प्रस्वेदान्मुच्यते शीघ्रं
मेदो वृद्धिसमुद्भवात् ॥ इति
मेदोऽधिकारः । इति भाव
प्रकाशः ॥
मेदः पुं वपा इति शब्दचंद्रिका
म्लेच्छजातिविशेषः । इति जटा
धरः अलंबुषा इति राजनिर्घंटः
मेदकः पुं जगलः मेद्या इति
भाषा इत्यमरः ॥
मेदजः पुं भूमिजगुग्गुलः इति
राजनिर्घंटः मोदाभवश्च ॥
मेदःसारा स्त्री मेदा इति राज
निर्घंटः ॥
मेदस्कृत् स्त्री मांसं इतिहेम
चंद्रः ॥
मेदा स्त्री अष्टवर्गप्रसिद्धौषधिवि
शेषः तत्पर्यायः मेदोद्भवा २ जी
वनी ३ श्रेष्ठा ४ मणिच्छिद्रा ५

विभावरी ६। इति रत्नमाला। वसा ७ स्वल्पपर्णिका ८ मेदःसारा ९ स्नेहवती १० मेदिनी ११ मधुरा १२ स्निग्धा १३ मेधा १४ द्रव्या १५ साध्वी १६ शल्यदा १७ बहुरन्ध्रिका १८ पुरुषदन्तिका १९ अस्या गुणाः मधुरत्वं शीतलत्वं पित्तदाहार्त्ति। कासराजयक्ष्मज्वरनाशित्वं वातदोषकारित्वञ्च इति राजनिर्घण्टः॥ तस्य लक्षणं यथा शुक्लकन्दो नखच्छेद्यो मेदोधातुमिव स्रवेत् यः समेदेति विज्ञेया। जिज्ञासा तस्यै जनैः॥ मेदा महामेदाख्याने शतावरी मूली इति भावप्रकाशः॥ अस्याविवरणं महामेदाशब्दे द्रष्टव्यं॥

मेदिनी स्त्री मेदा काश्मरी इति राजनिर्घण्टः पृथिवी। इत्यमरः मेदो विद्यतेऽस्यां मेदिनी सा न्नामेदः शाश्वादिन् सलोपश्च निपात्यते इति परे स्वमते। मेदः समानार्थोऽदन्तो मेदशब्दोऽस्ति। तस्या कंडुकमिह्ररा मलश्चो मेदजश्चेति शालिहोत्रः नैकाज्जादि। ति इत्यु तथाचोक्तं मधुकैटभयोरासीन्मेदसैव परिप्लुता तेनेयं। मेदिनी देवी प्रोच्यते॥ ब्रह्मवादिभि रिति मेधनीतिवा। मेदिनी इत्यभिधा त्रिदिवाहिता त्रिरु इति तट्टीकायां भरतः तस्याऽन्यत्ति यथा कथितं वसुधा जन्म सर्वमंगलकारणं विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनं अहो केचिद्वदन्तीति मधुकैटभमेदसा बभूव वसुधा जन्मन हिरुद्धं मतं श्रूयते श्रुतसम्मतौ पूरा विस्मृं तु तौ युद्धेन तेजसा। आवां वध न यत्रोवी पाथसा संवृतेति च तयोर्जीवन कालेन। प्रत्यक्षा भवेत् स्फुटं। ततो। बभूव मेदश्च मरणस्यान्तरं तयोः मेदिनीति च विख्याते त्युक्ता यैस्त्वमतं शृणु जलधौता कृशा पूर्वं वर्द्धिता मेदसा यतः कथयामि च तज्जन्म सार्थकं सर्वसम्मतं पुराकृतयतक्षणस्याके धर्मवक्त्रात्पुष्करे महाविराट् शरीरस्य जलस्थास्नु विरं स्फुटं मलो बभूव कालेन सर्वांग व्यापको ध्रुवं स च प्रविष्टः सर्वेषां तल्लोम्नां विवरेषु च कालेन महता तस्माद्बभूव वसुधा मुने॥ प्रत्येकं प्रतिलोम्नां च। कूपेषु सा स्थिरा स्थिता आविर्भूता तिरोभूता साजले च॥

पुनः पुनः आविर्भूता सृष्टिकाले तज्जलोपर्य्यवस्थिता प्रलये। च तिरोभूता जलाभ्यन्तरस्थिता। इति श्रीब्रह्मवैवर्त्ते प्रकृतिखंडे। नारायणनारदसंवादे पृथिव्युपाख्याने १ अध्यायः॥

मेदिनीद्रवः पुं धूलिः इति त्रिकांडशेषः॥

मेदुरः पुं अतिशयस्निग्धः तत्पर्य्यायः सान्द्रस्निग्धः २ इत्यमरः॥

मेदुरा स्त्री काकोली इति राजनिर्घण्टः॥

मेदोजं क्ली अस्थि इति राजनिर्घण्टः॥

मेदोद्भवा स्त्री मेदा इति राजनिर्घण्टः॥

मेदोध्रः पुं वर्णसंकरजातिभेदः इति जटाधरः॥

मेदोवती स्त्री मेदा इति राजनिर्घण्टः॥

मेध ऋ ञ वधमेधासंगेषु इति कविकल्पद्रुमः ऋ अमिमेधत् ञ मेधति मेधते इति दुर्गादासः।


मेधः पुं यज्ञः इति जटाधरः॥

मेधा स्त्री धारणावती बुद्धिः इत्यमरः धारणाशक्ति युक्ता धीर्मेधा मेधते संगमे संगच्छतेऽस्यां सर्वं बहुकृतं विषयीकरोति इति वा मेधा मेधृ ञ संगे मेधायां समज्ञात। सरो दिभ्य श्राप वहुकृतविषयीकरणं धारणा यदुक्तं धारणाबुद्धेर्गुणाविशेष इति इति भरतः॥ मेधाकरौषधं यथा शालपर्णी। वचा सोमा ब्राह्मी ब्रह्मसुवर्चला। अभया च गुडूची च अटरूषकवाऽची पौ रस्त समे भीगे घृतं अस्य विपाचयेत् कंटकार्य्या रसं प्रस्थं दद्यात् व समन्वितं पचेत्। स्त्रीघृतं नामस्मृति मेधाकरं परं। इति गारुडे १९८ अध्यायः॥ मेधाकरगणो यथा सततमध्ययनतद्धस्तानकथा। अन्यतन्त्रशास्त्रावलोकनं सद्भिरावाह्यसेवा च॥ इति पुराणं॥

मेधाः पुं स्वायम्भुवमनुपुत्रः यथा अग्निध्र श्चाग्निबाहुश्च शिफः सवल एव च ज्योतिष्मान् द्युतिमान् हव्या मेधा मेधातिथिर्वसुः स्वायम्भुवस्यास्य मनोर्दशैते वंशवर्द्धनाः इति मात्स्ये ९ अध्यायः।

मेधाह्वा क्ली सितावरशाकं इति राजनिर्घण्टः मेधाकारके त्रि।

मेधाजित् पुं कात्यायनमुनिः। इति त्रिकाण्डशेषः॥



मेधातिथिः पुं मनुसंहिता टीका
कृत् मुनिविशेषः यथा मेधा
तिथि देवल आर्ष्टिषेण भरद्वाजा।
गौतमः पिप्पलादः इति श्री भा
गवते ८ स्कंधे १९ अध्यायः ॥
मेधारुद्रः पुं कालिदासः इति
त्रिकांडशेषः ॥
मेधावती स्त्री महाज्योतिष्मती
इति राजनिर्घंटः मेधाविशिष्टाच।
मेधाविनी स्त्रीब्रह्मणः पत्नी इति
मेदिनी ॥
मेधावी पुं शुकपक्षी इति मे
दिनी मदिरा इति राजनिर्घंटः।
पंडितः इति हेमचंद्रः ॥
व्याडिः इति त्रिकांडशेषः ॥
मेधायुक्ते त्रि इति मेदिनी।
मेधिः पुं खलेपशुबंधनार्थंन्यस्त
दारु इत्यमरः खलेधान्य मर्द्दन
स्थान मध्येपशुबंधन निमित्तं नि
हितं यद्दारु समेधिः मेथि इति
ख्याते इतिभरतः। तत्पर्यायः
मेथिः २ खलेवाली ३ इति
हेमचंद्रः अस्यस्थापनदिनं तत्र
वारो शुक्र बृहस्पती नक्षत्राणि
रेवतीस्वाती हस्तामूल मृगशिरा।
श्र तत्र लग्नं स्थिरं इति ज्योति
षतत्वं ॥

मेधिरः त्रि मेधावी इतित्रिकांड
शेषः ॥
मेधिष्ठः त्रि अतिशयमेधायुक्तः।
इतिव्याकरणं ॥
मेध्यं त्रि पवित्रं इत्यमरः
पवित्रः प्रयतः पूत इतिब्रह्मवर्गे
प्राणिविषय मात्र उक्तं इह तत्प्रा
णिद्रव्ये इतिभरतः। पूतं मेध्यं
पवित्रं स्याद्धी मे प्रयत निम्न।
लं निरोध्य श्रोविते मृष्ट नि
र्णिक्त मनवस्कर इति शब्द रत्ना
वली श्रुचिः इति मेदिनी ॥
मेध्यः पुं खदिरः यवः छागः
इति राजनिर्घंटः ॥
मेध्या स्त्री रक्तवचा रोचना इति
मेदिनी केतकी ज्योतिष्मती
शंखपुष्पी ब्राह्मी श्वेतवचा ॥
शमी मंडूकी इतिराजनिर्घंटः
मेनका स्त्री स्वर्वेश्या इति शब्द
रत्नावली तस्याः कन्या शकुन्तला
यथाविश्वामित्रात्मजैवाहं त्यक्ता
मेनकयावने वेदैतद्भगवान्कण्वो
वीरकिं करवाम ते ॥ इति
श्रीभागवते ९ स्कंधे २ अध्यायः
उमामाता यथा ततः प्रीता।
स्तु पितरस्तां दृष्ट्वातनयां निजां मे
नां देवाश्चशैलाय हिमयुक्ताय॥

वैदद्युः तां मेनां हिमवाल्लब्ध्वा।
प्रसादादेवतेभ्यश्च। प्रीतिमानभ
वत्तासौ रराम च यथेच्छ ततो
हिमाद्रिः पितृकन्यया समं स्वर्ग
स्थिवे विषयं यथेप्सितं अनीन
नन्सा तनयास्तु मेनाद्या पितृकाः
स्वयोषितोपमाः पुलस्त्य उवा
च मेनायां कन्यका स्तिस्रो जाता
रूपगुणान्विताः सुनाभ इति वि
ख्यात स्तत्रैव सुतयोऽभवत् नी
लांजनचय प्रख्या नीलेन्दीवरलो।
चना रूपेणानुपमा कालीनव्यस्या
मेनका सुता जाताः कन्यका।
स्तिस्रः षड्वर्षात्परतो सुता कर्त्तुं
तपः प्रयाता स्ता देवा स्ता दृष्ट्वा
शुभाः ततो गते कन्यके हे
तात्वा मेना तपस्विनी तपसो
वारयामास उमेत्येवाब्रवीत् सा
तदैव मा ता नाम्नास्याश्चक्रे पितृ
सुता शुभा उमत्येव हि कन्यायाः
साजगाम तपोवनं इतिवामने।
७४।७५ अध्यायः अपिचकथं
गिरिस्तु ता कालीवभूवजगतोंऽम
स्य कात्यायनीश्चक्रे ततः कथमा
पहरंय इति मार्कंडेयउवाच यदात्र
जगन्नं देवी पूर्वकात्यायनीसती
तदैव मनसा गच्छन्मेनकां हिमवति


रिं त्यक्त्वा प्राणा तदा देवी भूता
हिमवतः सुता शिवा विन्यस्त
मनसा सप्तविंशति वत्सरान् ॥
निनाय मेनका देवी परमा स्मृति
मिच्छती सप्तविंशतिवर्षान्ते जग
न्माता जगन्मयी सुप्रीता भवर
त्यर्थे प्राह प्रत्यक्षतां गता ॥
श्रीदेव्युवाच यत् प्रार्थितं त्वया
देवि मत्तस्तत् प्रार्थयाधुना ॥ ततः
साप्रथमं पुत्रशतं वव्रे यथा स्वि
नी पश्चात्तु तनया मेकां स्वरूप।
गुणशालिनीं कुलद्वयानन्दकरीं।
भुवन त्रयदुर्लभां ततो भगवती।
प्राह मेनकां मुनि सन्निभां॥
श्रीदेव्युवाच शतं पुत्राः समंव
त्तु भवत्या वीर्य्य संयुताः सुता
च तव देवानां मातृणांच रक्ष
सां हिताय सर्वजगतां भवि।
ष्याम्यहं भवते पत्रका जग
द्धात्री तत्रैवांतरधीयत ततः सा
कालिका देवी योगनिद्राजगन्मयी
पूर्वमुक्त सतीरूपाजन्मार्थं मेना।
कायथो समयस्यानुरूपेण मेन
काजठरे शिवा समद्भूय समुत्
पन्ना सा लक्ष्मी रिवसागरात् व
सन्तसमये देवी नवम्यांमृगयोगा।
तः अर्द्धरात्रौ समुत्पन्ना ग ॥

ऽव पाशिमंडलात् इति कालि
कापुराणे ७८ अध्यायः ॥
मेनकात्मजा स्त्री दुर्गा इति हला
युधः ॥
मेनकाप्राणेशः पुं हिमालयः
इति हेमचंद्रः ॥
मेना स्त्री मेनका इतिभरतद्विरूप
कोषः सा पितृकन्या । यथा
तां मानसीं मेरुसखः पितृणां
कन्यांकुलस्य स्थितये स्थितिज्ञः
मेनां मुनीनामपि माननीया मा
त्मनुरूपां विधिनोपयेमे । इति
कुमारसंभवे कालिदासः ॥ अ
पिच अग्निष्वात्ता बर्हिषदो द्विधा
तेषां व्यवस्थितिः । तेभ्यः स्वाहा
स्वधा यज्ञे मेना वैतरणी तथा
इतिकौर्मे १२ अध्यायः ॥
मेनाज्ञा स्त्री पार्वती इति हेम
चंद्रः ॥
मेनादः पुं विडालः । छागः ।
मयूरः इतिमेदिनी ॥
मेनाधवः पुं हिमालयः इति त्रि
कांडशेषः ॥
मेंथिका स्त्री पत्रविशेषः मेह
री मेंथी इति भाषा इतिकेचित्
मेप ऋ ङ. गत्यां इतिकविकल्पद्रुमः
ङ. मेपते ऋ अमिमेपत् ॥

इतिदुर्गादासः ॥
मेरकः पुं विष्णुशत्रुभेदः इति
हेमचंद्रः ॥
मेरुः पुं पर्वतविशेषः । तत्
पर्य्यायः सुमेरुः २ हेमाद्रिः ३
रत्नसानुः ४ सुरालयः ५ इत्य
मरः मिनोति क्षिपति ज्योतीं
षि उच्चत्वात् मेरुः डुमिञ्क्षेप
णे मीनातेरिति रुः इतिभरतः ॥
जपमालाग्रवर्त्तिन्येकामाला यथा
माला मेकैक मालाय सूत्रे संया
तयेत् सुधीः मुखेमुखंतु संयोज्य
पुच्छे पुच्छंतु योजयेत् गोपुच्छस
दृशी कार्य्याथवा सर्पाकृतिर्भवेत्
तत्सजातीय मेकाक्षं मेरुत्वेना ।
ग्रतो न्यसेत् इत्युत्पत्ति तंत्रे
९ पटलः करमालायां मेरु
र्यथा तिस्रोंगुल्य स्त्रिपर्वाणोमध्य
मा चैकपर्विका पर्वद्वयं मध्यमाया
मेरुत्वेनोपकल्पयेत् । इदंतु श
क्तिभिन्न विषयं शक्ति विषये।
मेरु र्यथा पर्वद्वय मनामायाःपरि
वर्जेन्न वै क्रमात् पर्वत्रयं मध्य
मायास्तर्ज्जन्येकं समाहरेत् । प
र्वद्वयंतु तर्ज्जन्या मेरुं तं विद्धि पा
र्वति ॥ श्रीविद्याविषये मेरु
र्यथा अनामा मध्यमायाश्च मूलाग्रंत


द्वयं द्वयं कनिष्ठायाश्च तर्ज्जन्या
स्त्रयं पर्व सुरेश्वरि अनामा म
ध्यमायाश्च मेरुः स्यादितियंमुभे
तल्लंघि न जपेद्दोषा यथा
अंगुल्यग्रेषु यज्जप्तं यज्जप्तं मेरु लं
घने पर्व संधिषु यज्जप्तं तत्सर्वं
निष्फलं भवेत् इतितंत्रसारः ।
मेरुकः पुं यक्षधूपः धुना इति
भाषा इतिशब्दचंद्रिका ॥
मेरुसावर्णीः पुं एकादशमनुः य
था ततस्तु मेरुसावर्णो ब्रह्मसूनु
र्मनुः स्मृतः ऋतश्च ऋतधामाच
विष्वक्सेनोमनुस्तथा इतिमात्स्ये ९
अध्यायः ॥
मेलकः पुं संगः इत्यमरः ॥
मेलकलवणं क्ली सौवर्चललवणं
इतिराजनिर्घंटः ॥
मेला स्त्री मेलकः मसिः इति
मेदिनी अंजनं इति हेमचंद्रः
महानीली इति राजनिर्घंटः
मेलामंदा स्त्री मस्याधारः इति
हारावली ॥
मेलाम्बुः स्त्री मस्याधारः इ
तिजटाधरः ॥
मेलाम्बुः पुं मस्याधारः इतिश
ब्दरत्नावली ॥
मेव ऋ ङ. मेवने इतिकविक
ल्प

द्रुमः ऋ अमिमेवत् ङ. मेवते ।
इतिदुर्गादासः ॥
मेषः पुं पशुविशेषः भेडा इति
भाषा तत्पर्य्यायः मेढ्रः २ उर
भ्रः ३ उरणः ४ ऊर्णायुः ५ वृष्णिः ६
एडकः ७ इत्यमरः ॥ मेण्ढः ८
हुडः ९ भृंगिणः १० अविः ११ लो
मशः १२ वली १३ अस्य मांसगुणाः
मधुरत्वं शीतत्वं गुरुत्वं विष्टं
भित्वं बृंहणत्वंच इति राजनि
र्घंटः अपिच पित्त श्लेष्मकरत्वं ।
कुसुम्भशाकेन सहत्याज्यत्वंच इ
ति राजवल्लभः लग्नविशेषः
ओषधिविशेषः इतिमेदिनी रा
शिविशेषः तत्पर्य्यायः क्रियः २
अस्याधिष्ठात्री देवता यमेषः अ
श्विनी भरणी कृत्तिकापादेकेन
मेषराशि र्भवति अत्रजातदेहशा
भवति शेषदशायां नेत्ररुक्खी ।
दयालुः यत्नीगानसखी धार्मिकः
धीरः मत्स्यमांसप्रीत सतत दृष्टो
दयः अस्यवर्णः आरक्तःपीतश्च
अयं क्रूरः पित्तोस स्वभावः ।
कांतिरहितः समांगः पर्वत
चारी पूर्वदिगधिपतिः वैश्यवर्णः
अल्पस्त्रीसंगः अल्पसंतानः बृहच्छ
प्रतिरवश्च इति ज्योतिषं ॥



रव्याश्रित नक्षत्र जात फलं यथा मेषे दिनेशे पुरुषः सवेशः सत्साहसः स्यान्नृपतेः समानः ।
कुध्यात्मतः पित्तकृतातपीडावक्रो द्रवा वा सततं महौजाः ॥
चंद्राश्रित नक्षत्र जात फलंयथा स्थिरजनेन रहितः स्वजनै र्नरः स्तन यतः प्रमदाविजितो भवेत् अजगते द्विजराज इतीरितं वि भूतयाद्भुतया सहितः श्रिया ।
तल्लग्न जातफलं यथा मेषलग्ने सगुल्मत्रस्थंडो मानी धनीशुभः क्रोधी स्वजनहंता च विक्रयी पर वत्सलः इतिकोष्ठीदीपः ॥
तल्लग्नस्य स्थूल मानं २ । ४ ७ इतिज्योतिस्तत्वं ॥ त्रिता रक शरोग्राकृति श्रवणा नक्षत्रस्य गगनमध्योदये मेषलग्नस्य अष्टा दशपलाधिक दंडैकोगतो भ वेत् यथा तारका त्रय मिते शराकृतौ केशवे गगन मध्यव र्तिनि मत्तवारणागते ऽजलग्नतो । निर्यधु गंज महीभ लिप्तिकाः । मर्दलाकृति पंचतारक धनिष्ठान क्षत्रस्य मस्तकोपर्युदये मेषल ग्नस्य षट्त्रिंशत्पलाधिकदंडद्वयं गतंस्यात् यथा । मस्तकोपरि । समागते धने मर्दलाकृतिनिंच चतारके यांतिकांतिमति मेष लग्नतः सार काः इतिकालिदासकृत रात्रि लग्ननिरूपणं ॥
मेषकः पुं जीवशाकः इतिराज निर्घंटः ॥
मेषकम्बलः पुं मेषलोमनिर्मितं वस्त्रं तत्पर्य्यायः ऊर्णायुः २ इत्यमरः ॥
मेषलोचनः पुं चक्रमर्दः इति भावप्रकाशः मेष वल्कलस्य च त्वच ॥
मेषवल्ली स्त्री अजशृंगी इतिभाव प्रकाशः ॥
मेषविषाणिका स्त्री मेषशृंगी इति रत्नमाला ॥
मेषशृंगः पुं स्थावरविषभेदः ॥ इति हेमचंद्रः ॥
मेषशृंगी स्त्री अजशृंगीवृक्षः मे ढाशिंगी इतिभाषा तत्पर्य्यायः नंदीवृक्षः २ मेषविषाणिकाः ३ वल्लः ४ वल्लवर्द्धनं ५ मेढ्रशृंगी ६ शृङ्गद्रुमा ७ इतिरत्नमाला ॥
मेषा स्त्री त्रुटिः गुजराटीपलाइच इति भाषा इतिशब्दचंद्रिका मेषां डः पुं इंद्रः । इतित्रिकांडः ।

मेषांत्री स्त्री वल्लांत्रीवृक्षः इति राजनिर्घंटः ॥
मेषालुः पुं वर्वरावृक्षः इतिशब्द चंद्रिका ॥
मेषाक्षयः पुं चक्रमर्दः इतिराज निर्घंटः ॥
मेषातिकुसुमः पुं चक्रमर्दः इति रत्नमाला ॥
मेषिका स्त्री मेषी इतिशब्दरत्ना वली ॥
मेषी स्त्री तिनिषवृक्षः मटामांसी इति राजनिर्घंटः मेषस्त्रीजा तिः तत्पर्य्यायः जालकिनी २ अविः ३ इति त्रिकांडशेषः ॥ अस्याडुग्धगुणाः मधुरत्वं गाढ त्वं स्निग्धत्वं कफापहत्वं वाता मयकारत्वं स्थौल्यत्वं लोमशा याश्चेत् गुरुत्वं हृद्विरत्वंच ॥ अस्यादधि गुणाः सुस्निग्धत्वं क फपित्त करत्वं गुरुत्वं वाते रक्त वातेच पथ्यत्वं शोफव्रणा ना शित्वंच अस्यान्नवनीत गुणाः क्लिष्टगंधत्वं शीतलत्वं मेधाह रत्वं पुष्टिदत्वं स्थौल्यत्वं । म दाग्नि दीपनत्वं सारकत्वं । पा के हिमत्वं लघुत्वं योनि शूलेक फे वाते दुर्नाम्निच हितत्वंच । इत्युक्तिस्थाने गुदशूले इतिपुस्त कांतरे पाठः । तस्या घृत गु णाः अतीव गौरवात् सुकुमार देहिनां वर्द्धनत्वं बुद्धिपाटवहारत्वं बलावहत्वं वपुषां विसर्गेपि । कारित्वंच इतिराजनिर्घंटः ॥
मेषूरणं क्ली दशामलग्नेयथा के मस्थानेच दशामत्वं मेषूरणामाष्ट इतिज्योतिस्तत्वं ॥
मेहः पुं प्रमेहरोगः इत्यमरः । मेघः इति शब्दचंद्रिका । प्र स्रावः इतिहेमचंद्रः ॥
मेहघ्नी स्त्री हरिद्रा इतिरत्नमाला
मेहनं क्ली शिश्नः इत्यमरः मूत्र इति मेदिनी भावेऽनट्प्रत्यये । मूत्रोत्सर्गश्च ॥
मेहनः पुं मुष्ककवृक्षः इति राज निर्घंटः ॥
मेहना स्त्री महिला इतिकेचित्
मेहणं क्ली यज्ञीयपात्रविशेषः यथा मेक्षणादीनाह च्छंदो गप रिशिष्टं इध्मजातीय मिध्माद्ध प्रमाणं मेक्षणं भवेत् । वृत्तं । बार्तेच ष्टाग्र मवदानक्रियाक्षमं इध्माद्धप्रमाणं प्रादेश द्वयमि । ध्मस्य प्रमाणं परिकल्पितमिति त दर्द्धं यथैव दर्वी । विशेषस्तु ।



महास्कवे दर्वीह्यंगल प्रस्थया त
रीयेण त मेहनं सुखलोहूरवले।
वीर्य स्त्रायेत सहखेनथा इति
संस्कारतत्त्वं ॥
मैत्रं क्ली अनुराधानक्षत्रं १७ यथा
मैत्राद्य पादे स्वपितीह विष्णु
र्वैस्वस्य मध्ये परिवर्त्तते च । पौ
ष्णावसाने च सुरारिहन्ता प्रबुध्यते
मास चतुष्टयेन इति तिथ्यादि
तत्त्वं ॥ पुरीषोत्सर्गः यथा ।
ततः कल्यं समुत्थाय कुर्य्यान्मैत्रं
नरेश्वर नैर्ऋत्यामिषुविक्षेप म
तीत्याभ्यधिकं भुवः कल्यं उषः
काले मैत्रं मित्रदेवताकं पा
युसंबंधात् पुरीषोत्सर्गः इत्या
ह्निकाचारतत्त्वं अपिच । ब्राह्मे
मुहूर्त्ते चोत्तिष्ठेत् स्वस्था रक्षार्थं
मानुषः शरीरचिन्तां निर्वर्त्य मैत्रं
कर्म समाचरेत् मैत्रं मल मू
त्रोत्सर्गः इति राजवल्लभः ॥
तत्र निषिद्ध स्थानादि यथा छाया
कूप नदी गोष्ठ चैत्याम्भः पथि
भस्मसु अग्नौ चैव श्मशाने च
विण्मूत्रे न समाचरेत् न गोमये
न कृष्टे वा महावृक्षे च शाद्वले
न तिष्ठन् वा न निर्वासा नच पर्वत
मस्तके । न जीर्णदेवायतन---- व
ल्मीके कदाचन न ससत्त्वेषु गर्त्ते
षु गच्छन् वा समाचरेत् तुषा
गार कपालेषु राजमार्गे नचैवच
न क्षेत्रे न विले वापि न ती-
र्थे न चतुष्पथे नघानदसमीपे
वा नोषरे न पराशुचौ । न सो
पानत्पादुको हि छत्री वा नान्त
रीक्षके न चैवाभिमुखः स्त्रीणां
गुरुब्राह्मणयोर्गवां न देव देवा
लययो रपामपि कदाचन । न
ज्योतींषि निरीक्षन् वा न चाभि-
मुखोथवा प्रत्यादित्यं प्रत्यनलं
प्रतिसोमं तथैवच । इति कौ
र्मे उपरिभागे १२ अध्यायः ।
अस्य विस्तारस्तुपाद्मे उत्तरखंडे ।
१९ अध्याये द्रष्टव्यः ॥ मित्र
संबंधिनि त्रि ॥
मैत्रः पुं ब्राह्मणः इति त्रिकांड-
शेषः ॥
मैत्रभं क्ली अनुराधानक्षत्रं इति
जटाधरः ॥
मैत्रावरुणः पुं अगस्त्यः इति शब्द
रत्नावली ॥
मैत्रावरुणिः पुं अगस्त्यः इत्य
मरः ॥
मैत्री स्त्री मित्रस्यभावः ॥ मित्रस्य
कर्म इत्यमर भरतौ ॥ व्यक्ति

विशेषे मैत्रीकरण निषेधो यथा
विदिष्ट पतितोन्मत्त बहुवैरानि
कीटकैः बंधकी बंधकीभर्तृक्षुद्रा
नृतकथैः सह । तथातिव्ययशी
लैश्च परीवादरतैः शठैः । बुधो
मैत्रीं न कुर्वीत नैकः पंथानमा
श्रयेत् इति विष्णुपुराणे तृती
येंशे १२ अध्यायः ॥ विदिष्टादि
भि मैत्री न कुर्वीत बहुभिर्वैरं ।
यस्य अतिकीटकः अत्यंतकीटवत्
पीडकः कंटके इति पाठेपि ।
स एवार्थः बंधकी असती इति
तट्टीका ॥
मैत्रीबलः पुं बुद्धः इति त्रिकांड
शेषः ॥
मैत्रेयः पुं बुद्धभेदः इति त्रिका
ण्डशेषः मुनिविशेषः । यथा
एवं ब्रुवाणं मैत्रेयद्वैपायन सु
तो बुधः प्रीणयन्निव भारत्या वि
दुरः प्रत्यभाषत । इति श्रीभाग
वते ३ स्कंधे ७ अध्यायः । मित्र
संबंधिनि त्रि ॥
मैत्रेयिका स्त्री मित्रयुद्धं इति
त्रिकांडशेषः ॥
मैत्र्यं क्ली स्त्री मित्रस्यभावः मित्र
स्य कर्म स्त्री । स्त्री इत्यमरभरतौ ।
मैथिली स्त्री सीता इति हेम
चंद्रः ॥
मैथुनं क्ली अग्न्याधानं यथा मनु
शातातपौ असपिंडा च या मा
तुरसगोत्रा च या पितुः सा प्रशस्ता
द्विजातीनां दारकर्मणि मैथुने ।
मैथुने मिथुन शब्दवाच्य स्त्री पुंस
साध्ये अग्न्याधाने पुत्रोत्पत्ता
वौ इत्युद्वाहतत्त्वं ॥ संगतं
रतं इत्यमरः ॥ संगतिः संग
मो दारसंयोगः विवाह इति कु
लिंगः रतं सुरतं अनयोर्मै
थुनं मिथुनात् संगमे इदमर्थे
स्वार्थे रतौ निघ्याद्यार्थे वाणः । सम्ब
न्धे सुरते शुभे राशौ मिथुन मि
थुने इति व्याडिः ॥ इति तट्टी
कायां भरतः ॥ शेषस्य पर्य्या
यः सुरतं २ अभिमानितं ३ धर्षि
तं ४ संप्रयोगः ५ अनारतं ६
अब्रह्मचर्य्यकं ७ उपसृष्टं ८ विभ
द्रं ९ क्रीडारत्नं १० महासुखं ॥
इति त्रिकांडशेषः ॥ व्यवायः ११
ग्राम्यधर्मः १२ रतं १४ निधुवनं १५
इत्यमरः । अस्य गुणाः । धातु
क्षयकारित्वं रतिसंतानत्वंच ।
अतिशयमैथुनस्य श्वास कास
ज्वरकारित्वं अमैथुनस्य प्रमेहमेद
ग्रंथि रोग अग्निमान्द्यकारि ॥

वं स्त्री संसर्ग रहितस्य आयु
रजरा शरीरबल वर्णाक्षिरोपचित
मांसानि भवंति शुक्रस्थानाञ्च ॥
विस्थान मेकस्थान लोक समीप
प्रातः कालसंध्याकाल पर्वकालेषु
नस्य त्याज्यत्वं एतत्कर्माणि रज
स्वलाकामा मलिनावंध्यावर्णाज्येष्ठा
वयोज्येष्ठा व्याधियुक्तांगहीनासा
नी वेश्या योनिदोषयुक्ता सगो
त्रा गुरुपत्नी भिक्षुकी कपटव्रतया
रिणी दृष्टा च त्याज्या रजस्वला
गमने दृष्ट्यायु स्तेजः क्षयोऽधर्मश्च
भवति कपटव्रतयुक्ता गुरुपत्नी।
सगोत्रा दृष्टा गमने एवं पर्वका
ले संध्या कालेचस्त्री मैथुने पाप
मायुः क्षयश्च भवति वयो रूप
गुणोपेता कुलशील समन्विता
अधिकामां हृष्टामलंकृता वाजी
करण पीडितांच प्रमदां हृष्टो
ऽधिकामश्च पुरुषः सेवेत शुक्र
वर्द्धकद्रव्यं सशर्करं शीतलजल
म्वा पीत्वा कामबाणचंचलांसह
पा मनिंद्यां हृष्टां प्रमदामायुष्कृ
रे हृष्टः कामुको गतान्तरस्तथ
स्वपेत् असहकृमने तु नरो
यातवैषम्यमेति रतांतेस्नानंसा
शर्करक्षीरपानं निद्रागोडिकरस

भोजनंच हितं इतिराजवल्लभः
व्रतदिवसे अष्टांग मैथुनस्य ॥
त्याज्यत्वं यथा स्मरणं कीर्त्तनंके
लिः प्रेक्षणं गुह्यभाषणं संकल्पो
ऽध्यवसायश्च क्रियानिष्पत्तिरेवच
मैथुनं विविधं त्याज्यं व्रतेक्रीडा
विरुद्धये इतिब्रह्मवैवर्त्तेगणपति
खंडे ४ अध्यायः ॥ अस्य विधि
निषेधौ यथा ऋतावुपगमः शस्तः
स्वपत्न्या मवनीपते पुंनामर्क्षे शु
भे काले ज्येष्ठ युग्मासु रात्रिषु ।
नास्नातां तु स्त्रियं गच्छेन्नातुरां न
रजस्वलां नानिष्टां न प्रकुपितां ।
नाप्रशस्तां न गुर्विणीं नादक्षिण
णां नान्यकामां नाकामां नान्ययो
षितं क्षुत्क्षामा मतिभुक्तां वा स्वय
मेभि र्गुणै र्युतः स्नातः स्रग्गंध
धृक् प्रीतो नाध्मातः क्षुधितोऽपि
वा सकामः सानुरागश्च व्यवायं
पुरुषो व्रजेत् चतुर्द्दश्यष्टमी चैव
अमावास्याथ पूर्णिमा पर्व्वाण्येता
नि राजेंद्र रविसंक्रांति रेवच ॥
तैलस्त्री मांससंभोगी पर्वस्वेतेषु
वैपुमान् विण्मूत्र भोजनं नाम
प्रयाति नरकं मृतः अशेष पर्व
स्वेतेषु तस्मात्संयमिभि र्बुधैः भा
व्यं सच्छास्त्र देवेज्या ध्यान जप

परै र्नरैः नान्ययोनावयोनौ ॥
वोनोपभुक्तौषध स्तथा देवद्विज
गुरूणांच व्यवायी नाश्रयी भवेत्
चैत्य चत्वरे तीर्थेषु नैव गोष्ठे च
तुष्पथे नैव श्मशानोपवने सलि
लेषु महीपते प्रोक्त पर्व स्वशे
षेषु नैव भूपाल संध्ययोः गच्छे
द्व्यवाय मतिमान् मूत्रोच्चार पीडि
तः पर्वस्वभिगमो ऽधन्यो दिवा
पापप्रदो नृप भुवि रोगावहो।
नृणां मप्रशस्तो जलाशये परदारा
न्नगच्छेत मनसापि कदाचन किमु
ताचास्थिवंधोपि नास्ति तेषु व्यवायि
नां मृतानरक मभ्येति हीयते
त्रापि चायुषः परदाररतिः पुंसा
मुभयत्रापि भीतिदा । इति मत्वा
स्वदारेषु ऋतु मत्सुबुधो व्रजेत्
यथोक्त दोषहीनेषु सकामेष्वनृता
वपि इति विष्णुपुराणे ३ अंशे
११ अध्यायः परस्त्र्यादिगमने दं
डो यथा ब्राह्मणः क्षत्रियो वैश्यः
तत्र विट् शूद्रपितः । व्रजेदा
ण्यो भवेद्राज्ञा दंड उत्तम साहसं
वैश्यागमे च विप्रस्य क्षत्रियस्य।
त्यजागमे मध्यमं प्रथमं वैश्य।
दंड्यः शूद्रागमाद्वैश्य शूद्रःसव
र्णागमने शतंदंड्यो महीभुजा वै


श्यश्च द्विगुणं राजन् क्षत्रियस्त्रिगुणं
तथा ब्राह्मणश्च भवेद्दंड्यस्तथा।
रागं स्वतगुणं अ‒‒मासभवेद्दंडः
सगमापिका भवेत् माता मातृ
स्वसा श्वश्रू मातुलानी पितृस्वसा
पितृव्य सखिशिष्यस्त्री भगिनी तत्
सखी तथा भागिनेयी तथा चैव
राज पत्नी तथैवच तथा प्रव्रजिता
नारी वर्णोत्कृष्टा तथैवच इत्यग
म्यास्तु निर्दिष्टा स्तासांतु गमनेनरः
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वध
मर्हति भ्रातृ भार्य्यागमे पूर्वोद्दंड
स्तु द्विगुणो भवेत् । चांडालीचा
श्वपाकीं वा गच्छन्त्वधमवाप्नुयात् ।
तिर्य्यग्योनौ च गोवर्ज्यं मैथुनं यो
ऽभिसेवेत सपणं प्राप्नुयाद्दंडं ।
तस्याश्च यवसोदकं सुवर्णंच भ
वेद्दंड्यो गां व्रजन् मनुजोत्तम वे
श्यागामी द्विजोदंड्यो वेश्य शुल्क
समं पणं गृहीत्वा वेतनं वेश्या
लोभादन्यत्र गच्छति वेतनं द्विगु
णं दद्याद्दंडंच द्विगुणंतथा अन्य
मुद्दिश्य यो दद्यात् नृपेदन्यस्य
कारणात् तस्यदंडं भवेद्राजन् ।
सुवर्णस्यचमाषकं नीत्वाभोगान्
योदद्याद्दाप्यो द्विगुणं वेतनं ।
राजश्च द्विगुणं दंडंतथापर्मीन

ह्रीयते वहूनां व्रजता मेकां सर्वे ते हिरण्यं दृमं रघुः पृथक् पृथक् सर्वे दंडंच हिरण्यं परं इति मात्स्ये २८ अध्यायः ॥
मैनाकः पुं पर्वतविशेषः तत्पर्य्यायः हिरण्यनाभः २ सुनाभः ३ हिमवत्सुतः ४ इतिजटाधरः स तु हिमालयस्य ज्येष्ठपुत्रः । यथा ततो भगवती प्राह मेनकां शशि सन्निभां स्मित पूर्वं तदा तस्याः पूरयंती मनोरथं । श्रीदेव्युवाच शतं पुत्राः संभवंतु भवत्या वीर्य्यसंयुताः तत्रैको वलवान् मुख्यः प्रथमं संभविष्यति एवमुक्ता जगद्धात्री तत्रैवांतरधीयत मेनकाच शरदंश्चाशस्या तं प्रविवेश ह । ततः काले तु संप्राप्ते मैनाकं मच्युलोत्तमं । पक्षेण सह योधापि सिंधुमध्ये प्रवर्त्तते मेनका सुषुवे देवी देवेंद्रं स्मद्दयागतं अभ्यागतं । शतं पुत्रान् क्रमात्साप्यसुवे चह । इति कालिकापुराणे ४ अध्यायः
मैनाकस्वसा स्त्री पर्वती इति हेमचंद्रः ॥
मैनिकः पुं जालिकः इतिसिद्धांतकौमुदी ॥

मैन्दः पुं विस्रवध्यासुरविशेषः । इति हेमचंद्रः वानरविशेषः ॥ इति रामायणं ॥
मैन्दहा पुं विष्णुः इति हेमचंद्रः ॥
मैरेयं क्ली मद्यविशेषः इत्यमरः यद्यपि सीधुरिक्षुरसैः पक्वैर पक्वैरासवो भवेत् मैरेयं धातकीपुष्प गुड धान्याम्ल संहितं इति माधवेन भेदः कृतः तथापि स्मृत मनोहरस्नेह शुक्रं मारं कामं जनयति मैरेयं सेव्यः । निपातनादान एवं इतिभरतः ।
मोघं त्रि निरर्थकं इत्यमरः हीनं इति मेदिनी ॥
मोघः पुं प्राचीरं इति शब्दमाला ॥
मोघपुष्पा स्त्री वंध्या इतिराजनिर्घंटः ॥
मोघा स्त्री पाटलावृक्षः इति मेदिनी विडंगं इतिशब्दमाला ॥
मोघोलिः पुं प्राचीरं इति हारावली ॥
मोचं क्ली कदलीफलं इत्यमरः
मोचः पुं शोभांजनवृक्षः इति मेदिनी ॥
मोचकः पुं मोचः ॥ कदली ।

शिग्रुः विरागी इति हेमचंद्रः मुष्ककवृक्षः इति राजनिर्घंटः
मोचनं क्ली मोक्षः कल्कनं दम्भः शाठ्यं इति भुवधातो भीवे ऽनट्प्रत्ययेन निष्पन्नं ॥
मोचनी स्त्री कंटकारी इति जटाधरः मोचकश्चैव ॥
मोचरसः पुं शाल्मलिनिर्यासः ॥ तत्पर्य्यायः मोचस्रुत् २ मोचस्रावः ३ मोचनिर्यासः ४ पिच्छिलसारः ५ सुरसः ६ शाल्मलीवेष्टः ७ मोचसारः ८ अस्य गुणाः कषायत्वं कफ वात हरत्वं । रसायनत्वं वल पुष्टिवर्ण वीर्य्यप्रसादप्रदत्वं स्निग्धत्वं ग्राहित्वंच । इति राजनिर्घंटः ॥
मोचा स्त्री शाल्मलिवृक्षः कदलीवृक्षः इत्यमरः नीलीवृक्षः इतिराजनिर्घंटः ॥
मोचाटः पुं कृष्णजीरः रंभास्थि मलयोद्भवः । इतिमेदिनी
मोची स्त्री हिलमोचिका इतिरत्नमाला ॥
मोटकं क्ली पितृदानार्थद्विगुणभुग्नकुशत्रयं यथा इतिहिरण्यगर्भदर्भमोटकं पितृमत्स्यग्रासपार्श्वे दद्यात् इतिश्राद्धप्रयोगतत्वं ॥

मोटकी स्त्री रागिणीविशेषः इति हलायुधः ॥
मोटनं क्ली चूर्णीकरणं आक्षेपः इतिमुटधात्वर्थदर्शनात् ॥
मोटनः पुं वायुः ॥ इति राजनिर्घंटः ॥
मोटनकं क्ली एकादशाक्षरछंदो विशेषः यथा स्फोटनकं तज्जाज्वल गौ रंगे लघु मल्लकला ऊषालस्यावरमहाभटमादनकं यः केलि लवनकार सभे संसार रिपुं प्रति मोटयतु । इति छंदोमंजरी ॥
मोटा स्त्री वला इतिराजनिर्घंटः
मोट्टायितं क्ली स्त्रीणां स्वभाविक दशविधालंकारांतर्गतालंकार विशेषः इति हेमचंद्रः तल्लक्षणं यथा कांत स्मरण वार्त्तादौ हृदि तद्भाव भावतः प्राकट्य मभिलाषस्य मोट्टायितमुदीर्य्यते इत्युज्ज्वलनीलमणिः ॥
मोणः पुं शुष्कफलं नक्रः मक्षिका सर्पकरंडः इतिमेदिनी ।
मोदः पुं हर्षः इतिशब्दरत्नावली ॥
मोदकः पुं क्ली खाद्यविशेषः ॥ मोय्या इतिभाषा इत्यमरः




अस्पदानमंत्रो यथा मोदकं
स्वादुसंयुक्तं शर्करादि विनिर्म्मितं
मया निवेदितं भक्त्या गृहाणगण
नेश्वरि इति दुर्गोत्सवपद्धतिः ॥
गुडः यवासशर्करा इति राज
निर्घण्टः शर्करादिद्रव्यपक्वौषधं।
विशेषः अस्य पूर्णवीर्य्यं षण्मासं
तिष्ठति इति सुखबोधः हर्षके।
त्रि। इति मेदिनी ॥
मोदकः पुं वर्णसंकरजातिविशे
षः मयरा इति भाषा सच शूद्रायां
क्षत्रियात् जातः। इति स्मृतिः
मोदनं क्ली शिक्थकं इति राज
निर्घण्टः हर्षः मुदधातोर्भावे दर्श
नात् ॥
मोदमोदिनी स्त्री जम्बुः इति राज
निर्घण्टः ॥
मोदयन्ती स्त्री वनमल्लिका काठ
मल्लिका इति भाषा यथा मदयन्ती
गन्धवती मोदयन्ती खरत्वचा इति
रत्नमाला अपिच तृणशून्या मो
दयन्ती भूपदी मदयन्तिका इति
शब्दरत्नावली ॥
मोदा स्त्री अजमोदा। इति राज
निर्घण्टः ॥
मोदाख्यः पुं आम्रवृक्षः इति
राजनिर्घण्टः ॥

मोदाख्या स्त्री अजमोदा इति
राजनिर्घण्टः ॥
मोदितः त्रि हर्षयुक्तः मुदधातोः
कर्म्मणि क्त प्रत्ययेन निष्पन्नः।
मोदिनी स्त्री अजमोदा मल्लिका
यूथिका कस्तूरी ॥ मदिरा
मल्लिकापुष्पविशेषः तत्पर्य्यायः
वट पत्री १ कुमारिका २ हंस
मल्लिका ४ अस्य गुणाः। नेत्र
रोगापहन्तृत्वं। कटुत्वं, उष्णत्वं।
व्रणघ्नत्वं गन्धबहुलत्वं आस्यज
रोगनाशित्वंच इति राजनिर्घण्टः
मोरटं क्ली इक्षुमूलं अंकोटपुष्पं
समराज्ञात् परत्वीरं। इति
मेदिनी ॥
मोरटः पुं लताप्रभेदः॥ क्षीर
मोरटा इति भाषा तत्पर्य्यायः
कर्णपुष्पः २ पीलुपत्रः ३ मधुस्रवः
४ घनमूलः ५ दीर्घमूलः ६ पुरुषः
क्षीरमोरटः ८ क्वचित्। पुस्तके
कर्णपुष्पस्थाने क्षीरपुष्प इति पील
पत्रस्थाने पीलुपत्र इति च पाठः
अस्य गुणाः क्षीरबहुलत्वं मधु
रत्वं कषायत्वं पित्तदाह ज्वरना
शित्वं वृष्यत्वं बलविवर्द्धनत्वंच
इति राजनिर्घण्टः ॥
मोरटकं क्ली इक्षुमूलं इति राज

निर्घण्टः ॥
मोरटा स्त्री मूर्वा इत्यमरः ॥
मोषकः पुं तस्करः इत्यमरः
मोषणं क्ली लुण्टनं छेदनं वधः
इति मुषधातोर्भावे ल्युट् प्रत्य
येन निष्पन्नं ॥
मोषिता त्रि मोषणकर्त्ता चौरः
इति मुषधातोस्तृन् प्रत्ययेन।
निष्पन्नं ॥
मोहः पुं मूर्च्छा इत्यमरः ॥ अ
विद्या इति मेदिनी ॥ दुःखं
इति शब्दरत्नावली ॥ देहादिषु
आत्मबुद्धिः इति गीतासुबोधिन्यां
श्रीधरस्वामी ॥ असौ ब्रह्मणो।
बुद्धितो जातः। यथा बुद्धे र्मो
हः समभवद्दहंकारादभून्मदः प्र
मोद स्याभवत् कंठान्मृत्युर्लोचन
तोनृप इति मात्स्ये ३ अध्यायः
मोहस्वरूपं यथा मम माता
मम पिता ममेयं गृहिणी गृहं
एतदन्यं ममत्वं यत्समोह इति
कीर्त्तितः। इति पाद्मे क्रियायो।
गसारे १९ अध्यायः ॥ धर्म्म
विमूढत्वं यथा अकामतः कृतं
पापं वेदाभ्यासेन नश्यति ॥
कामतस्तु कृतं मोहात् प्रायश्चि।
त्तैः पृथग्विधैरिति तत्र मोहा

दिति को मोहः। अत्र मोह श
ब्देन देवेन्द्रबुद्धि पूर्व्वो व्यतिक्रमः
उच्यते पठितं नित्यं पुराणे।
सांशपायनः इति भविष्य पुराण
वचनात् जात बुद्धि पूर्व्वो व्यतिक्र
मो मोहः इति जितनः। तत्र
कामता सामर्थ्यादेव बुद्धेर्लब्धत्वात्
उच्यते मूढस्य ब्राह्मणी मोहा
त्कृत इत्यादौ मूढत्वविषये इति
धातवर्थानुसारात् अज्ञानमात्रं मो
हः यत्र तु कामना शेषोऽस्ति तत्र।
भविष्य पुराणे शंकेतित मोहश
ब्दो न ग्राह्यः किंतु धर्म्मविमूढत्वं।
मोहः सचाधर्म्मे बुद्धौ सत्यामपि
कर्त्तव्ये रागात् कर्त्तव्यता भ्रमः
यथा व्यासः। मोहो धर्म्मविमूढत्वं
मानस्त्वात्माभिमानिता एवंच भ
विष्यपुराणीय बुद्धि शब्दोप्यधर्म्म
ज्ञानमेवाभिधत्ते सत्यधर्म्मज्ञाने।
पापगौरवार्थमिदमुक्तं मोहादि
ति इति प्रायश्चित्तविवेकः ॥
मोहवृक्षो यथा सनत्कुमार उवाच श्रूय
ता मभिधास्यामि सर्वसंदेह नाश
नं स्वरूप मुपदेशास्य सर्वं वित्ता
न दर्शनं लोभः पापस्य बीजो।
ऽयं मोहो मूलं च तस्य हि असत्य
तस्य च स्कंधो माया शाखा



स्य विप्रस्य स याम्यत्युपहास्यतां
भविता वार्षिकी पूजा देवतानां
युगे युगे नवमाख्यांच संक्रान्त्यां
न भविष्यति साधुनः इत्युक्त्वा
मोहिनी पीप्रं जगाम मदनाल
यं तेनसार्द्धं रतिं कृत्वा बभूव
विज्वरा पुनः इतिब्रह्मवैवर्ते श्री
कृष्णजन्मखंडे ३२ अध्यायः ।
विस्तरस्तुब्रह्मनरयाहे द्रष्टव्यः ।
मोक्ष कि क्षेपे इतिकविकल्प
द्रुमः किमोक्षयति मोक्ष ति
इतिदुर्गादासः ॥
मोक्षः पुं मुक्तिः पाटलिवृक्षः
मोचनं इति मेदिनी । मृत्युः
इतिहेमचंद्रः मोक्षधर्मस्तु म
हाभारते शांतिपर्वणि द्रष्टव्यः
मोक्षकः पुं मुष्ककवृक्षः इति
राजनिर्घंटः ॥
मोक्षोपायः पुं मुक्तिसाधनं
तत्तु तपः शमादिः । योगः
ज्ञानंच इति हेमचंद्रः ॥
मौकुलिः पुं काकः इतिहेम
चंद्रः ॥
मौक्तिकं क्ली मुक्ता इत्यमरः
मौक्तिकतंडुलः पुं धवलयवनालः
इति राजनिर्घंटः ॥
मौक्तिकप्रसवा स्त्री शुक्तिः इति
राजनिर्घंटः ॥
मौक्तिकशुक्तिः स्त्री शुक्तिः मुक्ता
स्फिटुक इति भाषा इति राज
निर्घंटः ॥
मौखर्य्यं क्ली मुखरत्वं मुखरस्यभा
व इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नं ।
मौखिकं त्रि मुखसंबंधि मुख
स्येदमित्यर्थे ठिक प्रत्ययेननिष्पन्नं
मौंजी स्त्री मुंजनिर्मितमेखला ।
यथा विप्रस्य क्षत्रियस्यापि मौं
जी स्याद्दक्षिणायने दक्षिणे च
विशां कार्य्यं नानध्यायेन संक्रमे
मनुः मौंजी त्रिवृत् समाश्लक्ष्णा
कार्य्या विप्रस्य मेखला क्षत्रियस्य
च मौर्वीज्या वैश्यस्य शाणतान्तवी
मुंजालाभे तु कर्त्तव्या कुशाश्मं
तक वल्वजैः त्रिवृता ग्रंथिनैकेन
त्रिभिः पंचभिः रेव वा ॥ इति
संस्कारतत्त्वं ॥
मौंजीतृणाख्यः पुं मुंजः इति
राजनिर्घंटः ॥
मौंजी पत्रा स्त्री वल्वजा इतिराज
निर्घंटः ॥
मौंजीवंधः पुं मुंजमेखलाबंधने
उपनयन मितियावत् यथा जन्म
मात्रस्य सिद्धे नीवस्य शत्रुभेग्रा
सेः मौंजीवंधः शुभः पौक्ष

श्चैत्रे मीनगते रवौ । इति ज्यो
ति र्निबंधे नारदवचनं ॥
मौढ्यं क्ली मोहः इति हेमचंद्रः
मौद्गलिः पुं काकः इति त्रिकांड
शेषः ॥
मौद्गल्यः पुं मुद्गलमुनिपुत्रः सच
गोत्रकारकः अस्यपंचप्रवराः ॥
यथा और्वच्यवन भार्गवजामदग्न्या
प्लुवंतः इतिकुलदीपिका ॥
मौद्गीनं क्ली मुद्गभवोचितक्षेत्रं ।
इत्यमरः ॥
मौनं क्ली शब्दप्रयोगराहित्यं तत्
पर्य्यायः अभाषणं २ तूष्णीं ३
तूष्णीकां ४ इत्यमरः कर्म वि
शेषे मौनाचरणं यथा उच्चारे
मैथुने चैव प्रस्रावे दंतधावने
स्नाने भोजन काले च षट्सुमौ
नंसमाचरेत् इतिनिथ्यादितत्त्वं
मौनी पुं मुनिः इतिजटाधरः
मौनवृक्षे त्रि यथा सिनीवाली
कुहूर्वापि यदिसोमदिनेभवेत्
गोसहस्रफलं दद्यात् स्नानंय
न्मौनिना कृतं एतच्चमौनमरु
णोदय मारभ्य स्नानपर्य्यन्तका
र्य्यं नतु स्नानकालमात्रे इतितिथ्या
दितत्त्वं ॥
मौनेयः पुं गंधर्वगणविशेषः
यथा गंधर्वाप्सरसः पुण्या मौने ।
याश्च निबोधत चित्रसेनो ग्रसेनो
च्च कर्णोपुरनिपस्तथा । धृतराष्ट्र
स्तथामांस्य सूर्य्यवर्चास्तथैवच यु
गतत्पतान् कार्ष्णि नंदिश्चित्ररथ
स्तथा त्रयोदशः । शालिशिराः
पर्ज्जन्यश्च चतुर्दशः इत्येते देव
गंधर्वामौनाः विशाख्यभास्वराः इति
वह्निपुराणं ॥
मौरजिकः त्रि मुरजवादकः इत्य
मरः ॥
मौर्व्वं क्ली जाड्यं । इतिहेमचंद्रः
मौर्वी स्त्री धनुर्गुणः इत्यमरः
अजश्रृंगी कोंगा इति भाषा
इति रत्नमाला ॥
मौलः पुं भूम्यादेर्मूलज्ञाता ॥
मोडल इति भाषा यथा यंपर
स्परया मौलाः सामंताः स्वामिने
विदुः तदन्वयस्यागतस्य दानवा
गोत्रजे मेहि इति दायतत्त्वे ॥
तस्य लक्षणंयथा ये तत्र पूर्व्वे
सामंताः पश्चाद्देशांतरं गताः
तन्मूलत्वात्तेन मौलास्तेॠषिभिः प
रिकीर्त्तिताः इति मिताक्षरा ॥
मौलिः पुं स्त्री चूडा किरीटं ॥
संयतकेशाः इत्यमरः मस्तके
इति हेमचंद्रः ॥

मौलिः पुं अशोकवृक्षः इति मेदिनी ॥
मौलिः स्त्री भूमिः इति मेदिनी
मौलिकः पुं कुलीनभिन्नः यथा
राढीय वारेन्द्र ब्राह्मणस्य श्रोत्रियः
तथा कायस्थस्य मौलिकः एवं
दाक्षिणात्य वैदिक ब्राह्मणस्याप्य
न्यपूर्वापरिनेपापि न त्वदवाच्यः
वंगजकायस्थस्य सच मध्यमशाह्
वाच्यः यथा अथ मध्यमलक्षण
माह मध्यमशाह्नो वृढ इत्यन्यः
क्रिया इवस्थवत् मध्यमः कुलम
ध्यस्य कुलीनस्य विश्रामस्थल
मित्यर्थः मध्यमशाह्स्य लक्षणान
रं कुलीनेतर सिद्ध वंश जातकत्वे
सति दशपुरुषावधिअनवच्छिन्नकु
लार्ज्जनत्वं मध्यमत्वं सच द्विविधः
सिद्धः साध्यश्च सिद्धत्वं प्रकृत
मध्यमत्वं प्रकृत सिद्धवंशजा
तत्वे सति दशपुरुषावधि कुला
र्ज्जकत्वं सिद्धत्वं सिद्धपदाकांक्षि
त्वे सति दशपुरुषावधि कुलार्ज्जक
त्वं साध्यत्वं अस्य प्रशंसा माह
कुलीन कुलरक्षार्थं विवादेषु मी
मांसया एतेषां गुणमाश्रित्य
मध्यमः कुलजन्मं । इति कुल
दीपिका ॥ दक्षिणराढीयका

यस्थस्याह सन्मौलिकायथा गौडे
ह्रो कीर्त्तिमंत श्चिरवसति क्रेता
मौलिका येहि सिद्धास्तेदत्ताः से
न दासाः करगुह सहिताः पालि
ताः सिंह देवाः ये वा यथाभि
मुख्याः क्षिति विनयगुणः समाति
स्तेहि पूर्वा मित्राधा वीत्यराक्षा च
रण गुणयुता मौलिकत्वेनसाध्याः
अपिच सेनोदत्तः करो । चया
हासो देवः प्रतिष्ठितः पालितः
सिंह धर्मत्तो गुहः सन्मौलिकाः
स्मृताः ॥ द्विसप्तति साध्यमौ
लिकायथा होडः सरथरथराणी
वाण आइच सोमः यक्ष्सरसामः
भंजो विंदो गुह वललोपः शर्मा
वर्मा कुड भूड चंडः । कुड्डोरक्षित
राज्यादित्यो विष्णुर्नागः खिलपिल
गूनः इन्द्रो गुमः पालोभद्र डोम
श्चांकुर वेधुर नाथः सोरहैशो
मानो गंडोराहा राणा राढ़त सा
ना ब्रह्म दाना गणा उपमाना
ख्यामः होमो चार वैडोषः वीर
तेज आर्णव आषः शक्तिर्भंगो
ब्रह्मोथानः सोमा हेमो .. वर्द्धन
रंगः गुइः कीर्त्तिर्यशाः कुंडोनन्दी
शीलोयत्तगुणाः इति द्विसप्तति मौ
लिकाः ॥ अन्यच्च देवो भूदेवा

भञ्जो गुह सहरा गुहोदाम ई
शानदासः सेनो दत्तः सदत्ताम
द्वितजन वयः पालितो धर्मपाल
सिंहः सिंहप्रतापः क्षिति नि
करकरा दानदत्तः करो उसो
गौडेष्टो संस्थितास्तेगुणगणा नि
पुणा मौलिकत्वेन सिद्धाः ॥
होडवाण धरणीक्षित सोमाभुञ्ज
विंद गुह राजराङ्गताः रुड पा
ल वलसाम रक्षितालोप धर्म
भूपि वर्म वंधुराः चंद सोपि
गुपिभड पेसरा गंड गुम चार
कीर्त्तिवर्द्धनः चोमहम गणनाथ
विस्ववा ब्रह्मरंगपिलहडु यन्गुण
गणाः नेजोऽर्णव स्वर यशाधिचा
शक्ति भूताः होमोष शान विद
षील यशाम नंदी दाहाकुरे ।
न्तुशुभ कुंडमनोपमाना दानाश
गूत विदानाभुवि कीर्त्तिमतः हे
साहित्यो राण राहा सानाचखा
मकस्तथा द्विसप्तति मित्राःसा ।
ध्यामौलिका विदिताःक्षितौ इति
कुलाचार्य्यकारिका मूलसम्म
यिनि मौलसंवंयिनिच त्रि ॥
मौषलं क्ली मुषलवत् यथा गं
गायां मौषलं स्नानं महापातक
नाशनं इतिप्रायश्चित्ततत्त्वधृत भ

विष्णुपुराण चवनं महाभारत ।
स्याष्टदशपर्वान्तर्गतपर्वविशेषः ॥
यथामौषलं पर्वचोद्दिष्टं ततो
घोरं सुदारुणं । महाप्रस्थानिकं
पर्व स्वर्गारोहनिकं ततः ॥ इति
महाभारते आदिपर्वे मूषलसम्ब
न्धिनि त्रि ॥
मौष्टा स्त्री मुष्टिप्रहरणक्रीडा इत्य
मरः मुष्टिप्रहरणं अस्यां क्रीडा
यां मौष्टास्त्रः णोत्वेपि तिविहद्विः
यगोर्लोप इति इकारलोपः ॥
स्त्रियामत इत्याप इति तट्टीका
यांभरतः
मौहूर्त्तः पुं ज्योतिर्वेत्ता ॥
मौहूर्त्तिकः इत्यमरः ॥
म्ना अभ्यासे इतिकविकल्पद्रुमः
अभ्यासः पौनःपुन्येनानुशीलनं ।
मनति संध्यां ब्राह्मणः इतिदुर्गा
दासः ॥
म्रद मर्द्दने इतिकविकल्प
द्रुमः रेफयुक्तःन्तोरध्यर्णी क
रणं म म्रदयति ष म्रदते
काननं दन्ती इतिदुर्गादासः
म्रदिमा पुं मृदुता मृदुशब्दात्इमन्
प्रत्ययेन निष्पन्नः ॥
म्रदिष्ठः त्रि अतिशयमृदुः मृदु
शब्दात् इष्ठप्रत्ययेन निष्पन्नः ॥

म्रदीयान् त्रि अतिशयमृदुः मृ
दुशब्दादीयसुप्रत्ययेन निष्पन्नः
म्रक्ष क म्रक्षणे स्नेहने इति
कविकल्पद्रुमः रेफयुक्तादिः म्र
क्षणं द्रव्यस्य द्रव्यान्तरेण योजनं
क म्रक्षयति स्नेहेनान्नं लोकः
इतिदुर्गादासः ॥
म्रक्ष संघाते इतिकविकल्पद्रुमः
रेफयुक्तादिः म्रक्षतिपयसा धा
न्यं लोकः इतिदुर्गादासः ।
म्रक्षः पुं स्वदोषगूहनं इति त्रि
काण्डशेषः म्रक्षणं च ॥
म्रक्षणं क्ली तैलं इति हेमचन्द्रः
द्रव्यस्य द्रव्यान्तरेण संयोजनं ।
स्नेहनं राशीकरणं इतिम्रक्ष
धातो र्भावेऽनट् प्रत्ययेन नि
ष्पन्नं ॥
म्रातनं क्ली कैवर्तीमुस्तकं इति
शब्दचन्द्रिका ॥
म्रुच उ इर गत्यां इतिकविकल्प
द्रुमः उम्रोचित्वा म्रोक्ता इर अ
म्रुचत् अम्रोचीत् इतिदुर्गादासः
म्रुञ्च उ गत्यां इतिकविकल्पद्रुमः
उम्रुञ्चित्वा म्रुक्ता इतिदुर्गादासः
म्रेट ऋ उन्मादे इतिकविकल्पद्रुमः
ऋ अमिम्रेटत् म्रेटतिलोकः उ
न्मायतीत्यर्थः इतिदुर्गादासः

म्रेड ऋ उन्मादे इतिकविकल्प
द्रुमः ऋ अमिम्रेडत् । म्रेडति
लोक उन्मायतीत्यर्थः इति दु
र्गादासः ॥
म्लक्षं क्ली चोरितं यथा चोरितं
मुषितंम्लक्षं प्रतीतंत्वप्रतीच्छितं
इति भूरिप्रयोगः ॥
म्लानं त्रि मलिनं यथा मलिनं
कच्चरं म्लानं कश्मलं च मलीमसं
इति हेमचन्द्रः ॥
म्लानिः स्त्री कान्तिक्षयः इतिम्लै
धातो र्भावे क्ति प्रत्ययेन निष्पन्ने
म्लिष्टं क्ली अस्पष्टवाक्ये तस्य पर्या
यः अविस्पष्टं २ इत्यमरः
म्लिष्टः त्रि अव्यक्तवाक्म्लानः
इतिमेदिनी ॥
म्लुच उ इर गत्यां इतिकविकल्प
द्रुमः उ म्लोचित्वा म्लुक्ता । इर
अम्लुचत् अम्लोचीत् इतिदुर्गा
दासः ॥
म्लुञ्च उ गत्यां इतिकविकल्पद्रुमः
उम्लुञ्चित्वा म्लुक्ता इतिदुर्गादासः
म्लेच्छ कि देश्योक्तौ इतिकवि
कल्पद्रुमः देश्यायाम्यायक्तौ दे
श्योक्तिः असंस्कृतकथनमित्यर्थः
कि म्लेच्छयति म्लेच्छतिमूढः अ
नविद्या मसौ विद्वान् म्लेच्छतिभ्रष्ट

त्न इतिहलायुधः अनेकार्थत्वा
दव्यक्त शब्देऽपि तथाचामरः अथ
म्लिष्ट मविस्पष्टमिति म्लेच्छव्यक्ता
यां वाचि इतिप्राचः । तत्र रमा
नाथस्तु म्लेच्छति वदत्यव्यक्तं वदती
त्यर्थः अव्यक्तायामितिपाठेऽनव
सितायां वाचीत्यर्थः । तन्नाह ।
शुद्धमभावस्य तदन्यत्वं तदल्पता
अप्राशस्त्यं विरोधश्च नञर्थाः षट्
प्रकीर्तिताः इति भाष्यवचनेन ।
नञो ऽप्राशस्त्यार्थत्वात् इति व्या
ख्यानाय हलायुधोक्त मुदाहृतवा
न् इतिदुर्गादासः ॥
म्लेच्छं क्ली हिङ्गुलं इतिराजनि
र्घण्टः ॥
म्लेच्छः पुं किरातशबरपुलिन्दा
दिजातिः इत्यमरः पामरभेदः
पापरक्तः अपभाषणं । इति
मेदिनी म्लेच्छादीनां सर्वधर्मरा
हित्य मुक्तं हरिवंशे सगर स्तो
प्रतिज्ञां च गुरोर्वाक्यं निशम्या
च धर्मं जघान तेषां वै वेशा
न्यत्वं चकार ह अर्द्धं शकानां
शिरसो मुण्डयित्वा व्यसर्जयत् जव
नानां शिरः सर्वं काम्बोजानां तथै
व च पारदा मुक्तकेशाश्च पह्न
वाः श्मश्रुधारिणः निःस्वाध्याय


वषट्काराः कृता स्तेन महात्मना
शकाजवनकाम्बोजाः पारदापह्न
वास्तथा कोलिसर्पाः समहिषा ।
दार्व्वाश्चोलाः सकेरलाः वशिष्ठ
वचनाद्राजन् सगरेण महात्मना
शकानां शकदेशोद्भवानां तत्रि
याणामेव जननारीणामिति ।
अत्र जवन शब्दस्तद्देशोद्भव वाची
चवर्ग तृतीयादिः जवनोदेशभे
गिनो रिति त्रिकाण्डशेषाभिधानदर्श
नात् ॥ तेषां म्लेच्छत्वमप्युक्तं ।
विष्णुपुराणे तथा कृतान्जवनादी
नुपक्रम्य तेचात्मधर्म परित्यागात्
म्लेच्छत्वं ययुरिति बौधायनः गो
मांस खादको यस्तु विरुद्धं बहु
भाषते सर्वाचार विहीनश्च म्लेच्छ
इत्यभिधीयते इति प्रायश्चित्तत
त्वे । अपिच । देवयान्यां
ययाते र्द्वौ पुत्रौ यदुः तुर्वसुश्च
शर्मिष्ठाया त्रयं पुत्राः द्रुह्युः अनुः
पुरुश्च । तत्र यदु प्रभृतयश्चत्वारः
पितुराज्ञाहेलनेन कृतवंतः पित्रा
शप्ताः ज्येष्ठपुत्रं यदुं शशाप
तव वंशे राजाचक्रवर्ती माभूदिति
तुर्वसु द्रुह्युमनून् शशाप युष्माकं
वंशपा वेदबाह्या म्लेच्छा भविष्यन्ति
इति श्रीभागवतमतं ॥ अन्यच्च

शकजवन काम्बोज पारदपह्लवा
हन्यमाना स्तत्कुल गुरुं वशिष्ठं
शरणं ययुः अथैतान्वशिष्ठोजी
वन्मृतकान्कृत्वा सगरमाह वत्स
वत्सालमेभिर्जीवन्मृतके रनुमृ
तैः एतेव मयैव त्वत्प्रति ज्ञा
पालनाय निजधर्म द्विजसंग परि
त्यागं कारिताः स तथेति त
द्गुरुवचन मभिनंद्य तेषां वेषा
न्यत्व मकारयत् जवनान्मुंडित शि
रसोऽर्द्धमुंडांश्चकार । प्रलम्ब
केशान् पारदान् पह्लवांश्च श्म
श्रुधरान् निःस्वाध्याय वषट्काराने
तानन्यांश्च क्षत्रियांश्चकार ते चा
त्मधर्म परित्यागाद्ब्राह्मणैश्च परि
त्यक्ता म्लेच्छतां ययुः इति विष्णुपुरा
णे ४ अंशे ३ अध्यायः ॥ प्रका
रांतरेण तस्योत्पत्तिर्यथा सूत
उवाच वंशे स्वायंभुवस्यासीदंगो
नाम प्रजापतिः मृत्योस्तु दुहिता
तेन परिणीता तु दुर्मुखी सुनी
थीनाम तस्यास्तु वेणो नाम सुतः
पुरा अधर्मनिरतः कामी बलवान्
वसुधाधिपः लोकेऽप्यधर्मकृज्जा
तः परभार्यापहारकः धर्माचार
प्रसिद्ध्यर्थं जगतोऽस्य महर्षिभिः
अनुनीतोऽपि न ददत्वनुज्ञां स
यदा ततः शापेन मारयित्वैनमर
णजक भयार्दिताः ममंथु र्ब्रा
ह्मणा स्तस्य बलाद्देह मकल्मषाः
तत्कायान्मथ्यमानात्तु निषेतु र्म्ले
च्छजातयः शरीरे मातुरंशेन
कृष्णांजन समप्रभाः इति मत्
स्यपुराणे ८ अध्यायः ॥ म्ले
च्छभाषाभ्यास निषेधो यथा न
स्नातयेदिष्टकाभिः फलानि वै फ
लेन तु न म्लेच्छभाषां शिक्षेत ना
नाकर्षेच्च पदासनं इति कौर्म्ये
उपरिभागे १५ अध्यायः ।
तस्य मध्यमानां समीगतिः यथा
हस्तिनश्च तुरंगाश्च शूद्राम्लेच्छाश्च
गर्हिताः सिंहाव्याघ्रा वराहाश्च
मध्यमानां समीगतिः इति मान
वे १२ अध्यायः ॥
म्लेच्छकंदः त्रि लशुने इति राज
निर्घंटः ॥
म्लेच्छजातिः त्रि गोमांसखादकव
दुर्विरुद्धभाषक सर्वाचारविहीनव
तीः यथा गोमांसखादको यस्तुवि
रुद्धं बहुभाषते सर्वाचार विही
नश्च म्लेच्छ इत्यभिधीयते इति
प्रायश्चित्ततत्त्व धृत बौधायनवचनं
अपिच भेदाः किरात शबर पु
लिंदा म्लेच्छजातयः । इत्यमरः

अन्ध्राश्च पौंड्रका श्चोड्रा द्रविडा
काम्बोजा जवनाः शकाः पारदाः
पह्लवा श्चीनाः किराता दरदाः
खशाः मुखबाहूरु पज्जानां या
लोके जातयो बहिः म्लेच्छवा
चश्चार्यवाचः सर्वेते दस्यवः स्मृ
ताः इति मानवे १० अध्यायः
म्लेच्छदेशः पुं चातुर्वर्ण्यव्यवस्था
रहितस्थानं तत्पर्यायः प्रत्यं
तः २ इत्यमरः भारतवर्षस्यांते
प्रतिगः प्रत्यंतः म्लेच्छयति शिष्टा
चार हीनो भवत्यत्र म्लेच्छः अल
स चासौ देशश्चेति म्लेच्छदेशः कि
वा म्लेच्छयति अपसंस्कृतं वदति ।
शिष्टाचारहीना भवंतीति वा पचा
द्यच् म्लेच्छानीच जातयः तेषां दे
शो म्लेच्छदेशः भारतवर्षस्यांतः
शिष्टाचार हीनः कामरूपवंगादिः
उक्तंच चातुर्वर्ण्यव्यवस्थानं यस्मि
न्देशे नविद्यते म्लेच्छदेशः स
विज्ञेय आर्यावर्तस्ततः परमिति
इति भरतः ॥
म्लेच्छभोजनं क्ली यावकः इति श
ब्दरत्नावली ॥
म्लेच्छभोजनः पुं गोधूमः इति
त्रिकांडशेषः ॥
म्लेच्छमंडलं क्ली म्लेच्छदेशः इति
हेमचंद्रः ॥
म्लेच्छमुखं क्ली ताम्रं इत्यमरः
म्लेच्छाशः पुं म्लेच्छभोजनः गोधू
मः इति केचित् ॥
म्लेच्छास्यं क्ली ताम्रं इति हारा
वली ॥
म्लेच्छितं क्ली म्लेच्छभाषा अपश
ब्दः तत्पर्यायः परभाषा २ इति
हारावली ॥
म्लेट ऋ उन्मादे इति कविकल्पद्रु
मः ऋ अमिम्लेटत् म्लेटति लोकः
उन्मादयतीत्यर्थः इति दुर्गादासः
म्लेड ऋ उन्मादे इति कविकल्पद्रुमः
ऋ अमिम्लेडत् म्लेडति उन्मा
दयतीत्यर्थः इति दुर्गादासः ।
म्लेव ऋ ङ सेवने इति कविक
ल्पद्रुमः ऋ अमम्लेवत् ङ म्लेवते
इति दुर्गादासः ॥
म्लै कांतिक्षये इति कविकल्प
द्रुमः म्लायति चंद्रो दिवसे
इति दुर्गादासः ॥

य

य अंतस्थयकारः सवषड्विंशद
लवर्णः अस्योच्चारणस्थानं तालु :
तस्य स्वरूपं यथा यकारं शृणु चार्वं
गि चलत्कोण मयं सदा । य



लालधूम संकाशं स्वयंपरमकुं
डली पंचप्राणमयं वर्णो पंच
देवमयं सदा त्रिशक्ति सहितं
वर्णं त्रिविंदु सहितं तथा प्रण
मामि सदा वर्णं मूर्तिमन्मात्र म
व्ययं इतिकामधेनुतंत्रे ४ पट
लः तस्य लेखन प्रकारो यथा
ऊर्द्धायः क्रमतो रेखा वक्रकोणा
मयीशुभा नारायणो शाविययस्ता
स्तिष्ठंति निरंपशः मात्राकुंडलि
नी ज्ञेया ध्यानमस्य प्रचक्षते ॥
इतिवर्णोद्धारतंत्रे ॥
यः पु वायुः॥ यशः॥ योगः
याने। याता। इतिशब्दरत्नाव
ली सर्वनामाद्यक्षराद्यर्थे इतियाव
त् इतिविश्वः ॥
यकः त्रि यः ये इतिभाषा य
द्शब्दस्य देरत्वे टेः पूर्वमकाग
मेन निष्पन्नः ॥
यकृत् क्ली ऊर्ध्वदक्षिणभागस्य
मांसखंडं तत्पर्य्यायः कालखंडं
२ इत्यमरः कालखंजं ३ कालेयं ४
कालकं ५ इतिहेमचंद्रः करं
डः ६ महास्नायुः ७ इतिरभसः
अथ शारीरावयवविशेषस्य य
कृतः स्वरूपमाह अधोदक्षिणत
श्चापि हृदयाद्यकृतः स्थितिः

तत्तु रंजक पित्तस्य स्थानं शोणि
तजं मतं ॥ अथ यकृद्रोगमा
ह सीहामयस्य हेत्वादि सम
स्तं यकृदामये किंत्वस्य स्थितिरस्य
ज्ञेया वाम दक्षिण पार्श्वयोः
अथ यकृद्रोगचिकित्सा। सी
होदिष्टाः क्रियाः सर्वा यकृत्यपि
समाचरेत् कार्य्यंच दक्षिणे बाहौ
तत्र शोणित मोक्षणं क्षारं च।
विडकृष्णाभ्यां पूतिकस्याथवाम्ब्लके
ते पिवेत् मान यथा वह्नि य
कृत् सीहप्रशांतये ॥ इतिभाव
प्रकाशः ॥
यकृदात्मिका स्त्री तैलपायिका।
इति शब्दचंद्रिका ॥
यकृद्वैरी पुं रोहितकवृक्षः यथा
सीहघ्नो मांसदलनो यकृद्वैरी त्।
चलच्छदः इतिशब्दचंद्रिका ॥
यक्ष्वन् त्रि दानकर्त्ता उपरमकर्त्ता
दानधातो र्यमधातोश्च शत् प्रत्य
येननिष्पन्नः ॥
यज पे ज ऊ देवार्चादानसंगत्क
तौ इतिकविकल्पद्रुमः संगस्यह
तिः संगहृतिः पे इत्यात् ज
यजतियजत विष्णुं सुधीः पूजय
तीत्यर्थः पशुनारुद्रं यजते पशुं
रुद्राय ददातीत्यर्थः यजतिसंत

सत् सतासह संगं करोतीत्यर्थः
उपयष्टा इति दुर्गादासः ॥
यजतः पुं ऋत्विक् यथा भृमृदृ
शि यजिपर्विपच्यमितमिनमिहर्य्यि
भ्योऽतच् दशभ्योऽतच्स्यात्।
इति सिद्धांतकौमुदी ॥
यजतिः पुं यागः यथा यजति
षु ये यजामहं कर्म्मणामनुयाजेषु
इतिमलमासतत्त्वधृताश्रुतिः।
यजत्रः पुं अग्निहोत्री इत्युणा
दिकोषः ॥
यजनं क्ली यागः तत्तु ब्राह्मणा
स्य षट् कर्म्मांतर्गत कर्म्मविशेषः यथा
अध्यापनं अध्ययनं यजनं याजनं
तथा दानं प्रतिग्रहश्चैव ब्राह्म
णानामकल्पयत् इति मानवे १
अध्यायः अस्य लक्षणं यथा
पशुक्षीराज्य पुरोडाश सोमौ
षधिकृ प्रभृति हविर्भिः खदि
र पलाशास्वत्थ न्यग्रोधोदुम्बर प्र
भृतिभिः समिद्भिः स्रुक्स्रुवोद्
खलमूषल ऊढारखनित्रयूपदारु
दर्भचर्म्मग्राव पवित्र भाजनादि।
भि ईष्ट्योपकरणैरुद्गातृहोत्रध्वर्यु
ब्रह्मादिभिर्ऋत्विग्भिः काम्यनैमित्ति
कानांयत्नादि पूर्वकानां यथोक्त
दक्षिणानां समापनं यजनं इति

श्राद्धविवेकधृत देवबलवचनं
यजन् पुं यागकर्त्ता यजधातो ः
शतृप्रत्ययेन निष्पन्नः ॥
यजनः पुं यागकर्त्ता यजधातो
र्युच्प्रत्ययेन निष्पन्नः इतिसिद्धां
तकौमुदी ॥
यजमानः पुं अध्वरेश्वादेष्टा तत्
पर्य्यायः व्रती २ यष्टा ३ इत्य
मरः ब्रम्हादित्रयंयजमाने। अ
ध्वरे याग विषये मम इष्टसंपा।
दनाय यथार्थकर्म कुरु इतिऋ
त्विजा मादेशको यागस्वामीत्यर्था
दि शब्दत्रयवाच्यइत्यर्थः व्रतेनना
जिनादिधारणं विद्यतेऽस्य व्रतीय
त् यजते इतित्वनियष्टा शानेयज
मानः सवती सोमयावपति अ
ध्वरे यजमानाः सन्दीक्षितउच्यते।
अन्यत्राप्युपचारात् दीक्ष मौ
ञ्ज्योपनयन व्रतादेष्टकः दी
क्षाशास्त्रादिता वा इतिभरतः
यज्वाकः त्रि दानकर्त्ता इत्युणादि
कोषः ॥
यजिः पुं यष्टा इत्युणादिकोषः
यजुः क्ली वेदविशेषः इत्यमरः
इज्यते ऽनेनेति यजुः यजे नौ
देवार्चा दान संगतकरणेषु उसि
इति उस इतिभरतः ॥

अपिच यजुराह जैमिनिः शेषे
वा यजुः शब्दः शेषे ऋक्साम
भिन्ने मंत्रजाते तनश्च यन्मंत्रजा
तं प्रश्लिष्टपठितं गानादिविवर्जि
त रहितं तद्यजुरिति इति ति
थ्यादितत्त्वं ॥ यजुर्वेदस्य षड
शीति भेदा भवंति तत्र चरका
नाम द्वादश भेदा भवंति चरकाः १
आह्वरकाः २ कठाः प्राच्यकठाः ४
कपिष्ठलकठाः ५ औपमन्यवाः ६ पा
ष्टालकठाः ७ वारायणीयाः ८ वारा
यणीयाः ९ वार्तान्तवेयाः १० श्वेता
श्वतराः ११ मैत्रायणीयाश्चेति १२ त
त्र मैत्रायणीयानाम सप्तभेदा भवंति
मानवाः १ दुंदुभाः २ चैकेयाः ३
वाराहाः ४ हारिद्रवेयाः ५ श्यामाः
६ श्यामायनीयाश्चेति ७ तेषाम ।
ध्ययन महोशनं यजुः सहस्रा
ण्यधीत्य शाखापारो भवति । तान्ये
व द्विगुणान्यधीत्य पदपारो भवति
तान्येव त्रिगुणान्यधीत्य क्रमपारो
भवति षडंगान्यधीत्य षडंगविद्
भवति शिक्षाकल्पो व्याकरणं निरु
क्तं छंदो ज्योतिषमित्यंगानि तत्र
प्राच्योदीच्या नैरृत्याः निर्विष्टाः
तत्र वाजसनेया नाम सप्तदश भेदा
भवंति जाबालाः १ औधेयाः २ का

ण्वाः ३ माध्यंदिनाः ४ शापीयाः ५
तापायनीयाः ६ कापालाः ७ पौंड्र
वत्साः ८ आवटिकाः ९ पामावटि
काः १० पाराशर्याः ११ वैधेयाः
१२ वैनेयाः १३ औधेयाः १४ गालवाः १५
वैजवाः १६ कात्यायनीयाश्चेति । १७
प्रतिपद मनुपदं छंदो भाषा
धर्मो मीमांसान्यायस्तर्क इत्युपां
गानि भवंति उपज्योतिषं १ सा
गलक्षणं २ प्रतिज्ञा ३ अनुवाक्य ४
परिसंख्या ५ चरणव्यूह ६ श्राद्धक
ल्पः ७ प्रवराध्यायश्च ८ शास्त्रं ९ क
तुः १० सख्या ११ अनुगमः १२ यज्ञो १३
पार्षदः १४ होत्रकं १५ पशवः १६
उक्थानि १७ कर्मलक्षणं १८ इत्य
ष्टादश परिशिष्टानि द्वे सहस्रे श
ते न्यूने मंत्रे वाजसनेयके । इत्यु
क्तं परिसंख्यानमेतत्सकलं स
शुक्रियं ग्रंथाश्च परिसंख्यातं ।
ब्राह्मणं च ततश्चैतं आरादावभ्य
वेदांते ब्रह्मव्याहृतिपूर्वकं वेद
मध्याय एतेषां होमाते न समा
रभेत तित्तिरि नैत्तिरीयका नाम द्वि
भेदा भवंति औख्याः खांडिकेया
श्चेति तत्र खांडिकेया नाम पंच
भेदा भवंति आपस्तंबी १ बौधा
यनी २ सत्याषाढी ३ हिरण्यकेशी ४

औधेयाश्चेति ५ तत्र कठानांत प
गान विशेषः चतुश्चत्वारिंशत्य
पग्रंथान मंत्रब्राह्मणयो वेद इति
गुणो यत्र पठ्यते यजुर्वेदः स वि
ज्ञेयो ऽन्ये शाखांतराः स्मृताः
यजुर्वेदस्य धनुर्वेद उपवेदः य
जुर्वेदस्य भारद्वाज गोत्रं रुद्र
दैवतं त्रैष्टुभं छंदः । यजुर्वेदः
कृशः दीर्घः कपाली ताम्रवर्णः
कांचननयनः आदित्यवर्णः वर्णे
न पंचारत्निमात्रः अस्य ध्यानं व
दे गौडं त्रैष्टुभं ताम्रवर्णं भार
द्वाजं रुक्मनेत्रं कृशांगं । यजुर्वे
देदीर्घं मादित्यवर्णं कापालीनं
पंचारत्निमात्रं य रुद्रं दैवतं
रूपं गोत्रप्रमाणं छंदोवर्णं वर्ण
यति स विद्यां लभते स विद्यां
लभते जन्मजन्मनि वेदपारो भ
वति जन्मजन्मनि वेद पारो भव
ति अव्रतो व्रती भवति अप्रय
तः प्रयतो भवति अब्रह्मचारी।
ब्रह्मचारी भवति जातिस्मरो जा
यते इति चरणव्यूहः ॥
यजुर्वेदः पुं वेदविशेषः तस्या
धिपतिर्यथा ऋग्वेदाधिपतिर्जीवः
सामवेदाधिपः कुजः यजुर्वेदा
धिपः शुक्रः शशिजोऽथर्ववेदरा ।

ट इति ज्योतिषं ॥ अस्य वक्ता ।
वैशंपायनः सत्व आदौ एक य
जासीत् यथा । ऋग्वेदस्य श्रावकं
पैलं जग्राह स महामुनिः यजुर्वे
द प्रवक्तारं वैशंपायनमेव च ॥
जैमिनिं सामवेदस्य श्रावकं सो
ऽन्वपद्यत तथैवाथर्ववेदस्य सु
मंतु मृषिसत्तमं ॥ एक आसीद्य
जुर्वेदस्तं चतुर्धा व्यकल्पयत् चातु
र्होत्रमभूद्यस्मिंस्तेन यज्ञमथा
करोत् अध्वर्यवं यजुर्भिस्तु ऋग्भि
र्होत्रं द्विजोत्तमाः उद्गात्रं सा
मभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः ।
ततः स ऋच उद्धृत्य ऋग्वेदं कृत
वान्प्रभुः यजूंषि च यजुर्वेदं सा
मवेदं च सामभिः ॥ एकविंशति
भेदेन ऋग्वेदं कृतवान् पुरा
शाखानां तु शतेनाथ यजुर्वेदम
थाकरोत् सामवेदं सहस्रेण
शाखानां विभेद तः अथर्वाण
मथो वेदं विभेद नवकेन तु
इति कौर्म्मे ४९ अध्यायः ॥
यज्ञः पुं इज्यते हविर्दीयतेऽत्र ।
तत्पर्यायः । सवः १ अध्वरः २
यागः ३ सप्ततंतुः ४ मखः ५ क्रतुः ६ ७
इत्यमरः इष्टिः ८ इष्टं ९ वितानं १०
मन्युः ११ आहवः १२ सवनं १३

ह्रवः १४ अभिषवः १५ होमः १६
ह्रवनं १७ महः १८ इतिषोडशत्वा
वली । सत्रिविधं सात्विको राज
सिकस्तामसिकश्च सात्विकयज्ञो
यथा अफलाकांक्षिभि र्यज्ञो वि
धिदृष्टो य इज्यते यष्टव्यमेवेति
मनः समाधाय ससात्विकः राज
सिकयज्ञो यथा अभिसंधाय तु
फलं दम्भार्थ मपिचैवयत् । इ
ज्यते भरतश्रेष्ठ तं यज्ञं विद्धि
राजसं तामसिकयज्ञो यथा
विधिहीन मसृष्टान्नं मंत्रहीनमद
क्षिणं श्रद्धा विरहितं यज्ञं ता
मसं परिचक्षते इति श्री भग
वद्गीतायां १७ अध्यायः । सच
नानाविधः यथा द्रव्ययज्ञास्तपो
यज्ञा योगयज्ञास्तथा परे स्वा
ध्याय ज्ञानयज्ञाश्चयतयः संशि
तव्रताः इति श्री भगवद्गीतायां
४ अध्यायः ॥ पंचयज्ञा यथा
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु
तर्पणं होमो दैवो बलिर्भौतो
नृयज्ञोऽतिथिपूजनं । इतिगारु
डे ११५ अध्यायः तस्योत्पत्ति
र्यथा ऋषय ऊचुः कथं यज्ञ
वराहस्य देहो यज्ञत्वं समभवत् ।
केनाङ्गमगमत्सर्वो वराहस्य कथं

त्रयः । ततो ऽथ शृण्वमानानां
कथयस्व महामते श्रीमार्कंडेयउ
वाच शृणुध्वं द्विजशार्दूला यत्न
ष्टोहं महाद्भुतं यज्ञेषु देवास्ति
ष्ठंति यज्ञेसर्वं प्रतिष्ठितं । यज्ञेन
ध्रियते पृथ्वी यज्ञस्तारयतिप्रजाः
अन्नेन भूता जीवंति पर्जन्यादन्न
संभवः पर्जन्यो जायते यज्ञात्
सर्वं यज्ञमयं ततः सयज्ञोऽभूद्वा
राहस्य कायात् शंभुविदारितात्
यथाहं कथये तद्वः शृण्वंतु सहिता
द्विजाः विदारिते वराहस्य काये
भर्गेण तत्क्षणात् ब्रह्मविष्णुशिवा
देवाः सर्वैश्च प्रमथैः सह तिस्
जेलात्तसंहृत्य ततशरीरं नमः
प्रति तद्विभेजुः शरीरंते खिला
श्च केनाखंडशः तस्यांग संधयो
यज्ञाः जातास्ते वेदपृथक्पृथक् ।
यस्माद्यस्माच्च येयज्ञास्ततस्त्वंतम
हृदयः शृंनास्मा सयिनाज्ञातो ज्यो
तिष्टोमोद्भ महाध्वरः हनुश्रवणास
न्यात्तु वह्निष्टोमो व्यजायत चक्षु
र्भ्रुवोः संधिनाव्रात्यष्टोमो व्यजा
यत राजः पौनर्भवष्टोम स्तस्य
पोत्राद्व संधिना वृहत्ष्टोम वृहत्ष्टो
मो निकामस्ताद्व्यजायत अतिरात्रं
सर्वेराजमथो निःक्रांतरात ॥

भूत् अध्यापनं ब्रह्मयज्ञः पितृ
यज्ञस्तु तर्पणं होमो देवोबलि
र्भौतो नृयज्ञोऽतिथिपूजनं स्ना
नं तर्पणं पर्यंतं नित्ययज्ञाश्चस
र्वशः कंठसंधेः समुत्पन्ना निष्का
तो विधियज्ञस्तथा वाजिमेधो महा
मेधो नरमेधस्तथैवच प्राणिहिंसा
करायेऽन्येते जाताः पादसंधि
तः राजसूयोऽग्निकारीयो वा
जपेयस्तथैवच । इष्टसंधेः समु
त्पन्नाग्रहयज्ञास्तथैवच प्रतिष्ठान्
मागयज्ञाश्च दानश्राद्धादयस्तथा
हृत्संधितः समुत्पन्नाः सावित्रीय
ज्ञएवच सर्वेषांसाधका यज्ञाः
प्रायश्चित्तकराश्चये तेमेढ्रसंधि
तो जाता यज्ञास्तस्य महात्मनः
रक्तः शाक्तसर्पशात्रं सर्वेचैवा भि
चारिकं गोमेधो हृत्संजातश्च ख
रेभ्यो ह्यभवन्निम खोयष्टिः पर
मेष्टिश्च गीष्पति भौम संभवः
लांगूलसंधौ संजाता अग्निष्टोम
स्तथैवच नैमित्तिकाश्चये यज्ञाः
संक्रांत्यादौ प्रकीर्तिता लांगूल
संधौ ते जातास्तथाद्वादशवार्षि
कं तीर्थप्रयोग साम्नोजयज्ञः सेक
र्मणास्तथा आर्कमाथर्वणाचैवता
भिसंधेः समुद्भूताः ऋचोत्कर्षः स्तोत्र

यज्ञः पंचमार्गेतियोजनः लिंग
संस्थान दुरम्व यज्ञाज्जातास्थजाता
नि एवमष्टाधिकं जातंसहस्रं द्वि
जसत्तमाः यज्ञानां सततं लोका
यैर्भाव्यंतेऽधुनापिच स्रुगास्यो
स्नात संजाता नासिकायाः स्रुवो
ऽभवत् अन्यस्तुकस्तुव भेदा ये
तेजाताः पोत्र नासयोः ग्रीवा
भागेन तस्याभूत् प्राग्वंशोमुनि
सत्तमाः इष्टापूर्तं धर्मो जा
ताः श्रवणरंध्रतः दंष्ट्राभ्यो ह्यभ
वन् यूपाः कुशारोमाणि चाभवन्
उद्गाता च तथाध्वर्युर्होतोसमिथ
एवच अग्रदक्षिणवामाग पश्चात्
पादेषु संगताः ॥ पुरोडाशाः
सचरवो जाताम्मस्तिष्कतः संवयात्
कर्ष्णे नैत्रयुग्माज्जाता यज्ञकेतवः ।
प्याखुग्रात् मध्यभागो भवद्वेदी मे
ढ्रान्नकुंडं व्यजायत रेतो भाग
स्तथैवाज्यं स्वरान्मंत्राः समुद्धृताः
यज्ञालयः पृष्ठभागात् हृत्पद्मात्
यज्ञ एवच तदात्मा यज्ञपुरुषो ।
भुंजाकस्तात्प्रभृताः एवं यावं
तियज्ञानां भांडानिच हविषिच
तानि यज्ञवराहस्य शरीरादेव ।
जाभवन् एवं यज्ञवराहस्य शरीरं य
ज्ञतामगात् ॥ यज्ञरूपेण स

कल्पमाप्यायितमिदं जगत् एवं
विधाय यज्ञस्तु वृषाकपिमहेश्व
रः सहस्तं कनकं घोरमासेदुर्यत्न
तत्पराः ततस्तेषां शरीराणि पिं
डीकृत्य पृथक् पृथक् त्रिदेवास्त्रि
शरीराणि ब्रह्मस्थलवायुभिः स
हतस्य शरीरन्तु ब्रह्मस्थलवायु
ना स्वयमेव जगत्स्रष्टा दक्षिणाग्नि
स्ततोऽभवत् कनकस्य शरीरन्तु व्या
पयामास केशवः ततोऽभूद्गार्ह प
त्याग्निः एवं वैनाव भोजनः ।
घोरस्य तु वपुः संशुष्योपयामास
वैश्वयं ततश्चाहवनीयोऽग्निस्तत्
त्तणात्समजायत एतैस्त्रिभिर्जे
गत्व्याप्तं त्रिभूतं सकलं जगत्
एतत् यत्र त्रयं नित्यं तिष्ठति द्विज
सत्तमाः समस्ता देवतास्तत्र संतो
ऽत्र वैः सह एतद्ब्रह्मपदं नित्यमे
तद्देवत्रयात्मकं एतत् त्रयी विधि
स्थानमेतत् पुण्यकरं परं यस्मिन्
जनपदे चैते हूयन्ते त्रयस्त्रयः
तस्मिन् जनपदे नित्यं वर्द्धन्ते वि
वर्द्धते एतद्वः कथितं सर्वं यत्
पृष्टं द्विज सत्तमैः यथा यज्ञ व
राहस्य देहो यज्ञत्वमागतः ।
तथा च तस्य पुत्राणां देहादेतान
मागमन् इति कालिकापुराणे ३० ।

अध्यायः ॥ ब्रह्मणा आदियज्ञा
यथा पुलस्त्य उवाच पूर्वमेव मया
ख्यातं यदा स्वायम्भुवो मनुः । जातः
परमधर्मात्मा शतरूपापतिः स्वयं
स्रष्टा प्रजापतिः पूर्वं सृष्टिकर्मण्य
योजयत् वत्सस्त्वमेव संकल्प स
र्वां सृष्टिं कुरुष्व स्वयन्तु पुष्क
रं गत्वा कृत्वा यज्ञं तु विस्तरं ब्रह्मा
ज्ञात्वा होताध्वर्यु स्तवौ यज्ञवा
हकाः एकैकस्य त्रयश्चान्ये प
रिवाराः स्वयं कृताः एतेवै षोड
श प्रोक्ता ऋत्विजो वेदवित्तकाः
शतानि त्रीणि षष्टिश्च यज्ञाः सृष्टाः
स्वयम्भुवा भीष्म उवाच यज्ञस्य ब्र
ह्मणो विप्र समाप्तिं वद साम्प्रतं
पुलस्त्य उवाच मन्वन्तरे व्यतीते तु
यज्ञस्यावभृथोऽभवत् दक्षिणा
ब्रह्मणा दत्ता प्राची होतुस्तु दक्षिणा
अध्वर्यवे प्रतीचीन्तु उद्गात्रे चोत्तरा
तथा त्रैलोक्यं सकलं ब्रह्मा दत्तेन्
सोऽव दक्षिणां । धेनूनांच शत
साहस्रं दातव्यं यज्ञसिद्धये अश्व
मेधानां सहस्राणि देयं धारानमि
थेन इति मात्स्ये प्रश्नं(?) ३। अ
ध्यायः ॥ ब्राह्मणादीनां स्वधर्म
यज्ञा यथा आरम्भ यज्ञाः क्षत्राः
हविर्यज्ञा विशः स्मृताः परिचार

यज्ञाः शूद्रास्तु जपयज्ञास्तु ब्राह्म
णाः इति मात्स्ये ५८ अध्यायः ॥
हिंसा यज्ञस्य अधर्मजनकत्वं य
था तथा विश्वभुगिन्द्रस्तु यज्ञं प्राव
र्त्तयत् प्रभुः दैवतैः सह संहृत्य सर्व
साधन संभृते तस्याश्वमेधे वितते
समाजग्मुर्महर्षयः । महर्षयश्च
तान् दृष्ट्वा दीनान् पशुगणांस्तदा ।
विश्वभुजं ते त्वपृच्छन् कोऽयं यज्ञवि
धिस्तव अधर्मो बलवानेष हिंसाध
र्मेप्सया तव नवः पशुवधस्त्विष्टस्त
व यज्ञे सुरोत्तम अधर्मो धर्मघाता
य प्रारब्धः पशुभिस्त्वया नायं धर्मो
ह्यधर्मोऽयं न हिंसा धर्म उच्यते ।
आगमेन भवान् धर्मं प्रकरोतु य
दीच्छति विधिदृष्टेन यज्ञेन धर्मेणा
व्यय हेतुना एवं विश्वभुगिन्द्रस्तु ऋ
षिभिस्तत्त्वदर्शिभिः उक्तो न प्रति
जग्राह मानमोह समन्वितः तेषां
विवादः सुमहान् यज्ञे इन्द्रमह
र्षीणां जङ्गमैः स्थावरैः केन यष्ट
व्यमिति चोच्यते ते तु खिन्ना विवा
देन तत्त्वयुक्ता महर्षयः संधा
य वाक्यमिन्द्रेण पप्रच्छुः खेचरं
वसुं ऋषय ऊचुः महाप्राज्ञ कथं दृष्ट
स्त्वया यज्ञविधिर्नृप उत्तानपादे प्रब्रू
हि संशयं नोऽद्य प्रभो सुत उवाच

श्रुत्वा वाक्यं वसुस्तेषामविचार्य्य ब
लाबलं वेदशास्त्रमनुस्मृत्य यज्ञ
तत्त्वमुवाच ह ॥ यष्टव्यं पशुभि
र्मेध्यैरथ मूलफलैरपि हिं
सा स्वभावो यज्ञस्य इति मे दर्शि
नागमः । एवं कृतोत्तरः स्तेन
मुक्तात्माने ततो धिया अवश्यं
भाविनं दृष्ट्वा तमधो ह्यशपंस्तदा
इत्युक्तमात्रो नृपतिः प्रविवेश ।
रसातलं धर्माणां संशयच्छेत्ता ।
राजा वसुरधो गतः तस्मान्न वा
च्योह्येकेन बहुज्ञेनापि संशयः
तस्मान्न हिंसा यज्ञस्य यदुक्तमृषि
भिः पुरा । इति मात्स्ये ११९ ।
अध्यायः ॥

यज्ञकृत् पुं यागकर्त्ता यज्ञंकरो
ति इत्यर्थे क्विप्प्रत्ययेन निष्पन्नः

यज्ञपशुः पुं घोटकः इति शब्द
माला छागश्च ॥

यज्ञपुरुषः पुं विष्णुः इति हे
मचन्द्रः ॥

यज्ञभाजनं क्ली यज्ञपात्रं इति
जटाधरः ॥

यज्ञभूषणः पुं श्वेतदर्भः इति
राजनिर्घण्टः ॥

यज्ञयोग्यः पुं उडुम्बरवृक्षः इति
राजनिर्घण्टः यागार्हे त्रि ॥

यज्ञवल्ली स्त्री सोमवल्ली इतिराज
निर्घंटः ॥
यज्ञवाटः पुं यज्ञस्थानं इतिहेम
चंद्रः ॥
यज्ञहृद्गः पुं वटीहृद्गः इतिराज
निर्घंटः ॥
यज्ञश्रेष्ठा स्त्री सोमवल्ली इति
राजनिर्घंटः ॥
यज्ञसाधनः पुं विष्णुः इतितस्य
सहस्त्रनामस्तोत्रं ॥
यज्ञसारः पुं यज्ञोडुम्बरहृद्गः इति
राजनिर्घंटः ॥
यज्ञसूत्रं क्ली यज्ञोपवीतं यथा
पवित्रं ब्रह्मसूत्रंच यज्ञोपवीतं
मित्यपि यज्ञसूत्रं तदेवोपवीतं
स्याद्दक्षिणे भुजे उद्धृते वाम
बाहौ तु प्राचीनावीत मपरः
निवीतंतु तदेवस्याद्देवकालिल
षितं इतिजटाधरः। तस्य प्र
माणंयथा उर्द्धंतु त्रिवृतंसूत्रं सु
धवा निर्मितं शनैः तंतुत्रयमधो
वृत्तं यज्ञसूत्रं विदुर्बुधाः त्रिगुणं
तां तद्ग्रंथियुक्तं वेदप्रवर सम्मितं
शिरोधरान्नाभि मध्यात् पृष्ठार्द्ध
परिमाणकं यजुर्विदांनाभि मि
तं सामगानामयं विधिः वामस्कं
धेन विधृतं यज्ञसूत्रं बलप्रदं।

इतिकल्किपुराणे ४ अध्यायः अ
स्य धारणे मंत्रो यथा यज्ञोप
वीत मसि यज्ञस्यत्वोपवीतेनो।
पनह्यामि इति संस्काररत्नमालाभ
ट्टभाष्यं॥ अन्यच्च। यज्ञो
पवीतं परमं पवित्रं बृहस्पते
र्यत्सहजं पुरस्तात् आयुष्यमग्र्यं
प्रतिमुंच शुभ्रं यज्ञोपवीतं बल
मस्तुतेजः इतिपशुपतिः।
यज्ञस्थानं क्ली यज्ञवाटः इतिजटा
धरः ॥
यज्ञांगः पुं उडुम्बरः। इत्यमरः
खदिरहृद्गः इतिराजनिर्घंटः।
ब्राह्मणयष्टिका इतिशब्दचंद्रिका
यागावयवे क्ली ॥
यज्ञांगा स्त्री सोमवल्ली इतिराज
निर्घंटः ॥
यज्ञांतः पुं अवभृथः इति हेम
चंद्रः यागशेषश्च ॥
यज्ञारिः पुं शिवः इतिधनंजयः
राक्षसश्च ॥
यज्ञिकः पुं पलाशहृद्गः इति
जटाधरः ॥
यज्ञियं त्रि यज्ञकर्मार्हं इत्यमरः
यज्ञायहितं इति मुग्धबोध
व्याकरणं ॥
यज्ञियः पुं द्वापरयुगं। इति

त्रिकांडशेषः ॥
यज्ञियदेशः पुं यागकरणोचितपु
ण्यदेशः यथा कृष्णसारस्तुचरति
मृगो यत्रस्वभावतः स ज्ञेयो य
ज्ञियो देशो म्लेच्छदेशस्ततःपरः
इतिमनुः ॥
यज्ञियशाला स्त्री यागमंडपं इति
जटाधरः ॥
यज्ञीयः पुं उडुम्बरहृद्गः। इति
राजनिर्घंटः यागसंबंधिनि त्रि
यज्ञीयब्रह्मपादपः पुं विकंकत।
हृद्गः इति राजनिर्घंटः ॥
यज्ञेश्वरः पुं विष्णुः यथा यज्ञे
श्वरो हव्यसमस्तकव्य भोक्ताव्य
यात्मा हरिरीश्वरोत्र तत्सन्निधा
नादपयातु सद्यो रक्षांस्यशेषाण्य
सुराश्चसर्वे इतिश्राद्धतत्त्वं ॥
यज्ञेष्टं क्ली दीर्घरोहिषकतृणं।
इतिराजनिर्घंटः ॥
यज्ञोडुम्बरः पुं उडुम्बरहृद्गः यज्ञ
डुम्बुर इतिभाषा। तत्पर्यायः
हेमदुग्धी २ यज्ञफलः ३ यज्ञांगः
४ हेमदुग्धकः ५ उडुम्बरः ६ जंतु
फलः ७ इति शब्दरत्नावली ॥
अस्यगुणाः उडुम्बरो हिमो रू
क्षोगुरुः पित्तकफास्रजित् मधुर
स्तुवरो वर्ण्यो व्रणशोधनरोपणः

इतिभावप्रकाशः ॥
यज्ञोपवीतं क्ली यज्ञसूत्रं पैता
इति भाषा तत्पर्यायः पवित्रं।
२ ब्रह्मसूत्रं ३ द्विजायनी ४ इति
त्रिकांडशेषः। तस्य निरूपणं।
यथा उपवीत माहुगोभिलः य
ज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा
अपिवा कुशरज्जुमेव यज्ञोपवी।
तं विशिष्टविन्यास धारणकर्मत
याकुरुते किंतत्सूत्रं सूत्रं विशे
षयति छंदोगपरिशिष्टं ऊर्द्धं त्वा
त्रिवृतं कार्य्यं तंतु त्रय मधोवृतं
त्रिवृतंचोपवीतं स्यात्तस्यैकोग्रंथि
रिष्यते वामावर्त्तं वलितं ॥
तंतुत्रयं त्रिगुणं कृत्वा दक्षिणा
वर्त्तवलितं कार्य्यं एवंत्रिवृतंत्रिस
वं उपवीतं स्यात् एको ग्रंथि।
रिति नानात्व निषेधार्थं। तथा
बौधायनः कौषं सौत्रं वि त्रि
वृतं यज्ञोपवीत मानाभेः कौषं।
कृमिकोषाद्भवं पट्टसूत्रादि॥
मय मित्यर्थः सौत्रं कार्पासाद्भ
वं तथा मनुः कार्पास मुप
वीतंस्यात् विप्रस्योर्द्ध वृतं त्रि
वृत् शणसूत्र मयंराज्ञो वैश्यस्या
विकसौत्रिकं त्रि त्रिवृत मित्यत्र
त्वात् मनुवचनेपित्रिवृन्मात्रं वि

सवत्वेन विशेषः यत्नपैठीनसि ।
वचनं कार्पासमुपवीतं षट्तन्तु ।
त्रिवृतं ब्राह्मणस्य क्षौमं राजन्य
स्य आविकं वैश्यस्य तन्तवस्त्वा ।
संभवे षट्तन्तुविधायकं नवतन्तुत्वं
वक्ष्यमाह देवलः यज्ञोपवीतं ।
कुर्वीत सूत्राणि नवतवः एकेन
ग्रंथिना तंतु द्विगुणास्त्रिगुणोऽथ
वा एकेन ग्रंथिना युक्तं इति शेषः
द्विगुणत्रिगुणो वेति तन्तवलेन
द्विसवत्रिसवो वा कर्त्तव्यः द्विसव
त्वे त्रिसवत्वासंभवे गोभिले वा
शाह्रो विकल्पार्थः अपिशाह्रो वस्त्र
कुशरज्वोः सूत्रानुकल्पत्वप्रदर्शना
र्थः एककार त्रिसवत्व मवच्छेदा
र्थः द्वितीयो शाह्रोऽनुक्तमौंजवाला
दि समुच्चयार्थः तथा निगमपरि
शिष्टं वाससा यज्ञोपवीतानि कु
र्व्यात् तदभावे त्रिवृता सूत्रेण कु
शमुंज बाल प्रतिसव रज्जुभिर्वा
वालोऽत्र गोवालः यथा देवलः
कार्पास क्षौम गोवाल शणवल्क
तृणोद्भवं सदा संभवतो यज्ञो
पवीतं द्विजातिभिः तदभाव
इति करणाद्यस्याभावे कुशरज्जुभि
रिति बोद्धव्यं इति माह विवेकः
यज्ञोपनयनादिने ॥ तत्र गा

र्भाष्टमोष्टे ब्राह्मणस्योपनयनं शाते
क्षत्रियस्य गर्भैकादशे गर्भद्वाद
शे वैश्यस्य शास्त्रं अत्रासामर्थ्ये
ब्राह्मणस्य षोडश वर्षपर्यन्तमेव
क्षत्रियस्य द्वाविंशति वर्ष पर्यन्तं
वैश्यस्य चतुर्विंशति वर्ष पर्यन्तं
तदनुष्ठान कालः तत्र मासाः
माघ फाल्गुन चैत्र वैशाख ज्येष्ठा
षाढा विहिताः तत्र तिथयः
द्वितीयैकादशी द्वादशी पंचमी द
शमी तृतीया विहिताः तत्र वाराः
बृहस्पति शुक्र रवीणां प्रशस्ताः
सामगानां मंगलवारोपि तत्र न
क्षत्राणि स्वाती ज्येष्ठा धनिष्ठाश्वि
नी अनुराधा हस्ता रेवती पुष्यः चित्रा
श्रवण मृगशिरः शतभिषा पूर्वफ
ल्गुनी उत्तरफल्गुनी पूर्वभाद्रपदा उ
त्तरभाद्रपदा रोहिणी पूर्वाषाढा त
त्र लग्नानि वृष सिंह तुला धनु मीन सं
ज्ञकानि तत्रपक्षः शुक्लः । तच्चन्द्रा
दिशोभने अनध्यायादीन परित्य
ज्य कर्तव्यं इति ज्योतिषतत्त्वमतं ।
अथोपनयनं ॥ तत्र गोभिलः
गर्भाष्टमेषु ब्राह्मणमुपनयेत गर्भैका
दशेषु क्षत्रियं गर्भद्वादशेषु वैश्यं ।
आषोडशात् ब्राह्मणस्यानतीतः का
लो भवति आद्वाविंशात् क्षत्रि

यस्य आचतुर्विंशात् वैश्यस्यात
ऊर्द्ध्वं पतित सावित्रीका भवन्ति
नैनानुपनयेयु र्नाध्यापयेयुर्न त्रै
भिर्विवाहयेयुः आषोडशादित्य
भिविधावाङ् तथाच विष्णुधर्मो
त्तरे षोडशाब्दो हि विप्रस्य राजन्य
स्य द्विविंशतिः विंशतिः सचतुर्थी च
वैश्यस्य परिकीर्त्तिता सावित्री
नातिवर्तेत अत ऊर्द्ध्वं निवर्त्तते
अत्र षोडश वर्षाण्युपनयनागा
ता प्रतीयते पतितायस्य सावित्री
दशवर्षाणि पंच च ब्राह्मणस्य वि
शेषेण तथा राजन्यवैश्ययोः प्रा
यश्चित्तं भवेदेषां प्रोवाचवदतां
वरः इति यमवचनेन तदनंगता
प्रतीयते अनयोर्गर्भजन्मप्रभृति
गणनाभ्यां मतिरुक्ता यत्तु द्विजा
नामित्युपक्रम्य पैठीनसिवचनं द्वाद
शषोडश विंशति संवत्सरातामवरु
द्धकाला भवति तद्द्वादशवर्षाद्युप
रि ब्राह्मणादीनां महाव्याहृति होम
प्रायश्चित्तार्थं षोडशवर्षोपरि गु
रुप्रायश्चित्तमिति तथा तु शंखलि
खितौ आत्य स्वाध्यायनं चरेत
गोप्रदानं च कुर्यात् चान्द्रायणं
प्राकृते धेनुदद्यात् तन्मूल्यं वा सार्द्धद्वा
विंशतिकार्षापणाः गोमूल्य कार्षा

पणाः पणकः मिलित्वा सार्द्धत्रयोविं
ति कार्षापणा देयाः पितृमातृ
रहितस्य निःस्वस्य देशोपप्लवादि
ना पतितसावित्रीकस्य वा विषय
तमनुविष्ट येषां द्विजानां सावित्री
नानुहृत यथाविधि तांश्चारयित्वा
त्रीन् कृच्छ्रान् यथा विध्युपनाययेत्
कृच्छ्रं प्राजापत्यं तदशक्तौ धेनु
त्रयं तन्मूल्यं वा नवकार्षापणाः
अकृत प्रायश्चित्त प्रत्याहृतैतानि
त्यादि तत्र बहुवचनं तत्कृत
संसर्गिणां प्रायश्चित्त प्रदर्शनार्थं
तथाच स्मृत्यन्तरं व्रात्याचार्यस्य भु
क्त्वान्नं कृच्छ्रपादेन शुध्यति यस्त्वो
पनयते व्रात्यान् त्रिभिः कृच्छ्रैः स
शुध्यति भुजवत्सभीम कृत्यचिन्ताम
णयोः स्वाती शक्र धनाश्वि मित्र
करभे पौष्णत्य चित्रा हरिश्विनो ।
तोयपतौ भृगोऽदितिसुते भा
द्रपदे सागरे केतुस्थे भृगुजे
ऽङ्गिरः शशिसुते चैडे च तारे
शुभे कर्तव्यं व्रतकर्म मंगलनिधो
वाराः सितार्कैज्यकाः ॥ अदिति।
सुत उत्तरफल्गुनी सागरः पूर्वा
षाढा दीपिकायां जीवार्केन्दुं ।
शुद्धौ हरिशयन वह्निभार्के यात
रस्य स्वाध्याय वेदवर्णाधिप इह

स्मभेदे तौर मे नादितो च स्म
कार्के ज्यष्ठे लग्ने रविमदनतिथिं
प्रोज्य षष्ठाष्टमेन्दुं नोजीवास्ताति
वार्ष्ककैस्मिन गुरुदिने कालशुद्धो
व्रतं स्यात् रविमदन तिथिं सप्त
मीत्रयोदशी षष्ठाष्टमेन्दुं लग्नापेत
या कृतिविनाशभयो माचेद्विपा
शीलाढ्यः फाल्गुनेव हृद्धव्रतः
चैत्रे भवति मेधावी वैशाखे कोवि
दो भवेत् ज्येष्ठे गहन नीतिज्ञ आ
षाढे क्रतुभाजनः शेषष्वन्येषु।
रात्रिः स्यान्निषिद्धं तिथिच व्रतं
राजमार्त्तण्डः पुनर्वसौ कृतो विप्रः
पुनः संस्कार महेति आश्वलायनः
उत्तरायणे आपूर्य्यमाणपक्षे कल्या
णे नक्षत्रे चूडोपनयन गोदानवि
वाहाः विवाहः सार्वकालिक इत्ये
के आपूर्य्यमाणपक्षे शुक्लेपक्षे।
बृहद्गार्ग्यः स्मृतिमूक्तानध्यायास्त
मनीच त्रयोदशी पक्षयो मीच
मासस्य द्वितीयां परिवर्जयेत्।
श्रीपतिव्यवहारसमुच्चये कार्त्तिका
श्विनस्यापि फाल्गुनाषाढयोर
पि कृष्णपक्षे द्वितीयायामनध्याये
विडुर्बुधाः श्रवलः चैत्र कृष्ण
द्वितीयायांतिस्त्रैवाहकास्तु मार्गे
वफाल्गुनेचैव आषाढे कार्त्तिके।

तथा पक्षयोर्माघमासस्य द्विती
यां परिवर्जयेत् ~~नाकाल [illegible]~~
कुर्वीत व्रतबन्धशुभक्रियां। उप
नयने उत्तरायण शुक्लपक्षयोर्विधा
नात् कार्त्तिकादौ कृष्णपक्षेव द्वि
तीया निषेधः पुनः संस्कारमर्हति
इत्युक्त प्रायश्चित्तरूपोपनयन प
रः वेदोपनयन परश्च तथा च
गर्गः विप्रस्य क्षत्रियस्यापि मौ
ञ्जीस्यादुत्तरायणे दक्षिणे च वि
शां कार्य्यं नानध्याये न संक्रमे।
अनध्यायेपि कुर्वीत यस्य नैमि
त्तिकं भवेत् अपिना दक्षिणायन
कृष्णपक्षयोः समुच्चयः नैमित्तिकं
प्रायश्चित्तरूपं चैत्र शुक्लतृतीया
आषाढ शुक्लदशमी मन्वन्तरादि
त्वेन निषिद्धा वैशाखशुक्लतृतीया
युगादित्वेन निषिद्धा षष्ठाष्टमविन
ष्टार्य्यरिक्तास्ववक्रदोषभाक् साम
गानां कुजवारेप्युपनयन शाखा
धिपत्वात् तथाच शाखाधिपेवलि
निकेन्द्रगते ऽथवास्मिन्वारे ऽस्य
चोपनयनं कथितं द्विजानां जीव
स्थिते ऽरिगृहगेथ पराजिते वा
जीवे भृगावुपनयः स्मृतिकर्महीनः
तस्य शाखाधिपस्याकल्पवितामतो
जन्मोदये जन्मस तारकासमासे

ऽथवा जन्मनि जन्मभे वा व्रतेन।
विप्रोन वन्द्यः स्कलोपि विद्याविशे
षैः प्रथितः पृथिव्यां। अस्ते ग
ते दैत्यगुरौ गुरौ वा अस्तेपि
वा पापयुतेथवक्रे। व्रतोपनी।
तो दिवसैः प्रणाशं प्रयाति देवैर
पि रक्षितो यः उदये लग्ने
व्रतेन उपनयनेन इति संस्कार।
तत्वं ॥
यज्वः पुं यजुर्वेदवेत्ता ब्राह्मणः
इत्युणादिकोषः यजमानः इति
संक्षिप्तसारोणादिवृत्तिः ॥
यज्वा पुं विधिनाऽइष्टवान् वेदवि
धानेन कृतयागः। इत्यमरः
यज्वानांपतिः पुं चंद्रः इति त्रि
कांडशेषः ॥
यत क खेदोपस्करयोः इति क
विकल्पद्रुमः खेद इह ताडनं क
यातयति पुत्रं पिता ताडयति
इत्यर्थः यातयति शूद्रं गृहिणी
उपस्करोति इत्यर्थः निरः प्रत्य
र्पणे प्रत्यर्पणं परीवर्त्तः निर्यात
यति धान्येन माषान् लोकः धान्यं
दत्वा माषान् गृह्णाति इत्यर्थः
इति दुर्गादासः ॥
यत ई ङ. यत्ने इति कविकल्पद्रुमः
ई यतः ङ. यतते पठिते शिष्यः

इति दुर्गादासः ॥
यत् व्य हेतुः यस्मात् इत्यमरः
यत् त्रि बुद्धिस्थत्वोपलक्षितधर्म्माव
च्छिन्नं ये इति भाषा। इति न्याय
मते सिद्धान्तकौमुद्युणादिवृत्तिश्च
यतः व्य हेतुः यस्मात् इत्यमरः
यतमः त्रि बहूनामध्ये निर्द्धारितेकः
एषां मध्येयः यद्शब्दात् डतम
प्रत्ययेन निष्पन्नः इति मुग्धबोध
व्याकरणं ॥
यतरः त्रि द्वयोर्मध्ये निर्द्धारितेकः
अनयोर्मध्ये यः तस्माद्यात् डतर
प्रत्ययेन निष्पन्नः इति मुग्धबोध
व्याकरणं ॥
यतिः पुं निर्जितेन्द्रियग्रामः तत्
पर्य्यायः यती २ इत्यमरः
भिक्षुः ३ संन्यासिकः कर्मन्दी ५
रक्तवसनः ६ परिव्राजकः ७ ताप
सः ८ पराशरी ९ पारिकांक्षी १०
मस्करी ११ पारिरक्षकः १२ इति
हेमचंद्रः निकारः विरतिः।
इति तत्रैव नानार्थे ॥ तस्य
वाराणस्यां वासो यथा अष्टौ मा
सान् विहारस्य यतीनां संयतात्म
नां एकत्र चतुरो मासान् वा
निवसेत् पुनः अविमुक्ते प्रविष्टानां
विहारस्तु न विद्यते ॥ यति

भि र्मौक्षकामैश्च अविभक्तं निष्ठ
ष्यते इति मानवे अविभक्त मा
हात्म्ये १५९ अध्यायः यति धर्मो
यथा अलावुं दारुपात्रञ्च मृन्मयं
वैदलं तथा एतानि यतिपात्राणि
मनुः स्वायम्भुवोऽब्रवीत् एककाल
श्चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे ।
भैक्ष्ये प्रसक्तो हि यति र्विषयेष्वपि
सज्जति विधूमे सन्नमुषले व्यङ्गारे
भुक्तवज्जने वृत्ते शरावसम्पाते भि।
क्षां नित्यं यतिश्चरेत् ॥ अलाभे
न विषादी स्याल्लाभे चैव न हर्षयेत्
प्राणयात्रिकमात्रः स्यान्मात्रासंगा
द्विनिर्गतः अभिपूजित लाभांस्तु
जुगुप्सेतैव सर्वशः अभिपूजित
लाभैश्च यति र्मुक्तोऽपि बध्यते
अल्पान्नाभ्यवहारेण रहः स्थानासने
न च क्रियमाणानि विषये रिन्द्रिया
णि निवर्त्तते इन्द्रियाणां निरोधेन
राग द्वेष क्षयेण च अहिंसया च
भूताना ममृतत्वाय कल्पते अवे
क्षेत गती र्नृणां कर्मदोष समुद्भवाः
निरये चैव पतनं यातनाश्च यम
क्षये विप्रयोगं प्रियै श्चैव सं
योगं तथा प्रियैः जरया चाभि
भवनं व्याधिभि श्चोपपीडनं दे
हादुत्क्रमणं चास्मात्पुनर्गर्भे च

सम्भवं योनिकोटि सहस्रेषु सृती
श्चास्यान्तरात्मनः अधर्म प्रभवं
चैव दुःखयोगं शरीरिणां धर्मार्थ
प्रभवं चैव सुखसंयोग मक्षयं।
सूक्ष्मतां चान्ववेक्षेत योगेन पर
मात्मनः देहेषु च समुत्पत्ति मुत्त
मेष्वधमेषु च दूषितोऽपि चरेद्धर्मं।
यत्र तत्राश्रमे रतः समः सर्वेषु
भूतेषु न लिङ्गं धर्मकारणं फलं
कतक वृक्षस्य यद्यप्यम्बुप्रसादकं
न नामग्रहणादेव तस्य वारि प्रसी
दति संरक्षणार्थं जन्तूनां रात्रा
वहनि वा सदा शरीरस्यात्यये चैव
समीक्ष्य वसुधां चरेत् अह्ना रा
त्र्या च यान् जन्तून् हिनस्त्यज्ञानतो
यतिः तेषां स्नात्वा विशुद्ध्यर्थं प्रा
णायामान् समाचरेत् प्राणायामा
ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः
व्याहृति प्रणवै र्युक्ता विज्ञेयं पर
मं तपः दह्यन्ते ध्मायमानानां।
धातूनां हि यथा मलाः तथेन्द्रिया
णां दह्यन्ते दोषाः प्राणस्य निग्र
हात् प्राणायामै र्दहेद्दोषान् ।
धारणाभिश्च किल्बिषं प्रत्याहारेण
संसर्गान् ध्यानेनानीश्वरान् गुणान्
उच्चावचेषु भूतेषु दुर्ज्ञेया मकृतात्म
भिः ध्यानयोगेन संपश्येत् ग

तिमस्यान्तरात्मनः सम्यग्दर्शन स
म्पन्नः कर्मभि र्न निबध्यते दर्शनेन
विहीनस्तु संसारं प्रतिपद्यते ॥
अहिंसयेन्द्रियासंगै र्वैदिकै श्चैव
कर्मभिः तपस श्चरणै श्चोग्रैः
साधयन्तीह तत्पदं अस्थि स्थूणं
स्नायुयुतं मांस शोणित लेपनं
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीष
योः जरा शोक समाविष्टं रो
गायतनमातुरं रजस्वल मनित्यं च
भूतावास मिमं त्यजेत् नदीकूलं
यथा वृक्षो वृक्षं वा शकुनि र्यथा
तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्वि
मुच्यते प्रियेषु स्वेषु सुकृतमप्रि
येषु च दुष्कृतं विसृज्य ध्यानयोगे
न ब्रह्माभ्येति सनातनं यदा भावे
न भवति सर्वभावेषु निस्पृहः तदा
सुख मवाप्नोति प्रेत्य चेह च शा
श्वतं अनेन विधिना सर्वांस्त्यक्त्वा
संगान् शनैः शनैः सर्व द्वन्द्व विनि
र्मुक्तो ब्रह्मण्येवावतिष्ठते ध्या
निकं सर्वमेवैतत् यदेतदभिश
ब्दितं न ह्यनध्यात्मवित् कश्चित्
क्रियाफल मुपाश्नुते । अधियज्ञं
ब्रह्म जपेदाधिदैविक मेव च आ
ध्यात्मिकं च सततं वेदान्ताभिहि
तं च यत् इदं शरणमज्ञाना मिद

मेव विजानतां इदमन्विच्छतां स्वर्ग
मिदमानन्त्य मिच्छतां । अनेन क्र
मयोगेन परिव्रजति यो द्विजः
सविधूयेह पाप्मानं परं ब्रह्माधि
गच्छति इति मानवे ६ अध्यायः
यतिः स्त्री पादविच्छेदः इति मे।
दिनी विधवा रागः ॥ संधिः
इति शब्दरत्नावली जिह्वाग्रवि
श्रामस्थानं यथा यति र्जिह्वेष्ट
विश्रामस्थानं कविभि रुच्यते सा
विच्छेद विरामाद्यैः पदैर्वाच्या
निजेच्छया कुविच्छेदस्थाने यति
रभिहिता पूर्वकृतिभिः पदान्ते
साशोभां व्रजति परमध्ये त्य
जति पुनस्तत्रैवासौ स्वर वि
हितसंधिः अयतिता यथा कुमः
पुस्ताकतल महिमामा करुणया
श्रुत मांडव्य मुख्यास्तु नेच्छन्ति मुन
यो यतिं इत्याह भट्टः स्व ग्रन्थे।
गुरुर्मे पुरुषोत्तमः ॥ इति छन्दो।
मंजरी वाद्यांग प्रबन्ध विशेषः ।
यथा यतिरोक्षाप्यविच्छेदो गज
रो रूपकं ध्रुवं गतयः। सारिगा
णी च नारम्भ कथितं तथा प्रहर
णं हंसनेव प्रबेधा द्वादश स्मृताः
यथा द्रुपातः इत्येकता स्यां यतिः
इति संगीत दामोदरः ॥

यति त्रि बहुवचनान्तयद्शब्दार्थ
कः यतगुलि इति भाषा यद्शब्दा
त् निपातनात् डतिप्रत्ययेननिष्प
न्नं इतिमुग्धबोधव्याकरणं ॥
यतिचान्द्रायणं क्ली व्रतविशेषः
यथा अष्टावष्टौ समश्नीयात् पिण्डा
न्मध्यन्दिने स्थिते नियतात्मा हवि
ष्याशी यतिचान्द्रायणं चरन् इति
मानवे ११ अध्यायः यतिचान्द्रा
यणे पादोन षेडचतश्शयं तदश
क्तौ सपादैकादश कर्षापणाः ।
इतिप्रायश्चित्तविवेकः ॥
यतिनी स्त्री विधवा । यथा विध
वानिकारंडा विश्वस्तायतिनीय
तिः इतिशब्दरत्नावली ॥
यतिमैथुनं क्ली यतिगोप्यरतिः
तत्पर्य्यायः खञ्जनरतं २ इति
त्रिकाण्डशेषः ॥
यती स्त्री विधवा इतिशब्दरत्नाव
ली यती पुं यतिः जितेन्द्रियः इत्य
मरः ॥
यत्तका स्त्री हंसविशेषः यथा र
क्तयत्तका नीलयत्तकामत्तका
जननीतिच इतिशब्दरत्नावली य
त्नः पुं रूपादिवत्तद्विशेषगुणान्त
र्गतगुणविशेषः सच त्रिविधः ।
प्रवृत्तिः १ निवृत्तिः २ जीवनयोनिः
३ यथा प्रवृत्तिश्च निवृत्तिश्च त
था जीवनकारणं एवं प्रयत्नस्त्रै
विध्यं तान्त्रिकैः परिकीर्त्तितं ।
तेषां कारणं यथा चिकीर्षाकृति
साध्येष्टसाधनत्वमतिस्तथा उ
पादानस्य चाध्यक्षं प्रवृत्तौ जनकं
भवेत् निवृत्तिस्तु भवेद्द्वेषाद्द्विष्ट
साधनताधियः यत्नो जीवनयो
निस्तु सर्व्वदातीन्द्रियो भवेत् शरी
रे प्राणसञ्चारे कारणं तत्प्रकी
र्त्तितं इति भाषापरिच्छेदः ॥
उद्योगः यथा उद्योगिनं पु
रुषसिंहमुपैति लक्ष्मी र्दैवेन
देयमिति कापुरुषा वदन्ति दैवं
निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र
दोषः । इत्युद्भटः ॥
यत्नवान् त्रि यत्नविशिष्टः यत्न
शब्दात् वत् प्रत्ययेन निष्पन्नः
यत्र व्य यस्मिन् येखाने इति भाषा
यद् शब्दात् सप्तम्यास्त्रल्प्रत्ययेन ।
निष्पन्नं इति सिद्धान्तकौमुदी ।
यत्र इक संकोचने इतिकविक
ल्पद्रुमः दन्त्यवर्गाद्योपधः इक
यंत्रयति मन्त्रेण सर्पं जाङ्गलिकः ।
यंत्र इत्येनेनैव हि सिद्धे इदन्तवैधो
र्वेदस्फुरणभेदार्थः । इति

दुर्गादासः ॥
यथा व्य सादृश्यं साम्यं तत्
पर्य्यायः वत् २ वा ३ तथा ४ एव
५ एवं ६ इत्यमरः ॥
यथाकामी त्रि स्वेच्छाचारी तत्
पर्य्यायः स्वरुचिः २ स्वच्छन्दः ३ ।
स्वैरी ४ अपावृतः ५ स्वतन्त्रः ६ निरवग्र
हः ७ इतिहेमचन्द्रः । निर्यन्त्रणः ८
इतिजटाधरः ॥
यथाक्रमं क्ली क्रमानुरूपं क्रममन
तिक्रम्येति व्याकरणं ॥ अपिच
यथाक्रमेण पुत्राणां कार्य्या प्रेतक्रि
या सदा पतितापतिता वापि
एकोद्दिष्ट विधानतः इति श्राद्ध
तत्त्वं ॥
यथाजातः त्रि मूर्खः इत्यमरः
नीचः इतिजटाधरः ॥
यथातथं व्य यथार्थं इतिहारा
वली ॥
यथापूर्व्वं व्य पूर्व्वदिग्देशकालानु
रूपं यथा शकुन्तलायां प्रतिष्ठा ।
यां प्राणानां प्रतिमास्तच यथा
पूर्व्वं तथाभावः स्वर्णादीनां न वि
सृता इति तिथ्यादितत्त्वधृत का
लिकापुराणवचनं ॥
यथामुखीनः त्रि मुखप्रतिबिम्बाश्र
यः मुखस्य सदृशः यथा मुखं प्रतिबि
म्बं निपातनात् सादृश्ये अव्ययी
भावः यथामुखं दर्शनः यथामु
खीनः इति सिद्धान्तकौमुदी ॥
अपिच तत्र क्षिप्रीयमाणो ऽसौ
हेमरत्नमयो मृगः यथामुखीनः
सीतायाः पुप्लुवे बहुलोभयन् ।
इतिभट्टिः मुखस्य सदृशं यथा
मुखं दर्पणादिस्थं प्रतिबिम्बमुच्यते
सादृश्यार्थे अव्ययीभावः । इति
भरतः निर्मलत्वात् सीताया अ
ग्रतो यथामुखीनः प्रतिबिम्बाश्रय
इवभूत्वा पुप्लुवे भ्रमति स्म इवशब्द
लोपो द्रष्टव्यः इति जयमङ्गलः
यथायथं व्य यथार्थं इतिमुद्रा
किनामरः ॥
यथार्थं व्य यथातथं इत्यमरः
हे अव्यभिचारिणि अर्थमनतिक्रा
न्ते यथार्थं यथास्वरूपं यथातथं
उभयत्र अव्ययीभावः यथार्थमे
वेद यथातथं वक्तिसभासु वि
द्वान् इतिभरतः ॥ तत्पर्य्यायः
सत्यं सम्यक् समीचीनं सूतं तथ्यं
यथातथं यथास्थितं च सद्भूते
ऽलीके तु वितथानृते ॥ इति
हेमचन्द्रः ॥
यथार्हं व्य यथायोग्यं यथा कृत्वा
ततो यथान्यायं यथार्हेणेन स

स्थिरं उपविष्टो कथाः काश्चिच्च
कृत्वैश्य पार्थिवो इति देवी
माहात्म्यं ॥
यथार्हवर्णः पुं चरः इत्यमरः
यथायोग्यमक्तारं रूपं जातिस्म
यथाशक्ति क्ली शक्त्यनुसारि श
क्तिमनतिक्रम्य । इति मुग्धबोध
व्याकरणं ॥
यथाशास्त्रं क्ली शास्त्रानुसारि शा
स्त्रमनतिक्रम्य । यथा यथाशास्त्र
वनिर्णीतो यथाव्याधिविकित्सितः
नशमं याति योव्याधिः स ज्ञेयः
कर्मजो बुधैः इतिमलमासतत्त्वं ।
यथास्थितं त्रि सत्यं इति हेम
चंद्रः ॥
यथास्वं अ यथार्थं इतिमुड्डांकि
तामरः ॥
यथेप्सितं क्ली यथावांछितं तत्
पर्यायः कामं २ प्रकामं ३ प
र्याप्तं ४ निकामं ५ इष्टं ६ इत्य
मरः ॥ इष्टानतिक्रमे स्वच्छन्द
प्रवृत्तौ कामादीनि प्रायः क्रिया
विशेषणानि क्रियाविशेषणत्वात्
क्लीवत्वमेषां इप्सितस्यानतिक्रमो
यथेप्सितमित्यव्ययीभावः इति
भरतः ॥
यथेष्टं क्ली इष्टमनतिक्रम्य यथेप्सि
तं

यथा कुर्य्युर्यथेष्टं तत्सर्वमीशा
स्तेस्य तनस्यैव इतिदायभागः ।
यथेष्टचारी पुं पक्षी इति शब्द
चंद्रिका ॥
यथेष्टाचरणः त्रि यथेष्टाचारी यथा
क्रियाहीनस्य मूर्खस्य महारोगिण
एवच यथेष्टाचरणस्याहुर्मरणांत
मशौचकं यथेष्टाचरणस्य यत
वेश्याद्यासक्तस्य । इति शुद्धि
तत्त्वं ॥
यथेष्टाचारी पुं स्वेच्छाचारी यथेष्ट
माचरन्ति शीतलमस्य इत्यर्थे इन् प्र
त्ययेन निष्पन्नः ॥
यथोचितं त्रि यथायोग्यं यथा
प्राप्तं यथा श्रेष्ठा श्रेष्ठा यथा
विनात । इत्यमरः ॥
यथोदितं यथोक्तं । यथा
यथोदितैस्तैपितृभिः कुरुदारप
रिग्रहं इतिमार्कंडेयपुराणे ।
रुचिस्तोत्रे ॥
यदा अ यस्मिन्काले यथा यदा
यदा समां हानि वेदमार्गानुसा
रिणां तदातदाकलेर्वृद्धि रनु
मेया विचक्षणैः इति तिथ्यादि
तत्त्वधृतवचनं ॥
यदि अ पक्षांतरं संभावना ।
तत्पर्यायः चेत् २ यद्यवा ३

यथा यदीच्छेद्विपुलान् भोगान्
चंद्रसूर्य्यग्रहोपमान् प्रातःस्नायी
भवेन्नित्यं द्वौमासौ माघ फाल्गु
नौ इतिमलमासतत्त्वं ॥ अपि
चेत् सुदुराचारो भजते मामनन्य
भाक् साधुरेव स मंतव्यः सम्यग्व्य
वसितो हि सः इति श्रीभगवद्गी
ता यद्युवाल्पतरः संभावः स्याद
पि पक्षुनैव कुर्य्यात् इतियद्युवेति
निपातसमुदायो यद्यर्थे । इति
तिथ्यादितत्त्वं ॥
यदीयं त्रि यत्संबंधि यथा यदीय
हलतो विलोक्य विपदं कलिंद
तनया जलोद्धत गतिः विलास
विपिनं विवेश सहसा करोतु ।
कुशलं हली स जगतो इति
छंदोमंजरी ॥
यदुः पुं देवयान्यांजातो ययाते
ज्येष्ठपुत्रः तस्यवंशो पित्रशा
पात् राजचक्रवर्त्ती नासीत् तद्वं
शे द्वापरयुगस्यांते श्रीकृष्णोऽव
तीर्णः इति श्रीभागवतमतं ।
तस्य मातुलकन्या विवाहकारणं
यथा जरां प्राप्य ययातिस्व स्व
पुरं प्राप्यैवेदं । पुत्रं ज्येष्ठं
वरिष्ठंच यदुमित्यब्रवीद्वचः त्वं
यदो प्रतिपद्यस्व पाप्मानं जरया

सह यौवनेन त्वदीयेन चरेयं
विषयानहं पूर्णे वर्ष सहस्रे त्व
पुनस्ते यौवनं त्वहं दत्वा संप्र
तिपत्स्यामि पाप्मानं जरया सह
यदुरुवाच सितश्मश्रुधरो दी
नो जरया शिथिली कृतः वली
संतत गात्रश्च दुर्दर्शो दुर्बलः कृशः
अशक्तः कार्यकरणे परिभूतश्च
यौवने सहोपजीविभि स्तेव
तां जरां नैव कामये । संतिते ।
बहवः पुत्रामत्तः प्रियतराश्च प त
रो ग्रहीतुं धर्मज्ञ पुत्रमन्यं वृणी
ष्व वै ययातिरुवाच यो मे त्वं
हृदयाज्जातो वयः स्वं न प्रयच्छसि
पापान्मातुल संबंधात् प्रजा वै
न भविष्यति ॥ इति मात्स्ये ३१
अध्यायः दशार्हदेशः । यथा
यदवस्त्वदशार्हाः स्युसात्वताः कुकु
राश्च ते इतिहेमचंद्रः ॥
यदुनाथः पुं श्रीकृष्णः इतिहेम
चंद्रः ॥
यदुपतिः पुं श्रीकृष्णः यथा यदु
पतेः क्वगतामथुरापुरी रघुपतेः
क्वगतोत्तरकोशला इति विचिं
त्यकुरुष्व मनःस्थिरं न सदिदं ज
गदित्यवधारय इतिरूपसना तन
गोस्वामिनौ ॥

यदृच्छा स्वी स्वातंत्र्यं तत्पर्यायः
स्वैरिता २। इत्यमरः। स्वैरिता इ ॥
इतितट्टीका
यद्युवा व्य यदि यथा यद्युवास्या
तरसम्भावः स्यादपि पश्चैनैवकुर्या
त् यद्युवेति निपातसमुदायो यद्य
र्थे अपिच यद्युवा उभय विकी
र्षितोत्रं ब्रह्मत्वंच इति तेनैव क
र्मेन व्व त्रै मुन्नरासंग सोदक कं
मंडलं दर्भवटुं वा ब्रह्मासने निधाय
तेनैव प्रत्याहृत्यान्यद्वेष्टेत इति
तिथ्यादितत्त्वं ॥
यंत्रा स्त्री दृढिः संदितम् सारो
णादिहृतिः ॥ पत्तानरंच।
यंता पुं सारथिः ॥ हस्तियकः
इत्यमरः ॥ विरतिकारके त्रि
यंत्रं क्ली देवाद्यधिष्ठानं॥ पात्र
भेदः नियंत्रणं। इतिहेमचंद्रः
अग्नियंत्रं कामानुवंहक इत्यादि
भाषा इतिमहाभारत टीकायां
नीलकंठः वाद्यं यथा यंत्रस्यगुण
दोषो न विचार्यौ मधुसूदनाग्रहं
यंत्रं भवान् यंत्रीनमे दोषा न मे
गुणाः इतिमहाभारते दारुयंत्रा
दि कल इतिभाषा यथा ईश्वरः
सर्वभूतानां हृद्देशे ऽर्जुन तिष्ठति
भ्रामयन्सर्वभूतानि यंत्रारूढा
नि मायया इतिश्रीभगवद्गीतायां।
१८ अध्यायः अस्यार्थः। सर्वभूता
नां हृद्देशेईश्वरोऽन्तर्यामी तिष्ठति
किं कुर्वन्सर्वाणिभूतानि मायया
निजशक्त्या भ्रामयंस्तत्तत्कर्मसु प्र
वर्तयन् यथादारुयंत्रमारूढानि कृ
त्रिमाणि भूतानि सूत्रधारोलोके भ्रा
मयति तद्वदिति यद्वा यंत्राणि श
रीराणि आरूढानि भूतानि देहा
भिमानिनो जीवानित्यर्थः। इति
श्रीधरस्वामी ॥ अथपूजाधार
यंत्रं तत्र नारदीये आद्यो ऽग्नि
हृदयं वक्त्रविम्बाः तेत्र समुद्भवं
यंत्रेच प्रतिमास्थान मर्चने सर्वदा
हरेः गौतमीये शालग्रामे मणौ
यंत्रे प्रतिमा मंडलेषु ॥ नित्यं
पूजाहरेः कार्य्यानत्व केवल भूत
ले योगिनीतंत्रे लिंगस्थां पूज
येद्देवीं पुस्तकस्थां तथैवच। मं
डलस्थां महामायां यंत्रस्थां प्रति
मासुच जलस्था वाशिलास्थांवा प्र
जयेत्परमेश्वरीं एतत्सर्वं यं
त्राभावे कौलावलीये यंत्राधा
राजिना पुष्पं जवा पुरुषंचविघ्ने
करवीरे अर्करके द्रोणं वायत्र ति
ष्ठति तत्रदेवी वसेन्नित्यं तयंत्रेचं
डिकार्चनं एतत्सर्वं यंत्राभावे।

तथाच यंत्रं मंत्रमयं प्रोक्तं
मंत्रात्मा देवतैवहि देहात्मनो।
र्यथा भेदो यंत्र देवतयो स्तथा
तथा आदौ लिखेद्यंत्रराजं दे
वतायाश्च विग्रहं कामक्रोधादि
दोषोत्थ सर्वदुःख नियंत्रणात्
यंत्र मित्याहुरेतस्मिन्देवः प्रीणा
ति पूजितः विनायंत्रेणपूजायां
देवता नप्रसीदति दुःखनियंत्र
णाद्यंत्र मित्याहुस्तंत्रवेदिनः इति
यंत्रपूजाप्राधान्यं ॥ अथधा
रणयंत्राणि तत्रादौ भुवनेश्वरी
यंत्रं शारदायां आलिख्याष्ट दि
गंगोलान्तरगं पाशादिकं अन्तरे।
कोष्ठद्वय मन्तरपरेषु विलिखेद
ष्टाणि मंत्रद्वयं अत्रपूर्वापरषट्
कयुग लं य वरान् व्योमासनान
गे लेख्यालिखेद्दुजलाधिपा दिग्
णशः पंक्तिद्वयानन्तरं कोष्ठकद्व
युगार्णमात्मसहितं युग्मस्वरोन
र्गतं मायां केसरगां स्वलेषु वि
लिखेन्मूलं त्रिपंक्तिक्रमात् त्रिःपाशा
कुशावेष्टितं लिपिभिर्वीतंक्रमाद्
त्क्रमात्प्र अस्येन वेष्टेनपंकजमुखे
नावेष्टितं तद्बहिः चतुर्गेह मिदं
यंत्रं मंत्रिणां श्रीप्रदं मन्मथ पाशा
श्रीशक्ति कंदर्प काम शक्तीरिता
कुशाः प्रथमोष्टात्तरो मंत्रस्ततः
कामिनि रंजिनि स्वाहांतोऽष्टात्त
रः सद्विरपरः परिकीर्तितः क्लीं
गौरिरुद्रयिते योगेश्वरि स वर्म
फट् हिठांतः षोडशार्णोयं मंत्रः
सद्भि रुदीरितः। इति चवागीला
यंत्रं। तारं ॐ विलिखेत्त स
रोजे कुहरे साध्याभिधानान्वितं।
मंत्रार्णान्वसुसंख्यकान्वसुदलेष्वा
लिख्य तद्वाह्यतः शक्त्याः त्रिः प
रिवेष्टितं चतुरगतं पद्मस्थमज्ञानतं
यंत्रं वश्यकरं ग्रहादिभयहृल्लक्ष्मी
प्रदं कीर्तिदं। इति त्वरिता यंत्रं
पद्मं मातृदलान्वितं प्रवि
लिखेत् तत्कर्णिकायां पुनस्तारं
शक्तिगवीजसाध्यसहितं तत्केस
रेषु क्रमात्व मर्हिन्या मत्र संभवा
न् युगलशो वर्णान् पुनः पत्रगा
न्मंत्रार्णान् गुणशो विधायविलिखे
द्रंत्र तदंत्ये दले मंत्रस्य अतिष्ट
पुरुषिकिं स्वपिपिभयंमे सम्रुपस्थि
तं यदिशाक्यम शाक्यवा तन्मेभग
वति शमय स्वाहा मातृकार्णैस्स
मीतं भूपुर द्वयमृष्यगं यंत्रंच विं
ध्यवासिन्याः प्रोक्तं सर्व समृद्धिदं।
रत्नाकरं विशेषे त्वड्भूतारि ना
शनं राज्यदं भ्रष्ट राज्यानां वश्य

हं वश्य मिच्छतां । स्तनार्थिनीनां
सुतदं रोगिणां रोग शांतिदं
बहुना किमिहोक्तेन यंत्रं तत्काम
दोमणिः इतिचतुर्गा यंत्रं ।
अथ लक्ष्मीयंत्रं वेदादिस्थितसा
ध्यनामयुगयुः श्रीशक्तिमाराविति
किंजल्केषु दिक्शापत्र विलसमंत्रा
ख्यं तद्दहिः पद्मं व्यंजनकेशरं
स्वरलसत्पत्राष्टयुग्मं पराविद्या
भ्यां वषट्कृतया वृतिया यंत्रं लि
खेद्वेष्टितं भूपुरद्वयकोणेषु ह्र
ह्रौ लेख्यौ पुनः पुनः महालक्ष्मी
यंत्रमिदं सर्वैश्वर्यफलप्रदं सर्व
दुःखप्रशमनं सर्वापद्विनिवारकं
बहुना किमिहोक्तेन परमस्मान्न
विद्यते । अथत्रिपुरभैरवीयंत्रं ।
मध्यायं तयोनिषु प्रवि
लिखेद्वीजानि वर्णांस्त्रिशोणायन्याः
पुनरष्टपत्रविवरेष्वालिख्य लिप्या
हृतं भूबिम्ब द्वितयेन मन्मथ युक्ता
कोणेषु संवेष्टितं यंत्रं त्रैपुरमी
रितं त्रिभुवन प्रक्षोभणं श्रीप्रदं
गायत्रीत मन्मथं त्रिपुरादेवि
विद्महे पद सुहृदेत् उक्ताकामे
श्वरि पदं प्रवदेद्धीमहि । अ
न्तेच प्रवदेत्तन्नः क्लिन्ने प्रचोद
यात् गायत्र्येषा समाख्याता त्रै

पुरी सर्वसिद्धिदा ॥ यंत्रांतरं ।
वह्नेर्गेह युगांतरस्थमदनेमाया
लिखेद्वाग्भवं षट्कोणेष्वथसंधिषु
प्रविलिखेत् ह्रंकार मावेष्टितं ।
स्त्रीं वीजेन समीरितं त्रिभुवन प्र
क्षोभणात्रैपुरं यंत्रं पंच मनोभ
वात्मकमिदं मौन्दर्यसम्पत्करं ।
इति त्रिपुरा यंत्रं ॥ अथ श्री
विद्यायंत्रं विशेषं धारणं यंत्रो
प्रसंगात्कथयामि ते रेफ हका
रयो मध्ये देवीनाममभिमुख्यके
साध्यनाम द्वितीयांतं तस्योर्द्धे वि
लिखेन्मनुं तत्रैव मातृका सर्वा
विलिखेच्चक्र बाह्यतः पंचगव्या
मृतेनैव मूलेन परिवेष्टयेत् । तत्र
स्थाणां प्रतिष्ठाप्य विद्या मष्टोत्तरां
शतं तत्स्पृष्ट्वा प्रजपेन्मंत्रं देवी
ध्यान परायणः हेम्नोमध्यगतं कृ
त्वा रजतस्याथ वा पुनः कोष्ठगता
जगद्रूपं हृदये स्त्रीषु वल्लभं कंठे
धनं लभेद्भालेस्तंभनं जम्भनं भ
वेत् शिखायां मोक्षमाप्नोति ।
तस्माद्यत्नेन धारयेत् ॥ अथग
णेश यंत्रं वीजं षट्कोण मध्ये
स्फुरदनल पुर तारग दिग्ध लक्ष्मी
माया कन्दर्प भूमीस्तचतुरस्र पुटेष्वा
लिखेद्वीजषट्कं तत्संधिषंग ।

मंत्रान् वसुदल कमले मूलमंत्र
स्य वर्णान् शिष्टान् पत्रेषु द्विद्वान्वि
लिखेत् गणेशस्यान्यमंत्र पलाशे
ष्वावीतं लिपिभिः क्रमात्क्रम व
पात् पाशांकुशाभ्यामपि भूबिम्ब
द्वितयेन वेष्टितमिदं यंत्रं गणाधी
शितुः लाक्षाकुंकुमरोचनाभ्यगम
दैर्भूर्जोदरे हेम्नि वा संलिख्या
भिव हन्न लभेन सकलैः संप्रार्थ्य
नीयां श्रियं उक्तं महागणपतेर्वि
धानं स्मरणनितं सर्वसिद्धिकरं ।
पुंसां समस्त पुरुषार्थदं ॥
अथ श्रीरामयंत्रं तारं मध्ये वि
लिखेत मन्त्रं षट्सु कोणेषु संधिष्वंगे
माया स्मरमपि लिखेत् कोणागंडे
षु पश्चात् किंजल्केषु स्वरगणम
थो पत्र मध्येषु मालामंत्रस्यार्णान्
गृहमखिलानष्टमपंचवर्णान दशा
न्तरेण संवेष्ट्य कादिवर्णैर्भूपुरे
दिग्विदिक्षु लिखेद्वीजे नरसिंह
वराहयोः नमो भगवते मुयाच्च
तर्थ्यो रघुनंदनं रक्षोघ्नविषदा
यान्नेमधुराद्विसमीरयेत् प्रसन्नव
दनायेति पश्चादमिततेजसे व
लायपश्चाद्रामाय विष्णवेन्तदनंतरं
प्रणवादि नमोन्तोऽयं मालामंत्रः प्र
कीर्तितः ॥ अथनृसिंह यंत्रं

वीजं साध्य समन्वितं प्रविलिखेन्म
ध्येऽष्ट पत्रेष्वथो मंत्रार्णान्स्फुटितश्च
विभज्य विलिखेल्लिप्या वहिर्वेष्टयेत्
बाह्ये कोणगवीज वह्निवसुधागेहा
द्वयेनावृतं यंत्रं स्वरं विषग्रहाम
यरिपु प्रध्वंसनं श्रीप्रदं । अथ
गोपालयंत्रं पिंडं मूलेन वीतं
दद्रून पुरयुगे कोण राजत्षडर्णं
कुर्यान्नपमूर्दशार्णा स्फुरित दशद
ले कामवीजेन वीतं पद्मं किंजल्क
संस्थस्वर विलसितदलप्रोल्लसन्माः ।
दशार्णेकिंजल्कसंजनाद्यं विलसित
युगदलेष्वर्पितानष्टवर्णान् पाशांकु
शाभ्यामावीतं द्वारोणीपुरयुगाश्रि तु
अष्टाक्षरेणासलक्षितं यंत्रं गोपा
लदेवतं धर्मार्थकामफलदं सर्व
रत्नाकरं स्मृतं पंचांतको धरा
संस्थो मनुर्विंदु विभूषितः पिंड
वीजमिदं प्रोक्तं सर्वसिद्धिकरं प
रं स्मरः कृष्णाय ठद्वद्वं षडर्णो
मनुरीरितः गोपीजनांते प्रवदेद्
द्वल्लभाय अग्निवल्लभा अयंदशाक्ष
रोमंत्रो दृष्टादृष्टफलप्रदः प्रणाये
हृदयं क्लींदेवेन्द्र्का ततः परं
ताहृणे देवकीपुत्रं ओफट् स्वाहा
समन्वितं षोडशाक्षरमंत्रोऽयंगो
विंदस्य जगत्पतेः । पिंडं ।

पितनेर्बीजं नमो भगवते ततः
नन्दपुत्रायबालादि वपुषे श्यो
मलायच गोपीजन पदस्थाने व
ल्लभाय द्विठावधि अष्टादशमंत्रा
श्चाख्यातो गोपालस्य जगत्पतेः
अनंगः हृस्य गोविंदो ऽष्टावष्टा
दशो मतः इतिगोपालयंत्रं ।
अथ गोपालस्य यंत्रांतरं ।
प्राकृत्यकं दक्षिणोत्क विधि
वदभिलिखेत् स्पष्ट रेखावलक्षं
कोणोपकल्पं युक्तं वलययुगयु
तं मध्य पूर्वं नदन्ते श्लोकस्यार्णा
न्पुरस्ताद्दस पद विवरेष्वष्टवर्णा ।
लिखित्वा तदाद्ये द्वादशार्णेस्तदनुप
रिष्टतं देवकी पुत्रयंत्रं तं सकी
देव देवतं तदेवे वरतो वतं
तंवतो कृष्णतो व्याप्तं तं व्या
तोदेवकी सुतं लिखितं भूर्जे
पत्रादौ यंत्रमेतद्यथा विधि वि
धृतं बाहुना नित्यं सर्वकामफ
लप्रदं पलाशहस्तफलके लि
खितं साध साधितं गोस्थाने ।
निखनेदेतत् गवां वृद्धिर्भवेत्तदा
अथ शिव यंत्रं ॥ तत्रादौ
षट्कोणं मंडलं तत्रान्तरं तःसा
ध्यनाम युक्तं प्रासादबीजं विलिखे
षट्कोणेषु प्रणव सहितपंचाक्षरा

वर्णान् विलिख्यविवरेषु षडंगमंत्र
त्रान् तद्वहिः पंचदलानिविलिख्य
तद्दलेषु ॐ ईशानाय नमःॐतत्पु
रुषाय नमः ॐअघोराय नमः ॐ
सद्योजाताय नमः ॐवामदेवाय न
मः इतिपंचमंत्रान् प्रागादिक्रमेण
लिखित्वा तद्वहि रष्टदलानि रच
यित्वा तद्दलेषु मातृका वर्णान् लि
खेत् तद्वहिर्हतं अमुकेन वे
ष्टयेत् एतद्यंत्रं जपहोमादिना
सम्पूज्य धारयेत् आयुरारोग्यै
श्वर्यादि सिद्धि र्भवति ॥ अथ
मृत्युंजयस्य मध्ये साध्यनामाख्य
कूव मभिविलिखेन्मध्यमदिग्द
लेषु कोणेष्वंसं मनोस्त्वितिभव
तु मध्यो दिस्तु चंद्र विदिक्षु तांत
यंत्रं तदुक्तं सकल भयहरं तेऽद्
भुताय मृत्युव्याधिव्यामोह दुःख
प्रशमन मुदितं श्रीप्रदं कीर्तिदा
यि ॥ अथ कालीयंत्रं । आ
मूले आद्यं बीजं ससाध्यं प्र
थम वसुदले तद्वहिश्चाष्टकोणे
पूर्वीघं वाग्बीजं तदनु वसुदल
द्वन्द्वके बीजषट्कं । किंतल्कं तत
स्वराद्यं वसुदलं विवरे स्वाद्या
बीजं षट्कं क्रमाभ्यामेव बीजं
लिखितुद्युगयोरंतरे यंत्रराजं ।

देवी बीजत्रयं तत्पतिदिशु मध्य
रं शक्तिबीजद्वयं तत्कोणे कोणे
लिखेद्य त्रिजगतिसगरुः शंकर
स्यापि विस्मः ॥ अथ पांति
कादौ नाराधारण यंत्रं तदुक्तं
फल्कारीये यानिभुवे लिखे
न्मत्रं मंत्री हेमशलाकया क्षीवा
हीनाव दीर्घवर्णान् षट्कोणे वि
लिखेन्नतः अष्टपत्रेष्वष्टवर्णानन्तद्
हिर्भूपुरद्वयं अष्टवज्रं भूपुरेविलि
ख्य साध्यकोनमः सर्वार्थदे भूर्जे
वाहृप्य वाप्यथ स्वर्णे । विलि
खेद्धेम लेखन्या गंधाष्टकसमन्वितं
दूर्वाकाण्डेन वालिख्य कुशमूलेन
वा पुनः एकवीराकल्पे वेष्टितं
पीतवस्त्रेण जतुना परिवेष्टयेत्
वश्रीयान्पद्मसूत्रेण शिष्यनाकंठ
भूषणं स्त्रीणां वामभुजेचैव मध्ये
वा दक्षिणे भुजे वंध्यापि लभते
पुत्रं नियंतो धनवान्भवेत् इमां
रक्षा पुरा वध्या त्रानार्थं गोतमा
दिभिः पीत्वार्थे पार्थिवे श्चान्यैः
संग्रामे जयकांक्षिभिः सुस्पार्थेः
योनि युग्मषट्कोणं तन्मध्ये हेम
शलाकादिना भूर्जपत्रादौ कुंकुम
रोचना रक्तचंदन जटामांसीनां स
मांशं विधाय पंक्तिक्रमेण मूलमंत्रं

लिखित्वा तस्य हल्लेखोरेफमध्ये
अमुकस्य रक्षां कुरु कुरु अमुकीनां
पुत्रं पुत्रमुत्पादयेति वा अस्य
ज्ञानं कुरु कुरु इत्यादिवा साध्य
सहितं विलिख्य षट्कोणं क्लीवभि
न्नान् दीर्घवर्णान् आ ई ऊ ए ओ अः
इत्येकैकं लिखेत् । तदुक्तं । स्व
राणां मध्यगं यत्तु तत्स्वलक्षण पुम
क स्मिति अष्टपत्रेष्वष्टवर्णान् प
क्रीं ई ए क्रीं फट्स्वाहेति लिखेत्
तदुक्तं वाग्भवं कुसदेवीच तार
कं वाग्भवं तथा हल्लेखावास्तम
न्त्रोत्ते वज्रिजायावधि मंत्रः अष्टा
दशो मनुः प्रोक्तो मंत्राणां सार
ईरितः । अथयंत्रलिखन द्रव्य
काश्मीररोचना लाक्षामृगमद
चंद्रनैः विलिखेद्धेम लेखन्या यंत्रा
ण्येतानि देशिकः भूमिस्पृष्टं शव
स्पृष्टं यंत्रं निर्माल्य संगतं विदी
र्णं लंघितं मंत्री यंत्रं नैवतु धार
येत् सौवर्णे राजतेपात्रे भूर्जे वा
सम्यग्लिखेत् अथवा ताम्रपट्टे
वा गुटिका कृत्य धारयेत् यावज्जी
वं स्वर्णस्यात् रौप्यं विंशतिवा
र्षिकं भूर्जे द्वादश वर्षाणि तदर्द्धं
ताम्रपट्टके ॥ इति तंत्रसारः ।
अन्यत्र कालिका पुराणे ११

१८। १९ अध्याये द्रष्टव्यं ॥
अथ यंत्र संस्कारः वामकेश्वरतंत्रे
स्नात्वा संकल्पयेन्मंत्री गुरो रर्च्चन
माचरेत् पंचगव्यं ततः कृत्वा शि
वमंत्रेण मंत्रितं । तत्र वक्र ति
पेन्मंत्री प्रणवेन समाकुलं तदूर्द्ध
त्य तत स्वकं स्थापयेत् स्वर्णपात्रके
पंचामृतेन दुग्धेन शीतलेन जले
न च चंदनेन सुगंधेन कस्तूरी कुं
कुमेन च पयोदधिघृतक्षौद्र शर्क
राये रनुक्रमात् । तोय धूपान्तरैः
कुर्यात् पंचामृत विधिं बुधः हा
टकैः कलसै र्देवी महद्भिर्वारिपू
रितैः कषाय जलसम्पन्नैः कार
येत् स्नान मुत्तमं ॥ स्नानं समाप्य
तां देवीं स्थापयेत् स्वर्ण पीठके ।
यंत्रराजाय विद्महे महायंत्राय धी
महि तन्नो यंत्रं प्रचोदयात् । स्प
ष्ट्वा यंत्रं कुशाग्रेण गायत्र्याचाभिमं
त्रयेत् अष्टोत्तर शतं देवि देव
ता भाव सिद्धये । आत्मशुद्धिं ततः
कृत्वा षडंगे देवतां यजेत् । मत्रा
वाह्य महादेवीं जीवन्यासं च कार
येत् उपचारैः षोडशभि र्महा
मुद्रादिभिः सदा । फलताम्बूलनै
वेद्यै र्देवीं तत्र समर्च्चयेत् पट्टसू
त्रादिकं दद्यात् वस्त्रालंकार मेव
च अगरु चामरं घंटां यथायोग्यं
मद्रे स्वरि सर्व मेतत् प्रयोजन ।
दद्यात् द्विजेरतः । ततो जपेत्
सहस्रं च सकलेप्सित सिद्धये ।
बलिदानं ततः कृत्वा प्रणामश्चक्र
राजकं । अष्टोत्तर शतं हुत्वा स
म्यानाज्यं विनिःक्षिपेत् ॥ होमक
र्मण्यशक्तश्चेत् द्विगुणं जपमाचरेत्
धेनुमेकां समानीय स्वर्णशृंगाद्य
लंकृतां गुरवे दक्षिणां दद्यात् त
तो देव्या विसर्जनं ॥ अस्य प्र
योगः कृतनित्यक्रियः स्वस्तिवाच
नपूर्वकं संकल्पं कुर्यात् अद्येत्या
दि अमुकगोत्रः श्रीअमुकदेवश
र्मा अमुक देवतायाः पूजार्थं अमुक
यंत्र संस्कार महं करिष्ये । इति
संकल्प पंचगव्य मानीय होमिति
मंत्रेणाष्टोत्तर शतं अभिमंत्र्य प्र
णवेन यंत्रं तत्र क्षिपेत् । तत उ
त्तोल्य स्थापयेत् । ततः शीतल
जलचंदन गंध कस्तूरी कुंकुमैः ।
स्नापयित्वा पंचगव्यमानीय होमि
ति मंत्रेणाष्टोत्तर शतमभिमंत्र्य प्रणवे
न पूर्ववत् शोधयित्वा स्नापयेत् । तत्र
क्रमः प्रथमं क्षीरेण स्नापयित्वा धूपं
दद्यात् । एवं दध्ना घृतेन मधुना श
र्करया च ततोऽष्टभिः कलसैः ।

कुंकुम गोरोचना चंदन मिश्रितै
स्तोयैः स्नापयेत् सर्वत्र स्नानं मूल
मंत्रेण ततो यंत्र मुत्तोल्य कुशा
ग्रेणानुस्पृष्ट्वा यंत्रराजाय विद्महे
महायंत्राय धीमहि तन्नो यंत्रं प्र
चोदयात् इत्यष्टोत्तरशतं मभि
मंत्र्य प्राणप्रतिष्ठां कुर्यात् अस्य
प्राणप्रतिष्ठा मंत्रस्य ब्रह्मविष्णुमहे
श्वरा ऋषय ऋग्यजुः सामानिछंदां
सि चैतन्यं देवता प्राणप्रतिष्ठायां
विनियोगः तद्यथा आं ह्रीं क्रों
यं रं लं वं शं षं सं हौं हं सः ।
अमुक देवतायाः प्राणा इह प्रा
णाः एवमाम्यादि अमुक देवता
या जीव इह स्थितः एवमाम्या
दि अमुक देवतायाः सर्वेन्द्रिया
णि एवं आम्यादि अमुकदेवता
या वाङ्मनश्चक्षुः श्रोत्रघ्राणप्राणा इ
हागत्य सुखं चिरं तिष्ठंतु स्वाहा
इति प्राणान् प्रतिष्ठाप्य यंत्रप्रकृत
देवता मावाह्य षोडशोपचारैः पं
चोपचारै र्वा पूजयेत् । ततः
पट्टसूत्रादिकं दत्वा अष्टोत्तरशतं
जप्त्वा शक्तश्चेत् बलिं दद्यात् त
तोऽष्टोत्तरशतं होमं कृत्वा प्र
णाहुति सम्पान्नं दद्यात् होमा
भावे द्विगुणं जपः कार्य्यः ततो
दक्षिणां दत्वा अच्छिद्रावधारणं कु
र्यात् इति तंत्रसारः ५
औषध पाकार्थं यंत्राणि यथाभेदे
विनस्ति गम्भीर मध्ये निहित कूपि
के कूपिका कंठपर्य्यंतं बालुका
भिश्च पूरिते भेषजं कूपिका
संस्थं वह्निना यत्र पच्यते बालुका
यंत्र मेतद्धि यंत्र तंत्र बुधैः स्मृतं
बालुकायंत्रं ५ निरुद्ध मौषधं
सूत्रभूर्जेन त्रिगुणांतरे । रसपो
टलिका कोष्ठतूंब बध्वा गुणेन हि
संधान पूर्णकुंभातः स्थावलंम्बन
संस्थितं अग्नस्ताज्ज्वालयेदग्निं तत्र
दुक्तं क्रमेण हि दोलायंत्र मिदं
प्रोक्तं स्वेदनाख्यं तदेव हि । सं
धान कांजिकादि इति दोलायंत्रं
सांबु स्थाली मुखे बद्ध वस्त्रे स्वे
द्यं निधाय च पिधाय पच्यते यत्र
तद्यंत्रं स्वेदनं स्मृतं । स्वेदनयंत्रं
अधः स्थाल्यां रसं क्षिप्त्वा निद
ध्यात्तन्मुखोपरि स्थालीमूर्द्धमुखीं
सम्यक् निरुध्य मृत्स्नया कूर्द्ध
स्थाल्यां जलं क्षिप्त्वा चुल्ल्यामारोप्य
यत्नतः अग्निं ज्वालयेदग्निं या
वत् प्रहरं पंचकं स्वाङ्गशीतं ततो
यंत्राकृष्टीयाद्रसमुत्तम विधाय
राभिधं यंत्र मेतत्तज्ज्ञैः रुदा ॥

ह्लतं विद्याधरयंत्रं ॥ वाल
कास्त समस्तागं गर्त्तेमूषारसान्वि
ता दीमोपलैः संहृत्येयाघंत्रं ॥
भूधर नामकं भूधरयंत्रं ॥
यंत्रं डमरु संज्ञं स्यात्तत्र स्था
ल्या मुद्रिते मुखे । डमरुयंत्र
इतिभावप्रकाशः ॥
यंत्रकं क्ली यंत्रकाष्ठं कूँद इति
भाषा यम्यतेकाष्ठमनेनेति यम
याते स्त्रप्रत्ययेन यंत्रं ततःस्वा
र्थेक प्रत्ययेन निष्पन्नं ॥
यंत्रगृहं क्ली तैलिशाला घानिघर
इतिभाषा इति हेमचंद्रः ॥
यंत्रगोलः पुं कलायविशेषः मट
र इति भाषा इतिशब्दचंद्रिका ।
यंत्रणं क्ली रक्षणं । बंधनं नि
यमनं इति मेदिनी ॥
यंत्रणा स्त्री पीडा यथा मदनता
पभरेण विदीर्य्य नो यदुस्फुटतिहृ
दादमनस्त्वस्तः निविड पीनकुचद्व
य यंत्रणा तमपाथमपास्यतिकेवि
ती इतिनैषधे प्र सर्गः ॥
यंत्रपेषणी स्त्री पेषणार्थयंत्रं यांता
इतिभाषा । इतिजटाधरः ।
यंत्रिका स्त्री पत्न्याःकनिष्ठाभगिनी
यथा कनिष्ठा श्यालिकाश्याली यं
त्रिका केलिकुंचिका । इति हेम

चंद्रः ॥
यंत्रिनः त्रि वद्धः इतिधरणिः
यंत्री पुं यंत्रविशिष्टः यंत्रशब्दा
दस्त्यर्थे इन्प्रत्ययेन निष्पन्नः ।
यभ ग मैथुने इतिकविकल्पद्रुमः
औ अयासीत् यभतियुवा इति
दुर्गादासः ॥
यम डो उ विरतो इतिकविकल्प
द्रुमः अयंता उ यमित्वा यान्त्वा
विरतिर्निवृत्तिः यच्छति पापात्
साधुः इति दुर्गादासः ॥
यम कमि परिवेषणे नदम्भावे ।
इतिकविकल्पद्रुमः कमियमयति
याममयति परिवेषणं अमादेर्दर्पणं
वेष्टन मित्येके । विषत्वाभावावि
त्त्वस्य रूप मिति रमानाथः ।
केचित्तु परिवेषणमेवार्थं मान्यवे
यः । यमयत्यन्नं द्विजाय गृही
अन्यत्र नियामयति संयामयतिर
ज्जुः अन्येतु अपरिवेषणे य
मायां मानुवेयः नियमयतिविमा
नीर्प्राप्तिनानोत्त दंडं इतिशाकटा
ले परिवेषणे तु याममत्यन्नं
द्विजाय गृही इत्याहुः तेन उभ
यस्य प्रामाणिकत्वादुभयत्र विकल्प
स्थापनार्थं चानुबंधः कृतः इति
दुर्गादासः ॥

यमः पुं दक्षिणदिक्पालः तत्
पर्य्यायः धर्मराजः २ पितृपतिः ३
समवर्त्ती ४ परेतराट् ५ कृतांतः ६
यमुनाभ्राता ७ शमनः ८ यमराट् ९
कालः १० दंडधरः ११ श्राद्धदेवः
१२ वैवस्वतः १३ अंतकः १४ इत्य
मरः धर्मः १५ धर्मराट् १६ जीवि
तेशः १७ महिषध्वजः १८ औडुम्बरः
१९ दंडधारः २० कीनाशः २१ दध्नः
२२ महिषवाहनः २३ शीर्णपादः २४
भीमशासनः २५ कंकः २६ हरिः
२७ इतिशब्दरत्नावली । कर्म्मकरः
२८ इतिजटाधरः ॥ चतुर्द्द
श यम तर्पणं यथा योकोपिन
मरितं प्राप्यकृष्णपक्षे चतुर्द्दशीं
यमुनायां विशेषेण नियत स्तर्प
येद्यमान् यमाय धर्मराजाय मृ
त्यवे चांतकायच वैवस्वताय का
लाय सर्वभूतक्षयाय च औडुम्बरा
य दध्नाय नीलाय परमेष्ठिनेवृ
कोदराय चित्राय चित्रगुप्ताय वै
नमः एकैकस्य तिलै र्मिश्रां
स्त्रीं स्त्रीन् दद्याज्जलांजलीन्
संवत्सर कृतं पापं तत्क्षणा
देव नश्यति इति तिथ्यादितत्व
धृतभविष्यपुराणवचनं ॥ त
स्योत्पत्तिर्यथा । संज्ञाच रवि

णा दृष्ट्वा न्यमीलयत लोचने यत
स्ततः सरोषोऽर्कः संज्ञां वचन
मब्रवीत् मयि दृष्टे सदा यस्मात्
कुरुषे नेत्रसंयमं तस्माज्जनिष्य
से मूढे प्रजा संयमनं यमं । मार्कं
डेय उवाच ततस्तस्याक्तसंजनेत्र ।
मत्रेषापेन तेनैव यमश्चयमुना
चेयं प्रख्याता सुमहानदी इतिमा
र्कंडेयपुराणे वैवस्वतमन्वंतराध्या
यः पुण्यपात्मनां सर्व्वथे तस्यरूपं
यथा तानागतां स्तेषां दृष्टानगात्
धर्मपरायणान् भास्करिःप्रीति
मासाद्यस्वयं नारायणो भवेत् ।
चतुर्बाहुः श्यामवर्णः प्रफुल्लक
मलेक्षणः शंखचक्र गदापद्मधा
री गरुडवाहनः स्वर्णयज्ञोपवी
तीच स्मेरचारुनयाननः किरीटीकुं
डली चैव वनमालाविभूषितः पा
पिनां संवधेतस्यरूपं यथा त्रिंश
योजन दीर्घांगोवापीसदृशलोच
नः धूम्रवर्णोमहातेजाः प्रलयांभो
धरध्वनिः तृणाधिराजरोमाचञ्च
लदग्निशिखाधरवत् नासारंध्रस्फुरच्छ
श्वासस्वने र्जितमहानिलः । सदी
र्घदशनश्रेणिः सर्पायमनखाव
लिः प्रचंडमहिषारूढः संदष्टदशन
च्छदः दंडहस्तश्चर्मावासाभ्रकुटीकुटिलान

नः इति पाद्मे क्रियायोगसारे २२ अध्यायः ॥ अस्यान्यधिकारो यथा प्रोवाच धर्मयदहं ब्रवीमि का। र्यं त्वया तन्वक्ष्व धर्मराज ब्रह्मोवाच ये भक्ताः पुंडरीकाक्षे कर्मणा मनसा गिरा स्वकर्मनिरता दांतान् नियम्याहि ते त्वया हरेः संपूजितो यैस्तु यैः हरेः समुपासितः यैश्च नित्यं स्मृतः कृष्णो न ते। त्वद्विषयोपगाः नमः कृष्णाच्युतानंत वासुदेवेत्युदीरितं यैर्भावभाविता धर्म नते त्वद्विषयोपगाः दानं ददद्भिर्यैं हरुमच्युतः प्रीयतामिति। श्रद्धा पुरःसरैर्धर्म नते त्वद्विषयोपगाः उत्तिष्ठद्भिः स्वपद्भिश्च व्रजद्भिश्च जनार्दनः यैः स्मृतस्ते सदा धर्म नते त्वद्विषयोपगाः सर्वबाधास्वयेहृष्टं संस्मरंत्यच्युतं निव तद्भाव भाविनो येच ते ते त्वद्विषयोपगाः सप्त यत्नात् सर्वस्य तन्नियोगकरा वयं यम संयमने स्यक्तः सोऽस्मत्संयमको हरिः इति वह्निपुराणे नारसिंह्माड्भीताध्यायः॥ अपिच ब्राह्मणउवाच यत्कृतास्त्वमहं तापं धर्माधर्म विनिर्णये प्रमाणं त्वं हि लोकानां फलं मे ब्रूहि तन्मम

यमउवाच। यमो यम इति ख्याता हृष्या स्वहिजने जनः आत्मा च यमितो येन न तस्यैव यमः स्मृतः आनृशंस्यं क्षमा सत्यं अहिंसा दमआर्जवं ध्यानं प्रसादोमाधुर्य्यं संतोषश्च यमा दश यमैश्च नियमैश्चैव यः करोत्यात्म संयमं स वाहृष्टां त्वमायाति परं ब्रह्म सनातनं। इति तत्रैव यम धार्मिलोपाख्यानं। सावित्री कृतं यमाष्टकं स्तोत्रं यथा। सावित्र्युवाच। तपसा धर्म माराध्य पुष्करे भास्करः पुरा धर्मांशं यं सुतं प्राप धर्मराजं नमाम्यहं १ शमता सर्वभूतेषु यस्य सर्वस्य साक्षिणः अतोयन्नाम शमनमितितं प्रणमाम्यहं २ येनांतश्च कृतो विश्वे सर्वेषां जीविनां परं कर्मानुरूपकालेन तं कृतांतं नमाम्यहं ३। विभर्ति दंडं दंडाय पापिनां शुद्धिहेतवे नमामि तं दंडधरं यः शास्ता सर्वदेहिनां ४ विश्वं च कलयत्येव यः सर्वायुश्च संततं अतीव दुर्निवार्यं च तं कालं प्रणमाम्यहं ५ तपसीवेसवा धर्मी संयमी विजितेन्द्रियः जीविनां कर्मफलदस्तं यमं प्रणमाम्यहं ६ ॥ स्वात्मा

५

रामश्च सर्वज्ञो मित्रं पुण्यकृतां भवेत् पापिनां क्लेशदो यस्तं पुण्यमित्रं नमाम्यहं ७। यज्जन्म ब्रह्मणोंशेन ज्वलंतं ब्रह्मतेजसा। यो ध्यायति परंब्रह्म ब्रह्मवंशं नमाम्यहं। ८। इत्युक्त्वासाच सावित्री प्रणानाममयं मुने यमस्तां विष्णुभजनं कर्मपाकमुवाचह॥ इदं इमाष्टकं नित्यं प्रातरुत्थाय यः पठेत् यमात्तस्य भयं नास्ति सर्वपापात् प्रमुच्यते महापापी यदि पठेत् नित्यं भक्त्याच नारद। यमः करोति तं शुद्धं कायव्यूहेन निश्चितं। इति ब्रह्मवैवर्त्ते प्रकृतिखंडे २९ अध्यायः॥ पारिभाषिक यम दंता यथा कार्त्तिकस्य नितान्यष्टावष्टावग्रहायणस्य च यमस्यदंष्ट्राना एते लघ्वाहारी सजीवति। इति वैद्यकं। शरीर साधनापेक्ष नित्यकर्म इत्यमरः उपायांतर निरपेक्षं शरीर मात्र साध्यं नित्यं यावज्जीवमवश्यकार्य्य यत्कर्म तस्मात्स्याप्ति यादि तद्यमः यमेरत्न अहिंसा सत्य वचनं ब्रह्मचर्य्य मकल्कता अस्तेयमिति पंचैते यमाश्चैवव्रतानि च इति मनुः। इति तट्टीकायां भरतः॥ सच अष्टांगयोगांतर।

तांगविशेषः सतु दशविधो यथा ब्रह्मचर्य्यं दयाक्षांतिर्ध्यानं सत्यमकल्कता अहिंसास्तेय माधुर्य्ये। दमश्चेते यमाः स्मृताः ॥ इति गारुडे ९५ अध्यायः॥ स च पंचविधो यथा अहिंसा सत्य मस्तेयं ब्रह्मचर्य्यापरिग्रहौ। यमाः पंचाथ नियमाः शौचं द्विविध मीरितं इति तत्रैव २३. अध्यायः॥ संयमः। यथा। वियामो। वियमो यामो यमः संयाम संयामो इति चामरः। काकः॥ शनिः इति मेदिनी ॥

यमः त्रि यमजः इति मेदिनी। तयो ज्येष्ठत्व निरूपणं यथा वह्निर्वर्तेषु चारिकाद्यमयोः पूर्वजन्मतः यस्य जातस्य यमयोः पश्यंति प्रथमं मुखं। संतानः पितरश्चैव तस्मिन् ज्येष्ठं प्रतिष्ठितं। जन्म प्राथम्यात् ज्येष्ठं यमयोः तत्र निषेकप्राथम्यात् जन्म प्राथम्य स्वेहे मुखदर्शन प्राथम्यात् इति उद्वाहतत्वं ॥

यमकं क्ली शब्दालंकारः तस्य लक्षणादि यथा सत्यर्थे पृथगर्था याः स्वर व्यंजन संहतेः क्रमेण तेनैवावृत्ति र्यमकं विनिगद्यते।

गिनी शुभा सस्नेहो वेश्मनियो न
भुंक्ते यमद्वितीयादिनमेव लब्धा
नं पापिनं सर्वसुराः प्रबुध्य संसा
रमार्गे रटयन्ति विप्र । तस्माद्धात्रा
स्वसृगृहे भोक्तव्यं मासि कार्त्तिके
शुक्लायां च द्वितीयायां सर्वैश्चर्य्या
यमोद्विजः वर्षे वर्षे च कर्त्तव्यं य
शसे आयुषे श्रिये । ततः संप्राप्य
स्वमते भगिन्यै स्वविधानतः स्वर्णा
लंकार वस्त्रादि दान सत्कार मादरा
त् प्रदद्यान्मुनि शार्द्दूल प्रश्रया
वनतः सुधीः स आशिषं प्रगृह्या
स्या नमस्कृत्य तत्नमापयेत् सर्वा भ
गिन्यः सेतो भ्राज्याह्वातु क्रमशास्त
ता वस्त्रान्न पान सत्कारै भोजनैः
पुष्टिवर्द्धनैः करोत्येवं नरो विद्वा
न्न याति यमयातनां अपमृत्युं
न चाप्नोति सत्यं सत्यं हि नान्यथा
यैर्भगिन्यः सुवासिन्यो वस्त्रालंका
रतोषिताः । नतेषां तु त्सरं या
वत्कलहो न रिपोर्भयं धनस्या
प्यपमादेन भूताः प्रेताश्च रात
साः दूरादेव पलायन्ते यमराजेन
ताडिताः । यो देवा महिषारूढो
दंडमुद्गर धारकः वेष्टितः किंकरै
र्दैः हेमस्वे कालात्मनेनमः इत्यं
स्ते द्विज शार्द्दूल कुरुष्व नद्व्रतं शुभं
रम्यं यमद्वितीयाख्यं अपमृत्युनि
वारणं व्रतस्यास्य प्रभावेन पुत्र
पौत्रसमन्वितैः सत्यं वदामि ते
विप्रगृहस्थः स्यात्सदैव वह्नि गार्ह
स्थ्येन समायमीन भूतो न भवि
ष्यति संदेहोऽत्र न कर्त्तव्य इह
लोके परत्र च ये वै यमद्विती
याख्यं व्रतं कुर्वन्ति मानवाः स
मजन्म कृतं पापं तत्क्षणा देव
नश्यति अपुत्रो लभते पुत्रं
धनहीनो लभेद्धनं भार्य्याहीनो
लभेद्भार्य्यां सुरूपां कुलस
म्भवां यस्यां तिथौ यमुनया य
मराज देवः संभोजितः सक
ल लोक निपात हन्तः तस्यां
भुनक्ति स्वतिथौ च गृहे भगिन्याः
प्राप्नोति वित्तमतुलं स चिरायु
रेव इति पाद्मे उत्तरखंडे १२५
अध्यायः ॥

यमधारः पुं पार्श्वद्वयधारयुक्तास्त्र
विशेषः किरीच कातार इत्यादि
भाषा ॥

यमनं क्ली बंधनं उपरतिः इति
मेदिनी ॥

यमनः पुं यमः इतिमेदिनी ॥

यमनिका स्त्री यवनिका कानात्
इति भाषा । इत्यमरटीकायां ॥

विवाहे विधवा नारी यात्रायां म
रणं भवेत् । निष्फलं कृषिवाणि
ज्यं विद्यारंभे च मूर्खता । गृह
प्रवेशे भंगः स्याद्राज्ञां मरणं
ध्रुवं ॥ कृणदाने फलं नास्ति व्र
तदाने च निष्फलं । शुभकर्माणि
सर्वाणि नैव कुर्य्याद्विचक्षणः इति
ज्योतिस्तत्त्वं रविवारे १० । ११ ।
सोमवारे ८ । १९ । मंगलवारे ७
१८ । ११ । २ । बुधवारे १३ । १६ । बृह
स्पतिवारे १९ । १२ । १२९ । २७ ।
शुक्रवारे १५ । ५ शनिवारे १२४ ।
२२ । इति यमघंटयोगः ॥

यमजः त्रि एककालीनैकगर्भजा
तसंतानद्वयं यथा यमौ अस्यलिं
गो यमजेना कोके शमने यानौ
इति मेदिनी अस्यजेष्ठत्वं यम
शब्दे द्रष्टव्यं ॥

यमदग्निः पुं जमदग्निमुनिः स्वत
परशुरामपिता इति भरतद्विरूप
कोषः ॥

यमदूतः पुं यमस्य चरः । यथा
धर्म्म उवाच केश्यंबिलंताक्षा
सः पाशमुद्गर पाणयः दंष्ट्राक
रालवदना अंगारसदृश प्रभा भृ
यंसेवं महावीराः ज्वलत्पावकलो
चनाः कृतान्तप्रमुखाः प्रिये
केन सडंगतिः । यमहता कुधः
यमदूताश्च सर्वे यमाज्ञा कारिणः
सदा तद्दूतोऽयं द्विजास्माक
समहानकपमलोटयः ॥ इति प
द्मपुराणे क्रियायोगसारे ९ अ
ध्यायः ॥

यमदूतकः पुं काकः इति शब्द
रत्नावली ॥ यमदूतश्च ॥

यमदूतिका स्त्री तिंतिडीवृक्षः इत्य
मरः ॥

यमदेवता स्त्री भरणीनक्षत्रं इ
ति हेमचंद्रः ॥

यमद्रुमः पुं शाल्मलिवृक्षः इति
राजनिर्घंटः ॥

यमद्वितीया स्त्री कार्त्तिकशुक्लद्वि
तीया भ्रातृद्वितीया इति ख्याता तस्य
लक्षणं यथा लिंगपुराणे कार्त्तिके
तु द्वितीयायां शुक्लायां भ्रातृपूज
नं यानकुर्य्याद्विनश्यन्ति भ्रातरः
सप्तजन्मनि ॥ तस्या इति शेषः
महाभारते । कार्त्तिके शुक्लपक्ष
स्य द्वितीयायां युधिष्ठिर । यमो
यमुनया पूर्व्वं भोजितः स्वगृहे स्वयं
तस्माज्जिज्ञ गृहे पार्थ न भोक्तव्य
मतो बुधैः । यत्नेन भगिनी हस्ता
द्भोक्तव्यं पुष्टिवर्द्धनं ॥ दानानि च
प्रदेयानि भगिनीभ्यो विशेषतः

नः तथा यमंच चित्रगुप्तंच यमदू
तांश्च पूजयेत् ॥ अर्घ्यश्चात्र प्र
दातव्यो यमाय सहजद्वयैः सह
जद्वये भगिनी भ्रातृभिः अर्घ्य
मंत्रः एह्येहि मार्त्तण्डज पाशहस्त
यमान्तका लोकधरामरेश भ्रातृ
द्वितीया कृतदेवपूजां गृहाण चार्घ्यं
भगवन्नमस्ते धर्मराज नमस्तुभ्यं न
मस्ते यमुनाग्रजा पाहि मां किंकरैः
सार्द्धं सूर्य्यपुत्रनमोऽस्तुते यमु
नां च सेवस्व नमस्कुर्यात् यमस्व
सर्नमस्तेऽस्तु यमुने लोकपूजि
ते वरदा भव मे नित्यं सूर्य्यपुत्रि न
मोऽस्तुते अन्नं दद्यात् पठेत् भ्रात
स्तवानुजाताहं भुंक्ष्व भक्तमिदं
शुभं प्रीतये यमराजस्य यमुनाया
विशेषतः ज्येष्ठा चेत्तदा भ्रा
ताहमिति वदेत् अत्रभोक्तव्यं
पुष्टिवर्द्धनमिति विधिसमभिव्या
हृतफलश्रुत्या भोजननियमस्य
प्राधान्यात्तस्य मुख्यकालोऽपराह्णे
भक्तिदिनपंचमांशो गाणः यथाहु
ः पंचमेच तथाभागे संविभागो
यथार्हतः पितृदेवमनुष्याणां की
टानां चोपदिश्यते । संविभागं
ततः कृत्वा गृहस्थः शेषभुग्भवे
त् इतिहासपुराणाद्यैः षष्ठं च सप्तमं

नयेत् संविभागो विभज्यान्नस्य
प्रतिपादनं । देवोऽत्र वैश्वदेवा
संबंधी पंचमांशलाभेन । न मु
जीतोद्धृतस्नेहं नातिसौहित्य
माचरेत् नातिप्रगे नातिसायं
नातिसंध्यासमीपतः । इति मनूक्त
यर्थुदस्तसूर्य्योदयास्तेतर कालो
पिग्राह्यः सौहित्यं तृप्तिः अत्र
भोजनस्य रागप्राप्तत्वेपि तत्का
लस्य मुनिभिर्द्विरशनं प्रोक्तं वि
प्राणां मर्त्यवासिनां नित्यं । अह
नि च तथा तमस्विन्यां सार्द्धप्रहर
यामान्तः ॥ इति कात्यायनीयेन
नियमितत्वाज्ज्ञातकालस्य वैध
त्वेन शास्त्रीयत्वात् तत्सामान्यशा
स्त्रप्राप्तमुपजीव्य धर्मोपासासंगतिः
अत्रान्नध्ययनं भ्रातॄणां । प्रेत
पक्षोत्तरद्वितीयायां तन्निषेधात्
तथा च राजमार्त्तण्डे प्रेतोर्ध्वे वा
द्वितीयायाः प्रेतपक्षगते तथा
यातगोजागरे याते चैत्राव
त्याः परेऽपि च ... मीसेस
मासे च द्वितीया या भवेत्तिथिः
एतास्वेतास्वनध्यायः पुराणैः परि
कीर्त्तिताः ज्योतिषे तथा यम
द्वितीयायां यात्रायां मरणं भवेत्
इति तिथ्यादितत्त्वं ॥ अस्यां ।

व्रतविधानं यथा नारद उवाच भ
गवन् श्रोतुमिच्छामि त्वामहं लिप्सया
न्वितः तद्व्रतं ब्रूहि मे स्वामिन् कृतं
येन न पश्यति ॥ अल्पदोषं महत्
पुण्यं शोभनं व्रतमुत्तमं । यमद्वारं
कुरु मे स्वामिन् यथाहं तत्करो
मि भोः ब्रह्मोवाच । यदि वेत्सि
विप्रेन्द्र व्रतानां व्रतमुत्तमं । व्रतं
यमद्वितीयाख्यं शृणुत्वं मृत्युवारणं
कार्त्तिके मासि शुक्लायां द्वितीया
यां मुनीश्वर कर्त्तव्यं तद्विधानेन त्व
पमृत्युनिवारणं श्रात्त्वशुद्धमेवो
त्थाय चिन्तयेदात्मनो हितं प्रातः
कृत्वा द्विजः स्नानं दन्तधावनपूर्व
कं ततः शुक्लाम्बरधरः शुक्लमा
ल्यानुलेपनः कृतनित्यक्रियो हृष्टः कुं
डलांगदभूषितः विधिं विलेखयेद्
द्वंच संस्थाप्यौदुम्बरे शुभे । पद्मं
समदलं कृत्वा पूजयेत्तत्समाहितः
चन्दनागुरुकर्पूरकुंकुमैर्द्विज
सत्तम पुष्पैर्धूपैश्च नैवेद्यैर्ना
रिकेलादिभिः फलैः ॥ सरस्व
तीं च वरदां वीणापुस्तकधारिणीं
ध्यायेत् शुक्लाम्बरधरां हंसवाह
नसंस्थितां ततोऽस्तु विनायकी
सालंकारा यपस्विनी विमायवेद
विद्ये गांच दध्यात्सर्ववस्तुकं ।

अपमृत्युविनाशाय संसारार्णवता
रिकां विप्रतुभ्य मिमां रौद्रीं येन
सम्प्रददेत्वहं ॥ इति वाक्यविचा
रेणायेन दद्याद्विजातये कुलीनाय
सुशान्ताय रोगहीनद्विजाय वै तद
भावे चोरकुंभं सवस्त्रं सदक्षिणकं
औदुम्बरविधानेन तत्सम्प्रदद्याद्विजात
ये तस्याप्यलाभे विप्रेन्द्र विप्रा
य सम्प्रदानदेत् । दद्यात् कार्त्तिक
शुक्लायां द्वितीयायां विशेषतः
स्नातिप्रभात् तथाहृद्वान् संपूज्य
चाभिवादयेत् नारिकेलादि दा
नेन तोषयेत् स्वजनानपि । ततः
सोदरसम्पन्ना भगिनी या भवत्तुते
तस्या गृह समागत्य अहृत्यानो
भिराजयेत् भद्रे भगिनि शुभगे
त्वदङ्घ्रि सरसीरुहे । अप्यसेऽद्य
नमस्कर्त्तुमागतोहं तवालयं ।
इति कृत्वा भगिन्यादिः सोदरं वि
तयाश्विनं मुड्वाक्यै स्नानस्तस्या
पूजनं क्रियते मद्रन् अथ भाष्कर
तीर्थ्यान स्नेनो वयसि बांधवः
भोक्तव्यं भाग मङ्गेहे त्वाग्रेषः
कुलदीपक कार्त्तिके शुक्लपक्षस्य
द्वितीयायां सहोदरः यमो यमुन
यापूर्वं भोजितः स्वगृहे स्थितः अ
स्मिन् दिने यमेनापि पूजिता भ

गिनी शुभा स्वसर्नरो वेश्मनियो
नभुंक्ते यमद्वितीया दिनमेवलब्ध्वा
नं पापिनं सर्वस्माः प्रवृत्य संसा
रमार्गे रटयंति विप्र तस्माद्भ्रात्रा
स्वस्वगृहे भोक्तव्यं मासि कार्त्तिके
शुक्लायां च द्वितीयायां सर्वे सर्यमाय
मो द्विजः वर्षे वर्षे वक्तव्यं य
थासे आयुषे श्रिये ततः संप्राप्य।
स्वमते भगिन्ये सविधानतः स्वर्णा
लंकार वस्त्रादि दानसत्कार मादि
रात् प्रदद्यात्तु तिं शार्दूल प्रश्रया
वनतः सधीः स आशिषं प्रशृण्वा
स्यात्तमस्कृत्य समापयेत् सर्वा।
भगिन्यः संतोष्या ज्येष्ठानुक्रमशः।
स्तत्र वस्त्रान्नपान सत्कारै भोजनैः
पुष्टिवर्द्धनैः करोत्येवं नरो विद्वा
न्न याति यम यातनां॥ अपमृत्यु
न वाप्नोति सत्यं सत्यं द्विजोत्तम्या
यै भगिन्यः सवाक्षिन्यो वस्त्रालंका
रतोषिताः। नेतेषां वत्सर यावत्
कलहो न रिपोर्भयं। व्रतस्या
स्य प्रसादेन भूताः प्रेताश्च राक्ष
साः दूरादेव पलायंते धर्मराजेन
नाडिताः योदेवो महिषारूढो।
दंडमुद्गर धारकः वेष्टितः किंकरै
र्दुष्टैस्तस्मै कालात्मने नमः इत्थं
द्विजशार्दूल कुरुष्व तद्व्रते शुभं
रम्यं यमद्वितीयाख्यं अपमृत्यु नि
वारणं व्रतस्यास्य प्रभावेन पुत्र
पौत्रसमन्वितः सत्यं वदामि ते
विप्रग्रहस्थः स्यात्सदैव हि गार्ह
स्थेन समो धर्मो न भूतो न भवि
ष्यति संदेहोत्र न कर्त्तव्य इह
लोके परत्र च ये वै यमद्वितीं।
याख्यं व्रतं कुर्वंति मानवाः स
मजन्मकृतं पापं तत्क्षणा देव
नश्यति अपुत्रो लभते पुत्र
धनहीनो लभेद्धनं भार्य्याही
नो लभेद्भार्य्यां स्वरूपां कुलस
म्भवां यस्यां तिथौ यमुनया य
मराज देवः संभोजितः सक
ल लोक निपात दत्तः। तस्या
भुनक्ति स्वतिथौ च गृहेभगिन्याः
प्राप्नोति वित्त मतुलं स चिरायु
रेव इति पाद्मे उत्तरखंडे १२५
अध्यायः ॥

यमधारः पुं पार्श्वद्वयधारयुक्ता
स्त्रविशेषः किरीच कादार इत्यादि
भाषा ॥

यमनं क्ली बंधनं उपरतिः इति
मेदिनी ॥

यमनः पुं यमः इति मेदिनी

यमनिका स्त्री यवनिका कानात्
इति भाषा इत्यमरटीकायां ॥

रामाश्रमः ॥

यमपत्नी स्त्री यमस्य भार्य्या त
त्पर्य्यायः धूमोर्णा १ विजया २
इति जटाधरः ॥

यमप्रियः पुं वटवृक्षः इति शब्द
रत्नावली ॥

यमभगिनी स्त्री यमुना इति हेम
चंद्रः ॥

यमराजः पुं यमः इति हेमचंद्रः
तस्य पुर्य्यादि यथा पुरी संयमनी
तस्य चित्रगुप्तस्तु लेखकः अस्यो
चंडमहाचंडौ धूमोर्णा विजये
प्रिये॥ विचार भूमिकानीचिः स
हायाः कालपुरुषाः। इति जटा
धरः॥ स च विमात्राच्छायया शा
पः तच्छापांते यथा स्वरूपधारि
णी चेमा मानिनाय निजाश्रमं स
त्तोभार्य्या प्रीतिमती भास्करो
वारितस्करः। ततः पूर्वसुतो।
योऽस्याः सोभूद्वैवस्वतो मनुः
द्वितीयस्तु यमः शापाद्धर्मदृष्टिर
भूत्ततः कृमयो मांस मादाय
पादतस्ते महीतले पतिष्यंती
ति शापांते तस्य चक्रे पिता स्वयं।
धर्मदृष्टि येतश्चासौ समो मित्र
तथाहिते ततो नियोगं तं पा
मेवकार तिमिरापहः यमुना
वनदी जज्ञे कलिंदांतर वाहिनी।
इति मार्कंडेयपुराणे वैवस्वता
मन्वंतरे ॥

यमराट् पुं यमः ॥ इत्यमरः।

यमलं क्ली युग्मं। इति हेमचंद्रः

यमलपत्रकः पुं अश्मंतक वृक्षः
कोविदार वृक्षः इति राजनिर्घंटः

यमलार्जुनहा पुं श्रीकृष्णः इति
हेमचंद्रः ॥

यमलार्जुनौ पुं गोकुलस्थार्जुन
वृक्षद्वयं तौ कुबेरपुत्रौ नलकू
वर मणिग्रीवौ नारद शापात्वृ
क्षतां गतौ श्रीकृष्णेन उद्धारि
तौ यथा यदिमौ लोकपालस्य
पुत्रौ भूत्वा मतः स्तेनौ। न विवा
ससमात्मानं विजानीतः सुदुर्म
दौ अतोऽर्हतः स्थावरतां स्यातां
नैवं यथा पुनः। स्मृतिः स्यान्मत्
प्रसादेन तत्रापि मदनुग्रहात्।
वासुदेवस्य सान्निध्यं लब्ध्वा दिव्य
शरच्छते। हत्ते स्वर्लोकतां भूयो
लब्ध भक्ती भविष्यतः श्रीशुक
उवाच स एवं मुक्त्वा देवर्षिर्गतो
नारायणाश्रमं नलकूबरमणिग्री
वावासतु यमलार्जुनौ ऋषभागि
वतमुख्यस्य सत्यं कर्त्तुं वचो हरिः
जगाम शनकैस्तत्र यत्र स्तो।

यमलार्ज्जुनौ देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना इत्यंतरेणार्ज्जुनयोः कृष्णस्तु यमयोर्ययौ आत्मनिर्वेशमात्रेण तिर्य्यग्गतमुलूखलं बालेन निष्कर्षतान्वगुलूखलं तद्दामोदरेण तरसोत्कलिताङ्घ्रिबंधौ निष्पेततुः परमविक्रमितातिवेपस्कंधप्रवालविटपौ कृतचंडशब्दौ । तत्रश्रिया परमया ककुभः स्फुरंतौ सिद्धावुपेत्य कुजयोरिव जातवेदाः कृष्णंप्रणम्यशिरसाखिललोकनाथं बद्धांजली विरजसा विदमूचतुःस्म वागीगुणानुकथने श्रवणौ कथायांहस्तौच कर्मसु मनस्तव पादयोर्नःस्मृत्यां शिरस्तव निवास जगत्प्रणामे दृष्टिःसतां दर्शनेऽस्तुभवत्तनूनां। श्रीभगवानुवाच तद्गच्छतं मत्परमौ नलकूवरसादनं संजातो मयि भावो वामीप्सितः परमोऽभवः। श्रीशुकउवाच। इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः बद्धोलूखलमामंत्र्य जग्मतुर्दिशमुत्तरां। इति श्रीभागवते १० स्कंधे १० अध्यायः

यमली स्त्री चोलिकाद्वयं इति मेदिनी चोटीशाटीपर्य्याये हेमचंद्रेण गणिता सैव चोलिका

यमवाहनः पुं महिषः इति हेमचंद्रः ॥

यमव्रतं क्ली राजधर्मविशेषः स तु पक्षपातं विना पापिनोशासनरूपः इति पुराणं ॥

यमस्वसा स्त्री यमुना दुर्गा इति मेदिनी ।

यमानिका स्त्री यमानी तत्पर्य्यायः अजमोदा २ उग्रगंधा ३ ब्रह्मदर्भी ४ इत्यमरः । चत्वारि यमान्यां यमानी द्विविधा एका दीप्ययमानी सा अजमोदा इत्येव ख्याता अपरा यमानी इत्येव ख्याता अविशेषान्नद्वयोरपीति स्वभूतिः । केचित्तु अजमोदादि द्वयं वनयमान्यां ब्रह्मदर्भादि द्वयं यमान्यामित्याहुः उग्रगंधा जमोदाख्यात्मनादेव यमानिका इति । यमानी दीपको दीप्यो भूतिकश्च यमानिका इति च रत्नः यच्छति विरमति निवर्त्तते अग्निमांद्यमनया यमानी यमा उ विरतौ नाम्नीति अनट् ईप् यमानी स्वार्थे के यमानिका यमानी पंचमवर्गपंचममध्या । यवा


नीति त्र्यंत्यस्य चतुर्थमध्या इति केचित् इति भरतः ॥ अस्या गुणाः कफशूलनाशित्वं हृद्यत्वं पित्ताग्निकारित्वं । वायुकफकृमिनाशित्वंच इति राजवल्लभः ॥

यमानी स्त्री यमानिका इति शब्दरत्नावली ॥

यमान्तकः पुं शिवः इति शब्दरत्नावली ॥

यमी स्त्री यमुनानदी इति त्रिकाण्डशेषः ॥

यमुना स्त्री दुर्गा यथा सर्व्वाणि हृदयस्थानि मंगलानि शुभानि च ददाति चेप्सितान् लोके तेन सा सर्व्वमंगला संगमात् यमनात् गंगा लोके देवी विभाव्यते यमस्य भगिनी याता यमुना तेन सा मता इति देवीपुराणे ४५ अध्यायः नदीविशेषः सा तु हिमालयदक्षिणदेशान्निर्गत्य प्रयागगंगायां मिलिता तत्पर्य्यायः कालिन्दी २ सूर्य्यतनया ३ शमनस्वसा ४ इत्यमरः तपनतनूजा ५ कलिन्दकन्या ६ यमस्वसा ७ अस्या जलगुणाः पित्तदाहवमनश्रमापहत्वं स्वादुत्वं वातजननत्वं पावनत्वं वह्निदीपनकारित्वं रोचनत्वं । बलप्रदत्वंच इति राजनिर्घण्टः ॥ सा यमस्य भगिनी यथा सावर्णिमनुः एष एव तपो घोरं चकार ह अद्यापि भविता लोके मनुः सावर्णिकेऽन्तरे ख्यातो शनैश्चरश्चास्य ग्रहत्वं समलभत्तथा तयोर्यवीयसी या तु यमस्वसा यशस्विनी अभवत्सा सरिच्छ्रेष्ठा यमुना लोकपावनी इति पद्मपुराणे सागरोपाख्यानं ॥ साच वृंदावने स्वस्याख्यापराशक्तिः यथा श्रीभगवानुवाच इदं वृंदावनं रम्यं मम धामैव केवलं तत्र ये पशवः सालाः कीटा नरामराः ये वसंति ममाधिष्ठे मृता यांति ममान्तिकं तत्र या गोपपत्न्यश्च निवसंति ममालये योगिन्यस्ता न एवंहि मम देवाःपरायणाः पंचयोजनमेवंहि वनं मे देहरूपकं कालिंदीयं सुषुम्नाख्या परामृतवाहिनी इति पाद्मे पातालखंडे ७ अध्यायः ॥ अस्या जलस्य कृष्णवर्णत्वकारणं यथा पुलस्त्यउवाच यदा दक्षसुतासत्वन सतीयाता यमक्षयं विनाशयद्दक्षयज्ञं तं विचचार त्रिलोचनः ततो हरं ध्वजं दृष्ट्वा कंदर्पः कुसुमायुधः अपत्नीकं तदास्त्रेणोन्मादे



नाभ्यताडयत् ततोहरः शरेणाथ तैन्मादेनाभिताडितः विचचार ततोन्मत्तः काननानि सरांसि च स्मरन्सतीं महादेव स्तथोन्मादेन ताडितः न शर्म लेभे देवेशे बाणविद्ध इव द्विपः ततः पपात देवेशः कालिन्दी सरिते मुने निमग्ने शंकरे चापि दग्धा कृष्णत्वमागता। तदाप्रभृति कालिंदी भृङ्गाञ्जननिभं जलं। इति वामने ६ अध्यायः। ज्येष्ठशुक्लद्वादश्यामादिश्य स्नानपिण्डदानं फलं यथा यज्ज्येष्ठ शुक्लद्वादश्यां स्नात्वा वै यमुनाजले मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिं। यमुना सलिले स्नातः पुरुषो मुनिसत्तम: ज्येष्ठामूलेऽमले पक्षे द्वादश्यामुपवासकृत् समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहितः अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलं ज्येष्ठामूले सिते पक्षे समभ्यर्च्य जनार्दनं। धन्योनः पिण्डनिर्वापं यमुनायां प्रदास्यति। इति विष्णुपुराणे ६ अंशे ८ अध्यायः ॥

यमुनाजनकः पुं सूर्य्यः इति हेमचन्द्रः ॥

यमुनाभित् पुं बलदेवः इति हेमचन्द्रः ॥

यमुनाभ्राता पुं यमः इत्यमरः ॥

यमेरुका स्त्री दण्डढक्का इति त्रिकाण्डशेषः ॥

ययातिः पुं नहुषराजपुत्रः तत्पर्य्यायः नाहुषिः २ इति त्रिकाण्डशेषः नाहुषः ३ इति जटाधरः। तस्योपाख्यानं यथा नहुषस्य। प्रवक्ष्यामि पुत्रान्सप्तैव धार्मिकान् यतिं ययातिं संयातिमुद्भवः पञ्चमं तथा सर्य्यातिं मेघयातिं च सप्तैते वंशवर्द्धनाः ययातिरकरोद्राज्यं धर्मैकशरणस्तदा। शर्मिष्ठा तस्य भार्य्याभूत् दुहिता वृषपर्व्वणः भार्गवस्याङ्गजा तद्वद्देवयानी च सुव्रता ययातेर्देवयान्यां तु पुत्रावजनयन्नृपः यदुं च तुर्व्वसुं चैव शक्रविष्णू इवापरौ। तस्मादेव तु राजर्षेः शर्मिष्ठा वार्षपर्व्वणी। द्रुह्युं चानुं च पूरुं च त्रीन् कुमारानजीजनत्। ततः कालेन कस्मिंश्चिद्देवयानी शुचिस्मिता ययातिसहिता राजन् जगाम विजनं वनं ददर्श च तदा तत्र कुमारान् देवरूपिणः क्रीडमानान् सुविस्रब्धान् विस्मिता चेदमब्रवीत्

किन्नामधेयं गोत्रं वः पुत्रकाः। ब्राह्मणः पिता विज्ञातं मे यथा तथ्यं प्रोक्तमिच्छामि तेऽप्यहं तेऽदर्शयन् प्रदेशिन्या तमेव नृपसत्तमम् उद्दिश्य तदा देवी शर्मिष्ठामिदमब्रवीत्। मदधीना सती कस्मात्कार्षी विप्रियं मम। शर्मिष्ठोवाच यदाव वृतो राजा वृत एव तदा मया त्वत्तो हि मे पूज्यतमो राजर्षिः किं न वेत्सि तत्। शौनक उवाच। श्रुत्वा तस्यास्ततो वाक्यं देवयान्यब्रवीदिदं। राजन्नाद्येह वत्स्यामि विप्रियं मे त्वया कृते अब्रुवती किञ्चिद्राजानं साश्रुलोचना अचिरादेव संप्राप्ता काव्यस्योशनसोऽन्तिके। देवयान्युवाच शर्मिष्ठयातिवृत्तास्मि दुहित्रा वृषपर्व्वणः त्रयोऽस्यां जनिताः पुत्रा राज्ञानेन ययातिना दुर्भगाया मम द्वौ तु पुत्रौ तातं ब्रवीमि वः शुक्र उवाच। धर्मज्ञ सन्महाराज योऽधर्ममकृथाः प्रियं। तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्जया ययातिरुवाच ऋतुकामां स्त्रियं यस्तु गम्यां रहसि याचितः नोपैति सह धर्मेण भ्रूणहेत्युच्यते बुधैः। अधर्मभयसंविग्नः शर्मिष्ठामुपजग्मिवान्। अतृप्तो यौवनस्याहं देवयान्या भृगूद्वह प्रसादं कुरु मे ब्रह्मन् जरेयं मा विशेत माम्। शुक्र उवाच। नाहं मृषा ब्रवीम्येतत् जरां प्राप्तोऽसि भूमिप जरां त्वेतां त्वमन्यस्मै संक्रामय यदीच्छसि वयो दास्यति पुत्रो यः स ते राजा भविष्यति इति मात्स्ये ३२ अध्यायः॥ शौनक उवाच जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव ह। पुत्रं ज्येष्ठं वरिष्ठं च यदुमित्यब्रवीद्वचः॥ त्वं यदो प्रतिपद्यस्व पाप्मानं जरया सह यौवनेन त्वदीयेन चरेयं विषयानहं पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहं दत्त्वा संप्रतिपत्स्यामि पाप्मानं जरया सह यदुरुवाच सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप। जरां ग्रहीतुं धर्मज्ञ पुत्रमन्यं वृणीष्व वै ययातिरुवाच। यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि पापात्मात्वं सर्वथात प्रजा वै ते न भविष्यति तुर्व्वसो प्रतिपद्यस्व पाप्मानं जरया सह यौवनेन चरेयं वै विषयांस्तव पुत्रक तुर्व्वसुरुवाच न कामये जरां तात कामभोगप्रणाशिनीं बलरूपान्तकारिणीं

बुद्धिमा विनाशिनी ययातिरुवा
च यस्त्वं मे हृदयाज्जातो वयः स्वं
न प्रयच्छसि तस्मात्प्रजा समुच्छे
दं तुर्वसो तव यास्यति द्रुह्यो त्वम
पि प्रयच्छस्व वर्णरूपविनाशिनी ज
रां वर्षसहस्राणि यौवनं स्वं प्रयच्छ
च द्रुह्युरुवाच न गजं न रथं चाश्वं
जीर्णो भुंक्ते वरस्त्रियं नरोग।
वागस्य भवति तां जरां तेन का
मये ययातिरुवाच यत्त्वं मे हृद
याज्जातो वयः स्वं न प्रयच्छसि त
स्मात् द्रुह्यो प्रियः कामो न तेन स
म्पत्स्यते क्वचित्॥ अनो त्वं प्रति
पद्यस्व पाप्मानं जरया सह एकं
वर्षसहस्रं तु चरेयं यौवनेन ते अ
नुरुवाच जीर्णः शिशुरिवादत्ते।
कालेऽन्नमशुचि यथा न जुहोति च
कालेऽग्निं तां जरां नैव कामये
ययातिरुवाच यत्त्वं मे हृदयाज्जा
तो वयः स्वं न प्रयच्छसि जरादोष
स्त्वया क्तो यत्तस्मात्त्वं प्रतिपत्स्यसि
पूरो मे त्वं प्रियः पुत्रस्त्वं वरीयान्
भविष्यसि काव्यस्योशनसः शा
पाच्च न तृप्तोऽस्मि यौवने। पूरो त्वं
प्रतिपद्यस्व पाप्मानं जरया सह
किंचित्कालं चरेयं वै विषयान् व
यसा तव पूर्णे वर्षसहस्रे तु प्रति

दास्यामि यौवनं स्वं चैव प्रति
पत्स्यामि पाप्मानं जरया सह
शौनक उवाच एवमुक्तः प्रत्युवाच
पूरुः पितरं मञ्जसा यथात्थ मां
महाराज तत्करिष्यामि ते वचः
ययातिरुवाच। पूरो प्रीतोऽस्मि
ते वत्स प्रीतश्चेदं ददामि ते।
सर्वकामसमृद्धा ते प्रजा राज्ये
भविष्यति इति मात्स्ये ३२ अ
ध्यायः॥ शौनक उवाच पौर
वेणाथ वयसा ययातिर्नहुषात्म
जः प्रीतियुक्तो नरश्रेष्ठश्चचार वि
षयान्स्वपी। पूर्णं मत्वा ततः का
लं पूरुं पुत्रमुवाच ह पूरो प्रीतो
ऽस्मि भद्रं ते गृहाणेमं स्वयौवनं।
राज्यं चापि गृहाणेदं यत्त्वया
प्रकृतं पुरा शौनक उवाच ए
वं स नाहुषो राजा ययातिः पुत्र
मीप्सितं राज्येऽभिषिच्य मुदितो
वानप्रस्थोऽभवन्मुनिः। उषित्वा
वनवासं स ब्राह्मणैः सह संश्रितः
फलमूलाशनो दान्तो यथा स्वर्ग
मितो गतः इति मात्स्ये ३४
अध्यायः॥
यवी महादेवः इत्युणादि
कोषः॥
यमुः पुं अश्वमेधीयाश्वः सामान्य

घोटकः इति मेदिनी॥
यवः पुं स्वनामख्यातशूकधान्यं
तत्पर्यायः सितशूकः २ इत्य
मरः शीतशूकः ३ इति शब्द
रत्नावली मेध्यः ४ दिव्यः ५ अ
क्षतः ६ कंचुकी ७ धान्यराजः ८ ती
क्ष्णशूकः ९ तुरगप्रियः १० शक्तुः
११ महेष्टः १२ पवित्रधान्यं १३ तस्य
गुणाः कषायत्वं मधुरत्वं सुशी
तलत्वं। प्रमेहपित्तकफापहा
रकत्वंच अशूकमुंड यवगुणाः
बलप्रदत्व हृष्यत्वं नृणां बहुवी
र्य पुष्टिदत्वंच। इति राजनिर्घण्टः
अपिच यवः कषायमधुरो बहु
वात शकृदुरुः स्वतः स्थैर्य्यकरः
शीतो मूत्र मेद कफापहः इति
राजवल्लभः॥ परिमाणविशेषः
सत्वचत्वर्योस्समानरूपः इति शुभ
करः षट्सर्षपपरिमाणात्मकश्च
यथा जालान्तरगते भानो यत्
तु हश्यते रजः तैस्त्रिभिर्भवे
लिक्षा लिक्षा षड्भिस्तु सर्षपः ष
ट्सर्षपैर्यवस्त्वेको गुञ्जैकात्रयवै
स्त्रिभिः इति शब्दचन्द्रिका॥
अङ्गुलिस्थ यवाकाररेखाविशेषः
यथा तर्जनीमूल संस्थौ यवौ
पुत्रार्थदौ क्रमात् मध्यमायां य

वश्चैव वांछिते पूर्वपनप्रदः। अ
पिच मध्यमायां यदि यवो हश्य
ते च सशोभनः तदा स्य संचितं
द्रव्यं शर्मोत्पद्यतेके यवे। य
स्यापि चक्र संज्ञेऽत्र यव पूर्णेन हृ
श्यते तदा पितामहादीनां सर्वि
तं लभते धनं॥ इति सामुद्रकं।
यवकः पुं यवः इत्यमरटीकायां
रामाश्रमः॥
यवक्यं त्रि यवभवनोचितक्षेत्रं
इत्यमरः॥
यवगंडः पुं युवगंडः वयस्फोटा
इति भाषा इति शब्दरत्नावली।
यवजः पुं यवक्षारः इति रत्नमाला
यवानी। इति राजनिर्घण्टः।
यवजोद्भवं क्ली नवक्षीरं। इति
राजनिर्घण्टः॥
यवतिक्ता स्त्री लताभेदः शंखि
नीति यवची इति च ख्याता तत्
पर्यायः महातिक्ता २ हृष्टपाद
३ विसर्पिणी ३ नाकुली ४ नेत्रमी
ना ५ शंखिनी ६ पत्रतंडुली ७ तंडु
ली ८ अक्षपीडा ९ सूक्ष्मपुष्पी १० य
शस्विनी ११ माहेश्वरी १२ तिक्त
फला १३ यावी १४ तिक्ता १५
अस्याः गुणाः सतिक्तासत्वं। दीप
नत्वं। रुचिकारित्वं। कृमि कुष्ठ

विवर्णास्वदोष नाशित्वं रेचनत्वंच
इतिराजनिर्घंटः ॥
यवतैलं क्ली यवचूर्णादिकृतप
क्वतैलविशेषः तत्प्रकारंगुणांश्चाह
यवचूर्णार्द्धकुडवं मंजिष्ठाद्वेपले
तत्र तैलप्रस्थः शतगुणेकांजिके
साधितो जयेत् । ज्वरदाहं म
हावेग मंगानांच प्रहर्षणं इति
स्त्रवैद्यकं ॥
यवनः पुं देशविशेषः वेगः
वेगाधिकाश्वः । इति मेदिनी
गोधूमः गर्जरत्वणं । तुरुष्कः
इतिराजनिर्घंटः जातिविशेषः ।
इतिशब्दरत्नावली सतु ययाति
पुत्रतुर्वसुवंशः । यथा यदोस्तु
जाता यदव स्तुर्वसो र्यवनाःस्मृताः
द्रुह्योस्तुतनया भोजा अनोस्तु
म्लेच्छजातयः पूरोस्तु पौरवो वं
शो यत्र जातोऽसिपार्थिव । इति
मात्स्ये ३४ अध्यायः ॥ यवन
शब्द स्ववर्ग तृतीयादिरितिरघुन
न्दनभट्टाचार्य्येण लिखितं यथा
जवनादीनांतु सर्वधर्म बहिष्कृत
त्वं हरिवंशे । सगरस्ता प्रति
ज्ञांच गुरो र्वाक्यं निशम्य च
धर्मं जघान तेषां वै वेशान्यत्वंच
कार ह ॥ अर्द्धं शकानां शिरः
सो मुंडयित्वा व्यसर्जयेत जवना
नां शिरः सर्वं काम्बोजानान्तथैव
च पारदा मुक्तकेशाश्च पह्नवाः
श्मश्रुधारिणः निःस्वाध्यायवषट्
काराः कृता स्तेन महात्मना शका
जवन काम्बोजाः पारदाःपह्नवाः
स्तथा कोलिसर्पाः समहिषा दार्वा
श्चोलाः सकेरलाः वशिष्ठ वच
नाद्राजन्सगरेण महात्मना । शका
नां शाकदेशोद्भवानां क्षत्रियाणां
एवं जवनादीनामिति अत्रजवन
शब्द स्तद्देशोद्भववाची चवर्गतृती
यादिः जवनो देश वेगिनो रिति
त्रिकांडशेषाभिधान दर्शनात ते
यां म्लेच्छत्व मप्युक्तं विष्णुपुराणे
तथा कृतान् जवनादीनुपक्रम्य ते
चात्मधर्म परित्यागात् म्लेच्छत्वंययु
रिति । वौधायनः गोमांसखाद
कोयश्च विरुद्धं बहुभाषते सर्वा
चार विहीनश्च म्लेच्छ इत्यभिधी
यते इतिप्रायश्चित्ततत्वे ॥ मुनि
विशेषः । यथा जाते दिने हृदय
ते वशिष्ठ श्चाह व गर्गो यवनो
दृष्टाहं जन्माख्य मासकिल भा
गुरिश्च दौरे विवाहेपि च कर्ण
वेधे । इतिज्योतिस्तत्वे काल
यवनोत्पत्ति र्यथा । श्रीपरा ।

शर उवाच । गार्ग्यं गोष्ठे द्विजं
श्यालः षण्ढ इत्युक्तवानृद्विज यदू
सन्निधौ सर्वे जहसुर्यादवास्ततः
ततः कोप समाविष्टो दक्षिणापथ
मेत्यसः सुतमिच्छन्स्तपस्तेपे यदु
चक्र भयावहं ॥ आराधयन्महादे
वं सोऽयश्चूर्णमभक्षयत् ददौ व
रंच तुष्टोऽस्मै वर्षे द्वादशमे हरः
सभाजयामास च तं यवनेशो ।
ह्यनात्मजः तद्योषित्संगमाच्चास्य
पुत्रो ऽभूदलिसप्रभः ॥ अलिसो
भृंगः तं कालयवनं नाम राज्ये
स्वे यवनेश्वरः । अभिषिच्य वनं
यातो वज्राग्र कठिनोरसं । स च
वीर्य्य मदोन्मत्तः पृथिव्यां बलिनो
नृपान् पप्रच्छ नारदस्तस्मै कथ
यामास यादवान् म्लेच्छकोटिसह
स्राणां सहस्रैः सो ऽभिसंहतः ।
गजाश्वरथ सम्पन्नै श्चकार पर
मोद्यमं प्रययौ चाव्यवच्छिन्नैश्छि
न्नयानो दिने दिने । यादवान्प्रति
सामर्षो मैत्रेय मथुरां पुरीं ।
कृष्णोपि चिंतयामास क्षपितं या
दवं कुलं यवनेन रणेगम्यं मग
धस्य भविष्यति । मागधस्य बलं
क्षीणं सकालयवनो बली हंता त
दिदमायातं यदूनांव्यसनं द्विधा
तस्मा दुर्गं करिष्यामि यदूनां मति
दुर्जयं । इतिसंचिन्त्य गोविंदो
योजनानि महोदधिं ॥ ययाचे ।
द्वादश पुरीं द्वारकां तत्र निर्ममे ।
मथुरावासिनो लोकां स्तत्रानीं ।
य जनार्द्दनः । आसन्ने कालयवने
मथुरांच स्वयं ययौ बहिरावासि ।
ते सैन्ये मथुराया निरायुधः ॥
निर्जगाम स गोविन्दो ददृशे यव
नश्च तं सज्ञात्वा वासुदेवं तं
बाहु प्रहरणो नृपः । अनुयातो ।
महायोगि चेतोभिः प्राप्यते ।
नयः तेनानुयातः कृष्णोपि प्रवि
वेश महागुहां । यत्र शेते ।
महावीर्य्यो मुचुकुंदो नरेश्वरः
सोपि प्रविष्टो यवनो दृष्ट्वा श
य्यागतं नरं पादेन ताडया ।
मास कृष्णं मत्वा सदुर्मतिः दृष्ट
मात्रश्च तेनासौ जज्वाल यवनो
ऽग्निना तत्क्रोधजेन मैत्रेय भ
स्मीभूतश्च तत्क्षणात इतिविष्णु
पुराणे ५ अंशे २३ अध्यायः ॥
यवनः त्रि वेगी । इतिमेदिनी ।
यवनद्विष्टः पुं गुग्गुलुः इति राज
निर्घंटः ॥
यवनप्रियं क्ली मरिचं इतिहेम
चंद्रः ॥

यवनाचार्य्यः पुं ज्योतिःशास्त्रकर्त्ता मुनिविशेषः इति वराहमिहिरः ।

यवनानी स्त्री यवनस्य लिपिः इति मुग्धबोधटीकायां दुर्गादासः ॥

यवनारिः पुं श्रीकृष्णः इति त्रिकाण्डशेषः ॥

यवनालः पुं धान्यविशेषः देधान इति भाषा तत्पर्य्यायः । योनालः २ शूर्णाह्वयः ३ देवधान्यं ४ जोन्नला ५ बीजपुष्पिका ६ इति हेमचन्द्रः ॥

यवनालजः पुं यवक्षारः इति हेमचन्द्रः ॥

यवनिका स्त्री जवनिका कानात इति भाषा इत्यमरटीका ॥

यवनी स्त्री यवानीनामकौषधिभेदः इति मेदिनी यवनभार्य्या च ।

यवनेष्टं क्ली सीसकं इति हेमचन्द्रः मरीचं गृञ्जनं । इति राजनिर्घण्टः ॥

यवनेष्टः पुं लशुनः राजपलाण्डुः निम्बः पलाण्डुः ॥ इति राजनिर्घण्टः ॥

यवनेष्टा स्त्री खर्ज्जूरी इति राजनिर्घण्टः ॥

यवफलः पुं वंशः इत्यमरः ॥ जटामांसी कुटजः । इति मेदिनी । लशुनः इति शब्दरत्नावली ॥

यवमध्यं क्ली चान्द्रायणप्रभेदः यथा शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति ॥ इति प्रायश्चित्ततत्त्वं ॥

यवमयः त्रि यवनिर्म्मितः यवशब्दात् मयट्प्रत्ययेन निष्पन्नः ॥

यवलासः पुं यवक्षारः इति शब्दरत्नावली ॥

यवशूकः पुं यवक्षारः इति त्रिकाण्डशेषः ॥

यवशूकजः पुं यवक्षारः इति राजनिर्घण्टः ॥

यवसं क्ली तृणं घासः इत्यमरः ॥

यवसुरं क्ली यवजातसुरा । इति सिद्धान्तकौमुदी ॥

यवक्षारः पुं क्षारविशेषः शोरा इति भाषा यथा नरसार यवक्षार स्फटिकारि यव काचवकयंत्रैः बहुशः पात्य सत्वं तद्धि महाद्रावकनाम इति रत्नावली तत्पर्य्यायः यवाग्रजः २ पाक्यः ३ इत्यमरः यवलासः ४ यवशूकः ५ सारकः ६ रेचकः ७ यवनालकः ८ इति शब्दरत्नावली । यावशूकः ९ क्षारः १० तर्षः ११ नीलगरसः १२ यवनालजः १३ इति रत्नमाला । यवजः १४ यवशूकजः १५ यवाह्वः १६ यवापत्यं १७ । अस्य गुणाः कटुत्वं उष्णत्वं कफवातोदरार्त्तिनाशित्वं आमशूलाश्मरुकृच्छ्रविषदोषहरत्वं । सरत्वंच इति राजनिर्घण्टः अर्शः श्वासगुल्मग्रहणीपाण्डुप्लीहानाहगलामयनाशित्वंच । इति राजवल्लभः ॥

यवक्षोदः पुं यवचूर्णं तत्पर्य्यायः विकसः २ इति हेमचन्द्रः ॥

यवागूः स्त्री षड्गुणजलपक्वघनद्रवद्रव्यविशेषः याउ इति भाषा तत्पर्य्यायः उष्णिका २ श्राणा ३ विलेपी ४ तरला ५ इत्यमरः ।

१ यूयते मिश्र्यते यवागूः पुलमिश्र
२ ज्वरादिरोगं उष्णिका उष्णवाये
३ श्राणा श्रीति श्रागूः गुणाः ओषति दहति रिद हि सर्व्वेण निकृष्यते पच्यते स्म श्राणा श्राल पाकेऽर्त्तः स्तुत्वा यो दितिनः विलिम्पति विलेपी विलिपो शाप न लेपे पचादित्वात् न नदादित्वादीप् तरति भवति तरला न तरेऽभिभवे स्वार्थे ना भीति भरतः । अत्र पेयगुणा साध्यं विलेपी च वलगुणो मंडस्त्वल्पगुणो यवागूः षड्गुणोऽम्भसि इति वैद्यकशब्दोभेद इद नाहतः इति टीकायां भरतः अस्या गुणाः यवागूः ज्वर तृष्णाघ्नी । लघ्वी वस्तिविशोधनी अतीसारे ज्वरे दाहे हिता वह्निप्रदीपनी । इति राजवल्लभः ॥

यवाग्रजः पुं यवक्षारः इत्यमरः यवानी इति राजनिर्घण्टः ॥

यवानः त्रि वेगी इति मेदिनी ।

यवानिका / स्त्री ओषधिभेदः यो यवानी / आनि इति भाषा तत्पर्य्यायः दीप्यकः २ दीप्यः ३ यवसाह्वः ४ यवाग्रजः ५ दीपनी ६ उग्रगन्धा ७ वातारिः ८ भूकदम्बकः ९ यवजः १० दीपनीयः ११ शूलहन्त्री १२ यवानिका १३ उग्रा १४ तीव्रगन्धा १५ अस्या गुणाः कटुत्वं तिक्तत्वं उष्णत्वं वातार्शःश्लेष्मशूलाध्मानकृमिवह्निनाशित्वं दीपनत्वंच इति राजनिर्घण्टः । अपिच अथ यवान्या नामगुणाः यवानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका सैवोक्ता दीप्यको दीप्या तथास्याद्यवसाह्वया यवानी पाचनी रुच्या तीक्ष्णोष्णा कटुका लघुः

दीपनीच तथा तिक्ता पित्तला
शुक्रशूलहृत् वातश्लेष्मोदरा ।
नाह गुल्म प्लीह कृमि प्रणुत् ।
अथ अजमोदाया नामानि गुणाश्च
अजमोदा खराश्वा च मयूरो दी
प्यकस्तथा तथा ब्रह्मकुशा प्रो
क्ता कारवी लोचमस्तकः । अज
मोदा कटुस्तीक्ष्णा दीपनी कफवा
तनुत् । उष्णा विदाहिनी हृद्या वृ
ष्या बलकरी लघुः नेत्रामयकृमि
छर्दि हिक्का वस्तिरुजो हरेत् ।
अथ खरासानी यवानी नाम गुणाः
पारसीक यवानी तु यवानीसदृशी
गुणैः विशेषात् पाचनी रूक्षा
ग्राहिणी मादिनी गुरुः ॥ इतिभा
वप्रकाशः ॥
यवापत्यं क्ली यवक्षारः इतिराज
निर्घण्टः ॥
यवाम्लजं क्ली सौवीरकं इतिराज
निर्घण्टः ॥
यवासः पुं दुरालभा । यथा या
सो यवसो दुःस्पर्शो धन्वयासो
दुरालभा । इतिरत्नमाला खदिर
भेदः यथा कंटकी वासपत्रश्च
यवासः खदिरस्तथा । इतिशब्द
माला यवासा इति ख्याता कंट
की द्रव्यविशेषः तत्पर्य्यायः ।
यासः २ बहुकंटकः ३ अस्रकः ४
ह्रस्वगन्धी ५ रोदनिका ६ कच्छुरा ७
बालपत्र ८ विषघ्नः ९ कंटकालुकः
१० त्रिकर्णिका ११ गांधारी १२ अ
नंता १३ अस्य गुणाः मधुरतिक्त
त्वं शीतलत्वं पित्तार्त्तिदाह नाशि
त्वं बलदीपन कारित्वं । तृष्णा
कफ छर्दि विसर्पजित्त्वंच इति
राजनिर्घण्टः ॥
यवासकः पुं दुरालभा इति शब्द
रत्नावली ॥
यवासशर्करा स्त्री यवासरसकृत
शर्करा तत्पर्य्यायः । स्वद्यमोदकः २
मोदकः ३ नवराजः ४ खंडा
सरः ५ खंडजः ६ खंडमोदकः ७
अस्या गुणाः अतिमधुरत्वं । पि
त्तश्रम तृषापहत्वं वृष्यत्वं । वि
दाह मूर्च्छार्त्ति भ्रांति शांतिकरत्वं
सरत्वंच । इति राजनिर्घण्टः ।
यवासा स्त्री गुंडासिनी तृणं इति
राजनिर्घण्टः ॥
यवाक्षः पुं यवक्षारः इतिराज
निर्घण्टः ॥
यविष्ठः त्रि अतिशययुवा अय
मनयोरतिशयेन युवा इत्यर्थेइष्टप्र
त्ययेन निष्पन्नः कनिष्ठभ्रातरि पुं
इति हेमचंद्रः ॥

यवीयान् त्रि कनिष्ठः युवा इति
मेदिनी ॥
यवोत्थं क्ली सौवीरकं इतिराज
निर्घण्टः ॥
यव्यं त्रि यवादिभवनोचितक्षेत्रं ।
तत्पर्य्यायः यवक्यं २ यष्टिक्यं ३
इत्यमरः यवाचितं ४ यवको
चितं ५ इति शब्दरत्नावली ॥
यव्यः पुं मासः यथा यव्य हृयं
श्रावणादि सर्वा नद्यो रजस्वलाः
तासु स्नानं नकुर्वीत वर्जयित्वा स
मुद्रगाः इतिप्रायश्चित्ततत्त्वे गं
गामाहात्म्यं ॥
यशः क्ली सुख्यातिः तत्पर्य्यायः
कीर्त्तिः २ समज्ञा ३ इत्यमरः
समाख्या ४ कीर्तना ५ अभिख्या
नं ६ आज्ञा ७ समन्या ८ इतिशब्द
रत्नावली दानादि प्रभवा कीर्त्तिः
शौर्य्यादि प्रभवं यशः इति मा
धवी अतएव यशः कीर्त्त्यो र्भे
दस्यापि दर्शनात् यशःकीर्त्तिप
रिभ्रष्टो जीवन्नपि नजीवति इति
कस्यचित्प्रयोगः जीवतः ख्या
ति र्यशो मृतस्य ख्यातिः कीर्त्ति
रितिकेचित् तन्नसाधु कीर्त्तिस्त
नय इतिकेति प्रयोग दर्शनात्
इत्यमरटीकायां भरतः ॥
कार्त्तिनाके दोषो यथा हंतियः ।
परकीर्त्तिं च स्वकीर्त्तिं मानवाधमः
सहन्तच्च इतिख्यातस्तत् फलंच
निशामय अंधकूपे वसेत् सो
ऽपि यावदिन्द्राश्चतुर्दश कीटै
र्नकुलमानैश्च भक्षितः सततं ।
तप्त तप्तक्षारोदकं पापी नि
त्यं पिबति खादति । ततः सर्प
जन्म सप्तकाकः पंचततः शुचिः
इति ब्रह्मवैवर्त्ते प्रकृतिखंडे ४९
अध्यायः ॥
यशःपटहः पुं ढक्का इत्यमरः
यशःशेषः त्रि मृतः इति हेम
चंद्रः मरणे पुं ॥
यशदं क्ली धातुविशेषः दस्ता
इतिभाषा । यथा यशदं रंगसदृशं
रीतिहेतुश्च तन्मतं । यशदं तु
वरं तिक्तं शीतलं कफपित्तहृत्
चक्षुष्यं परमं मेहान् पाण्डु
श्वासंच नाशयेत् । इति भाव
प्रकाशः ॥
यशस्करः त्रि कीर्त्तिकारकः सुख्या
तिजनकः यशस्करोति यश इत्यर्थे
ट प्रत्ययेन निष्पन्नः यशस्करी वि
द्या इति व्याकरणं ॥
यशस्या स्त्री जीवंती ऋद्धिनामौ
षधिः इतिराजनिर्घण्टः ॥

यशस्वान् त्रि कीर्त्तिविशिष्टः यशो
ऽस्त्यस्य इत्यर्थे वत् प्रत्ययेन नि
ष्पन्नः । इतिव्याकरणं ॥
यशस्विनी स्त्री वनकार्पासी इति
शब्दरत्नावली यवतिक्ता ॥ महा
ज्योतिष्मती इतिराजनिर्घण्टः ॥
यशस्वी त्रि यशोविशिष्टः । कीर्त्ति
मान् यशः शब्दादस्त्यर्थे इन् प्रत्य
येन निष्पन्नं ॥ इतिव्याकरणं
यशोरः पुं पारदः ॥ इति राज
निर्घण्टः ॥ यशोदातरि त्रि ॥
यशोदा स्त्री नंदपत्नी यथा नंदः
किमकरोद्ब्रह्मन्श्रेय एवमहोदयं
यशोदा वा महाभागा पपौ य
स्याः स्तनं हरिः ॥ इतिश्रीभाग
वते १० स्कंधः ॥
यष्टा पुं यागकर्त्ता तत्पर्य्यायः
यजमानः २ । इत्यमरः ॥
यष्टिः पुं ध्वजदंडः । इति विश्व
मेदिनी शब्दरत्नावल्यः भुजदंडः
इति मुद्रांकित मेदिनी ॥
यष्टिः पुं स्त्री तंत्रः इति शब्द
माला । हारलता । भार्गी ।
मधुका शस्त्रभेदः इतिमेदिनी
शेषस्य पर्य्यायः दंडः २ लगुडः ।
३ इति हेमचंद्रः ॥ तद्दानफलं ।
यथा यष्टिं ये च प्रयच्छंति ।
नेत्रहीने सदुर्बले । तेषांत विपु
लः पुंसां संतानो मोहवर्जितः
इति वह्निपुराणं ॥
यष्टिकः पुं जलकुक्कुटः इतिश
ब्दरत्नावली ॥ दंडस्य ॥
यष्टिका स्त्री हारभेदः यथा यष्टि
कादंडिका चैव तिलका सारिके
त्यपि इति जटाधरः ॥ वापी ।
यथा पल्वलं दीर्घिकावापी यष्टि
का मीनगोधिका इति त्रिकांड
शेषः । यष्टिमधुका यथा अथ
यष्टी मधुकं स्यान्मधुयष्टीवयष्टि
का इतिशब्दरत्नावली लगुडः य
था अथ शक्तिश्च शक्तीचयष्टिर्य
ष्टीच यष्टिका दंडः कांडो ऽपिलगु
डः पञ्चत्रां दंडको ऽपिच । इति
शब्दरत्नावली ॥
यष्टिग्रहः पुं यष्टिधारकः लगुडी
शाष्टी इति मुग्धबोध टीकायां
दुर्गादासः ॥
यष्टिमधु क्ली यष्टिमधुका इति
हलायुधः ॥
यष्टिमधुका स्त्री यष्टिमधु तत्पर्य्या
यः क्लीतकं २ मधुकं ३ मधुयष्टिका ४
इत्यमरः यष्ट्याह्व ५ यष्टि ६ स्थले
जाते चेत् यष्टीमधु ७ जलजावेत
अतिरसा ८ ॥ इति रत्न


माला । अपिच । ज्येष्टीमधु तथा
यष्टी मधुकं क्लीतकं तथा अन्य
क्लीतकं तत्रभवेन्नाये मधूलिका
अस्या गुणाः यष्टी हिमा गुरुः
स्वाद्वी चक्षुष्या बलवर्णकृत् सु
स्निग्धा शुक्रला केश्या स्वर्य्या पित्ता
निलास्रजित् व्रणशोथ विषच्छर्दि
तृष्णा ग्लानिक्षयापहा इतिभाव
प्रकाशः ॥
यष्टी स्त्री यष्टिमधु इतिभावप्रका
शः यष्टीकं क्ली यष्टिमधु इतिराज
निर्घण्टः ॥
यष्टीपुष्पः पुं पुत्रजीववृक्षः इति
भावप्रकाशः ॥
यष्टीमधु क्ली मिष्टमूलविशेषः ।
जेठीमधु इतिमूलहटी इतिचहिंदी
भाषा तत्पर्य्यायः । मधुयष्टी २
मधुवल्ली ३ मधुस्रवा ४ मधूकं ५ म
धू ६ यष्टीकं ७ यष्ट्याह्वं ८ अस्य
गुणाः मधुरत्वं किंचितिक्तत्वं ।
शीतलत्वं चक्षुष्यत्वं पित्तहरत्वं ।
तृष्णत्वं शोष तृष्णाव्रणापहत्वंच
इति राजनिर्घण्टः ॥
यष्ट्याह्वं क्ली यष्टिमधु इतिराज
निर्घण्टः ॥
यस य उ इर यतने । इतिकवि
कल्पद्रुमः । इर अयसत् अयासीत्
अयसीत् । अस्मात् पुषादित्वान्नि
त्ये ङ इत्यन्ये । य प्रयस्यति ।
क्रमक्लम इत्यादिना केवलात् सं
पूर्वाच्च अस्मात् श्यन् विकल्पात् य
सति यस्यति संयस्यति संयसति ।
उ यसित्वा यस्त्वा यतने यत्नः
इतिदुर्गादासः ॥
यस्कः पुं मुनिविशेषः इतिमुग्ध
बोधव्याकरणं ॥
यक्षः पुं यजमानः इत्युणादि
कोषः ॥
यक्ष ङ क मदि इतिकविकल्पद्रु
मः क ङ यक्षयते मदि पूजायां
इतिदुर्गादासः ॥
यक्षः पुं गुह्यकमात्रे गुह्यकेश्वरः
इति मेदिनी रङ्कगद्दः ॥ यक्ष
रत्नकः । इति सारस्वतः । यक्ष
स्वरूपं यथा आजग्मुर्यक्ष निक
राः कुवेर वरकिंकराः । शैलज ।
प्रस्तरकरा अंजनाकार मूर्त्तयः
विकृताकार वदनाः पिंगलाक्षा ।
महोदराः स्फटिका रक्तवेशाश्वरी
श्चैत्यपाश्च केचन । इति ब्रह्म
वैवर्त्ते श्रीकृष्णजन्मखंडे १० अध्या
यः यक्षगणो यथा श्वेतसः ।
स्तना यक्षा तेषां नामानि मे शृणु
केवलो हरिकेशश्च कपिलः ।

काञ्चन स्वधा मेघमाली च य
क्षाणां गणा एव उदाहृताः तस्य
मुत्पत्तिर्यथा । यातयक्षत्वयो
क्त स्वदने क्षयणाच्च सः यद्यक्ष
न्नुक्त वानेष तस्माद्यक्षो भवत्व
यं । इति वह्निपुराणे काश्यपीय
वंशः ॥
यक्षकर्दमः पुं कर्पूरागुरुकस्तूरी
कक्कोलानां मिश्रित समभागः
इत्यमरः कर्पूरादिभिर्गन्धद्रव्यैः
समभागैः साधितो ऽनुलेपन
भेदो यक्षकर्दम उच्यते । यक्ष
प्रियः कर्दमो यक्षकर्दमः कुङ्कु
मागुरु कस्तूरी कर्पूर चन्दनं त
था महासुगन्ध मित्युक्तं नामतो
यक्षकर्दमः ॥ इति धन्वन्तरिः अ
न्य त्रापि कर्पूरागुरु कस्तूरीकक्को
लघर्षणादिव एकीकृतमिद सर्वं
यक्षकर्दम इष्यते । इति तट्टी
काया भरतः ॥
यक्षतरुः पुं वटवृक्षः इतिराज
निर्घण्टः ॥
यक्षधूपः पुं धूपसामान्यं धूनक
धूपः । इति केचित् । धुना इति
ख्यात इति केचित् इतिभरतः
तत्पर्यायः ॥ सर्जरसः २
अरालः ३ सर्वरसः बहुरूपः ५।

इत्यमरः । रालः ६ धूनकः ७ वह्नि
वल्लभः ८ इतिभरतः ॥ साला
सारः ९ सालजः १० सालनिर्यासः
॥ सर्ज्यः १२ । इति रत्नमाला
सरलद्रवरसः । तारपि तैल
इति भाषा तत्पर्यायः पायसः
२ श्रीवासः ३ सरलद्रवः ४ इति
हेमचन्द्रः ॥
यक्षरसः पुं पुष्पमद्यं ॥ तत्
पर्यायः । मध्वासवः २। इति
त्रिकाण्डशेषः ॥
यक्षराजः पुं कुवेरः । इतिशब्द
रत्नावली ॥
यक्षराट् पुं कुवेरः रङ्गमण्डपः ।
इतिमेदिनी ॥
यक्षराट् पुरी स्त्री अलका सा च
कैलासपर्वतस्थित कुवेरपुरी ।
इति जटाधरः ॥
यक्ष रात्रिः स्त्री कार्त्तिकीपूर्णिमा
तत्पर्यायः दीपाली २। इति
त्रिकाण्डशेषः ॥
यक्षसाधनं क्ली यक्षोपासना य
था यक्षाणां यक्षिणीनां चैव शाबी
नां च साधनं भूतवेतालगान्धर्व
मारणोच्चाटनानि च अधोगमन
मेतेषां साधने पैदिकं हितं ।
इति वाराहीतन्त्रे ॥

यक्षामलकं क्ली पिण्डखर्ज्जूरफ
लं इतिशब्दमाला ॥
यक्षावासः पुं वटवृक्षः इतिराज
निर्घण्टः ॥
यक्षिणी स्त्री कुवेरपत्नी इतिश
ब्दरत्नावली । यक्षभार्य्या च ।
यक्षी स्त्री कुवेरपत्नी इतिशब्द
रत्नावली ॥
यक्षोडुम्बरकं क्ली अश्वत्थफलं
इतित्रिकाण्डशेषः ॥ ला
यक्ष्मघ्नी स्त्री द्राक्षा इतिशब्दमा
ला यक्ष्मा पुं रोगविशेषः । तत्
पर्य्यायः क्षयः २ शोषः ३ ॥
इत्यमरः राजयक्ष्मा ४ रोगराट्
५ अयराज यक्ष्मापि कारः तत्र
राजयक्ष्मणो विप्रकृष्टं सन्निकृष्टं
च निदान माह वेगरोधात् क्षया
च्चैव साहसाद्विषमाशनात् त्रि
दोषो जायते यक्ष्मा गदो हेत
चतुष्टयात् वेगो ऽत्र वात मूत्र
पुरीषाणां । वातमूत्र पुरीषाणि
निरुन्धानि यदा नरः इतिचरक
वचनात् क्षयात्क्षीयते ऽनेन ।
ति क्षयः तेनातिव्यवायानशनेर्
ष्यादयो धातुक्षय हेतवः क्षयश
ब्देनोच्यते । साहसात् बलवता
समं मल्लयुद्धादितः विषमाशनात्

वहु स्तोक मकाले वा तद्रूक्षं विष
माशनं तस्मात् त्रिदोषः सान्नि
पातिकः हेतु चतुष्टयाच्च अन्ये
पि हेतवः हेतु चतुष्टय
एवान्तर्भवन्ति यक्ष्मणः पर्य्यायः
राजयक्ष्म क्षय शोषाः यक्ष्मादीनां
शब्दानां निरुक्ति माह वैद्या व्याधि
मन्तं यस्माद्यक्ष्मा येन यज्यते
स यक्ष्मा प्रोच्यते लोके शब्दशा
स्त्रविशारदैः यज्यते पूज्यते ।
राज्ञश्चन्द्रस्य यस्मादभूदेष कि
लामयः तस्मात्तं राजयक्ष्मेति के
चिदाहुर्मनीषिणः क्रियाक्षयकर
त्वेन क्षय इत्युच्यते बुधैः । सं
शोषणाद्रसादीनां शोष इत्यभि
धीयते संप्राप्ति माह । कफ
प्रधानै दोषैस्तु रुद्धेषु रसवर्त्मसु ।
अतिव्यवायिनो वापि क्षीणे रेतस्य
नन्तरा क्षीयन्ते धातवः सर्वे ततः
शुष्यति मानवः कफप्रधानै र्दो
षैः रसवर्त्मसु रुद्धेषु अनन्तरा
सर्वे धातवः क्षीयन्ते ततो मानवः
शुष्यति कारणभूत रसस्य क्षये
रक्तादीनां धातूनां क्रमेण
क्षीयमाणत्वात् मार्गविरोध रसत्व
यहेतु माह वरकः । रसस्रोतःसु
रुद्धेषु स्वस्थानस्थो विदह्यते स ऊर्द्ध्वं




कासवेगेन वहुरूपः प्रवर्त्तते । स्वस्थानस्थः हृदयस्थः । कासं विनापि रसक्षयो भवति मार्गावरोधकपित्तवातेन रसस्य शोषणात् । उक्तञ्च वायोर्धातुक्षयात् कोपात् मार्गस्यावरणेन चेति ॥ अनुलोमक्षयं दर्शयित्वा प्रतिलोमक्षयमप्याह अतिव्यवायिनो वा रेतसि क्षीणे प्रतिलोमक्रमेणानन्तराः सर्वधातवो रसपर्यन्ताः क्षीयन्ते तद्यथा शुक्रे क्षीणे मज्जा क्षीयते मज्जनि क्षीणेऽस्थि क्षीयते एवं पूर्वं पूर्वं क्षीयते ननु कार्यस्य शुक्रस्य क्षये कथं कारणभूतानां रसादीनां क्षयः उच्यते । शुक्रक्षयाद्वायुः कुप्यति यदुक्तं वायोर्धातुक्षयात्कोपो मार्गस्यावरणेन चेति स वायुः तानि प्रतिलोमक्रमेण मज्जादीन् धातून् शोषयति । ततस्तदनन्तरं मानवः शुष्यति । पूर्वरूपमाह श्वासाङ्गसादकफसंस्रवतालुशोषवम्यग्निसादमदपीनसकासनिद्राः शोषे भविष्यति भवन्ति स चापि जन्तुः शुक्लेक्षणो भवति मांसपरो रिरंसुः । स्वप्नेषु काककशुकशल्लकिनीलकण्ठगृध्रास्तथैव कपयः कृकलासकाश्च तं वाहयन्ति स नदीर्विजलाश्च पश्येच्छुष्कांस्तरून् पवनधूमदवार्दितांश्च ।

यक्ष्मणो लक्षणमाह अंसपार्श्वाभितापश्च संतापः करपादयोः ज्वरः सर्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः अंसयोः पार्श्वयोः अभितापः पीडा अत्र सकलधातुक्षयपूर्वकः सकलशरीरशोषोपि बोद्धव्यः क्षीयन्ते धातवः सर्वे ततः शुष्यति मानव इति संग्रहोक्तेः एवं षड्रूपे एकादशरूपे च बोद्धव्यो एतानि त्रीणि लक्षणानि शोषाभाविनेन चरकेणोक्तानि सुश्रुतेन पठ्यन्ते षड्लक्षणान्युक्तानि भक्तद्वेषो ज्वरः कासः श्वासः शोणितदर्शनं स्वरभेदश्च जायेत षड्रूपे राजयक्ष्मणि उक्तानयो दोषाणां भेदादेकादश लक्षणान्याह स्वरभेदोऽनिलाच्छूलं संकोचश्चांसपार्श्वयोः ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः ॥ शिरसः परिपूर्णत्वमभक्तच्छन्द एव च कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः । अनिलादुक्तानेवं पित्तात्कफाच्च यतस्ताह सुश्रुतः एक एव मतः शोषः सन्निपातात्मको गदः उद्रेकात्तत्र लिंगानि दो

षाणां निपतन्ति च ॥ असाध्ययक्ष्मिणमाह एकादशभिरेभिर्वा षड्भिर्वापि समन्वितं त्रिभिर्वापीडितं लिंगैर्ज्वरकासासृगामयैः जह्याच्छोषार्दितं जन्तुमिच्छन्सुविपुलं यशः तत्र विशेषमाह । सर्वैरर्द्धैस्त्रिभिर्वापि लिंगैर्मांसबलक्षये युक्तो वर्ज्यश्चिकित्स्यस्तु सर्वरूपोऽप्यतोऽन्यथा । सर्वैर्लिंगैरेकादशभिः । अर्द्धैः षड्भिः त्रिभिर्ज्वरकासरुधिरवमनैः अतोऽन्यथा मांसे बले सति सर्वरूपोऽपि प्रत्याख्याय चिकित्स्यः । महाशने क्षीयमाणमतीसारनिपीडितं शूनमुष्कोदरं चैव यक्ष्मिणं परिवर्जयेत् । महाशने क्षीयमाणमित्येकमसाध्यलक्षणं अतीसारनिपीडितमिति द्वितीयं यतउक्तं मलायत्तं बलं पुंसां शुक्रायत्तं तु जीवनं तस्माद्यत्नेन संरक्षेद्यक्ष्मिणो मलरेतसी शूनमुष्कोदरमिति तृतीयं ॥ अरिष्टमाह शुक्लाक्षमन्नद्वेष्टारमूर्ध्वश्वासनिपीडितं कृच्छ्रेण बहुमेहन्तं यक्ष्मा हन्तीह मानवं मेहन्तं शुक्रं क्षरन्तं शुक्लाक्षत्वादीनि एकैकशोऽरिष्टलक्षणानि ॥ अवधिमाह । परं दिनसहस्रं तु

यदि जीवति मानवः सम्यग्भिषग्भिरुपक्रान्तस्तरुणः शोषपीडितः । शोषपीडितो मानवश्चेत्तरुणो भवति सम्यग्भिषग्भिरुपक्रान्तो भवति तदापरं दिनसहस्रं । द्वितीयदिनसहस्रं यदि जीवति तत्र जीवनविकल्प इत्यर्थः । एतेन शोषपीडितो मानवश्चेत्तरुणो भवति सहेयश्चिकित्स्यो भवति । तदा प्रथमदिनसहस्रं जीवेदेव इत्युक्तं चिकित्स्यमाह ज्वरानुबन्धरहितं बलवन्तं क्रियासहं । उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरं ॥ आत्मवन्तं यत्नवन्तं धृतिमन्तं वा ॥ अथ निदानविशेषैः शोषविशेषानाह व्यवायशोकवार्द्धक्यव्यायामाध्वप्रशोषितान् व्रणोरःक्षतसंज्ञौ च शोषिणो लक्षणैः पृथक् व्रणोरःक्षतसंज्ञौ शोषिणौ । व्रणशोषी उरःक्षतशोषी च ॥ तत्र व्यवायशोषिणो लक्षणमाह व्यवायशोषी शुक्रस्य क्षयलिंगैरुपद्रुतः पाण्डुदेहो यथापूर्वं क्षीयन्ते चास्य धातवः शुक्रक्षयलिंगैः सुश्रुतोक्तैः । तानि यथा शुक्रक्षये मेढ्रवृषणयोर्वेदनाशक्तिर्मैथुने चिराद्वा प्रसेकः प्रसेके



वाल्पशुक्र दर्शन मिति यथापूर्वं
क्षीयन्ते धातवः प्रथमं शुक्र
क्षीयते तस्मात् शुक्रक्षय जनित
वायुना मज्जादयोपि धातवो यथा
पूर्वं क्षीयन्ते ॥ शोकशोषिणो
लक्षण माह । ध्यान शीलः
स्रस्ताङ्गः शोकशोष्यपि तादृशः
विना शुक्रक्षयकृतै विकारै रुप
लक्षितः ध्यानशीलः यस्या भा
वेन शोको जनित स्तद्ध्यान परः
स्रस्ताङ्गः शिथिलाङ्गः तादृशः व्य
वायशोषिसदृशः तेन शुक्रादिसर्व
धातुक्षययुक्तो भवति । परं शुक्र
क्षयकृतैर्विकारैर्मेढ्रवृषण वेदना
दिभि र्वर्जितो भवति व्याधिस्वभा
वात् ॥ जराशोषिणो लक्षण
माह जराशोषी कृशो मन्दवीर्य
बुद्धि बलेन्द्रियः कम्पनोऽरुचिमान्
भिन्नकांस्यपात्र हतस्वरः ष्ठीवति
श्लेष्मणा हीनं गौरवारुचिपीडितः
संप्रस्रुतास्य नासाक्षः शुष्करूक्षम
लच्छविः प्रस्रुत गात्रावयवः शुष्क
क्षाम गलाननः । संदृशाहः स्रस्ताक्षः
शुष्करूक्ष मलच्छविः शुष्करूक्षमलच्छ
वी यस्य सः प्रस्रुत गात्रावयवः प्रस्रुतः
स्पर्शाक्षः क्षामं निलकं पिपासा
स्थानं । अध्वशोषिणो लक्षण

माह । अध्वप्रशोषी स्रस्ताङ्गः संभृ
ष्टपरुषच्छविः संभृष्टस्येव परुषाच्छ
वि र्यस्य सः । व्यायामशोषिणो
लक्षणमाह व्यायाम शोषी भूयि
ष्ठमेभि रेव समन्वितः लिङ्गैरुरःक्ष
तकृतै संयुक्तश्च क्षतं विना यभि
रेव स्रस्ताङ्गत्वादिभि रध्वशोषिणो
लक्षणैरेव भूयिष्ठं अन्यैर्थ ।
सनिदानं व्रणशोषमाह रक्तक्षया
द्वेदनाभिस्तथैवाहारयन्त्रणात् व्र
णितस्य भवेच्छोषो याप्योऽसाध्यश्च
सम्मतः । उरःक्षतस्य निदान मा
ह धनुषा यस्यतोऽत्यर्थं भारमुद्व
हतो गुरुं । युध्यमानस्य बलिभिः
पततो विषमोच्चतः वृषं हयं वा
धावन्तं दम्यं वान्यं निगृह्णतः शि
लाकाष्ठाश्मनिर्घातान् क्षिपतो नि
घ्नतः परान् अधीयानस्य वात्युच्चै
र्दूरं वा व्रजतो द्रुतं महानदीं वा
तरतो हयैर्वा सह धावतः । सह
सोत्पततो दूरं तूर्णं चातिप्रनृत्यतः
तथान्यैः कर्मभिः क्रूरै र्भृशम
भ्याहतस्य वा स्त्रीषु चाति प्रस
क्तस्य रूक्षाल्पप्रमिताशिनः विक्षते
वक्षसि व्याधि र्बलवान् समुदीर्यते ।
आयस्यतः आयासं कुर्वतः दम्यं
वृषादिकं । अन्यं च गजाश्वादिकं

शिलादीर्घपाषाणाः अश्मप्रस्तरवे
गः निर्घातोऽस्त्रविशेषः व्याधिः उ
रःक्षताख्यः । उरःक्षतस्य ल
क्षणमाह उरो विरुज्यतेऽत्यर्थं ।
भिद्यते च विभज्यते प्रपीड्यते
ततः पार्श्वे शुष्यत्यङ्गं प्रवेपते ॥
क्रमाद्वीर्यं बलं वर्णो रुचिरग्निश्च
हीयते । ज्वरो व्यथा मनो दैन्यं
विड्भेदोऽग्निवधस्तथा । दुष्टः श्यावः
सुदुर्गन्धः पीतो विग्रथितो बहु
कासमानस्य चाभीक्ष्णं कफः सास्र
क्प्रवर्तते स क्षतः क्षीयतेऽत्यर्थं
तथा शुक्रौजसोः क्षयात् अव्यक्तं
लक्षणं तस्य पूर्वरूप मिति स्मृतं
विरुज्यते पीड्यते भिद्यते वि
दार्यत इव विभज्यते द्विधा क्रि
यत इव सपुरुषः क्षतः उरः क्ष
तवान् अत्यर्थं क्षीयते क्षीणो
भवति न केवलं सास्र कफ क्षया
देव क्षीणो भवति तथा शुक्रौज
सोः क्षयात् स्त्रीनिसेवनादिना शु
क्रौजसोः क्षयादपि क्षीणो भव
ति ॥ उरःक्षतस्य विशिष्टं ।
लक्षणमाह उरोरुक् शोणितच्छ
र्दिः कासो वैशेषिकः क्षते क्षीणे
सरक्तमूत्रत्वं पार्श्वपृष्ठ कटिग्रहः ।
क्षते उरःक्षतवति उरो रुक् ।


शोणितच्छर्दिः कासो वैशेषिकः
विशेषतो भवत्येव तस्मिन्नेवोरः
क्षतवति सास्र कफ शुक्रौजसो
क्षयात् क्षीणे सरक्त मूत्रत्वं पार्श्व
पृष्ठकटिग्रहश्च भवति । निदान
विशेषेणोरः क्षतस्य लक्षणविशेष
माह व्रणाधातक्षयाच्चैव कोष्ठात्
प्रति मलात्तथा क्षतोरस्कस्यात्र ।
पाके निःश्वासो वाति पूतिकः
क्षयात् धातुक्षयहेतो रतिव्यवा
यादिनः कोष्ठात् प्रतिमलात् को
ष्ठात् प्रतिलोम वातेन प्रतिलोम
बलात् पूतिकः पूतिगन्धः ॥
उरःक्षतस्य साध्य याप्यासाध्यल
क्षणमाह । अल्प लिङ्गस्य दीप्ता
ग्नेः साध्यो बलवतो नवः परिसं
वत्सरो याप्यः सर्वलिङ्गं तु वर्जयेत्
॥ अथ राजयक्ष्म चिकित्सा ॥
बलिनो बहुदोषस्य पंच कर्माणि
कारयेत् यक्ष्मिणः क्षीण देहस्य
तत्कृते स्याद्विषोपमं ॥ मला
यत्तं बलं पुंसां शुक्रायत्तं तु जीव
नं तस्माद्यत्नेन तं रक्षेद्यक्ष्मिणो
मलरेतसी ॥ शालिषष्टिकगोधूम
यवमुद्गा द्वयो हिताः मद्यानि जा
ङ्गलाः पक्षिमृगाः शस्ता विशोषिणः
सपिप्पलीकं सयवं सकुलत्थं स

नागरं दाडिमामलकोपेतं स्नि
ग्धमाजं रसं पिबेत् तेन षडि
निवर्त्तन्ते विकाराः पीनसादयः
दुर्ध्यतो द्विगुणं मांसं सर्वतो ऽष्ट
गुणं जलं पादस्थं संस्कृतं त्वामे
षडंगो यूष उच्यते तद्यथा यव
पल ८ कुलत्थपल ८ छागमांसप
लष जलपल ४८ शेषपल १२ ततः
पलमिते घृते संस्कारणीयं । तत्र
कर्ष मितं सैन्धवं देयं सौरभार्द्ध
हिंगु च देयं । पिप्पली नागरं चा
पुष्यक्षायमितं कल्कीकृत्य देयं
दाडिमामलकाभ्यामम्लत्वं साध्य
षडंगयूषः ॥ कुकुभमकं नाग
बला वानरीबीज विचूर्णितं पय
सापीतं मधुघृतयुक्तं सतिलं यक्ष्मा
दिकासहरं छागमांसं पयश्छागं
छागं सर्पिश्च नागरः छागोपसे
वा शयनं छागमध्ये तु यक्ष्मनाशनं म
धुनाय विडंगाश्मं जतु लोह घृतान्वि
भयात्रीनि यक्ष्माणमुग्रमेकादशात्मा
दि नाशिनः । मांसं सर्वमनुज्ञातं
शर्करा मधुसंयुक्तं नवनीतं लिहन्
क्षयी क्षीरशीलभने पुष्टि मतो
सेवाज्य माक्षिके । सितोपला
तगाक्षीरी पिप्पली बहुलाश्च च ः
प्रमाहर्षं द्विगुणिना स्युर्णिना मधु

सर्पिषा लेहयेद्राजरोगार्त्तं कास
श्वास ज्वरातुरः । पार्श्वशूलिना
मल्पाग्निं स्वप्नजित्कं रुचिच्युतं ।
हस्तपादांग दाहेव ज्वरे रक्त
तथोर्द्धगे । सितोपला पिप्पली
बहुला सूक्ष्मैला सितोपलादिरव
लेहः ॥ जातीफलं विडंगानि
चित्रकं नगरं तिला । तालीसं
चंदनं भार्ङ्गी लवंग पुष्करं विका
कर्पूरश्चाभया धात्री मरीचं पिप्प
ली त्वगा पथा मत्ता समा भागा
स्मातन्मीनक संयुताः पलानि
सप्त भंगायाः सितासर्वसमा मता
चूर्णमेतत् क्षयं कासं श्वासं च ग्रहणी
गदं । अरोचकं प्रतिश्यायं
तथाग्निानलमन्दतां पतान् रोगा
न् निहन्त्येव वृत्तमिश्राशनिर्यथा
जाती फलाद्यचूर्णं ॥ बालरो
गाधिकारोक्तं तैलं लाक्षादि यो
जयेत् अभ्यंग यक्ष्मिणो नित्यं
इह वैद्योपदेशतः वासकस्व
रसप्रस्थं माक्षिका सित शर्करा
पिप्पली द्विपलं तावत्सर्पिषश्च
शनैः पचेत् तस्मिन्लेहत्वमाया
ते शीते क्षौद्रपलाष्टकं दापाव
तारयेद्वैद्यो लीढो लेहाय शुक्लमः
निहन्ति राजयक्ष्माणं कासं

श्वासं च दारुणं पार्श्वशूलं च हृच्छू
लं रक्तपित्तं ज्वरं तथा वासावलेहः
अथ व्यवायादि हेतुक शो
षचिकित्सा । तत्र व्यवायशोष ।
चिकित्सा व्यवायशोषिणां क्षीर
रस मांसाज्य भोजनैः सकूले
मधुरे हृद्ये जीवनीये रुचाचरेत्
रसो मांसरसः सकूले हितैः
॥ शोकशोष चिकित्सा । हृ
षणा श्वासनैः क्षीरैः स्निग्धैः मधुर
शीतलैः । दीपनै लघुभि श्वानैः
शोकशोष मुपाचरेत् ॥
अथ मशोष चिकित्सा व्यायाम
शोषिणां स्निग्धैः क्षतक्षय हितै
र्हितैः उपाचरेज्जीवनीयै र्वि
धिना श्लेष्मिकेन तु ॥ अध्वशो
ष चिकित्सा श्वास्याशवले दिवा
स्वप्नैः शीतै मधुर बृंहनैः अन्न
मांस रसाहारै रध्वशोष मुपाच
रेत् ॥ व्रणशोष चिकित्सा ।
व्रणशोषं जयेत् स्निग्धै दीपनैः
स्वादु शीतलैः ईषदम्लैरनम्लै वा
यूष मांसरसादिभिः ॥ अथो
रः क्षत चिकित्सा बलाश्वगंधा श्री
पर्णी बहुपुत्री पुनर्नवा पयसा वि
त्य सम्यक्ताः शमयन्ति क्षत क्षयं
श्रीपर्णी गम्भारी बहुपुत्री शता

वरी बलादि चूर्णं ॥ एला प
त्र त्वचो द्राक्षा पिप्पल्यर्द्धपलं पृ
थक् सितामधुक खर्जूर मृद्वीका
श्च पलोन्मिताः संचूर्ण्य मधुना
युक्ता वटिका संप्रकल्पयेत् अक्ष
मात्रां ततश्चैव भक्षयेच्च दिने
दिने ॥ क्षत क्षयं ज्वरं कासं
श्वासं हिक्का वमिभ्रम मूर्छा मदं
तृषा शोष पार्श्वशूल मरोचकं
प्लीहान मामवातं च रक्तपित्तं स्व
रक्षयं एलादि गुटिका हन्ति वृष्या
संतर्पणी परा ॥ द्राक्षायाः
प्रस्थ मेकं तु मधुकस्य पलाष्टकं
पचेत् द्रोणाष्टके शुद्धे पादशेषेण ।
तेन तु पलिके मधुक द्राक्षे पि
ष्टे कृत्वा पल द्वयं प्रदाय सर्पिषः
प्रस्थं पचेत् क्षीरे चतुर्गुणे सिद्धे
शीते पलान्यष्टौ शर्करायाः प्रदा
पयेत् एतद्द्राक्षाघृतं सिद्धं क्षत
क्षीणे स्वरावहं । वात पित्त ज्व
र श्वास विस्फोटक हलीमकान् प्रदर
रक्तपित्तं च हन्त्यान्मांस बलप्रदं ।
द्राक्षादि घृतं ॥ क्षीरे धात्री वि
दारीक्षु वरीणां च तथा रसे पचेत्
समे घृतं प्रस्थं मधुरैः कर्षसम्मितैः
द्राक्षाद्धि चंदनोशीर कर्शाकरोत
पल पद्मकैः । मधूक कुसुमानां



काश्मरी त्वग् संज्ञकैः प्रस्थार्द्धं।
मधुनः शीते शर्करार्द्धं तुलांतथा
एलार्द्धकांश्च संचूर्ण्य त्वगेलापत्र
केशरान् विनीय तत्र संलिह्या
न्मात्रां नित्यं स्वयंचितः। अमृत
प्राश मित्येतदश्विभ्यां परिकीर्त्ति
तं क्षीरमांसाशिनां हन्ति रक्त
पित्त क्षत क्षयं तृष्णारुचिश्वास
कास च्छर्द्दि मूर्च्छा प्रमर्द्दनं मूत्रकृ
च्छ्रज्वरघ्नंच वल्यं स्त्री रतिवर्द्धनं अ
मृत प्राशावलेहः ॥ यथच्छतर्प
णं पीत मविदाहि हितंलघु अन्न
पानं निषेवेत तत्र क्षीणैः स
दार्थिभिः शोकं स्त्रियः क्रोधमसू
यनांच त्यजेदुदारान्विषयान् ते
जेच्च तथा हितानी स्विदशान् गु
रूंश्चवावश्च पुण्याः स्मृत्येयाद्विजे
भ्यः। अथ राजयक्ष्मणि रसाः रस
भस्मामृता समंलौहं मधुहन्तालि
तं अमृतेश्वर नामायं षड्गुञ्जो।
राजयक्ष्मजित् रसभस्म मारि।
तोरसः ॥ अमृतासत्वंगुडूचीसत्त्वं
लौहं मारितं। अमृतेश्वरो र
सो राजयक्ष्माणि रसेंद्रचिंतामणौ
त्र्ययोः शाम्भारितात् सूतादेको।
द्वौ हेम भस्मतः। एकोधोमृता
ताम्रस्य शिला गंधस्य तालकं प्र
त्येकं भागयुग्मं स्यादेतत् सर्वं
विचूर्णयेत् वराटी पुरयेत्तेन का
ञ्जीक्षीरेण टंकणं। पिष्टानेनमुखं
रुधा मृद्भांडेनास्य पूरयेत् ततो
गजपुटे पक्त्वा चूर्णयेत्स्वांगशीत
लं रसोराजमृगांको ऽयंचतुर्गुंजः
यक्ष्मा पहः। मरिचैर्घृत विशात्या
कणाभिर्द्दशभिस्तथा मधुना संपि
या वापि दद्यादेतं रसं भिषक्।
अनेन नश्यति क्षिप्रं वात श्लेष्म
भव क्षयः राजमृगांको रसो रा
ज यक्ष्मणि रसेंद्रचिंतामणौ ॥
शुद्धसूतं द्विधा गंधं कुर्यात्खल्लेन
कज्जली तयोः समं तीक्ष्णचूर्णं मर्द्द
येत् कन्यकाद्रवैः। त्रियाममात्रंप
गोलं ताम्रपात्रे विधारयेत्। आ
च्छाद्यैरंड पत्रेण स्याद्युष्म यामयु
ग्मतः धान्यराशौ न्यसेत् पश्चाद्दो
रात्रात्तदुद्धरेत् संचूर्ण्य गाला
येद्वस्त्रे सत्यं वारितरं भवेत्।
त्रिकटु त्रिफलैलाभि र्जातीफल ल
वंगकैः नवभागोन्मितै रेतैः सम
एषरसोभवेत्। निष्कद्वय मितं
नित्यं मधुना सह लेहयेत्। अय
मग्निरसो नाम्ना कास क्षय हरः पाः
अग्निरसः शार्ङ्गधरे। इति भाव
प्रकाशे राजयक्ष्माधिकारः ॥

याल गतौ धञिति कविकल्पद्रुमः
न याति इति दुर्गादासः ॥
यागः पुं यज्ञः। इत्यमरः। तत्र
श्रौताग्निकृत्य हविर्यज्ञाः सप्त
यथा अग्न्याधानं तदेवाग्निहोत्रं
१ दर्शपौर्णमासौ २ पिंडपितृय
ज्ञः ३ आग्रयणं ४ चातुर्मास्यः ५
निरूढपशुबंधः ६ सौत्रामणिः ७
स्मार्त्ताग्निकृत्य पाकयज्ञाः सप्त
यथा औपासनं १ वैश्वदेवः २
स्थालीपाकः ३ आग्रयणं ४ सर्प
बलिः ५ ईशानबलिः ६ अष्टकान्व
का ७ श्रौताग्निसप्तसंस्थाः। यथा
सोमयागः सप्तवाग्निष्टोमः १ अ
त्यग्निष्टोमः २ उक्थ्यः ३ षोडशी
४ वाजपेयः ५ स द्विविधः संस्था
रूपश्च अतिरात्रः ६ अप्तोर्यामः
७ उत्तरक्रतवो बहवः। यथा
महाव्रतं १ सर्वतोमुखं २ राजसू
यः ३ पौंडरीकं ४ अभिजित् ५
विश्वजित् ६ अश्वमेधः ७ बृहस्प
तिसवः ८ आंगिरसः ९ चयनान्य
ष्टादश १० इत्यादि श्रौतसूत्रं। स
र्वदेवानां यागकालो यथा स्कन्द
उवाच स्वल्पेनैव तु कालेन महा
पुण्यं यथा भवेत् तदहं श्रोतु
मिच्छामि ग्रहयागे सुरेश्वर ई
श्वरोवाच। शृणु वत्स प्रवक्ष्यामि
यथा त्वं परिपृच्छसि अल्पकेन म
हापुण्यं ग्रहार्द्धे तिथि यौगिकं।
भृगु पूर्णाष्टमी योगं शिवयागेषु।
चोत्तमं भृङ्गवर्गंच भार्गवंच उमाया
भृगुवासरे देव योगात्तयदाष्टमी
पुष्यार्क्षे रविवासरे रुद्रयागस्तदा
कार्य्यः सर्वकाम प्रसाधकः वारेण
वा यदा सूर्य्यः सप्तमी विजयात्मता
तदा त्वभवत भानो र्यागः सर्व
गुणावहः। प्रतिपितृक्षो ऽत्संयोगे।
अर्कचैत्रे सोमयस्तु च नवम्यांमंग
ला योगो भानुमूल दिने यदा।
अष्टम्यां वाथ चेद्वाह श्रवणेन पु
नावहं आर्द्रभे ऊर्ज्जाहे त्वगतो
षो नस्यबाहूनि पुनर्वसौ गुरो
र्वीरे द्वादश्यां श्रवणेनवा सौम
ग्रस्तं यदा योगं विशोः सर्वार्थ
साधकं द्वितीयायां यदा सौम्या
हक्तिकं च भवेत्कविर् ग्रहयाग
स्तदा कार्य्यः सर्वशांति प्रदायकः
स्वाती भौमी चतुर्थी च उमायागे।
वरा स्मृता। उक्तास्तु च सर्वास
भानुपौर्णाष्टमीषु च शांतभिषेका
योगेषु सर्व कामार्थदाष्टमी गुरा
वेकादशी पुष्यरोहिण्या वा यदा
शनिः सत सौभाग्य कामाय या

गोरुद्र विनायके पूर्णिमास्वच स
वीसप्तमी द्वादशीषुच चतुर्दशं
तृतीयास्वग्रहर्क्षेत्तेष्वभेषुच सर्वे
षां भवने यागो भक्तिपूर्वो म
महामुने मंत्रसाधनद्रव्येयारुद्र या
गादवाप्नोते श्रीमेयात्तानवान् ।
सत्य शुभायागान्महामुने। योग
ज्ञान यशः सिद्धि महादेवादवा
प्नुयात् आरोग्यंसप्रतापत्वं भास्क
रात्प्राप्नुते ध्रुवं । गतिमिष्टां ।
यथा काम प्रयच्छति त्रिविक्रमः
विघ्नो न भवतेतस्ययस्त्व यश्यपद्धि
नायकं विगतारि भवेत् षष्ठमा
दृष्ट्वा स्कंदं मखे लभेत् । मात्
यागान्महासिद्धिः सर्वेषा मपि ना
यते भवने यतवान्पुत्रः प्रथमा
हे कृताशनात् स्वर्गोपवर्गौ मंसि
द्धिर्गोपायानस्नायेत माचार्यै
र्मंगलं सोम्या स्मेष्टाये ब्रह्म
णायने ईशाद्यैः कालिकायास्तय
ष्टव्यादिविधिना मुने रम्याये देव्य
वनारे उदय निष्फल योग मा
हात्म्य कीर्तनं ॥ अथग्रहयाग।
विधिः प्रणम्यतत्रस्यादीन् शुभा
शुभ फलप्रदान् ग्रहयाग विधिं
सम्यक्वक्ष्ये श्रीरचनंदनः। अथ
ग्रहयाग प्रयोगः तत्ररवि सोम

बुध गुरु शुक्र वारेषु विशाखा
यामृगशिरो रेवती पुष्याश्विनी ह
स्ता रोहिण्युत्तरा त्रयेषु चंद्रतारानु
कूले शुभलग्ने यागः कार्य्यः अत्र
बालग्रह भूतग्रह प्रबलतरनरा
धिपशत्रुकृः सह रोगाभिभवाद्भुत
दुःस्वप्नावलोकन ग्रहदोष्यादिनि
मित्तके शांतिकं मलमासादावपि
कर्त्तव्यं अवग्रह विनाकेवलहष्टाद्यः
पुष्टिपुत्र श्रीकामादि पौष्टिकंतम
लमासादीतरकाल एवकार्य्यं तत्र
यजमानः कृतस्नानादिः गोमयो
पलिप्ते देशे सदर्भासनोपविष्टउद
ङ्मुखः स्वस्तिवाचा सूर्य्यः सोम इ
ति पठित्वा फलपुष्प तिलद्रव्यय
सहित जल पूर्ण ताम्रपात्र गृहीत्वा
ॐ तद्दिसो रिति विष्णु संस्मृत्य ॐ
तत्सदित्यद्यायी ॐ अद्येत्यादि अ
मुक गोत्रः श्री अमुक देवशर्मा अमुक
कामो ग्रहयज्ञ महं करिष्ये इति
संकल्पजलं मेवे शान्तिः शि
पेत् अस्यार्थेन गोत्रनाम्नो: यष्ठ
त्वेन करिष्ये इत्यत्र करिष्यामीति
विशेषः ततः श्वेतसर्षपानादाय ॐ
वेतालाश्च पिशाचाश्च राक्षसाश्च
सरीसृपाः अपसर्पंतु ते सर्वे येवा
न्येविघ्नकारकाः ॐ विनायकाति।

अकरा मद्दोया यत्रहिषो ये पिशा
ता शनाश्च सिद्धार्थ कैर्वज्रसमान
कल्पै मया निरस्ता विदिशः प्रया
त इत्येताभ्यां मंत्राभ्यां श्वेतसर्ष
प प्रक्षेपे विघ्नकारकानपसार
येत् ततः सगणाधिपषोडश मा
तृका पूजा वसोर्धारा आयुष्य जप
तदन्ते गायत्रीजपं हविष्याद्भव
कृत्वा तदशक्तौ भोज्यमुत्सृज्य ब्रा
ह्मणान् परितोष्य ततः स्वयमशा
क्तौ कर्त्ता शास्त्रुलं गुरुं ॐ साधु भवा
नास्ता मिति वदेत् ॐ साधवह मासे
इतिप्रतिवचनं । ततो गंध पुष्प
वस्त्रांगुरीयकादिभी गुरुमलंकृ
त्यहृदिर्ण जानुस्पृष्ट्वा ॐ अद्येत्या
दिमत् संकल्पित ग्रहयाग कर्मणि
अपूजा होम कर्म करणाय अमुक
गोत्रं अमुक देवशर्माणं त्वामहं यादि
भि रभ्यर्च्य भवंतमहं वृणे ॐ
वृतोऽस्मीति प्रतिवचनं ॐ यथा
विहितं पूजादिकर्म कुरु ॐ यथा
ज्ञानं करवाणीति प्रतिवचने त
तोमंडपोत्तर पूर्वभागे विनस्थित्य
विस्तृतायां विन सुचिक्कणायां उत्
कलवायां भूमौ गोमयेनोपलिप्ता
यां रक्तचंदनादिनाम ध्ये वर्तुलं
सूर्यं आग्नेयां श्वेत मर्द्दं चंद्रा

कारं सोमं दक्षिणस्यां त्रिकोणा
रक्तं मंगलं पश्चात्यां पीतं धनु
राकारं बुधं उत्तरस्यां पीता
पद्माकारं बृहस्पतिं । प्राच्यां श्वे
त चतुष्कोणं शुक्रं प्रतीच्यां कृष्णा
सं सर्पाकारं शनिं । नैर्ऋत्यां ।
कृष्णं मकराकारं राहुं । वाय
व्यां धूम्रवर्णान् खड्गाकारान्केत
न्विलिख्य स्वगृह्योक्त विधिना अ
ग्निस्थापनादि ब्रह्मस्थापनपर्य्यंतंक
कृत्वा मंडले ग्रहानावाहयेत् ॥
तत्रक्रमः मध्ये ॐ क्षत्रियं काश्यपं
रक्तं कालिंग द्वादशांगुलं पद्म
हस्तद्वयं पूर्वाननं सप्ताश्ववाहनं
शिवाधिदैवतं ध्यायेद्वह्निप्रत्यधि
दैवतं । सप्तम्यां जायमाने विशा
खानक्षत्रे रक्तमाल्याम्बरधरं इति
ध्यात्वा ॐ भूर्भुवः स्वः सूर्यग्रह
इहा गच्छ २ इहतिष्ठ २ इतिशुक्ल
मंडले रवावर्ध्य स्थापयेत् । आ
ग्नेये ॐ सोमहं वैश्यं आत्रेयं हस्ता
मात्रं सितांबरं । श्वेतं द्विबाहुं ।
वरदं दक्षिणे सगदेतरं ॥ दशा
श्वं श्वेतपद्मस्थं विचिन्त्यामापि
दैवतं जल प्रत्यधिदैवं च सूर्य्या
स्य माद्यकेतथा । चतुरंश्राकारा
ते कृत्तिका नक्षत्रे मिति ध्यात्वा

ॐ भूर्भुवः स्वः सोमग्रह इहागच्छ
२ इह तिष्ठ २ इति शुक्लतंडुलैरावा
ह्य स्थापयेत् २ दक्षिणस्यां ॐ
आवन्त्यं चतुरस्रं रक्तं मेषस्थं चतु
रंगुलं आरक्तमाल्य वसनं भारद्वाजं
चतुर्भुजं । दक्षिणोर्द्ध्व क्रमा
च्छक्ति वराभय गदाकरं । आदित्या
भिमुखं देवं तद्वदेव समाकारयेत् ।
स्कन्दाधिदैवतं भौमं क्षितिं प्रत्य
धिदैवतं दशम्यां जातं पूर्वा
षाढा नक्षत्र मिति ध्यात्वा ॐ भूर्भुवः
स्वः मंगलग्रह इहागच्छ २ इह तिष्ठ
२ इति शुक्लतंडुलैरावाह्य स्थापयेत्
। ३ ऐशान्यां ॐ मागधे ध्वज
लाकृतं वैष्णवं पीतं चतुर्भुजं ।
वामोर्द्ध्वक्रमतश्चर्म गदावरदखड्गि
नं सूर्य्यास्यं सिंहगं सौम्यं पीत
वस्त्रं तथाकारयेत् नारायणाधिदै
वं च विष्णुप्रत्यधिदैवतं । द्वादश्यां
जातं धनिष्ठा नक्षत्र मिति ध्यात्वा
ॐ भूर्भुवः स्वः बुधग्रह इहागच्छ २
इह तिष्ठ २ इति शुक्लतंडुलैरावाह्य
स्थापयेत् । ४ उत्तरस्यां । द्विजा
ङ्गिरसं पीतं सैन्धवं षडङ्गुलं
ध्यात्वा पीताम्बरं जीवं सरो
जस्थं चतुर्भुजं ॥ दक्षोर्द्ध्वाद्
वरद करका दण्डमाकारयेत् ब्रह्मा

धिदैवं सूर्य्यास्यमिन्द्रप्रत्यधिदैव
तं । एकादश्यां जातं उत्तरफल्गु
नी नक्षत्र मिति ध्यात्वा ॐ भूर्भुवः ।
स्वः बृहस्पते इहागच्छ २ इह तिष्ठ
२ इति शुक्लतंडुलै रावाह्य स्थाप
येत् ५ ततः प्राच्यां । ॐ शुक्लं
भोजकटं विप्रं भार्गवं च नवाङ्गुलं ।
पद्मस्थं माकारयेत् सूर्य्याभिमुखं श्वेतं ।
चतुर्भुजं सदात् वरकरका दंड
हस्तं सिताम्बरं । शक्राधिदैवतं
ध्यायेत् शचीप्रत्यधिदैवतं । नव
म्यां जातं पुष्यनक्षत्र मिति ध्यात्वा
ॐ भूर्भुवः स्वः शुक्र इहागच्छ २
इह तिष्ठ २ इति शुक्लतंडुलै रावा
ह्य स्थापयेत् । ६ पश्चिमायां ।
सौराष्ट्रं काश्यपं शूद्रं सूर्य्यास्यं
चतुरंगुलं कृष्णं कृष्णाम्बरं गृध्रगते
सौरिं चतुर्भुजं तद्वद्बाणवरशूल
धनुर्हस्तं समाकारयेत् यमाधिदैवतं
प्रजापति प्रत्यधिदैवतं ॥ कृष्णा
चतुर्द्दश्यां जातं रोहिणी नक्षत्र
मिति ध्यात्वा ॐ भूर्भुवः स्वः शनै
श्चर इहागच्छ २ इह तिष्ठ २ इति
शुक्ल तंडुलै रावाह्य स्थापयेत् ७
नैर्ऋत्यां । राहुं मलयजं शूद्रं
पैठीनं द्वादशांगुलं । कृष्णा
कृष्णाम्बरं सिंहासन ध्यात्वा तथा

कारयेत् चतुर्बाहुं खड्गवरशूलचर्म
करं तथा कालाधिदैवं सूर्य्यास्यं
सर्पप्रत्यधिदैवतं ॥ पौर्णमास्यां
जातं भरणीनक्षत्र मिति ध्यात्वा ॐ
भूर्भुवः स्वः भगवन् राहो इहागच्छ
२ इह तिष्ठ २ इति शुक्ल तंडुलै रावा
ह्य स्थापयेत् ॥ ८ ॥ वायव्यां ।
कौशद्वीपं केतुगणं जैमिनीयं ष
डंगुलं धूम्रं गृध्रगतं धूम्रमाकारये
द्विकृताननं । सूर्य्यास्यं धूम्रवसनं
वरदं गदिनं तथा चित्रगुप्ताधिदै
वं च ब्रह्म प्रत्यधिदैवतं अमावा
स्यायां जातं अश्लेषा नक्षत्र मिति
ध्यात्वा ॐ भूर्भुवः स्वः भगवन्तः
केतव इहागच्छत २ इह तिष्ठत २
इति शुक्ल तंडुलै रावाह्य स्थापयेत्
॥ ९ ॥ अधिदेवत प्रत्यधिदैवत ।
पूजनं वाग्नत होमादौ तत्तद्ग्रह
र्णवस्त्र तत्तद्वर्णगंध तत्तद्वर्णपुष्पं
दद्यात् । धूपे विशेषः रवये गुग्गु
लुधूपं । सोमाय सरलं मंगलाय
देव दारु बुधाय हन मिश्रितदेव
दारु बृहस्पतये दशांग शुक्राय
अगुरु शनैश्चराय कालागुरुं ।
राहवे गुडत्वचं केतुभ्यो मधु मि
श्रित गुडत्वचं अभावे षोडशांगं वा
॥ गंधे विशेषः ॥ सूर्य्याय रक्त

चंदनं । सोमाय श्वेतचंदनं । मं
गलाय कुंकुमं बुधाय सरलं । गु
रवे रक्तचंदन श्वेतचंदन कुंकुम स
रल मिश्रित समभागत्वेन दद्यात्
शनैश्चराय कस्तूरी । राहवे प
द्मकाष्ठं केतुभ्यश्च पद्मकाष्ठं ।
अधिदेवता प्रत्यधिदेवताः पूज
येत् अधिदेवता प्रत्यधिदेवता य
था । सूर्य्यस्य शिव वह्नी सोमस्य
उमाजलं । मंगलस्य स्कंदः क्षितिः
बुधस्य नारायण विष्णू बृहस्पतेः
ब्रह्मा इन्द्रश्च शुक्रस्य शक्रः शची
शनैश्चरस्य यमः प्रजापतिश्च रा
होः कालः सर्पश्च । केतो श्चि
त्रगुप्तः ब्रह्मा च एतत्त्रयेणादि
होमे ज्ञेयं । सूर्य्याय गुडौदना
बलिः एवं सोमादीनामपि मति
मासर्थ्ये षोडशोपचारादिना ॥
बलौ तु सूर्य्याय गुडौदनं । सो
माय घृतपायसं मंगलाय पक्वयव
चूर्णोल्मक यावकं बुधाय क्षीरान्नं
गुरवे दध्योदनं । शुक्राय घृतौदनं
शनैश्चरा कृसरं । राहवे छाग
मांसं केतुभ्यो अजाक्षीरं साधि
लाजकर्णं रक्तमिश्रित यवतिलानं
कुलत्थ चित्रौदनं तत् दद्यात्
भेभक्तानरं दद्यात् । तत स्मरं ।

स्थापयेत् । तत्र सामगानां क्रमः
अग्नेः पश्चिमायां दिशि प्रागग्रान्
कुशानास्तीर्य्य तदुपरि प्रक्षालित
वारुणं मुद्गखलं कैवर्तं च शूर्पं वारु
चमसस्य जलं प्रोक्षितं संस्थाप्य
व्रीहीन् यवान् वा अशक्तौ शालि
तण्डुलान् शूर्पे निधाय ओं सूर्य्याय त्वा
जुष्टं निर्वपामि इति निरूप्य उदूख
ले स्थापयेत् । एवं सोमाय एवं
मङ्गलादीनामपि निर्वपणं कृत्वा
उदूखले स्थापयेत् । हि स्त्री
तेनादक्षिणहस्तमुपरि कृत्वा मुष
लेनावहत्य शूर्पेण प्रस्फोटयेत्
इत्थमेव वारत्रयं ततस्तत्स्थाल्यां
समन्त्रकं कृत्वोत्तराग्रे पवित्रे नि:
क्षिप्य तत्र प्रक्षालिततण्डुलान् नि
धाय तदुपरि दुग्धं दत्त्वा यथा या
वच्चरु भवति तथा स्तोकं स्तोकं
दत्त्वा तन्मध्ये खदिरपलाशोडु
म्बराणां मन्थनमस्य प्रादेशप्रमा
णां उभयथास्वांहीगृष्टप्रमाणां तत्र
कोणं पृष्ठकं मेक्षणं दक्षिणावर्त्ते
न भ्रामयित्वा तथापचेत् यथा अन्तरो
ष्मणा सम्यक् पाको भवति मध्यमल
न्ने तापस्य न भवति सम्यक् पाके
भूते चरु मध्येष्टान्तस्त्रवं दत्त्वा प्रा
गादि दिक्षु विक्षिनेत् कृत्वा चरु मव

भार्य्य अग्ने रुत्तरतः कुशोपरि
स्थापयित्वा पुनर्मध्येष्टनस्त्रवं दत्त्वा
तत्ततो भूमि जपादिस्त्रवसंस्कार
पर्य्यन्तं कर्म कृत्वा अग्नेः पश्चिमतः
स्तरणं कुशोपरि पृष्ठमाज्यपात्रं
निधाय उदकाञ्जलिसेकं कृत्वा विरू
पाक्ष जपान्तं कुशण्डिकां समाप
येत् यजुर्वेदिनान्तु आज्यस्थाल्या
माज्यं निर्वपणानन्तरं शूर्पपुरतो
दक्षिणभागे संस्थाप्य ततो दूखले
विन्यस्य व्रीह्याद्यन्यतमं तत्र निधाय
ओं सूर्य्याय त्वा जुष्टं गृह्णामि इत्ये
कां मुष्टिं गृहीत्वा ओं सूर्य्याय त्वा जुष्टं
निर्वपामीति उदूखले स्थापयित्वा
ओं सूर्य्याय त्वा जुष्टं प्रोक्षामीति प्रोक्ष
णीजलेन प्रोक्षयेत् एवं सोमा
य त्वा इत्यादि ततः ओं अमये विसिष्टि
कृतेन वा इत्यादिना गृहाणि निर्वपा
णि प्रोक्षणानि कृत्वा दिस्त्रीकुर्य्या
त् ततः पूर्ववत् श्रपणं । एकं तावा
ज्वलदग्निशरीरत्वा चरुमध्ये दक्षिणा
वर्त्तेन भ्रामयित्वा तन्मध्ये नैवाग्नौ
क्षिपेत् । ततः आघाराज्यभागान्तं
कर्म कुर्य्यात् । ऋग्वेदिनान्तु प्रोक्ष
णीपात्रस्थापनानन्तरं पवित्रान्तर्हि
ते ओं सूर्य्याय त्वा जुष्टं निर्वपामीति व्री
ह्याद्यन्यतमं मुष्टं प्रक्षिप्य ओं सूर्य्या।

य त्वा जुष्टं प्रोक्षामीति प्रोक्षणी
जलेन प्रोक्षयेत् । एवं सोमाय त्वा।
इत्यादि ततः स्विष्टिकरणार्थं किञ्चि
दधिकं तस्मिन् तथा कृत्वा पवित्रान्त
र्हितं कृत्वा पूर्वग्रीवोर्द्धलोमकृष्णा
जिने उदूखलं निधाय तत्र शूर्पस्थ
व्रीह्याद्यन्यतमं प्रक्षिप्य मुषलेनाव
हत्य शूर्पेण विक्षिप्तीकृत्य प्रस्फोट्य
त्रिः प्रक्षाल्य पवित्रं चरुस्थाल्यां
प्रक्षिप्य तथैव श्रापयित्वा उदीच्यां
दक्षिणभागे ओं सोमाय स्वाहेति हो
मपर्य्यन्तं कुर्य्यात् । ततः शान्ति
कर्म्मणि अग्ने त्वं वरद नामासीति
नाम कृत्वा ओं पिङ्गभ्रूश्मश्रुकेशाक्षः
पीनाङ्ग जठरोऽरुणः छागस्थः सा
क्षसूत्रोऽग्निः सप्तार्च्चिः शक्तिधारकः
इत्यादि ध्यानीयं ध्यात्वा ओं वरदना
माग्ने इहागच्छ २ इह तिष्ठ २ इत्यावा
हनपाद्यादिना पूजयेत् ॥ पौष्टिक
कर्म्मणि तु बलदनामाग्निः गृहको
मे अग्नीनाह गोभिलः आदित्येक।
पिलोनाम पिङ्गलः सोम उच्यते।
धूमकेतुस्तथा भौमे जठरोऽग्निर्बुधे
स्मृतः बृहस्पतौ शिखीनाम शुक्रे
भवति हाटकः शनैश्चरे महाते
जा राहौ चैव हुताशनः केतुषु।
लोहितोऽग्निः स्यादिति वह्नि वि

निर्णयः ततः स्वगृह्योक्तविधिना तेन
चरुणा सूर्य्यादि ग्रहेभ्यः प्रत्येकाहु
तिं दद्यात् । अत्र मन्त्राः । स
र्व्वस्य आकृष्णेनेति मन्त्रस्य हिरण्य
स्तूपाङ्गिरा ऋषिस्त्रिष्टुप्छन्दः सविता
देवता आदित्यस्य पूजा होमकर्म्म
णि विनियोगः ओं आकृष्णेन रज
सा वर्त्तमानो निवेशयन्नमृतं मर्त्यं
च हिरण्ययेन सविता रथेनादेवो
याति भुवनानि पश्यन् स्वाहा । इदं
सूर्य्याय इति देवतोद्देशः सामगो
तैः कार्य्यः ।१। सोमस्य इमन्दे
वेति मन्त्रस्य वरुणऋषिरग्निर्देवता
सोमस्य पूजा होम कर्म्मणि विनि
योगः ओं इमन्देवा असपत्नं सुव
ध्वं महते क्षत्राय महते ज्यैष्ठ्याय ।
इमममुष्य पुत्त्रममुष्याः पुत्त्र
मस्यै विशे स्वाहा । इदं सोमाय
२ मङ्गलस्य अग्निर्मूर्द्धेति मन्त्रस्य
अपांगिरा ऋषि गायत्रीच्छन्दोऽग्नि
र्देवता मङ्गलस्य पूजा होम क
र्म्मणि विनियोगः ओं अग्निर्मूर्द्धा दिवः
ककुत्पतिः पृथिव्या अयमपां रे
तांसि जिन्वति स्वाहा इदं मङ्गलाय
३ बुधस्य उद्बुध्यस्वेति मन्त्रस्य ।
परमेष्ठि ऋषिस्त्रिष्टुप्छन्दो अग्निर्देवता
बुधस्य पूजा होमकर्म्मणि विनि

योगः ॐउद्बुध्यस्वाग्ने प्रतिजागृ
हि त्व मिष्टा पूर्ते संसृजेथा मयंच।
अस्मिन् सधस्थे अध्युत्तरस्मिन्विश्वे
देवा यजमानश्च सीदत स्वाहा इदं
बुधाय।४ बृहस्पतेः बृहस्पते।
अतीति मंत्रस्य गृत्समद ऋषि स्त्रि
ष्टुप्छंदो ब्रह्मादेवता जीवस्य पू
जा होम कर्मणि विनियोगः ॐ
बृहस्पते अतियदर्यो अर्हाद्युमद्वि
भाति क्रतुमज्जनेषु यद्दीदयच्छ
वसऋतप्रजात तदस्मासु द्रविणं
धेहि चित्रं स्वाहा। इदं बृहस्पतये
।५। शुक्रस्य अन्नात्परिस्रुत इति
मंत्रस्य प्रजापति ऋषिः तिजगती
छंदः सरस्वती देवता शुक्र
स्य पूजा हो कर्मणि विनियोगः
ॐ अन्नात् परिस्रुतोरसं ब्रह्मणाव्य
पिबत्क्षत्रं पयः सोमं प्रजाप
तिः ऋतेन सत्यमिन्द्रियं विपा
नं शुक्रमन्धस इन्द्रस्येन्द्रिय मिदं
पयोऽमृतं मधुस्वाहा इदं शुक्रा
य।६। शनैश्चरस्य शन्नो देवीति
मंत्रस्य दध्यङ्गाथर्वण ऋषिर्गायत्री
छंद आपो देवता शनैश्चरस्य पूजा
होम कर्मणि विनियोगः। ॐ
शन्नो देवी रभिष्टय आपो भवन्तु पी
तये शंयोरभिस्रवन्तुनः स्वाहा।

इदं शनैश्चराय।७। राहोः कया
नश्चित्रा इति मंत्रस्य अग्निर्ऋषि
गायत्रीछंदो दुर्वेष्टकादेवता राहोः
पूजा होम कर्मणि विनियोगः।
ॐ कयानश्चित्र आभुवदूती सदावृधः
सखा कया शचिष्ठया वृता स
स्वाहा इदं राह
वे।८। केतुं कृण्वन्निति
मंत्रस्य मधुच्छन्द ऋषि रविराड्गायत्री
छंदोऽग्निर्देवता केतोः पूजा
होम कर्मणि विनियोगः ॐ केतुं
कृण्वन्नकेतवे पेशो मर्या अपेशसे
समुषद्भिरजायथाः स्वाहा इदं
केतुभ्यः ९ ततो मधु हूताक्तौ
लाक्तौ क्षीराक्तौ वा प्रादेश प्र
माणां साग्रा मर्कसमिधमादाय ॐ
आकृष्णेन इत्यादिमंत्रेण सूर्याय
होतव्यं शतं अष्टाविंशतिमष्टौ वा
अशक्तश्च। शाक्त्याय ग्रहस्यातिपीडा
करत्वाद्धा अष्टोत्तरसहस्रं तंदुपाव
समिधमाह याज्ञवल्क्यः। अर्कः
पलाशः खदिरस्त्वपामार्गोऽथपि
प्पलः उदुम्बरः शमी दूर्वा कुशाश्च
समिधः क्रमात्। होमे कृत्वा ब्रह्मादि
पूजायां स्नानमष्टोत्तरं भवेत् अ
ष्टाविंशति रष्टौ वा यथा शक्तिवि
धीयते। अतिपीडाकरो यस्तु तत्र

यत्नेन पूजयेत् ततो होमानंतरं
उदीच्य कर्म कुर्यात्। ततो गुडौ
दनादीन् ऋत्विजो भोजयेत्। तत्र
द्रव्यलाभे भोज्यान्नराणि वा द
द्यात् भोजनासामर्थ्ये तद्रव्या
णि पाणिना प्रतिग्राहयेत्। ततो
मत्स्यपुराणोक्तैर्मंत्रैः दक्षिणां
दद्यात्। धेनुः शंखस्तथानड्वान्हेम
वासो हयस्तथा कृष्णा गौरायसं
छाग एता वै दक्षिणाः क्रमात्। त
त्र कपिले सर्वदेवानां पूजनीयासि
रोहिणी तीर्थ देवमयी यस्मादतः
शांतिं प्रयच्छ मे॥ इति पठित्वा ॐ
अद्येन्नादि कृतेनेत्न सूर्यग्रहयज्ञ
कर्मणः प्रतिष्ठार्थं दक्षिणां कपिलां
धेनुं रुद्रदेवताकां अमुकगोत्रा
यामुकदेवशर्मणे ब्राह्मणाय तुभ्य
महं संप्रददे अभ्यर्थ्य चेत्
ददानीति ब्रूयात् कपिलाभावे।
गोमात्रं वा तदभावे कांचनं। तद
भावे रजतादिकं वा दद्यात् कांच
नादिकं तु शंखादि दक्षिणाभावेऽ
पि दद्यात्।१। पुण्यस्त्वं शंख पु
ण्यानां मंगलानां च मंगलं विष्णुना
विधृतो नित्यमतः शांतिं प्रयच्छ मे
इत्युच्चार्य पूर्वोक्तक्रमेण सोमग्रह
यज्ञे शंखं दद्यात् २ ॐ धर्म स्त्वं


वृषरूपेण जगदानंदकारकः। अष्ट
मूर्तेरधिष्ठानमतः शांतिं प्रयच्छ
इत्युच्चार्य मंगलयज्ञे वृषं दद्यात्
।३। ॐ हिरण्यगर्भगर्भस्त्वं हेम
बीजं विभावसोः अनंतपुण्य फ
लदमतः शांतिं प्रयच्छ मे इत्यु
च्चार्य बुधयज्ञे कांचनं दद्यात्।४।
ॐ पीतवस्त्र युगं यस्माद्वासुदेव
स्य वल्लभं। वरप्रदानाद्धरिमतः
शांतिं प्रयच्छ मे इत्युच्चार्य गुरुय
ज्ञे पीतवस्त्रयुगं दद्यात् तदभावे
ऽन्यवर्णवासो युगमपि दद्यात्।५। ॐ
विश्वत्वमश्वरूपेण यस्मादमृत संभ
वः चंद्रार्कवाहनस्त्वं वै अतः शांतिं
प्रयच्छ मे। इत्युच्चार्य शुक्रयज्ञे अश्वं
दद्यात्।६। ॐ यस्मात्त्वं पृथिवी
सर्वा धेनुः केशव सन्निभा सर्वपाप
हरा नित्यमतः शांतिं प्रयच्छ मे।
इत्युच्चार्य शनैश्चर यज्ञे कृष्णां
धेनुं अन्यवर्णा वा दद्यात्।७। ॐ
यस्मादायस कर्माणि त्वदधीनानि
सर्वदा लांगलाद्यायुधादीनि तेनः शा
न्तिं प्रयच्छ मे इत्युच्चार्य राहुयज्ञे
लोहं दद्यात्॥८॥ ॐ यस्मात्त्वं स
र्वभूतानां मंगलाय व्यवस्थितः।
यानं विभावसोर्नित्यमतः शांतिं प्र
यच्छ मे इत्युच्चार्य केतुयज्ञे छागं।

द्यात् ९ दक्षिणाजलं शान्ति
कुम्भजलेन संमिश्र शान्तिं कु
र्य्यात् ततः कृताञ्जलिः ॐ गच्छध्व
मग्रहाः सर्वे गृहीत्वार्घ्यमालयं
संतुष्टा वरमस्माकं ददतेदानीं स
पूजिताः इति विष्णुधर्मोत्तरीयं ।
पठित्वा ग्रहान् विसर्जयेत् दक्षिणा
च प्रदातव्या ग्रहाणाञ्च विसर्जनं
मिति वशिष्ठवचनात् इति रघुनन्द
न भट्टाचार्य्य विरचित ग्रहयागप्रयो
गः समाप्तः ॥
याच डु कृ ञ याचने इति कवि
कल्पद्रुमः याचनमात्मनेदानार्थं
प्रेरणं डु याचृ: "डु याचि त्रिम
कृ अययाचत् नयाचति याचते
नृपं विप्रः । ग्रहणार्थं प्रेरणेऽपि
याचति वित्तं गुरवे शिष्यः । इति
दुर्गादासः ॥
याचकः त्रि याच्ञाकर्त्ता तत्पर्य्या
यः वनीयकः २ याचनकः ३ मार्गणः
४ अर्थी ५ इत्यमरः । वनीपकः ।
६ भिक्षुकः ७ भिक्षाकरः ८ इति
शब्दरत्नावली तस्य लघुत्वं यथा
तृणादपि लघुस्तूलस्तूलादपि च
याचकः वायुना किं न नीतोऽसौ ।
किंविमामर्थयेत् शंकया इति प्राचीनाः
अपिच कृशस्य कीटस्य ॥
तस्य वाताविकासिनस्यच । शि
रवे वसत स्तस्य वरं जन्म नया
चितं जगत्यति हि याचित्वा ।
विष्णु वामनतां गतः । कोन्यो ।
ऽधिकतरस्तस्य योऽर्थी याति त
लाघवं । इति गारुडे नीतिसारे ।
११५ अध्यायः ॥
याचत् त्रि याचकः यथाखरेभङ्गः
स्वरो दीनो गात्रस्वेदो महद्भयं ।
मरणे यानि चिह्नानि तानि चिह्ना
नि याचतः इति गारुडे नीतिसारे
११५ अध्यायः ॥
याचनं क्ली याच्ञा याचधातोर्भावे
अनट् प्रत्ययेन निष्पन्नं ॥
याचनकः त्रि याचकः इत्यमरः
याचना स्त्री याच्ञा इत्यमरः ।
याचमानः त्रि याचकः यथा नवी
न दीनभावस्य याचमानस्य मानिनः
वचो जीवितयोरासीत् पुरो
निःसरणे रणः । इति चरक विः
अपिच द्विजेभ्यो याचमानेभ्यो य
जमानः प्रयच्छति सयाति विवात्
यान् लोकान् येभ्यो नावर्त्तते पु
नः षष्टिवर्षसहस्राणां सह
स्त्राणि वसेद्दिवि योऽर्थं मंत्रापि भ
वति निरये प्रतिषेधकः । इति
वह्निपुराणे वामनप्रादुर्भावो ना

माध्यायः ॥
याचितं क्ली याचनवृत्तिः तत्पर्य्या
यः मृतं २ यथा हे याचितायाचितयो
र्यथा संख्यं मृता मृते
इत्यमरः । हे याचनवृत्ति मरण
मिव दुःखजनकत्वात् मृतं अयाचि
तं अमृतमिव अमृतं । याचिता
याचितयो भावे कर्मणि वा क्तः
इति भरतः प्रार्थितवस्तुनि त्रि ।
याचितकं क्ली याच्ञाप्राप्त इत्य
मरः याच्ञया प्रत्यर्पणीयत्वेन ।
याच्ञया यत्प्राप्तमलंकारादिवस्तु
तत् याचितकं कार्य्यानन्तरं वस्तु
स्वामीयत् पुनर्देयं आनीतमित्यर्थः
याचितेन प्राप्तमिति ठक्ववादित्वा
कः इति भरतः ॥
याच्ञा स्त्री याचनं तत्पर्य्यायः
अभिशस्तिः २ याचना ३ अर्थना ४
भिक्षा ५ अर्दना ६ । इत्यमरः
लालसा ७ इति जटाधरः ॥
याजः पुं अन्नं इति हेमचन्द्रः ।
याजकः पुं याज्ञिकः राजोगजः
इति मेदिनी मत्तहस्ती । इति
जटाधरः ऋत्विक् यथा अग्नी
ध्राधायन्ते वीर्या ऋत्विजो याजका
स्मृते इत्यमरः यजमानेनधनेर्वा
र्य्याः पद्मनिन्द्रा इष्टसंपादनाय
ब्रियन्ते प्रार्थ्यन्ते ये अग्नीध्रप्रभृतयः
स्ते ऋत्विजो याजकाश्च कथ्यन्ते
अग्निं इन्धयति दीपयतीति अग्नीध्राः
इन्धी नि पञ्चद्दु. पुनेनि: नाग्नीति
रः मनीषादित्वात् नलोपः आदि
ना अग्न्याधानात् होत्रध्वर्युब्रह्मा
णाद्वंसि प्रभृतयः षोडश गृह्यन्ते
वार्य्या इति हल्सु पासे रितिण्यण
हभ्रू ऋषि स्यादौ हन इति मात्र
वैच निर्द्देशात् अन्यत्वपानानेक
पृ ऋक्तो यजेति ऋत्विजः क्विप् य
जेति याजकाः णकः । इति भरतः
वृद्धयाजक ग्रामयाजकयो ।
निंदा यथा अग्न्याखणास्तवषट् यो
क्तारऋषिभिस्तत्वदर्शिभिः । आद्यो
राजभृत स्तेषां द्वितीयः क्रय वि
क्रयी तृतीयो बहुयाज्यः स्याच्च
तुर्थो ग्रामयाजकः पंचमस्तु भृत
स्तेषां ग्रामस्य नगरस्य च । अना
दिष्टां च यः पूर्वां सावित्रीं चैव प
श्चिमां नोपासीत द्विजः सन्ध्यां
स षष्ठो ब्राह्मणः स्मृतः ॥
इत्याह्निकतत्वे । अपिच । शूद्र
समाद्दिक्र याजी ग्रामयाजीति की
र्त्तितः शूद्रपाकोपजीवीयः सूप
कारः प्रकीर्त्तितः संध्यापूजा विहीन
तश्च प्रमत्तः पतितः स्मृतः ।

पते महापातकिनः कुम्भीपाकं प्रयान्ति ते इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २० अध्यायः ॥
याजनं क्ली यागक्रियाकारणं यागकरान इति भाषा तत्तु ब्राह्मणस्य षट्कर्मान्तर्गत कर्मविशेषः यथा अध्यापनमध्ययनं यजनं याजनं तथा दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत् । इति मानवे १ अध्यायः ॥
याजिः पुं यज्ञः इति संक्षिप्तसारोणादिवृत्तिः यागकर्त्ता । इत्युणादिकोषः ॥
याजुषं त्रि यजुर्वेदसंबंधि इति सिद्धान्तकौमुदी ॥
याज्ञवल्क्यः पुं धर्मशास्त्रप्रयोजकमुनिविशेषः तत्पर्य्यायः ब्रह्मरातिः २ योगेशः ३ इति हेमचन्द्रः योगीश्वरः ४ इति मिताक्षरा ॥
याज्ञसेनी स्त्री यज्ञसेनस्यापत्यं सा च द्रौपदी । इति हेमचन्द्रः ॥
याज्ञिकः पुं दर्भभेदः याजकः १ यज्ञकर्त्ता इति शब्दरत्नावली । रक्तखदिरः पलाशः अश्वत्थः । इति राजनिर्घण्टः ॥
याज्ञिक्यं क्ली यज्ञः इति सिद्धान्तकौमुदी ॥
याज्यं क्ली यागलब्धधनादि इति सिद्धान्तकौमुदी यजनीये त्रि
याज्या स्त्री यागमन्त्रः इति मुग्धबोधव्याकरणं ॥
यात् अ आख्यातप्रत्ययविशेषः स च विधिलिङाशीर्लिङः परस्मैपद प्रथमपुरुषैकवचनं तत्र विध्यर्थक आशीर्वादार्थकश्च इति व्याकरणं मुग्धबोधमते विध्यर्थे अस्य वी संज्ञा आशीरर्थे टी संज्ञा ॥
यातं क्ली निषादिनां पादकर्म इति हेमचन्द्रः उत्पलकान्तरे यत मिति पाठः । यथा अपृष्ठत्वं कुशस्याग्रे यानं मंकुशवारणं निषादिनां पादकर्म यतं वीतं तदुच्यते ॥
यातः त्रि गतः याधातोः क्त प्रत्ययेन निष्पन्नः ॥
यातना स्त्री गाढवेदना तत्पर्य्यायः कारणा १ तीव्रवेदना २ इत्यमरः अतिव्यथा ४ इति शब्दरत्नावली नरककृत्या इति केचिदिति भरतः ॥
यातयामं त्रि जीर्णं परिभुक्तं इत्यमरः उज्झितं । इति मेदिनी ॥

याता स्त्री पतिभ्रातृपत्नी या इति भाषा इत्यमरः गमनकर्त्तरि त्रि
याता याने क्ली गमनागमने यथा पृष्ठे भ्राम्यदमन्द मंदरगिरि ग्रावाग्र कंडूयनान्निद्रालोः कमठाकृते र्भगवतः श्वासानिलाः पान्तु वः यत्संस्कार कलानुवर्त्तनवशाद्वेलानिभेनाम्भसां याता यात मतंद्रितं जलनिधे र्नाद्यापि विश्राम्यति । इति श्रीभागवते १२ स्कंधे १२ अध्यायः ॥
यातिकः पुं पान्थः इति शब्दरत्नावली ॥
यातु क्ली राक्षसः इत्यमरः
यातुः पुं कालः । अध्वगः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः वायुः इति संक्षिप्तसारोणादिवृत्तिः ॥
यातुः त्रि गन्ता इत्युणादिकोषः । क्रियापदं चेत् गच्छतु ॥
यातुघ्नः पुं गुग्गुलुः इति राजनिर्घण्टः ॥
यातुधानः पुं राक्षसः । इत्यमरः
यातुकः पुं पान्थः इति शब्दरत्नावली ॥
यात्यं त्रि यतितव्यं यतनीयं ॥ यतधातोः कर्मणि ण्यप्रत्ययेन निष्पन्नः ॥
यात्रा स्त्री विजिगीषोः प्रयाणं तत्पर्य्यायः व्रज्या २ अभिनिर्याणं ३ प्रस्थानं ४ गमनं ५ गमः ६ इत्यमरः प्रस्थितिः ७ यानं ८ प्रयाणं ९ इति शब्दरत्नावली । यापनं । उत्सवः इति मेदिनी ॥ उपायः इति विश्वः ॥ अथ यात्रादिने भाद्र पौष चैत्रेतर मासेषु रविशुक्रवारस्य प्राशस्त्यं दक्षिणस्यां मंगल वारस्य प्राशस्त्यं । पश्चिमायां सोमशनिवारस्य प्राशस्त्यं उत्तरस्यां बृहस्पति वारस्य प्राशस्त्यं पूर्वस्यां दिशि सोमशनि वारे न गन्तव्यं दक्षिणस्यां बृहस्पति वारे केषांचिन्मते बुधवारे च गन्तव्यं । पश्चिमायां रवि शुक्र वारे । एवं उत्तरस्यां बुध मंगल वारे न गन्तव्यं द्वितीया तृतीया पंचमी सप्तमी दशमी एकादशी त्रयोदशी च तिथयो यात्रायां प्रशस्ताः ॥ श्रेष्ठोत्तम नक्षत्राणि अश्विनी अनुराधा रेवती मृगशिरा मूला पुनर्वसुः पुष्या हस्ता ज्येष्ठा मध्यम नक्षत्राणि । रोहिणी पूर्वात्रयं चित्रा स्वाती शतभिषा श्रवणा धनिष्ठा ॥ अधम



र्गशीर्षे वा यात्रां यायान्नराधिपः
चैत्री नश्यति नैदाघं हन्ति पुष्टिंच
शारदी एतदेव विपर्यस्ते मार्ग
शीर्षे नराधिपः। शत्रोर्वा व्यसने
यायात् कालः सततस्तु लेभ्यः। दि
व्यान्तरीक्ष क्षितिजै रुत्पातैः पी
डितं परं सहस्त पीडां संतमां
पीडितंच तथा ग्रहैः। ज्वलन्तीव
तथैवोल्का दिशं यस्य प्रपद्यते
भूकम्पोल्का दिशं यांतियांचकेतुः
प्रपद्यते निर्घातश्च पतेद्यत्र तं
यायाद्वसुधाधिपः सबल व्यसनो
पेतं तथा दुर्भिक्ष पीडितं। संभू
तांतरकोपंच क्षिप्रं यायादरीं
नृपः यूकमाक्षीकबहुलं बहुपंकं
तथाविलं नास्तिकं भिन्नमर्य्यादं
तथा मंगल वादिनं अपेतप्रकृ
तिंचैव निराशंच तथा जयेत्।
विद्विष्ट नायको सेनां तथा भिन्नां
परापरं व्यसनासक्तनृपतिं बले
राजाभियोजयेत् सैनिकानाम
शस्त्राणि स्फुरन्त्यंगानि यत्र च दुः
स्वप्नान्यपि पश्यंति बलस्तदभियो
जयेत् उत्साह बलसम्पन्नस्वानुरक्त
बलस्तथा तद्युद्ध बलो राजा प
रानभियोजयेत् ॥ शरीर
स्फुरणे धन्ये तथांडःस्वप्नदर्शने।

निमित्ते संकुले धन्ये जाते यात्रा
पुरे व्रजेत् ऋतेषु बहुसु शुद्धेषु
ग्रहेष्वनुगुणेषुच सम्प्रकाले शुभ
जाते प्रयात यायान्नराधिपः ॥
एवन्तु दैव सम्पन्नस्तथा पौरुष सं
युतः देशकालोपपन्नां यात्रां
यायान्नराधिपः उत्कस्य त्रिवि
धोत्तः सर्व तस्य दिवाबले पूर्वदे
शंच कालंच ज्ञात्वा यात्रां प्रयोज
येत् पदाति नाग बहुलां सेनां
प्रावृषियोजयेत् हेमन्ते शिशिरे
चैवरथ वाजि समाकुलां। खरो
ष्ट्र बहुलां सेनां तथा ग्रीष्मे नरा
धिपः चतुरंगबलोपेतां वसंते
वा शरद्यथ सेना पदातिबहुला
यस्य स्यात् पृथिवीपतेः। अभि
योज्यो भवेत्तेन शत्रुर्विषम मा
श्रितः गम्येवृक्षावृते देशे स्थि
तं शत्रुं तथैवच किंचित् पंके
तथा यायाद्बहु नागो नराधिपः
रथाश्व बहुलो यायाच्छत्रुं समप
थाश्रितं तदाश्रयेतो बहुलास्तथा
राजाभिपूजयेत् खरोष्ट्र बहुलो
राजा शत्रु बंधन संस्थितं बंधन
स्थोपि योज्यो ऽस्मिन्काले प्रावृषि।
भूभुजा हिमपातवृते देशे स्थितं
शीघ्रमभियोजयेत्। शारदसैतो।

धर्मज्ञ कालौ साधारणौ स्मृतौ।
विज्ञाय राज्ञो द्विजदेशकालौ दैवं
त्रिकालंच तथैव बुद्धा। यात्रा
परं कालविदां मतेन संचिन्त्य
सार्द्धं द्विजमंत्रविद्भिः। इति मा
त्स्ये २४७ अध्यायः ॥ यात्रा
काले मांगल्य द्रव्याणि यथा यो
धीपर्यंस्त्वहमीतं तावकांच शुभ
लक्ष्णो नैरेव साद्धं बलवान् बभूव
गमनोत्सवः। ददर्श मंगलं रामः
शुश्राव च यत्सूचकं बुबुधे मनसा स
र्वं विजयं वैरि संततं यात्राकाले
च पुरतः शुश्राव सहसा ध्वनिः हृ
रिशब्दं शंखरवं चेदांकुरिमादं
ने आकाशवाणी संगीतं जयशब्दे
भ विनेविच नयकं नेच कल्याणं
मेघशब्दं न यावद् चकार यात्रो
भगवान्नकाले शुभप्रिंपे शुभे हृदे
शी दर्पणो विप्र वैदि देवत भिन्नं
कान ज्वलत्प्रदीपे विभ्रंती पति
पुत्रवती सती पुरो ददर्शस्मेरा
स्यां नानाभूषण भूषितां ॥ शिवं
शिवां पूर्णकुम्भं वासेव लकुन्तथा
गच्छन् ददर्श रामेशो यात्रामंगल
सूचकं। कुलसारं गजं सिंहं।
तुरगं गंडकं द्विपं कुमारी राजा।
हंसंच चक्रवाकं शुकं पिकं मयू

रं खंजनं चैव शावचिलोकरकं।
पारावतं बलाकोच कारंडं चातन
कं नटं सौराष्ट्रीं शङ्खचाप्यं।
सर्पो सूर्यमप्यं शुभां सद्योमांस
मजीवंच मत्स्यं पात्रं स्ववर्णकं।
माणिक्यं रजतं मुक्ता मनोज्ञंच।
प्रवालकं दधिलाजं शुक्लधान्यं शु
क्ल पुष्पंच कुंकुमं शुक्लवस्त्रं पत्ता।
कांच दर्पणं श्वेतचामरं पेटंबस्त्र
पुष्पांच रक्षस्य भूमिपं जया। दु
ग्धंच रोचना मांसं नवनीतं पायसं
तथा शालग्रामं पक्वफलं स्वस्तिकं
शर्करा मधु मार्जारंच हयेन्द्रंच
मेघपर्वत मधुकं मेवाच्छन्नं स्वचं।
रवेरुदयं चंद्रमंडलं कस्तूरी क
ज्जलं तोय हरिद्रां तीर्थमृत्तिकां।
सिद्धार्थं सर्षपं दूर्वां विप्रबालंच।
वालिकां। भ्रमं वेश्यांच भ्रमरं।
कर्पूरं पीतवाससं गोमूत्रं गो
पुरीषंच गोधूलिं गोष्पदांकितं ॥
गोष्ठं गवां वर्त्म रम्यं गोशालं।
गोरतिं शुभां ताम्रं स्फटिकं तै
लंच सिंदूरं रक्तचंदनं गंधंच।
हीरकं रत्नं ददर्श हरिणो शुभे
सर्गधि वायो शकुना माप विप्रा
शिषं शुभं दृष्टवेमं मंगलं कृत्वा
प्रययौ सकृदान्वितः इतिब्रह्मवैवर्त्ते

गणपतिखंडे ३३ अध्यायः ।
यात्राकाले अमंगलसूचकानिय
था राजानुगाम समरंद्वंद्वयेन विहृय
ता सार्द्धं सैन्यसमूहेन बाघभांडैः र
संघोकैः ददर्शामंगलं राजा पुरो
वर्त्मनि वर्त्मनि यथोनग्नाधिसमरं
नग्नगामसमूहं पुनः मुक्तकेशीं छिन्न
नासां रुदन्तीच दिगम्बरीं कृष्णवस्त्र
परीधाना सपयं विधवामपि । पु
त्रं दुष्टां योनिदुष्टां व्याधियुक्तांचकु
ट्टनी । पति पुत्र विहीनां डाकि
नीं पुंश्चली महो । कुम्भकारं
तैलकारं व्याधं सर्पोपजीविनं
कुचेलमपि हूनांगं नग्नंकाषाय
वासिनं नस्यविक्रयिणं चैवकन्या
विक्रयिणं तथा विनं दग्धशवं
भस्म निर्वाणांगारमेवच सर्पदंशन
नरं सर्पं गोधांच शशकं विषं
श्राद्धपाकंच पिंडंच मोदकंचति
लोत्तमां देवलं वृषवाहंच शूद्र
श्राद्धान्नभोजिनं शूद्राननपाचकं
शूद्रयाजकं ग्रामयाजकं कुश पु
त्तलिकांचैव शवदाहनकारिणं ।
शून्यकुम्भं चूर्णिकुम्भं तैलं लवण
मस्थिच कार्पासं कच्छपं चूर्णंकुक्कु
र . शब्दकारिणं दक्षिणेच शृगालंच
कुर्वंतं भैरवं रवं । कपर्दकंच ।

तौरंच छिन्नकेशं नखं मलं । क
लहंच विलापंच विलापकारिणं
जनं अमंगलं वदंतं रुदंतं शोक
कारिणं मिथ्यासाक्षिप्रदातारं चौ
रंच नरघातिनं पुंश्चली पति
पुत्रौ च पुंश्चल्योदनभोजिनं दे
वता गुरु विप्राणां वस्त्र वित्ताप
हारिणं दत्तापहारिणं दस्युं हिं
सकं सूचकं खलं पितृमातृ विर
क्तंच हिंसाश्रम्य विघातिनं सत्
यंच कृतघ्नंच स्थाप्यापहारिणं जन
मित्रद्रुहं मित्रद्वंद्वंचहंतारं विश्वासघा
तिनं गुरुदेव द्विजानांच निंदकं
स्वांगछानकं जीवानां छानकंचैव
स्वांगहीनंच निर्दयं व्रतोपवासही
नंचैव दीक्षाहीनं नपुंसकं । गलि
तव्याधिगात्रंच गुरुलंघन मेवच
पुरुषं छिन्नलिंगंच [illegible]
तथा तितं वमंतं रुधिरं महिषं
गर्दभं तथा मूत्र पुरीषं श्लेष्माणं
कफिनं नृकपालिनं कर्णकाटनं ।
रक्तवृष्टिं बाघंच नूपचारकं ।
हृदंच शूकरं गृध्रं श्येनकंकंच भ
ल्लूकं पाशंच छिन्नकाष्ठंच वायसं
गर्दभं तथा अप्रदानां ब्राह्मणंच
तंत्रमंत्रोपजीविनं वैद्यंच रक्तपुष्पं
वैवोषधं तथमेवच कुर्वातं ॥

मृतवार्त्ताच विप्रशापंच दारुणं
दुर्गंध्न वातं दुःशब्दं राजासंप्राप
वर्त्मनि मनस्तुकृतासिनप्राणाः स्व
युज कि संयमे युजो । इति कविकल्पद्रुमः अंतस्थाद्यादिः कि योजयति योजति संयमो वं धनं इतिदुर्गादासः ॥

युज इरप नओ युनो इतिकविकल्पद्रुमः । इर अयुजनव्यपेलीत् अयुनक्ति युंक्ते हनेन नांजेलो कः ओ योक्ता । इतिदुर्गादासः

युज यङ उ समाधौ इतिकविकल्पद्रुमः समाधियोगस्सावः । य इ. स्वयुजमा नियुज्यने इतिदुर्गा युधः ओयोक्ता इतिदुर्गादासः ।

यूज इ. क निंदे इतिकविकल्पद्रुमः कइ. योजयन् इतिदुर्गादासः

युजानः पुं सारथिः इतिसिद्धान्तकौमुद्यामुणादिवृत्तिः ॥


युंजौ पुं अश्विनीकुमारौ इति त्रिकांडशेषः । नित्यद्विवचनान्तोयं । युंजानः पुं सारथिः विप्रः इति मेदिनी भावनामहत्कारेण सर्वज्ञः । यथा । योगिनो द्विविधः प्रोक्तो युक्तयुंजान भेदतः । युक्तस्य सर्वदाभान चिंतामहत्कृतोऽपरः इति भाषापरिच्छेदः ॥

युक्तस्येति योगाभ्यासा ज्जनित धर्मसहितमनसा योगिनो विविध सिद्धियुक्तस्य ध्याने अपगत विशिष्ट योगजधर्म युक्तस्य तेन सर्वदेति चिंतासहकारं विनेत्यर्थः भानं सर्वविषयानां प्रत्यक्षं अपरो युंजानः । विषयव्याहृत्या मानसमाधिस्थः अस्यच युंजानत्वेन विना ध्यानं न देव कारणं नसहकारान् स्थूलसूक्ष्म व्यवहितादि विप्रकृष्टान्वीक्षणः सूक्ष्मदर्शिता इति सिद्धान्तमुक्तावली ॥

युत क्ली त्रिपा युङ्कनिरे इत्य मारावलिः पुतयपेन नित्य । युत स्त्री युङ् । इत्यमरः ।

युत ऋ इ. दीप्तौ । इतिकविकल्पद्रुमः ऋअयुयोतत् इ. योतते इति दुर्गादासः ॥

युतकं क्ली इकचत्नेक्षयं इतिमेदिनी युक्त त्रि युक्तः अयुप्राप्ततः ।



इति मेदिनी ॥
युतकं क्ली संशयः। युगं नारी
वस्त्राञ्चलं। युक्तं ॥ वस्त्राग्रं
यौतकं। इति विश्वमेदिन्यौ ॥
मैत्रीकरणं। इति शब्दरत्नावली
स्त्रीवस्त्रभेदः। इति हेमचन्द्रः
संश्रयः सूर्पाग्रे। इति नानार्थ
रत्नमाला ॥
युद्ध स्त्री युद्धं इत्यमरः ॥
युद्ध क्ली योधनं। लड़ाई इति
भाषा। तत्पर्य्यायः। आयोधनं
२ जन्यं ३ प्रधनं ४ प्रविदारणं ५
मृधं ६ आस्कन्दनं ७ संख्यं ८ समी
कं ९ साम्परायिकं १० समरं ११
अनीकं १२ रणः १३ कलहः १४
विग्रहः १५ संप्रहारः १६ अभि
सम्पातः १७ कलिः १८ संस्फोटः
१९ संयुगः २० अभ्यामर्द्दः २१ स
माघातः २२ संग्रामः २३ अभ्या
गमः २४ आहवः २५ समुदायः
२६ संयत् २७ समितिः २८ आजिः २९
समित् ३० युत् ३१। इत्यमरः।
संरावः ३२ आनाहः ३३ सम्परा
यकः ३४ विदारः ३५ दारणं ३६ सं
वित् ३७ सम्परायः ३८ इति शब्द
रत्नावली। नीवाशं ३९ अवमर्द्द ४०
दलनं ४१ आनर्त्तः ४२ अभिमरः ४३

समुदयः ४४ इति जटाधरः ॥
युद्धे वर्णनीयानि यथा वर्म १ व
र्मी २ वरः ४ धूलिः ५ तूर्य्यस्वनः ६
सिंहनादः ७ शवमण्डलं ८ रक्त
नदी ९ छिन्नच्छत्रं १० रथः ११ चाम
रः १२ हस्ती १३ अश्वः १४ केतुः १५
निर्दीर्णकुम्भकरटिकुम्भमुक्ता १६
व्यूहरचनावस्थितसेना १७ शरवृ
ष्टिः १८ इति कविकल्पलता ॥
अथ युद्धफलं अग्निष्टोमादिभि
र्यज्ञैरिष्ट्वा विपुलदक्षिणैः न
तत्फलमवाप्नोति संग्रामे यदवा
प्नुयात्। इति यज्ञविदः प्राहुर्यज्ञ
कर्मविशारदाः। न स्नानेन प्र
ह्लामि यत्फलं शास्त्रमीरितं।
युद्धे मरणफलं यथा धर्मलाभो
ऽर्थलाभश्च यशोलाभस्तथैव च
यः शूरो वध्यते युद्धे विमृद्य पर
वाहिनीं। तस्य धर्मार्थकामा च
यज्ञेष्वेव सदक्षिणाः। परं स्वभि
मुखे हत्वा नयोः संख्यापितो इति
विप्राः स्थानमवाप्नोति पर्वेयुयात्
रणाग्निरे। अश्वमेधानवाप्नोति।
चत्वर स्तेन कर्मणा। पृष्ठतस्तु स
मुत्सृज्य वीर्यवान् वाहिनीं मुखे
सन्मुखो वर्तते शूरः स स्वर्गान्न निव
र्तते ॥ राजा वा राजपुत्रो वा

सेनापतिं रथापि वा हतः चक्रेण
यः शूरस्तस्य लोकाःऽक्षयो ध्रुवः
यावन्ति तस्य गात्राणि भिन्दन्ति शस्त्र
माहवे तावतो लभते लोकान् सर्व
कामदुहोऽक्षयान्। वीरासने वी
रशय्या वीरस्थान स्थितिः स्थिरा या
वार्थे ब्राह्मणस्यार्थे गोग्रहमध्ये
ये हताः। तेषां लोकाः परस्थाने ये
सुः सत्कुलिनस्तथा। अभिप्रायः प
रसैन्यं भग्नं च परिरक्षति। यस्तु
स्थितः पालयति सोऽपि गच्छति
ऊर्ध्वं ऋतुभोगी तथा सन्ध्याशास्ता
न्यस्यते। अपि हतस्य स्वपने
युद्धे स स्वर्गान्न निवर्त्तते। दुर्लभाः
सर्वगिरिभिर्वापि तथा लोकैश्च वक्षः
रैः साम्यर्थे ये हता रणे लोकां
स्वर्गो न संशयः। विनाशनिर्दे
... सहस्रे वचन्तो यदि। संग्रा
माभियुने राजं तस्य स्वर्गान् संशा
यः। भग्न लज्जया वापि स्नेहेन च
रणाग्निरे। । समुखोऽभियने राजं
स्तरां स्वर्गो न संशयः। पत्रभिर्लीढ
ने गात्रे शरशक्त्यृष्टितोमरैः। देव
कन्यास्तु तं वीरं रमयन्ति रमन्ति च।
कामसरः सहस्राणि भूत्वा योधयन्ते
हते। वरिताभ्यभिधावन्ति मम भ
र्त्ता भवेतिच। यत्रैव हतः शूरः

शत्रुभिः परिवेष्टितः। अक्षयान् ल
भते लोकान् यदि दीनं न भाषते।
जितेन लभ्यते लक्ष्मीर्मृतेनापि
सुराङ्गनाः। क्षणविध्वंसिनि काये
का चिन्ता मरणे रणे। हतस्याभि
मुखस्यास्य ये लोका न निवर्त्तिनः।
हते गोस्वामि विप्रार्थे तेऽश्वमेधफ
ले स्थिताः स्थानाभिचारे प्रार
णागते च राष्ट्रे विपन्नोऽपि सा
र्थघाते। स्त्रीबालवृद्धाजनगोत्र
हेतु प्रास्तमनीनामपि धारणीय
यां यत्र संयेत्तपसा च विप्राः
स्वर्गैषिणो यत्रगतेऽपि यान्ति तत्रा
ननामेव गतिं प्रयांति- महाहवे
ष्वा नमे संप्रजेतः। सर्वेषां च वे
दानां समन्द्रधिरोः। सांख्यं च यो
गं च अंग विवास। पत्नेषु गुणपक्ष
पूर्वे प्रविष्टा महाहवेष्वानतेसं
समेयः। इमां गिरं वेदविदः
सुभाषितां सुभाषितां हत्वा मितारि
लोकानां सम्मुखे यः स्मरेत।
हन्त्यस्तिर्ल्लिकल्यानं हन्ति च साधिवे।
तिः सदा दुष्टानसः सर्प्यः सप्तकः
सर्व्वोत्सुकः। सर्वेषामेव वर्णानां
क्षत्रियस्य विशेषतः। भूयस्येव तथा व
त्सालि रणधर्म्मे सनातने। यादृशा
य सर्वेनेयं यादृशं परिवर्त्तयेत्

आततायिनमायान्तमपि वेदा
न्तगं द्विजं जिघांसन्तं निघ्नं सी
यात तेन ब्रह्महा भवेत् कोदण्ड
शस्त्रपाणिं प्रद्रवन्तं द्विजं यदि
हन्यात्तस्यापरं भावं हत्वा न ब्रह्महा
भवेत् ब्रह्महा जायते सोऽत्र हते
स्तवं शृण्वत्येव वचःसंख्ये नृप
श्रेष्ठ ध्यायत्यन्ते स्नानान्ते । विरथं
विगतं व्यस्त्रं विवर्णं विरुक्षस्थितं
युद्धोत्साहहतं हत्वा ब्रह्महा
जायते नरः विश्वस्तं विपद्गश्चर्वते
भीतोऽस्मीति वादिनं । वृक्षशाखा
युतं स्त्रीं तु हत्वा सब्रह्महा भवेत्
सन्ध्याहूतो न हन्तव्यो बालो
वृद्धो नपुंसकः । तथाहं प्रवर
न्तु शङ्कितो ऽप्य भीरवः
तस्मादेतान् परिहृत्य योधः धर्म श्रु
तां वरः सम्यक् युद्धफलं नी हन्
हत्वासौ ब्रह्महा भवेत् । शक्यान्विर
सम्बद्धैस्तु यत्तैः कलशैते नृपाः ।
ग्राम देह परित्यागः कर्तुं युद्धे
स्वत्यक्तं ब्रह्महा प्रोच्यते ऽप्यहो
देहं त्यक्त्वा रणाजिरे । कुर्वीरणा
भ्रमालां अनेककपिमहाप्रधान। से
ग्रामे पुष्यन्ते लक्ष्मीः कीर्त्तिःस्यात्
स्वर्गतिस्तथा अमृत्यावस्तैऽपि नश्य
ति महासम्मानकारणात् । तस्मात्
सत्येन यत्किञ्चित् क्रियते तदक्षयम्
पदं । यत्तु दानं व्रतं वापि स
ग्रामे नृप सत्तम कुर्व्याये वक्षि
ष्यमाणे संग्राम प्रशंसा ॥ अथ
युद्धनिर्णयः । यत्रा युद्धे ध्रुवं नाशो
युद्धे जीवित संशयः न कालं मे
के युद्धस्य प्रवदन्ति मनीषिणः सा
म्नोदये विग्रह्णीयात् लोभो नाम
बले यदि व्यसनेच प्रहर्त्तव्यं शत्रौ
तत्र विपर्यये । स्वयं राज्ञा न यो
द्धव्यं यदि शास्त्रास्त्रकोविदः मृता
युद्धेषु दृश्यन्ते शक्तेभ्यः शक्तिमन्त
राः प्रायुद्धं समदेशे विषमे
दूरि संगरः । अश्वयुद्धं मरौदेशे
पत्तियुद्धं च दुर्गमे । अन्यत्र सर्वो
युद्धं स्यान्नौकायुद्धं जलस्थले ।
संहत्य योधयेदल्पान् कामं वि
स्तारयेद्बहून् । सर्वीदले अनीकस्था
दस्य हि वहुभिः सह अपि पंच
शतः सरान् निघ्नंति परवाहिनी ।
येपिवा पंच षट् सप्त सहिताः स्व
विभ्रमाः ॥ अथ युद्धास्त्र निर्णयः
अन्यद्वारा विपन्नेन विग्रहासनं ।
मुच्यते । अरिं द्विष्यत् वा स्यात्
विग्रहासन मुच्यते । अन्येम्य विरि
गीषेम्य विग्रहे हीयमानयोः । स
न्धाय यदवस्थानं संधायासन मुच्यते

उदासीने मध्यमे वा समाने प्रति
शंकया एकीभूय व्यवस्थानं संभ
यासन मुच्यते । सर्वेषां प्रीतिज
ननं निजराष्ट्रस्य लक्षणं । पत्तन
प्रीत्यासनं नाम सर्वासन महत्तरं ।
॥ अथ दुर्ग युक्तिः ॥ राज्ञो
बलं नहि बलं दुर्ग मेव बलं दुर्ग
मध्यस्थ बलवान् राजा स्थिरो दुर्ग
स्थ भावेन । तथाच । एकः शतं
योधयति प्राकारस्थो धनुर्धरः । शतं
दशसहस्राणि तस्माद्दुर्गं विशिष्य
ते अकृत्रिमं कृत्रिमं च तत् पुनर्द्वि
विधं भवेत् । यदेव संचितं दुर्गं ।
गिरि नद्यादि संस्थितं । अकृत्रिम
मिदं ज्ञेयं दुर्लंघ्य मरिभूभुजां
प्राकार परिखाद्यसप संयुक्तं यद्
वेदितं । कृत्रिमं नाम विज्ञेयं ते
आलेख्यं वैरिणां ॥ अथाकृ
त्रिम दुर्ग युक्तिः यत्र विस्तीर्ण
शिरा कृपादृढः सकाननः । सज
लाशय संभार भोज्य द्रव्य समाश्रयः
सर्वनिःसरणो दुर्गः पर्वताख्यो ।
महीभुजां । नद्यो गंभीर विस्तीर्ण
स्वतो दिक्षु व्यवस्थिताः ॥ तन्मध्ये भू
प्रदेशो यो नदी दुर्गः स उच्यते ।
यद्यन्यद्वीप कालीनं जलं च दिपि
नादिकं । नानाध्य रचिता भूमि दुर्ग
वनोपतिष्ठते वन दुर्ग मिति ख्या ।
तं यथा पूर्वं मरक्तां ॥ कृत्रिम
दुर्ग युक्ति यथा पश्चिमात्ये गिरि
र्नास्ति नद्यो वा गहनोदकाः । तस्य
मध्ये महीपालः कृत्रिमं दुर्ग मार
भेत गम्भीरलंघ्या विस्तीर्णा गंभी
रा पूर्णा वारयः दुर्गत्वेन समादि
ष्टाः परिखा बहुपारगः । विशाल
शालं सद्यन्ते वहुकंटकि संकटं ।
दुर्गत्वेन समादिष्टं विस्तीर्णविषमं
वनं अयोध्यो वध्यमानोपि कंट
रोऽस्य जलेश्चरन दुर्गत्वेन समादिष्टः
मरुर्लोको हि भूभृतां । सर्वतः प
रिखां कृत्वा निर्मितोपरि कंदरं ॥
[illegible] दुर्गं ते
डुच्यते । [illegible] भावे [illegible] भूम
[illegible] । [illegible] वा
रि [illegible] दुर्गं [illegible] भवेत् । पत
यो [illegible] दुर्गं
दल [illegible] ॥ अन्य कृत्रिमं
दुर्गं कृत्वा नरपति विपत्र । रथ
[illegible] वैरीस्थल दुर्गं तदाचोत
[illegible] । जल दुर्गं न
[illegible] गिरि दुर्गं नृपः [illegible]
यस्य स्यादि विधो रिपुः ॥ सर्वो हि
त्रिविधो दुर्गः तथा सर्वप्रदिश्यते ॥
॥ ॥ ॥ ॥

प्रतिराजस्य राज्यान्ते प्रकटे युद्ध-
मेव च राज्यान्ते सैनिकान् रक्षेत्
प्रकटे निवसेत्तथा । गुप्ते मन्त्री को-
षसंभारं संरक्षेदिति निश्चयः ॥
अथ सामान्यतो युद्धानि । तथा
हि नीतिशास्त्रे सप्रवेशापसरणं
द्वन्द्व युद्धम उच्यते । अन्यत्र द्वन्द्वि
शालेव नतानि बहु शास्त्रेण ॥
पत्रद्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथै-
व च मनुष्यद्वन्द्वं संसर्गं वनद्वन्द्वञ्च ।
तानि चाष्ट अन्येन नद्वन्द्वं द्वन्द्व
मित्याह योद्धद्वन्द्वं प्रकीर्त्तितं ।
योद्धृ प्रत्यं हि यद्युद्धं मनकाय
समं द्विनत ॥ अथान्यत्रापि ।
यावत् प्रमाणं नगरं हि राज्ञां
ततो भवेदुत्तम मध्यमान्तं । त्रि-
शाजेत्स्याष्टगुणोत्तरेणाविशेषतो-
ऽपि परगोपितानां गणैस्तु । यदन्य
द्विविधं द्वन्द्वं प्रोच्यते परगो भूजो
। नेष्य एवातिरिच्यते मन्त्रद्वन्द्वं ।
विशेषतः । अन्येषु दैवाद्विजेषु ।
मन्त्र द्वन्द्वाद्जयेद्रुपः । मन्त्रद्वन्द्वे हि
भिन्ने हि न वास्त्यन्त् कार्य्यं कारकं
यदेव वैरि जलेषु विस्तीर्णे वि
षमेव तत् । सप्रवेशापसरणं न
युद्ध मुत्तमे विदुः । इति युक्तिकल्प
तरुः ॥

युद्धरंगः पुं कार्त्तिकेयः इति शब्द-
चन्द्रिका ॥
युद्धसारः पुं घोटकः इति शब्द-
चन्द्रिका ॥
युध य औ ङ युद्धे इतिकविकल्पद्रुम ।
स ऊ युध्यते । औ योद्धा । सं
मुखस्थितयो द्वयोः सांग्रामिक
रीत्या परस्पराभिभवेच्छा युद्धं
युध्यते योधः कदाचिदेकस्य स्व-
भाव विवक्षायां युध्यते योधः
परेण कदाचिदुन्नतेनापि युध्यते ।
वीरं राजा हंतीत्यर्थः यो भक्तो
पिंडस्य हननेन युध्येदिति अस्मा
द्भावे क्विपि न भिद्यतीति को ने
करोतीति कंज्ञादिन्वात् केवा
साध्यं । इति दुर्गादासः ॥
युधानः पुं क्षत्रियः इत्युणादि-
कोषः ।
युधिकः त्रि योद्धा युधशब्दात्स्विक
प्रत्ययेननिष्पन्नः ॥
युधिष्ठिरः पुं पांडवराजः स कुंती
गर्भेधर्माज्जातः । तत्पर्य्यायः ।
अजातशत्रुः २ शल्यारिः ३ धर्म
पुत्रः ४ अजमीढः ५ इति हेम
चंद्रः ॥
युध्मः पुं संग्रामः । धनुः । इति
मेदिनी । बाणः इत्युणादिकोषः ।

योद्धा । इति सिद्धांतकौमुद्या । उ-
णादिवृत्तिः । शेष संग्रामः
शरभः इतिसंक्षिप्तसारोणादि-
वृत्तिः ॥
युधीयः त्रि योद्धा युधधातो रीय
प्रत्ययेनिष्पन्नः ॥
युप य इर विमोहे । इतिकविक-
ल्पद्रुमः । विमोह आकुलीकरणं ।
य युप्यति । इर अयुपत् अयो-
पीत् । पुषादित्वात् ङ इत्यन्ये
इतिदुर्गादासः ॥
युयुः पुं अश्वः इतिहलायुधः
युयुत्सुः पुं धृतराष्ट्रपुत्रः इतिश
ब्दचंद्रिका ॥
युयुधानः पुं सात्यकिः यथा शै-
नेयस्तु शिने र्नप्ता युयुधानश्च सा
त्यकिः । इति त्रिकांडशेषः ॥
इंद्रः । क्षत्रियः । इति संक्षिप्त
सारोणादिवृत्तिः । योद्धा च ॥
युवगंडः पुं यूनोगंडस्थव्रणादिशे
षः वयस्फोटः इतिभाषा यथा
युवगंडो यवगंडः स्यात्तवयस्फोटा
ख्ये द्वयं । इतिशब्दरत्नावली ।
युवकः पुं युवा युवन् शब्दात्कप्र
त्ययेन निष्पन्नः ॥
युवयानिः पुं युवतीपतिः यथा
युवयानि र्युनयानि र्भूमिहः लिखिता

रिणः । रामो यस्तद्देवोद्दंतिकाल
कल्पलीमुखः ॥ इतिभट्टिः ।
युवतिः स्त्री प्राप्तयौवना तत्पर्य्या
युवती १ यः पूनी २ तरुणी ३ त
लनी ४ दिक्करी ५ धनिका ६ धनीका ७
मध्यमा ८ दृष्टरजाः ९ मध्यमिका १०
इतिशब्दरत्नावली । ईश्वरी ११
वर्ण्या १२ । इति हेमचंद्रः । व
यस्या १४ । इति राजनिर्घंटः ।
तस्यालक्षणादि यथा । आषोड
शाद्भवेद्बाला तरुणी त्रिंशता म
ता । पंच पंचाशतः प्रौढा वृद्धा
भवतितत्परं । इतिकाशीरामः
॥ बाला तु प्राणदा शोका
युवती प्राणहारिणी । प्रौढा क
रोति वृद्धत्वं वृद्धामरणमादिशेत्
नित्याच शरदो बाला प्रौढा
वर्षा वसंतयोः । हेमंते शिशिरे
योग्यान वृद्धाकापि शस्यते ।
योग्या युवती । इति राजवल्लभः
स्त्री सामान्यं । यथा प्रमदाचेति ।
द्वितीया युवतिश्च तथा स्मृतेति
भागुरिः प्राप्तयौवना युवति रिति
वात्स्यायनः । इत्यमरटीकायां ।
भरतः ॥ हरिद्रा इति शब्द
चंद्रिका ॥
युवतीष्टा स्त्री स्वर्णयूथिका इतिराज

निर्घंटः ॥ युवनाश्वः पुं सूर्य्यवंशीयराजविशेषः । सच गौरीगर्भे प्रसेनजितो जातः मांधातृपिता च । यथा । तस्याः प्रसेन जिज्जज्ञे लेभे भार्य्यां पतिव्रता गौरीनाम्नाभिशप्ता सा नदी भूता तरंगिणी । तस्यां प्रसेनजिज्जज्ञे युवनाश्वं महीपतिं । यावत् सूर्य्य उदेतिस्म यावच्च प्रतितिष्ठति सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते इति वह्निपुराणे सगरोपाख्याननाध्यायः ॥ युवनाश्वजः पुं मांधातृराजः इति हेमचंद्रः ॥ युवराजः पुं भाविवृद्धविशेषः तत्पर्य्यायः मैत्रेयः २ अजितः ३ इति त्रिकांडशेषः । राजपुत्रः । तत्पर्य्यायः कुमारः २ भर्तृदारकः ३ इत्यमरः । युवावासौ राजा यूनांवा राजा युवराजः सच्चद्धो राज इति षः कुमारयति कुमारः । स्यात्कुमारकुमालतक केलो अव भर्त्तृ दारकः पुत्रः भर्त्ताचासौदारकश्चेतिवा भर्तृदारकः दारको भेदके शिशाविति निगमः । इति भरतः ॥ युवा त्रि तरुणः श्रेष्ठः निसर्गबलशाली । इति मेदिनी । युवा पुं यौवनावस्था विशिष्टः । षोडशवर्षात्त्रिंशद्वर्षपर्य्यन्तवयस्कः इति केचित् । षोडशवर्षात् । सप्ततिवर्ष पर्य्यन्त वयस्कः यथा आषोडशाद्भवेद्बाल स्तरुणस्तत उच्यते वृद्धः स्यात् सप्तते र्ऊर्द्धं वर्षीयान् नवतेपर मिति भरतधृतस्मृतिः । तत्पर्य्यायः वयस्थः २ तरुणः ३ इत्यमरः । वयस्थः ४ तलुनः ५ इति शब्दरत्नावली । गर्भरूपः ६ वेटकः ७ इति जटाधरः ॥ युष भजने इति कविकल्पद्रुमः । सौत्रधातुरयं योषित युष्मद् । इति दुर्गादासः ॥ युष्मद् सर्वनामशब्दविशेषः तस्य त्रिषुलिंगेषु समानि रूपाणि यथा त्वं १ः युवां १ः यूयं १ः । त्वां २ युवां २ः युष्मान् २ः त्वया ३ युवाभ्यां ३ः युष्माभिः ३ः तुभ्यं ४ः युवाभ्यां ४ः युष्मभ्यं ४ः । त्वत् ५ः युवाभ्यां ५ः युष्मत् ५ः तव ६ः युवयोः ६ः युष्माकं ६ः त्वयि ७ः युवयोः ७ः युष्मासु ७ः इति व्याकरणं ॥

यूः स्त्री यूषः इति हेमचंद्रः ॥ यूकः पुं मत्कुणः इति जटाधरः यूका स्त्री मत्कुणः । यूनीइतिउकुण इतिच भाषा । तत्पर्य्यायः केशकीटः २ स्वेदजः ३ षट्पदः ४ इति राजनिर्घंटः पाली ५ बालकृमिः ६ । इति जटाधरः ॥ यूतिः स्त्री मिश्रणं इतिकुग्धबोधव्याकरणं ॥ यूथं क्ली सजातीयसमूहः इत्यमरः यूथनाथः पुं वन्यकरिणां समूहस्य ईश्वरः तत्पर्य्यायः । यूथपः २ इत्यमरः ॥ यूथपः पुं अरण्यहस्तिनाथप्रधाने इतिशब्दरत्नावली ॥ यूथभ्रष्टः पुं यूथात्पलायितहस्ती इति शब्दमाला ॥ यूथिका स्त्री याठा इतिराजनिर्घंटः । अम्लानकः इतिमेदिनी पुष्पविशेषः । जुइफल इतिभाषा तत्पर्य्यायः । गणिका २ अम्बष्ठा ३ मागधी ४ सा पीतारचेत् हेमपुष्पिका । इत्यमरः । यूथी ५ शद्रसेनी ६ इति त्रिकांडशेषः ॥ शिखंडिनी ७ वासंती ८ । इति रत्नमाला बालपुष्पिका ९ बहुगंधा १० भृंगानंदा ११ । अस्याः गुणाः स्वादुत्वं । शिशिरत्वं । शर्करादि पित्त दाह तृषा नाना त्वग्दोष नाशित्वंच । इतिराजनिर्घंटः । अपिच यूथी युगं हिमं तिक्तं कटुपाके मधुं रात्त गुरुं तुवरं हृद्यं पित्तघ्नं कफ वातलं ब्रणास्रमुख दन्ताक्षि शिरोरोग विषापहं । इति भावप्रकाशः ॥ यूथी स्त्री यूथिका इतिशब्दरत्नावली यूथीनः पुं यूथपः इतिशब्दचंद्रिका ॥ यूनिः स्त्री योगं मिश्रणं इति सिद्धांतकौमुदी ॥ यूनी स्त्री पृथ्वी । इतिशब्दरत्नावली यूपः पुं क्ली यज्ञेपशुबंधनकाष्ठं इत्यमरः तस्यपरिमाणादिर्य्या स्कंदो चतुर्हस्तो भवेद्यूपो यज्ञवृत्त समुद्भवः । बर्हिलः शोभनः स्थूलः कर्णको वृषमौलिकः । अथिषो विल्वस्य वकुलस्यैव कलौ यूपः प्रशस्यते । इतिसामवेदिवृषोत्सर्गतत्वं ॥ यूपः पुं जयस्तंभः । यागस्तंभः इत्युणादिकोषः ॥ यूपकटकः पुं यज्ञसमाप्तिस्तंभकंपशुबंधार्थं यज्ञभूमौ यज्ञकाष्ठमारोपणे स यूपः तस्य शिरसि ।

वलयाकृति ईमरकाकृतिर्वा यः काष्ठविकारः सः यूपमूले निहित लोहवलय इति केचित् । इति भरतः तत्पर्य्यायः कटकः २ इत्यमरः ॥
यूपकर्णः पुं यूपैकदेशः तत्पर्य्यायः चषालः २ इति हेमचंद्रः ॥
यूपद्रुः पुं खदिरवृक्षः इति शब्दचंद्रिका ॥
यूपद्रुमः पुं खदिरवृक्षः इति शब्दरत्नावली रक्तखदिरः इतिराजनिर्घंटः ॥
यूपलक्षः पुं पक्षी इति शब्दमाला ॥
यूपाग्रं क्ली यूपस्याग्रभागः तत्पर्य्यायः । तर्म २ इत्यमरः ॥
यूष वधे इतिकविकल्पद्रुमः षष्ठस्वरी यूषति इतिदुर्गादासः ॥
यूषं पु क्ली मुद्गादिक्वाथरसः इत्यमरः यूषोऽस्त्रस्यादिः चवर्गादिश्चेतिशुद्धः इति भरतः ॥
अथ मुद्गयूषगुणाः मुद्गयूषोऽग्निदोहघः मुद्गानामशितानामपि पथ्यो वलाघ पित्तघ्नो ज्वरघ्नश्च कृताकृतः सस्नेह लवणो सवंमहकृत कटुकैविना विलेयं लवणस्नेह कटुकैः संस्कृतं कृतं ॥ स तदा हिम मृद्वीका मुद्गःस्याद्रागषाडवः हृविहलघु पाकस्य दोषाणा मविरोपहत ॥ मसूरयूषगुणाः मसूरयूषः संग्राही हृदीस्याद्रः श्लेष्महजित् पित्त श्लेष्मज्वर हृत् स्तन्याजीसार नाशनः ॥ कुलस्थयूषगुणाः कुलस्थयूषोऽनिलहा शार्कराश्मरि नाशनः तूणीप्रतूणी कासार्शोगुल्मभेदः कफापहः ॥ अम्लेन सह माषयूषगुणाः अम्लमाषो गुरुर्भेदी वातघ्नो दीपनोमतः ॥ अथ खडयूषः । तक्रे कपित्थचांगेरी मरिचाजाजि चित्रकैः सुपक्वे खडयूषोऽयमयं काम्बलिकोऽपरः । खडकाम्बलिकयूषगुणाः दध्यम्लो लवणः स्नेहतिल माषविमिश्रितः खडकाम्बलिको यूषो ग्राहि वातकफापहौ इतिराजवल्लभः अपिच । अथ यूषस्य विधिर्गुणाश्च अष्टादश गुणो नीरसमो धान्यप्रमाणरसः विरलोद्रवतः किंचित् पेयातो यूष उच्यते ॥ उक्तः सएव निर्यूहो रुचिकृच्च विशेषतः । यूषस्य प्रकारांतरमाहुः कल्कद्रव्यपलं शुंठी पिप्पली चार्द्धकार्षिकी वारि प्रस्थेन विपचेत्तद्द्वो

यूष उच्यते । अथ सप्तर्षयूषाः पलमितं तत्कल्कीकृतं शुंठी पिप्पली च समादिताईकर्षमिता कल्कीकृता उभयमपि प्रस्थमितेन वारिणा पचेत् तद्वा यूष प्रवस्या . . . पाके रुक्षः करुः कफापहः । अथ मुद्गयूषविधिः हंटीकायां ततोतरे मुद्गानां द्विपलं तोये अत्र महोदकोऽन्मिते पादस्य महिंतं पूते दाडिमस्य पलेनतत् । शक्तं सैंधव विश्वाह्व धान्यकैः पादकार्षिकैः कणाजीरकयो चूर्णोऽक्षालोकना वचूर्णितं । संस्कृतो मुद्गयूषोऽयं पित्त श्लेष्महरो मतः ॥ अथ मुद्गयूष गुणाः मुद्गानां यूषमोमूषो दीपनः शीतलो लघुः ब्रणोद्रयत्न रुग्दाह कफ पित्त ज्वरापहन्त ॥ अथ मुद्गामलक यूषगुणाः मुद्गामलक यूषस्तु भेदी पित्ता निलापहः तट्दाहशमनः शीतो मूर्च्छा श्रम मदापहः ॥ मसूरयूष गुणाः पूर्ववत् इतिभावप्रकाशः ॥
यूषः पुं ब्रह्मदारुवृक्षः इतिशब्दरत्नावली ॥
येष क ड॰ यत्ने इतिकविकल्पद्रुमः संतस्यादिः । ङ अपिषेषत् ङ ये षते पिपेषे । इतिदुर्गादासः ।
योक्त्रं क्ली युगेनसहवृषस्कंधस्याव ध्यते अनेनेतत् योक्तृ अदि इति भाषा तत्पर्य्यायः । आवंधः २ योत्रं ३ । इत्यमरः ॥
योक्त्रा स्त्री योगकर्त्री इति युज्यातोः कर्त्तरि तृन् प्रत्ययेन निष्पन्नं ॥
योगः पुं सन्नहनः ॥ उपायः ध्यानं । संगतिः । युक्तिः । इत्यमरः अपूर्वार्थसंप्राप्तिः । वपुः स्थैर्य्य प्रयोगः । विष्कम्भादिः भेषजं विश्वस्तघातकः । द्रव्यं । कार्मणं इतिमेदिनी । नैयायिकः धनं इति हेमचंद्रः ॥ चारः । सूत्रं । इति त्रिकांडशेषः ॥
अथसप्तविंशतियोगानां नामानि यथा विष्कम्भ प्रीति रायुष्मान् सौभाग्यः शोभन स्तथा अतिगंडः सुकर्माधृतिः शूलस्तथैव च गंडो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षण स्तथा, वज्रस्सिद्धव्यतीपातो वरीयान्परिघः शिवः ॥ सिद्धः साध्यः शुभः शुक्लो ब्रह्मेंद्रो वैधृति स्तथा ॥ तेषां वर्जनीय भागा यथा परिघस्य तावे

द्वंद्वं शुभकर्मततः परं त्वज्यौ ।
पंच विष्कम्भे सप्त शूले च नाडिकाः
गंडव्याघातयोः षट् च नव हर्षण
वज्रयोः वैधृति व्यतीपातौ च
समस्तौ परिवर्जयेत् ॥ दुष्टयोगा
र्थनामानो योगाः कार्येषु योग्या
नाः ॥ आनन्दयोगो यथा
भीम पराक्रमे अश्विनी हस्तस्थे
ण सोमे मृगशिर स्तथा अश्लेषा
भौमवारेण उपेहस्तः प्रकीर्त्तितः
अनुराधा गुरौ वारे विश्वदेवस्त
भार्गवे वारुणं शनि संयुक्तमान
न्दोऽयं प्रकीर्त्तितः ॥ योग
वरा यथा वापिकायां भूमि उ
त्तार्कयो रक्षि नंदा मकद्वारुणं
हीन्द्र विज्ञादि मूलाग्निभिः भार्ग
वेणांकयो रक्षि भद्राभवेन्नफल्
गुन्योत्तु संज्ञा सोमपुत्रस्य वा
रे जयास्यान्मैत्रेंद्रगर्विद्र या
म्यादि निद्राग्निभिः मीक्षन्ते रक्षि
रिक्ताच पूर्णा यदाश्विस्वशाक्ता ।
त्रियुक् पित्रादिरक्षुभिः सूर्य्यस
तस्मादिने यदि पूर्णा भवत्तिनापि
पतिद्वविनोः स्यात् योगवशाद्धिभिरेव
सेमनाः सर्वसमीहित सिद्धि निय
ताः स्वयमेव अमृत योगः ॥
अथामृतयोगः अवगुरुकर मूला

पौसम्भान्यर्कवारे हरिशुग विधि
युग्मे फल्गुनी भाद्रयुग्मे दिवसकर
सूनौ सर्वदीन्दावारे गुरुयुगमनल
वाधेयान्म पौष्णानि कौजे ॥
इन्दून् विधि शनाख्या मैत्रभं सौ
म्यवारे गरुदहिनिभशुभा मैत्रभ
जीववारे भगशुगजयुगेष्वा विश्व
मैत्रे सितान्हे श्रवण कमलयोनी
सौरि वारेऽमृतानि । यदि विहि
तानीपातो दिनं वाप्यशुभं भवेत्
तस्मिन्नेऽमृतयोगेन भास्करेण न
श्यथा सर्वदेषा विशेषेण फलं
स्याच्छुभयोगजं । अथ सिद्धियो
गस्य पंचकस्मिन् दिने भवेत् ।
तद्दिनं तु भवेत् शुभं मधुसर्पिर्यथा
विषं ॥ अथ सिद्धिदग्ध याम
यमघंट योगाः यथा नंदाद्याः
सिद्धियोगा भृगुजकुजार्कीज्य ।
वारैः प्रशस्ताः सूर्य्ये प्राणमिषह
हस्तानि सिनशिथ्योर्कादि वारैः
प्रदग्धाः राजमार्त्तण्डे । भास्त्रा ह
स्तादिशो रामा सहपक्षगुनयस्तथा
दृष्टिने निषयः समरव्याहितमसि
ग्रहैः । अपिच द्वादश्यर्के युता
भवेदग्धभता सोमेन चैकादशी
भौमे वापि भूतानयैव दशमी ।
नेसा नतीया बुधे । षष्ठीनेष्टफल

ऽशा सप्तमे शुक्रे द्वितीयानथा
सार्वी रंभ विनाशा विघ्नजननी स
र्वात्मने सप्तमी । पापोर्कादि दि
नात्वाद्वय यम सुहृद्यस्याकि चित्रा
न्तकं नाय विश्वाभिजिदं नय
कुज दिवसे सत्रयं विष्णु रुद्रौ
ज्ञाहे मूला विशाखा यमयन नर
गान्याानि मैत्रैकिपिर्त्र रोहिण्या
श्री यमेंद्रस्थानभ मघ भृगो रक्षि
पुष्पा ज्येष्ठौ सौराहे हस्त पु
ष्पार्थ्यम जलशुक पौस पुष्या
पनानि चैंगोऽवेद्दतयुक्ते स्वगृह
पतिदिने सौम्यवारेऽप्यमापि ॥
अथान् पादादि योगाः । र
व्यादि दिवसे धुक्का विशाखादिचत
स्त्रः उत्पाता मृत्युवःकाणा अ
मृतानि यथा क्रमं ॥ अथकर
कचायोगः वानिविज्ञान्यथाप्रा ।
मूल पाशीन्यु भौनकाः सूर्य्यादि
वार संयुक्ता योगाः करकचाः स्मृ
ताः अथामृतयोगाः आदित्य
भौमयो र्नंदा भद्राशुक्रशशांक
योः । बुधे जया गुरौ रिक्ताशनौ
पूर्णाच मृत्युदा ॥ अथयमघंटा
दीनां वर्ज्यकाल निर्णयः यमघंटे
त्यजेदष्टौ मृत्यौ द्वादश नाडिकाः
अन्येषां पापयोगानां मध्या


ह्नात् परतः शुभं । अथ शुभ
चंद्रेण करकचादि शांतिः यथा ।
गेगुच सर्वेषु पूर्वयामं परित्यजेत्
अयोगास्त्र विनश्यंति चंद्र शुद्धि
हता ततो करकचा मृत्युयोगाश्च
दिनं दुर्यनयायो शुभे चंद्रे
प्रणश्यंति तुला वज्रनारव ।
विरुद्ध योगानां देशविशेषे प्रति
प्रसवो यथा । श्रीपतिः विरुद्ध
संज्ञा स्तिथिवार योगानक्षत्र वार
प्रभवाश्च ये वे । हूनांगवंगेषु ख
शेषु वर्ज्याः शेषेषु देशेषु नते
विरुद्धाः । इतिज्योतिस्तत्वं ॥
। अथक्रियायोगः ।
तुनय कृजः कः व्याप्त नमाः उरु
षाः आप्रवस्त भक्तालयं उजरेषुभे
व्याख्योगिं तथा त्वमवविनय इत्य
कः स तदाशाह क्रियायोगमद्य
मर्थी तदाप्य गुपकारायदःखेपि
क्षितिकारक बक्रिरुवाच आरा
धनांचे विश्वेश जगतां कारणोप
रं केशव तत्रियायेदां एवक्रूमंप
यास्याय । इत्था पूजा नमस्कारैः
शुश्रूषाभि रहर्निशं ज्ञेनोपचारै
सिद्धिये औन्मानीवच नमोदितः । तै
है स्नान्सिद्धौ भी येस्वेच तस्मिन्
सिद्धाः भवेषु रथार्थिच्छेदासारा ॥

यदन्न केशवं । तद्विशुद्धस्तथा
पियस्तत् कर्म्माणि सदाश्रयाः तद्दृष्ट
यत्नस्तन्नरः सर्व्वस्मिंस्तु इति श्रितेः
समस्तान्यपि कर्म्माणि तदर्थानि तदा
त्मनि संन्यस्य वै भवः कर्त्तास्म
स्मावरणक्षयः । परः पराणां परमः
स एको नरोत्तमो दृष्ट्वा इव मित्रे
चराचरं द्विगमिदं समन्तात् चिन्त
रूपेण परिग्रहं यत् तमाराध्य
जगन्नाथं क्रियायोगेन वाडवाः
अस्मै मोक्षं परं जग्मुस्तस्मात्त्वमा
ह कारणं संसारार्णवमग्नानां ।
विषयाक्रान्तेन चेतसा विलयोन्नं ।
विना नाम्नत् किंचित् स्तित्परायणं
उत्तिष्ठ चिन्तय हरिं ब्रजंश्चिन्तय
केशवं । भुञ्जंश्चिन्तय गोविन्दं ।
स्वपंश्चिन्तय माधवं रूपमेकाग्रा
चित्ता हि संस्थिता मधुसूदने न
त्वमृत्युजराग्राहे संसारे मनरिष्य
सि । क्रियायोगपराणां मुक्तिका
र्य्यां पनेकशः समाराध्य जगन्ना
थं राजानो मोक्षमाप्नुयुः ॥ इति
वह्निपुराणं ॥ ॥

॥ अथ योगसाधनं ॥

केशिध्वज उवाच योगस्वरूपं खा
ण्डिक्य श्रूयतां गदतो मम यत्र स्थि
तो न च्यवते प्राप्य ब्रह्मलयं मुनिः ।
मन एव मनुष्याणां कारणं बन्धमो
क्षयोः । बन्धस्य विषयासङ्गि मुक्ते
र्निर्व्विषयं तथा । विषयेभ्यः समा
हृत्य विज्ञानात्मा मनो मुने । चिन्त
येन्मुक्तये तेन ब्रह्मभूतं परेश्वरं ।
आत्मभावं नयत्येवं तद्ब्रह्मध्यायि
नं मुने । विकार्य्यमात्मनः शक्त्या लो
हमाकर्षको यथा । आत्मप्रयत्न
सापेक्षा विशिष्टा या मनोगतिः त
स्या ब्रह्मणि संयोगो योग इत्य
भिधीयते । एवमत्यन्तवैशिष्ट्य
युक्तधर्म्मोपलक्षणः यस्य योगः स
वै योगी मुमुक्षुरभिधीयते योग
युक् प्रथमं योगी युञ्जानः सो
ऽभिधीयते विनिष्पन्नसमाधिस्तु
परब्रह्मोपलब्धिमान् यद्यन्तराया
दोषेण दूष्यते चास्य मानसं जन्मा
न्तरैरभ्यसतो मुक्तिः पूर्व्वस्य जायते
विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव
जन्मनि प्राप्नोति योगी योगाग्नि
दग्धकर्म्मचयोऽचिरात् ब्रह्मच
र्य्यमहिंसाञ्च सत्यास्तेयापरिग्रहा
न् सेवेत योगी निष्कामो योग्यतां
स्वं मनो नयन् । स्वाध्यायशौचस
न्तोषतपांसि नियतात्मवान् कु
र्व्वीत ब्रह्मणि तथा परस्मिन् प्रवणं
मनः एते यमाः सनियमाः पञ्च

पञ्च प्रकीर्त्तिताः विशिष्टफलदाः
काम्या निष्कामानां विमुक्तिदाः ।
एकं भद्रासनादीनां समास्थाय
गुणैर्युतः यमाख्यैर्नियमाख्यैश्च यु
ञ्जीत नियतो यतिः प्राणाख्यमनिलं
वश्यमभ्यासात् कुरुते तु यत्
प्राणायामः स विज्ञेयः सबीजोऽ
बीज एव च । परस्परेणाभिभवं प्रा
णापानौ यदानिलौ कुरुतः सद्वि
धानेन तृतीयः संयमात्तयोः तस्य
चालम्बनवतः स्थूलरूपं द्विजोत्तम
आलम्बनमनन्तस्य योगिनोऽभ्य
सतः स्मृतं ॥ । शब्दादिष्वनुरक्ता
नि निगृह्याक्षाणि योगवित् कुर्य्या
च्चित्तानुकारीणि प्रत्याहारपराय
णः वश्यता परमा तेन जायतेऽति
चलात्मनां इन्द्रियाणामवश्यैस्तैर्न
योगी योगसाधकः । प्राणायामेन
पवनैः प्रत्याहारेण चेन्द्रियैः । व
शीकृतैस्ततः कुर्य्यात् स्थितं चेतः
शुभाश्रये खाण्डिक्य उवाच
कथ्यतां मे महाभाग चेतसो यः
शुभाश्रयः । यदाधारमशेषं तद्धं
ति दोषफलोद्भवं केशिध्वज उ
वाच आश्रयश्चेतसो ब्रह्म द्विधा
तच्च स्वभावतः भूप मूर्त्तममूर्त्तञ्च
परञ्चापरमेव च । त्रिविधा भावना
विप्र विश्वमेतन्निबोधतः । ब्रह्माख्या
कर्म्मसंज्ञा च तथा चैवोभयात्मि
का । ब्रह्मभावात्मिका ह्येका कर्म्म
भावात्मिका परा उभयात्मिका त
थैवान्या त्रिविधा भावभावना सन
न्दनादयो ब्रह्मभावभावनया युताः
कर्म्मभावनया चान्ये देवाद्याः स्था
वराश्चराः हिरण्यगर्भादिषु च ब्रह्म
कर्म्मात्मिका द्विधा बोधाधिकारयु
क्तेषु विद्यते भावभावना । अक्षी
णेषु समस्तेषु विशेषज्ञानकर्म्मसु
विश्वमेतत् परं चान्यद्भेदभिन्न
दृशां नृप । प्रत्यस्तमितभेदं
यत् सत्तामात्रमगोचरं । वचसा
मात्मसंवेद्यं तज्ज्ञानं ब्रह्मसं
ज्ञितं । तच्च विष्णोः परं रूपम
रूपस्याजमक्षरं । विश्वस्वरूपवै
रूप्यलक्षणं परमात्मनः । न त
द्योगयुजा शक्यं नृप चिन्तयितुं
यतः । ततः स्थूलं हरे रूपं चिन्त्यं
यद्विश्वगोचरं । हिरण्यगर्भो भग
वान्वासवोऽथ प्रजापतिः ।
मरुतो वसवो रुद्रा भास्करास्तार
का ग्रहाः गन्धर्व्वयक्षदैत्याद्याः
सकला देवयोनयः । मनुष्याः प
शवः शैलाः समुद्राः सरितो द्रुमाः
भूपभूतान्यशेषाणि भूतानां ये



वहेतवः । प्रधानादि विशेषान्तं
चेतनाचेतनात्मकं । एकपादं
द्विपादं च बहुपादमपादकं । मूर्त्त
मेतद्धरे रूपं भावनात्रितयात्मकं
एतत्सर्वमिदं विश्वं जगदेतच्चरा
चरं । परंब्रह्मस्वरूपस्य विष्णोः
शक्तिसमन्वितं । विष्णुशक्तिःपरा
प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा
अविद्या कर्मसंज्ञान्या तृतीया श
क्तिरिष्यते । ययाक्षेत्रज्ञ शक्तिः
सा वेष्टिता नृप सर्वगा । संसार
तापनखिलानवाप्नोत्यतिसंततान्
तयातिरोहितत्वाच्च शक्तिः क्षे
त्रज्ञसंज्ञिता सर्वभूतेषु भूपाल
तारतम्येन लक्ष्यते अप्राणवत्
सुस्वल्पास्वा स्थावरेषु ततोऽधिका स
रीसृपेषु तेभ्योऽपि अतिशक्त्या
पतत्रिषु पतत्रिभ्यो मृगास्तेभ्यः
स्वशक्त्या पशवोऽधिकाः पशु
भ्यो मनुजा श्चातिशक्त्या पुंसः
प्रभाविताः तेभ्योऽपि नाग ग
न्धर्व यक्षाद्या देवतानृप शक्रः
समस्त देवेभ्य स्ततश्चाति प्रजाप
तिः हिरण्यगर्भोऽपिततः पुंसः
शक्त्युपलक्षितः एतान्यशेष रू
पस्य तस्यरूपाणि पार्थिव । यत
स्तच्छक्ति योगेन युक्तानि नभसायथा

द्वितीयं विष्णु संज्ञस्य योगिध्येयं ।
महामते अमूर्त्तं ब्रह्मणोरूपं यत
सदित्युच्यते बुधैः समस्ताः शक्तय
श्चैता नृप यत्र प्रतिष्ठिताः । तद्वि
श्वरूप रूपं वै रूपमन्यद्धरे र्महत
समस्त शक्तिरूपाणि तत् करोति।
जनेश्वर देव तिर्य्यङ् मनुष्यादि
चेष्टावंति स्वलीलया जगता मुप
काराय न साकर्मनिमित्तजा चेष्टा
तस्याप्रमेयस्य व्यापिन्यव्याहता ॥
त्मिका तद्रूपं विश्वरूपस्य तस्य
योगयुजो नृप चिन्त्य मात्म विशु
द्ध्यर्थं सर्वकिल्बिष नाशनं यथाग्नि
रुद्धत शिखः कक्षं दहति सानिलः
तथाचित्तस्थितो विष्णु र्योगिनां।
सर्वकिल्बिषं तस्मात्समस्तशक्ती
नामाधारे तत्र चेतसः कुर्वीता।
संस्थितं सातु विज्ञेया शुद्धधारणा
शुभाश्रयः सचित्तस्य सर्वगस्य त
थात्मनः । त्रिभाव भावनातीतो।
मुक्तये योगिनां नृप । अन्यचपु
रुषव्याघ्र चेतसो ये व्यपाश्रयाः ॥
अशुद्धास्ते समस्तास्तु देवाद्याः क
र्मयोनयः मूर्त्तं भगवतो रूपं सर्वा
पाश्रय निस्पृह । एषावै धारणा
ज्ञेया यच्चित्तं तत्र धार्य्यते । तच्च।
मूर्त्तं हरेरूपं यादृक् चिंत्यं नरा

धिप तच्छ्रूयतां अनाधारा धार
णा नोपपद्यते । प्रसन्न चारुवदनं
पद्मपत्रायतेक्षणं । सुकपोलं।
सुविस्तीर्ण ललाटफलकोज्ज्वलं
सम कर्णान्त विन्यस्त चारुकर्णवि
भूषणं कम्बुग्रीवं सुविस्तीर्ण श्री व
त्साङ्कितवक्षसं वलीत्रिभंगिनामग्न
नाभिना चोदरेणवै । प्रलम्बाष्टभुजं
विष्णु मथवापि चतुर्भुजं । सम
स्थितोरु जंघं च सुस्थितांघ्रि करा
म्बुजं । चिन्तयेद्ब्रह्मभूतं तं पीत
निर्मल वाससं किरीट चारुकेयू
रकटकादि विभूषितं । शार्ङ्गशं
खगदा खड्ग चक्राक्षवलयान्वितं
चिंतयेत्तन्मयो योगी समाधायात्म
मानसं । तावद्यावद्दृढीभूतातत्रै
व नृप धारणा व्रजतस्तिष्ठतोऽन्य
द्वा स्वेच्छया कर्म कुर्वतः नापयाति
नदा चित्तात् सिद्धां मन्येत तां
तदा । ततः शंखगदा चक्रशार्ङ्गा
दिरहितं बुधः । चिंतयेद्भगवद्रूपं
प्रशांतं साक्षसूत्रकं । सायदा धा
रणा तद्वदवस्थानवती ततः किरी
टकेयूर मुखै र्भूषणै रहितं स्मरेत्
तदेकावयवं देवं चेतसापि पुन
र्बुधः कुर्यात्ततोऽवयविनि प्रणि
धान परो भवेत् तद्रूप प्रत्ययेन

चैक संतति श्चान्य निस्पृहा। त
ध्यानं प्रथमै रंगै षड्भि र्निष्पा ।
द्यते नृप । तस्यैव कल्पनाहीनस्व
रूपग्रहणं हि यत् । मनसाध्यान
निष्पाद्यं समाधिः सोऽभिधीयते
विज्ञानं प्रापकं प्राप्ये परे ब्रह्म
णि पार्थिव । प्रापणीयस्तथैवात्मा
प्रक्षीणाशेष भावनः । क्षेत्रज्ञः
करणी ज्ञाने करणं तेनतस्यतत्
निष्पाद्य मुक्ति कार्य्यं वै कृत कृ
त्यं निवर्त्तते । तद्भाव भावमापन्न
स्ततोऽसौ परमात्मना । भवत्य
भेदी भेदश्च तस्याज्ञानकृतो भ
वेत् विभेदजनकेऽज्ञाने नाश
मात्यन्तिकं गते आत्मनोब्रह्मणो
भेद मसंतं कः करिष्यति इत्युक्त
स्तेभ्यो योगः खांडिक्य परिपृच्छ
ते इति विष्णुपुराणे ६ अंशे ७
अध्यायः ॥ ॥ ॥ ॥
ब्रह्मकृतयोगो यथा ॥
सुखं योगासनं कृत्वा बध्वा सं
पुटांजलिः पुलकांकित सर्वांगः
साश्रुनेत्रो ऽतिदीनवत् । इडां
सुषुम्नां मध्यां च पिंगलां नलिनीं
पुरां नाडीषट्कं च योगेन निरुध्य
च प्रयत्नतः ॥ मूलाधारं स्वाधिष्ठानं
मणिपूर मनाहतं । विशुद्धं परमा

त्ताख्यं षट्चक्रंच निरुध्य वलंवनं
कारयित्वा चतं षट्चक्रं क्रमाद्धियिः
ब्रह्मरंध्रे समानीय वायुवद्धं चकार
ह निरुध्य वायु मुध्यौना मानीय
हृदयाम्बुजे तंवायुं भ्रामयित्वा च
योजयामास चेष्टया । एवंकृत्वा
तु निर्वाणे योदत्तो हरिणा पुरा
तज्जाप परमं मंत्रं तंतसैका द
शाक्षरं भो जैव जपंकृत्वा ध्या
ये ध्यायं पदाम्बुजे ददर्शहृदया
म्भोजे सर्वतेजोमयं मुने ॥
तेजस्तोऽन्तरे रूप मतीव सम
नोहर द्विभुजं मुरलीहस्तं सुषि
ते पीतवाससा । ईषतिमूल स्यल
स्यल ज्वलन्मकरकुंडले ईषद्धास्य
प्रसन्नास्य भक्तानुग्रह कातरं ।
नवीन जलदाकार श्यामसुंदरवि
ग्रहं स्थितं मेवषु सर्वेषु निर्लिप्तं
साक्षि रूपिणं स्वात्मारामं पूर्ण
कामं जगद्व्यापि जगत्परं । सर्व
स्वरूपं सर्वेषां वीजरूपसनातनं
सर्वाधारं सर्ववरं सर्वशक्तिसम
न्वितं सर्वाराध्यं सर्वगुरुं सर्वम
गल कारणं । सर्वमंत्रे स्वरूपंच
सर्वसंपत्करं वरं । यद्दृष्टं ब्रह्म
रंध्रेच हृदि तद्ददृ देवं दृष्टाच
परमाश्चर्यं तष्टाव परमेश्वरं ।

इतिब्रह्मवैवर्त्ते श्रीकृष्णजन्मखंडे
२ अध्यायः ॥ ॥

। अथ ध्यानयोगः ॥

हरिरुवाच । अथयोगं प्रवक्ष्यामि
भुक्तिमुक्तिकरं परं । ध्यायिभिः
ध्यायते ध्येयो ध्यानेन हरिरी
श्वरः तत्स्वरूपं महेशान सर्वपा
प विनाशनं । विष्णुः सर्वेश्वरोऽन
न्तो षड्भिर्परिवर्जितः । वासुदे
वो जगन्नाथो ब्रह्मात्मा अहमेव त
देहि देहस्थितो नित्यः सर्वदेह
विवर्जितः देहधर्म विहीनश्च त
त्तत्र विवर्जितः तद्धर्म रहितः
स्रष्टा नाम गोत्र विवर्जितः मंत्रा
मनस्थितो देवो मनसा परिवर्जि
तः । मनोधर्मविहीनश्च विज्ञाना
द्यपवर्जः । वोद्धा बुद्धिस्थितः
साक्षी सर्ववोध विवर्जितः बुद्धि
धर्म विहीनश्च सर्वः सर्वगतोऽम
लः सर्वपापविनिर्मुक्तः प्राणधर्म
विवर्जितः प्राणप्राणो महाशान्तो
भयेन परिवर्जितः । अहंकारादि
हीनश्च तद्धर्म परिवर्जितः तत्
साक्षी त्वत्रियंताव परमानंदरूप
कः जाग्रत्स्वप्नसुषुप्तश्च मत
साक्षी तद्विवर्जितः तुरीयः परमो
धाता दृग्रूपो गुणवर्जितः मुक्तो

बुधो ततव्यापी सत्य ज्ञानात्मको हं
शिवः एवं ये मानवा विष्णु ध्याये
ती शा परं पदं ॥ यस्य प हृच
तद्रूपं नात्रकार्या विचारणा । इति
ध्यानं मया ख्यातं तवशोकरसत्त
प्रहेय पतन्तु सततं विष्णुलोकं ।
लभतेति इतिगारुडे ४७ अध्यायः
॥ अथाष्टांगयोगः ॥

मुक्तिरष्टांग विज्ञानात् संक्षेपा
त्तद्वदे शृणु । यमाः पंचत्वहिंसाद्या
अहिंसा प्राणपहिंसनं ॥ सत्य
भूत हितं वाक्य मस्तेयं स्याग्रहंप
रं अमैथुनं ब्रह्मचर्यं सर्वे त्या
गो ऽपरिग्रहः नियमाः पंच स
त्याद्या वाह्य माभ्यंतरं द्विधा
शौचं तद्विश्व संतोष स्तपश्चेंद्रिय
निग्रहः स्वाध्यायः स्यान्मंत्र जापः
प्रणिधानं हरेर्यजिः आसनं पद्म
काद्युक्तं प्राणायामो मरुज्जयः ।
मंत्रध्यान युतो गर्भो विपरीतो
त्वगर्भकः । अगर्भात्तु सगर्भस्त्वःप्रा
णायाम स्ततोऽधिकः । एवंद्विधा
त्रिधाप्युक्तः पूरणात् पूरकः सव
कुम्भको निश्चलत्वात्स रेचकश्च
कत्रिधा । लघुर्द्वादश मात्रःस्याच्च
तुर्विंशतिकः परः मध्यविंशात्मा ।
त्रिकः श्रेष्ठः प्रत्याहारश्च रोधनं ।

ब्रह्मात्म चिंताध्यानं स्यात् धारणा
मनसो धृतिः । अहंब्रह्मेत्यवस्था
न समाधि ब्रह्मणः स्थितिः । अह
मात्मा परं ब्रह्म सत्यं ज्ञान मन
न्तकं । विज्ञान मानंदो ब्रह्म सत्
त्वमसि केवलं । अहं ब्रह्मास्मि ।
ब्रह्म अशरीर मनिंद्रियं । अह
मनो बुद्धि महदहंकारादि वर्जितं
। जाग्रत् स्वप्नसुषुप्त्यादि मुक्तं ज्यो
तिस्तदीयकं । नित्यं शुद्धं बुद्धिमु
क्तं सत्यमानंद मद्वयं । यो ऽसा
वादित्य पुरुषः सो ऽसावहमखंड
ॐ इतिध्यायन् विमुच्येत ब्राह्मणो
भवबंधनात् ॥ इतिगारुडे ४८
अध्यायः ॥ अपिच पतन्ते
कथितं ज्ञानं योगेचैव निबोध
मे ये साध्य ब्रह्मणा योगी साक्षा
त् तन्मयतां व्रजेत् । प्राणान्नेवा
त्मना ज्ञेयो योगिनामहि जर्जयः
कुर्वीत तज्जये यत्नं तस्योपायं शृ
णुष्व मे । प्राणायामो ईदृशोदानाः
धारणाभिश्च किल्विषं प्रत्याहारेण
संसर्गान् ध्यानेनानीश्वरान् गुणान्
यथा पर्वत धातूनां ध्मातानां दह्य
ते मलं तथेन्द्रिय कृता दोषा ।
दह्यंते प्राणनिग्रहात् ॥ प्रथमं ।
साधनं कुर्याद् प्राणायामस्य योगः ।

विना प्राणायाम निरोधस्तु प्राणा-
याम उदाहृतः । लघुमध्योत्तरी-
याख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदलर्क शृणु-
ष्व मे । लघुर्द्वादशमात्रस्तु द्विगुणः
स तु मध्यमः । त्रिगुणाभिश्च मात्राभि-
रुत्तरीय उदाहृतः । निमेषोन्मेष-
णो मात्रा तालो लघ्वक्षरो मनः ।
प्राणायामस्य संख्यार्थं स्मृतो द्वा-
दशमात्रकः । प्रथमेन जयेत् स्वेदं
मध्यमेन तु वेपथुं । विषादं हि
तृतीयेन जयेद्दोषाननुक्रमात् ॥
मृदुत्वं सेव्यमानास्तु सिंह शार्दूल-
कुञ्जराः । यथा यान्ति तथा प्राणो
वश्यो भवति योगिनः । वश्यं मत्तं
यथेच्छातो नागं नयति हस्तिपः ।
तथैव योगी च्छन्देन प्राणं नयति
साधितं । यथा हि साधितः सिंहो
मृगान् हन्ति न मानवान् । तद्वन्निषि-
द्धः पवनः किल्बिषं न नृणां तनुं ।
तस्माद्युक्तः सदा योगी प्राणायाम-
परो भवेत् । श्रूयतां मुक्ति फलदं
तस्यावस्था चतुष्टयं । ध्वस्तिः प्राप्ति-
स्तथा संवित् प्रसादश्च महीपते ।
स्वरूपं शृणु चैतेषां कथ्यमानम-
नुक्रमात् । कर्मणामिष्ट दुष्टानां
जायते फल संक्षयः । चेतसो

विकषायत्वं यत्र सा ध्वस्ति रुच्यते ।
ऐहिकामुष्मिकान् कामान् लोभ-
मोहात्मकांस्तथा । निरुध्य ते-
ष्टदा योगी प्राप्तिः सा सार्वकामिकी ।
अतीतानागतानर्थान् विप्रकृष्टति-
रोहितान् । विजानातीन्दु सूर्यर्क्ष-
ग्रहाणां ज्ञान संपदा । तुल्य प्रभा-
वस्तु यदा योगी प्राप्नोति संविदं
तदा संविदिति ख्याता प्राणा-
यामस्य साधितः । यान्ति प्रसादं
येनास्य मनः पञ्च च वायवः । इन्द्रि-
याणीन्द्रियार्थाश्च स प्रसाद इति स्मृतः ।
शृणुष्व च महीपाल प्राणायामस्य ।
लक्षणं युञ्जतश्च यथा योगं या-
दृग्विधं तु मानसं । सममर्द्धासने
वापि तथा स्वस्तिक मानसं । आ-
स्थाय योगी युञ्जीत कृत्वा च प्रणवं
हृदि । समः समासनो भूत्वा संहृत्या-
चरणावुभौ । संवृतास्यस्तथा चोरू
सम्यग्विष्टभ्य चाग्रतः । पार्ष्णिभ्यां
लिङ्ग वृषणावस्पृशन् प्रयतः स्थितः ।
किञ्चिदुन्नामित शिरा दन्तैर्दन्तान्न
संस्पृशेत् ॥ संपश्यन्नासिकाग्रं स्वं
दिशश्चानवलोकयन् । रजसा
तमसो वृत्तिं सत्त्वेन रजसस्तथा ।
संछाद्य निर्मले सत्त्वे स्थितो यु-
ञ्जीत योगवित् । इन्द्रियाणीन्द्रिया-

र्थेभ्यः प्राणादीन् मन एव च नि-
गृह्य समवायेन प्रत्याहार मुपक्र-
मेत् । यस्तु प्रत्याहरेत् कामान्
कूर्मोऽङ्गानीव सर्वशः । सदात्मा-
रतिरेकस्थः पश्यत्यात्मानमात्मनि ।
स बाह्याभ्यन्तरं शौचं निष्पाद्या-
कण्ठनाभितः । पूरयित्वा बुधो देहं
प्रत्याहार मुपक्रमेत् । प्राणाया-
मा दश द्वौ च धारणा साभिधीयते ।
द्वे धारणे स्मृते योगो योगिभि-
स्तत्त्वदर्शिभिः तथा वै योगयुक्त-
स्य योगिनो नियतात्मनः । सर्वे
दोषाः प्रणश्यन्ति स्वस्थश्चैवोपजा-
यते वीक्षते च परं ब्रह्म प्राकृतांश्च
गुणान् पृथक् व्योमादि परमा-
णुञ्च तथात्मानमकल्मषं । इत्थं
योगी मिताहारः प्राणायामपरा-
यणः । जितां जितां शनैर्भूमि-
मारोहेत यथा गृहं । दोषान्
व्याधिं तथा मोहमाक्रान्ता भूरनि-
र्जिता विवर्द्धयति नारोहेत् तस्मा-
द्भूमिमनिर्जितां । प्राणानामुपसं-
रोधात् प्राणायाम इति स्मृतः ।
धारणेत्युच्यते चेयं धार्य्यते यन्मनो
ऽनया । शब्दादिभ्यः प्रवृत्तानि यद-
क्षाणि यतात्मभिः । प्रत्याह्रियन्ते
योगेन प्रत्याहारस्ततः स्मृतः । उ-

पायश्चात्र कथितो योगिभिः प-
रमर्षिभिः । येन व्याध्यादयो दो-
षा न जायन्ते हि योगिनः । यथा
तोयार्थिनस्तोयं यन्त्रनालादिभिः
शनैः । आपिबेयुस्तथा वायुं पि-
बेद्योगी जितश्रमः । प्राङ्नाभ्यां हृ-
दये चाथ तृतीयाच तथोरसि ।
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्य-
मूर्द्धसु । किञ्चित्तस्माच्च परस्मिंश्च
धारणा परमा स्मृता दशैता धार-
णाः प्राप्य प्राप्नोत्यक्षरसाम्यतां ।
नाध्मातः क्षुधितः श्रान्तो न च व्या-
कुलचेतनः । युञ्जीत योगं रा-
जेन्द्र योगी सिद्ध्यर्थमात्मनः । ना-
तिशीते न चैवोष्णे द्वन्द्वे नानि-
लात्मके ॥ कालेष्वेतेषु युञ्जीत
न योगं ध्यानतत्परः । स शब्दे-
ऽग्निजलाभ्यासे जीर्णे गोष्ठे चतु-
ष्पथे । शुष्कपर्णचये नद्यां श्मशाने
ससरीसृपे सभये कूपतीरे वा ।
चैत्यवल्मीक सञ्चये देशेष्वेतेषु ।
तत्त्वज्ञो योगाभ्यासं विवर्जयेत् ।
सत्त्वस्यानुपपत्तौ च देश काल-
विवर्जिते नासतो दर्शनं योगे
तस्मात्तत् परिवर्जयेत् । दोषान्ने-
तान्नवज्ञाय मूढत्वाद्यो युनक्ति वै
विघ्नाय तस्य वै दोषा जायन्ते ता-

निरोधमे वाधिर्यं जडता लोपः स्मृतेर्मूकत्वमेव तथा ज्वरश्च जायते सद्य तद्वत् तस्मात् योगिनः [illegible] दायोगिना दोषा यथोक्तेषु चि कित्सितं [illegible] नाशाय कर्त्तव्यं योगिनानं निरोधय मे स्निग्धां यवागूं [illegible] भुक्तायेव धार येत् वात गुल्म प्रशान्त्यर्थं [illegible] वर्त्ते नतो [illegible] यथा तथैव प वने वायुग्रन्थिं परिक्षिपेत्। न हृत्कम्पमहारोगे स्थिरं मनसि धारयेत् विधाने वचसो वापि वाधिर्ये श्रवणेन्द्रिये। तथैवाम्र फलं ध्यायेत् स्वादेतां रसनेन्द्रिये। यस्मिन् यस्मिन् रुजा देहे तस्मिं स्तदुपकारिणीं धारयेद्धारणां बुद्धि शीते शीते विदाहिनी। कील शिरसि संस्थाप्य काष्ठकाष्ठेन ता डयेत् लुप्तस्मृतेः स्मृतिः सद्यो योगिनस्तेन जायते। द्यावापृ थिव्यौ वाय्वग्नी व्यापिना वपुधारये त् अमानुषात् सत्त्वजाताद्बाधासि निचिकित्सितं। अमानुषं सत्त्वमन्त र्योगिनं प्रविशेद्यदि। वाय्वग्नि धारणेनैव देहसंस्थं विनिर्दहेत् एवं सर्वात्मना कार्य्या रक्षा योग विदा नृप धर्मार्थकाममोक्षाणां शरीरं साधनं यतः प्रवृत्तिलक्ष णां ख्याता योगिनो विस्मयात्तथा विज्ञानं विलयं याति तस्माद्गो प्याः प्रवृत्तयः अलौल्यमारोग्य मनिष्ठुरत्वं गन्धः शुभो मूत्रपुरीष मल्पं कान्तिः प्रसादः स्वरसौम्यता च योगप्रवृत्तेः प्रथमं हि चिह्नं अनुरागं जनो याति परोक्षे गुण कीर्त्तनं न बिभ्यति च सत्त्वानि सिद्धे र्लक्षणमुत्तमं शीतोष्णादिभि रु ग्रैर्यस्य बाधा न जायते। न भी तिं मेति चान्येभ्यस्तस्य सिद्धिरु पस्थिता। इति मार्कण्डेयपुराणे योगि चिकित्सा नामाध्यायः ॥

॥ अथ त्रिविधयोगः ॥

श्रीभगवानुवाच। योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया। ज्ञानं कर्म च भक्तिश्च नोपायो ऽन्योऽस्ति कुत्रचित्। निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनां। यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः। तावत् कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते स्वधर्मस्थो

यजन् यज्ञैरनाशीःकाम उद्धव न याति स्वर्गनरकौ यद्यन्यन्न समा चरेत्। अस्मिँल्लोके वर्त्तमानः स्वधर्मस्थोऽनघः शुचिः ज्ञानं वि शुद्धमाप्नोति मद्भक्तिं वा यदृच्छया इति श्रीभागवते ११ स्कन्धे २० अध्यायः। सांख्ययोगः ॥ २ कर्मयोगः ३ ज्ञानकर्मसंन्यासयोगः ४ संन्यासयोगः ५ ध्यानयोगः ६ विज्ञानयोगः ७ ब्रह्मयोगः ८ राजयोगः ९ विभूतियोगः १० भक्तियोगः १२ प्रकृतिपुरुषवि वेकयोगः १३ गुणत्रययोगः १४ पुरुषोत्तमयोगः १५ आहारविवेकयो गः १७ मोक्षयोगः १८ एते योगा एतेष्वध्यायेषु भगवद्गीतायां द्रष्टव्याः ॥ अथ विष्कम्भादि योगा नयन क्रमः। रवीन्दु योग लिप्ताभ्यो योगा भ भोग भा जिताः। गत गम्याश्च षष्टिघ्ना नाड्यो भुक्त्यन्तरोद्धृताः ॥ इति सूर्य्यसिद्धान्तः ॥ योगचरः पुं हनूमान् इति शब्द रत्नावली ॥ योगजं क्ली अगुरु। इति शब्द चन्द्रिका ॥ योगजाते त्रि ॥ योगजः पुं अलौकिकसन्निकर्ष विशेषः। स च द्विविधः। युक्त युञ्जानश्च। यथा। अलौकिकः स न्निकर्षस्त्रिविधः परिकीर्त्तितः सा मान्यलक्षणो ज्ञानलक्षणो यो गजस्तथा। आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते। तदि न्द्रियजतद्धर्मबोधसामग्र्यपे क्ष्यते विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः। योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभे दतः। युक्तस्य सर्वदा भानं चिन्ता सहकृतोऽपरः। इति भाषा परिच्छेदः ॥ योगज इति। यो गाभ्यासजनितधर्मविशेषः श्रुति पुराणादिप्रमाणकः इत्यर्थः युक्त युञ्जान रूप योगि द्वैवि ध्यात् धर्मस्य द्वैविध्यमिति भावः युक्तस्येति योगाभ्यासवशेन वश्रीकृत मनसा संप्रतिसमाधि न विविधसिद्धियुक्त इत्युच्यते। अयमेव विशिष्टयोगवान् युक्त इत्युच्यते। सर्वदेति। चिन्तासह कारं विनेत्यर्थः। भानं सर्वविष याणां प्रत्यक्षं। अपरो युञ्जानः विषयव्यावृत्त्या मानसं समाधिस्थः अयं च युञ्जान उच्यते चिन्ताध्यानं तदेव कारणं तत् सहकारात्स्थूल

सूक्ष्म व्यवहित विप्रकृष्टानर्थानात्मनः प्रत्यक्षीकरोतीत्यर्थः । इति सिद्धान्तमुक्तावली ॥

योगदानं, क्ली, छलेनदानं । यथा, — "योगाधमनविक्रीतं योगदानप्रतिग्रहं । यत्र वाप्युपधिं पश्येत् तत् सर्वं विनिवर्त्तयेत् ॥" इति मानवे ८ अध्यायः । योगाधमने इति योगशब्दश्छलवाचीच्छलेन ये बन्धकविक्रयदानप्रतिग्रहाः क्रियन्ते न न भवन्तो ऽन्यत्रापि निःक्षेपादौ यत्रोपधिं जानीयात् वञ्चनेन निःक्षेपादिनिहितं तत् सर्वं निवर्त्तयेत् इति तट्टीकायां कुल्लूकभट्टः ॥

योगनाविकः, पुं, मत्स्यविशेषः । तत्पर्य्यायः । गर्गाटः २ । इति हारावली ॥

योगनिद्रा, स्त्री, दुर्गा । यथा, — "यानि ब्रह्मणः स्थावरस्याजगदंडकपालात् विभज्य पुरुषं याति योगनिद्रेति सोच्यते ।" इति कालिकापुराणे ८ अध्यायः ॥

योगपट्टकं, क्ली, पृष्ठादेशाज्जानुपर्य्यन्त शरीरवेष्टः । योगपाटा इति भाषा । यथा, — "त्रिविधं योगपट्टकम् ... द्वितीयं । मृगचर्म्मोद्भवं तृतीयं तेन निर्म्मितं चतुर्मात्रप्रविस्तारं दैर्घ्येण यत् सूत्रवत् चतुर्मात्रं ... " इति वीरमित्रोदयधृत सिद्धान्तशेखरः ॥

योगपीठं, क्ली, देवानां योगासनं । यथा, — "मण्डलं योगपीठञ्च पद्मं पद्मे विचिन्तयेत् । धर्म्मादीन्यासनान्तानीह तत्राप्यपि विचिन्तयेत् । योगपीठं हृत्पद्मध्यात्वा मण्डलेन सहैकतो पुनर्ध्यात्वा ततः पश्चात् पूजयेदासनं ततः । ध्यानेन योगपीठस्य ध्यात्वा यद्दीयते जलं नैवेद्यं पुष्पधूपादि तेन स्वयंचोपतिष्ठन्ते सर्वे देवाः सगन्धर्व्वाः सचराचरगुह्यकाः । विजिताः पूजिताश्चास्य योगपीठस्य पूजने ॥" इति कालिकापुराणे ५९ अध्यायः ॥

योगमाया, स्त्री, भगवती सा च विष्णुमा । यथा, — "ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् । यदा बहिर्गन्तुमियेष तर्ह्यजा या योगमायाजनि नन्दजायया ॥" इति श्रीभागवते १० स्कन्धे ३ अध्यायः ॥

योगरङ्गः, पुं, नारङ्गः । इति राजनिर्घण्टः ॥

योगरूढः, पुं, योगार्थसद्भावेन रूढ्यर्थबोधकशब्दः । यथा, — "योगरूढाश्च रूढाश्च यौगिकाश्चेति ते त्रिधा ते शब्दाः पुनस्त्रिधा भवन्ति योगरूढाः पंकजादयः पंकजनिकर्त्तृत्वरूपेकेन योगेनापि पद्मार्थ एव प्रतिपाद्यते न कुमुदार्थे इति योगार्थपुरस्कारेणापि रूढ्यर्थप्रतीति योगरूढः । एवं ईश्वरसंकेतमहिम्ना रूढिरिति प्रसस्यैवस्यतेः" इत्यलंकारकौस्तुभे २ किरणः ॥

योगवाहः, पुं, अनुस्वारः विसर्गः जिह्वामूलीयः ॥ उपध्मानीयः इति व्याकरणं ॥

योगवाही, स्त्री, क्षारविशेषः । यथा, — "सर्जिस्तु सर्जिकास्त्री योगवाही सुवर्चिका ।" इति हेमचन्द्रः ॥ पारदश्च ॥

योगसारः, पुं, सर्वरोगहरोपायः । यथा, धन्वन्तरिरुवाच । "सर्वरोगहरं सिद्धं योगसारं वदाम्यहं मृत्युसञ्जन संक्षेपात् प्राणिनां जीवहेतवे ॥ निमेषादि दिवाः कालश्चिन्ताभिः षड्विधो भवेत् कषायकटुतिक्ताम्लरूक्षाहारादेः सेवनात् । दिवाव्यवायव्यायाम क्षुधाशोकप्रजागरात् । उष्णभोज्यातिमात्राच्च कर्म्मणामतिकर्षणात् । ... वायुः कुप्यति पर्व्वणि नी ... दिवसं तृतीये ऽम्ललवणक्षारकटुकाजीर्णभोजनात् । तीक्ष्णातपाग्निसंताप मद्यक्रोधनिषेवणात् विदाहकाले भुक्तस्य मध्याह्ने जलदागमे । ग्रीष्मकाले ऽर्द्धरात्रेपि पित्तं कुप्यति हेतिनः स्वाद्वम्ललवणस्निग्धगुरुशीतातिभोजनात् नवान्नपिष्टानूपमांसाभिष्यन्दि सेवनात् ॥ अव्यवायो दिवास्वप्न सुखासन सखादिभिः । कफः प्रदोषे भुक्ते च वसन्ते च प्रकुप्यति पारुष्य शूल संकोच तोद विस्तम्भ भेदनात् लेशता सुप्तता हर्ष रोम स्तम्भन शोषणं एवं वायुविशेष वेदनाशमवर्त्तनं । वायोर्लिंगानि तेषु रोगं वातात्मकं वदेत् । दाहोष्म पाक स्वेद क्लेद कोथ राग परिस्रवाः । कण्डूस्राव वेगंध्य स्नेह मूर्च्छांतिरुग्भ्रमा हारिद्रं हरितत्वं च पित्तलिंगानि ते लयः स्नेहोपदेहमाधुर्य्य चिरकारित्व । बन्धनं । ... संचान

योग्य शीतत्व गौरवं लैङ्ग नि
द्राभियोगस्य लक्षणं कफसम्भवं
हेतु लक्षण संसर्गाद्वियाद्वन्द्वि
दोषजं । सर्वहेतुसमुत्थं त्रे
त्रिलिङ्गं सान्निपातिकं । दोष
धातु मलायाद्या देहिनो देह उ
च्यते । तेषां समत्व मारोग्यं ।
क्षय वृद्धी विपर्य्ययः रसासृङ्
मांसमेदोऽस्थि मज्ज शुक्राणि धातवः
वातपित्त कफा दोषा विण्मूत्राद्या
मलाः स्मृताः । वायुः शीतो लघुः
सूक्ष्मः खरो रूक्षोऽस्थिरो बली
पित्त मम्ल कटुस्तीव पक्वाजी
रोग कारणं मधुरो लवणः स्नि
ग्धो गुरुः श्लेष्मा निपिच्छिलः गुरं
श्रोत्रास्थ्यो वायुः पित्तं पक्वाशय
स्थितं कफस्यामाशयः स्थानं कं
ठोरुमूर्द्धसंधयः कटुतिक्तकषा
याश्च कफपित्तादि सम्भवाः कटम्ल
लवणाः पित्तं स्वादूम्ललवणाः कफं
घ्नत एव विपर्य्यस्ताः समायेषां ।
प्रयोजिताः भवन्तिरोगिणां प्रा
यै स्वास्थ्यानां स्वास्थ्यहेतवः इत्या
दि गारुडे १७२ अध्यायः ।
योगक्षेमं क्ली अलब्धलाभलब्धपाल
नयोः यथा मनुः । दिवावक्तव्यता
पाले रात्रे स्वामिनि तद्गृहे ।
योगक्षेमे ऽप्यथो येन पालो
वक्तव्यता मियात हद्दंगिराः
अनागतस्य चानेता आगतस्य च
रक्षकः रात्रावपि यथान्यायं ।
तद्गृहस्वामी नदोषभाक् । इति
प्रायश्चित्ततत्त्वं । अपिच । फल
पुष्पादे रलब्धस्य साधनं योगः
शरीरादे र्लब्धस्य पालनं क्षेमः
इति भट्टिटीकायां भरतः । यो
गक्षेमौ शरीरस्थिति पालने ।
इति तत्रैव जयमङ्गलः यथा ।
योगक्षेमकरं कृत्वा सीतायाः ल
क्ष्मणानन्तः मृगस्याक्षपदीरामोऽज
गाम गजविक्रमः । इति भट्टि
काव्ये ५ सर्गः ॥
योगापमनं क्ली छलेनवंचनं य
था योगापमन विक्रीतं योगदानप्र
तिग्रहं यत्रवाप्युपधिं पश्येत् ।
तत्सर्वं विनिवर्त्तयेत् इति मनुः
अस्य विवरणं योगदान शब्दे
द्रष्टव्यं ॥
योगारंगः पुं नारंगः इति राज
निर्घण्टः ॥
योगारूढः पुं इन्द्रियार्थान्नासक्त
कर्मस्वासक्तः । यथा । यदाहिने
न्द्रियार्थेषु न कर्मस्वनुषज्जते सर्व
संकल्प संन्यासी योगारूढ स्तदो

च्यते । इति श्रीभगवद्गीतायां ६
अध्यायः कीदृशोयं योगारूढो
यस्य शमः कारणमुच्यते इत्य
त्राह यदेति इन्द्रियार्थेष्विन्द्रि
यभोग्येषु शब्दादिषु तत्साधनेषु
कर्मसु यदा नानुषज्जते आसक्तिं
न करोति । तत्रहेतुः आसक्ति
मूलभूतान् सर्वान् भोग विष
यान् कर्मविषयांश्च संकल्पान्सं
न्यसितुं त्यक्तुं शीलं यस्य स त
दा योगारूढ उच्यते इति तट्टी
कायां श्रीधरस्वामी ।
योगासनं क्ली ब्रह्मासनं ध्यानास
नं । इति हेमचन्द्रः ॥
योगिदण्डः पुं वेत्रः इति राज
निर्घण्टः ॥
योगिनी स्त्री योगयुक्ता नारी अ
ष्टसख्याः सखी रूपा आवरणदेवताः
तासां कोटि मिता तासामध्ये च
तुः षष्टिः प्रधानाः यथा नारा
यणी १ गौरी २ शाकम्भरी ३ भीमा
४ रक्तदन्तिका ५ भ्रामरी ६ पार्वती
७ दुर्गा ८ कात्यायनी ९ महादेवी
१० चण्डघण्टा ११ महाविद्या १२
महातपा १३ सावित्री १४ ब्रह्मवा
दिनी १५ भद्रकाली १६ विशालाक्षी
१७ रुद्राणी १८ कृष्णपिङ्गला १९ अग्नि
ज्वाला २० रौद्रमुखी २१ कालरात्रिः
२२ तपस्विनी २३ मेघस्वना २४ स
हस्राक्षी २५ विष्णुमाया २६ जलो
दरी २७ महोदरी २८ मुक्तकेशी २९
घोररूपा ३० महाबला ३१ श्रुतिः ३२
स्मृतिः ३३ धृतिः ३४ तुष्टिः ३५
पुष्टिः ३६ मेधा ३७ विद्या ३८ लक्ष्मीः
३९ सरस्वती ४० अपर्णा ४१ अम्बि
का ४२ योगिनी ४३ डाकिनी ४४ शा
किनी ४५ हाकिनी ४६ राकिनी ४७
लाकिनी ४८ त्रिदशेश्वरी ४९ महाष
ष्ठी ५० सर्वमङ्गला ५१ लज्जा ५२ कौ
शिकी ५३ ब्रह्माणी ५४ माहेश्वरी ५५
कौमारी ५६ वैष्णवी ५७ ऐन्द्री ५८
नारसिंही ५९ वाराही ६० चामुण्डा
६१ शिवदूती ६२ विष्णुमाया ६३ मा
तृका ६४ इति नन्दिकेश्वरपु
राणोक्तदुर्गा पूजा पद्धतिः । अपिच
ब्रह्माणी चण्डिका रौद्री गौरीन्द्राणी
तथैव च कौमारी वैष्णवी दुर्गा
नारसिंही च कालिका चामुण्डा
शिवदूती च वाराही कौशिकी तथा
माहेश्वरी शाङ्करी च जयन्ती सर्व
मङ्गला काली कपालिनी मेधा
शिवा शाकम्भरी तथा भीमा शान्ता
भ्रामरी च रुद्राणी चाम्बिका तथा
क्षमा धात्री स्वाहा स्वधापर्णा ।

महोदरी घोररूपा [illegible]काली
भद्रकाली भयंकरी क्षेमंकरी घो
रचंडा चंडोग्रा चंडनायिका चंडा
चंडवती चंडी महामोहा प्रियंकरी
बलविकरिणी देवी बलप्रमथिनी
तथा मनोन्मथिनी [illegible] च सर्व
भूतस्य दमिनी । उमा तारा महा
निद्रा विजया च जया तथा शैल
जाः शैलपुत्र्याद्या योगिन्यश्चैव
याः क्रमात् [illegible]भिरभिस्सहिताश्च
त्वः षष्टीश्च योगिनीः पूजयेन्मंडल
स्थानः सर्वकामार्थसिद्धये दलिका
लिकापुराणे ९२ अध्यायः । अ
ष्टयोगिन्यो यथा तन्मोद्दयेद्दल
स्य पूजयेदष्टयोगिनीः शैलपुत्री
चंडघंटा स्कंदमाता मेव च । का
लरात्रिं च पूर्वादि क्रमादित्य पू
जयेत् चंडिकामथ कूष्मांडीं तथा
कात्यायनीं शुभां । महागौरी ।
वायुकोणे नैर्ऋत्यादिषु पूजयेत्
इति तत्रैव ५२ अध्यायः ॥
तिथिविशेषे दिग्विशेषावस्थितयो
गिन्यो यथा ब्रह्माणी संस्थिता पूर्वे
प्रतिपन्नवमी तिथौ माहेश्वरी
चोत्तरे च द्वितीया दशमी तिथौ
स्थिता मैव च कौमारी तृतीयैका
दशी तिथौ नारायणी च नैर्ऋते

चतुर्थी द्वादशी तिथौ पंचम्यां च
त्रयोदश्यां वाराही दक्षिणे तथा
षष्ठ्यां चैव चतुर्दश्यां मिन्द्राणी पश्चि
मे स्थिता सप्तम्यां पौर्णमास्यां च ।
चामुंडा वायुगोचरे अष्टम्यां
अमायां च महालक्ष्मी शंभुगोचरे यो
गिनी संमुखं नैव गमनादिषु कार
येत् इति गारुडे ५९ अध्यायः
॥ अपि च प्रतिपन्नवमी पूर्वे
ब्राह्मी रुद्राश्च पावके [illegible] द्वयो
दशी याम्ये वेदा मासाश्च नैर्ऋते
षष्ठी चतुर्दशी पश्चात् वायव्यां
तु निपूर्णिमा । द्वितीया दशमी
सौम्ये ऐशान्यां चाष्टमी कुहू [illegible]
मे शुभकरी देवी [illegible]
ला वधबंधकरी वामे पृष्ठे [illegible]
साधनी । इति ज्योतिस्तत्त्वे । तत्र
काल योगिनी यथा यस्यां दिशि
दृष्ट्वा याति ततो यामार्धभुक्तिका
भुक्त्वा तेन मार्गेण भवेत्तत्काल
योगिनी प्राची यमेश्वर हुताशन
कोणाप्ययवायव्यवारुणायम्यदिश
[illegible] क्रमाद्विशति प्रति
पत्क्रमात् [illegible] शुभकरी ति
थिरानुपूर्वी इति स्मृत्यर्थेन ।
। अथ योगिनीसाधने
भूतडामरे अथातः संप्रवक्ष्यामि ।

मि योगिनीसाधनं सर्वार्थ
